
श्रीमद्भागवत महापुराणम्

सङ्ग्रहोक्तिटीका सहितम्

प्रथमखण्डः - १




टीका लेखकः संपादकश्च

ज्ञानप्रकाशदासः शास्त्री, वेदान्ताचार्य, एम.ए.









ॐ

श्रीस्वामिनारायणो विजयतेतराम्

श्रीमद् भागवत महापुराणम्

संग्रहोक्तिटीकासहितम्

टीकालेखकः संपादकश्च
शास्त्री ज्ञानप्रकाशदासः

-: प्रकाशक :-
श्रीस्वामिनारायण साहित्य प्रकाशन मंदिर
स्वा.ना.गुरुकुल - सेक्टर - २३, गांधीनगर
संवत - २०७१ कार्तिक शुक्ल द्वादशी ई.स. २०१४

This Edition is Published by
Shastri Ramkrishnadasaji
Shastri Akshar prakashdasaji

Gurukul, Sector-23, Gandhinagar -382023, Gujarat
(079) 23229419

First Edition 2071 Kartik shukla - 12

श्रीहरिप्रसन्नतार्थे समर्पणम्

Printed at
Satsang Press , Gandhinagar

Receiving Address
Shree Swaminarayan Gurukul, Sector-23, Gandhinagar
Ph:- 079-23229419 - 23222727


શ્રીગોપીનાથજી મહારાજ ગઢડા મંદિર



श्रीमद्धार्मिसुदिव्यविग्रहसमः ख्यातो जगत्यां भृशम्,
दुर्गाख्ये नगरे नृपोत्तमगृहे राजन् शुभे मन्दिरे ।
श्रीराधासहितस्तथैव हरियुक्कृष्णेन युक्तः सदा,
गोपीनाथ इति प्रसिद्धमहिमा वर्वर्त्ति सर्वोपरि ॥

सम्पादकः


શ્રીઘનશ્યામ મહારાજ - સ્વા.ના. ગુરુકુળ - ગાંધીનગર



कर्पूरेन्दुतुषारकुन्दधवलः कौसुम्भवासो दधत्,
हारान् कुन्दविनिर्मितान् बहुविधान् कण्ठे दधच्चोत्तमान् ।
लावण्यप्रविभासिताननघनश्यामः सदाभालषन्,
सत्सङ्गे भवने सुगान्धिनगरे वर्वर्त्ति सर्वोपरि ॥

सम्पादकः


જેમની અંતઃપ્રેરણાથી શ્રીમદ્ ભાગવત મહાપુરાણ સંગ્રહોક્તિ ટીકાની રચના થઈ છે. તે
સ.પુરાણી સ્વામી શ્રીહરિપ્રિયદાસજી - ગઢડા મંદિર (સ્વા.ગુરુકુળ, ગાંધીનગર)



सौम्याकृतिर्विविधशास्त्रपुराणवेत्ता,
सत्सङ्गकीर्तनरतो हरिपादसक्तः ।
प्रीणातु सद्गुरुवरोऽखिलसाधुतायाः,
सीमा सदा मयि हरिप्रियदासनामा ॥

सम्पादकः

જેમની પ્રેરણાથી શ્રીમદ્ ભાગવત મહાપુરાણ સંગ્રહોક્તિ ટીકાની રચના થઈ છે. તે
શાસ્ત્રી સ્વામી શ્રીહરિપ્રકાશ - સ્વા.ના. ગુરુકુળ ગાંધીનગર



समर्पणम्

ऋग्वेदवेदान्तसुसाङ्ख्ययोग-
सैतिह्यपौराणिकशास्त्रवृन्दम् ।
अधीत्य धर्मेण युतं च तत्त्वं,
विशेषतस्तत्तुलनात्मकं यः॥

सत्संगसाहित्यविकाशकर्ता,
सत्संगशिक्षापरिषत्समित्योः ।
नेता प्रपोष्टा सुरभिव्रजस्य,
कौशल्यभाक् शास्त्रिहरिप्रकाशः॥

हरौ गुरौ भक्तिमतश्च तस्य,
समर्प्यतेऽब्धा करयोः सुरम्या ।
ज्ञानप्रकाशेन सुनम्य व्यास-
समाधिभाषास्थितसंग्रहोक्तिः ॥





પ્રકાશકીય

શ્રીમદ્ ભાગવત સાક્ષાત્ ભગવાનનું સ્વરૂપ છે. શ્રદ્ધાપૂર્વક આ ગ્રંથના શ્રવણમાત્રથી ભગવાનની પ્રાપ્તિ થાય છે. શ્રીમદ્ ભાગવત ના શ્લોકોનો પાઠ કરવા માત્રથી સંસાર બંધન છૂટી જાય છે. એટલા માટે ભગવત પ્રેમી ભક્તો હરહંમેશ આ ગ્રંથનો પાઠ આદર સહિત કરે છે.

श्लोकं भागवतं चापि श्लोकार्धं पादमेव वा । लिखितं तिष्ठते यस्य गृहे तस्य वसाम्यहम् ॥

શ્રીભગવાન કહે છે. જેના ઘરમાં શ્રીમદ્ ભાગવતનો એક શ્લોક, અર્ધો શ્લોક અથવા તો શ્લોકનું એકાદ ચરણ પણ લખેલુ હોય તો ત્યાં હું નિવાસ કરીને રહું છું.

કલિયુગમાં જીવાત્માના ઉદ્ધારનું એકમાત્ર સાધન શ્રીભગવાનનું નામ સ્મરણ કરવું તે જ છે. એમ શ્રીમદ્ ભાગવતમાં કહ્યું છે.

आपन्नः संसृतिं घोरां, यन्नाम विवशो गृणन् । ततः सद्यो विमुच्येत, यद् बिभेति स्वयं भयम् ॥ १ । १ । १४

ઘોર સંસારના બંધનમાં પડેલો માણસ પરવશતાથી પણ જો ભગવાનના નામનું ઉચ્ચારણ કરે છે. તો તે તરત જ મુક્ત થાય છે. કારણ કે ભય પણ ભગવાનથી ડરે છે.

શ્રીશુકદેવજી કહે છે.

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः । कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥

કલિયુગ દોષનો ખજાનો છે. પરંતુ સૌથી મોટામાં મોટો એક ગુણ એ છે કે ભગવાનના સંકીર્તનમાત્રથી જ આસક્તિઓ તૂટી જાય છે. અને પરમાત્માની પ્રાપ્તિ થાય છે. સત્યયુગમાં ધ્યાનથી, ત્રેતાયુગમાં યજ્ઞથી, દ્વાપરયુગમાં પૂજા-અર્ચનાથી જે ફળ મળે છે. તે ફળ કળિયુગમાં કેવળ ભગવાનના ભજ઼નથી જ મળી જાય છે.

શ્રીસૂતજીએ કહ્યું છે.

पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रुवन् । हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ १२।१२।४६।

પડતા-આખડતા, કષ્ટ ભોગવતા, છીંક ખાતા અથવા વિવશતાથી 'હરયે નમઃ' એમ બોલે છે તો તે બધા જ પાપોથી મુક્ત થઇ જાય છે.

શ્રીમદ્ ભાગવત અલૌકિક ગ્રંથ છે. તેમાં વર્ણાશ્રમધર્મ, માનવધર્મ, કર્મયોગ, અષ્ટાંગયોગ, જ્ઞાનયોગ અને ભક્તિયોગ આદિ ભગવત પ્રાપ્તિના બધા જ સાધનોનું સારી રીતે વર્ણન કરેલું છે. પરંતુ ધ્યાનથી વિચારવામાં આવે તો ભાગવતમાં ભક્તિનું વિશેષરૂપે નિરુપણ કરવામાં આવ્યું છે. ભાગવતમાં સાધન અને સાધ્ય બન્ને પ્રકારની ભક્તિનું વર્ણન છે. ગ્રંથનો આદિ, મધ્ય અને અંત ભક્તિથી ઓતપ્રોત છે. પહેલા સ્કન્ધમાં કહેવામાં આવ્યું કે

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे । अहैतुक्यप्रतिहता ययाऽऽत्मा संप्रसीदति ॥ १।२।६

મનુષ્યનો ઉત્તમ ધર્મ 'પરમધર્મ' તે છે, જેથી શ્રીહરિમાં નિષ્કામ અને અવ્યભિચારિણી ભક્તિ થાય. ભક્તિથી જ હૃદય આનંદસ્વરૂપ ભગવાનને પ્રાપ્ત કરીને કૃતકૃત્ય થાય છે.

ભક્તિનો મહિમા કહેતા સ્વયં ભગવાન્ શ્રીકૃષ્ણએ ઉદ્ધવજીને ત્યાં સુધી કહી દીધું છે. કે

न साधयति मां योगो न सांख्यं धर्म उद्धव । न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥

મારી સર્વોત્કૃષ્ટ ભક્તિ મને જેમ સહજતાથી પ્રાપ્ત કરાવનારી છે. તેવી સહજતાથી યોગ, જ્ઞાન, ધર્મ , વેદાદિનો સ્વાધ્યાય, તપ અને દાન મને પ્રાપ્ત કરાવી શકતા નથી.

એકમાત્ર શ્રદ્ધાસંપન્ન ભક્તિથી જ મને સરળતાથી પ્રાપ્ત કરી શકાય છે. બીજીતો ક્યાં વાત કરવી પણ મરેલા પશુઓનું માંસ ખાનાર ક્ષુદ્રોને પણ મારી ભક્તિ પવિત્ર કરી દે છે.

धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥

મનુષ્યોમાં સત્ય અને દયાની સાથે ધર્મ હોય, તપસ્યાથી યુક્ત વિદ્યા પણ હોય, પરંતુ મારી ભક્તિ ન હોય તો તે ધર્મ અને વિદ્યા તે મનુષ્યના હૃદયને સંપૂર્ણ પવિત્ર કરી શકતા નથી.

ભક્તિના આવેશમાં આવી જઇને જે ભક્તની વાણી ગદ્ગદિત થઈ જાય છે. તેનું ચિત્ત દ્રવી જાય છે. તે ક્યારેક રડે છે. ક્યારેક હસે છે. ક્યારેક સંકોચ છોડી ઊંચે સ્વરે ગાવા લાગે છે, નાચવા લાગે છે. તે મારો ભક્ત સ્વયં તો પવિત્ર હોય છે. પરંતુ તે મારો ભક્ત ત્રણે લોકને પવિત્ર કરી દે છે. જેવી રીતે સોનાને અગ્નિમાં તપાવવાથી સોનુ મલિનતા છોડી દે છે. અને તે શુદ્ધ થઇ જાય છે. તેવી રીતે મારા ભક્તિયોગ દ્વારા આત્મા પણ કર્મવાસનાથી મુક્ત થઇ મને ભગવાનને પ્રાપ્ત થઇ જાય છે.

એવી જ પ્રેમલક્ષણા ભક્તિનું વર્ણન શ્રીમદ્ ભાગવત ગ્રંથમાં સારીરીતે કરવામાં આવેલું છે. શ્રીમદ્ભાગવત નો દશમ સ્કન્ધતો ભક્તિથી ભરપૂર છે. ભગવાનની વિવિધ લીલાઓનું વર્ણન વાંચવા સાંભળવામાં અતિશય આનંદ આવે એવું છે.

એટલે જ અમારા ગુરુ પ.પૂ.શાસ્ત્રી સ્વામી જ્ઞાનપ્રકાશદાસજી વારંવાર અનેક પ્રસંગોમાં કહેતા હોય છે. કે જે સમય સચ્છાસ્ત્રના વાંચન લેખનમાં જાય છે. તેમાં મને ભગવાનની સ્મૃતિ સતત રહ્યા કરે છે. એ જ મોટામાં મોટો આત્મ સંતોષ છે. અને હું એટલા માટે જ આ પ્રવૃત્તિ કરું છું.

ઉપરોક્ત ભગવાન શ્રીકૃષ્ણે ઉદ્ધવજીને ત્રણે લોકને પાવન કરનારા જે ભક્તોની વાત કરી તે મુજબના વાણી, વર્તન અને વ્યવહાર અમારા ગુરુ પ.પુ. શા. સ્વામીજી માં અમે સૌ સંતમંડળ, અને ગુરુકુળ પરિવારના તમામ સભ્યોએ જોયેલા છે. દરરોજ ષોડશોપચારવિધિથી બે કલાક નિયમિત મહાપૂજા કરવી તે તેમનો નિત્યક્રમ બની ગયો છે. આટલી ઉમરે વહેલા ત્રણ વાગે જાગી મહાપૂજા કરી લેખન કાર્યમાં લાગી જવું અને સતત ૧૦ થી ૧૧ કલાક કામ કરવું તે યુવાનોને માટે પણ અશક્ય છે. આ તેમના ઉપરોક્ત પ્રેમલક્ષણા ભક્તિના ગુણોને કારણે જ શક્ય બની શકે છે. ભગવાનના સાકારપણાને પ્રતિપાદિત કરતી સંક્ષિપ્ત સંગ્રહોક્તિટીકા લખવાનો તેમનો આશય સર્વે ભક્તો, સંતોને સંક્ષેપમાં સરળતાથી સમજવા સમજાવવા ઉપયોગી થાય તેવો અતિ ઉત્તમ રહ્યો છે. સંગ્રહોક્તિટીકા લખવાનો તેમનો સંકલ્પ આજ ફળીભૂત થઇ રહ્યો છે. તેપણ સંસ્કૃતમાં લખવું તે ખૂબજ કઠિન અને પ્રચંડ પુરુષાર્થ માગી લે તેવું કામ, ભગવાનની સંપૂર્ણ કૃપાથી આજ આ ભગીરથ કાર્ય મૂર્ત સ્વરૂપ ધારણ કરી રહ્યું છે. સંપ્રદાયમાં યાવચ્ચંદ્રદિવાકરૌ સૌ સંત હરિભક્તોને તેમજ વિદ્વાન્ કથાકાર સંતો અને વિપ્રોને આ સંગ્રહોક્તિટીકા ખૂબજ ઉપયોગી થશે. આ પ્રકાશનમાં શા. ભક્તિપ્રકાશદાસજી સ્વામી, શા. શ્રીધર્મકિશોરદાસજી સ્વામી, શા. શ્રીભક્તિકિશોર દાસજી સ્વામી, શા. શ્રીભક્તિસ્વરૂપદાસજી વગેરે સંતોએ ટાઇપીંગ સેટ કરવા વગેરે નાની મોટી સેવામાં સહયોગ આપ્યો છે, તેથી તે સૌ સંતોના અમે આભારી છીએ. સંગ્રહોક્તિટીકા સંપ્રદાયને ભેટ આપવા બદલ પ.પૂ. શાસ્ત્રી સ્વામી જ્ઞાનપ્રકાશદાસજીના શ્રીચરણોમાં શત શત પ્રણામ.

સેવકો :- શા. રામકૃષ્ણ તથા શા. અક્ષરપ્રકાશ

સટીક શ્રીમદ્ભાગવત મહાપુરાણ

પ્રાસંગિકમ્

શ્રીમદ્ભાગવત મહાપુરાણ સ્વામિનારાય ભગવાનને ખૂબ જ પ્રિય હતું. તેમણે પોતાના જીવનકાળ દરમ્યાન આ મહાપુરાણનું સહુથી વધારે વાંચન-શ્રવણ કર્યું છે. શિક્ષાપત્રીમાં પણ શ્રીજીમહારાજે પોતાને માન્ય આઠ સત્શાસ્ત્રોમાં ભાગવતજીની ગણના કરી છે. એટલું જ નહીં, તેના પંચમસ્કંધને યોગશાસ્ત્ર અને દશમસ્કંધને ભક્તિશાસ્ત્રનું ગૌરવ આપ્યું છે. વળી તમામ સત્સંગીઓએ વર્ષમાં એકવાર આ મહાપુરાણ વાચવું અથવા શ્રવણ કરવું, એવી આજ્ઞા કરી છે.

શ્રીહરિએ શ્રીમત્સત્સંગિજીવનના ચતુર્થ પ્રકરણના પ્રારંભમાં આઠ અધ્યાય સુધી શ્રીમદ્ ભાગવત પુરાણનો અનેકવિધ મહિમા ઉત્તમરાજાને ઉદ્દેશીને કહ્યો છે. એમાં સર્વે પુરાણોમાં ભાગવત અતિ શ્રેષ્ઠ મહાપુરાણ છે એવું માહાત્મ્ય કહ્યું છે.

ભગવાન વ્યાસકૃત અઢાર પુરાણોમાં આ શ્રીમદ્ ભાગવત પુરાણ સર્વોત્તમ છે. તેથી જ અનેક મહાપુરુષોએ આ ગ્રંથ ઉપર ટીકાઓ રચી છે. સ્વામિનારાયણ સંપ્રદાયમાં પણ આચાર્યપ્રવર શ્રીભગવત્પ્રસાદજી મહારાજે શ્રીમદ્ ભાગવતજી ઉપર **'ભક્તરંજની'** નામની વિસ્તૃત ટીકા લખી છે. જે સિદ્ધાંતપ્યાસીઓ માટે ઘણી જ ઉપયોગી છે.

ગઢપુરધામના મહાન સંત પુરાણી ત્રિકમચરણદાસજી સ્વામીના કૃપાપાત્ર શિષ્ય હાલ ગાંધીનગર નિવાસી **પ.પૂ. સદ્. શા. શ્રીજ્ઞાનપ્રકાશદાસજી સ્વામીને** પોતે ભણતા ત્યારથી મનમાં એવું રહ્યા કરતું કે, ' સ્વામિનારાયણ વિશિષ્ટાદ્વૈત સિદ્ધાંતને પુષ્ટિ કરે એવી અને શ્રીમદ્ ભાગવતને ભણનારા તથા તેના કથાકાર સંતો ભક્તો કે વિપ્રોને સહજ સરલપણે સમજાય એવી અને ખાસ ઉપયોગી થાય એવી એક ચૂર્ણિકા જેવી સંસ્કૃત ટીકા હોય તો સારું.'

સ્વામીશ્રીની ઉંમર હાલ ૭૫ થી વધુ વર્ષની છે. વળી, શારીરિક સ્વાસ્થ્ય પણ ઉંમર પ્રમાણે સુદઢ નથી રહેતું. તેમ છતાં પણ સત્સંગની સેવા કરવાની તેમની ધગશ ઘણા યુવાનોને પણ શરમાવે તેવી છે. તેથી જ પ્રભુજીએ આ સત્કાર્ય કરવાની શક્તિ તેમનામાં આપી. છેવટે તેમણે આ કાર્ય કરવાનો નિર્ણય લઇ લીધો.

પછી આ કાર્ય તેમણે શ્રીસ્વામિનરાયણ ગુરુકુલ સાવદા (મહારાષ્ટ્ર) માં રહી કરવાનું નક્કી કર્યું ત્યાં **પ.પૂ. શા. શ્રીધર્મપ્રસાદદાસજી સ્વામી (ખાનદેશી)** ના મંડળના પૂ. શ્રીભક્તિકિશોર સ્વામી, પૂ. શ્રીધર્મકિશોર સ્વામી વગેરે સંતોએ પણ આ કાર્યમાં પૂ. શાસ્ત્રી સ્વામીની સતત સાથે રહી ખૂબ સારી સેવા કરી છે. માટે તેઓ પણ ધન્યવાદને પાત્ર છે. આમ આ અતિ મહત્ત્વની સાહિત્યસેવા પ.પૂ. શાસ્ત્રી સ્વામી દ્વારા થઇ રહી છે.

પૂ. સ્વામીએ શ્રીમદ્ ભાગવત ઉપર રચાયેલ સંસ્કૃત ભક્તરંજની ટીકાને આધારે તેના જ સારરૂપે સ્કંધ ૧ થી ૮ તથા ૧૧, ૧૨ એમ કુલ ૧૦ સ્કંધની **'સંગ્રહોક્તિ'** નામની સુંદર ટીકા ફક્ત

ચાર માસમાં પૂરી કરી છે. આ કામ માટે પૂ. સ્વામીશ્રી આટલી મોટી જૈફ ઉંમરે પણ દરરોજ દસ બાર કલાક પરિશ્રમ કરી રહ્યા છે.

પૂ. સ્વામીએ અત્યાર સુધીમાં અનેક સદ્ગ્રંથો ભણ્યા-ભણાવ્યા છે. અનેક ગ્રંથોના સંશોધનો તથા અનુવાદો કર્યા છે. સદ્ગુરુ શ્રીઆધારાનંદકૃત **'શ્રીહરિચરિત્રામૃતસાગર'** જેવા મહાકાય ગ્રંથરાજનો ગુજરાતી અનુવાદ પણ પૂ. સ્વામીશ્રીએ કર્યો છે. આ રીતે સંસ્કૃત-પ્રાકૃત સાહિત્યનો તેમને બહોળો અનુભવ છે.

આ અનુભવોના આધારે તેઓશ્રીએ શ્રીમદ્ ભાગવત પુરાણ ઉપર લખેલ આ 'સંગ્રહોક્તિ' ટીકા ભાગવતજીના અભિપ્રાયને સરલતાથી સમજવા માટે ભણનારાને ખૂબ જ ઉપયોગી નિવડશે. તેમજ ભાગવતજીની કથા કરનાર વક્તાઓ પણ આ ટીકાને આધારે ઘણું પામી શકશે.

સ્વામિનારાયણ સંપ્રદાયના સાહિત્યના રક્ષણ, પોષણ અને સંવર્ધન માટે પૂ. સ્વામીએ જે સેવા કરી છે તે ખરેખર અદ્વિતીય છે. આ કાર્યથી આપણો સંપ્રદાય તથા આ ટીકાનો ઉપયોગ કરનાર સહુ કોઇ. પ.પૂ. સ્વામીશ્રીના ઋણી રહેશે.

પૂ. સ્વામીશ્રી મને ઘણીવાર નિખાલસ દિલથી એવું કહેતા રહ્યા છે કે, 'મારે આ ભાગવતજીની ટીકા લખવા પાછળ કોઇ માન-મોટાઇ જોતાં નથી કાંઇ પંડિતાઇ દેખાડવી નથી. પરંતુ મારા ઇષ્ટદેવનો સિદ્ધાંત ભણનારા સંત વિદ્યાર્થીઓના હ્રદયમાં પ્રારંભથી જ જો સરખો બેસી જાય તો તેઓ અંત સુધી વિશિષ્ટાદ્વૈત સિદ્ધાંતને પ્રતિપાદન કરવામાં ક્યાંય ભૂલથીય ઊણા ઊતરે નહીં. અને આ સેવાથી મારા ઉપર સર્વે સંપ્રદાય રાજી થશે તો શ્રીહરિજી મહારાજનો અઢળક રાજીપો મળશે. બસ આટલી જ મારા દિલમાં ઇચ્છા રહેતી હતી. તેથી મેં આ કાર્ય આરંભ્યું છે.'

મેં મારી અલ્પબુદ્ધિ પ્રમાણે સ્વામીશ્રીએ કરેલી **'સંગ્રહોક્તિ'** નામની ટીકાને થોડી નિહાળી, મને ખૂબ જ ગમી, હું દિલથી બહુ જ રાજી થયો છું. અને મારા દિલમાં પ્રતીતિ બેસી ગઇ છે કે, ' આ સંગ્રહોક્તિ ખરેખર હજારો વર્ષો સુધી શ્રીહરિ માન્ય શ્રીમદ્ ભાગવતસ્થ સિદ્ધાંતને ભણનારા વિદ્યાર્થીઓના હ્રદયમાં આરંભકાળથી જ દૃઢ કરીને સતત પુષ્ટિ કર્યા કરશે.' આ કાર્ય બદલ પૂ. સ્વામીશ્રીના શ્રીચરણોમાં કોટિ કોટિ વંદન કરું છું.

લી. સ્વામી જ્ઞાનજીવનદાસ (કુંડળધામ) ના
અતિ ભાવનથી જય શ્રીસ્વામિનારાયણ
તા.૯/૭/૨૦૧૪, બુધવાર, સંવત્ ૨૦૭૦ અષાઢ સુદ-૧૧

પ્રાસ્તાવિકમ્

ભગવાન શ્રીવેદવ્યાસજીએ ભક્તિમાર્ગના આચાર્ય નારદજીની પ્રેરણાથી શ્રીમદ્ ભાગવતજીની રચના કરેલી છે. સર્વ પુરાણોમાં શ્રીમદ્ ભાગવત શિરમોડ છે.

ચારેચાર વેદોમાં ગુપ્ત રીતે વહેતો ભક્તિનો પ્રવાહ ભાગવતજીમાં પ્રગટ રીતે વહ્યો છે.

ભગવાન શ્રીસ્વામિનારાયણે આઠ સત્શાસ્ત્રોમાં શ્રીમદ્ ભાગવતજીની ગણના કરેલી છે. મહાપુરુષોએ કહ્યું છે કે, *'विद्यावतां भागवते परीक्षा'* વિદ્વાનોની પરીક્ષા ભાગવતજીના અર્થઘટનમાં થાય છે.

શ્રીમદ્ ભાગવત ઉપર મોટા મોટા આચાર્યોએ ટીકા લખી છે. આ બધી ટીકાઓમાં સ્વામિનારાયણ સંપ્રદાયના આચાર્ય શ્રીભગવદ્પ્રસાદજી મહારાજે લખેલી 'શ્રીભક્તરંજની' ટીકા વિશિષ્ટ સ્થાન ધરાવે છે.

ભક્તિમાર્ગ અને નિરાકાવાદ બન્ને સાથે સંભવી શકતા નથી. શ્રીભગવદ્પ્રસાદજી મહારાજે શ્રીભક્તરંજની ટીકા દ્વારા ભાગવતજીના શ્લોકોનું સાકારવાદ પરત્વે વ્યાખ્યાન કરીને ભક્તિમાર્ગનું સુંદર નિરૂપણ કરેલું છે. સાથે સાથે વ્યાસજીના હ્રદગત અભિપ્રાયને યથાર્થ રીતે ઉદ્ઘાટિત કરેલ છે.

મહાપુરુષોની ઉક્તિ છે કે, *'ज्ञानं शून्यं क्रियां विना'* જે જ્ઞાન આચારમાં ન ઊતરે એ જ્ઞાન અર્થહીન છે. એજ રીતે *'ज्ञानं वन्ध्यं भक्तिं विना'* જે જ્ઞાનમાંથી ભક્તિ ન પ્રગટે એ જ્ઞાન વંધ્ય છે.

પાંકડી ગાય દેખાવે સારી લાગે પરંતુ દૂધ ન આપે, એજ રીતે ભક્તિ વગરનું જ્ઞાન પાંકડી ગાય જેવું છે.

ભાગવતજીના શ્લોકોનું વ્યાખ્યાન કરવું ભારે કઠિન કામ છે. ભાગવતજીના અનેક શ્લોકો નિરાકાર બ્રહ્મનું પ્રતિપાદન કરતા હોય તેમ આભાસ થાય છે.

ભગવાન શ્રીસ્વામિનારાયણે શાસ્ત્રોના વ્યાખ્યાન માટે એક ગુરુચાવી રૂપ વાત કરી છે.

'ભગવાનનું જ્યારે રૂપવાન દશ્યના આત્મારૂપે કરીને શાસ્ત્રમાં પ્રતિપાદન કર્યું હોય ત્યારે ભગવાનને રૂપવાન કહ્યા હોય.'

'ભગવાનનું જ્યારે અરૂપ એવા દષ્ટાના આત્મારૂપે કરીને શાસ્ત્રમાં પ્રતિપાદન કર્યું હોય ત્યારે ભગવાનને અરૂપે કહ્યા હોય.'

'ભગવાનને રૂપવાન કહેવાથી ભગવાન માયિક રૂપવાન પદાર્થની જેમ નાશવંત થઇ જતા નથી, એજ રીતે અરૂપ કહેવાથી આકાશની જેમ નિરાકાર થઇ જતા નથી.'

'ભગવાન અંતર્યામી શક્તિથી રૂપવાન-અરૂપવાન પદાર્થોમાં વ્યાપીને રહ્યા છે, માટે પાત્રભેદે કરીને ભગવાનને રૂપવાન કે અરૂપ કહેવામાં આવે છે.'

આ જ ન્યાયે શ્રીભક્તરંજની ટીકામાં ભાગવતજીના શ્લોકોના અર્થ કરવામાં આવ્યા છે.

ભાગવતજીની મોટા ભાગની ટીકાઓ પરમાત્માના નિરાકારવાદથી ભરપૂર છે ત્યારે ભક્તરંજની ટીકા પરમાત્માના સાકારવાદના પ્રતિવાદન સાથે ભક્તિમાર્ગથી ભરપૂર છે.

આ ભક્તરંજની ટીકાનો ભાવાર્થ વર્તમાન સમયના વિદ્વાનો સુધી યથાર્થ પહોંચે એ માટે એમની સરળ વ્યાખ્યા આવશ્યક હતી. સંપ્રદાયના મૂર્ધન્ય વિદ્વાન સંત સદ્‌ગુરુ શાસ્ત્રી શ્રીજ્ઞાનપ્રકાશદાસજી સ્વામીએ આ સરળ વ્યાખ્યા કરીને સંપ્રદાયની અને દર્શન ક્ષેત્રની બહુ મોટી સેવા કરી છે.

શાસ્ત્રી સ્વામી વર્ષો સુધી બનારસ રહ્યા છે અને શાસ્ત્રોનો તલસ્પર્શી અભ્યાસ કર્યો છે. એટલું જ નહિ, એમણે સંપ્રદાયના અનેક સંતોને શાસ્ત્રોનો અભ્યાસ કરાવેલો છે, એમાનો હું પણ એક છું.

સમસ્ત સંપ્રદાયને એમની વિદ્વત્તા પ્રત્યે ભારે આદર છે. વિદ્વત્તાની સાથોસાથ એમનું હૃદય ભક્તિથી ભરેલું છે. શાસ્ત્રોની યથાર્થ વ્યાખ્યા થાય એ માટે એમનો સદૈવ આગ્રહ રહ્યો છે. સંપ્રદાયના સાહિત્ય ક્ષેત્રે એમનું બહું મોટું પ્રદાન છે.

સદ્‌ગુરુ આધારાનંદ સ્વામીએ ભગવાન શ્રીસ્વામિનારાયણના જીવન વિશે આશરે એક લાખ ચોપાઇઓનો મહાકાય ગ્રંથ લખેલો છે, જેનું સરળ ગુજરાતી ભાષાંતર શાસ્ત્રી સ્વામી શ્રીજ્ઞાનપ્રકાશદાસજીએ કરેલું છે, જેનું પ્રકાશન સદ્‌ગુરુ શ્રીજ્ઞાનજીવનદાસજી સ્વામી (કુંડળધામ)ના પૂર્ણ સહકારથી થયેલું છે.

સદ્‌ગુરુ શાસ્ત્રી સ્વામી શ્રીજ્ઞાનપ્રકાશદાસજી ગાંધીનગર શ્રીસ્વામિનારાયણ ગુરુકુલ ખાતે નિવાસ કરે છે. આ ગુરુકુલના સંસ્થાપક શાસ્ત્રી સ્વામી શ્રીહરિપ્રકાશદાસજીએ શાસ્ત્રી શ્રીજ્ઞાનપ્રકાશદાસજીના સહયોગથી અનેક સંસ્કૃત અને પ્રાકૃત ગ્રંથોનું પ્રકાશન કરેલ છે. સ્વામિનારાયણ સંપ્રદાયની આ અજોડ સેવા છે.

આદરણીય શાસ્ત્રી સ્વામી જે કાર્ય હાથમાં લે છે તે અત્યંત શ્રદ્ધા અને ખંતથી પૂર્ણ કરે છે.

શાસ્ત્રી સ્વામી શ્રીજ્ઞાનપ્રકાશદાસજી સમસ્ત સંપ્રદાય માટે ગૌરવરૂપ છે.

શાસ્ત્રી સ્વામી શ્રીજ્ઞાનપ્રકાશદાસજી દ્વારા રચાયેલ આ ''સંગ્રહોક્તિ'' ગ્રંથ ભાગવતજી તેમજ સ્વામિનારાયણ સંપ્રદાયના હાર્દને સમજવામાં ભારે ઉપયોગી રહેશે.

આશા છે કે, સંપ્રદાયના નવોદિત વિદ્વાનો અને કથાકારો માટે આ ગ્રંથ ભારે ઉપકારક બનશે

લી. સ્નેહાધીન
સ્વામી માધવપ્રિયદાસ
સ્વા.ના. ગુરુકુલ
વિ.વિ.પ્ર. છારોડી-અમદાવાદ

શુભેચ્છા

ઈષ્ટદેવ ભગવાન શ્રીસ્વામિનારાયણ મહાપ્રભુજીએ આઠ સચ્છાશાસ્ત્રોને માન્ય કર્યા છે તે પૈકી શ્રીમદ્ ભાગવત પુરાણ શ્રીહરિને અતિપ્રિય હતું. જેથી શ્રીહરિ વારંવાર આ પુરાણની કથા પારાયણ કરાવી પોતે શ્રવણ કરતા વળી શ્રીહરિને સાકાર બ્રહ્મનું પ્રતિપાદન કરનારા અને તેનું મહત્વ કહેનારા પુરાણો અને શાસ્ત્રોમાં અતિ રુચિ હતી. બહુધા પુરાણો અને શાસ્ત્રોની વ્યાખ્યા કરનારા પંડિતો ગ્રંથના મુળભૂત અભિપ્રાયને નિરાકાર બ્રહ્મના પ્રતિપાદન તરફ લઈ જતા હોવાથી સાકાર બ્રહ્મની ઉપાસનાનું તેમાં ખંડન થતુ જણાય છે. જેથી શ્રીહરિની સાકર બ્રહ્મની ઉપાસનાના મહત્વને સમજનારા સ. ગોપાળાનંદ સ્વામી, સ.નિત્યાનંદ સ્વામી વગેરે નંદ સંતોએ વ્યાસ સૂત્રો-ઉપનિષદો, શ્રીમદ્ ભગવદ્ ગીતા વગેરે ગ્રંથો ઉપર ભાષ્યો રચી સાકાર બ્રહ્મની ઉપાસનાનું પ્રતિપાદન કર્યું છે.

વળી શ્રીહરિ સ્વધામ ગયા પછી દ્વિતીય આચાર્ય પ્રવર શ્રીભગવત્પ્રસાદજી મહારાજે શ્રીમદ્ ભાગવત ઉપર સાકર બ્રહ્મનું પ્રતિપાદન કરનારી "ભક્ત રંજની" વ્યાખ્યા લખી. શ્રીમદ્ ભાગવત ગ્રંથના સાકાર બ્રહ્મ તરફ દોરી જતા ગહન અર્થને ચરિતાર્થ કરેલ છે, ઘણા સમય પછી આ ગ્રંથની અતિ ગહન વ્યાખ્યા ઉપર *"विद्यावतां भागवते परीक्षा"*એ ન્યાયે સંપ્રદાયના સાક્ષર અને અનુભવી ગઢપુરના મહાન વિદ્વાન સ. શાસ્ત્રી સ્વામી શ્રીજ્ઞાનપ્રકાશદાસજીએ ગાંધીનગર ગુરુકુળમાં પ.પૂ.સ. શાસ્ત્રી શ્રીહરિપ્રકાશદાસજીના સહયોગમાં રહી " આ ભક્ત રંજની ભાગવત પુરાણની "સંગ્રહોક્તિ" ટીકા કરી સંપ્રદાયના વિદ્વાનોમાં અગ્રગણ્ય સ્થાન પ્રાપ્ત કર્યું છે. વળી પૂજ્ય શાસ્ત્રીજીએ સંપ્રદાયના મોટામાં મોટો હિન્દી ભાષી ગ્રંથ "શ્રીહરિચરિત્રામૃત સાગર" નું સરલ ગુજરાતી ભાષાંતર, યાજ્ઞવલ્ક સ્મૃતિનું ગુજરાતી ભાષાંતર તેમજ શ્રીદુર્ગપુર માહાત્મ્ય, શ્રીઉન્મત્તગંગા માહાત્મ્ય, શ્રીહરિ ચરિત્ર, અને શ્રીહરિની જન્મોપત્રી, શિક્ષાપત્રી ભાષ્ય વગેરે સંકૃત ગ્રંથોનું સરલ ગુજરાતી ભાષાંતર કરીને સંપ્રદાયના સાહિત્યની અણમોલ સેવા કરી છે. સંપ્રદાયના આધુનિક વિદ્વાનોને સરલતાથી સમજી શકાય તેવા ભાવથી પૂજ્ય શાસ્ત્રીજીએ "ભક્ત રંજની ભાગવત" ઉપર કરેલ "સંગ્રહોક્તિ" ટીકાનો ભગીરથ પ્રયાસ સાર્થક થાય અને શ્રીહરિ આચાર્યશ્રી, ગુરુજનો, સંતો અને ભગવત્ ભક્તોનો તેમના ઉપર કાયમિક રાજીપો વર્ષતો રહે એવી અમારી અંતરની ભાવના સાથે લાખો લાખો ધન્યવાદ અને શુભેચ્છાઓ પાઠવીએ છીએ એજ

લી.
શાસ્ત્રી ભક્તિપ્રિયદાસજી
સ્વા. વિદ્યા મંદિર, ગઢપુર

પ્રાસંગિકમ્

હિન્દુ સનાતન સંસ્કૃતિમાં અનેક ગ્રંથોની ગરિમા અવર્ણ્ય છે તેમાં શ્રીમદ્ ભાગવત એક ઉત્કૃષ્ટ અસાધારણ અને નિર્મળ પ્રેમ લક્ષણા ભક્તિનું ઉદ્ગમ સ્થાન છે. એટલે જ ભક્તિ સંપ્રદાયોની પરંપરામાં આ ગ્રંથ ઉપર ઘણા આચાર્યોએ પોત પોતાના મતાનુસાર મૂળ ગ્રંથ ઉપર ટીકાઓ વ્યાખ્યાઓ દ્વારા ચિંતન કર્યું છે.

જેમાં 'ભક્તરંજની' નામની વ્યાખ્યા એક છે તેમાં સગુણ બ્રહ્મનું જે પ્રતિપાદન કર્યું છે. તે અદ્ભુત છે. અને જે શ્રીજી મહારાજને અતિપ્રિય છે. આપણા સંપ્રદાયમાં પણ સ.ગુ. શ્રીગોપાળાનંદ સ્વામી, સ.ગુ. શ્રીમુક્તાનંદ સ્વામી, સ.ગુ. શ્રીશુકમુનિ જેવા સંતોએ આ ગ્રંથ ઉપર ચિંતન કરીને કરી વ્યાખ્યાઓ કરી છે. આચાર્ય શ્રી ભગવત્પ્રસાદજી મહારાજે પણ 'ભક્તરંજની' નામની ટીકા લખી છે જે એ સંપ્રદાયના સાહિત્યમાં બહાર પાડેલી છે.

યુગ પ્રભાવને કારણે સંસ્કૃત અધ્યયન અધ્યાપનની માત્રા ઓછી થતાં મૂળ ગ્રંથ ઉપરથી અર્થ કરવા સામાન્ય કથાકારોને શક્ય ન હોવાથી ઘણીવાર સદ્ગ્રંથોના સાચા સિદ્ધાન્તો સમાજ સુધી પહોંચી શકતા નથી. સમાજમાં કથાકારો માટે મૂળ ગ્રંથ ઉપરથી સરલ સંસ્કૃતમાં સુબોધ સંગ્રહોક્તિ નામની આ વ્યાખ્યોની રચના પરમ વિદ્વાન સ.ગુ. શાસ્ત્રી સ્વામી શ્રી શ્રીજ્ઞાનપ્રકાશદાસજીએ કરી છે. તે ખરેખર પ્રશંસાને પાત્ર છે. એટલું જ નહી પણ આ સંગ્રહોક્તિના વાંચનથી કથાકારોને ચોક્કસ મૂળ ગ્રંથના સગુણ બ્રહ્મનું પ્રતિપાદન કરનારા સિદ્ધાન્તો સમજાશે તેવી મને આશા છે. અને તે સામાન્ય સમાજ સુધી તે પહોચશે.

આ લેખન કાર્ય દરમ્યાન સ.ગુ. શાસ્ત્રી સ્વામી શ્રીજ્ઞાનપ્રકાશદાસજીએ જે મહેનત કરી છે તેનો હું સાક્ષી છું. બાર બાર કલાક સુધી એક સરખા બેસી મૂળ ગ્રંથ ઉપર સર્વેશ્વર ભગવાન શ્રીસ્વામિનારાયણ મહાપ્રભુના નિશ્ચળ ઉત્કૃષ્ટ અને બુદ્ધિ ગમ્ય સિદ્ધાન્તોને સમાજની સામે મૂકવાનો ઉદાત્ત પ્રયત્ન કર્યો છે જે સંપ્રદાયનું મહાન ગૌરવ કહી શકાય આ પૂર્વે પણ સંપ્રદાયના સાહિત્યમાં વડતાલના સ.ગુ. શાસ્ત્રી શ્રીહરિજીવનદાસજી સ્વામી પછી શાસ્ત્રી સ્વામીએ સંપ્રદાયને લોક ભોગ્ય ભાષામાં અનેક ગ્રંથો આપ્યા છે. આ સંગ્રહોક્તિ અધ્યયન અધ્યાપનના માધ્યમથી સંપ્રદાયના સદ્ગુરુઓ પોતાના ભ.વી પેઢીના શિષ્યો કથાકારોને ભણાવી સમાજ સુધી આ જ્ઞાનનો પ્રચાર પ્રસાર કરશે તો સંપ્રદાયની બહુ જ મોટી સેવા કરી ગણાશે.

અંતે વડતાલવાસી શ્રીલક્ષ્મીનારાયણ દેવ શ્રીહરિકૃષ્ણમહારાજ તેમજ ગઢપુર નિવાસી શ્રીગોપીનાથજી મહારાજના ચરણોમાં પ્રાર્થના કરુ કે મારા વિદ્યાગુરુ સ.ગુ. શાસ્ત્રી શ્રીજ્ઞાનપ્રકાશદાસજી દ્વારા ભવિષ્યમાં પણ અનેક સાહિત્ય સેવાઓ થતી રહે તેવી અભ્યર્થના.

વડતાલ સ્વા.ના. મંદિર

શાસ્ત્રી ભક્તિપ્રકાશદાસ.

શ્રીસ્વામિનારાયણો વિજયતેતરામ્

પ્રાક્કથન

વર્તમાન સમયે ભારતમાં જે 'હિંદુ' શબ્દથી માનવ સમાજ કહેવાય છે તેમાનો અધિકાંશ શ્રદ્ધાળુ વર્ગ શ્રીમદ્ભાગવત મહાપુરાણથી પરિચિત છે તેનાં લેખક બાદરાયણ નામથી કહેવાતાં કૃષ્ણદ્વૈપાયન વ્યાસ છે. વેદનાં વ્યંચખ્યંનંદ્ વ્યંતઃ આ વિવૃત્તિ પ્રમાણે લેખકનું વ્યાસ એવું નામ તેમના ક્રિયાયોગને સૂચવે છે. શ્રીમદ્ભાગવતમાં કહ્યા પ્રમાણે વ્યાસજીએ વેદોનું વિષય સંકલન કરી શાખા - પ્રશાખાઓના રૂપમાં વિવિધરૂપે પ્રવર્તન સંરક્ષણ અધ્યયન- અધ્યાપન વગેરે કાર્ય કર્યું છે વેદોનું અધ્યયન મર્યાદિત સમાજમાં થતું હોવાથી તેના સિદ્ધાંતોનો સંપૂર્ણ માનવ સમાજને લાભ થાય આવા આશયથી વ્યાસજીએ મહાભારત અને પુરાણોની રચના કરી. તેમાં તેમણે છેલ્લે સ્વાન્તઃ સુખાય શ્રીમદ્ભાગવતની રચના કરી છે. અને તે પછી સુયોગ્ય સુપુત્ર શ્રીશુકદેવજીને તે ભણાવીને તેનું રહસ્ય સમજાવ્યું છે શ્રીમદ્ ભાગવત અંગે એ પ્રસિદ્ધ સૂક્તિમાં વ્યાસજીએ કહ્યું હતું કે **"अहं वेद्मि शुको वेत्ति सूतस्तु वेत्ति वा न वा। भक्त्या भागवतं शास्त्रं न बुद्ध्या न च टीकया॥"**, આ વચનને ધ્યાનમાં રાખીને ભાગવતનું ચિંતન કરીએ ત્યારે સમજાય છે કે તેમાં જણાવેલા બધાજ શ્રેયઃ સાધનનોના પ્રસંગોમાં ભગવાન પરબ્રહ્મ પુરુષોત્તમ શ્રીહરિનો આશ્રય અને તત્પરાયણતા સ્વરૂપ ભક્તિનું ગૌરવ કહેવાયું છે ભાગવતના સિદ્ધાંતનો નિર્ણય કરવાની મારામાં શક્તિ નથી છતાં આપાતતઃ જે સમજાયું છે તે કહ્યું છે.

બીજી બાજું વિચારીએ તો શ્રીપરબ્રહ્મ પુરુષોત્તમ ભગવાન શ્રીસહજાનંદ સ્વામીએ લખેલી શિક્ષાપત્રીના શ્લોક ૯૩,૯૮,૯૯ અને ૧૧૭-૧૧૮ માં અલગ અલગ દૃષ્ટિથી ભાગવત ઉપર પોતાની શ્રદ્ધા, નિષ્ઠા અને વિશ્વાસ વ્યક્ત કર્યા છે વચનામૃતોમાં પણ અનેક પ્રસંગોએ તે બધા ભાવોને સત્સંગ સભાઓમ' કહ્યા છે. આપણા સ્વામિનારાયણ સંપ્રદાયમાં શ્રીહરિના સમયથી જ ભાગવતની કથા-પારાયણો કાયમ થયા કરે છે. આચાર્યોએ- વિદ્વાનોએ ભાગવતના ઉપર વ્યાખ્યાઓ-ટીકાઓ લખીને વેદાંત સંપ્રદાયના અદ્વૈત દ્વૈત શુદ્ધાદ્વૈત અને વિશિષ્ટાદ્વૈત મત પ્રમાણે પોતાના અભિપ્રેત સિદ્ધાંતોને ખોળવાનો - બતાવવાનો કે પ્રવર્તાવવાનો પ્રયાસ કર્યો જણાય છે. શ્રદ્ધેય વિદ્વાન વક્તા શ્રીકૃષ્ણશંકર શાસ્ત્રીજીએ પ્રમુખ ટીકાઓ સાથે શ્રીમદ્ ભાગવતનું અદ્ભુત પ્રકાશન વારાણસીથી કરાવ્યું હતું જે ઘણા ભાગોમાં વિશાળ સંસ્કરણ ગણાય છે. તે પ્રકાશનમાં આપણા સંપ્રદાયના વડતાલ ગાદી સ્થાનના દ્વિતીય આચાર્ય શ્રી.ધ.ધ. ભગવતપ્રસાદજી મહારાજશ્રીની વ્યાખ્યા ભક્ત રંજની અન્વયાર્થ દીપિકા પણ છે જે સારા વિદ્વાનોમાં ખૂબજ સન્માન સાથે સ્વીકારેલ ટીકા છે. ભગવાન શ્રીહરિએ પરબ્રહ્મ પરમાત્માનું જેવું સગુણ-સાકાર - સવિશેષ - સધર્મક સ્વરૂપ કહ્યું છે તે સિદ્ધાંત પ્રમાણે ભક્તરંજની ટીકા વિદ્વતાભરી અને સાંગોપાંગ

અધ્યયન પૂર્ણ છે વિ.સં. ૨૦૧૧માં મારા ગુરુ શ્રી સ.પુ. સ્વામી ત્રિકમચરણદાસજી પાસે ભક્તરંજની ટીકાને આધારે ભાગવત એકાદશ સ્કંધને હું ભણ્યો હતો. તે પછી પણ ભક્તરંજની પ્રમાણે ભાગવત વાંચવાનો સુયોગ થયા કરતો હતો.

સાંપ્રત સમયમાં પ્રવૃત્તિ બાહુલ્યને કારણે સંસ્કૃતમાં આવા મહત્વપૂર્ણ ગ્રંથોનું અધ્યયન ઘટતું રહ્યું જણાય છે. કથા પારાયણોની પદ્ધતિમાં પણ પરિવર્તન આવ્યું છે. ભાગવત ઉપરની સંક્ષિપ્ત ચૂર્ણિકા ટીકાઓ ઘણીજ હોય છે પણ તે બધી જ ટીકાઓ નિરકારવાદ-શુષ્કવેદાંત તરફી હોય છે વર્ષોથી સંતોને ભણાવતી વખતે સારી સરલ પરમેશ્વરના સાકારસ્વરૂપને સમજાવે તે સિદ્ધાન્તને અનુરૂપ સંક્ષિપ્ત ટીકાનો અભાવ મને ખટક્યા કરતો હતો. વધતી ઉંમરને લીધે કમજોરી તો ઘણી અનુભવાય છે છતાં ઇષ્ટદેવ શ્રીહરિના સમસ્વરૂપ શ્રીગોપીનાથજી મહારાજ, શ્રીહરિકૃષ્ણ મહારાજ અને ગુરુકૃપાથી હવે ભાગવતની સંક્ષિપ્ત ટીકા લખવાની મેં હિંમત કરી છે અને પછી જ કાલીદાસના કહ્યા પ્રમાણે ઘણું મોટું કામ કરવા હું **"प्रांशु लभ्ये फले मोहादुद्बाहुरिव वामनः"** આગળ ચાલ્યો છું. આરાધ્ય અને મોક્ષદાતા ઇષ્ટદેવ શ્રીસ્વામિનારાયણ ભગવાનની અસીમકૃપાથી તેમજ જેમણે મને સત્સંગના શુભ સદ્‌ગુણ આપીને મારું કાંઇક ઘટતર કર્યું એવા સૌમ્યસ્વરૂપ સાધુતાની સીમારૂપ મારા ગુરુશ્રી સ.પુરાણી સ્વામી શ્રીત્રિકમચરણદાસજીની અનહદ દયાથી અને અખંડ ભગવત્પરાયણ સૌજન્ય મૂર્તિ સ. પુરાણી સ્વામી શ્રીહરિપ્રિયદાસજીની અપાર કૃપાથી મારા મનને ઉત્સાહ અને શક્તિ મળ્યા છે. અને તેથી જ શ્રીમદ્ ભાગવતનના ઉપર ભક્તરંજની ટીકાને આધારે સંગ્રહોક્તિ નામે સંક્ષિપ્ત ટીકા લખવાનો મેં પ્રયાસ કર્યો છે. વર્ષોની ઇચ્છા કોઇ અકલ્પ્ય કારણથી દબાયેલી હતો. પણ વડતાલના સ.શા. સ્વામી શ્રીધર્મપ્રસાદદાસજીના મંડળના વિદ્વાન નવ યુવાન શાસ્ત્રી શ્રીભક્તિપ્રકાશદાસજી, શાસ્ત્રી શ્રીધર્મકિશોરદાસજી અને શાસ્ત્રી શ્રીભક્તિકિશોરદાસજીએ મારો ઉત્સાહ વધાર્યો અને મને સાવદા (જિ. જલગાંવ- મહારાષ્ટ્ર) સ્વા. ગુરુકુળમાં બોલાવ્યો અને ત્યાં મેં માર્ચ - ૨૦૧૪ માં લખવાનું શરું કર્યું. વચ્ચે પૂજ્ય સ. સ્વામી શ્રીજ્ઞાનજીવનદાસજી (કુંડળધામ)ના શિષ્યો યાદ આવ્યા છે તે સંતોએ મને હરખભર ભક્તમનોરંજની ટીકા સાથેનું ભાગવત સ્કેન કરેલું આપ્યું, જેથી હું સહજ રીતે કોમ્પ્યુટરમાં તેને વાંચી શકું છું. છેલ્લા ચારપાંચ મહિનાથી હું તેને આધારેજ કામ કરી રહ્યો છું, એટલે પૂ. સ્વામીજીના શિષ્ય મંડળનો હું ખૂબજ આભાર માનું છું. હવે તે અંગે આગળ વાત કરું. જો કે સાવદા સ્વા. ગુરુકુલમાં રહેતા શાસ્ત્રી ભક્તિસ્વરૂપદાસજી વગેરે બધાજ નવ યુવાન સંતોનો મને ઘણો જ સહકાર મળ્યો છે છતાં જો શા. શ્રીધર્મકિશોરદાસજીનો મને સુયોગ ન થયો હોત તો પણ મારા સંગ્રહોક્તિ ટીકા લખવાના પ્રયાસનું બાળમૃત્યુ થઇ જાત. છેલ્લા ઘણા મહિનાઓથી તેઓ પોતાની બધી પ્રવૃત્તિને સમેટી લઇને રોજ દસથી અગીયાર કલાક સુધી કોમ્પ્યુટર સાથે રહીને મને સહાય કરી રહ્યા છે. ભાગવત જેવું વ્યાસની સમાધિભાષાનું શાસ્ત્ર, વળી તેના ઉપર હાથથી લખેલી

સંસ્કૃત ટીકા, તેને કોમ્પ્યુટરની વર્ણમાળામાં અંકિત કરવી, તે સંસ્કૃત ન ભણ્યા હોય તેને માટે ઘણું કઠિન છે છતાં શા.ધ.કિ. સ્વામી સારા સુવાચ્ય અક્ષરોનું ચયન કરીને કામ કરી રહ્યા છે તે કાર્ય અત્યારે અર્ધું ભાગવત સ્કંધ ૧ થી ૮ સુધીનું થયું છે અને તેને પ્રકાશિત કરી રહ્યા છીએ.

ગ્રંથના મુદ્રણ પહેલાના રૂપને શુદ્ધ કરવા માટે સારા સાક્ષર પ્રૂફરીડરની અતિ આવશ્યક્તા હોય છે તે આવશ્યક્તા પૂજ્ય સ. સ્વામી શ્રીજ્ઞાનજીવનદાસજી (કુંડળધામ) ના વિદ્વાન શિષ્ય મંડળે તેમજ મારા સ્નેહી શ્રીમાધવપ્રિયદાસજીના શિષ્યોએ પ્રૂફવાંચીને પૂર્ણ કરી છે. તેથી તે બન્ને સંતમંડળનો હું ખૂબજ આભાર માનું છું.

આ શ્રદ્ધાસ્પદ ગ્રંથનું વાચંન કરનાર આદરણીય વિદ્વાનોની આગળ મારી એક કરબદ્ધ વિનંતિ છે કે સંગ્રહોક્તિ ટીકામાં મેં કોઇ વૈદુષ્ય પ્રકટ કરવાનો પ્રયાસ કર્યો નથી. મૂળ ગ્રંથમાં યત્ર તત્ર સર્વત્ર 'આર્ષ' પ્રયોગની ભરમાર છે. ધાતુઓમાં આત્મનેપદ-પરસ્મૈપદનો તેમજ ભૂત, વર્તમાન, ભવિષ્યત્ કાળનો પણ કાંઇ મેળ દેખાતો નથી. પરસ્પર સંબદ્ધ વાક્યોમાં પણ એક ક્રિયા વર્તમાનમાં હોય તો બીજી ભૂતકાળમાં દેખાતી હોય છે. વળી કૃત પ્રયત્યયોમાં પણ વિશિષ્ટ ગણ સાથે સંબદ્ધ નુમ-નુટ વગેરેને નિહાળવાનો પણ પ્રયાસ કર્યો નથી. શક્ય બન્યું તેટલું શુદ્ધ કરવાનો પ્રયાસ કર્યો છે, સંભવ છે પાણિનિ મુનિના કૃપાપાત્રોને ક્યાંક ન્યૂનતા દેખાશે. છતા મારો પ્રયાસ ભાવાત્મક છે, તો તેના તરફ વિવેક ભરી દૃષ્ટિ રાખી મારીક્ષતિઓને ક્ષમા આપશો.

હવે રહીવાત આ વિશાળ અને ગહન સદ્ગ્રંથના પ્રકાશનની, મારા વડીલ, આદર્શ, અને આ ક્ષેત્રમાં મુખ્ય આધાર સ્તંભ રૂપ શાસ્ત્રી સ્વામી શ્રીહરિપ્રકાશદાસજી છે, હું સાહિત્યના ક્ષેત્રમાં જે કાંઇ સેવાનું કામ કરવાનું વિચારું છું ત્યારે તેઓ મને ખૂબજ ઉત્સાહ વધે તેવું પ્રેરણાબળ આપે છે. તેમની સૂઝ અને કાર્ય શક્તિ અદ્ભુત છે ઘણી ઉમર થઇ છે. સ્વાસ્થ્ય બરાબર રહ્યું નથી. છતાં ઉત્સાહ અને કાર્ય શક્તિમાં કાંઇ ઊણપ આવી નથી. તેમના પ્રેરણાબળથી જ હું અત્યાર સુધી કે આજે પણ યથાશક્તિ કામ કરી રહ્યો છું. એટલે આ સંગ્રહોક્તિ ટીકાના લેખન કે પ્રકાશન કાર્યમાં તેઓજ મુખ્ય છે એટલે તેમણે જ કાર્ય કર્યું હોય તો તેમાં હું શું આભાર માનુ ? આ પ્રસંગે હું કેવળ તેમના પ્રત્યે સાદર સવિનય શ્રદ્ધા જ વ્યક્ત કરું છું.

હું જ્યારે શાંતિથી વિચારું છું ત્યારે મને અનુભવ થાય છે કે ભગવાન શ્રીહરિના પછી મારા મનમાં કોઇ બળ હોય તો તે ગુરુકૃપાનું છે અને તે ગુરુશ્રીના આશીર્વાદ હોવાથી તેમના ગૃહસ્થ શિષ્યો પણ મને લાગણી સાથે પ્રેરકબળ આપે છે. શ્રીમદ્ ભાગવતના માહાત્મ્યમાં ઘણા જ ગૌરવ ભર્યા શબ્દ લખ્યા છે તે વિચારતા આ ગ્રંથ સંપ્રદાયમાં વિદ્વાન કથાકાર સંતોને તેમજ વિદ્વાન્ કથાકારોને સવિનય ભક્તિભાવથી ભેટ અર્પણ કરવાનો વિચાર થયો ત્યારે ગ્રંથ છપાવવાનો સમય થયો તે પહેલા જ શ્રીજીમહારાજના પ્યારા હરિભક્તોએ મને આર્થિક સહયોગ આપવાની સંપૂર્ણ જવાબદારી સ્વીકારી લીધી છે. જેનો આ બાજુના ભાગમાં નામ નિર્દેશ કરવામાં આવ્યો છે

અહીં ગાંધીનગરથી જે કોઇ સદ્ગ્રંથનું પ્રકાશન થાય છે તેમાં ગઢડાના તપસ્વિની સાંખ્યયોગી બહેનોનો આર્થિક સહકારપણ ઘણો જ રહ્યો હોય છે તેનો પણ અહીં નામ નિર્દેશ કર્યો છે.

અમારા અહીંના ગાંધીનગર ગુરુકુળના પ્રકાશન કાર્યમાં શાસ્ત્રી શ્રીરામકૃષ્ણદાસજી, શાસ્ત્રી શ્રીઅક્ષરપ્રકાશદાસજી, શાસ્ત્રી શ્રીમાધવપ્રકાશદાસજી, શ્રીધર્મનંદનદાસજી તથા પાર્ષદ શ્રીમૂકેશભગતે પણ ઉત્સાહથી આ બધું કામ સંભાળ્યું છે તેથી તેઓ પણ શ્રીહરિના અને ગુરુકૃપા ને પાત્ર છે. પરમાત્મા શ્રીહરિ તેમને સેવાની વિશેષતક અને સુયોગ આપે એવી હું શુભાશંસા રાખું છું.

શાસ્ત્રી જ્ઞાનપ્રકાશદાસ,
ગાંધીનગર સ્વા.ના.ગુરુકુલ

શ્રીમદ્ભાગવતમહાપુરાણ મૂળ અને સઙ્ગ્રહોક્તિટીકા, તથા સંક્ષિપ્ત શ્રીમદ્ભાગવત કથા (ગુજરાતી) છાપવામાં સેવા આપનારા શ્રીજીમહારાજના પ્યારા આશ્રિતોના શુભ નામ.

૨૫૧૦૦૦/- અક્ષરવાસી પટેલ શ્રીગણેશભાઇ લખમણભાઇ કળથિયા (માંડવાવાળા)બોટાદ તથા અ.નિ.પાર્વતીબેન ગણેશભાઇ કળથિયા ની પુણ્ય સ્મૃતિમાં સુપુત્ર શ્રીવાલજીભાઇ તથા શ્રીમતી ગીતાબેન વાલજીભાઇ, સુપુત્ર રસિકભાઇ તથા વિશાળભાઇ, પુત્રવધુ શ્રીમતી મનીષા રસિકભાઇ, શ્રીમતી અમી વિશાલભાઇ, કુ. શ્રેયા રસિકભાઇ

૧૫૧૦૦૦/- પટેલ શ્રીભીમજીભાઇ કેશવભાઇ બલર (શાખપુર) હાલ. સુરત. તથા શ્રીમતી. દેવકુંવરબહેન ભીમજીભાઇ, હ. સુપુત્ર રોહિતભાઇ, પુત્રવધુ ચેતનાબહેન રોહિતભાઇ, પૌત્ર ચિ. અક્ષ તથા પૌત્રી ચિ.કુ. જાહ્નવી.

૧૧૧૦૦૦/- પટેલ શ્રીમોહનભાઇ રણછોડભાઇ નારોલા તથા. શ્રીમતી સમજુબહેન મોહનભાઇ નારોલા. દામનગર હ. સુપુત્ર શ્રીવલ્લભભાઇ તથા શ્રીઘનશ્યામભાઇ, પૌત્રો શ્રીઆશીષભાઇ, શ્રીઉર્વીશભાઇ, શ્રીદીપકભાઇ અને શ્રીહાર્દિકભાઇ

૫૧૦૦૦/- શ્રીભીખાભાઇ ગણેશભાઇ નારોલા તથા શ્રીમતી જીવીબહેન, હ. સપુત્ર તુષારભાઇ, પૌત્ર હર્ષ તથા જીલ

૫૧૦૦૦/- શ્રીલાલજીભાઇ જાદવજીભાઇ સાપરા (બગડવાળા) વડોદરા હ. સુપુત્રો શ્રીવિજયભાઇ તથા શ્રીધર્મેશભાઇ, પૌત્ર ચિ. કાર્તિક તથા ચિ.માનવ, ચિ.કુ. જાહ્નવી

૫૧૦૦૦/- અ.વા. શ્રીમતી મૂળીબહેન પ્રેમજીભાઇની પુણ્ય સ્મૃતિમાં. હ. શ્રીપ્રેમજીભાઇ, ડાહ્યાભાઇ નારોલા, દામનગર, સુપુત્ર લાલજીભાઇ તથા પૌત્ર ચિ. રાકેશ

૪૨૦૦૦/- શ્રીપટેલ રૂડાભાઇ ત્રિકમભાઇ ગોયાણી (રળિયાણા). હ. સુપુત્ર શ્રીમનજીભાઇ તથા પૌત્ર ભાવેશભાઇ

૨૫૦૦૦/- શ્રીપટેલ કાનજીભાઇ કેશવભાઇ બલર શાખપુર, હ.અ.નિ. હર્ષદભાઇ તથા ડો. શ્રીબિપીનભાઇ

૨૧૦૦૦/- અ.નિ. શ્રીમતિ પાર્વતીબેન જીવરાજભાઇ પરશોત્તમભાઇ નારોલા હસ્તે સુપુત્રો, ભૂપતભાઇ, કાળુભાઇ તથા હિંમતભાઇ, દામનગર

૨૧૦૦૦/-	પટેલ જયસુખભાઇ ડાહ્યાભાઇ સાંગાણી તથા શ્રીમતી ચંપાબેન જયસુખભાઇ હસ્તે સુપુત્ર બિરજુભાઇ, સુરત
૧૫૦૦૦/-	શ્રીલાભુભાઇ રણછોડભાઇ નારોલા દામનગર, સુપુત્ર ગોવિંદભાઇ તથા. પૌત્ર પ્રકાશભાઇ
૧૫૦૦૦/-	શ્રીચીમનભાઇ વલ્લભભાઇ નારોલા તથા શ્રીભરતભાઇ વલ્લભભાઇ નારોલા, સુરત.
૧૧૦૦૦/-	શ્રીવાલજીભાઇ લખમણભાઇ તથા શ્રીવશરામભાઇ લખમણભાઇ વીરાણી, સુરત.
૧૧૦૦૦/-	શ્રીવલ્લભભાઇ હરખાભાઇ કળથિયા,હ.ચિ. દિપકભાઇ તથા પરેશભાઇ, સુરત.
૧૧૦૦૦/-	જીતુબેન રામજીભાઇ ભીમજીભાઇ નારોલા, હસ્તે સુપુત્રો, મનુભાઇ, જયંતીભાઇ વિનુભાઇ નારોલા, દામનગર
૧૧૦૦૦/-	શ્રીસુનીલ દેવરામ ચૌધરી, તથા શ્રીરાજેન્દ્ર દેવરામ ચૌધરી, શ્રીહરિ ટ્રાવેલ્સ, ન્હાવી, જી. જલગાંવ, મહારાષ્ટ્ર
૧૧૦૦૦/-	રમેશભાઇ લક્ષમણભાઇ ઠુમર, હસ્તે ચિ. પરેશ, સુરત
૧૧૦૦૦/-	પટેલ યોગેશભાઇ છગનભાઇ સપાસિયા, હસ્તે ચિ. રાજ, ગિરજામવાળા, સુરત
૧૧૦૦૦/-	વાલજીભાઇ હરિભાઇ રાદડીયા, હસ્તે ચિ. ગોરધન, સાંજણાવાવ વાળા, સુરત
૫૦૦૦/-	શ્રીબટુકભાઇ નારાયણભાઇ કળથિયા બોટાદ, હ.ચિ. કેતનભાઇ તથા ચિ.નયનભાઇ
૫૧૦૦/-	પટેલ મનજીભાઇ ગોવિંદભાઇ, હસ્તે કનુભાઇ, ડાહ્યાભાઇ, વિનુભાઇ, સુરત
૫૧૦૦/-	પટેલ દેવશીભાઇ પુરુષોત્તમભાઇ દોંગા, ચિ. રવિ, ઉનાવાળા, સુરત
૫૧૦૦/-	એક સત્સંગી ભાઇ, કુબેરનગર, સુરત
૫૧૦૦/-	અ.નિ.નર્મદાબહેન કેશવભાઇ ઘાડીયા, હ. વિનુભાઇ, સુરત

ગઢપુરમાં રહી શ્રીહરિનું ભજન કરીને સત્સંગ કરાવતા તપસ્વિની સાંખ્યયોગી બહેનો

૫૧૦૦૦/-	સાં.યો. રવિકાંતાબહેન તથા ભાણીબહેન હ.એક સત્સંગીભાઇ લંડન
૫૧૦૦૦/-	સાં.યો. મણિબા હ. કૈલાસ બહેન
૫૧૦૦૦/-	સાં.યો. મેઘનાબહેન ગુરુ કાનબાઇબહેન
૧૧૦૦૦/-	સાં.યો. મનહરબેન ગુરુ ઝડીબા.
૫૦૦૦/-	સાં.યો. લીલાબહેન અમરેલી

विषयाणामनुक्रमः

अध्यायः	विषयः	पृष्ठांकः
	श्रीमद्भागवतमाहात्म्यम्	
१	देवर्षिभक्त्योः समागमः	१
२	भक्त्या दुःखनिवारणाय नारदस्य प्रयासः	१०
३	भक्त्याः कष्टनिवृत्तिः	१९
४	गोकर्णोपाख्यान प्रारम्भः	२८
५	धुन्धुकारिणः प्रेतयोनिप्राप्तिः तस्योद्धारश्च	३७
६	सप्ताहकथायज्ञः सविधिः	४७
	प्रथम स्कन्धः	
१	मङ्गलम्, श्रीमद्भागवतविषये सूतं प्रति शौनकादीनां प्रश्नः	६१
२	मुनिभिः कृतेषु षट्सु प्रश्नेषु चतुर्णामुत्तरमाह	६५
३	भगवतश्चतुर्विंशत्यवताराणां संक्षेपतोवर्णनम्	७०
४	व्यासस्यासन्तोषो देवर्षेस्तत्रागमनं च	७५
५	व्यासनारदसंवादः, भगवद्गुणकर्मवर्णनमहत्वं नारदपूर्ववृत्तं च	७८
६	व्यासस्य विश्वासाय नारदस्य स्ववृत्तकथनम्	८४
७	परीक्षिज्जन्म अश्वत्थाम्ने दण्डदानञ्च	८८
८	अश्वत्थाम्नोऽस्त्रात् परीक्षितो रक्षा कुन्तीकृता कृष्णस्तुतिश्च	९४
९	कुरुक्षेत्रे युधिष्ठिराय भीष्मकृतो धर्मोपदेशः श्रीकृष्णस्तुतिश्च	१००
१०	भगवतः श्रीकृष्णस्य द्वारकागमनम्	१०६
११	श्रीकृष्णस्य प्रजाकृतमभिनन्दनं द्वारकाप्रवेशश्च	१११
१२	परीक्षितो जन्मकर्माद्युत्कर्षकथनम्	११५
१३	विदुरोपदेशेन गान्धार्या सह धृतराष्ट्रस्य वनाय प्रस्थानम्	११९
१४	अपशकुनदर्शनेन युधिष्ठिरस्य चिन्ता	१२६
१५	कलेः प्रवेशं विज्ञाय पाण्डवानां स्वर्गारोहणम्	१३१
१६	गोरूपधारिणोः पृथ्वीधर्मयोः संवादः	१३८
१७	परीक्षित्कृतः कलिनिग्रहः	१४२
१८	राज्ञो मुनिकुमारशापोपलम्भनम्	१४७
१९	गङ्गायां परीक्षिति प्रायोपविष्टे शुकागमनम्	१५३
	द्वितीय स्कन्धः	
१	ध्यानविधिः भगवतो विराट्स्वरूपवर्णनं च	१५९
२	धारणया निर्जितं मनः सर्वसाक्षिणि विष्णौ धार्यम्	१६४
३	विवधदेवानामुपासना भगवद्भक्तिमाहात्म्यं च	१६९
४	सृष्टिविषयको नृपप्रश्नः शुककृतं मङ्गलं च	१७३
५	कालकर्मादिशक्तिद्वारा विराट्सृष्टिरूपा हरेर्लीला	१७६
६	अध्यात्मादिभेदेन विराड्विभूतेर्वर्णनम्	१८१
७	तत्कर्मार्थगुणैः सह भगवल्लीलावताराणां वर्णनम्	१८७
८	ईशजीवयोर्देहसम्बन्धविषयः प्रश्नोऽन्ये च प्रश्नाः	१९५
९	भगवता ब्रह्मणे चतुःश्लोकि भागवतं प्रोक्तम्	१९९
१०	पुराणलक्षणं महापुरुषसंस्थानुवर्णनं च	२०५
	तृतीय स्कन्धः	
१	उद्धवविदुरयोः समागमः	२११
२	विदुरोद्धवसंवादे श्रीकृष्णबाललीलायाः कथनम्	२१७
३	विदुरोद्धवसंवादे मथुराद्वारिकायोर्लीलायाः यादवनां प्रभास गमनस्य च	२२१
४	यदुवंशसंहारकथा उद्धवोक्तज्ञानप्राप्त्यै विदुरस्य मैत्रेयसन्निधौ गमनं च	२२४
५	सृष्टेः क्रमवर्णनं तत्त्वात्मकदेवकृतं भगवत्स्तवनं च	२२९
६	परमेश्वरशक्तिप्रवेशेन विराड्विग्रहोत्पत्तिः	२३५
७	निर्गुणस्य भगवतो गुणादिसम्बन्धः कथम्? इत्यस्योत्तरं संस्तूय विदूरेण विविधाः प्रश्नाः कृताः	२४०
८	विष्णोर्नाभिकमलाद् ब्रह्मोत्पत्तिवर्णनम्	२४५
९	ब्रह्मकृता भगवत्स्तुतिः भगवतो ब्रह्मणे वरदानं च	२४९
१०	दशविधसर्गवर्णनम्	२५५
११	मन्वन्तरादिकालपरिमाणनिरूपणम्	२५९
१२	सनकादि-रुद्र-मरीच्यादि-सरस्वती-वेदादीनामुत्पत्तिः, मनोः शतरूपायाश्च जन्म	२६४
१३	यज्ञवराहस्य चरितं ऋषिभिः कृता तत्स्तुतिश्च	२७०

विषयाणामनुक्रमः

अध्यायः	विषयः	पृष्ठांकः
१४	दितिकश्यपसंवादः दित्यां कश्यपद्वारा गर्भस्थापनं च	२७७
१५	दिव्यवैकुण्ठे जयविजययोः सनकादिशापः	२८२
१६	भगवत्कृतं मुनीनां सान्त्वनं वैकुण्ठाज्जय-विजययोः पतनं च	२९०
१७	हिरण्याक्षहिरण्यकशिप्वोर्जन्म हिरण्याक्ष-दिग्विजयश्च	२९५
१८	हिरण्याक्षमहावराहयोर्युद्धम्	२९८
१९	हिरण्याक्षवधः	३०२
२०	ब्रह्माकृतविविधसृष्टिवर्णनम्	३०७
२१	तपस्यया तुष्टेन विष्णुना कर्दमाय वरदानं कर्दमाश्रमे मनोरागमनं च	३१३
२२	कामगे विमाने दम्पत्योर्विहारो रतिश्च	३१९
२३	कपिलजन्म कर्दमकन्यानां विवाहश्च	३२४
२४	देवहूतिकपिलसवादः, तत्र कपिलप्रोक्तं भक्तिलक्षणम्	३३०
२५	महदादितत्त्वानामुत्पत्तिवर्णनं सद्धर्मवर्णनं च	३३६
२६	प्रकृतिपुरुषस्वरूपविवेकेन मोक्षप्राप्तिविवेचनम्	३४१
२७	सबीजयोगः साङ्गोपाङ्गसावयव-भगवत्स्वरूपध्यानं च	३५०
२८	भक्तियोगरहस्यं कालप्रभावश्च	३५४
२९	देहगेहासक्तपुरुषाणां पापदधोगतिः	३५९
३०	जीवस्य गर्भावस्था गर्भस्थजीवकृता भगवत्स्तुतिश्च धूमार्चिराख्यमार्गद्वयगतानां विविधा	३६५
३१	गतिर्भक्तियोगस्यांत्कर्षश्च	३६९
३२	देवहूतिकृता गगवत्स्तुतिः कपिलस्य प्रस्थानं	३७५
३३	देवहूतेर्मुक्तिश्च	३८०

चतुर्थ स्कन्धः

अध्यायः	विषयः	पृष्ठांकः
१	मनुकन्यानां वंशः यज्ञदत्तयोरवतारः नरनारायणावतारश्च	३८५
२	भवदक्षयोर्वैरसूत्रपातः	३९२
३	पितुर्यज्ञोत्सवं द्रष्टुं गच्छन्तीं सतीं शिवो निवारितवान्	३९६
४	पतिं हित्वा गतायाः सत्या दक्षयज्ञे देहत्यागः	४००
५	वीरभद्रेण यज्ञभङ्गो दक्षवधश्च कृतः	४०५
६	ब्रह्मसहितदेवानां कैलासगमनं रुद्रस्य स्तवनं च	४०८
७	विष्णोः प्राकट्यं दक्षयज्ञस्य प्रवर्तनं च	४१४
८	विमातृदुरुक्त्या विद्धस्य ध्रुवस्य वने भगवदाराधनम्	४२३
९	ध्रुवस्य वरप्राप्तिः स्वनगरं प्रत्यागमनञ्च	४३२
१०	स्वभ्रातृघ्नानां यक्षाणां ध्रुवकृतो वधः	४४१
११	मनुना ध्रुवयक्षयुद्धं निवारितम्	४४४
१२	यज्ञैरिष्ट्वा ध्रुवस्य हरिस्थानस्य प्राप्तिः	४४९
१३	ध्रुववंशेऽगस्य वैराग्यं गृहत्यागश्च	४५५
१४	विप्ररोषादुद्धतवेनस्य वधः	४६१
१५	वेनबाहुतः पृथोः प्रादुर्भावस्तस्य राज्याभिषेकश्च	४६६
१६	सूतादिभिः कृता पृथोः स्तुतिः	४६९
१७	ग्रस्तबीजां भूमिं हन्तुमुद्यतस्य पुथोर्भूमिकृतां स्तुतिः	४७२
१८	पृथक् पृथक् दोग्धृ-वत्स-पात्रादिकल्पनया पृथिवीदोहनम्	४७७
१९	यज्ञविघ्नकरमिन्द्रं हन्तुं प्रवृत्तः पृथुर्ब्रह्मणा निवारितः	४८१
२०	पृथोर्यज्ञे विष्णोरनुशासनं वरदानञ्च	४८५
२१	स्वकीयप्रजापरिषदि पृथुकृतः भगवद्धर्मोपदेशः	४९१
२२	पृथवे सनत्कुमारकृतो ज्ञानोपदेशः	४९७
२३	पृथोर्विमानेन वैकुण्ठगमनम्	५०५
२४	प्रचेतसां जन्म रुद्रगीतं च	५१०
२५	प्राचीनबर्हिषे नारदोपदेशः पुरञ्जनकथा च	५१९
२६	स्वप्नजागरोक्त्यनुसारं मृगयाव्याजेन पुरञ्जनस्य संसृतिप्रपञ्चः	५२६
२७	चण्डकोपस्य कालकन्यायाश्चोपाख्यानम्	५३०
२८	स्त्रीचिन्तया स्त्रीत्वं प्राप्तस्य जीवस्य वैदर्भ्याख्यानतो मुक्तिः	५३४

विषयाणामनुक्रमः

अध्यायः	विषयः	पृष्ठांकः
२९	स्त्रीसंगतः संसारः परमात्मसंगतो मुक्तिश्च	५४१
३०	शिवाद् वरं लब्ध्वा प्रचेतसां राज्यपालनम्	५५२
३१	गृहात् प्रव्रजितानां प्रचेतसां नारदोपेशान्मुक्तिः	५५८
	पञ्चमस्कन्धः	
१	ज्ञानिनो राज्यसौख्यं ज्ञाननिष्ठा प्रियव्रतचरितञ्च	५६३
२	आग्नीध्रचरितम्	५७०
३	नाभेश्चरितं यस्य गृहे साक्षाद्धरि ऋषभरूपेणावततार	५७५
४	शतपुत्रस्य ऋषभस्य राज्ञो राज्यवर्णनम्	५७८
५	ऋषभस्य मोक्षधर्मोपदेशैः पुत्रानुशासनं पारमहंस्यधर्मव्याख्या च	५८२
६	ज्ञानिनो राज्यसौख्यं ज्ञाननिष्ठा प्रियव्रतचरितञ्च	५८८
७	भरतोपाख्याने भरतस्य पुलहाश्रमगमनं तत्र तपश्चरणं च	५९२
८	विष्णुमाराधयतो भरतस्य मृगशावकासक्त्या मृगशरीरप्राप्तिः	५९५
९	भरतस्य विप्रदेहे जडत्वधारणम्	६००
१०	भरतेन रहूगणस्य शिबिकावहनम्	६०५
११	भरतरहूगणसंवादे ज्ञानोपदेशे संसारस्वरूपविवेचनम्	६१०
१२	रहूगणकृतप्रश्नानां भरतकृतं समाधानम्	६१३
१३	वैराग्यदार्ढ्याय भवाटवीवर्णनम्	६१५
१४	भवाटावीरूपकस्य व्याख्या	६२०
१५	भरतवंश्यानां राज्ञां चरितम्	६२८
१६	परीक्षितो द्वीपाब्धिसम्बन्धिनः प्रश्ना भूगोलवर्णनं च	६३१
१७	इलावृते गङ्गावतरणम्	६३६
१८	मेरोः पूर्वादिक्रमतस्त्रिभूत्तरवर्षेषु सेव्यसेवकवर्णनम्	५४१
१९	किंपुरुषभारतवर्षद्वयवर्णनं भारतवर्षस्य गौरवं च	५४८
२०	प्लक्षादिषड्द्वीपानां लोकालोकस्य च स्थितिः	५५४
२१	सूर्यस्य राशिसञ्चारैर्लोकयात्रानिरूपणम्	६६२
२२	सोमशुक्रादिस्थानं तद्गत्यनुसारेण मनुष्याणामिष्टानिष्टे च	६६५
२३	ज्योतिश्चक्राश्रयं ध्रुवस्थानं शिशुमारस्वरूपेण विष्णोः स्थितिश्च	६६९
२४	सूर्यादधोराह्वादिस्थितिः, अतलादिबिलस्वर्गमर्यादाश्च	६७१
२५	संकर्षणदेवस्य संस्थितिस्तदीयं स्तवनं च	६७८
२६	नारकाणां स्थितिः पापिनां यातनावर्णनं च	६८१
	षष्ठ स्कन्धः	
१	अजामिलोपाख्यानं विष्णुदूतयमदूतयोः संवादश्च	६९०
२	भगवन्नाममाहात्म्यादजामिलस्य याम्यान्मुक्तिः	६९८
३	यमेन कृतं वैष्णवोत्कर्षवर्णनं स्वदूतसांत्वनं च	७०४
४	प्रजासृष्ट्यै दक्षकृतं हंसगुह्यस्तोत्रेण स्तवनम्	७०९
५	नारदोपदेशात् सृष्टिविमुखान् सुतान् वीक्ष्य नारदाय दक्षशापः	७१६
६	दक्षस्य षष्टिकन्यानां विवाहः, विश्वरूपस्योत्पत्तिश्च	७२१
७	विश्वरूपस्य पौरोहित्यम्	७२६
८	विश्वरूपेणेन्द्राय प्रोक्तं नारायणकवचम्	७३१
९	विश्वरूपवधः वृत्राद् भीतैर्देवैः कृता विष्णुस्तुतिश्च	७३७
१०	वज्रधरस्येन्द्रस्य वृत्रेण सहयुद्धम्	७४६
११	युध्यतो वृत्रस्य भक्तिज्ञानबलाधिका विचित्रा वाचः	७५०
१२	इन्द्रवृत्रयोर्युद्धे वृत्रवधश्च	७५४
१३	विष्णुना वृत्रब्रह्महत्याभयादिन्द्रस्य रक्षणं कृतम्	७५८
१४	कृच्छ्राल्लब्धे पुत्रे मृते चित्रकेतोः शोकः	७६१
१५	नारदेनाङ्गिरसा च चित्रकेतोः शोकापनोदनम्	७६९
१६	स्वसुतोक्त्यैव चित्रकेतोर्ज्ञानलाभः, नारदद्वारा तस्मै शेषतोषणीविद्यादानम् च	७७२
१७	चित्रकेतोर्गगने गतिः, पार्वत्याः शापाद् वृत्रासुरत्वप्राप्तिः	७८१

विषयाणामनुक्रमः

अध्यायः	विषयः	पृष्ठांकः
१८	दितेर्गर्भे शक्रकृतं मरुतां छेदनम्	७८६
१९	पुंसवनव्रतविधिः	७९५
	सप्तम स्कन्धः	
१	विष्णुभक्ते प्रह्लादे हिरण्यकशिपोर्विरोधः	८००
२	हिरण्यकशिपोर्विष्णौ कोपः	८०६
३	हिरण्यकशिपोस्तपो वरप्राप्तिश्च	८१४
४	हिरण्यकशिपोः प्राप्तवरदर्पाद् विष्णुद्वेषः	८१८
५	विष्णुस्तुतौ रतस्य प्रह्लादस्य वधायोद्योगः	८२४
६	प्रह्लादस्य दैत्यबालकेभ्यो नारदोक्ततत्त्वोपदेशः	८३२
७	शिष्याणां दैत्यबालकानां विश्वासहेतवे प्रह्लादस्य नारदोपदेशवर्णनम्	८३६
८	हिरण्यकशिपुवधो ब्रह्मादिकृता नृसिंहस्तुतिश्च	८४३
९	प्रह्लादकृता नृसिंहस्तुतिः	८५२
१०	रुद्रस्योपपरि भगवदनुग्रहः	८६१
११	वर्णाश्रमाणां स्त्रीणां च मुख्यामुख्यधर्मविवेचना	८७०
१२	ब्रह्मचारिवानप्रस्थयोर्धर्मश्चतुर्णामाश्रमाणां साधारणो धर्मश्च	८७४
१३	साधकयतेर्धर्मस्य सिद्धावस्थायाश्च वर्णनम्	८७८
१४	देशकालभेदेन गृहस्थधर्मवर्णनम्	८८४
१५	सर्ववर्णाश्रमसारसंग्रहः मोक्षलक्षणं च	८८९
	अष्टम स्कन्धः	
१	चतुर्णां मनूनां निरूपणम्	९००
२	ग्राहग्रहीतेन गजेन कृता भगवत्स्तुतिः	९०४
३	गजेन्द्रस्तुतिः भगवता ग्राहाद् गजेन्द्रो विमोचितः	९०८
४	ग्राहस्य गन्धर्वत्वं गजस्य च भगवत्पार्षदत्व-प्राप्तिः	९१३
५	पञ्चमस्य षष्ठस्य च मनोर्गाथा निःश्रीकैर्देवैः कृता भगवत्स्तुतिश्च	९१७
६	देवासुराणाममृतार्थमुद्यमः	९२४
७	शिवस्य विषपानगाथा	९२८
८	क्षीरसागराल्लक्ष्म्यादीनामुत्पत्तिः असुरैरमृतेऽपहृते मोहनीप्रादुर्भावः	९३५
९	मोहिनीरूपधारिणा भगवता देवेभ्योऽमृतप्रदानम्	९४१
१०	देवासुरसंग्रामे विषण्णेषु देवेषु मध्ये हरेराविर्भावः	९४५
११	नारदेन देवानां युद्धनिवारणं शक्रेण मृतानां दैत्यानां जीवनं च	९५१
१२	भगवतो मोहिनीरूपमवलोक्य महादेवस्य मोहः	९५७
१३	सप्तमादीनि षड्विधानि मन्वन्तराणि	९६४
१४	सर्वेषां मन्वादीनां पृथक् पृथक् कर्मवर्णनम्	९६८
१५	बलेः स्वर्गजयो, देवानां पलायनं च	९७०
१६	कश्यपोऽदितिं पयोव्रतं प्राह	९७४
१७	पयोव्रतेन तुष्टस्य हरेर्वामनावतारः	९८१
१८	वामनस्य बलेर्यज्ञे गमनम्	९८५
१९	वामनस्य पदत्रयमात्रभूमियाच्ञा, बलेः स्वीकृतिः, शुक्रस्य च तन्निवारणम्	९८९
२०	बलेर्दानमवाप्य वामनस्य शरीरवृद्धिः	९९५
२१	बलेर्बन्धनम्	१०००
२२	बलेः सुतललोकप्रस्थानं तत्र च हरेस्तस्य द्वारपालत्वस्वीकृतिः	१००४
२३	सपितामहस्य बलेः सुतललोकमनम्	१००९
२४	भगवतो मत्स्यावतारः सत्यव्रतस्य रक्षा च	१०१३

ॐ

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमाहात्म्यम्।।

सङ्ग्रहोक्तिटीकासहितम्

अथ प्रथमोऽध्यायः ।।१।।

सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे। तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः।।१।। यं प्रव्रजन्तमनुपेतमुपेतकृत्यं द्वैपायनो विरहकातर आजुहाव। पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि।।२।। नैमिषे सूतमासीनमभिवाद्य महामतिम्। कथामृतरसास्वादकुशलः शौनकोऽब्रवीत्।।३ ।। शौनक उवाच - अज्ञानध्वान्तविध्वंसकोटिसूर्यसमप्रभ। सूताख्याहि कथासारं मम कर्णरसायनम् ।।४।। भक्तिज्ञानविरागाप्तो विवेको वर्धते महान्। मायामोहनिरासश्च वैष्णवैः क्रियते कथम्।।५।। इह घोरकलौ प्रायो जीवश्चासुरतां गतः। क्लेशाक्रान्तस्य तस्यैव शोधने किं परायणम्।।६।।

।। सङ्ग्रहोक्तिः ।।

अथ प्रथमोऽध्यायः ।।१।।

देवर्षिभक्त्योः समागमः

सच्चिदानन्दरूपाय, विश्वस्य जन्मस्थेमभङ्गकारणाय, आध्यात्मिकाधिदैविकाधिभौतिक-दुःखनिवर्तकाय वयं श्रीकृष्णाय नमस्कुर्मः-स्तुमः।।१ ।।उपनयनसंस्कारात् पूर्वमेव सर्वं संन्यस्य प्रव्रजन्तं यं शुकं विरहातुरो व्यासः पुत्र! पुत्र! पुत्रेति त्रिः प्लुतस्वरेणाऽऽजुहाव, तदा तदात्मकत्वेन विद्यमानास्तरवस्तस्मा उत्तरं ददुः।।२।।मनोमयचक्रधाराविकुण्ठके नैमिषारण्य-नामके विष्णुक्षेत्रे महर्षीणां सभामध्य उपविष्टं महामतिं रोमहर्षणपुत्रमुग्रश्रवसं नमस्कृत्य कथामृतरसास्वादे कुशलः शौनकोऽवोचत्।।३।। *शौनक उवाच* - अज्ञानांधकारनिवारणे कोटिशः सूर्यसमतेजस्विन् हे सूत! कर्णयो रसायनतुल्यं कथासारं नो ब्रूहि।।४।। अस्माकं वैष्णवानां भक्तिज्ञानवैराग्यसमन्वितो विवेको नितान्तं कथं वर्धते, एवं च मायामूलकस्य मोहस्य विनाशः कथं भवति।।५।। अस्मिन् घोरे कलौ युगे जीव आसुरभावं प्राप्तोऽस्ति,

श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनम्। कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुना।।७।। चिन्तामणिर्लोकसुखं सुरद्रुः स्वर्गसम्पदम्। प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम्।।८।। *सूत उवाच* - प्रीतिः शौनक! चित्ते ते ह्यतो वच्मि विचार्य च। सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम्।।९।। भक्त्योघवर्धनं यच्च कृष्णसंतोषहेतुकम्। तदहं तेऽभिधास्यामि सावधानतया शृणु।।१०।। *कालव्यालमुखग्रासत्रासनिर्णाशहेतवे। श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम्।।११।।* एतस्मादपरं किञ्चिन्मनः शुद्ध्यै न विद्यते। जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत्।।१२।। परीक्षिते कथां वक्तुं सभायां संस्थिते शुके। सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन्।।१३।। शुकं नत्वावदन् सर्वे स्वकार्यकुशलाः सुराः। कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम्।।१४।। एवं विनिमये जाते सुधा राज्ञा प्रपीयताम्।

।। सङ्ग्रहोक्तिः ।।

अनेकविधदुःखैर्ग्रस्तस्य तस्य जीवस्य शुद्धिकरणं सर्वोत्तमं साधनं किम्?।।६।। जीवस्य पवित्रापादकं, श्रेयःसाधनेषु सर्वोत्कृष्टं भगवत्प्राप्तिकारकं च यत् साधनं भवेत् तत् सांप्रतं नो वद।।७।। प्राप्तश्चिन्तामणिरैहिकं सुखं ददाति, कल्पवृक्षः स्वर्गीयसम्पदं ददाति, एवं च प्रीतः सद्गुरुर्योगिनामपि दुष्प्राप्यं वैकुण्ठं भगवद्धाम प्रयच्छति।।८।। *सुत उवाच* - हे शौनक! त्वद्धृदये स्नेहो वर्तते, अतोऽहं सम्यग् विचार्य - संसारभीतिनिवर्तकं कृष्णप्रसन्नताकारणं भक्तिपूरविवर्द्धकं सर्वशास्त्रसाररूपं साधनं ते कथयिष्यामि, त्वं समवहितः सन् शृणु।।१०।। कालाजगरनिगरणत्रासनिवारणाय सर्वोत्तमं साधनं श्रीमद्भागवतं शास्त्रं वर्तत इति व्यासपुत्रशुकेन भाषितमस्ति।।११।। एतस्माद् अन्यत् किमपि साधनं मनसो विशुद्ध्यै पर्याप्तं न विद्यते, यस्य जन्मान्तरसहस्रोत्थं सुकृतं स्यात् तस्यैव हि श्रीमद्भागवतं प्राप्तं भवति।।१२।। यदा सभायां शुकः परीक्षिते कथां वक्तुं प्रारेभे तदा देवा अमृतकलशं गृहीत्वा तत्राऽऽजग्मुः।।१३।। स्वार्थसाधननिपुणाः सुराः शुकं प्रणम्योचुः - इममृतं गृहीत्वाऽस्मान् कथामृतं देहि।।१४।। इत्थं विनिमये कृते सति परीक्षित् सुधां पिबतु, वयं तु श्रीमद्भागवतकथामृतं

प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ।।१५।। *क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् । ब्रह्मरातो विचार्यैवं तदा देवाञ्जहास ह ।।१६।।* अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतम्। श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा ।।१७।। राज्ञो मोक्षं तथा वीक्ष्य पुरा धातापि विस्मितः। सत्यलोके तुलां बद्ध्वा तोलयत्साधनान्यजः।।१८।। लघून्यन्यानि जातानि गौरवेण इदं महत्। तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः।।१९।। मेनिरे भगवद्रूपं शास्त्रं भागवतं कलौ। पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ।।२०।। सप्ताहेन श्रुतं चैतत्सर्वथा मुक्तिदायकम्। सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः।।२१।। यद्यपि ब्रह्मसम्बन्धाच्छ्रुतमेतत्सुरर्षिणा। सप्ताहश्रवणविधिः कुमारैस्तस्य भाषितः।।२२।। *शौनक उवाच* - लोकविग्रहमुक्तस्य नारदस्यास्थिरस्य च। विधिश्रवे कुतः प्रीतिः संयोगः कुत्र तैः सह ।।२३।।

।। सङ्ग्रहोक्तिः ।।

पास्यामः।।१५।। लोके काचः क्व? महान् मणिश्च क्व? तस्य विनिमयो न संभवति, एवं क्व भगवतकथामृतं क्व च स्वर्गीयामृतम्? तयोः साम्यमशक्यम्, इति विचार्य शुको देवान् जहास ।।१६।। शुको देवान् भक्तिशून्यान् विज्ञाय, तेंभ्यः कथामृतं न ददौ, अतो भागवतस्य कथा देवानामपिदुर्लभा वर्तते ।।१७।। पुरा राज्ञः परीक्षितः भागवतकथाश्रवणेन प्राप्तं मोक्षं वीक्ष्य ब्रह्माऽपि विस्मितो जातः, तदनन्तरं सत्यलोके विधाता तुलां बद्ध्वा सर्वाणि श्रेयः साधनान्यतोलयत् ।।१८।। तदेतराणि साधनानि न्यूनानि बभूवुः, इदं भागवतं गौरवेण महत् बभूव, तद् विज्ञाय सर्वे ऋषयोऽपि परमं विस्मयं प्रापुः।।१९।। तदारभ्य पठनाच्छ्रवणाच्च भागवतं शास्त्रं सद्यो वैकुण्ठधाम प्रापकं भगवद्रूपं च वर्तत इति ते सर्वे मेनिरे।।२०।। इदं भागवतं सप्ताहविधिना श्रूयते चेत् तर्हि सर्वथा तद् मुक्तिं ददाति, इति दयालुभिः सनकादिभिर्नारदाय पुरा प्रोक्तमासीत् ।।२१।। *शौनक उवाच* - लोकव्यवहाररहितस्य नित्यमस्थिरस्य च नारदस्य भागवतसप्ताहश्रवणे प्रीतिः कथं जाता, एवं च तस्य सनाकदिभिः सह सुयोगः कुत्र जातः।।२३।।

सूत उवाच - अत्र ते कीर्तयिष्यामि भक्तियुक्तं कथानकम्। शुकेन मम यत्प्रोक्तं रहः शिष्यं विचार्य च।।२४।। एकदा हि विशालायां चत्वार ऋषयोऽमलाः। सत्सङ्गार्थं समायाता ददृशुस्तत्र नारदम्।।२५।। *कुमारा ऊचुः* - कथं ब्रह्मन्दीनमुखः कुतश्चिन्तातुरो भवान्। त्वरितं गम्यते कुत्र कुतश्चागमनं तव।।२६।। इदानीं शून्यचित्तोऽसि गतवित्तो यथा जनः। तवेदं मुक्तसङ्गस्य नोचितं वद कारणम्।।२७।। *नारद उवाच* - अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति। पुष्करं च प्रयागं च काशीं गोदावरीं तथा।।२८।। हरिक्षेत्रं कुरुक्षेत्रं श्रीरङ्गं सेतुबन्धनम्। एवमादिषु तीर्थेषु भ्रममाण इतस्ततः।।२९।। नापश्यं कुत्रचिच्छर्म मनस्संतोषकारकम्। कलिनाधर्ममित्रेण धरेयं बाधिताधुना।।३०।। सत्यं नास्ति तपः शौचं दया दानं न विद्यते। उदरम्भरिणो जीवा वराकाः कूटभाषिणः।।३१।। मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः। पाखण्डनिरताः सन्तो विरक्ताः सपरिग्रहाः ।।३२।। तरुणीप्रभुता गेहे श्यालको बुद्धिदायकः। कन्याविक्रयिणो लोभाद्दम्पतीनां च कल्कनम्।।३३।।

।। सङ्ग्रहोक्तिः ।।

सूत उवाच - अस्मिन् विषये मां विश्वस्तं शिष्यमवधार्य शुकेन प्रोक्तं भक्तिभरितमेकं कथानकं ते कथयिष्यामि।।२४।। एकदा निर्मलाश्चत्वारः सनाकाद्याः ऋषयो बदरिकाश्रमं सत्सङ्गार्थं जग्मुः, ते तत्र नारदं ददृशुः।।२५।। कुमारा ऊचुः - हे ब्रह्मन्! भवान् दीनमुखः कथं वर्तते, कुतश्चिन्तातुरश्च लक्ष्यते, त्वया त्वरितं कुत्र गम्यते, कुत आगम्यते च।।२६।। इदानीं नष्टधन-जनवत् शून्यचित्तो दृश्यसे, सर्वथा निःसङ्गस्य भवत इदमुचितं न, चिन्ताकारणं यद् भवेत् तद् वद।।२७।। *नारद उवाच* - अहं भारतभुवं सर्वोत्तमां विज्ञाय तत्र गतः, पुष्करं, प्रयागं, काशीं, गोदावरीं, हरिद्वारं, कुरुक्षेत्रं, श्रीरङ्गं, सेतुबन्धं, चेत्येतेषु तीर्थेष्वितस्ततो भ्रममाण आसम्,।।२८-२९।। कुत्रचिदपि मनःसंतोषजनकं सुखं नाऽपश्यम्, अधुनाऽधर्मबन्धुना कलिनेयं धराऽऽक्रान्ता वर्तते।।३०।। यत्र तत्र सत्यं, तपः, शौचं, दया, दानं, चेत्येतानि कुत्राऽपि न विद्यन्ते, जीवा उदरम्भरिणो हीनाः कूटभाषिणश्च वर्तन्ते ।।३१।। मन्दाः सद्बुद्धि-सद्भाग्यहीनाः पीडिताः पाखण्डपराः, विरक्ताः सन्तोऽपि सपरिग्रहाः विद्यन्ते।।३२।।

आश्रमा यवनै रुद्धास्तीर्थानि सरितस्तथा। देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥३४॥ न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः। कलिदावानलेनाद्य साधनं भस्मतां गतम् ॥३५॥ अट्टशूला जनपदाः शिवशूला द्विजातयः। कामिन्यः केशशूलिन्यः सम्भवन्ति कलाविह ॥३६॥ एवं पश्यन् कलेर्दोषान् पर्यटन्नवनीमहम्। यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥३७॥ तत्राश्चर्यं मया दुष्टं श्रूयतां तन्मुनीश्वराः। एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥३८॥ वृद्धौ द्वौ पतितौ पार्श्वे निःश्वसन्तावचेतनौ। शुश्रूषन्ती प्रबोधन्ती रुदती च तयोः पुरः ॥३९॥ दश दिक्षु निरीक्षन्ती रक्षितारं निजं वपुः। वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥४०॥ दृष्ट्वा दूराद्गतः सोऽहं कौतुकेन तदन्तिकम्। मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥४१॥ *बालोवाच* - भोः भोः साधो क्षणं तिष्ठ मच्चिन्तामपि नाशय। दर्शनं तव लोकस्य सर्वथाघहरं परम् ॥४२॥ बहुधा तव वाक्येन दुःखशान्तिर्भविष्यति। यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ॥४३॥

॥ सङ्ग्रहोक्तिः ॥

गृहस्थजीवने तरुणीप्रभुता, बुद्धिदायकः श्यालकः, जनकाः कन्याविक्रयिणः, दाम्पत्ये क्लेश-बाहुल्यं च दृश्यते ॥३३॥ यवनैराश्रमा रुद्धाः, तीर्थसरितो देवमन्दिराणि च तैर्दुष्टैर्ध्वस्तानि सन्ति ॥३४॥ तत्र योगी, सिद्धो, ज्ञानी, वा सत्क्रियापरो नरः नोपलभ्यते, अद्य कलिदावानलेन सर्वाण्यपि श्रेयःसाधनानि भस्मतां गतानि भवन्ति ॥३५॥ अस्मिन् कलौ युगे देशा अन्न-विक्रयिणः, विप्रा वेदविक्रयिणः, स्त्रियो देहविक्रयिण्यश्च जाताः सन्ति ॥३६॥ इत्थं कलेर्दोषान् पश्यन्, भूमौ पर्यटन्नहं हरेर्लीलास्थानं यमुनातटं ययौ ॥३७॥ हे मुनीवराः! श्रूयताम्, तत्र मयैकमाश्चर्यं दृष्टम्, तदैका तरुणी खिन्नमानसा निषण्णा दृष्टा ॥३८॥ तस्याः पार्श्वप्रदेशे निःश्वसन्तावचेतनौ वृद्धौ पतितावास्ताम्, तयोः पुरः सा तरुणी तौ शुश्रूषन्ती प्रबोधयन्ती रुदती चाऽभवत् ॥३९॥ निजवपुषो रक्षितारं दशसु दिशासु निरीक्षन्ती, स्त्रीशतेन विज्यमाना, मुहुर्मुहुर्बोध्यमाना च साऽभूत् ॥४०॥ तां दूराद् दृष्ट्वा कुतूहलावशोऽहं तदन्तिकं गतः, मां दृष्ट्वा सा बालोत्थिता, विह्वला च सती मां वचोऽब्रवीत् ॥४१॥ *बालोवाच* - हे साधो! क्षणं

नारद उवाच - कासि त्वं काविमौ चेमा नार्यः काः पद्मलोचनाः। वद देवि सविस्तारं स्वस्य दुःखस्य कारणम् ।।४४।। *बालोवाच* - अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ। ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ।।४५।। गङ्गाद्याः सरितश्चेमा मत्सेवार्थं समागताः। तथापि न च मे श्रेयः सेवितायाः सुरैरपि ।।४६।। इदानीं शृणु मद्वार्तां सचित्तस्त्वं तपोधन। वार्ता मे वितताप्यस्ति तां श्रुत्वा सुखमावह ।।४७।। उत्पन्ना द्रविडे साहं वृद्धिं कर्णाटके गता। क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णतां गता ।।४८।। तत्र घोरकलेर्योगात्पाखण्डैः खण्डिताङ्गका। दुर्बलाहं चिरं याता पुत्राभ्यां सह मन्दताम् ।।४९।। वृन्दावनं पुनः प्राप्य नवीनेव सुरूपिणी। जाताहं युवती सम्यक्प्रेष्ठरूपा तु साम्प्रतम् ।।५०।। इमौ तु शयितावत्र सुतौ मे क्लिश्यतः श्रमात्। इदं स्थानं परित्यज्य विदेशं गम्यते मया ।।५१।। जरठत्वं समायातौ तेन दुःखेन दुःखिता। साहं तु तारुणी कस्मात्सुतौ वृद्धाविमौ कुतः ।।५२।।

।। सङ्ग्रहोक्तिः ।।

तिष्ठ, मम चिन्तां नाशय, भवद्दर्शनम् सर्वथा लोकस्य पापनिवारकं परं वर्तते ।।४२।। भवद्वचनश्रवणेन मे दुःखनिवृत्तिर्भविष्यति, यदि विपुलं भाग्यं भवेत् तर्हि भवतो दर्शनं स्यात् ।।४३।। *नारद उवाच* - त्वं काऽसि? इमौ पतितौ पुरुषौ कौ? इमाः पद्मलोचना नार्यश्च काः सन्ति? हे देवि! स्वस्य दुःखकारणं सविस्तरं वद ।।४४।। *बालोवाच* - अहं भक्तिरिति नाम्ना प्रसिद्धाऽस्मि, इमौ ज्ञानवैराग्यनामानौ द्वौ मम पुत्रौ कालवेगेन जर्जरौ जातौ स्तः ।।४५।। इमा गङ्गाद्या नद्यो मत्सेवार्थं समागताः सन्ति, देवैः सेविताया अपि मे श्रेयो न विद्यते ।।४६।। हे तपोधन! इदानीं समाहितः सन् मद्वार्तां शृणु, मे वार्ताऽपि विस्तृताऽस्ति, तां श्रुत्वा मद्धृदये सुखं कुरु ।।४७।। द्रविडदेश उत्पन्नाऽहं कर्णाटकदेशे वृद्धिं प्राप्ताः, महाराष्ट्रप्रदेशे क्वचित् क्वचित् स्थिता, किन्तु गुर्जरप्रदेशे तु वार्द्धक्यं प्राप्ताऽस्मि ।।४८।। तत्र घोरकलेः प्रभावात् पाखण्डबाहुल्यादहं खण्डिताऽभवम्, ततश्चिरकालाद् दुर्बलाऽहं मत्पुत्राभ्यां सह मन्दतां गताऽस्मि ।।४९।। पुनर्वृन्दावनं प्राप्याऽहं युवतिर्नवीना सुरूपवती च जाता, साम्प्रतं सम्यक् प्रेष्टरूपा च वर्ते ।।५०।। अत्र शयिताविमौ मे पुत्रौ श्रमात् क्लिश्यतः, इदं स्थानं परित्यज्य मया स्थानान्तरं गम्यते ।।५१।। मे पुत्रौ वार्द्धक्यं प्राप्तौ, तद्विषयेण दुःखिता साऽहं तरुणी,

त्रयाणां सहचारित्वाद्वैपरीत्यं कुतः स्थितम्। घटते जरठा माता तरुणौ तनयाविति ।।५३।। अतः शोचामि चात्मानं विस्मयाविष्टमानसा। वद योगनिधे धीमन् कारणं चात्र किं भवेत् ।।५४।। *नारद उवाच* – ज्ञानेनात्मनि पश्यामि सर्वमेतत्तवानघे। न विषादस्त्वया कार्यो हरिः शं ते करिष्यति ।।५५।। *सूत उवाच* – क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः ।।५६।। *नारद उवाच* – शृणुष्वावहिता बाले युगोऽयं दारुणः कलिः। तेन लुप्तः सदाचारो योगमार्गस्तपांसि च ।।५७।। जना अघासुरायन्ते शाठ्यदुष्कर्मकारिणः। इह सन्तो विषीदन्ति प्रहृष्यन्ति ह्यसाधवः। धत्ते धैर्यं तु यो धीमान् स धीरः पण्डितोऽथवा ।।५८।। अस्पृश्यानवलोक्येयं शेषभारकरी धरा। वर्षे वर्षे क्रमाज्जाता मङ्गलं नापि दृश्यते ।।५९।। न त्वामपि सुतैः साकं कोऽपि पश्यति साम्प्रतम्। उपेक्षितानुरागान्धैर्जर्जरत्वेन संस्थिता ।।६०।। वृन्दावनस्य संयोगात्पुनस्त्वं तरुणी नवा। धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ।।६१।।

।। सङ्ग्रहोक्तिः ।।

इमौ मे सुतौ वृद्धौ कुतः? ।।५२।। अस्माकं त्रयाणामपि सहचारित्वं वर्तते, तथापि वैपरीत्यं कुतो जातम्, माता वृद्धा, तनयौ तरुणाविति हि सर्वत्राऽनुभूयते ।।५३।। अतो विस्मयपूर्णमानसाऽहमात्मानं शोचामि, हे धीमन्! योगनिधे! अत्र कारणं किं भवेत्? तद् वद ।।५४।। *नारद उवाच* – हे निर्दोषे! सर्वमहं ज्ञानदृष्ट्या पश्यामि, अत्र त्वया खेदो न कार्यः, भगवान् हरिस्ते शं करिष्यति ।।५५।। मुनीश्वरो नारदः क्षणमात्रं विचार्य, तद्विज्ञाय च वाक्यमूचे ।।५६।। हे बाले! सावधाना सती त्वं शृणु, अयं दारुणः कलिर्वर्तते, तेन हेतुना सदाचारः, योगमार्गः तपांसि च लुप्तानि सन्ति ।।५७।। शठतां दुष्कर्माणि च कर्तारो लोका अघासुरवदाचरन्ति, अत्र युगे साधवो विषीदन्ति दुर्जनाश्च प्रहृष्यन्ति, यो धीमान् धैर्यं धारयति स एव धीरः पण्डितो वा ज्ञेयः ।।५८।। इयं धरा प्रतिवर्षं क्रमात् शेषस्य भाररूपा जाताऽस्ति, अतोऽस्पृश्याऽनवलोक्या च वर्तते, कुत्राऽपि शुभं न दृश्यते ।।५९।। साम्प्रतं कोऽपि जनो सुताभ्यां साकं त्वां न पश्यति, विषयानुरक्तजनैरुपेक्षितत्वाद् यूयं जर्जरत्वेन स्थिताः स्थ ।।६०।। वृन्दावनस्य संयोगात् त्वं नूतना तरुणी च जाता, अतो वृन्दावनं धन्यम्, –

अत्रेमौ ग्राहकाभावान्न जरामपि मुञ्चतः। किञ्चिदात्मसुखेनेह प्रसुप्तिर्मन्यतेऽनयोः ।।६२।। *भक्तिरुवाच* - कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः। प्रवृत्ते तु कलौ सर्वसारः कुत्र गतो महान् ।।६३।। करुणापरेण हरिणाप्यधर्मः कथमीक्ष्यते। इमं मे संशयं छिन्धि त्वद्वाचा सुखितास्म्यहम् ।।६४।। *नारद उवाच* - यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु। सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ।।६५।। यदा मुकुन्दो भगवान् क्ष्मां त्यक्त्वा स्वपदं गतः। तद्दिनात्कलिरायातः सर्वसाधनबाधकः ।।६६।। दृष्टो दिग्विजये राज्ञा दीनवच्छरणं गतः। न मया मारणीयोऽयं सारङ्ग इव सारभुक् ।।६७।। *यत्फलं नास्ति तपसा न योगेन समाधिना तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ।।६८।।* एकाकारं कलिं दृष्ट्वा सारवत्सारनीरसम्। विष्णुरातः स्थापितवान् कलिजानां सुखाय च ।।६९।। कुकर्माचरणात्सारः सर्वतो निर्गतोऽधुना।

।। सङ्ग्रहोक्तिः ।।

यत्र भक्तिस्तारुण्येन नृत्यति ।।६१।। अत्र ग्राहकाऽभावात् ते तनयौ जरां न मुञ्चतः, अत्र किञ्चिदात्मसुखेन तुष्टत्वात् सप्ताविति मन्यते ।।६२।। *भक्तिरुवाच*- राज्ञा परीक्षिताऽयमशुचिः कलिः कथं भुवि स्थापितः, जगति कलौ प्रवृत्ते सति शुभानां महान् सारः क्व गतः? ।।६३।। परमदयालुना हरिणाऽप्यधर्मः कथमीक्ष्यते? त्वमिमं मे संशयं छिन्धि, त्वद्वार्तयाऽहं सुखिताऽस्मि ।।६४।। *नारद उवाच*- हे बाले! यदि त्वमेवं पृच्छसि तर्हि सप्रेम मद्वचनं शृणु, हे भद्रे! तुभ्यं सर्वं वक्ष्यामि, तव सर्वं कष्टं गमिष्यति ।।६५।। मुक्तिदाता भगवान् श्रीकृष्णो यदेमां धरित्रीं त्यक्त्वा स्वधाम गतः, तद्दिनादारभ्य सर्वश्रेयःसाधनविध्वंसकः कलिर्भूमावागतोऽस्ति ।।६६।। राज्ञा परीक्षिता दिग्विजयसमये कलिर्दृष्टः, तदा स कलिर्दीनवद् राज्ञः शरणं गतः, किन्तु सारग्राही मधुकर इवाऽयं कलिर्मया न मारणीय इति तेन निर्णीतम् ।।६७।। तपसा योगेन समाधिना च यत् फलं न प्राप्यते, तत् फलं कलौ भगवतः कृष्णस्य कीर्तनभक्त्यैव लभ्यते ।।६८।। सारहीनेऽपि कलावेकं साररूपं गुणं वीक्ष्य कलियुगे जातानां जनानां सुखाय परीक्षिता कलिः स्थापितोऽस्ति ।।६९।। सांप्रतमधर्माचरणात् सर्वेभ्यो वस्तुभ्यः सारो -

पदार्थाः संस्थिता भूमौ बीजहीनास्तुषा यथा ॥७०॥ विप्रैर्भागवती वार्ता गेहे गेहे जने जने। कारिता कणलोभेन कथासारस्ततो गतः॥७१॥ अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः। तेऽपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः॥७२॥ कामक्रोधमहालोभतृष्णाव्याकुलचेतसः। तेऽपि तिष्ठन्ति तपसि तपःसारस्ततो गतः॥७३॥ मनसश्चाजयाल्लोभाद्दम्भात्पाखण्डसंश्रयात्। शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम्॥७४॥ पण्डितास्तु कलत्रेण रमन्ते महिषा इव। पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने॥७५॥ नहि वैष्णवता कुत्र सम्प्रदायपुरःसरा। एवं प्रलयतां प्राप्तो वस्तुसारः स्थले स्थले॥७६॥ अयं तु युगधर्मो हि वर्तते कस्य दूषणम्। अतस्तु पुण्डरीकाक्षः सहते निकटे स्थितः॥७७॥ *सूत उवाच* - इति तद्वचनं श्रुत्वा विस्मयं परमं गता। भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक॥७८॥ *भक्तिरुवाच* - सुरर्षे त्वं हि धन्योऽसि मद्भाग्येन समागतः। साधूनां दर्शनं लोके सर्वसिद्धिकरं परम्॥७९॥

॥ सङ्ग्रहोक्तिः॥

निर्गतोऽस्ति, तस्मात्कारणादेव भूमौ पदार्था बीजहीनास्तुषा इव स्थिताः सन्ति॥७०॥ विप्रैरन्नादिलोभेन गृहे गृहे प्रतिजनं भागवतस्य कथाऽऽरब्धा, तेन कथायाः सारो निर्गतोऽस्ति॥७१॥ अनेकविधपापकर्तारस्तीर्थेषु निवसन्ति, तस्मात् कारणात् तीर्थानां सारोऽपि निरस्तः॥७२॥ कामक्रोधलोभतृष्णादिभिर्विह्वलचेतसो नरास्तपस्थानेषु तपस्विरूपेण स्थितास्तेन तपसः सारोऽपि नष्टः ॥७३॥ मनोनिग्रहाभावात् लोभाद् दम्भात् पाखण्डाश्रयणाच्छास्त्राणामनभ्यासाच्च ध्यानयोगस्य फलमपि नष्टम्॥७४॥ पण्डिता अपि पशुवत् स्त्रैणाः सन्तो विषयान् भुञ्जते, पुत्रोत्पादने निपुणाः सन्तः श्रेयःसाधनविमुखा जाताः॥७५॥ कुत्राऽपि सम्प्रदायप्राप्तं वैष्णवत्वं नास्ति, तेन हेतुना स्थले स्थले वस्तुनां सारो नष्टोऽस्ति॥७६॥ अयं युगस्य प्रभावोऽस्ति, तत्र कस्य दूषणं ब्रूयाम, अत एव निकटस्थितोऽपि परमात्मा सर्वं सहते॥७७॥ *सूत उवाच* - इति देवर्षिवचनं श्रुत्वा परमं विस्मयं प्राप्ता भक्तिर्भूयो वचनमूचे, हे शौनक! तच्छ्रूयताम्॥७८॥

जयति जगति मायां यस्य कायाधवस्ते; वचनरचनमेकं केवलं चाकलय्य। ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं; सकलकुशलपात्रं ब्रह्मपुत्रं नतास्मि ।।८०।।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिनारदसमागमो नाम प्रथमोऽध्यायः ।।१।।

अथ द्वितीयोऽध्यायः ।।२।।

नारद उवाच - वृथा खेदयसे बाले अहो चिन्तातुरा कथम्। श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ।।१।। द्रौपदी च परित्राता येन कौरवकश्मलात्। पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ।।२।। त्वं तु भक्तिः प्रिया तस्य सततं प्राणतोऽधिका। त्वयाऽऽहूतस्तु भगवान् याति नीचगृहेष्वपि ।।३।। सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ। कलौ तु केवला भक्तिर्ब्रह्मसायुज्यकारिणी ।।४।।

।। सङ्ग्रहोक्तिः ।।

भक्तिरुवाच - हे देवर्षे! त्वं धन्योऽसि, मम सद्भाग्येनाऽऽवयोः समागमो जातः, यतः सत्पुरुषाणादर्शनं लोके सर्वपुरुषार्थसाधकं मन्यते ।।७९।।यस्य भवतः केवलमुपदेशमङ्गीकृत्य कयाधुपुत्रः प्रह्लादो मायामजयत्, यस्य कृपया ध्रुवोऽपि ध्रुवपदं प्राप्तवान्, अतो निखिलश्रेयस आधारं ब्रह्मतनयं नमस्करोमि ।।८०।।

इति श्रीमद्भागवतमाहात्म्ये सङ्ग्रहोक्त्यां प्रथमोऽध्यायः ।।१।।

अथ द्वितीयोऽध्यायः ।।२।।

भक्त्या दुःखनिवारणाय नारदस्य प्रयासः

नारद उवाच - हे बाले! अहो त्वं वृथा खेदयसे, चिन्तया कथमातुरा भवसि? श्रीकृष्णस्य चरणारविन्दं स्मर, सर्वं दुःखं गमिष्यति ।।१।। येन कृष्णेन कौरवेभ्य आगताद् दुःखाद् द्रौपदी परित्राता, तथा च येन गोपी अपि पालिताः, स कृष्णः क्वापि न गतः ।।२।। त्वं भक्तिस्तु कृष्णस्य प्राणेभ्योऽप्यधिका प्रियासि, त्वयाऽहूतः स भगवान् नीचगृहेष्वप्यागच्छति ।।३।। कृतादिषु त्रिषु युगेषु ज्ञानवैराग्यौ मोक्षसाधकौ भवतः, कलौ तु केवला भक्तिरेव साधर्म्यमुक्तिप्रदा कथिताऽस्ति ।।४।।

इति निश्चित्य चिद्रूपः सद्रूपां त्वां ससर्ज ह। परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम्
।।५।। बद्ध्वाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा। त्वां तदाऽऽज्ञापयत्कृष्णो
मद्भक्तान् पोषयेति च।।६।। अङ्गीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा। मुक्तिं
दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ।।७।। पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि
च। भूमौ भक्तविपोषाय छायारूपं त्वया कृतम्।।८।। मुक्तिं ज्ञानं विरक्तिं च सह
कृत्वा गता भुवि। कृतादिद्वापरस्यान्तं महानन्देन संस्थिता।।९।। कलौ मुक्तिः
क्षयं प्राप्ता पाखण्डामयपीडिता। त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा।।१०।।
स्मृता त्वयापि चात्रैव मुक्तिरायाति याति च। पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव
रक्षितौ।।११।। उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव। तथापि चिन्तां
मुञ्चत्वमुपायं चिन्तयाम्यहम्।।१२।। कलिना सदृशः कोऽपि युगो नास्ति वरानने।
तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने।।१३।।

।। सङ्ग्रहोक्तिः ।।

इत्थं निश्चित्यैव हि सच्चिदानन्दस्वरूपः परमात्मा स्वां प्रियां सुन्दरीं सद्रूपां त्वां भक्तिं ससर्ज।।५।।
एकदा त्वयाऽञ्जलिं बद्ध्वा कृष्णः पृष्टः "अहं किं करोमि?" तदा "मद्भक्तान् पोषय" इति
त्वां स आज्ञापयत्।।६ ।। साऽऽज्ञा त्वयाऽङ्गीकृता, तदा स भगवान् हरिस्त्वयि प्रसन्नोऽ-
भवत्, तथा मुक्तिं त्वद्दासीरूपां ददौ, ज्ञानवैराग्याविमौ सुतौ च तुभ्यं दत्तौ।।७।। त्वं वैकुण्ठे
स्वेन रूपेण भक्तानां पोषणं कुरुषे, भूमौ तु भक्तपोषणाय त्वया छायारूपं गृहीतं वर्तते।।८।।
मुक्तिज्ञानवैराग्यैः सह भूमावागता त्वं कृतादिद्वापरान्तं महानन्देन संस्थिता बभूविथ ।।९।।
कलौ तु पाखण्डरूपरोगेण पीडिता मुक्तिः क्षीणा जाता, सा त्वदाज्ञया सत्वरं पुनरेव वैकुण्ठं
गताऽस्ति।।१०।। त्वया स्मृता सती सा मुक्तिः अत्राऽऽयाति पुनर्याति च, इमौ ज्ञानवैराग्यौ
तु त्वया पुत्रीकृत्य स्वस्य पार्श्व एव रक्षितौ स्तः।।११।। कलौ तु जनानामुपेक्षया ते सुताविमौ
मन्दौ वृद्धौ च जातौ स्तः, तथाऽपि त्वं चिन्तां त्यज, कमप्युपायं विचारयामि।।१२।। हे
वरानने! कलिना सदृशः कोऽपि युगो नास्ति, तस्मिन् त्वामहं प्रतिगृहं प्रतिजनं च
स्थापयिष्यामि।।१३।।

अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान्। तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये।।१४।। त्वदन्विताश्च ये जीवा भविष्यन्ति कलाविह। पापिनोऽपि गमिष्यन्ति निर्भयं कृष्णमन्दिरम्।।१५।। येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी। न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः।।१६।। न प्रेतो न पिशाचो वा राक्षसो वासुरोऽपि वा। भक्तियुक्तमनस्कानां स्पर्शने न प्रभुर्भवेत्।।१७।। न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा। हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः।।१८।। नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते। कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः।।१९।। भक्तिद्रोहकरा ये च ते सीदन्ति जगत्त्रये। दुर्वासा दुःखमापन्नः पुरा भक्तविनिन्दकः।।२०।। अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः। अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा।।२१।। *सूत उवाच* - इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा। सर्वाङ्गपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत्।।२२।। *भक्तिरुवाच* - अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला। न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा।।२३।।

।। सङ्ग्रहोक्तिः ।।

अन्य धर्मान् परित्यज्य भक्तिविषयकान् महोत्सवांश्च पुरस्कृत्य यद्यहं लोके त्वां नाऽप्रवर्तयिष्यं तर्हि हरेर्दासो नाऽभविष्यम्।।१४।। अत्र कलौ ये जना भक्त्यन्विता भविष्यन्ति ते पापिनोऽपि निर्भयं श्रीकृष्णपदं गमिष्यन्ति।।१५।। येषां हृदि प्रेमस्वरूपा भक्तिः सर्वदा वसेत् ते शुद्धस्वरूपाः पुरुषाः स्वप्नेऽपि यमं न पश्यन्ति।।१६।। येषां मनसि कृष्णभक्तिस्तिष्ठति तेषां स्पर्शने प्रेतपिशाचराक्षसासुराः केऽपि समर्था न भवन्ति।।१७।। तपोभिर्वेदैर्ज्ञानेन कर्मणा वा हरिर्वशो न भवति, केवलया भक्त्यैव हि स वशो भवति, तत्र प्रमाणं गोप्यो भवन्ति।।१८।। नृणां जन्मान्तरसहस्रेण कृष्णभक्तौ प्रीतिर्जायते, अतः कलौ भक्तिरेव मुख्या भवति, भक्त्यैव हि कृष्णः साक्षात् क्रियते।।१९।। त्रिलोक्यां ये भक्तिद्रोहकरास्ते सीदन्ति, पुरा भक्तिविनिन्दको दुर्वासा दुःखं प्राप।।२०।। मुक्त्यै तु भक्तिरेकैव पर्याप्ता, केवला व्रत-तीर्थ-योग-यज्ञ-ज्ञानादयो न पर्याप्ताः।।२१।। *सूत उवाच* - इत्थं देवर्षिणा नारदेन निर्णीतं स्वमाहात्म्यं श्रुत्वा सर्वाङ्गपुष्टा

कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात्। पुत्रयोश्चेतना नास्ति ततो बोधय बोधय ।।२४।। *सूत उवाच* - तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः तयोर्बोधन-मारेभे कराग्रेण विमर्दयन् ।।२५।। मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन्। ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम् ।।२६।। वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः। बोध्यमानौ तदा तेन कथंचिच्चोत्थितौ बलात् ।।२७।। नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसावुभौ। बकवत्पलितौ प्रायः शुष्ककाष्ठसमाङ्गकौ ।।२८।। क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ। ऋषिश्चिन्तापरो जातः किं विधेयं मयेति च ।।२९।। अहो निद्रा कथं याति वृद्धत्वं च महत्तरम्। चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ।।३०।। व्योमवाणी तदैवाभून्मा ऋषे खिद्यतामिति। उद्यमः सफलस्तेऽयं भविष्यति न संशयः ।।३१।। एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर। तत्ते कर्माभिधास्यन्ति साधवः साधुभूषणाः ।।३२।।

।। सङ्ग्रहोक्तिः ।।


भक्तिर्नारदं प्रति प्राह ।।२२।। भक्तिरुवाच - अहो! हे नारद! त्वं धन्योऽसि तव मयि निश्चला प्रीतिरस्ति, अतः कदाऽपि त्वामहं न मुञ्चामि, त्वद्धृदये सर्वदा स्थास्यामि ।।२३।। कृपालुना त्वया क्षणेन हि मे पीडा निवारिता, किन्तु मे पुत्रयोश्चेतना नास्ति, अतस्तौ बोधय ।।२४।। *सूत उवाच* - भक्त्या वचनं श्रुत्वा करुणां प्राप्तो नारदः कराग्रेण विमर्दयन् ज्ञानवैराग्ययो-र्बोधनमारेभे ।।२५।। कर्णप्रान्ते मुखं संयोज्य हे ज्ञान! प्रबुध्यताम्, हे वैराग्य! प्रबुध्यताम्, उत्युच्चैः शब्दमुच्चरन्, वेदवेदान्तमन्त्रोच्चारणैः, भूयोभूयो गीतापाठैश्च तेन बलाद् बोध्यमानौ तौ तदा कथञ्चिदुत्थितौ ।।२६-२७।। तावुभौ नेत्रैरनवलोकयन्तौ, जृम्भमाणौ, सालसौ, प्रायो बकवत् पलितौ, शुष्ककाष्ठसमाङ्गकौ, क्षुत्क्षामौ सन्तौ कथंचित् निरीक्ष्यैव पुनः स्वापपरायणौ जातौ, तदा देवर्षिर्मया संप्रति किं विधेयमिति चिन्तापरो जातः ।।२८-२९।। अहो! एतौ कथं जागृतः, एनयोर्महत्तरं वृद्धत्वं च कथमपयाति, हे भार्गव! इति चिन्तयन् स गोविन्दं स्मारयामास ।।३०।। तदैव व्योमवाणी समभूत्, हे देवर्षे! मा खिद्यताम्, तवोद्यमः सफलो भविष्यति, अत्र सन्देहो नास्ति ।।३१।। हे देवर्षे! एतदर्थं त्वं सत्कर्म समाचर, तत्

सत्कर्मणि कृते तस्मिन् सनिद्रा वृद्धतानयोः। गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति।।३३।। इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतम्। नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन्।।३४।। *नारद उवाच* - अनयाऽऽकाशवाण्यापि गोप्यत्वेन निरूपितम्। किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः।।३५।। क्व भविष्यन्ति सन्तस्ते कथं दास्यन्ति साधनम्। मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया।।३६।। *सूत उवाच* - तत्र द्वावपि संस्थाप्य निर्गतो नारदो मुनिः। तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान्।।३७।। वृत्तान्तः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते। असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे। मूकीभूतास्तथान्ये तु कियन्तस्तु पलायिताः।।३८।। हाहाकारो महानासीत्त्रैलोक्ये विस्मयावहः। वेदवेदान्तघोषैश्च गीतापाठैर्विबोधितम्।।३९।। भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा। उपायो नापरोऽस्तीति कर्णे कर्णेऽजपञ्जनाः।।४०।। योगिना नारदेनापि स्वयं न ज्ञायते तु यत्। तत्कथं शक्यते वक्तुमितरैरिह मानुषैः।।४१।।

।। सङ्ग्रहोक्तिः ।।


सत्कर्म साधुभूषणाः साधवस्तुभ्यमभिधास्यन्ति।।३२।। तस्मिन् सत्कर्मणि कृते सति अनयोर्निद्रया सहिता वृद्धता क्षणादेव गमिष्यति तथा च भक्तिः सर्वत्र प्रसरिष्यति।।३३।। एवंविधा नभोवाणी सर्वैरपि स्पष्टतया श्रुता, किन्तु तदा "इदं सत्कर्म किम्?" तन्न ज्ञातं इति ब्रुवन् नारदो विस्मयं प्राप।।३४।। *नारद उवाच* - अनयाऽऽकाशवाण्याऽस्पष्टतत्वेन कथितं तत् सत्कर्मरूपं साधनं कथं कार्यं, येन तयोः कार्यं भवेत्।।३५।। ते साधवः क्व भविष्यन्ति, साधनं च मह्यं कथं दास्यन्ति, यदाकाशवाण्या कथितमस्मिन् मया किं कर्त्तव्यम्?।।३६।। *सुत उवाच* - नारदस्तौ तत्रैव संस्थाप्य तत्स्थानात् निरगच्छत्, प्रतितीर्थं विनिष्क्रम्य मार्गे प्राप्तान् मुनीश्वरान् स तत्साधनं किमिति पप्रच्छ।।३७।। सर्वे तं वृत्तान्तं शृण्वन्ति, किन्तु तन्निश्चित्य न ब्रुवन्ति, केचन तदसाध्यम्, केचित् तद्दुर्ज्ञेयम्, अन्ये मूकीभूताः, कियन्तः पलयिता जाताः।।३८।। तदा त्रैलोक्ये विस्मयकारको महान् हाहाकारो जातः, वेदवेदान्तघोषैर्गीतापाठैश्च प्रबोधितं भक्तिज्ञानविरागाणां त्रिकं यदा नोदतिष्ठत् तदाऽपरः सद्ध्यङ् उपायो

ભક્તિ-નારદ સંવાદ




નારદજીએ કહ્યું - તમે કોઈ ચિંતા ન કરશો, ભગવાન તમારૂં મંગળ કરશે.
માહાત્મ્ય અ.-૧-૨

ધુન્ધુકારીનો ઉદ્ધાર




ધુન્ધુકારી પ્રેતયોનિથી મુક્ત થઈ, દિવ્યરૂપ ધારણ કરી પ્રગટ થયો.
માહાત્મ્ય અ.-૫



સૂતજીની કથા
પહેલો સ્કન્ધ અ.-૧

વ્યાસ-શુકદેવ



શ્રીશુકદેવજી ભગવાન વ્યાસદેવથી ભાગવત શીખી રહ્યા છે.
પહેલો સ્કન્ધ અ.-૪

ભીષ્મપિતામહ ઉપર દયા




અંતિમ અવસ્થામાં ભીષ્મપિતામહ પ્રેમથી ભગવાન શ્રીકૃષ્ણની સ્તુતિ કરે છે.
પહેલો સ્કન્ધ અ.-૯




કળિયુગ પરીક્ષિત રાજાને પ્રાર્થના કરે છે.
પહેલો સ્કન્ધ અ.-૧૭

શુકદેવ–પરિક્ષીત



શ્રીશુકદેવજી શ્રીમદ્ ભાગવતની કથા સંભળાવી રહ્યા છે.
પહેલો સ્કન્ધ અ.–૧૯



ભગવાનની શેષ શૈય્યાનું દર્શન
બીજો સ્કન્ધ અ.-૯

एवमृषिगणैः पृष्टैर्निर्णीयोक्तं दुरासदम् ।।४२।। ततश्चिन्तातुरः सोऽथ बदरीवनमागतः। तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः ।।४३।। तावद्ददर्श पुरतः सनकादीन्मुनीश्वरान्। कोटिसूर्यसमभासानुवाच मुनिसत्तमः ।।४४।। *नारद उवाच* - इदानीं भूरिभाग्येन भवद्भिः संगमोऽभवत्। कुमारा ब्रुवतां शीघ्रं कृपां कृत्वा ममोपरि ।।४५।। भवन्तो योगिनः सर्वे बुद्धिमन्तो बहुश्रुताः। पञ्चहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ।।४६।। सदा वैकुण्ठनिलया हरिकीर्तनतत्पराः। लीलामृतरसोन्मत्ताः कथामात्रेकजीविनः ।।४७।। हरिः शरणमेवं हि नित्यं येषां मुखे वचः। अतः कालसमादिष्टा जरा युष्मान्न बाधते ।।४८।। येषां भ्रूभङ्गमात्रेण द्वारपालौ हरेः पुरा। भ्रूमौ निपतितौ सद्यो यत्कृपातः पुरं गतौ ।।४९।। अहो भाग्यस्य योगेन दर्शनं भवतामिह। अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ।।५०।। अशरीरगिरोक्तं यत्तत्किं साधनमुच्यताम्। अनुष्ठेयं कथं तावत्प्रब्रुवन्तु सविस्तरम् ।।५१।।

।। सङ्ग्रहोक्तिः ।।

नास्ति, इति जनाः कर्णे कर्णेऽब्रुवन् ।।३९-४०।। योगिना नारदेनाऽपि स्वयं यत् न ज्ञायते तदितरैर्मनुष्यैर्वक्तुं कथं शक्यते ।।४१।। इत्थं पृष्टैः ऋषिगणैस्तद् दुरासदमिति निर्णीयोक्तम्, ततश्चिन्तातुरः स बदरीवनमागच्छत्, अथ तदर्थमत्र तपश्चरामि, इति कृतनिश्चय आसीत् ।।४२-४३।। मुनिवर्यो नारदस्तदैव तत्र कोटिसूर्यप्रतिकाशान् मुनीश्वरान् सनकादीन् पुरतो दृष्ट्वा तान् सम्बोध्योवाच ।।४४।। *नारद उवाच* - साम्प्रतं मम भूरिभाग्येन भवद्भिः सह समागमो जातः, हे कुमाराः! ममोपरि कृपां कृत्वा शीघ्रमुच्यताम् ।।४५।। भवन्तः सर्वे योगिनो बुद्धिमन्तो बहुश्रुताश्च भवन्ति, लोकदृष्ट्या पञ्चाहायना इव दृश्यमाना अपि पूर्वेषामपि पूर्वजाः सन्ति ।।४६।। निरन्तरं वैकुण्ठवासिनो हरिकीर्त्तनपरायणा हरिलीलामृतरसोन्मत्ताः कथामात्रेक-जीविनो यूयं स्थ ।।४७।। येषां वो मुखे "हरिः शरणम्" इति शब्दो हि नित्यं जप्यते, अतः कालोपपन्ना जरा युष्मान् न बाधते ।।४८।। पुरा येषां भवतां भ्रूभङ्गमात्रेणैव हरेर्द्वारपालौ सद्यो भूमौ निपतितौ तथा च कृपया पुनर्वैकुण्ठं गतौ ।।४९।। अहो! धन्यम्, सद्भाग्ययोगेन हि भवतां दर्शनमिह जातम्, दयापरैर्भवद्भिर्मयि दीनेऽनुग्रहः कर्त्तव्यः ।।५०।।

भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम् । स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ।।५२।। *कुमारा ऊचुः* – मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह। उपायः सुखसाध्योऽत्र वर्तते पूर्व एव हि।।५३।। अहो नारद धन्योऽसि विरक्तानां शिरोमणिः। सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः।।५४।। त्वयि चित्रं न मन्तव्यं भक्त्यर्थमनुवर्तिनि। घटते कृष्णदासस्य भक्तेः संस्थापना सदा।।५५।। ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः। श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः।।५६।। वैकुण्ठसाधकः पन्थाः स तु गोप्यो हि वर्तते। तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ।।५७।। सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा। तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः।।५८।। द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च ते तु कर्मविसूचकाः।।५९।। सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः। श्रीमद्भागवतालापः स तु गीतः शुकादिभिः।।६०।।

।। सङ्ग्रहोक्तिः ।।

मामुद्दिश्याऽऽकाशवाण्या यदुक्तं साधनं सत्कर्म तत् किम्? तदुच्यताम्, तच्च कर्म कथमनुष्ठेयं, सर्वं सविस्तरमुच्यताम् ।।५१।। भक्तिज्ञानविरागाणां सुखमुत्पद्यते, एवं च सर्ववर्णेषु प्रेमपूर्वं तेषां स्थापनं प्रयत्नतः कथं विधेयं, तदप्युच्यताम् ।।५२।। *कुमाराः ऊचुः* – हे देवर्षे! चिन्तां मा कुरु, चित्ते हर्षं धारय, भवत्पृष्ट उपायः प्रथमतः एव सुखसाध्यो वर्तते ।।५३।। अहो! हे नारद! त्वं धन्योऽसि, सदा विरक्तानां शिरोमणिः, योगभास्करस्तथा श्रीकृष्णस्य दासभक्तानां मध्य अग्रणीश्च वर्तसे ।।५४।। भक्तिपुष्ट्यर्थं प्रयत्नपरत्वं त्वयि विस्मयकरं न, श्रीकृष्णदासस्य तव सदा भक्तेः स्थापना घटत एव ।।५५।। ऋषिभिर्लोके बहवः पुण्यमार्गा प्रवर्तिताः, प्रायस्ते श्रमसाध्याः स्वर्गफलप्रदाश्च वर्तन्ते ।।५६।। शाश्वतमोक्षरूपो वैकुण्ठप्रापकः पन्थास्तु रहस्यो वर्तते, तन्मार्गस्योपदेष्टा पुरुषोऽपि प्रायो भाग्येन लभ्यते ।।५७।। पुराऽऽकाशवाण्या यत्कर्म कर्त्तव्यत्वेन निर्दिष्टं तत् प्रसन्नमनास्त्वं स्थिरधीः सन्नद्य शृणुष्व ।।५८।। शास्त्रेषु कथिता द्रव्ययज्ञा, योगयज्ञास्तथाऽन्ये स्वाध्यायरूपा ज्ञानयज्ञाः ते तु सर्वे विविधकर्मसूचकाः सन्ति ।।५९।। तेषु सत्कर्मसूचकस्तु ज्ञानयज्ञो बुधैः नूनं कथितः, स ज्ञानयज्ञस्तु शुकादिभिः

भक्तिज्ञानविरागाणां तद्घोषेण बलं महत्। व्रजिष्यति द्वयोः कष्टं सुखं भक्तेर्भविष्यति ।।६१।। प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः। कलेर्दोषा इमे सर्वे सिंहशब्दाद् वृका इव।।६२।। ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा। प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति।।६३।। *नारद उवाच* - वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम्। भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा।।६४।। श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति। तत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे।।६५।। छिन्दन्तु संशयं ह्येनं भवन्तोऽमोघदर्शनाः। विलम्बो नात्र कर्तव्यः शरणागतवत्सलाः।।६६।। *कुमारा ऊचुः* - वेदोपनिषदां साराज्जाता भागवती कथा। अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः।।६७।। आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वाद्यते यथा। स भूयः संपृथग्भूतः फले विश्वमनोहरः।।६८।। यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते। पृथग्भूतं हि तद्द्रव्यं देवानां रसवर्धनम्।।६९।। इक्षूणामपि मध्यान्तं शर्करा व्याप्य तिष्ठति। पृथग्भूता च सा मिष्टा तथा भागवती कथा।।७०।।

।। सङ्ग्रहोक्तिः ।।

श्रीमद्भागवतस्य कथारूपः प्रोक्तः।।६०।। भागवतकथया भक्तिज्ञानविरागाणां बलं प्राचुर्येण वर्धिष्यति, ज्ञानवैराग्ययोः कष्टं नङ्क्ष्यति, भक्तेश्च सुखं भविष्यति।।६१।। श्रीभागवतकथा-ध्वनेरिमे सर्वे कलेर्दोषाः सिंहगर्जनात् वृका इव प्रलयं गमिष्यन्ति।।६२।। भागवतकथया अनन्तप्रेमरसपूर्णा भक्तिर्ज्ञानवैराग्ययुक्ता सती प्रतिगृहं प्रतिजनं च क्रीडिष्यति ।।६३।। *नारद उवाच* - भक्तिज्ञानविरागाणां त्रिकं वेदवेदान्तघोषैर्गीतापाठैश्च प्रबोधितं सत् यदा नोदतिष्ठत् तदा श्रीमद्भागवतकथया कथं प्रबोधमेष्यति, यतः तत्कथास्वपि प्रतिश्लोकं प्रतिपदं च वेदवेदान्तार्थ एव बोधितोऽस्ति।।६४-६५।। शरणागतवत्सलाः सफलदर्शनाश्च यूयमिमं मे संशयं छिन्दन्तु, अत्र विलम्बो न कर्त्तव्यः ।।६६।। *कुमाराः ऊचुः* - भागवती कथा वेदोपनिषदां साराज्जाताऽस्ति तत् पृथक्भूता सत्यपि तत्फलरूपत्वात् तेभ्यो नितरां विशेषा शोभते।।६७।। यथा वृक्षे आमूलाग्रं यो रसस्तिष्ठति स तत्र नाऽऽस्वाद्यते, किन्तु यदा स ततः पृथग्भूतः फलरूपेण परिणमते तदा विश्वमनोहरो भवति।।६८।।यथा दुग्धे स्थितं सर्पिः स्वादायोपयुक्तं न भवति किन्तु दुग्धात् पृथक् कृतं सर्पिर्देवानामपि रसवर्धनं भवति।।६९ ।।

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ।।७१।। वेदान्तवेदसुस्नाते गीताया अपि कर्तरि। परितापवति व्यासे मुह्यत्यज्ञान-सागरे।।७२।। तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितम्। तदीयश्रवणात्सद्यो निर्बाधो बादरायणः।।७३।। तत्र ते विस्मयः केन यतः प्रश्नकरो भवान्। श्रीमद्भागवतं श्राव्यं शोकदुःखविनाशनम्।७४। *नारद उवाच* - यद्दर्शनं च विनिहन्त्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवार्दितानाम्। निःशेषशेषमुखगीतकथैकपानाः प्रेमप्रकाश-कृतये शरणं गतोऽस्मि।।७५।। भाग्योदयेन बहुजन्मसमर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै। अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः।।७६।।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये कुमारनारदसंवादो नाम द्वितीयोऽध्यायः।।२।।

।। सङ्ग्रहोक्तिः ।।

यथा शर्कराऽपीक्षूणां दण्डे मध्यान्तं व्याप्य तिष्ठति, सा पृथक् कृता चेत्तदा मिष्टा भवति, तद्वदेव देववेदान्तपृथग्भूता भागवती कथा ज्ञेया।।७०।। इदं भागवतं पुराणं वेदैः समं विद्यते, भक्तिज्ञानविरागाणां स्थापनायैव व्यासेन प्रकाशितं वर्तते।।७१।। वेदानां वेदान्तानां च पारगे, गीताया रचयितरि परितापवति बादरायणे व्यासेऽपि यदाऽज्ञानसागरे मुह्यति सति पुरा त्वयैव तस्मै चतुःश्लोकात्मकं भागवतं कथितमासीत्, तदीयश्रवणाद् व्यासः सद्यो विर्बाधो जातः।।७२-७३।। तस्मिन् भागवते तव विस्मयः केन जातः, यतो भवान् अस्मदग्रे प्रश्नकरो वर्तते, अतो भागवतं शास्त्रं सर्वशोकदुःखविनाशनं भवति तच्छ्राव्यम्।।७४।। *नारद उवाच* - येषां दर्शनं सद्यः सर्वाण्यप्यशुभानि कार्त्स्न्येन हन्ति, यद् दुःखदावानलपीडितानां-श्रेयस्तनोति, शेषसहस्रमुखगीतकथामृतपातॄणां भवतां शरणमहं प्रेमलक्षणाभक्तिप्रकाशनाय प्राप्तोऽस्मि।।७५।। अनेकजन्मसमर्जितेन पुण्योदयेन पुरुषो यदा सत्पुरुषाणां समागमं लभते तदा तस्य अज्ञानजन्यमोहमदरूपस्य अन्धकारस्य नाशं विधाय विवेकोदयो भवति।।७६।।

इति श्रीमद्भागवतमाहात्म्ये सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः ।।३।।

नारद उवाच - ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्ज्वलम्। भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः।।१।। कुत्र कार्यो मया यज्ञः स्थलं तद्वाच्यतामिह। महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः।।२।। कियद्भिर्दिवसैः श्रव्या श्रीमद्भागवती कथा। को विधिस्तत्र कर्तव्यो ममेदं ब्रुवतामितः।।३।। *कुमारा ऊचुः* - शृणु नारद वक्ष्यामो विनम्राय विवेकिने। गङ्गाद्वारसमीपे तु तटमानन्दनामकम्।।४।। नानाऋषि-गणैर्जुष्टं देवसिद्धनिषेवितम्। नानातरुलताकीर्णं नवकोमलवालुकम्।।५।। रम्यमेकान्तदेशस्थं हेमपद्मसुसौरभम्। यत्समीपस्थजीवानां वैरं चेतसि न स्थितम् ।।६।। ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः। अपूर्वरसरूपा च कथा तत्र भविष्यति।।७।। पुरःस्थं निर्बलं चैव जराजीर्णकलेवरम्। तद्द्वयं च पुरस्कृत्य भक्तिस्तत्रागमिष्यति।।८।। यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत्। कथाशब्दं समाकर्ण्य तत्त्रिकं तरुणायते।।९।।

अथ तृतीयोऽध्यायः ।।३।।

भक्त्याः कष्टनिवृत्तिः

नारद उवाच - संप्रति भक्तिज्ञानवैराग्याणां पुनः स्थापनार्थं शुकशास्त्रस्य श्रीमद्भागवतस्य कथाया उज्ज्वलं ज्ञानयज्ञं करिष्यामि।।१।। स ज्ञानयज्ञो मया कस्मिन् स्थाने कार्यः, तत्स्थानमपि कथ्यताम्, एवं च वेदपारंगता भवन्तस्तस्य भागवतस्य माहात्म्यमपि ब्रुवन्तु।।२।। कथा कियद्भिर्दिवसैः श्राव्या, तत्र कर्त्तव्यं विधिमपि मामत्र कथयन्तु।।३।। *कुमाराः ऊचुः*- हे नारद! शृणु, विवेकिने विनम्राय च तुभ्यं वयं वक्ष्यामः, गङ्गाद्वार (हरिद्वार) समीप आनन्दनामको घट्टो वर्त्तते।।४।। स घट्टोऽनेकमहर्षिभिर्जुष्टः, देवसिद्धनिषेवितः, विविधतरु-लताव्याप्तः, नवकोमलवालुकोपेतो वर्तते।।५।। स च रम्य एकान्तदेशः स्वर्णपद्मसौरभश्च विद्यते, यत्समीपस्थानां प्राणिनां चेतसि साहजिको वैरभावोऽपि नास्ति।।६।। तत्राऽऽनन्दक्षेत्रे त्वया भागवतकथाज्ञानयज्ञः प्रयत्नतः कर्त्तव्यः, तत्राऽपूर्वरसमयी कथा भविष्यति।।७।। जराजीर्णकलेवरं दुर्बलं स्वपुरस्थं ज्ञानवैराग्ययोर्द्विकं पुरस्कृत्य भक्तिरपि तत्राऽऽगमिष्यति ।।८।। यत्र श्रीमद्भागवतस्य कथा भवेत् तत्र भक्त्यादित्रिकं व्रजेत्, तत्र कथायाः शब्दं

सूत उवाच – एवमुक्त्वा कुमारास्ते नारदेन समं ततः। गङ्गातटं समाजग्मुः कथापानाय सत्वराः।।१०।। यदा यातास्तटं ते तु तदा कोलाहलोऽप्यभूत्। भूर्लोके देवलोके च ब्रह्मलोके तथैव च।।११।। श्रीभागवतपीयूषपानाय रसलम्पटाः। धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्णवाः।।१२।। भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ। रामस्तथा गाधिसुतश्च शाकलो मृकण्डुपुत्रात्रिजपिप्पलादाः ।।१३।। योगेश्वरौ व्यासपराशरौ च छायाशुको जाजलिजह्नुमुख्याः। सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्याः स्वस्त्रीभिरायथुरतिप्रणयेन युक्ताः।।१४।। वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः। दशसप्तपुराणानि षट्शास्त्राणि तथाऽऽययुः।।१५।। गङ्गाद्या सरितस्तत्र पुष्करादिसरांसि च। क्षेत्राणि च दिशः सर्वा दण्डकादिवनानि च।।१६।। नगादयो ययुस्तत्र देवगन्धर्वदानवाः। गुरुत्वात्तत्र नायातान्भृगुः सम्बोध्य चानयन्।।१७।। दीक्षिता नारदेनाथ दत्तमासनमुत्तमम्।

।। सङ्ग्रहोक्तिः ।।

समाकर्ण्य तत्त्रयमपि तरुणायते।।९।।सूत उवाच – इत्थमुक्त्वा ते सनकादयश्चत्वारः कुमाराः नारदेन साकं सत्वराः सन्तः कथापानाय गङ्गातटं समाजग्मुः।।१०।।यदा ते सर्वे गङ्गातटमाययुस्तदा भूर्लोके देवलोके तथैव ब्रह्मलोके च तुमुलोद्घोषोऽभवत्।।११।। ये कथारसमर्मज्ञास्ते सर्वे श्रीमद्भागवतामृतपानाय धावन्तःसन्त आययुः, तत्र ये वैष्णवास्ते प्रथममाययुः।।१२।। भृगुः, वसिष्ठः, च्यवनः, गौतमः, मेधातिथिः, देवलः, देवरातः, परशुरामः, विश्वामित्रः, शाकलः, मार्कण्डेयः दत्तात्रेयः पिप्पलादः, योगेश्वरो व्यासः, पराशरः, छाया शुकः, जाजलिः, जह्नुश्चेत्येते सर्वे सशिष्याः सहस्त्रीपुत्राः नितान्तप्रणययुक्ताः सन्तः कथाश्रवणायाऽऽजग्मुः।।१३-१४।।तत्र कथास्थले सर्वे वेदाः, वेदान्तानि, तन्त्राः, मन्त्राः, सप्तदशपुराणानि, षट् शास्त्राणि चेत्येते सर्वे मूर्तिमन्तः सन्त आययुः।।१५।।गङ्गाद्याः सर्वा नद्यः , पुष्करादीनि सरांसि, दण्डकादीनि वनानि, समग्राणि क्षेत्राणि, सर्वा दिशश्चेत्येते तत्राऽऽजग्मुः।।१६।। सर्वे देवगन्धर्वदानवनगादयोऽपि तत्राऽऽययुः, ये गुरुत्वादनागतास्तान् निखिलान् संबोध्य भृगुरानयत् ।।१७।। नारदेन वक्तृपदे वृताः कृष्णतत्परास्ते कुमाराः सर्वैर्वन्दिताः सन्तः

कुमारा वन्दिताः सर्वैर्निषेदुः कृष्णतत्पराः ।।१८।। वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः। मुखभागे स्थितास्ते च तदग्रे नारदः स्थितः ।।१९।। एकभागे ऋषिगणा-स्तदन्यत्र दिवौकसः। वेदोपनिषदोऽन्यत्र तीर्थान्यत्र स्त्रियोऽन्यतः ।।२०।। जयशब्दो नमः शब्दः शङ्खशब्दस्थैव च। चूर्णलाजाप्रसूनानां निक्षेपः सुमहानभूत् ।।२१।। विमानानि समारुह्य कियन्तो देवनायकाः। कल्पवृक्षप्रसूनैस्तान् सर्वांस्तत्र समाकिरन् ।।२२।। *सूत उवाच* - एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च। माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने ।।२३।। अथ ते वर्ण्यतेऽस्माभिर्महिमा शुकशास्त्रजः। यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता ।।२४।। सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा। यस्याः श्रवणमाश्रेण हरिश्चित्तं समाश्रयेत् ।।२५।। ग्रन्थोऽष्टा-दशसाहस्रो द्वादशस्कन्धसम्मितः। परीक्षिच्छुकसंवादः शृणु भागवतं च तत् ।।२६।। तावत्संसारचक्रेऽस्मिन् भ्रमतेऽज्ञानतः पुमान्। यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम् ।।२७।।

।। सङ्ग्रहोक्तिः ।।

उत्तममासनमुपविविशुः ।।१८।। तत्र ये वैष्णवाः, विरक्ताः, संन्यासिनः, ब्रह्मचारिणश्चाऽऽगतास्ते सर्वे सभायां मुखभाग उपविविशुः, तेषामग्रे नारद उपविवेश ।।१९।। सभायामेकभागे महर्षयः, तदन्यत्र दिवौकसः, एकत्र वेदोपनिषदः, अन्यत्र तीर्थानि, स्त्रियश्चोपविविशुः ।।२०।। तदा तत्र जय जय, नमः इति शब्दः शंखध्वनिश्च पौनःपुन्येनाऽभवन्, चूर्ण-प्रसून-लाजादिमङ्गल-द्रव्याणां प्रक्षेपोऽपि सुमहानभूत् ।।२१।। कियन्तो देवप्रवरा विमानानि समारुह्य कल्पद्रुमपुष्पै-स्तान् सर्वान् समाकिरन् ।।२२।। *सूत उवाच* - एवं सर्वेषु श्रोतृषु समहितेषु सत्सु कुमारा महात्मने नारदाय सुस्पष्टं श्रीमद्भागवतस्य माहात्म्यमूचिरे ।।२३।। *कुमारा ऊचुः* - अथ वयं शुकशास्त्रस्य श्रीमद्भागवतस्य माहात्म्यं कथयामः, यस्य श्रवणमात्रेणैव मोक्षो हस्तगतः स्यात् ।।२४।। श्रीमद्भागवतस्य कथा निरन्तरं पुनः पुनः सेव्या, यस्याः श्रवणमात्रेण हि श्रीहरिश्चित्तं समाश्रयेत् ।।२५।। अष्टादशसहस्रश्लोकपरिमितो द्वादशसु स्कन्धेषु विभक्तः परीक्षिच्छुकसंवादरूपो भागवतग्रन्थो श्रूयताम् ।।२६।। श्रीमद्भागवतस्य कथा यावत् पुमान्

किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः। एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ।।२८।। कथा भागवतस्यापि नित्यं भवति यद्गृहे। तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ।।२९।। अश्वमेधसहस्राणि वाजपेयशतानि च। शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम् ।।३०।। तावत्पापानि देहेऽस्मिन्निवसन्ति तपोधनाः। यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ।।३१।। न गङ्गा न गया काशी पुष्करं न प्रयागकम्। शुकशास्त्रकथायाश्च फलेन समतां नयेत् ।।३२।। श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम्। पठस्व स्वमुखेनैव यदीच्छसि परां गतिम् ।।३३।। वेदादिर्वेदमाता च पौरुषं सूक्तमेव च। त्रयी भागवतं चैव द्वादशाक्षर एव च ।।३४।। द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः। ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी तथा ।।३५।। तुलसी च वसन्तश्च पुरुषोत्तम एव च। एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव इष्यते ।।३६।। यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम्।

।। सङ्ग्रहोक्तिः ।।

न शृणुयात् तावत् सोऽज्ञानतोऽस्मिन् संसारचक्रवाले भ्रमते ।।२७।। श्रीमद्भागवतं शास्त्रं मुक्तिदानाय गर्जति सति स्वधितैर्बहुभिः शास्त्रैः भ्रान्तिमयैः पुराणैश्च किं प्रयोजनम् ? ।।२८।। यस्मिन् गृहे नित्यं श्रीमद्भागवतस्य कथा भवति तद् गृहं तु तन्निवासिनां पापविनाशकं तीर्थरूपं भवति हि ।।२९।। अश्वमेधयागानां सहस्राणि, वाजपेययागानां शतानि च श्रीमद्भागवत-कथायाः षोडशीं कलां नार्हन्ति ।।३०।। हे तपोधनाः! अस्मिन् देहे मनुष्यस्य पापानि तावत् कालपर्यन्तं निवसन्ति, यत् नरा यावत् भागवतस्य कथां सम्यक् न शृण्वन्ति ।।३१।। गङ्गा, गया, काशी, पुष्करं, प्रयागं, चेत्येतानि भागवतस्य कथायाः फलेन तुल्यतां न यान्ति ।।३२।। यदि त्वं परां गतिं (मुक्तिं) इच्छसि चेत्तर्हि नित्यं श्रीमद्भागवतस्य श्लोकं श्लोकार्द्धं श्लोकपादं वा पठस्व ।।३३।। ॐकारः, गायत्री, पुरुषसुक्तं, वेदत्रयी, भागवतं, "ॐ नमो भगवते वासुदेवाय" इति द्वादशाक्षरमन्त्रः द्वादशरूपः सूर्यः, प्रयागं, संवत्सरात्मकः कालः, ब्राह्मणाः, अग्निहोत्रं, सुरभिगौः, द्वादशीव्रततिथिः, तुलसी, वसन्तर्तुः भगवान् पुरुषोत्तमश्च इत्येतेषां मध्ये प्राज्ञाः पृथग्भावं नेच्छन्ति ।।३४-३६।। यः पुमान् अर्थानुसन्धानपूर्वकं -

जन्मकोटिकृतं पापं नश्यते नात्र संशयः।।३७।।श्लोकार्धं श्लोकपादं वा पठेद्भागवतं च यः। नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ।।३८।। उक्तं भागवतं नित्यं कृतं च हरिचिन्तनम्। तुलसीपोषणं चैव धेनूनां सेवनं समम्।।३९।। अन्तकाले तु येनैव श्रूयते शुकशास्त्रवाक्। प्रीत्या तस्यैव वैकुण्ठं गोविन्दोऽपि प्रयच्छति।।४०।। हेमसिंहयुतं चैतद्वैष्णवाय ददाति च। कृष्णेन सह सायुज्यं स पुमाँल्लभते ध्रुवम् ।।४१।। आजन्ममात्रमपि येन शठेन किंचिच्चित्तं विधाय शुकशास्त्रकथा न पीता। चाण्डालवच्च खरवद्बत तेन नीतं मिथ्या स्वजन्म जननीजनिदुःखभाजा ।।४२।। जीवच्छवोनिगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किंचित्। धिक् तं नरं पशुसमं भुवि भाररूपमेवं वदन्ति दिवि देवसमाजमुख्याः।।४३।। दुर्लभैव यथा लोके श्रीमद्भागवतोद्भवा। कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ।।४४।। तेन योगनिधे धीमन् श्रोतव्या सा प्रयत्नतः। दिनानां नियमो नास्ति सर्वदा श्रवणं मतम्।।४५।।

।। सङ्ग्रहोक्तिः।।

श्रीमद्भागवतं शास्त्रमहर्निशं वाचयेत् तस्य कोटिजन्मोत्थं पापं नश्यते, अत्र संशयो नास्ति।।३७।।यः पुमान् नित्यं भागवतस्य श्लोकार्धं श्लोकपादं वा पठेत् स राजसूयाश्वमेधयोर्यज्ञयोः पुण्यमवाप्नोति।।३८।। श्रीमद्भागवतस्य पाठः, श्रीहरेः चिन्तनं, तुलस्या जलादिना पोषणं, गवां सेवा च, इत्येतत्सर्वं तुल्यफलं ज्ञेयम्।।३९।।यः पुमान् प्राणान्तसमये भागवतवाक्यं शृणोति, तस्मै भगवान् प्रसन्नः सन् वैकुण्ठवासं प्रयच्छति।।४०।। यः पुमान् सुवर्णसिंहे स्थापितं भागवतं वैष्णवाय (विदुषे) ददाति स कृष्णेन सह शश्वत् साधर्म्यमुक्तिं लभते।।४१।। यः शठपुरुषो मानुष्यं जन्म प्राप्य मनोनिगृह्य भागवतामृतं न पिबति, तस्य जन्म चाण्डालवत् खरवच्च निरर्थकं व्यत्येति, तस्य जनन्यऽपि प्रसवपीडिता सती निष्फला मिथ्या जाता।।४२।। येन पुंसा भागवतकथावचनं किंचिदपि क्वचिदपि न श्रुतं स पापकर्मा जीवन्मृतः कथितः, दिवि देवगणास्तं नरं पशुसमं भुवि भारभूतं च वदन्ति, एवं च तं धिक् कुर्वन्ति।।४३।। लोके श्रीमद्भागवतस्य कथा सर्वथा दुर्लभा, कोटिजन्मसमुत्थेन पुण्येन हि सा लभ्यते।।४४।। हे

सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम्। अशक्यत्वात् कलौ बोध्यो विशषोऽत्र शुकाज्ञया।।४६।।मनोवृत्तिजयश्चैव नियमाचरणं तथा। दीक्षा कर्तुमशक्यत्वात्सप्ताह-श्रवणं मतम्।।४७।। श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलम्। तत्फलं शुकदेवेन सप्ताहश्रवणे कृतम्।।४८।। मनसश्चाजयाद्रोगात्पुंसां चैवायुषः क्षयात् कलेर्दोष-बहुत्वाच्च सप्ताहश्रवणं मतम्।।४९।। यत्फलं नास्ति तपसा न योगेन समाधिना। अनायासेन तत्सर्वं सप्ताहश्रवणे लभेत्।।५०।। यज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात्। तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति।।५१।। योगाद्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति। किं ब्रूमो गर्जनं तस्य रे रे गर्जति गर्जति।।५२।। *शौनक उवाच* - साश्चर्यमेतत्कथितं कथानकं ज्ञानादिधर्मान् विगणय्य साम्प्रतम्। निःश्रेयसे भागवतं पुराणं जातं कुतो योगविदादिसूचकम्।।५३।।

।। सङ्ग्रहोक्तिः ।।

योगनिधे! हे धीमन्! श्रीमद्भागवतस्य कथा प्रयत्नतः श्रव्या, तस्याः श्रवणे दिनानां नियमो नाऽस्ति, सर्वदा तत्कथाश्रवणं मुनिभिर्मतम्।।४५।। सत्येन ब्रह्मचर्यव्रतेन सह तत्कथाश्रवणं मतम्, कलौ तन्नियमपालनस्याऽशक्यत्वात् शुकस्याऽऽदेशे तत्र विशेषो बोध्यः।।४६।। कलौ मनोवृत्तीनां जयः, नियमानां पालनं, पुण्यकार्येषु दीक्षाग्रहणं, चेत्येतेषामशक्यत्वात् सप्ताहेन कथाश्रवणमुत्तमं मतम्।।४७।। नित्यं श्रद्धया श्रवणेन, माघमासे श्रवणेन च यत् पुण्यं भवति तत् पुण्यफलं सप्ताहश्रवणेन भवति, इति शुकदेवेन निर्णीतमस्ति।।४८।। मनोनिग्रहस्य दुष्करत्वात्, पुंसां रोगग्रस्तत्वात्, आयुःक्षयात्, कलेर्दोषबाहुल्याच्च सप्ताहश्रवणमुत्तमं मतम् ।।४९।। यत्फलं तपसा योगेन समाधिना च न लभते तत् सर्वं भागवतसप्ताहश्रवणेनाऽनायासेन लभ्यते।।५०।। यज्ञ-व्रत-तपस्-तीर्थेभ्योऽपि विशेषफलप्रदत्त्वेन सप्ताहश्रवणमुन्नदति।।५१।। योग-ध्यान-ज्ञानेभ्योऽप्यधिकफलदातृया सप्ताहश्रवणं सिंहगर्जनं करोति।।५२।। *शौनक उवाच* - तदेतद् महदाश्चर्यम्, यद् भागवतकथानकं ज्ञानध्यानादिगुणानविगणय्यैव निःश्रेयसाय सर्वेभ्यः साम्प्रतं जातम्, किंतु तद् योगविदः योगेश्वरस्य कृष्णस्य सूचकं कथं जातम्?।।५३।।

सूत उवाच – यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः। एकादशं परिश्रुत्याप्युद्धवो वाक्यमब्रवीत्।।५४।। *उद्धव उवाच* – त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च। मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह।।५५।। आगतोऽयं कलिर्घोरो भविष्यन्ति पुनः खलाः। तत्सङ्गेनैव सन्तोऽपि गमिष्यन्त्युग्रतां यदा।।५६।। तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत्। अन्यो न दृश्यते त्राता त्वत्तः कमललोचन।।५७।। अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज। भक्तार्थं सगुणो जातो निराकारोऽपि चिन्मयः।।५८।। त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले। निर्गुणोपासने कष्टमतः किंचिद्विचारय ।।५९।। इत्युद्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः। भक्तावलम्बनार्थाय किं विधेयं मयेति च।।६०।। स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात्। तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम्।।६१।। तेनेयं वाङ्गमयी मूर्तिः प्रत्यक्षा वर्तते हरेः। सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी।।६२।।

।। सङ्ग्रहोक्तिः।।

सूत उवाच – यदा श्रीकृष्णः स्वावतारप्रयोजनं निर्वर्त्य स्वधाम गन्तुमैच्छत् तदैकादश-स्कन्धोक्तमुपदेशं श्रुत्वोद्धवोऽब्रवीत्।।५४।। *उद्धव उवाच* – हे गोविन्द! त्वं तु स्वभक्तकार्यं विधाय निजधाम यास्यसि, किन्तु मच्चित्ते महती चिन्ता वर्तते, तां श्रुत्वा सुखरूपमुपायं दर्शय।।५५।। अयं घोरः कलियुग आयातः, पुनः प्रजासु खला भविष्यन्ति, तेषां सङ्गेन यदा सज्जना अप्युग्रतां प्राप्स्यन्ति, तदा तद्भाराक्रान्ता गोरूपा भूमिः कमाश्रयिष्यति, हे कमललोचन! त्वत्तोऽन्योऽस्यास्त्राता न दृश्यते।।५६-५७।। हे भक्तवत्सल! अतः सत्सु दयां कृत्वा सांप्रतं मा व्रज, यः स्वयं प्राकृताकाररहितोऽपि दिव्यस्वरूपस्त्वं मानवरूपो जातोऽसि।।५८।। भवद्वियोगे जाते भूतले भक्तजनाः कथं स्थास्यन्ति, अतः किञ्चिद्विचारय ।।५९।। प्रभासे श्रीहरिः उक्तविधमुद्धववचः श्रुत्वाऽचिन्तयत्, यद् मद्भक्तानामवलम्बनाय मया किं विधेयमिति।।६०।। ततो भगवता कृष्णेन यत्स्वकीयं तेजस्तत् भागवते स्थापितम्, अत तिरोधानानन्तरं स श्रीमद्भागवतार्णवे प्रविष्टोऽस्ति।।६१।। तस्मात् कारणात् श्रीमद्भागवतं श्रीहरेर्वाङ्मयी प्रत्यक्षा मूर्त्तिरस्ति, अतस्तत्सेवनात्, श्रवणात्, पाठात्, दर्शनाच्च भागवत –

सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम्। साधनानि तिरस्कृत्य कलौ धर्मो-ऽयमीरितः।।६३।। दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च। कामक्रोधजयार्थं हि कलौ धर्मोऽयमीरितः।।६४।।अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा। कथं त्याज्या भवेत्पुम्भिः सप्ताहोऽतः प्रकीर्तितः।।६५।। *सूत उवाच* – एवं नगाहश्रवणोरुधर्मो प्रकाश्यमाने ऋषिभिः सभायाम्। आश्चर्यमेकं समभूत्तदानीं तदुच्यते संशृणु शौनक त्वम्।।६६।। भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाऽऽविरासीत्। श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती।।६७।। तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः। कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयन्तः।।६८।। ऊचुः कुमारा वचनं तदानीं कथार्थतो निष्पतिताधुनेयम्। एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा।।६९।। *भक्तिरुवाच* – भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रणष्टापि कथारसेन। क्वाहं तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मा इदं तां गिरमूचिरे ते।।७०।।

।। सङ्ग्रहोक्तिः ।।

रूपा कृष्णमूर्तिः पापनाशिनी वर्तते।।६२।।तेन हेतुनाऽस्य सप्ताहश्रवणं सर्वेभ्योऽधिकं कृतं वर्तते, कलावन्यानि साधनानि तिरस्कृत्य सप्ताहश्रवणमेव मुख्यधर्मः कथितः।।६३।।अस्मिन् कलौ युगे दुःखदारिद्र्यदुर्भाग्यानां निवारणाय, पापानां प्रक्षालनाय, कामक्रोधादिदोषाणां जयाय च भागवतसप्ताहश्रवणधर्मो हि कथितः।।६४।।वैष्णवी माया देवैरपि दुस्त्यजा वर्तते, अतस्तस्या मायायास्त्यागार्थं सप्ताहरूपो धर्मः कथितोऽस्ति।।६५।। *सूत उवाच* – इत्थं सभायां महर्षिभिः सप्ताहश्रवणरूपे श्रेष्ठे धर्मे प्रकाश्यमाने सति तदानीं तत्रैकं महदाश्चर्यमभूत्, हे शौनक! तच्छृणु, उच्यते–।।६६।। विशुद्ध-प्रेमस्वरूपा भक्तिस्तरुणौ तौ सुतौ गृहीत्वा "श्रीकृष्ण! गोविन्द! हरे! मुरारे! हे नाथ!" इति मुहुर्मुहुर्भगवन्नामानि जपन्ती सती सहसा तत्राऽऽविरासीत्।।६७।।सुन्दरवेषधारिणीं भागवतार्थभूषणां तत्रागतां देवीं भक्तिं सर्वे सदस्याः ददृशुः, "इयमत्र कथमागता, मुनीनां मध्ये च कथं प्रविष्टा" इति वितर्कं कुर्वाणा आसन्।।६८।। तदानीं कुमारा वचनमूचुः – इयं भक्तिरधुना कथाया अर्थत एव प्रकटिताऽस्ति, एवं तेषां वाचं

भक्तेषु गोविन्दस्वरूपकर्त्री प्रेमैकधर्त्री भवरोगहन्त्री। सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसानि ।।७१।। ततोऽपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोऽपि लोके। एवं तदाज्ञावसरेऽपि भक्तिस्तदा निषण्णा हरिदासचित्ते ।।७२।। सकलभुवनमध्ये निर्धनास्तेऽपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका। हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः।।७३।। ब्रूमोऽद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य। यत्संश्रयान्निगदिते लभते सुवक्ता श्रोतापि कृष्णसमतामलमन्यधर्मैः ।।७४।।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिकष्टनिवर्तनं नाम तृतीयोऽध्यायः।।३।।

श्रुत्वा ससुता नम्रा सा सनत्कुमारं जगाद।।६९।। अहं कलेर्दोषात् प्रनष्टाऽपि भवद्भिरद्यैव कथारसेन पुष्टा कृताऽस्मि, अधुनाऽहं क्व वसामि? तदा ब्रह्मपुत्राः कुमाराः तां गिरमूचुः।।७०।। भक्तानां भगवत्स्वरूपस्य, साक्षात्कारं कारयित्री भगवत्प्रेमसम्पादयित्री भवरोगहन्त्री सुतरां धैर्यमाश्रिता भवती वैष्णवानां मनस्सु निरन्तरं निवसतु।।७१।। तत्र निवासात् लोके कलिदोषाः त्वां द्रष्टुमपि न प्रभविष्यन्ति, इत्थं कुमाराज्ञावसर एव सा हरिदासानां मानसे प्रतिष्ठिता बभूव।।७२।। अस्मिन् समग्रे जगति निर्धनाऽपि ते धन्याः, येषां हृदि एका श्रीहरेर्भक्तिर्निवासं करोति, हरिरपि सर्वथा स्वधाम विहाय भक्तिसूत्रोपनद्धः सन् तेषां भक्तानां हृदि प्रविशति।।७३।। अस्मिन् जगति भगवत्स्वरूपस्य श्रीमद्भागवतस्य महिमानं विशेषतो किं ब्रूमः, यस्याऽऽश्रयात् भागवते कथिते सति वक्ता श्रोता चोभौ श्रीकृष्णसमतामेति।।७४।।

इति श्रीमद्भागवतमाहात्म्ये सङ्ग्रहोक्त्यां तृतीयोऽध्यायः।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

सूत उवाच - अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम् । निजलोकं परित्यज्य भगवान् भक्तवत्सलः ।।१।। वनमाली घनश्यामः पीतवासा मनोहरः । काञ्चीकलाप-रुचिरो लसन्मुकुटकुण्डलः ।।२।। त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः। कोटिमन्मथलावण्यो हरिचन्दनचर्चितः ।।३।। परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः। आविवेश स्वभक्तानां हृदयान्यमलानि च ।।४।। वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः। तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ।।५।। तदा जयजयारावो रसपुष्टिरलौकिकी। चूर्णप्रसूनवृष्टिश्च मुहुः शङ्खरवोऽप्यभूत् ।।६।। तत्सभा-संस्थितानां च देहगेहात्मविस्मृतिः। दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ।।७।। अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योऽद्य विलोकितो मया। मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवन्ति ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ चतुर्थोऽध्यायः ।।४।।

गोकर्णोपाख्यान प्रारम्भः

सूत उवाच - अथ वैष्णवचित्तेषु दिव्यां भक्तिं दृष्ट्वा भक्तवत्सलो भगवान् निजलोकं परित्यज्य तत्र सभायां स्वभक्तानां निर्मलानि हृदयान्याविवेश, स भगवान् वनमाली घनश्यामः पीताम्बरधरो मनोहरः काञ्चीकलापरुचिरः लसन्मुकुटकुण्डलः, त्रिभङ्गललितः, कौस्तुभ-मणिना विराजितः, कोटिमन्मथलावण्यो हरिचन्दनचर्चितः परमानन्दस्वरूपश्चैतन्यमूर्तिर्मधुरो मुरलीधरो रम्य आसीत् ।।१-४।। वैकुण्ठवासिन उद्धवादयो वैष्णवाः, तेऽपि सर्वे कथाश्रवणार्थं तत्र गूढरूपेण संस्थिता आसन् ।।५।। तदा तत्र जय!!! जय!!! इति शब्देनाऽलौकिक रसपुष्टिरासीत्, मुहुश्चूर्णपुष्पाणां वृष्टिः शंखध्वनिश्चाप्यभूत् ।।६।। तत्सभायां संस्थानां श्रोतॄणां देहगेहात्मविस्मृतिं तन्मयावस्थां च दृष्ट्वा नारदो वाक्यमब्रवीत् ।।७।। हे मुनीश्वराः! मयाऽद्य भागवतसप्ताहजन्योऽयमलौकिको महिमा दृष्टः, अत्र ये मूढाः शठाः पशुपक्षिणश्च सन्ति ते सर्वेऽतिशयेन निष्पापा भवन्ति ।।८।।

अतो नृलोके ननु नास्ति किंचिच्चित्तस्य शोधाय कलौ पवित्रम्। अघौघविध्वंसकरं तथैव कथासमानं भुवि नास्ति चान्यत्।।९।। के के विशुद्ध्यन्ति वदन्तु मह्यं सप्ताहयज्ञेन कथामयेन। कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोऽपि नवीनमार्गः।।१०।। ***कुमारा ऊचुः-*** **ये मानवाः पापकृतस्तु सर्वदा सदा दुराचाररता विमार्गगाः। क्रोधाग्निदग्धाः कुटिलाश्च कामिनः सप्ताहयज्ञेन कलौ पुनन्ति ते।।११।। सत्येन हीनाः पितृमातृदूषकास्तृष्णाकुलाश्चाश्रमधर्मवर्जिताः। ये दाम्भिका मत्सरिणो-ऽपि हिंसकाः सप्ताहयज्ञेन कलौ पुनन्ति ते।।१२।। पञ्चोग्रपापाश्छलछद्मकारिणः क्रूराः पिशाचा इव निर्दयाश्च ये। ब्रह्मस्वपुष्टा व्यभिचारकारिणः सप्ताहयज्ञेन कलौ पुनन्ति ते।।१३।। कायेन वाचा मनसापि पातकं नित्यं प्रकुर्वन्ति शठा हठेन ये। परस्वपुष्टा मलिना दुराशयाः सप्ताहयज्ञेन कलौ पुनन्ति ते।।१४।। अत्र ते कीर्तयिष्याम इतिहासं पुरातनम्। यस्य श्रवणमात्रेण पापहानिः प्रजायते ।।१५।। तुङ्गभद्रातटे पूर्वमभूत्पत्तनमुत्तमम्। यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः।।१६।।**

।। सङ्ग्रहोक्तिः ।।

अतः कलौ मनुष्यलोके चित्तशुद्धयेऽन्यत् किञ्चित् पवित्रं नास्ति, तथैव पापपुञ्जविनाशकरं भागवतकथासमानमन्यन्नास्ति।।९।। कृपालुभिर्युष्माभिर्लोकहितं विचार्य कथारूपः कोऽपि नवीनमार्गः प्रकाशितः, अतः कथामयेनानेन सप्ताहयज्ञेन के के पापिनः शुद्ध्यन्ति, तन्मह्यं वदत।।१०।। *कुमारा ऊचुः* - ये मनुष्याः सर्वदा पापकर्तारः, दुराचाररताः, कुमार्गगाः, क्रोधाग्निदग्धाः, कुटिलाः, कामिनश्च, भवन्ति तेऽपि कलौ सप्ताहयज्ञेन पुनन्ति।।११।। ये सत्यशून्याः, मातृपितृविदूषकाः, तृष्णाकुलाः, आश्रमधर्मरहिताः, दाम्भिकाः, मत्सरिणः, हिंसकाश्च भवन्ति तेऽपि सप्ताहयज्ञेन कलौ पूता भवन्ति।।१२।। ये चोग्राणि पञ्चमहापापानि कुर्वन्ति, छलकपटिनः, क्रूराः, पिशाचवन्निर्दयाः, ब्रह्मस्वपुष्टाः, व्यभिचारिणो भवेयुः, तेऽप्यनेन सप्ताह-यज्ञेन शुद्ध्यन्ति।।१३।। ये शठजना हठेन मनसा वचसा कर्मणा च नित्यं पातकं कुर्वन्ति, ये परस्वपुष्टा मलिना दुराशयाश्च स्युस्तेऽपि कलौ सप्ताह श्रवणेन पवित्रा भवन्ति ।।१४।। अत्र विषये पुरातनमेकमितिहासं कीर्तियिष्यामि, यस्य श्रवणमात्रेण पापहानिः प्रजायते।।१५।।

आत्मदेवः पुरे तस्मिन् सर्ववेदशिारदः। श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः ।।१७।। भिक्षुको वित्तवाँल्लोके तत्प्रिया धुन्धुली स्मृता। स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा।।१८।। लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका। शूरा च गृहकृत्येषु कृपणा कलहप्रिया।।१९।। एवं निवसतोः प्रेम्णा दम्पत्यो रममाणयोः। अर्थाः कामास्तयोरासन्न सुखाय गृहादिकम्।।२०।। पश्चाद्धर्माः समारब्धास्ताभ्यां संतानहेतवे। गोभूहिरण्यवासांसि दीनेभ्यो यच्छतः सदा।।२१।। धनार्धं धर्ममार्गेण ताभ्यां नीतं तथापि च। न पुत्रो नापि वा पुत्री ततश्चिन्तातुरो भृशम्।।२२।। एकदा स द्विजो दुःखाद् गृहं त्यक्त्वा वनं गतः। मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् ।।२३।। पीत्वा जलं निषण्णस्तु प्रजादुःखेन कर्शितः। मुहूर्तादपि तत्रैव संन्यासी कश्चिदागतः।।२४।। दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदन्तिकम्। नत्वा च पादयोस्तस्य निःश्वसन् संस्थितः पुरः।।२५।।

।। सङ्ग्रहोक्तिः ।।

पुरा तुङ्भद्रानदीतट उत्तमं नगरमासीत्, यत्र सर्वे वर्णा स्वधर्मेणयुताः सन्तः सत्कर्मतत्परा आसन्।।१६।तत्र नगरे वेदशास्त्रविशारदः श्रौतस्मार्तेषु निष्णातो द्वितीयो भास्कर इव उज्ज्वल आत्मदेवनामा ब्राह्मण आस।।१७।।तस्य धुन्धुली नाम भार्याऽभूत्, सा सुन्दरी सत्कुलोद्भवाऽपि नित्यं स्ववाक्यस्थापिका, लोकवार्तारता, क्रूरा, प्रायो बहुजल्पिका, गृहकृत्येषु शूरा, कृपणा, कलहप्रिया च बभूव।।१८-१९।। एवं प्रेम्णा रममाणयोस्तत्र निवसतोर्दम्पत्योरर्थाः कामा गृहादिकं च सुखाय नाऽऽसन्।।२०।।पश्चाद्वर्तिकाले ताभ्यां सन्तानप्राप्तये धर्माः समारब्धाः, दीनजनेभ्यो गो-भू-हिरण्य-वासांसि सदा यच्छतः।।२१।। धनसम्पत्तेरर्धं धर्ममार्गे ताभ्यां दत्तं, तथापि तस्य पुत्रः पुत्री वा न जाता, तेन सः भृशं चिन्तातुरोऽवर्तत।।२२।। एकदा स आत्मादेवो दुःखात् गृहं त्यक्त्वा वनं गतः, मध्याह्ने तृषितो जातः, स तडागं समुपेयिवान्।।२३।। प्रजादुःखेन कर्षितः स जलं पीत्वा तत्र निषण्णः, मुहूर्तमात्रसमय एव तत्र कश्चित् सन्यासी समागतः।।२४।। पीतजलं सन्यासिनं दृष्ट्वा विप्रस्तदन्तिकं जगाम, तस्य पादयोर्नत्वा निःश्वसन् पुरः स्थितः।।२५।। *यतिरुवाच* – हे विप्र! त्वं कथं रोदिषि, ते महती चिन्ता का?

यतिरुवाच - कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी। वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम्।।२६।। *ब्राह्मण उवाच* - किं ब्रवीमि ऋषे दुःखं पूर्वपापेन संचितम्। मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते।।२७।। मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः। प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः।।२८।। धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना। धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना।२९।। पाल्यते या मया धेनुः सा वन्ध्या सर्वथा भवेत्। यो मया रोपितो वृक्षः सोऽपि वन्ध्यत्वमाश्रयेत्।।३०।। यत्फलं मद्गृहायातं तच्च शीघ्रं विनश्यति। निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे।।३१।। इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः। तदा तस्य यतेश्चित्ते करुणाभूद्गरीयसी।।३२।। तद्भालाक्षरमालां च वाचयामास योगवान्। सर्वं ज्ञात्वा यतिः पश्चाद्विप्रमूचे सविस्तरम्।।३३।। *यतिरुवाच- मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः। विवेकं तु समासाद्य त्यज संसारवासनाम्।।३४।।* शृणु विप्र मया तेऽद्य प्रारब्धं तु विलोकितम्। सप्तजन्मावधि तव पुत्रो नैव च नैव च।।३५।।

।। सङ्ग्रहोक्तिः।।

त्वं स्वदुःखस्य कारणं मह्यं वद।।२६।। *ब्राह्मण उवाच* - पूर्वदुष्कर्मणा प्राप्तं दुःखमहं किं ब्रवीमि, मदीयाः पूर्वजाः मद्दत्तं तोयं दुःखनिःश्वासेन क्वोष्णं पिबन्ति।।२७।। मया प्रीत्या दत्तं देवा द्विजातयोऽपि न गृह्णान्ति, प्रजाऽभावदुःखेनाऽहं प्राणांस्त्यक्तुमिहाऽऽगतोऽस्मि।।२८।। प्रजाहीनं जीवितं, गृहं, धनं च धिक्, सन्ततिं विना कुलमपि धिक् धिक्।।२९।। अहं यां धेनुं पालयामि, साऽपि सर्वथा वन्ध्या भवति, मया रोपितो वृक्षोऽपि वन्ध्यो भवति।।३०।। मम गृहमानीतं फलं शीघ्रं विनश्यति, अतोऽनपत्यस्य भाग्यहीनस्य मे जीवितेन किम्?।।३१।। दुःखपीडितः स विप्र इत्युक्त्वा तदन्तिकमुच्चैरुरोद, तदा तस्य यतेश्चित्ते भूयसी करुणाऽभूत्।।३२।। योगी स तस्य ललाटलेखां वाचयामास, सर्वं ज्ञात्वा पश्चाद् यतिर्विप्रं सविस्तरमूचे।।३३।। *यतिरुवाच* - हे विप्र! प्रजारूपमज्ञानं विमुञ्च, कर्मणो गतिर्बलिष्ठाऽस्ति, आत्मानात्मविवेकं समाश्रित्य संसारवासनां त्यज।।३४।। विप्र! शृणु, मयाऽद्य ते प्रारब्धं

संततेः सगरो दुःखमवापाङ्ग पुरा तथा। रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ।।३६।। *ब्राह्मण उवाच* - विवेकेन भवेत्किं मे पुत्रं देहि बलादपि। नो चेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्च्छितः।।३७।। पुत्रादिसुखहीनोऽयं संन्यासः शुष्क एव हि। गृहस्थः सरसो लोके पुत्रपौत्रसमन्वितः।।३८।। इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः। चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात् ।।३९।। न यास्यसि सुखं पुत्राद्यथा दैवहतोद्यमः। अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ।।४०।। तस्याग्रहं समालोक्य फलमेकं स दत्तवान्। इदं भक्षय पत्न्या त्वं ततः पुत्रो भविष्यति।।४१।। सत्यं शौचं दया दानमेकभक्तं तु भोजनम्। वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽतिनिर्मलः।।४२।। एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः। पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् ।।४३।। तरुणी कुटिला तस्य सख्यग्रे च रुरोद ह। अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ।।४४।।

।। सङ्ग्रहोक्तिः ।।

विलोकितम्, सप्तजन्मपर्यंतं ते पुत्रोनास्त्येव हि ।।३५।। पुरा सगरो नृपः प्रजाया दुःखमवाप, हे विप्र! कुटुम्बवासनां त्यज, संन्यासे सर्वथा सुखमस्ति ।।३६।। *ब्राह्मण उवाच* – हे महात्मन्! विवेकेन किं भवेत्, बलादपि मह्यं पुत्रं देहि, अन्यथा शोकमूर्च्छितोऽहं त्वदग्र एव स्वप्राणांस्त्यक्ष्ये ।।३७।। पुत्रादिसुखभोगहीनोऽयं सन्यासः शुष्क एव, लोके पुत्रपौत्रसमन्वितो गृहस्थाश्रम एव सरसः सुखरूपो वर्तते ।।३८।। इत्थं तस्य विप्रस्य दुराग्रहं वीक्ष्य स तपोधनस्तमब्रवीत्, विधिलेखमार्जनात् पूर्वं चित्रकेतुः कष्टं प्राप ।।३९ ।। दुर्भाग्यपूर्णस्त्वं पुत्रात् सुखं न प्राप्स्यसि, त्वं हठयुक्तोऽसि. अतः स्वार्थिनं त्वां किं वदामि ।।४०।। स यतिस्तस्याऽऽग्रहं दृष्ट्वा तमेकं फलं ददौ प्रोवाच च, फलमिदं पत्नीं भक्षय, तेन ते पुत्रो भविष्यति ।।४१।। तव स्त्रिया वर्षपर्यन्तं सत्यं, शौचं, दया, दानम्, एकभोजनं चेति नियमाः पाल्याः, तेन पुत्रोऽतिनिर्मलो भविष्यति ।।४२।।एवमुक्त्वा योगी ततो ययौ, विप्रस्तु गृहमागतवान्, पत्न्याः पाणौ तत् फलं दत्त्वा स्वयं कुत्रचिदगात् ।।४३।। तस्य तरुणी कुटिला पत्नी स्वसखीसमक्षं रुरोद, अहो, मम चिन्ता समुत्पन्नां, अहं फलं न भक्षये ।।४४।।

फलभक्षेण गर्भः स्याद्गर्भेणोदरवृद्धिता। स्वल्पभक्षं ततोऽशक्तिर्गृहकार्यं कथं भवेत्।।४५।। दैवाद् धाटी व्रजेद्ग्रामे पलायेद्गर्भिणी कथम्। शुकवन्निवसेद्गर्भस्तं कुक्षेः कथमुत्सृजेत्।।४६।। तिर्यक्चेदागतो गर्भस्तदा मे मरणं भवेत्। प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे।।४७।। मन्दायां मयि सर्वस्वं ननान्दा संहरेत्तदा। सत्यशौचादिनियमो दुराराध्यः स दृश्यते।।४८।। लालने पालने दुःखं प्रसूतायाश्च वर्तते। वन्ध्या वा विधवा नारी सुखिनी चेति मे मतिः।।४९।। एवं कुतर्कयोगेन तत्फलं नैव भक्षितम्। पत्या पृष्टं फलं भुक्तं भुक्तं चेति तयेरितम्।।५०।। एकदा भगिनी तस्यास्तद्गृहं स्वेच्छयाऽगता। तदग्रे कथितं सर्वं चिन्तेयं महती हि मे ।।५१।। दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम्। साब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः।।५२।। तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम्। वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम्।।५३।।

।। सङ्ग्रहोक्तिः।।

फलभक्षणेन गर्भो भवेत्, गर्भेणोदरवृद्धिः" स्यात्, आहारः स्वल्पो भवेत्, तदा गृहकर्म कथं भवेत्।।४५।। दैवाद् ग्रामे धाटी (गुजरातीमां - धाड) आव्रजेत् तदा गर्भिणी कथं पलायेत्, यदि शुकदेववद् गर्भो कुक्षौ निवसेत्, तदा तं बहिः कथमुत्सृजेत्।।४६।। यदि गर्भस्तिर्यग् जातः, तर्हि मे मरणं भवेदेव, सुकुमार्यहं दारुणीं प्रसूतिवेदनां कथं सहेय।।४७।। मयि मन्दायां जातायां, तदा मे ननान्दा सर्वस्वं संहरेत्, एवं सत्यशौचादयो नियमा सर्वथा दुष्करा दृश्यन्ते।।४८।। प्रसूताया शावकस्य लालने पालने च महद्दुखं वर्तते, अतो या वन्ध्या वा विधवा नारी सर्वथा सुखिनी भवतीति मे मतिः।।४९।। एवंविधेन कुतर्कयोगेन तया फलं न भक्षितम्, यदा पत्या पृष्टं तदा फलं भक्षितमिति सा प्राह,।।५०।। एकदा धुन्धुल्या भगिनी स्वेच्छया तद्गृहमागता, तदग्रे तया "ममेयं महती चिन्ताऽस्ति" इति कथितम्।।५१।। अनुजे! तेन दुःखेन दुर्बलाऽहं किं करवाणि? तदा सा तामाह. ममोदरे गर्भोऽस्ति, प्रसूत्यनन्तरं तं त्वां दास्यामि।।५२।। तावत् त्वं सगर्भेव गुप्ता गृह एव सुखं वस, त्वं मत्पतिं वित्तं यच्छ, स ते बालकं दास्यति।।५३।।

षाण्मासिको मृतो बाल इति लोको वदिष्यति। तं बालं पोषयिष्यामि नित्यमागत्य ते गृहे।।५४।। फलमर्पय धेन्वै त्वं परीक्षार्थं तु साम्प्रतम्। तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः।।५५।। अथ कालेन सा नारी प्रसूता बालकं तदा। आनीय जनको बालं रहस्ये धुन्धुलीं ददौ।।५६।। तया च कथितं भर्त्रे प्रसूतः सुखमर्भकः। लोकस्य सुखमुत्पन्नमात्मदेवप्रजोदयात्।।५७।। ददौ दानं द्विजातिभ्यो जातकर्म विधाय च। गीतवादित्रघोषोऽभूत्तद्द्वारे मङ्गलं बहु।।५८।। भर्तुरग्रेऽब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम।। अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम्।।५९।। मत्स्वसुश्च प्रसूताया मृतो बालस्तु वर्तते। तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति।।६०।। पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे। पुत्रस्य धुन्धुकारीति नाम मात्रा प्रतिष्ठितम्।।६१।। त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम्। सर्वाङ्गसुन्दरं दिव्यं निर्मलं कनकप्रभम्।।६२।। दृष्ट्वा प्रसन्नो विप्रस्तु संस्कारान् स्वयमादधे। मत्वाऽऽश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः।।६३।।

।। सङ्ग्रहोक्तिः ।।

मत्कृतयुक्त्या षाण्मासिको बालो मृतः इति लोको वदिष्यति, अपरं चाऽहं नित्यं ते गृहमागत्य तं बालं पोषयिष्यामि।।५४।। साम्प्रतं त्वं परीक्षार्थं तत्फलं धेनवेऽर्पय, ततः स्त्रीस्वभाववशात् धुन्धुल्या स्वसृकथितं सर्वं तथैवाऽऽचरितम्।।५५।। अथ कालेन सा नारी बालकं प्रसूता, तदा जनको बालमानीय रहसि तं धुन्धुलीं ददौ।।५६।। ततो धुन्धुल्या भर्त्रे कथितं सुखमर्भकः प्रसूतः, आत्मदेवपुत्रजन्मना लोकस्याऽपि सुखं जातम्।।५७।। ततः स विप्रो जातकर्म विधाय द्विजातिभ्यो दानानि ददौ, तद्गृहद्वारे गीतवादित्रघोषेण सह बहु मङ्गलमभूत्।।५८।। धुन्धुल्या भर्तुरग्रे कथितं मे कुचे स्तन्यं नास्ति, निर्दुग्धाऽहमन्यस्तन्येन बालकं कथं पुष्णामि? ।।५९।। प्रसूताया मत्स्वसुर्बालो मृतः, अतस्तामाकार्य गृहे रक्ष, सा मेऽर्भं पोषयिष्यति ।।६०।। तदा पुत्ररक्षणहेतव आत्मदेवेन तत् सर्वं कृतम्, मात्रा बालस्य नाम "धुन्धुकारी" इति प्रतिष्ठापितम्।।६१।। त्रिमासे काले निर्गते सति सा धेनुरपि सर्वाङ्गसुन्दरं निर्मलं कनकप्रभं बालं सुषुवे।।६२।। तं दृष्ट्वा प्रसन्नो विप्रस्तु तस्यापि संस्कारान् स्वयं विदधे,

भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत। धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकम्।।६४।। न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः। गोकर्णं तं सुतं दृष्ट्वा गोकर्णं नाम चाकरोत्।।६५।। कियत्कालेन तौ जातौ तरुणौ तनयावुभौ। गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः।।६६।। स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधवर्धितः। दुष्परिग्रहकर्ता च शवहस्तेन भोजनम्।।६७।। चौरः सर्वजनद्वेषी परवेश्मप्रदीपकः। लालनायार्भकान्धृत्वा सद्यः कूपे न्यपातयत्।।६८।। हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः। चाण्डालाभिरतो नित्यं पाशहस्तः श्वसंगतः।।६९।। तेन वेश्याकुसङ्गेन पित्र्यं वित्तं तु नाशितम्। एकदा पितरौ ताड्य पात्राणि स्वयमाहरत्।।७०।। तत्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह। वन्ध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः।।७१।। क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत्। प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम्।।७२।।

।। सङ्ग्रहोक्तिः।।

सर्वे जना अपि तमाश्चर्यं मत्वा तद्दिदृक्षार्थं तत्र समाययुः।।६३।। *जना ऊचुः*– सांप्रतमात्मदेवस्य भाग्योदयो जातः, पश्य, धेन्वाऽपि देवसदृशो बालः प्रसूतः, तदतिकौतुकम्।।६४।। विधियोगात् तद् रहस्यं केनाऽपि न ज्ञातम्, आत्मदेवः सुतं गोकर्णं दृष्ट्वा तस्य नाम "गोकर्ण" इति चकार।।६५।। कियता कालेनैतावुभौ तनयौ तरुणौ जातौ, गोकर्णो ज्ञानी पण्डितो बभूव, धुन्धुकारी तु महाखलः।।६६।।स स्नानशौचादिक्रियाहीनो दुर्भक्षी, नितान्तक्रोधी, दुष्परिग्रहकर्ता शवस्पृष्टभोजीचाऽभवत्।।६७।। चौर्यवृत्तिः, सर्वजनद्वेषी, परवेश्मप्रदाहकः, स परार्भकान् लालनाय गृहीत्वा सद्यः तान् कूपे न्यपातयत्।।६८।। स हिंसकः, शास्त्रधारी, दीनान्धानां प्रपीडकः, चाण्डालेषु प्रसक्तः पाशहस्तः श्वभिर्वेष्टितोऽवर्तत।।६९।। तेन वेश्याकुसङ्गेन सर्वं पित्र्यं धनं विनाशितम्, एकदा पितरौ प्रताड्य गृहात् पात्राण्यापि निनाय।।७०।। तत्पिता कृपणो धनहीन आत्मदेवः प्रोच्चैः रुरोद, दुःखदायकात् पुत्रात् तु वन्ध्यत्वं समीचिनमित्याह।।७१।। अहं क्व तिष्ठामि, क्व गच्छामि च मम दुःखं को व्यपोहयेत्, दुःखेनाऽहं किं प्राणांस्त्यजामि? हा!!! मम दुःखं तु संस्थितम्।।७२।।

तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः। बोधयामास जनकं वैराग्यं परिदर्शयन् ।।७३।। असारः खलु संसारो दुखरूपी विमोहकः। सुतः कस्य धनं कस्य स्नेहवाञ्ज्वलतेऽनिशम् ।।७४।। न चेन्द्रस्य सुखं किंचिन्न सुखं चक्रवर्तिनः। सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः।।७५।। मुञ्चाज्ञानं प्रजारूपं मोहतो नरके गतिः। निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ।।७६।। तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिताब्रवीत्। किं कर्तव्यं वने तात तत् त्त्वं वद सविस्तरम् ।।७७।। अन्धकूपे स्नेहपाशे बद्धः पङ्गुरहं शठः। कर्मणा पतितो नूनं मामुद्धर दयानिधे ।।७८।। *देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च। पश्यानिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यरारसिको भव भक्तिनिष्ठः।।७९।। धर्मं भजस्व सततं त्यज लोकधर्मान् सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम्। अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा सेवाकथारसमहो नितरां पिब त्वम्।।८०।।*

।। सङ्ग्रहोक्तिः।।

तदानीं ज्ञानसंपन्नो गोकर्णस्तत्र समागत्य, वैराग्यं परिदर्शयन् जनकं बोधयामास ।।७३।। अयं संसारः खल्वसारभूतोऽस्ति स च दुःखरूपविमोहकश्चास्ति, अत्र कस्य सुतः, कस्य वा धनम्? तत्र स्नेहबद्धोऽहर्निशं ज्वलते ।।७४।। देवराजस्य चक्रवर्तिनो वा सुखं नास्ति, सुखं तु विरक्तस्यैकान्तजीविनो मुनेरेवाऽस्ति ।।७५।। हे पितः! अज्ञानं मुञ्च, मोहतो नरके गतिर्भवति, देहोऽयं पतिष्यति, अतः सर्वं त्यक्त्वां वनं व्रज ।।७६।। गोकर्णवचनं श्रुत्वा गन्तुकामः पिताऽऽत्मदेवोऽब्रवीत्- वनं गत्वा मया किं कर्त्तव्यम्? हे तात! सविस्तरं तत् तत्त्वं मे वद ।।७७।। हे दयानिधे! पङ्गुरहं शठः स्नेहपाशेन बद्धोऽस्मि, नूनं कर्मणाऽन्धकूपे पतितोऽस्मि, अतो मामुद्धर ।।७८।। *गोकर्ण उवाच* – त्वमस्थिमांसरुधिरमये देहेऽहंत्वाभिमानं त्यज, स्त्रीपुत्रादिषु सदा स्थितां ममतां विमुञ्च, परिदृश्यमानमिदं जगत् निरन्तरं क्षणभङ्गुरं पश्य, ततो वैराग्यरसे रसिको भूत्वा भक्तिनिष्ठो भव ।।७९।। लोकाचाररूपं धर्मं त्यक्त्वा एकान्तिकानां धर्मं भज, साधुपुरुषान् सेवस्व, विषयवासनां जहि, अन्यस्य गुणदोषविचारं शीघ्रं विहाय भगवत्सेवारसं तत्कथारसं च नितरां पिब ।।८०।।

एवं सुतोक्तिवशतोऽपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः। युक्तो हरेरनुदिनं परिचर्ययासौ श्रीकृष्णमाप नियतं दशमस्य पाठात्।।८१।।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

सूत उवाच – पितर्युपरते तेन जननी ताडिता भृशम् । क्व वित्तं तिष्ठति ब्रूहि हनिष्ये लत्तया न चेत्।।१।। इति तद्वाक्यसंत्रासाज्जनन्या पुत्रदुःखतः। कूपे पातः कृतो रात्रौ तेन सा निधनं गता।।२।। गोकर्णस्तीर्थयात्रार्थं निर्गतो योगसंस्थितः। न दुःखं न सुखं तस्य न वैरी नापि बान्धवः।।३।। धुन्धुकारी गृहेऽतिष्ठत्पञ्चपण्यवधूवृतः। अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः।।४।। एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः। तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन्।।५।।

।। सङ्ग्रहोक्तिः ।।

एवंविधानि गोकर्णवचनानि समाकर्ण्य, तद्वश आत्मदेवो गृहं विहाय वनं गतः, तत्र स्थितधीः षष्टिवर्षीयः सोऽनुदिनं हरिसेवया युक्तः सन् नियमेन दशमस्कन्धस्य पाठेन श्रीकृष्णचरण-कमलमवाप।।८१।।

इति श्रीमद्भागवतमाहात्म्ये सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

धुन्धुकारिणः प्रेतयोनिप्राप्तिः तस्योद्धारश्च

सूत उवाच – पितुर्वनगमनानन्तरं धुन्धुकारिणा जननी भृशं ताडिता, ब्रूहि, वित्तं क्व स्थापितम् अन्यथा लत्तया हनिष्ये।।१।। इत्थं धुन्धुकारिवाक्यसंत्रासात् पुत्राद् भृशं दुःखिता धुन्धुली रात्रौ कूपे पपात, तेन च सा ममार।।२।। योगमाश्रितो गोकर्णस्तीर्थयात्रार्थं गृहात् निर्गतः, तस्य मनसि सुखं दुःखं वा नाऽभूत् तस्य कोऽपि बान्धवो वा वैरी नाऽभवत्।।३।। धुन्धुकारी पञ्चपण्यस्त्रीपरिवृतः सन् गृहेऽवसत्, तत्स्त्रीपोषणविमूढमतिः सोऽत्युग्रभूरिकर्माऽभूत्।।४।।

यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः। ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि कियन्ति च।।६।। बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो व्यचारयन्। चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति।।७।। वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितम्। अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्यते।।८।। निहत्यैनं गृहीत्वार्थं यास्यामो यत्र कुत्रचित्। इति ता निश्चयं कृत्वा सुप्तं सम्बद्ध्य रश्मिभिः।।९।। पाशं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः। त्वरितं न ममारासौ चिन्तायुक्तास्तदाभवन्।।१०।। तप्ताङ्गार-समूहांश्च तन्मुखे हि विचिक्षिपुः। अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः।।११।। तं देहं मुमुचुर्गर्ते प्रायः साहसिकाः स्त्रियः। न ज्ञातं तद्रहस्यं तु केनापीदं तथैव च ।।१२।। लोकैः पृष्टा वदन्ति स्म दूरं यातः प्रियो हि नः। आगमिष्यति वर्षेऽस्मिन् वित्तलोभविकर्षितः।।१३।। स्त्रीणां नैव तु विश्वासं दुष्टानां कारयेद्बुधः। विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते।।१४।।

।। सङ्ग्रहोक्तिः ।।

एकदा कामन्धः स मृत्युमप्यविगणयन् कुलटानां नारीणां भूषणलिप्सया गृहान्निर्गतवान्।।५।। यतस्ततो धनं संहृत्य पुनर्वेश्म प्रत्याजगाम, सुवस्त्राणि कियन्ति भूषणानि च ताभ्यः सोऽयच्छत्।।६।। तेनाऽऽनीतं प्रचुरधनसंचयं दृष्ट्वा ता नार्यो रात्रौ व्यचारयन्, असौ नित्यं चौर्यं करोति, अत इमं राजा नूनं ग्रहीष्यति।।७।। तदाऽस्य वित्तं हृत्वा निश्चितमेनं मारयिष्यति, अतो वित्तरक्षायै गूढमस्माभिरेवायं कथं न निहन्यते।।८।। इमं हत्वा, धनं ग्रहीत्वा वयं यत्र कुत्रचिद् यास्यामः, इति निश्चित्य ता रात्रौ सुप्तं तं रश्मिभिः सम्बद्ध्य कण्ठे पाशं निधाय तन्मृत्युमुपचक्रमुः, यदा स सत्वरं न ममार तदा ताश्चिन्तिता अभवन्।।९-१०।। ततस्तप्ताङ्गार समूहान् तन्मुखे ता विचिक्षिपुः, तेनाऽग्निज्वालाया अतिदुःखेन व्याकुलो स निधनं प्राप।।११।। प्रायः साहसिकास्ताः स्त्रियो मृतस्य देहं गर्ते निचिक्षिपुः, लोके तद्रहस्यं केनाऽपि न ज्ञातम् ।।१२।। लोकैः पृष्टास्ताः वित्तलोभविकर्षितो नः प्रियस्तत्प्राप्त्यै दूरं गतः, सोऽस्मिन् वर्षे आगमिष्यति।।१३।। बुधो दुष्टानां स्त्रीणां विश्वासं क्वापि नैव कारयेत्, यो मूढस्तासां विश्वासे स्थितः स दुःखैः परिभूयते।।१४।।

सुधामयं वचो यासां कामिनां रसवर्धनम्। हृदयं क्षुरधाराभं प्रियः को नाम योषिताम्।।१५।। संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः। धुन्धुकारी बभूवाथ महान् प्रेतः कुकर्मतः।।१६।। वात्यारूपधरो नित्यं धावन्दश दिशोऽन्तरम्। शीतातपपरिक्लिष्टो निराहारः पिपासितः।।१७।। न लेभे शरणं क्वापि हा दैवेति मुहुर्वदन्। कियत्कालेन गोकर्णो मृतं लोकादबुध्यत।।१८।। अनाथं तं विदित्वैव गयाश्राद्धमचीकरत्। यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धमवर्तयत्।।१९।। एवं भ्रमन् स गोकर्णः स्वपुरं समुपेयिवान्। रात्रौ गृहाङ्गणे स्वप्तुमागतोऽलक्षितः परैः।।२०।। तत्र सुप्तं स विज्ञाय धुन्धुकारी स्वबान्धवम्। निशीथे दर्शयामास महारौद्रतरं वपुः।।२१।। सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् । सकृदिन्द्रः सकृच्चाग्निः पुनश्च पुरुषोऽभवत्।।२२।। वैपरीत्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः। अयं दुर्गतिकः कोऽपि निश्चित्याथ तमब्रवीत्।।२३।। *गोकर्ण उवाच* - कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमाम् । किं वा प्रेतः पिशाचो वा राक्षसोऽसीति शंस नः।।२४।।

।। सङ्ग्रहोक्तिः।।

यासां स्त्रीणां सुधामयं वचः कामिनां रसवद्धनं वर्तते, किन्तु तासां हृदयं तु क्षुराधाराभं वर्तते, अतो योषितां को नाम प्रियः?।।१५।। बहुभर्तृकास्ताः कुलटा धुन्धुकारिणो वित्तं संहृत्य तद्गृहान्निर्ययुः, अथ धुन्धुकारी तु निजकुकर्मतो कहान् प्रेतो बभूव।।१६।। स शीतातापपरिक्लिष्टो निराहारः पिपासितो वात्यारूपधरः सन् दश दिशोऽन्तरेऽन्वधावत्।।१७।। हा दैव!!! इति मुहुर्मुहुर्वदन् स क्वापि शरणं न लेभे, इतो गोकर्णः कियत्कालेन धुन्धुकारिणं मृतमिति लोकादबुध्यत।।१८।। मृतं तमनाथं विचार्य स गयाश्राद्धमचीकरत्, गोकर्णः यत्र संयाति तत्र तन्निमित्तं श्राद्धमवर्तयत्।।१९।। इत्थं तीर्थेषु परिभ्रमन् स स्वपुरमुपेयाय, रात्रौ परैरज्ञातः स सुप्तुं गृहाङ्गणमाजगाम।।२०।। तत्र सुप्तं स्वबान्धवं विज्ञाय प्रेतो धुन्धुकारी निशीथे महद् रौद्रतरं वपुर्दर्शयामास।।२१।। स सकृन्मेषः, सकृद्धस्ती सकृच्च महिषोऽभवत् सकृदिन्द्रोऽग्निश्च भूत्वा पुरुषोऽभवत्।।२२।। तदा धैर्ययुतो गोकर्णस्तद् वैपरीत्यं दृष्ट्वाऽयं कोऽपि दुर्गतिकः स्याद्, इति निश्चित्य, अथ तमब्रवीत्।।२३।। *गोकर्ण उवाच* - रात्रावुग्रतर आगतस्त्वं कः? इमां दशां कुतो यातः? त्वं प्रेतः पिशाचः किं वा राक्षसोऽसि? सत्यं नः

सूत उवाच - एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनः पुनः। अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह।।२५।। ततोऽञ्जलौ जलं कृत्वा गोकर्णस्तमुदैरयत्। तत्सेकहतपापोऽसौ प्रवक्तुमुपचक्रमे ।।२६।। *प्रेत उवाच* - अहं भ्राता त्वदीयोऽस्मि धुन्धुकारीति नामतः। स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया।।२७।। कर्मणो नास्ति संख्या मे महाज्ञाने विवर्तिनः। लोकानां हिंसकः सोऽहं स्त्रीभिर्दुःखेन मारितः।।२८।। अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम्। वाताहारेण जीवामि दैवाधीनफलोदयात्।।२९।। अहो बन्धो कृपासिन्धो भ्रातर्मामाशु मोचय । गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाब्रवीत्।।३०।। *गोकर्ण उवाच* - त्वदर्थं तु गयापिण्डो मया दत्तो विधानतः। तत्कथं नैव मुक्तोऽसि ममाश्चर्यमिदं महत्।।३१।। गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विह। किं विधेयं मया प्रेत तत् त्वं वद सविस्तरम्।।३२।। *प्रेत उवाच* - गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति । उपायमपरं कंचित्त्वं विचारय साम्प्रतम्।।३३।।

।। सङ्ग्रहोक्तिः ।।

शंस।।२४।। *सूत उवाच* - तेनैवं पृष्टः स तदोच्चैः पुनः पुनः रुरोद, वचनोच्चारेऽशक्तः स संज्ञामात्रं चकार।।२५।। ततो गोकर्णोऽञ्जलौ जलं गृहीत्वोत्क्षिप्य च तमुदैरयत्, जलबिन्दुहतपापोऽसौ प्रवक्तुमुपचक्रमे।।२६।। *प्रेत उवाच* - धुन्धुकारीनामाऽहं त्वदीयो भ्राताऽस्मि, मया स्वकीयेन दोषेण ब्रह्मत्वं नाशितम्।।२७।। महाज्ञाने विवर्तिनो मे पापकर्मणां संख्या नाऽस्ति, लोकानां हिंसकं मां स्त्रियो दुःखिनं कृत्वा क्रूरतया घातयामासुः।।२८।। अतः प्रेतत्वं प्राप्तोऽहं नितांतं दुर्दशां वहामि, दैववशाद् कर्मणां फलोदयाद् वाताहारेण जीवामि।।२९।। हे कृपासिन्धो! बन्धो! हे भ्रातः! मां शीघ्रं मोचय, तदाश्रुत्य गोकर्णस्तस्मै वाक्यमब्रवीत्।।३०।। *गोकर्ण उवाच* - मया त्वदर्थं विध्यनुसारं गयाक्षेत्रे पिण्डदानं कृतमस्ति, तथापि त्वं कथं न मुक्तः? इदं मम महदाश्चर्यं!।।३१।। गयायां श्राद्धकरणादपि ते मोक्षो न जातः, तर्हि मुक्तयेऽन्य उपायो न, हे प्रेत! मया किं विधेयम्, तत् त्वं सविस्तरं वद।।३२।। *प्रेत उवाच* - गयाक्षेत्रे कृतेन श्राद्धशतेनाऽपि मे मुक्तिर्न भविष्यति, अस्मिन् विषये -

इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः। शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव।।३४।। इदानीं तु निजं स्थानमातिष्ठ प्रेत निर्भयः। त्वन्मुक्तिसाधकं किंचिदाचरिष्ये विचार्य च।।३५।। धुन्धुकारी निजस्थानं तेनादिष्टस्ततो गतः। गोकर्णश्चिन्तयामास तां रात्रिं न तदध्यगात्।।३६।। प्रातस्तमागतं दृष्ट्वा लोकाः प्रीत्या समागताः। तत्सर्वं कथितं तेन यज्जातं च यथा निशि।।३७।। विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः। तन्मुक्तिं नैव तेऽपश्यन् पश्यन्तः शास्त्रसंचयान् ।।३८।। ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परम्। गोकर्णः स्तम्भनं चक्रे सूर्यवेगस्य वै तदा।।३९।। तुभ्यं नमो जगत्साक्षिन् ब्रूहि मे मुक्तिहेतुकम्। तच्छ्रुत्वा दूरतः सूर्यः स्फुटमित्यभ्यभाषत।।४०।। श्रीमद्भागवतान्मुक्तिः सप्ताहं वाचनं कुरु। इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतम्।।४१।। सर्वेऽब्रुवन् प्रयत्नेन कर्तव्यं सुकरं त्विदम् । गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः।।४२।।

।। सङ्ग्रहोक्तिः।।

सांप्रतमन्यं कञ्चिदुपायं त्वं विचारय।।३३।। इत्थं प्रेतवाक्यमाश्रुत्य गोकर्णो विस्मितः, यदि गयाश्राद्धशतेनाऽपि ते मुक्तिर्न स्यात् तर्हि तव मुक्तिरसाध्या भवेत् ।।३४।। हे प्रेत! इदानीं तु त्वं निर्भयः सन् स्वस्थानमातिष्ठ, अहं विचार्य तव मुक्त्युपायं कंचिदाचरिष्ये।।३५।। ततस्तेनाऽऽज्ञप्तो धुन्धुकारी निजं स्थानं गतः, गोकर्णस्तु रात्रौ तदुपायं विचारयन्नपि न तदध्यागात्।।३६।। प्रातर्लोकास्तं गोकर्णमागतं दृष्ट्वा प्रीत्या तस्य समीपमागताः, गोकर्णेन रात्रौ यथा यज्जातं तत्सर्वं कथितम्।।३७।। तदा योगनिष्ठा ज्ञानिनो ब्रह्मनिष्ठा विद्वांसोऽपि शास्त्रसंघान् ददृशुः, किन्तु केऽपि तन्मुक्त्युपायं नाऽविन्दन्।।३८।। अन्ते सर्वैः सूर्यवाक्यं परं निर्णीतम्, तदा गोकर्णः सूर्यवेगस्य स्तम्भनं चक्रे।।३९।। हे जगत्साक्षिन्! तुभ्यं नमः, धुन्धुकारिणो मुक्त्युपायं ब्रूहि, तच्छ्रुत्वा सूर्योदूरतः स्फुटमित्यभाषत यत् -।।४०।। तस्य श्रीमद्भागवतान् मुक्तिर्भविष्यति, अतस्त्वं सप्ताहपर्यन्तं तद्वाचनं कुरु, एवंविधं सूर्यस्य धर्मरूपं वचनं सर्वैः श्रुतम्।।४१।। तदा सर्वेऽब्रुवन्, इदं कर्त्तव्यं तु सुकरं, ततो गोकर्णो सप्ताहं विनिश्चित्य श्रीमद्भागवतं वाचनार्थं प्रवृत्तः।।४२।।

तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः। पङ्ग्वन्धवृद्धमन्दाश्च तेऽपि पापक्षयाय वै।।४३।। समाजस्तु महाञ्जातो देवविस्मयकारकः। यदैवासनमास्थाय गोकर्णोऽकथयत्कथाम्।।४४।। स प्रेतोऽपि तदाऽऽयातः स्थानं पश्यन्नितस्ततः। सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम्।।४५।। तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ। वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत्।।४६।। वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः। प्रथमस्कन्धतः स्पष्टमाख्यानं धेनुजोऽकरोत्।।४७।। दिनान्ते रक्षिता गाथा तदा चित्रं बभूव ह। वंशैकग्रन्थिभेदोऽभूत्सशब्दं पश्यतां सताम्।।४८।। द्वितीयेऽह्नि तथा सायं द्वितीयग्रन्थिभेदनम्। तृतीयेऽह्नि तथा सायं तृतीयग्रन्थिभेदनम् ।।४९।। एवं सप्तदिनैश्चैव सप्तग्रन्थिविभेदनम्। कृत्वा स द्वादशस्कन्धश्रवणात्प्रेततां जहौ।।५०।। दिव्यरूपधरो जातस्तुलसीदाममण्डितः। पीतवासा घनश्यामो मुकुटी कुण्डलान्वितः।।५१।। ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत्। त्वयाहं मोचितो बन्धो कृपया प्रेतकश्मलात्।।५२।। धन्या भागवती वार्ता प्रेतपीडाविनाशिनी ।

।। सङ्ग्रहोक्तिः ।।

श्रीमद्भागवतस्य सप्ताहेन श्रवणार्थं जना देशाद् ग्रामेभ्यश्चाययुः, ये पङ्गु-अन्ध-वृद्ध-मन्दा जनाः, तेऽपि स्वपापक्षयाय तत्राऽऽजग्मुः।।४३।। तदा श्रोतृजनसमाजो देवविस्मयजनको महान् जातः, यदा गोकर्णः कथामकथयत् तदा स प्रेतोऽपि तच्छ्रवणार्थमागतः, इतस्ततः स्थानं पश्यन् तत्र सप्तग्रन्थियुक्तमुच्छ्रितं कीचकमपश्यत्।।४४-४५।। असौ तत्कीचकमूलस्थं छिद्रमाविश्य श्रवणार्थं स्थितः, वातरूपः स्थितिं कर्तुमशक्तः स वंशमाविशत्।।४६।। एकं वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य गोकर्णः श्रीमद्भागवतस्य प्रथमस्कन्धत आख्यानवाचनमकरोत्।।४७।। दिनावसाने यदा कथाया विश्रान्तिर्जाता तदाऽतिविचित्रमाश्चर्यं बभूव, सर्वेषां पश्यतां सतां कीचकग्रन्थेरेकस्या भेदः सशब्दमभवत्।।४८।। द्वितीये दिवसेऽपि वंशस्य द्वितीयग्रन्थिभेदनं, तृतीयेऽह्नि सायं तृतीयग्रन्थिभेदनम्. एवं सप्तभिर्दिनैः सप्तग्रन्थिभेदनं कृत्वा धुन्धुकारी द्वादशस्कन्धात्मकं भागवतं श्रुत्वा प्रेततां जहौ।।४९-५०।। स तुलसीदाममण्डितः पीतवासा घनश्यामो मुकुटकुण्डलान्वितो दिव्यस्वरूपधरः स सद्यो भ्रातरं गोकर्णं

सप्ताहोऽपि तथा धन्यः कृष्णलोकफलप्रदः।।५३।। कम्पन्ते सर्वपापानि सप्ताहश्रवणे स्थिते। अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति।।५४।। आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्मभिः कृतम्। श्रवणं विदहेत्पापं पावकः समिधो यथा।।५५।। अस्मिन् वै भारते वर्षे सूरिभिर्देवसंसदि। अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम्।।५६।। किं मोहतो रक्षितेन सुपुष्टेन बलीयसा। अध्रुवेण शरीरेण शुकशास्त्रकथां विना।।५७।। ***अस्थिस्तम्भं स्नायुबद्धं मांसशोणितलेपितम्। चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः।।५८।। जराशोकविपाकार्तं रोगमन्दिरमातुरम्। दुष्पूरं दुर्धरं दुष्टं सदोषं क्षणभङ्गुरम्।।५९।। कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम्। अस्थिरेण स्थिरं कर्म कुतोऽयं साधयेन्न हि।।६०।। यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति। तदीयरससम्पुष्टे काये का नाम नित्यता।।६१।।*** **सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः।**

।। सङ्ग्रहोक्तिः।।

ननामाऽब्रवीच्च - हे बन्धो! त्वया कृपयाऽहं प्रेतकश्मलान्मोचितः।।५१-५२।।प्रेतपीडाविनाशिनी श्रीमद्भागवतस्य कथा धन्या, तथा श्रीकृष्णधामफलप्रद सप्ताहोऽपि धन्यः।।५३।। सप्ताह श्रवणावसरे सर्वाणि पापानि कम्पन्ते, इयं कथा सद्यो नः प्रलयं करिष्यति।।५४।। कर्मणा मनसा वचसा च कृतमार्द्रं, शुष्कं, लघु, गुरु वा यत् पापं तत् कथाश्रवणपावकः समिध इव विदहेत्।।५५।। अस्मिन् भारते वर्षे नृजन्म प्राप्य कथाश्रवणहीनानां जनानां जन्म निष्फलं वर्तते, इति देवसंसदि सुरिभिः कीर्त्तितम्।।५६।। यदि भागवतस्य श्रवणं न कृतं तर्हि मोहतो रक्षितेन सुपुष्टेन बलीयसा अध्रुवेण च शरीरेण किं प्रयोजनम्?।।५७।। तदिदं शरीरं तु अस्थिस्तम्भं, स्नायुबद्धं, मांसशोणितलेपितं, चर्मावनद्धं, दुर्गन्धं, मूत्रपुरीषयोः पात्रं च वर्तते।।५८।। तथैव तद् जराशोकविपाकार्तं, रोगमन्दिरम्, आतुरं, दुष्पूरं, दुर्धरं, दुष्टं, सदोषं, क्षणभङ्गुरं च विद्यते।।५९।। कृमिविड्भस्मावसानं, शीर्यते यत् तच्छरीरमिति वर्णितं यत् वर्तते, तेनाऽस्थिरेण शरीरेणाऽयं जीवः शाश्वन्मोक्षसाधकं स्थिरं कर्म कुतो न साधयेत्?।।६०।। यदन्नं प्रातः संस्कृतं सत् सायं तु तत् भोजनार्हं नाऽवतिष्ठते, तस्याऽन्नस्य रसेन पुष्टेऽस्मिन्

अतो दोषनिवृत्त्यर्थमेतदेव हि साधनम् ।।६२।। बुद्बुदा इव तोयेषु मशका इव जन्तुषु। जायन्ते मरणायैव कथाश्रवणवर्जिताः।।६३।। जडस्य शुष्कवंशस्य यत्र ग्रन्थिविभेदनम्। चित्रं किमु तदा चित्तग्रन्थिभेदः कथाश्रवात्।।६४।। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि सप्ताहश्रवणे कृते।।६५।। संसारकर्दमालेपप्रक्षालनपटीयसि। कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता।।६६।। एवं ब्रुवति वै तस्मिन् विमानमागमत्तदा। वैकुण्ठवासिभिर्युक्तं प्रस्फुरद्दीप्तिमण्डलम्।।६७।। सर्वेषां पश्यतां भेजे विमानं धुन्धुलीसुतः। विमाने वैष्णवान् वीक्ष्य गोकर्णो वाक्यमब्रवीत्।।६८।। *गोकर्ण उवाच* – अत्रैव बहवः सन्ति श्रोतारो मम निर्मलाः। आनीतानि विमानानि न तेषां युगपत्कुतः।।६९।। श्रवणं समभागेन सर्वेषामिह दृश्यते। फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः।।७०।।

।। सङ्ग्रहोक्तिः।।

शरीरे नित्यता का नाम?।।६१।। श्रीमद्भागवतं सप्ताहेन श्रूयाच्चेत् श्रीकृष्णो निकटस्थः प्राप्यते, अतः सर्वेषां दोषाणां निवृत्तये सप्ताहश्रवणमेवोत्तमं साधनं वर्तते।।६२।। तोयेषु बुद्बुदा, जन्तुषु मशकाश्च यथा विनाशायैव जायन्ते तथा कथाश्रवणरहिता मनुजा मरणायैवोत्पद्यन्ते।।६३।। यदि जडस्य शुष्कस्य कीचकस्याऽपि ग्रन्थिभेदनं कथाश्रवणेन जातं तर्हि तेन श्रवणेन हृदयग्रन्थिभेदनं स्याद्, अत्र किमाश्चर्यम्?।।६४।। श्रीमद्भागवतस्य सप्ताहेन श्रवणे कृते सति श्रोतुः पुंसो भगवत्प्राप्तिप्रतिबन्धकानि पूर्वोत्तराघरूपाणि कर्माणि क्षीयन्ते, तस्य सकलाः संशयाः नश्यन्ति, अहममाभिमानरूपा हृदयग्रन्थिश्च भिद्यते।।६५।। संसार कर्दमस्य प्रक्षालने पटीयसि कथातीर्थे चित्ते स्थिते सति मुक्तिर्भवत्येव, इत्थं बुधैः कथ्यते।।६६।। एवं धुन्धुकारिणि वदति सति तत्र वैकुण्ठवासिमुक्तैर्युतं स्फुरद्दीप्तिमण्डितं विमानं तदाऽऽगमत् ।।६७।। सर्वेषां पश्यतां सतां धुन्धुकारी विमानमारुरोह, तदा विमानस्थान् वैष्णवान् दृष्ट्वा गोकर्णो वचनमब्रवीत्।।६८।। *गोकर्ण उवाच* - अत्र सभास्थले निर्मला मत्कथाश्रोतारो बहवः सन्ति, तेषामर्थे युगपत् बहूनि विमानानि कुतो नाऽऽनीतानि?।।६९।। हे हरिप्रियाः! कथायाः श्रवणं तु सर्वेषां समानमेव विद्यते, अत्र फलभेदः कुतो जात? तत् प्रब्रुवन्तु।।७०।।

हरिदासा ऊचुः – श्रवणस्य विभेदेन फलभेदोऽत्र संस्थितः। श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम्। फलभेदस्ततो जातो भजनादपि मानद।।७१।। सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम्। मननादि तथा तेन स्थिरचित्ते कृतं भृशम्।।७२।। *अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम्। संदिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः।।७३।। अवैष्णवो हतो देशो हतं श्राद्धमपात्रकम्। हतमश्रोत्रिये दानमनाचारं हतं कुलम् ।।७४।।* विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना। मनोदोषजयश्चैव कथायां निश्चला मतिः।।७५।। एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम्। पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम्।।७६।। गोकर्ण तव गोविन्दो गोलोकं दास्यति स्वयम् ।एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः।।७७।। श्रावणे मासि गोकर्णः कथामूचे तथा पुनः। सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः।।७८।। कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद।।७९।। विमानैः सह भक्तैश्च हरिराविर्बभूव ह। जयशब्दा नमःशब्दास्तत्रासन् बहवस्तदा ।।८०।।

।। सङ्ग्रहोक्तिः ।।

हरिदासा ऊचुः – हे मानद! कथाश्रवणभेदेन फलभेदो जातः, सर्वैर्यथा श्रवणं कृतं तथा तस्या श्रुतस्यार्थस्य मननं न कृतम्, एवं हरेर्भजनादपि फलभेदो जातः।।७१।। प्रेतेन सप्ताह-पर्यन्तमुपोष्य श्रवणं कृतं तथा तेन स्थिरचित्ते भृशं मननादिकमपि कृतमस्ति।।७२।। अदृढं ज्ञानं, प्रमादेन सह श्रुतं, संदिग्धो मन्त्रः, तथा व्यग्रचित्तेन कृतोजपश्च विनश्यति।।७३।। वैष्णवरहितो देशः, सत्पात्ररहितं श्राद्धम्, आश्रोत्रियाय दत्तं दानम्, अनाचारग्रस्तं कुलं च विनश्यति।।७४।। गुरोर्वाक्येषु विश्वासः, भगवद्भागवताग्रे दासत्वभावः, मानसिकदोषाणां जयः, कथायां निश्चला मतिः, इत्येवमादिनियमानुसारं श्रवणं कृतं चेत् तदा श्रवणं सफलं भवेत्, एवं च पुनः श्रवणं कुर्युः, तदा वैकुण्ठे वासो ध्रुवमेव भविष्यति।।७५-७६।। हे गोकर्ण! स्वयं भगवान् गोविन्दो तुभ्यं वैकुण्ठवासं दास्यति एतावदुक्त्वा सर्वे हरेर्भक्ता वैकुण्ठं ययुः।।७७।। गोकर्ण पुनः श्रावणे मासि सप्ताहरूपां श्रीमद्भागवतकथां वाचयामास, पूर्वश्रोतृभिस्तच्छ्रवणं भूयः कृतम्, हे नारद! तत् कथा समाप्तौ यज्जातं श्रूयताम्।।७९।। भगवान् श्रीहरिः

पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः। गोकर्णं तु समालिङ्ग्याकरोत्स्वसदृशं हरिः।।८१।। श्रोतृनन्यान् घनश्यामान् पीतकौशेयवाससः। किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात्।।८२।। तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः। विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा।।८३।। प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः। गोकर्णेन स गोपालो गोलोकं गोपवल्लभम् । कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः।।८४।। अयोध्यावासिनः पूर्वं यथा रामेण संगताः। तथा कृष्णेन ते नीता गोलोकं योगिदुर्लभम्।।८५।। यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा। तं लोकं हि गतास्ते तु श्रीमद्भागवतश्रवात्।।८६।। ब्रूमोऽत्र ते किं फलवृन्दमुज्जवलं सप्ताहयज्ञेन कथासु संचितम्। कर्णेन गोकर्णकथाक्षरो यैः पीतश्च ते गर्भगता न भूयः।।८७।। वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः। योगैश्च संयान्ति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम्।।८८।।

।। सङ्ग्रहोक्तिः ।।

स्वभक्तैर्विमानैश्च सह तत्र तदाऽऽविर्बभूव, जय जय!!! नमोनमः!!! इति शब्दानां बहुल उद्घोषोऽभवत्।।८०।। स्वयं श्रीहरिस्तत्र हर्षात् पाञ्चजन्यध्वनिं चक्रे, ततः श्रीहरिर्गोकर्णं समालिङ्ग्य स्वसदृशमकरोत्।।८१।। तदा भगवान् श्रीहरिरन्यान् सर्वान् श्रोतृन् घनश्यामान् पीतकौशेषवाससः किरीटिनः कुण्डलिनश्च क्षणादेव चकार।।८२।। तस्मिन् ग्रामे आश्वचाण्डालपर्यन्ता ये जीवाः स्थिताः ते सर्वेऽपि हरिणा गोकर्णकृपया तदा विमानेषु स्थापिताः।।८३।। तत्पश्चात् ते सर्वे यत्र श्रीहरेर्लोके योगिनो गच्छन्ति तत्र ते प्रेषिताः, कथाश्रवतः प्रीतो भक्तवत्सलो भगवान् गोपालो गोकर्णेन सहितो गोपवल्लभं गोलोकं गन्तुं विमानेन निर्ययौ।।८४।। पूर्वं रामेण सह संगताः सर्व अयोध्यावासिनो यथा वैकुण्ठं गताः, तथा श्रीकृष्णेन सर्वे कथाश्रवणेन योगिदुर्लभं वैकुण्ठं नीताः।।८५।। यत्र सूर्याचन्द्रमसोर्गतिः कदाऽपि नाऽस्ति तं लोकं ते सर्वे श्रीमद्भागवतकथाश्रवणाद् गताः।।८६।। सप्ताहयज्ञेन कथासु संञ्चितं समुज्ज्वलं फलं तु तत् यत् स्वश्रोत्रेण गोकर्णोच्चारितकथाया अक्षरोऽपि पीतः, ते पुनः क्वापि गर्भगता न भविष्यन्ति।।८७।। श्रीमद्भागवतस्य कथासप्ताहश्रवणे श्रोतारो यां गतिं लभन्ते तां गतिं

इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः। पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ।।८९।। आख्यानमेतत्परमं पवित्रं श्रुतं सकृद्वै विदहेदघौघम्। श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं च ।।९०।।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये गोकर्णमोक्षवर्णनं नाम पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।।६।।

कुमारा ऊचु - अथ ते सम्प्रवक्ष्यामः सप्ताहश्रवणे विधिम्। सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ।।१।। दैवज्ञं तु समाहूय मुहूर्तं पृच्छ्य यत्नतः। विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् ।।२।। नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः। एते मासाः कथारम्भे श्रोतृणां मोक्षसूचकाः ।।३।।

।। सङ्ग्रहोक्तिः ।।

चिरकालसञ्चितैर्वाताम्बुपर्णाशनैर्देहशोषकैरुग्रैस्तपोभिर्योगैश्च तापसा योगिनश्च न लभन्ते ।।८८।। ब्रह्मानन्दमग्नश्चित्रकुटस्थो मुनीवरः शाण्डिल्योऽपि पुण्यमिममितिहासं पठति ।।८९।। एतत् परमं पवित्रमाख्यानं सकृत् श्रुतं चेत् तदा तत् सर्वं पापपुञ्जं विदहेत्, श्राद्धप्रसङ्गे पठितं चेत् पितृणामक्षय्यां तृप्तिमावहेत्, तदेतत् नित्यं सुपाठात्तु मोक्षं दद्यात् ।।९०।।

इति श्रीमद्भागवतमाहात्म्ये सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।।६।।

सप्ताहकथायज्ञः सविधिः

कुमारा ऊचुः - अथ ते श्रीमद्भागवतस्य सप्ताहश्रवणे विधिं सम्प्रवक्ष्यामः, प्रायः सहायकजनैर्धनैश्च साध्योऽयं सप्ताहयज्ञः कथ्यते ।।१।। प्रथमं प्रयत्नतो दैवज्ञं विप्रं समाहूय मुहूर्तं पृच्छ्य, स्वात्मजानां विवाहादिषु यादृशं वित्तादिकं संगृह्यात् तादृशमुपयुक्तं सर्वं परिकल्पयेत् ।।२।। श्रीमद्भागवतकथारम्भे शुचि-नभः-नभस्य-इष-ऊज-मार्गशीषा एते षण्मासाः श्रोतृणां मोक्षकारकाः सन्ति ।।३।।

मासानां विप्र हेयानि तानि त्याज्यानि सर्वथा। सहायाश्चेतरे तत्र कर्तव्याः सोद्यमाश्च ये।।४।। देशे देशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः। भविष्यन्ति कथा चात्र आगन्तव्यं कुटुम्बिभिः।।५।। दूरेहरिकथाः केचिद्दूरेचाच्युतकीर्तनाः। स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत्।।६।। देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः। तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम्।।७।। सतां समाजो भविता सप्तरात्रं सुदुर्लभः। अपूर्वरसरूपैव कथा चात्र भविष्यति।।८।। श्रीभागवतपीयूषपानाय रसलम्पटाः। भवन्तश्च तथा शीघ्रमायात प्रेमतत्पराः।।९।। नावकाशः कदाचिच्चेद्दिन-मात्रं तथापि तु। सर्वथाऽऽगमनं कार्यं क्षणोऽत्रैव सुदुर्लभः।।१०।। एवमाकारणं तेषां कर्तव्यं विनयेन च। आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत्।।११।। तीर्थे वापि वने वापि गृहे वा श्रवणं मतम्। विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलम्।।१२।। शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम्। गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत्।।१३।।

।। सङ्ग्रहोक्तिः ।।

हे विप्र! एतेषां मध्ये कुयोगादिना येऽनिष्टास्ते मासाः त्याज्या, अस्मिन् यज्ञे सोद्यमाः सोत्साहाश्च य इतरे जनास्ते सहायाः कर्तव्याः।।४।। देशे देशे प्रयत्नतः संवादः प्रेष्यः, यद् अत्र भागवतस्य कथा भविष्यति, सर्वैः सकुटुम्बमत्राऽऽगन्तव्यम्।।५।। केचित् स्त्रिशूद्रादयो हरेः कथायाः कीर्त्तनादिभ्यश्च बहिर्निर्गता भवन्ति, अतस्तेऽपि आकर्णनीयाः, यतस्तेषामपि बोधो भवेत्।।६।। देशे देशे ये विरक्ताः हरिकीर्त्तनोत्सुका वैष्णवा भवेयुः तेष्वपि निमन्त्रणपत्रं प्रेष्यम्।।७।। पत्रे लेख्यम् यद् अत्र कथायज्ञे सप्तरात्रं सुदुर्लभो सतां समाजो भविता, तथा चात्राऽपूर्वरसरूपा कथा भविष्यति।।८।। श्रीमद्भागवतामृतरसपानाय रसलोलुभाः प्रेमतत्परा भवन्तोऽत्र शीघ्र-मायान्तु।।९।। यदि सप्तरात्रं यावदवकाशोऽपि लभेत् चेत् एकं दिनमात्रं तु सर्वथाऽऽगमनं कार्यम्, अत्र कथायां क्षणावकाशोऽपि सुदुर्लभः।।१०।। एवं विनयेन तेषामाकारणं कर्त्तव्यम्, आगन्तुकानां तेषां सर्वेषां वासस्थानान्यपि कल्पयेत्।।११।। तीर्थे वने वा गृहे कथाश्रवणस्थानं कर्त्तव्यम्, यत्र वसुधा विशाला स्यात् तत्कथास्थलं कर्त्तव्यम्।।१२।। तत्र भूमेः शोधनं -

अर्वाक्पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत्। कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्ड-मण्डितः।।१४।। फलपुष्पदलैर्विष्वग्वितानेन विराजितः। चतुर्दिक्षु ध्वजारोपो बहु-सम्पद्विराजितः।।१५।। ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरम्। तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च।।१६।। पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम्। वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत्।।१७।। उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा। प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा।।१८।। अथवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः। श्रोतृणामागमे प्रोक्ता देशकालादिकोविदैः।।१९।। विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत्। दृष्टान्तकुशलो धीरो वक्ता कार्योऽति निःस्पृहः।।२०।। अनेकधर्मविभ्रान्ताः स्त्रैणाः पाखण्डवादिनः। शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः।।२१।। वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः। पण्डितः संशयच्छेत्ता लोकबोधनतत्परः।।२२।। वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग् व्रताप्तये। अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत्।।२३।।

॥ सङ्ग्रहोक्तिः॥

मार्जनं लेपनं रंगवल्यादिभिर्मण्डनं च कार्यम्, गृहोपस्करणानि संगृह्य गृहकोणे निवेशयेत् ।।१३।।पञ्चाहतोऽर्वाक् आस्तरणादीनि मेलयेत्, कदलीखण्डमण्डितः प्रोच्चैर्मण्डपः कर्त्तव्यः ।।१४।। स च विष्वक् फलपुष्पदलैर्वितानेन च विराजितः कर्त्तव्य, बहुसम्पद्विराजमानो ध्वजारोपस्तत्र कर्त्तव्यः।।१५।। किञ्चिदूर्ध्वानि सप्त स्थानानि विस्तृतानि कल्पनीयानि, तेषु विप्रा विरक्ताश्च प्रबोध्य स्थापनीयाः।।१६।। प्रथमं यथोत्तरं तेषामासनानि कर्त्तव्यानि, तदा तत्र वक्तुश्च दिव्यमासनं परिकल्पयेत्।।१७।। यदा वक्ता उदङ्मुखो भवेत् तदा मुख्यश्रोता प्राङ्मुख उपविशेत्, यदा वक्ता प्राङ्मुखः स्यात् तदा मुख्यः श्रोता उदङ्मुखो भवेत्।।१८।। अथवा पूज्यपूजक मध्यभागतः पूर्वदिग् ज्ञेया, देशकालाभिज्ञैः श्रोतृणां नियमाः प्रोक्ताः।।१९।। वेद-शास्त्रार्थानां बोधकः वैष्णवो विप्रो वक्ता कार्यः यो दृष्टान्तकुशलो धीरोऽतिनिःस्पृहश्च भवेत् ।।२०।।ये पण्डिता अपि यद्यनेकधर्मविभ्रान्ताः स्त्रैणाः पाखण्डिनश्च भवेयुस्ते श्रीमद्भागवतस्य वक्तृपदे त्याज्याः।।२१।। वक्तुः पार्श्वे तत्सहायार्थमन्यस्तथाविधः पण्डितः स्थाप्यः, यो श्रोतृणां

नित्यंसंक्षेपतः कृत्वा संध्याद्यं स्वं प्रयत्नतः। कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ।।२४।। पितृन् संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत्। मण्डलं च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा।।२५।। कृष्णमुद्दिश्य मन्त्रेण चरेत्पूजाविधिं क्रमात्। प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत् ।।२६।। संसारसागरे मग्नं दीनं मां करुणानिधे। कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ।।२७।। श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः। कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ।।२८।। ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत्। स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा ।।२९।। श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि। स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ।।३०।। मनोरथो मदीयोऽयं सफलः सर्वथा त्वया। निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ।।३१।। एवं दीनवचः प्रोच्य वक्तारं चाथ पूजयेत्। सम्भूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तवेत् ।।३२।।

।। सङ्ग्रहोक्तिः ।।

संशयच्छेत्ता लोकबोधनतत्परश्च भवेत् ।।२२।। वक्तृव्रतग्रहणाय वक्त्रा दिनादर्वाक् क्षौरं कर्त्तव्यम्, असौ वक्ताऽरुणोदये शौचं विधाय स्नानं समाचरेत् ।।२३।। नित्यं संध्याद्यं स्वं नियमं संक्षेपतः कृत्वा प्रयत्नतः कथाविघ्ननिवारणाय गणनाथं प्रपूजयेत् ।।२४।। पितृन् संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं कुर्यात्, एकं मण्डलं कृत्वा तन्मध्ये श्रीहरिः स्थाप्यः ।।२५।। तत्र श्रीकृष्णमुद्दिश्य क्रमात् मन्त्रेण पूजाविधिं चरेत्, पूजान्ते प्रदक्षिणां नमस्कारांश्च कृत्वा स्तुतिं कुर्यात् ।।२६।। हे करुणानिधे! संसारसागरे मग्नं दीनं कर्मग्राहगृहीताङ्गं मां भवार्णवात् समुद्धर ।।२७।। ततः प्रयत्नतः श्रीमद्भागवतस्याऽपि पूजा धूपदीपसमन्विता विधिना प्रीत्या कर्त्तव्या ।।२८।। ततः श्रीफलं समर्प्य नमस्कारं कुर्यात्, तदा प्रसन्नचेतसा केवलं स्तुतिः कर्त्तव्या ।।२९।। भवसागरात् समुद्धारार्थं मया श्रीमद्भागवताख्योऽयं प्रत्यक्षः श्रीकृष्ण एव स्वीकृतोऽस्ति ।।३०।। हे केशव! अहं तव दासोऽस्मि, अतस्त्वयाऽयं मदीयो मनोरथः सर्वथा निर्विघ्नतया सफलः कर्त्तव्यः ।।३१।। एवं दीनं वचः प्रोच्याऽथ वक्तारं पूजयेत्, तं वस्त्राभूषणैर्भूषयित्वा पूजान्ते तं स्तुवीत ।।३२।।

शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद। एतत्कथाप्रकाशेन मदज्ञानं विनाशय।।३३।। तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा। सप्तरात्रं यथाशक्त्या धारणीयः स एव हि।।३४।। वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये। कर्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षर-विद्यया।।३५।। ब्राह्मणान् वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः। नत्वा सम्पूज्य दत्ताज्ञः स्वयमासनमाविशेत्।।३६।। लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च। कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम्।।३७।। आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तकम्। वाचनीया कथा सम्यग्धीरकण्ठं सुधीमता।।३८।। कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयम्। तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा।।३९।। मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः। हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना।।४०।। उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा। घृतपानं पयःपानं कृत्वा वै शृणुयात्सुखम्।।४१।। फलाहारेण वा भाव्यमेकभुक्तेन वा पुनः। सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत्।।४२।।

।। सङ्ग्रहोक्तिः।।

हे शुकरूप! प्रबोधज्ञ! सर्वशास्त्रविशारद! एतत्कथाप्रकाशनेन मदज्ञानं विनाशय।।३३।। तत आत्मनः श्रेयसे तदग्रे मुदा नियमः कर्त्तव्यः स च सप्तरात्रं यावत् यथाशक्ति धारणीय एव ।।३४।। कथायां विघ्ननिवारणाय पञ्चविप्राणां वरणं कार्यं, ते च हरेर्द्वादशाक्षरमन्त्रस्य जपं कुर्यात्।।३५।। तथा ब्राह्मणान् वैष्णवानन्यान् कीर्त्तनकारिणश्च नत्वा सम्पूज्य च तैर्दत्ताज्ञो मुख्यश्रोता स्वकीय उत्तम आसन उपविशेत्।।३६।। यो लोकधन सम्पत्तिगृहपुत्रादीनां चिन्तां व्युदस्य शुद्धमतिः कथायां चित्तं स्थापयेत् स उत्तमं फलं लभेत।।३७।। धीमता वक्त्रा-ऽऽसूर्योदयसार्धप्रहरत्रयान्तं धीरकण्ठेन सम्यक् कथा वाचनीया।।३८।। मध्याह्ने घटिकाद्वयं कथाविरामः कर्त्तव्यः, तदा कथानुसारं वैष्णवैर्हरेर्गुणसंकीर्त्तनं कार्यम्।।३९।। कथार्थिना मलमूत्रजयार्थं हविष्यान्नेन सुखावहः स्वल्पाहारो ह्येकवारं कर्त्तव्यः।।४०।। यदि शक्तश्चेत्तदा सप्तरात्रमुपोष्य कथां शृणुयात्, घृतपानं वा दुग्धपानं कृत्वा यथासुखं शृणुयात्।।४१।। पुनः फलाहारेण एकभक्तेन वा श्रोत्रा भाव्यम्, यत् सुखसाध्यं भवेत् तद्धि कथाश्रवणाय कर्त्तव्यम् ।।४२।।

भोजनं तु वरं मन्ये कथाश्रवणकारकम्। नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि।।४३।। सप्ताहव्रतिनां पुंसां नियमाञ्छृणु नारद। विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ।।४४।। ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां च भोजनम्। कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती।।४५।। द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च। भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती।।४६।। कामं क्रोधं मदं मानं मत्सरं लोभमेव च। दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती।।४७।। वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा। स्त्रीराजमहतां निन्दा वर्जयेद्यः कथाव्रती।।४८।। रजस्वलान्त्यजम्लेच्छ-पतितव्रात्यकैस्तदा। द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती।।४९।। सत्यं शौचं दयां मौनमार्जवं विनयं तथा। उदारमानसं तद्वदेवं कुर्यात्कथाव्रती।।५०।। दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान्। अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम्।।५१।। अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका। स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः।।५२।। एतेषु विधिना श्रावे तदक्षयतरं भवेत्।

।। सङ्ग्रहोक्तिः।।

कथाश्रवणेऽनुकूलं भोजनं तु वरं मन्ये, यदि कथाश्रवणे विघ्नकरश्चेदुपवासो नोचितः।।४३।। हे नारद! सप्ताहश्रवणव्रतिनां पुंसां नियमाञ्छृणु, विष्णुदीक्षाविहीनानां कथाश्रवणेऽधिकारो नास्ति।।४४।। कथाव्रती सब्रह्मचर्यं भूमिशयनं पत्रावल्यां भोजनं च कुर्यात्, नित्यं भोजनं कथासमाप्तौ कुर्यात्।।४५।। द्विदलं, मधु, तैलं, गरिष्ठान्नं, भावदुष्टं, पर्युषितं चान्नं कथाव्रती जह्यात्।।४६।। कथाव्रती कामं, क्रोधं, मदं, मानं, मत्सरं, लोभं, दम्भं, मोहं, द्वेषं च सर्वथा दूरयेत्।।४७।। कथाव्रती वेद-वैष्णव-विप्राणां गुरु-गोव्रतिनां तथा स्त्री-राज-महतां च निन्दां सर्वथा वर्जयेत्।।४८।। कथाव्रती रजस्वला-ऽन्त्यज-म्लेच्छ-पतित-व्रात्यैस्तथा द्विजद्विड्भिर्वेदबाह्यैश्च न वदेत्।।४९।। सत्यं, शौचं, दयां, मौनम्, आर्जवं, विनयं तथोदारमानसं वर्तनं कथाव्रती कुर्यात्।।५०।। यो दरिद्रः, क्षयरोगी, निर्भाग्यः, पापकर्मा, अप्रजः, मोक्षार्थी च भवेत् स इमां कथां शृणुयात्।।५१।। या नारी अपुष्पा, काकवन्ध्या, वन्ध्या, मृतार्भका, स्रवद्गर्भा च भवेत्, तया प्रयत्नत इयं कथा श्रव्या।।५२।। यदि यथाविधि कथाश्रवणं कुर्यात्,

अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ।।५३।। एवं कृत्वा व्रतविधिमुद्यापनम-थाचरेत्। जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ।।५४।। अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः। श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ।।५५।। एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तदा। पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः ।।५६।। प्रसादतुलसीमाला श्रोतृभ्यश्चाथ दीयताम्। मृदङ्गताललितं कर्तव्यं कीर्तनं ततः ।।५७।। जयशब्दं नमःशब्दं शङ्खशब्दं च कारयेत्। विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम् ।।५८।। विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि। गृहस्थश्चेत्तदा होमः कर्तव्यः कर्मशान्तये ।।५९।। प्रतिश्लोकं तु जुहुयाद्विधिना दशमस्य च। पायसं मधु सर्पिश्च तिलान्नादिकसंयुतम् ।।६०।। अथवा हवनं कुर्याद्गायत्र्या सुसमाहितः। तन्मयत्वात्पुराणस्य परमस्य च तत्त्वतः ।।६१।। होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये। नानाच्छिद्रनिरोधार्थं न्यूनताधिकतानयोः ।।६२।। दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम्। तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ।।६३।।

।। सङ्ग्रहोक्तिः ।।

तर्हि फलमक्षय्यं भवेत्, इयं कथा दिव्याऽत्युत्तमा कोटियज्ञफलप्रदा चाऽस्ति ।।५३।। एवं यथाविधि कथाव्रतं कृत्वा, तदुद्यापनमाचरेत्, शुभफलाकाङ्क्षिभिस्तद् जन्माष्टमीव्रतवद् कर्त्तव्यम् ।।५४।। अकिञ्चनेषु भक्तेषु प्राय उद्यापनाग्रहो नास्ति, यतो निष्कामा वैष्णवा कथाश्रवणेनैव पूता भवन्ति ।।५५।। एवं सप्ताहयज्ञे समाप्ते जाते सति, तदा श्रोतृभिरतिभक्तिभावतः पुस्तकस्य वक्तुश्च पूजा कार्या ।।५६।। ततो वक्ता प्रसाद-तुलसी-पुष्पमालाश्च श्रोतृभ्यो दद्यात्, ततो मृदङ्गतालादिभिर्ललितं श्रीकृष्णकीर्त्तनं कर्त्तव्यम् ।।५७।। ततो जय... जय.. नमो नमः... इति शब्दान् शंखध्वनिं च कारयेत्, विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दद्यात् ।।५८।। श्रोता यदि विरक्तश्चेत् तर्हि स परेऽह्नि गीतापाठं कुर्यात्, गृहस्थश्चेत् तर्हि तेन कर्मशान्तये होमः कर्त्तव्यः ।।५९।। दशमस्कन्धस्य प्रतिश्लोकं तिलान्नादिसंयुतं पायसं मधु सर्पिश्च विधिना जुहुयात् ।।६०।। अथवा सुसमाहितः श्रोता श्रीमद्भागवतपुराणस्य तत्त्वतस्तन्मयत्वात् गायत्र्या हवनं कुर्यात् ।।६१।। बुधो होमेऽशक्तश्चेत् फलसिद्धये हौम्यद्रव्यं

द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः। दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वहेतवे ।।६४।। शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च। तत्रास्य पुस्तकं स्थाप्यं लिखितं ललिताक्षरम् ।।६५।। सम्पूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम्। वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ।।६६।। आचार्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः। एवं कृते विधाने च सर्वपापनिवारणे ।।६७।। फलदं स्यात्पुराणं तु श्रीमद्भागवतं शुभम्। धर्मकामार्थमोक्षाणां साधनं स्यान्न संशयः ।।६८।। *कुमारा ऊचुः* – इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि। श्रीमद्भागवतेनैव भुक्तिमुक्ती करे स्थिते ।।६९।। *सूत उवाचः* – इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथाम्। सर्वपापहरां पुण्यां भुक्तिमुक्तिप्रदायिनीम् ।।७०।। शृण्वतां सर्वभूतानां सप्ताहं नियतात्मनाम्। यथाविधि ततो देवं तुष्टुवुः पुरुषोत्तमम् ।।७१।। तदन्ते ज्ञानवैराग्यभक्तीनां पुष्टता परा। तारुण्यं परमं चाभूत्सर्वभूतमनोहरम् ।।७२।।

।। सङ्ग्रहोक्तिः ।।

विप्रेभ्यो दद्यात्, अनेकदोषनिवारणार्थं न्यूनाधिकशुद्ध्यर्थं च श्रोता श्रीविष्णुनामसहस्रकं स्तोत्रं पठेत्, तेन सर्वं सफलं भवेत्, यतोऽस्मात् स्तोत्रादधिकं किमपि नाऽस्ति ।।६२-६३।। पश्चात् कथाव्रतस्य पूर्तये श्रोता द्वादश ब्राह्मणान् मधुपायसैर्भोजयेत्, सुवर्णं धेनुं च दद्यात् ।।६४।। शक्तौ सत्यां पलत्रयमितं सुवर्णसिंहं विधाय ललिताक्षरं लिखितं पुस्तकं तदुपरि स्थाप्यं, तत आवाहनाद्यैस्तदुपचारैः सम्पूज्य सदक्षिणं तत् पुस्तकं वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने आचार्याय दत्त्वा सर्वपापनिवारण एवं विधाने कृते सति सुधीः श्रोता भवबन्धनात् मुक्तः स्यात् ।।६५-६७।। एवं कृते सति शुभं श्रीमद्भागवतं पुराणं फलप्रदं स्यात्, धर्मार्थकाममोक्षाणां च साधनं स्यात् नाऽत्र संशयः ।।६८।। *कुमारा ऊचुः* – हे नारद! इत्थं तुभ्यं सर्वं कथितम्, भूयः किं श्रोतुमिच्छसि, श्रीमद्भागवतेन भुक्तिर्मुक्तिश्च करस्थिते वर्तेते ।।६९।। *सूत उवाच* – इत्युक्त्वा ते महात्मानः कुमाराः सर्वपापहरां पुण्यां भुक्तिमुक्तिप्रदायिनीं भागवतीं कथां प्रोचुः ।।७०।। नियतात्मभिः सर्वभूतैः सप्ताहविधिना श्रीमद्भागवतस्य कथा श्रुता, ततः सर्वे देवं पुरुषोत्तमं तुष्टुवुः ।।७१।। तदन्ते भक्तिज्ञानवैराग्याणां परा पुष्टिर्जाता, तथैव तेषां सर्वभूतमनोहरं परमं

नारदश्च कृतार्थोऽभूत्सिद्धे स्वीये मनोरथे पुलकीकृतसर्वाङ्गः परमानन्दसम्भृतः ।।७३।। एवं कथां समाकर्ण्य नारदो भगवत्प्रियः। प्रेमगद्गदया वाचा तानुवाच कृताञ्जलिः।।७४।। *नारद उवाचः*- धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिः करुणापरैः। अद्य मे भगवाल्लब्धः सर्वपापहरो हरिः।।७५।। श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः। वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते।।७६।। *सूत उवाचः* - एवं ब्रुवति वै तत्र नारदे वैष्णवोत्तमे। परिभ्रमन् समायातः शुको योगेश्वरस्तदा।।७७।। तत्रायययौ षोडशवार्षिकस्तदा व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः। कथावसाने निज-लाभपूर्णः प्रेम्णा पठन् भागवतं शनैः शनैः।।७८।। दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददुर्महासनम् । प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितोऽवदत्संशृणु-तामलां गिरम्।।७९।। *श्रीशुक उवाच* - निगमकल्पतरोर्गलितं फलं शुकमुखादमृत-द्रवसंयुतम्। पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः।।८०।। धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।

।। सङ्ग्रहोक्तिः ।।

तारुण्यं चाऽभूत्।।७२।।स्वीये मनोरथे सिद्धे सति नारदोऽपि पुलकीकृतसर्वाङ्गः परमानन्द-सम्भृतः सन् कृतार्थोऽभूत्।।७३।। भगवत्प्रियो नारद एवं कथां समाकर्ण्य कृताञ्जलिः सन् प्रेमगद्गदया तान् कुमारानुवाच।।७४।। *नारद उवाच* - करुणापरैर्भवद्भिरनुगृहीतोऽहं धन्योऽस्मि, सर्वपापहरो भगवान् हरिरद्य मया लब्धः।।७५।। हे तपोधनाः! श्रीमद्भागवतकथाश्रवणमहं सर्वधर्मेभ्यो वरं मन्ये, यस्य श्रवणाद् वैकुण्ठस्थो भगवान् कृष्णो लभ्यते।।७६।। *सूत उवाच* - वैष्णवोत्तमे नारद एवं वदति सति ज्ञानमहाब्धिचन्द्रमाः षोडशवर्षीयो व्यासात्मजः शुक आययौ, यो निजलाभपूर्णः सन् शनैः शनैः प्रेम्णा भागवतं पठन्नासीत्।।७८।। अत्यन्ततेजस्विनं शुकं दृष्ट्वा सर्वे सदस्याः समुत्थाय नत्वा च तं महासनं ददुः, देवर्षिः प्रीत्या तमपूजयत्, ततः सुखं स्थितः सन् स निर्मलां गिरमवदत्, तां संशृणुत।।७९।। *श्रीशुक उवाच* - अहो, हे रसज्ञाः! भावुकाः! श्रीमद्भागवतं वेदरूपकल्पतरो रसवत् फलं मोक्षरूपसारांशयुतं शुकमुखाद्

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ।।८१।। श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन् पारमहंस्यमेवममलं ज्ञानं परं गीयते। यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ।।८२।। स्वर्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः । अतः पिबन्तु सद्भाग्या मा मा मुञ्चत कर्हिचित् ।।८३।। *सूत उवाच* – एवं ब्रुवाणे सति बादरायणौ मध्ये सभायां हरिराविरासीत्। प्रह्लाद-बल्युद्धवफाल्गुनादिभिर्वृतः सुरर्षिस्तमपूजयच्च तान् ।।८४।। दृष्ट्वा प्रसन्नं महदासने हरिं ते चक्रिरे कीर्तनमग्रतस्तदा। भवो भवान्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ।।८५।। प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्तार्जुनोऽभूत्। इन्द्रोऽवादीन्मृदङ्गं जयजयसुकराः कीर्तने ते कुमारा यत्राग्रे भाववक्ता सरसरचनया व्यासपुत्रो बभूव ।।८६।।

।। सङ्ग्रहोक्तिः ।।

भुवि गलितमस्ति, अतो मोक्षपर्यन्तमिदं मुहुर्मुहुः पिबत – श्रवणद्वाराऽऽस्वादयत ।।८०।। महामुनिना व्यासेन रचितेऽस्मिन् भागवते पुराणे निर्मत्सराणां सत्पुरुषाणां कपटवर्जितः परमो धर्मो वर्णितोऽस्ति, अत्र सतां वेद्यं कालत्रयेऽप्यपरिणामि महामङ्गलप्रदम् आध्यात्मिकादि-तापत्रयनिवारकं वस्तु परमात्मस्वरूपं प्रोक्तमस्ति व्यासरचितेऽस्मिन् श्रीमद्भागवते श्रुते सति कृतकृत्यैः श्रोतृजनैः सद्य एव श्रीकृष्णो हृदि साक्षात् समीक्ष्यते, अतस्तद्भिन्नैः शास्त्रैः श्रुतैः किम् ।।८१।। श्रीमद्भागवतं पुराणतिलकं वैष्णवानां परं धनं वर्तते, यस्मिन् परमहंसैः प्राप्यं परं ज्ञानं कथ्यते, तथा ज्ञानविरागभक्तिसहितो निष्कामधर्म आविष्कृतोऽस्ति, तस्मात् कारणात् तच्छ्रवणपठनविचारणपरो नरो निष्कामभक्त्या मुक्तिं प्राप्नोति ।।८२।। भागवतोक्तभक्तिरसः स्वर्गे सत्यलोके कैलासे वैकुण्ठे च नास्ति, अतः सद्भाग्या मानवा तं रसं सततं पिबन्तु, कर्हिचित् मा मुञ्चत ।।८३।। सूत उवाच – एवं शुके वदति सति सभायां प्रह्लाद-बलि-उद्धवार्जुनादिभिर्वृतः श्रीहरिराविरासीत्, देवर्षिर्नारदस्तानपूजयच्च ।।८४।। महासने विराजमानं

ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम्। अलौकिकं कीर्तन-मेतदीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्तत्॥८७॥ मत्तो वरं भाववृताद् वृणुध्वं प्रीतः कथाकीर्तनतोऽस्मि साम्प्रतम्। श्रुत्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते॥८८॥ नगाहगाथासु च सर्वभक्तैरेभिस्त्वया भाव्यमितिप्रयत्नात्। मनोरथोऽयं परिपूरणीयस्तथेति चोक्त्वान्तरधीयताच्युतः॥८९॥ ततोऽनमत्त-च्चरणेषु नारदस्तथा शुकादीनपि तापसांश्च। अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथामृतास्ते॥९०॥ भक्तिः सुताभ्यां सह रक्षिता सा शास्त्रे स्वकीयेऽपि तदा शुकेन। अतो हरिर्भागवतस्य सेवनाच्चित्तं समायाति हि वैष्णवानाम्॥९१॥ दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानाम्। संसारसिन्धौ परिपातितानां क्षेमाय वै भागतवतं प्रगर्जति॥९२॥

॥ सङ्ग्रहोक्तिः॥

हरिं प्रसन्नं दृष्ट्वा ते सर्वे तदग्रे कीर्त्तनं चक्रिरे, तदा तत्कीर्त्तनदर्शनाय भवान्या सह भवः कमलासनश्च तत्राऽऽगमत्॥८५॥ तद्धरिकीर्त्तने तरलगतितया प्रह्लादस्तालधारी, उद्धवः कांस्यधारी, देवर्षिर्नारदो वीणाधारी, अर्जुनः स्वरकुशलतया गायकोऽभवत्, तस्मिन् संकीर्त्तने इन्द्रो मृदङ्गमवादीत् सनकादयः कुमारा जय जय!!! इति सुस्वरमूचुः, यस्मिन् संकीर्त्तनेऽग्रे सरसवाण्या भाववक्ता शुको बभूव॥८६॥ तत्र तेजस्विनां भक्तिज्ञानविरागाणां त्रिकं मध्ये ननर्त, एतद् दिव्यं संकीर्त्तनमवेक्ष्य प्रसन्नः श्रीहरिस्तान् वचोऽब्रवीत्॥८७॥ भवतां कथाकीर्त्तनतोऽहं सांप्रतं प्रसन्नोऽस्मि, अतो भाववशात् मत्तो वरं वृणुध्वम्, तद्वाक्यं श्रुत्वाऽत्यन्तं प्रसन्नाः प्रेमार्द्रचित्तास्ते श्रीहरिमूचिरे॥८८॥ हे भगवन्! भागवतकथासप्ताह एभिः सर्वैः त्वद्भक्तैः सह त्वया यत्नतोऽवश्यमागन्तव्यम्, अस्माकमयं मनोरथस्त्वया पूरणीयः, तदा "तथाऽस्तु" इत्यभिधाय हरिरन्तरधीयत॥८९॥ ततो नारदस्तच्चरणेष्वनमत्, तथा शुकादीन् तापसांश्चाऽनमत्, अथ परिनष्टमोहाः कथामृतपानकर्तारः प्रहृष्टाः सन्तः सर्वे ययुः॥९०॥ शुकेन सुताभ्यां ज्ञानविरागाभ्यां सहिता भक्तिः स्वकीये श्रीमद्भागवतशास्त्रे रक्षिता, अतो भागवतस्य सेवनाद्धरिर्वैष्णवानां चित्ते समावसति॥९१॥ दारिद्र्यदुःखेन दग्धानां, मायापिशाच्या

शौनक उवाच – शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः । सुरर्षये कदा ब्राह्मैश्छिन्धि मे संशयं त्विमम् ।।९३।। *सूत उवाच* – आकृष्णनिर्गमात्त्रिंशद्वर्षाधिकगते कलौ। नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत् ।।९४।। परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये। शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथाम् ।।९५।। तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते सति। ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ।।९६।। इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयानघ। कलौ भागवती वार्ता भवरोगविनाशिनी ।।९७।। कृष्णप्रियं सकलकल्मषनाशनं च मुक्त्येकहेतुमिह भक्तिविलासकारी। सन्तः कथानकमिदं पिबतादरेण लोके हि तीर्थपरिशीलनसेवया किम् ।।९८।। स्वपुरुषमपि वीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ।परिहर भगवत्कथासु मत्तान् प्रभुरहमन्यनृणां न वैष्णवानाम् ।।९९।। असारे संसारे विषयविषसङ्गाकुलधियः क्षणार्धं क्षेमार्थं पिबत शुकगाथातुलसुधाम्। किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ।।१००।।

।। सङ्ग्रहोक्तिः ।।

परिमर्दितानां संसारसिंधौ पतितानां जनानां क्षेमाय श्रीमद्भागवतं प्रगर्जति ।।९२।। *शौनक उवाच* – कुमारैर्नारदाय, गोकर्णेन धुन्धुकारिणे, शुकेन परीक्षिते च भागवतामृतं कदा कथितम्? इमं प्रश्नं ब्रूहि ।।९३।। *सूत उवाच* – श्रीकृष्णस्य स्वधामगमनानन्तरं त्रिंशद्वर्षाधिके कलौ गते सति भाद्रपदे शुक्लनवमीतः शुकः परीक्षिते कथारम्भमकरोत् ।।९४।। परीक्षिच्छ्रवणानन्तरं कलौ वर्षशतद्वयेऽतीत आषाढशुक्ल नवमीतो गोकर्णो धुन्धुकारिणे कथामकथयत् ।।९५।। तत्समयानन्तरं कलेस्त्रिशद्वर्षे गते सति कार्त्तिकशुक्लनवमीतो ब्रह्मणः सुताः कुमारा ज्ञानवैराग्यभक्तीनां परिपुष्टये नारदाय कथामकथयत ।।९६।। हे अनघ! त्वया यत् पृष्टं तत् सर्वं मया तुभ्यं समाख्यातं "कलौ भागवती कथा भवरोगविनाशिनी:" इति ।।९७।। श्रीकृष्णस्य प्रियं, सकलपापविनाशनं, मोक्षैकहेतुं भक्तिविलासकारीदं श्रीमद्भागवतामृतमस्ति, अतः हे सन्तः! आदरेण तत् पिबत, अन्यतीर्थपरिशीलनसेवया किम्? ।।९८।। यमः पाशहस्तं स्वपुरुषं

रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा । कण्ठे सम्बध्यते येन स वैकुण्ठप्रभुर्भवेत् ।।१०१।। इति च परमगुह्यं सर्वसिद्धान्तसिद्धं सपदि निगदितं ते शास्त्रपुञ्जं विलोक्य। जगति शुककथातो निर्मलं नास्ति किंञ्चित् पिब परसुखहेतोर्द्वादश-स्कन्धसारम् ।।१०२।। एतां यो नियततया शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे। तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्न हि भुवने किमप्यसाध्यम् ।।१०३।।

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये श्रवणविधिकथनं नाम षष्ठोऽध्यायः ।।६ ।।

।। समाप्तमिदं श्रीमद्भागवतमाहात्म्यम् ।।

।। सङ्ग्रहोक्तिः ।।

वीक्ष्य तस्य कर्णमूलेऽवदत्, हे दूत! त्वं भागवतकथासु प्रसक्तान् भक्तान् सर्वथा परिहर, अहमन्यनृणां शास्ताऽस्मि, वैष्णवानां न ।।९९।। अस्मिन्नसारे संसारे विषयविषेण व्याकुलधियः! हे जनाः! स्वस्य कल्याणार्थं क्षणार्धमपि भागवतामृतं पिबत, कुत्सितकथामये कुमार्गे किमर्थं व्यर्थं व्रजत? कथाश्रवणेन मुक्तिर्भवति, इत्यर्थविषये राजा परीक्षित्साक्षिरूपेऽस्ति ।।१००।। भक्तिरसप्रवाहसंस्थेन शुकेन भागवती कथा कथिताऽस्ति, यः पुमान् तां कथां कण्ठस्थां कुर्यात् स वैकुण्ठगमने शक्तो भवेत् ।।१०१।। सर्वसिद्धान्तेषु सिद्धं परमगुह्यं सपदि शास्त्रसंघं विलोक्य ते भागवतं शास्त्रं कथितम्, जगति शुकशास्त्रतोऽन्यत् किञ्चिन्निर्मलं नाऽस्ति, अतो मोक्षरूपपरमसुखप्राप्त्यै द्वादशस्कन्धरूपं सारं पिबत ।।१०२।।। यः पुमान् भागवतीं कथां नियमिततया श्रद्धया शृणोति, यश्च शुद्धवैष्णवानामग्र एतां कथां कथयति, तावुभौ सम्यग् विधिकरणाद् यथार्थं फलं लभेते, तयोः कृते जगति किमप्यसाध्यं नास्ति ।।१०३।।

इति श्रीमद्भागवतमाहात्म्ये सङ्ग्रहोक्त्यां षष्ठोऽध्यायः ।।६ ।।

।। समाप्तमिदं श्रीमद्भागवतमाहात्म्यम् ।।

श्रीमद्भागवतमाहात्म्यम्

(स्कन्दपुराणे, विष्णुखण्ड)

श्रीमद्भागवतं नाम पुराणं लोकविश्रुतम्।
शृणुयाच्छ्रद्धया युक्तो मम सन्तोषकारणम्।।१।।
नित्यं भागवतं यस्तु पुराणं पठते नरः।
प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम्।।२।।
श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम्।
पठते शृणुयाद् यस्तु गोसहस्रफलं लभेत्।।३।।
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं सुत।
अष्टादशपुराणानां फलमाप्नोति मानवः।।४।।
नित्यं मम कथा यत्र यत्र तिष्ठन्ति वैष्णवाः।
कलिबाह्या नरास्ते वै येऽर्चयन्ति सदा मम।।५।।
वैष्णवानां तु शास्त्राणि येऽर्चयन्ति गृहे नराः।
सर्वपापविनिर्मुक्ता भवन्ति सुरवन्दिताः।।६।।
येऽर्चयन्ति गृहे नित्यं शास्त्रं भागवतं कलौ।
आस्फोटयन्ति वल्गन्ति तेषां प्रीतो भवाम्यहम्।।७।।
यावद्दिनानि गृहे पुत्र शास्त्रं भागवतं गृहे।
तावत् पिबन्ति पितरः क्षीरं सर्पिर्मधूदकम्।।८।।
यच्छन्ति वैष्णवे भक्त्या शास्त्रं भागवतं हि ये।
कल्पकोटिसहस्राणि मम लोके वसन्ति ते।।९।।
येऽर्चयन्ति सदा गेहे शास्त्रं भागवतं नराः।
प्रीणितास्तैश्च विबुधा तावदाभूतसंप्लवम्।।१०।।
श्लोकार्धं श्लोकपादं वा वरं भागवतं गृहे।
शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसंग्रहैः।।११।।
न यस्य तिष्ठते शास्त्रं गृहे भागवतं कलौ।
न तस्य पुनरावृत्तिर्याम्यपाशात् कदाचन।।१२।।
कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ।
गृहे न तिष्ठते यस्य श्वपचादधिको हि सः।।१३।।
सर्वस्वेनापि लोकेश कर्तव्यः शास्त्रसंग्रहः।
वैष्णवस्तु सदा भक्त्या तुष्ट्यर्थं मम पुत्रक।।१४।।
यत्र यत्र भवेत् पुण्यं शास्त्रं भागवतं कलौ। तत्र
तत्र सदैवाहं भवामि त्रिदशैः सहः।।१५।।
तत्र सर्वाणि तीर्थानि नदीनदसरांसि च।
यज्ञाः सप्तपुरी नित्यं पुण्याः सर्वे शिलोच्चयाः।।१६।।
श्रोतव्यं मम शास्त्रं हि यशोधर्मजयार्थिना।
पापक्षयार्थं लोकेश मोक्षार्थं धर्मबुद्धिना।।१७।।
श्रीमद्भागवतं पुण्यमायुरारोग्यपुष्टिदम्।
पठनाच्छ्रवणाद् वापि सर्वपापैः प्रमुच्यते।।१८।। न
शृण्वन्ति न हृष्यन्ति श्रीमद्भागवतं परम्। सत्यं सत्यं
हि लोकेश तेषां स्वामी सदा यमः।।१९।।
न गच्छति यदा मर्त्यः श्रोतुं भागवतं सुत।
एकादश्यां विशेषेण नास्ति पापरतस्ततः।।२०।।
श्लोकं भागवतं चापि श्लोकार्धं पादमेव वा।
लिखितं तिष्ठते यस्य गृहे तस्य वसाम्यहम्।।२१।।
सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम्।
न तथा पावनं नृणां श्रीमद्भागवतं यथा।।२२।।
यत्र यत्र चतुर्वक्त्रः श्रीमद्भागवतं भवेत्।
गच्छामि तत्र तत्राहं गौर्यथा सुतवत्सला।।२३।।
मत्कथावाचकं नित्यं मत्कथाश्रवणे रतम्।
मत्कथाप्रीतमनसं नाहं त्यक्ष्यामि तं नरम्।।२४।।
श्रीमद्भागवतं पुण्यं दृष्ट्वा नोत्तिष्ठते हि यः।
सांवत्सरं तस्य पुण्यं विलयं याति पुत्रक।।२५।।
श्रीमद्भागवतं दृष्ट्वा प्रत्युत्थानाभिवादनैः।
सम्मानयेत तं दृष्ट्वा भवेत् प्रीतिर्ममातुला।।२६।।
दृष्ट्वा भागवतं दूरात् प्रक्रमेत् सम्मुखं हि यः।
पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम्।।२७।।
उत्थाय प्रणमेद् यो वै श्रीमद्भागवतं नरः।
धनपुत्रांस्तथा दारान् भक्तिं च प्रददाम्यहम्।।२८।।
महाराजोपचारैस्तु श्रीमद्भागवतं सुत।
शृण्वन्ति ये नरा भक्त्या तेषां वश्यो भवाम्यहम्।।२९।।
ममोत्सवेषु सर्वेषु श्रीमद्भागवतं परम्।
शृण्वन्ति ये नरा भक्त्या मम प्रीत्यै च सुव्रत।।३०।।
वस्त्रालङ्कारणैः पुष्पैर्धूपदीपोपहारकैः।
वशीकृतो ह्यहं तैश्च सत्स्त्रिता सत्पतिर्यथा।।३१।।

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम्।।

सङ्ग्रहोक्तिटीकासहितम्

प्रथम स्कन्धः

अथ प्रथमोऽध्यायः

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्;
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा;
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।।१।।

।। सङ्ग्रहोक्तिः ।।

मङ्गलम्, श्रीमद्भागवतविषये सूतं प्रति शौनकादीनां प्रश्नाः

श्रीमद्ब्रह्मपुराधिपः श्रुतिशतोद्गीतप्रभावः परो
मायायाः प्रकटः सदाश्रितजनैः स्वान्ते समीक्ष्यश्च यः।
नैकाण्डाश्रितजीवजातहितकृत्सङ्कल्प ईशेश मे,
स्वामी त्वं हृदये विधत्स्व वसतिं धर्मात्मजः श्रीहरिः।।१।।
विधौ भैक्ष्यं स्याद्वा शतनियुतशो वृश्चिकभवा,
व्यथा मे स्याद् भक्ता अशनवसनैस्ते बहुसुखाः।
गुरोर्वृत्वेत्थं यः शरणमहिमानं प्रथितवान्,
शरण्युः पायान् मां हरिरखिलजीवार्त्तिशमनः।।२।।
नित्यं जुष्टो गुणौघैरगणितसुभगैः प्रत्यनीकश्च हेयैः,
मुक्तानन्दादिसद्भिः प्रवचनपटुभिः स्तूयमानः सभायाम्।
दिव्यैर्वाक्यामृतैः स्वैरभयसुतगृहे तर्पयन् भक्तवृन्दान्;
स्वोपास्यः श्रीहरिर्नै दृशि जयतु सदा धर्मसूनुः सदीशः।।३।।
स्वामिनारायणो नीलकण्ठो नारायणो हरिः। हरिकृष्णश्च सहजानन्दः कृष्णोऽस्तु मे हृदि।।४।।
नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जय मुदीरयेत्।।५।।

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां;
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः ;
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्।।२।।

सङ्ग्रहोक्तिः

श्रीभगवत्प्रसादार्यैः श्रीमद्भागवतस्य या।
कृतान्वयार्थबोधिनी भक्तमानसरञ्जनी।।६।।
तां टीकामनुसृत्यैव सङ्ग्रहोक्तिं समीहते,
त्रिक्रमपादपांसूनां सेवी ज्ञानप्रकाशकः।।७।।
श्रीमद्धर्मसुतं निधाय हृदये या सङ्ग्रहोक्तिः शुभा,
साकारत्वविबोधिनी भगवतो टीका मया संस्कृता।
श्रीमद्भागवतस्य मे हृदयगा कालेन दीर्घेण सा,
साधूनां विदुषां समृद्धहृदये संराजतां सर्वदा।।८।।

अर्थेषु प्रकृतिपुरुषतत्कार्यभूतेषु देवमनुष्यादिषु अन्वयात् अनुवृत्तिं प्राप्य सर्वदा वर्तमानात् इतरतश्च प्रकृतिपुरुषतत्कार्यनियन्तृतया पृथगेवावस्थितात् यतः परमेश्वरात् अस्य विश्वस्य जन्मस्थितिलया जायन्ते, यः सर्वज्ञः स्वराट् च भवति, यो ब्रह्मणे स्वमनः- संकल्पेन वेदं ददौ, यत्र ज्ञानवन्त उपासका अपि मुह्यन्ति, तेजोवारिमृदां विनिमयः त्रिवृत्कारणमपि येन कृतम्, यत्र परमात्मनि सत्त्वादिगुणत्रयकृतः सर्गः प्रपञ्चः मृषा=मिथ्या नास्ति, स्वेन प्रभावेण सर्वदा मायाकुहकवर्जितं सत्यं कालत्रयेष्वप्यबाधितस्वरूपं, तं परमात्मनं वयं ध्यायेम।।१।।
शास्त्रान्तरेभ्यो भागवतस्य श्रेष्ठत्वं दर्शयति - महामुनिना व्यासेन रचितेऽस्मिन् भागवते पुराणे निर्मत्सराणां सत्पुरुषाणां कपटवर्जितः परमो धर्मो वर्णितोऽस्ति, अत्र सतां वेद्यं कालत्रयेऽप्यपरिणामि महामङ्गलप्रदं आध्यात्मिकादितापत्रयनिवारकं वस्तु परमात्मस्वरूपं प्रोक्तमस्ति, व्यासेन रचितेऽस्मिन् श्रीमद्भागवते श्रुते सति कृतकृत्यैः श्रवणकर्तृजनैः सद्य एव परमेश्वरः श्रीकृष्णो हृदि साक्षात् समीक्ष्यते, तद्भिन्नैः शास्त्रैः श्रुतैः किम्?।।२।।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्। पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः।।३।। नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः। सत्रं स्वर्गाय लोकाय सहस्रसममासत।।४।। त एकदा तु मुनयः प्रातर्हुतहुताग्नयः। सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात्।।५।। *ऋषय ऊचुः* – त्वया खलु पुराणानि सेतिहासानि चानघ। आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत।।६।। यानि वेदविदां श्रेष्ठो भगवान् बादरायणः। अन्ये च मुनयः सूत परावरविदो विदुः।।७।। वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्। *ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत*।।८।। तत्र तत्राञ्जसाऽऽयुष्मन् भवता यद्विनिश्चितम्। पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि।।९।। प्रायेणाल्पायुषः साधो कलावस्मिन् युगे जनाः। मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः।।१०।। भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः।

सङ्ग्रहोक्तिः

भागवतं सर्वशास्त्रसाररूपमतः परमश्रद्धया सेव्यमित्याह – हे रसज्ञा भावुकाः! श्रीमद्भागवतं वेदरूपकल्पतरो रसवत् फलं, मोक्षरूपसारांशयुतं शुकमुखाद् भुवि गलितमस्ति, अतो मोक्षपर्यन्तमिदं मुहुर्मुहुः पिबत – श्रवणद्वाराऽऽस्वादयत।।३।। अथ शास्त्रारम्भं कुर्वन्नाह – मनोमयचक्रधाराकुण्ठके नैमिषारण्यनामके विष्णुक्षेत्रे शौनकादय ऋषयो निरतिशयानन्द-मयपरमपदप्राप्तये सहस्रसंवत्सरसाध्यं ज्ञानसत्रमनुष्ठितवन्तः।।४।। एकदा ते शौनकादयो ऋषयः प्रातरग्नौ होमं कृत्वोपविष्टं सत्कृतं रोमहर्षणपुत्रमुग्रश्रवसं सादरमिदं पप्रच्छुः।।५।। हे निष्पाप! सूत! वेदविदां मूर्धन्यो व्यासोऽन्ये च सर्वज्ञा मुनयो यानीतिहाससहितानि पुराणानि धर्मशास्त्राणि च जानन्ति तानि सर्वाणि त्वयाऽधीतानि सन्ति।।६-७।। हे साधो! व्यासादीनामनुग्रहात् तत्सर्वं यथार्थतः त्वं सम्यग् जानासि, यतः स्नेहयुक्तस्य शिष्यस्य पुरतो गुरवो गुह्यविद्यामपि ब्रूयुः।।८।। प्रथम प्रश्नः – हे आयुष्मन्! तेषु पुराणादिषु पुंसां यत् श्रेयः साधनं त्वया तत्त्वतो निर्णीतं स्यात् तन्नो शंसितुमर्हसि।।९।। हे सौम्य! अस्मिन् कलौ युगे जना बहुधाऽल्पायुषः प्रमादिनो मन्दबुद्धयो भाग्यहीना रुग्णाश्च भवन्ति।।१०।।

अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया। ब्रूहि नः श्रद्दधानानां येनात्मा सुप्रसीदति।।११।। सूत जानासि भद्रं ते भगवान् सत्वतां पतिः। देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया। तन्नः शुश्रूषमाणानामर्हस्यङ्गानुवर्णितुम् ।।१२।। यस्यावतारो भूतानां क्षेमाय विभवाय च। आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्। ततः सद्यो विमुच्येत यद्बिभेति स्वयं भवः।।१३।। यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः। सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया।।१४।। को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः। शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ।।१५।। तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः। ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः।।१६।। अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः। लीला विदधतः स्वैरमीश्वरस्यात्ममायया।।१७।। वयं तु न वितृप्याम उत्तमश्लोकविक्रमे। यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे।।१८।।

सङ्ग्रहोक्तिः

श्रोतव्यानि तु बहूनि शास्त्राणि सन्ति, तर्हि हे साधो! अत्र यत् सारं तत् स्वबुद्ध्या संक्षेपं कृत्वा नः कथय, येनाऽऽत्मा प्रसीदति।।११।। द्वितीयः प्रश्नः - हे सूत! तव कल्याणमस्तु यदर्थं भक्तवत्सलो भगवान् विष्णुर्वसुदेवतो देवक्यां जातस्तत् त्वं जानासि।।१२।। तस्य भगवतश्चरित्रं नः कथय, घोरां संसृतिमापन्नो नरो यन्नाम समुच्चरन् सन् संसृतेर्मुक्तिं लभते, यस्य नाम्नः प्रभावात् स्वयं संसारोऽपि बिभेति।।१३।। यच्चरणारविंदमननशीलाः साधवो चरणस्पर्शमात्रादेव जनान् सद्यः पुनन्ति, गङ्गाजलं तु चिरकालं सेवनात् पुनाति।।१४।। पवित्रयशसः स्तुत्यचरितस्य च भगवतः कृष्णस्य कलिमलविनाशकं यशः को वा शुद्धिकामः पुरुषो न शृणुयात्।।१५।। तृतीयः प्रश्नः - लीलया विविधानि रूपाणि धारयतो भगवतश्चरित्राणि नारदादिमुनिभिरपि गीतानि सन्ति, तानि सर्वाण्युदाराणि चरितानि श्रद्धावतां नो ब्रूहि।।१६।। चतुर्थ प्रश्नः - हे धीमन्! स्वेच्छया वा आश्चर्यमय्या स्वशक्त्या यथेष्टं प्रलयजलविहारादिका लीला विदधतः हरेः शुभा अवतारकथा अपि नः कथय।।१७।। पवित्रकीर्तेर्हरेश्चरित्रश्रवणे वयं तृप्तिं न प्राप्नुयाम, यत् चरित्रं शृण्वतां रसज्ञानां नः प्रतिशब्दं नितान्तं स्वादु भवति।।१८।।

कृतवान् किल वीर्याणि सह रामेण केशवः। अतिमर्त्यानि भगवान् गूढः कपटमानवः।।१९।। कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्। आसीना दीर्घसत्रेण कथायां सक्षणा हरेः।।२०।। त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षताम्। कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवम्।।२१।। ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि। स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः।।२२।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः।।२।।

व्यास उवाच - इति सम्प्रश्नसंहृष्टो विप्राणां रौमहर्षणिः। प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे।।१।। *सूत उवाच - यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव। पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि।।२।।*

सङ्ग्रहोक्तिः

पञ्चमः प्रश्नः - कपटमानुषो भगवान् कृष्णो बलरामेण सह यान्यलौकिकानि वीर्याणि कृतवान् तानि वद।।१९।। कलिमागतं विज्ञायाऽस्मिन् वैष्णवे क्षेत्रे दीर्घज्ञानसत्रमिषेण हरेः कथां श्रोतुकामा वयमुपविष्टाः स्मः।।२०।। यथा समुद्रं तर्तुमिच्छतां नाविकः प्राप्तो भवति तथा दुस्तरं कलिं तर्तुमिच्छतामस्माकं त्वमिदानीमीश्वरेणैव संदर्शितोऽसि।।२१।। षष्ठः प्रश्नः - ब्राह्मणरक्षके धर्मगोप्तरि योगेश्वरे कृष्णे स्वस्वरूपं गते सति धर्मः कं शरणं गतः, तन्नो वद।।२२।। *इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः।।१।।*

अथ द्वितीयोऽध्यायः ।। २।।

मुनिभिः कृतेषु षट्सु प्रश्नेषु चतुर्णामुत्तरमाह ।।

व्यास उवाच - शौनकादीनां प्रश्नैः संप्रसन्न उग्रश्रवास्तेषां वचनं सत्कृत्य प्रवक्तुमारेभे।।१।। *सूत उवाच* - उपनयनसंस्कारात् पूर्वमेव सर्वं संन्यस्य प्रव्रजन्तं यं शुकं विरहातुरो व्यासः

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम्। संसारिणां
करुणयाऽऽह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम्।।३।। *नारायणं
नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्*।।४।।
मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमङ्गलम्। यत्कृतः कृष्णसंप्रश्नो येनात्मा
सुप्रसीदति।।५।। स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे। अहैतुक्यप्रतिहता
ययाऽऽत्मा सुप्रसीदति।।६।। वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु
वैराग्यं ज्ञानं यत्तदहैतुकम्।।७।। धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्।।८।। धर्मस्य ह्यापवर्ग्यस्य नार्थो-
ऽर्थायोपकल्पते। नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः।।९।। कामस्य
नेन्द्रियप्रीतिर्लाभो जीवेत यावता। जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः।।१०।।

सङ्ग्रहोक्तिः

पुत्रपुत्रेति त्रिः प्लुतस्वरेणाऽऽजुहाव, तदा तदात्मकत्वेन विद्यमानास्तरवस्तस्मा उत्तरं ददुः, स्वयोगशक्त्या सर्वभूतहृदयव्याप्तं तं शुकमुनिमहं नमस्करोमि।।२।। यः सुदुस्तरमज्ञानान्धकारं तर्तुमिच्छतां संसारिणां पुंसामुपरि करुणां कृत्वाऽध्यात्मस्वरूपप्रकाशकं श्रुतिसारं गुह्यं श्रीमद्भागवताभिधं पुराणं कथितवान् तं मुनीनां गुरुं शुकमहं शरणं व्रजामि।।३।। पौराणिकान् शिक्षयन्नाह – नरश्रेष्ठं नरेण सहितं नारायणं, सरस्वतीं देवीं व्यासं च नमस्कृत्य जयशब्दोक्तं भागवतमुच्चारयेत्।।४।। हे मुनयः! यथा लोकानां कल्याणं स्यात् तथा भवद्भिः प्रश्नः सुष्ठुः कृतः, यतोऽयं हृदयाह्लादकः कृष्णविषयकः प्रश्नोऽस्ति ।।५।। स एव हि परो धर्मः येन कृष्णे फलाकांक्षारहिता निर्विघ्ना च भक्तिर्भवेत्, ययाऽऽत्मा सुप्रसीदति।।६।। भगवति वासुदेवे प्रयोजितो भक्तियोगस्तत्कालं वैराग्यं निष्कामं ज्ञानं च जनयति।।७।। सम्यगाचरितोऽपि धर्मो यदि भगवत्कथासु प्रीतिं नोत्पादयेत् तर्हि स धर्मः केवलं श्रम एव भवेत्।।८।। मुक्तिदायकस्य धर्मस्य फलं धनं न हि, एवं धनस्य फलं कामो न, कामस्य फलमिन्द्रियाणां तृप्तिर्न हि, किन्तु जीवनमेव, अत एव यावता कामेन जीवेत तावानेव स सेव्यः, मानवजीवनस्य फलं तु तत्त्वज्ञानजिज्ञासैव, इह लोके कर्मभिः साध्यो धर्मो न फलम्।।९-१०।।

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।।११।। तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया। पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया।।१२।। अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः। स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम्।।१३।। *तस्मादेकेन मनसा भगवान् सात्वतां पतिः। श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा*।।१४।। यदनुध्यासिना युक्ताः कर्मग्रन्थिनिबन्धनम्। छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम्।।१५।। शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः। स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्।।१६।। शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः। हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम्।।१७।। नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया। भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी।।१८।। तदा रजस्तमोभावाः कामलोभादयश्च ये। चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति।।१९।।

सङ्ग्रहोक्तिः

तत्त्वविदस्तु तदेतत्तत्त्वं ज्ञानस्वरूपं ज्ञानगुणकं च वदन्ति यद् अद्वयम् अर्थात् स्वतुल्याऽभ्यधिकवस्त्वन्तररहितं ब्रह्म इति परमात्मेति भगवानिति च कथ्यते।।११।। तस्मात् श्रद्धावन्तो मुनयः कर्मानुगृहीतया ज्ञानवैराग्ययुक्तया च भक्त्या जीवात्मनि स्थितं परमात्मनं पश्यन्ति।।१२।। अत एव हे विप्रवराः! वर्णाश्रमविभागानुसारं सम्यगाचारितस्य धर्मस्य फलं तु श्रीहरेः प्रसन्नतैवाऽस्ति।।१३।। तस्मात् मुमुक्षुभिरेकाग्रेणैव मनसा भक्तवत्सलो भगवानेव श्रोतव्यः कीर्त्तितव्यो ध्येय आराध्यश्च।।१४।। यस्य आध्यात्मिकेन खड्गेन युक्ता कुशला भक्ता कर्मग्रन्थिरूपं बन्धनं छिन्दन्ति, तस्य भगवतः कथायां प्रीतिं कः पुमान् न कुर्यात्, कथां श्रोतुमिच्छोः श्रद्धायुक्तस्य पुंसो महतां सेवया गंगादिपुण्यतीर्थानां निषेवणाच्च भगवतो वासुदेवस्य कथाश्रवणे रुचिर्जायते।।१६।। यस्य श्रवणं कीर्तनं च पुण्यावहं भवति स श्रीकृष्णः कथाश्रोतृणां हृदयस्थः सुहृत् सन् तेषां समग्राणि दुरितानि नाशयति।।१७।। नित्यं भगवद्भक्तसेवया सर्वेषु दुरितेषु नष्टप्रायेषु सत्सु तस्य भगवति उत्तमश्लोके सुदृढा भक्तिर्भवति।।१८।। तदा रजस्तमःप्रधानाः कामलोभादयो भावा नश्यन्ति, तत एतैर्भावैरविक्षिप्तं शुद्धसत्त्वे स्थितं सच्चेतः प्रसीदति।।१९।।

एवं प्रसन्नमनसो भगवद्भक्तियोगतः भगवत्तत्त्वविज्ञानं मुक्तसङ्गस्य जायते।।२०।।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि दृष्ट
एवात्मनीश्वरे।।२१।। अतो वै कवयो नित्यं भक्तिं परमया मुदा। वासुदेवे भगवति
कुर्वन्त्यात्मप्रसादिनीम्।।२२।। सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष
एक इहास्य धत्ते। स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु
सत्त्वतनोर्नृणां स्युः।।२३।। पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः। तमसस्तु
रजस्तस्मात् सत्त्वं यद् ब्रह्मदर्शनम्।।२४।। भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम्।
सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह।।२५।। मुमुक्षवो घोररूपान् हित्वा
भूतपतीनथ। नारायणकलाः शान्ता भजन्ति ह्यनसूयवः।।२६।। रजस्तमःप्रकृतयः
समशीला भजन्ति वै। पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः।।२७।।

सङ्ग्रहोक्तिः

एवं प्रसन्नमनसो विरक्तस्य भगवद्भक्तियोगेन भगवत्स्वरूपगुणयाथात्म्यसाक्षात्कारात्मकं ज्ञानमुत्पद्यते।।२०।। परमात्मनि साक्षाद् दृष्टे सति, दृष्टुर्पुंसो भगवत्प्राप्तिप्रतिबन्धकानि पूर्वोत्तराघरूपाणि कर्माणि क्षीयन्ते, तस्य सकलाः संशया नश्यन्ति, अहं ममाभिमानरूपा हृदयग्रन्थिर्भिद्यते।।२१।।एत एव सुधियः पुरुषाः परमया मुदा भगवति वासुदेवे मनःप्रसन्नतारूपां भक्तिं कुर्वन्ति।।२२।। "सत्त्वं रजः तमः" इति त्रयो गुणाः प्रकृतेः, न तु जीवस्य परस्य वा, तैः सत्वादिभिर्युक्तः परमपुरुषः एकः सृष्टेः प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतया अस्य स्थूलचिदचिदात्मकस्य जगत इह भुवने स्थितिसृष्टिलयार्थं "हरिः विरञ्चिः हरः" इति संज्ञां बिभर्त्ति, तेषु त्रिषु मध्ये सत्त्वशरीरकाद् विष्णोर्जनानां श्रेयांसि भवन्ति।।२३।। यथा काष्ठाद् धूमः श्रेष्ठः, धूमाद् वह्निः श्रेष्ठः, तथा तमोगुणाद् रजोगुणः श्रेष्ठः, रजोगुणाद् ब्रह्मदर्शनसाधनरूपो सत्त्वगुणः श्रेष्ठः।।२४।। पुरा मुनयो विशुद्धसत्त्वमूर्तिं भगवन्तं विष्णुं क्षेमाय सेवितवन्तः, अतो ये तान् मुनीन् अनुवर्तन्ते ते संसारे क्षेमाय कल्पन्ते।।२५।। अतो ममुक्षवो मुनयो घोररूपान् भूतपतीन् हित्वा शुद्धसत्त्वप्रवर्तकान् नारायणावतारान् भजन्ति।।२६।। ये रजस्तमःप्रकृतयो जनास्ते लक्ष्म्यैश्वर्यप्रजेप्सवः सन्तः पितृभूतप्रजेशादीन् भजन्ति।।२७।।

**वासुदेवपरा वेदा वासुदेवपरा मखाः। वासुदेवपरा योगा वासुदेवपराः क्रियाः।।२८।।
वासुदेवपरं ज्ञानं वासुदेवपरं तपः। वासुदेवपरो धर्मो वासुदेवपरा गतिः।।२९।। स
एवेदं ससर्जाग्रे भगवानात्ममायया। सदसद्रूपया चासौ गुणमय्यागुणो विभुः।।३०।।
तया विलसितेष्वेषु गुणेषु गुणवानिव। अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः
।।३१।। यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु। नानेव भाति विश्वात्मा भूतेषु च
तथा पुमान्।।३२।। असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः। स्वनिर्मितेषु निर्विष्टो
भुङ्क्ते भूतेषु तद्गुणान्।।३३।। भावयत्येष सत्त्वेन लोकान् वै लोकभावनः।
लीलावतारानुरतो देवतिर्यङ्नरादिषु।।३४।।**

इति श्रीमद्भावते महापुराणे प्रथमस्कन्धे द्वितीयोऽध्यायः।।२।।

सङ्ग्रहोक्तिः

वेदाः, मखाः, योगाः, क्रियाः, ज्ञानं, तपः, धर्माः, स्वर्गादिफलमपि सर्वं वासुदेवपरं वर्तते, कुतः
एतेषां परत्वात्।।२८-२९।। सृष्टेः प्राक् नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकतयाऽवस्थितो
भगवान् गुणमयीमात्ममायां महदादिपृथिव्यन्तकार्यकारणरूपेण परिणमय्य तत्रान्तरात्मतया
प्रविष्टोऽपि तद्गुणैरसंस्पृष्टः सन्नेवेदं जगत्ससर्ज।।३०।। आत्ममायया रचितेषु गुणकार्यभूत-
ब्रह्मादिस्तम्बपर्यन्तेषु तत्तत्क्षेत्रज्ञेन भासमानः तज्जीवद्वारा ब्रह्मादिशरीरेष्वनुप्रविष्टः सन्
ब्रह्मादिजीवगत धर्मवानिवाभाति।।३१।। यथाऽग्निः काष्ठं प्रविश्य काष्ठस्याऽऽकारं भजते
तथैव विश्वजीवशरीरकः स्वरूपस्वभावादिना जीवेभ्यो भिन्नः परमात्मा एकः सन्नपि भूतेषु
सजीवेषु देवादिषु नानेव भाति।।३२।। असौ परमात्मा गुणमयैर्भूतसूक्ष्मेन्द्रियादिभिः तत्त्वैः
स्वनिर्मितेषु जीवेषु स्वयोगैश्वर्येणाऽसंगतया प्रविष्टः सन्नपि जीवगताऽऽनन्दादिगुणान् भुङ्क्ते,
नत्वस्य जीवस्थत्वेऽपि दुःखादिभोगः, तस्य स्वतन्त्रत्वात्।।३३।। लोकभावनः जगदुत्पादक
एष वासुदेवः सत्त्वगुणेन लोकान् पालयितुं देवतिर्यङ्नरादिषु लीलावतारान् गृह्णाति।।३४।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः ।। ३ ।।

सूत उवाच - जगृहे पौरुषं रूपं भगवान्महदादिभिः। सम्भूतं षोडशकलमादौ लोकसिसृक्षया ।।१।। यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः। नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ।।२।। यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ।।३।। पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्। सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ।।४।। एतन्नानावताराणां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ।।५।। स एव प्रथमं देवः कौमारं सर्गमास्थितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ।।६।। द्वितीयं तु भवायास्य रसातलगतां महीम्। उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ।।७।। तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ।।८।।

सङ्ग्रहोक्तिः
अथ तृतीयोऽध्यायः ।।३।।
भगवतश्चतुर्विंशत्यवताराणां संक्षेपतोवर्णनम्

सूत उवाच - हे विप्राः! सृष्टेरादौ भगवान् जगत्सृष्टिकामनया महदहंकारतन्मात्रैः सम्भूतम् एकादशेन्द्रियपञ्चमहाभूतरूपषोडषकलात्मकं पुरुषस्वरूपं जगृहे ।।१।। जले शयानस्य समाधिरूपां योगनिद्रां धारयतः तस्य पुरुषस्य नाभिकमलतो ब्रह्मा जातः ।।२।। यस्य भगवतोऽवयवैर्देवमनुष्यादीनां सर्वेषां लोकानां विस्तारोऽभवत् तद् भगवतो विशुद्धं सत्त्वरूपमस्ति ।।३।। अनन्तचरणोरुभुजाननैरद्भुतं सहस्रमस्तकश्रवणनासिकं सहस्रालंकारैरुपशोभितं च तद्रूपं मुनयो ज्ञानदृष्ट्याऽवलोकयन्ति ।।४।। भगवत एतद्रूपं नानावतारणामुत्पत्तेः प्रवेशस्य च मूलकारणमविनाशि चास्ति यस्यांशांशेन देवतिर्यङ्मनुष्यादय सृज्यन्ते ।।५।। प्रथमाकारे स एव भगवान् वासुदेवः सनक-सनन्दन-सनातन-सनत्कुमारादिकं सर्गमास्थितः सन् विप्रो भूत्वा दुश्चरमखण्डितं ब्रह्मचर्यमाचचार ।।६।। द्वितीयेऽवतारे स वराहरूपं धृत्वा रसातलगतां महीं विश्वकल्याणाय समुद्दधार ।।७।। तृतीयावतारे स भगवान् नारदरूपं धृत्वा सर्वकर्मकलापनिवर्तनक्षमं पाञ्चरात्रागमशास्त्रं प्रवर्तयामास ।।८।।

तुर्ये धर्मकलासर्गे नरनारायणावृषी। भूत्वाऽऽत्मोपशमोपेतमकरोद् दुश्चरं तपः।।९।। पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्।।१०।। षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया। आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्।।११।। ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत। स यामाद्यैः सुरगणैरपात्स्वायम्भुवान्तरम्।।१२।। अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः। दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम्।।१३।। ऋषिभिर्याचितो भेजे नवमं पार्थिवं पुनः। दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः।।१४।। रूपं स जगृहे मात्स्यं चाक्षुषोदधिसम्प्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्।।१५।। सुरासुराणामुदधिं मथ्नतां मन्दराचलम्। दध्रे कमठरूपेण पृष्ठ एकादशे विभुः।।१६।। धान्वन्तरं द्वादशमं त्रयोदशम एव च। अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया।।१७।। चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम्। ददार करजैर्वक्षस्येरकां कटकृद्यथा।१८।।

सङ्ग्रहोक्तिः

चतुर्थेऽवतारे धर्मपत्न्यां मूर्तौ नरनारायणभिधौ ऋषी भूत्वाऽन्यैश्चरितुमशक्यमिन्द्रियनिग्रहोपेतं तप आकल्पमकरोत्।।९।। पञ्चमेऽवतारे स भगवन् कपिलाभिधो भूत्वा कालनष्टं सांख्यशास्त्रमासूरिमुख्येभ्यः शिष्येभ्यः प्राह।।१०।।स षष्ठेऽवतारेऽत्रिमुनिभार्यायामनसूयायां दत्तात्रेयो भूत्वा प्रह्लादालर्कप्रभृतिभ्योऽध्यात्मविद्यां कथयामास।।११।। सप्तमे रुचिप्रजापतिभार्यायामाकूत्यां यज्ञरूपेणावऽतीर्णः स स्वायंभुवमन्वन्तरं पालयामास।।१२।।अष्टमेऽवतार आग्नीध्रतनयस्य नाभेः पत्न्यां मेरुदेव्यां ऋषभो भूत्वा योगिभ्यः पारमहंस्यं धर्ममूचे।।१३।।स भगवान् नवमेऽवतारे ऋषीणां प्रार्थनया पृथुनामा नृपतिर्भूत्वा पृथिवीमौषधी र्दुदोह।।१४।। दशमेऽवतारे स मत्स्यो भूत्वा चाक्षुषे मन्वन्तरे पृथिवीरूपायां नावि वैवस्वताख्यं मनुमारोप्य ररक्ष।।१५।। यदा देवा दानवाश्च समुद्रमन्थनं चक्रुस्तदैकादशं कूर्मरूपमास्थाय स्वपृष्ठे मन्दराचलं दधार।।१६।।स एव भगवान् द्वादशेऽवतारे धन्वन्तरिर्भूत्वाऽऽयुर्वेदमरचयत्, त्रयोदशावतारे च स मोहिनीरूपं दधार, तेन रूपेण दैत्यान् वञ्चयित्वा देवेभ्योऽमृतं ददौ।।१७।।चतुर्दशेऽवतारे स प्रह्लादरक्षायै नृसिंहरूपं धृत्वा दुर्धर्षं हिरण्यकशिपोर्हृदयं व्यदारयत्।।१८।।

पञ्चदशं वामनकं कृत्वागादध्वरं बलेः। पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम्
।।१९।। अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान्। त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम्।।२०।। ततः सप्तदशे जातः सत्यवत्यां पराशरात्। चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः।।२१।। नरदेवत्वमापन्नः सुरकार्यचिकीर्षया। समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम्।।२२।। एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी। रामकृष्णाविति भुवो भगवानहरद्भरम्।।२३।। ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाऽजनसुतः कीकटेषु भविष्यति।।२४।। अथासौ युगसंध्यायां दस्युप्रायेषु राजसु। जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः।।२५।। *अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः। यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः।।२६।।* ऋषयो मनवो देवा मनुपुत्रा महौजसः। कला: सर्वे हरेरेव सप्रजापतयस्तथा।।२७।। *एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्।*

सङ्ग्रहोक्तिः

पञ्चदशं वामनरूपमास्थाय, स बलेर्यज्ञं जगाम, त्रिविक्रममितभूमियाञ्चाव्याजेन तत्सकाशात् स्वर्गमादाय देवेन्द्राय ददौ।।१९।। षोडशे स ब्राह्मणद्रोहिणो नृपानवलोक्य परशुरामरूपं दधार, एवं स एकविंशतिवारं महीं निःक्षत्रियां चकार।।२०।। स भगवान् सप्तदशेऽवतारे लोकानल्पमतीनवलोक्य पराशरात् सत्यवत्याः पुत्रो व्यासो बभूव, स वेदतरोर्विभिन्नाः शाखाः कृतवान्।।२१।। अष्टादशावतारे देवकार्यसाधनाय दशरथपुत्रो रामो भूत्वा, स समुद्रबन्धनादीन्यनेककार्याणि विदधे।।२२।। ऊनविंशे विंशतितमे चाऽवतारे यदुवंशे रामकृष्णौ भूत्वा तौ भुवो भारं जह्रतुः।।२३।। कलौ समायाते सति स दैत्यानां मोहनाय गयाप्रान्ते बुद्धनाम्ना एकविंशतितमावतारं ग्रहीष्यति।।२४।।द्वाविंशतितमेऽवतारे कलेरन्तिमचरणान्ते राजसु चौरप्रायेषु सत्सु सम्भलग्रामे विष्णुयशसो ब्राह्मणस्य पुत्रः कल्किर्भविष्यति।।२५।। हे विप्राः! सत्त्वमूर्तेर्हरेरित्थमवतारा असंख्या सन्ति, यथा सरोवराद् बहवोऽल्पप्रवाहा निःसरन्ति।।२६।। ऋषयो मनवो देवा मनुपुत्राः कश्यपादयः प्रजापतयः, एते सर्वे हरेरवतारा सन्ति।।२७।। एषु ऋषिमन्वादिषु केचिदंशाः केचित्कलाः केचिद्विभूतयः सन्ति, कृष्णस्तु स्वयं षाड्गुण्यपूर्णो

इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ।।२८।। **जन्मगुह्यं भगवतो य एतत्प्रयतो नरः। सायंप्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते ।।२९।। एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः। मायागुणैर्विरचितं महदादिभिरात्मनि ।।३०।। यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले। एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ।।३१।। अतः परं यदव्यक्तमव्यूढगुणबृंहितम्। अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ।।३२।। यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा। अविद्ययाऽऽत्मनि कृते इति तद्ब्रह्मदर्शनम् ।।३३।। यद्येषोपरता देवी माया वैशारदी मतिः। सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ।।३४।। एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च। वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ।।३५।।**

सङ्ग्रहोक्तिः

भगवान् असुरादिभिरुपद्रुतं लोकं प्रतियुगं रक्षति ।।२८।। भगवतो जन्मकर्मादि गुह्यं रहस्यमस्ति, यो नरः सायं प्रातः नियमपूर्वकमेतत् पठति शृणोति वा स दुःखसन्दोहैर्मुच्यते ।।२९।। अदिव्यदृशाऽदर्शनीयाकारस्य ज्ञानरूपस्य जीवस्य स्वरूपे भगवतो मायागुणैरेतत् स्थूलशरीरं विरचितम् ।।३०।। यथा वाय्वाश्रितो मेघसमूहोऽज्ञैराकाश आरोपितः यद्वा पार्थिवं धूसरत्वादिकं वायावारोपितं भवति तद्वत् दृष्टरि जीवे दृश्यत्वादिधर्मकं स्थूलशरीरमबुद्धिभिरारोपितं भवति ।।३१।। स्थूलशरीरादन्यत् यत् - सत्त्वादिगुणस्थूलभाववर्जितं अत एव अज्ञैः सूक्ष्मशरीरमपि जीवे आरोपितम्, तस्मात् सूक्ष्मशरीरादपि यत् अन्यत् अदृष्टम् अश्रुतं च वस्तु स जीव इति व्यवह्रियते, यस्मात् सूक्ष्मशरीराज्जीवस्य पुनर्ज्जन्म जायते ।।३२।। इमे सदसद्रूपे स्थूलसूक्ष्मशरीरे जीवे भगवदधीनमायया कारिते स्तः, अतस्ते द्वे शरीरे निजात्मनः परमात्मशरीरकत्वस्य सम्यक् ज्ञानेन जीवे प्रतिषिद्धे स्तः, अतः परमात्मशरीरकस्वात्मज्ञानेन ब्रह्मशब्दवाच्यं ज्ञानं जायते ।।३३।। यदैषा विपुला परमेश्वराधीना माया द्योतमाना सत्यपि निवृत्ता स्यात् तदा परमात्मप्राप्त्याऽभिव्यक्ते स्वकीये महिम्ने स महीयते = भगवद्धामवासिभिर्बहुमतो भवति ।।३४।। यस्य परमात्मनो जन्मकर्मादिकं कर्माधीनं नास्ति तस्य जन्मानि कर्माणि वेदगुह्यानि सन्ति, तानि कवयो वर्णयन्ति ।।३५।।

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन्। भूतेषुचान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः।।३६।। न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतिम्। नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः।।३७।। स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः। योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगन्धम्।।३८।। अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिल-लोकनाथे। कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः।।३९।। इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्। उत्तमश्लोकचरितं चकार भगवानृषिः।।४०।। निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्। तदिदं ग्राहयामास सुतमात्मवतां वरम्।।४१।। सर्ववेदेतिहासानां सारं सारं समुद्धृतम्। स तु संश्रावयामास महाराजं परीक्षितम् ।।४२।। प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः। तत्र कीर्त्तयतो विप्रा विप्रर्षेर्भूरि-तेजसः।।४३।। अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्। सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति।।४४।। कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह। कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः।।४५।। ❀ *इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे तृतीयोऽध्यायः।।३।।* ❀

सङ्ग्रहोक्तिः

सफलसकलचरित्रः स भगवान् प्राणिमात्रेष्वन्तर्यामितयाऽवस्थितः सन्नपि कुत्रापि न सज्जते ।।३६।। अस्य भगवतो जन्मकर्मप्रभृतीर्लीलाः कोऽपि न सम्यग् जानाति।।३७।। चक्रायुधस्य तस्य परमेश्वरस्य पदवीं=तत्प्राप्तिरूपां स एव वेद, यो सर्वतोभावेन तच्चरणकमलं भजति ।।३८।। अत एव भवन्तो धन्याः, यतोऽखिललोकनाथे वासुदेवे स्वामिसेवकभावेन भक्तिं कुर्वन्ति।।३९।। वेदैस्तुल्यमेतद्भागवतं पुराणं रचयित्वा व्यास आत्मज्ञानिनां श्रेष्ठं स्वसुतं शुकमध्यापयामास।।४०-४१।। अस्मिन् पुराणे सर्वेषां वेदेतिहासानां सारः समुद्धृत्य स्थापितोऽस्ति, गङ्गातटे बहुभिः ऋषिभिः परिवृतं प्रायोपविष्टं परीक्षितं शुक इदं भागवतं श्रावयामास।।४२-४३।। अहमपि तत्र गतवानासम्, तत्कृपया सर्वं श्रुतम्, तत्र मया यथाऽधीतं तथा वः श्रावयिष्यामि।।४४।। धर्मज्ञानादिभिः सह कृष्णे स्वधाम गते सति कलियुगेऽज्ञानेन नष्टचक्षुषां नृणां हेतवे एष पुराणरूपो सूर्य उदितोऽस्ति।।४५।।

❀ *इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः ।।३।।* ❀

अथ चतुर्थोऽध्यायः ।।४।।

व्यास उवाच - इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम्। वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत्।।१।। *शौनक उवाच* - सूत सूत महाभाग वद नो वदतां वर। कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः।।२।। कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना। कुतः सञ्चोदितः कृष्णः कृतवान् संहितां मुनिः।।३।। तस्य पुत्रो महायोगी समदृग्निर्विकल्पकः। एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते।।४।। दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम्। तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुम्भिदा न तु सुतस्य विविक्तदृष्टेः।।५।। कथमालक्षितः पौरैः सम्प्राप्तः कुरुजाङ्गलान्। उन्मत्तमूकजडवद्विचरन् गजसाह्वये।।६।। कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह। संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः।।७।।

सङ्ग्रहोक्तिः

अथ चतुर्थोऽध्यायः ।।४।।

व्यासस्यासन्तोषो देवर्षेस्तत्रागमनं च

व्यास उवाच - एवं ब्रुवाणं सूतं संस्तुत्य चिरकालीने सत्रे दीक्षितानां मुनीनां मध्ये वृद्धो ऋग्वेदी कुलपतिः शौनकोऽब्रवीत्।।१।। *शौनक उवाच* - हे सूत! भगवान् शुको यां पुण्यां भागवतीं कथामाह, तां त्वं नः कथय।।२।। इयं भागवताख्या संहिता कस्मिन् युगे प्रवृत्ता, कस्मिन् स्थाने, केन कारणेन वा प्रवृत्ता, कस्य प्रेरणया मुनिर्व्यास इमां रचयामास।।३।। व्यासस्य पुत्रो महायोगी शुकः समदर्शी तथा भेदवासनारहितोऽपि मूढो दृश्यते।।४।। तस्य भेदभावशून्यतां कथयति - नग्नं पुत्रमनुधावन्तमनग्नमपि व्यासं दृष्ट्वा जलक्रीडापरायणा अप्सरसो व्रीडया वस्त्राणि परिदधुः, तद् दृष्ट्वा यदा व्यासः पृष्टवान् तदा ता ऊचुः, तव मनसि तु "स्त्री पुमान्" इति भेदोस्ति, किन्तु तव पुत्रे स भेदभावो नैवाऽस्ति।।५।। इत्थंभूतः शुको कुरुजाङ्गलादिदेशानतिक्रम्य उन्मत्तमूकजडवद् दृष्टः सन् हस्तिनापुरं प्राप्तः, तदा पौरजनैः अयं शुक इति कथं ज्ञातः।।६।। यो मुनिर्गृहस्थानां गृहेषु तेषामाश्रमान् पवित्रीकुर्वन्

स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम्। अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ।।८।।
अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम्। तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः
।।९।। स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः। प्रायोपविष्टो गङ्गाया-
मनादृत्याधिराट्श्रियम् ।।१०।। नमन्ति यत्पादनिकेतमात्मनः शिवाय चाऽऽनीय
धनानि शत्रवः। कथं स वीरः श्रियमङ्ग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः
।।११।। शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः। जीवन्ति
नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् ।।१२।। तत्सर्वं नः समाचक्ष्व
पृष्टो यदिह किञ्चन। मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दासात् ।।१३।। *सूत
उवाच* – द्वापरे समनुप्राप्ते तृतीये युगपर्यये। जातः पराशराद्योगी वासव्यां कलया
हरेः ।।१४।। स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचि। विविक्त एक आसीन
उदिते रविमण्डले ।।१५।। परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा। युगधर्मव्यतिकरं
प्राप्तं भुवि युगे युगे ।।१६।। भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम्।
अश्रद्दधानान्निःसत्त्वान्दुर्मेधान् ह्रसितायुषः ।।१७।। दुर्भगांश्च जनान् वीक्ष्य मुनिर्दिव्येन
चक्षुषा। सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ।।१८।।

सङ्ग्रहोक्तिः

केवलं गोदोहनकालपर्यंतमेव तिष्ठति, तेन साकं राज्ञः परीक्षितः संवादः कथमभवत् ।।७-
८।। अभिमन्युसुतं लोकाः परमं भगवद्भक्तं कथयन्ति, अतस्तज्जन्म कर्म च नः श्रावय ।।९।।
पाण्डुवंशजानां मानवर्द्धनः सम्राट् स केन हेतुना राज्यश्रियमनादृत्य गङ्गायां प्रायोपवेशं
कृतवान् ।।१०।। यस्य शत्रवोऽपि धनानि समर्प्य तच्चरणे नमन्ति स्म, स कथं राज्यश्रियं
तत्याज ।।११।। परमभक्तोऽपि स राजा स्वीयं परोपकारिणं देहं निर्विद्य कथं त्यक्तवान् ।।१२।।
अस्माभिर्यत् पृष्टं तत्सर्वं नः कथय, यतस्त्वं वेदं विहाय सर्वाणि शास्त्राणि जानासि ।।१३।।
सूत उवाच – तृतीये युगपरिवर्तने द्वापरे पराशरात् सत्यवत्यां विष्णोरंशावतारो व्यासो
जातः ।।१४।। स एकदा प्रातःकाल एकान्ते सरस्वत्या जलमाचम्याऽऽसीनो बभूव ।।१५।।
कालत्रयज्ञानी स मुनि र्ज्ञानदृष्ट्या युगधर्मसांकर्यं प्राप्तं ददर्श ।।१६।। लोकानां युगकृतं

चातुर्होत्रं कर्मशुद्धं प्रजानां वीक्ष्य वैदिकम्। व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम्
।।१९।। ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः। इतिहासपुराणं च पञ्चमो
वेद उच्यते।।२०।। तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः। वैशम्पायन एवैको
निष्णातो यजुषामुत।।२१।। अथर्वाङ्गिरसामासीत्सुमन्तुर्दारुणो मुनिः। इतिहास-
पुराणानां पिता मे रोमहर्षणः।।२२।। त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा।
शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्।।२३।। त एव वेदा दुर्मेधैर्द्धार्यन्ते
पुरुषैर्यथा। एवं चकार भगवान् व्यासः कृपणवत्सलः।।२४।। स्त्रीशूद्रद्विजबन्धूनां
त्रयी न श्रुतिगोचरः। कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह। इति भारतमाख्यानं
कृपया मुनिना कृतम्।।२५।। एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः।
सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः।।२६।। नातिप्रसीदद्धृदयः सरस्वत्यास्तटे
शुचौ। वितर्क्कयन् विविक्तस्थ इदं प्रोवाच धर्मवित्।।२७।। धृतव्रतेन हि मया
छन्दांसि गुरवोऽग्नयः। मानिता निर्व्यलीकेन गृहीतं चानुशासनम्।।२८।।

सङ्ग्रहोक्तिः

शक्तिसंक्षयं जनसाधारणान् श्रद्धाविरहितान् अल्पायुषश्च वीक्ष्य सर्वेषां कल्याणार्थं चिन्तयामास ।।१७-१८।। प्रजानां श्रेयःसाधनं वैदिकं शुद्धं चातुर्होत्रकर्म वीक्ष्य यज्ञप्रचारायैकस्य वेदस्य चत्वारो भागाः कृताः।।१९।। तेषां ऋग्यजुःसामाथर्वेतिनामभिश्चत्वारो वेदाः कृताः, इतिहासं पुराणं च पञ्चमं वेदं कृतवान्।।२०।। तत्र पैलो मुनिः ऋग्वेदधरः, जैमिनिः सामगायकः वैशम्पायनो यजुर्वेदी तथा सुमन्तुर्मुनिः अथर्ववेदी बभूव, इतिहासपुराणानां विज्ञो मे पिता रोमहर्षणो जातः।।२१-२२।। एते सर्वे ऋषयः स्वं स्वं वेदमनेकधा विभक्तवन्तः, ते वेदाः शिष्यप्रशिष्यभेदेन विविधशाखिनो बभूवुः।।२३।। अल्पधियोऽपि पुरुषा यथा वेदज्ञा भवेयुरिति विचार्य व्यासस्तथा कृतवान्।।२४।। वेदेष्वनधिकारिणां स्त्रीशूद्रादीनां कृते कृपालुर्व्यासो महाभारतं नामेतिहासं रचितवान्।।२५।। एवं सर्वलोकहिताय प्रवृत्तस्यापि व्यासस्य हृदयं नाऽतुष्यत्।।२६।। तदाऽप्रसन्नहृदयः स व्यास शुचौ सरस्वतीतीरे तर्कयन् स्वमनस्येवेदं प्रोवाच।।२७।। धृतव्रतेन मया वेदा अधीताः, गुरवोऽग्नयश्च सेविताः, गुरूणामाज्ञा च -

भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः। दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ।।२९।। तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः। असम्पन्न इवाभाति ब्रह्मवर्चस्यसत्तमः।।३०।। किं वा भागवता धर्मा न प्रायेण निरूपिताः। प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः।।३१।। तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः। कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम्।।३२।। तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः। पूजयामास विधिवन्नारदं सुरपूजितम्।।३३।।

इति श्रीमद्भावते महापुराणे प्रथमस्कन्धे चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

सूत उवाच - अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः। देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव।।१।। *नारद उवाच* - पाराशर्य महाभाग भवतः कच्चिदात्मना। परितुष्यति शारीर आत्मा मानस एव वा।।२।।

सङ्ग्रहोक्तिः

पालिता।।२८।। भारतमिषेण वेदार्थोऽपि दर्शितः, तथा स्त्रीशूद्रादीनां धर्मोऽपि व्याख्यातः।।२९।। एवं सत्यपि म आत्मा अकृतकृत्य इव लक्ष्यते।।३०।। किं मया भगवतः भागवतानां परमहंसानां च प्रियाः ये भागवतधर्मास्ते सम्यङ् न निरूपिताः? किं तेनैव ममेदृशी स्थितिः?।।३१।। एवमात्मनो न्यूनतामनुभवतस्तस्याश्रमे सहसा नारदो मुनिः समायातः।।३२।। तं दृष्ट्वा सद्यः समुत्थितो व्यासो देवपूजितं नारदं विधिवत् पूजयामास।।३३।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः ।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

व्यासनारदसंवादः, भगवद्गुणकर्मवर्णनमहत्वं नारदपूर्ववृत्तं च

सूत उवाच - अथ सुखासीनो वीणापाणिर्नारदो स्वसमीपे स्थितं पाराशर्यं व्यासं स्मयन्निव प्रोवाच।।१।। नारद उवाच - हे महाभाग! तवात्मा मनसा शरीरेण च सन्तुष्टोऽस्ति, न वा।।२।।

जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतम्। कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितम्।।३।। जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनम्। तथापि शोचस्यात्मानमकृतार्थ इव प्रभो।।४।। *व्यास उवाच* - अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे। तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽऽत्मभवात्मभूतम्।।५।। स वै भवान् वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः। परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः।।६।। त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी। परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व।।७।। *श्रीनारद उवाच* - भवतानुदितप्रायं यशो भगवतोऽमलम्। येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम्।।८।। यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः। न तथा वासुदेवस्य महिमा ह्यनुवर्णितः।।९।। *न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्। तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः।।१०।।* तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि।

सङ्ग्रहोक्तिः

ज्ञातुमिष्टं सर्वं धर्मादिकं त्वया ज्ञातमनुष्ठितं च, सर्वार्थपूर्णं महाभारतमपि भवता रचितमस्ति।।३।। भवता सनातनं ब्रह्म विज्ञातमधीतं च, एवं सत्यपि भवान् अकृतकृत्य इव शोचति।।४।। *व्यास उवाच* - हे महामुने! यत्त्वयोक्तं तत्सर्वं सत्यम्, तथापि ममात्मा नैव तुष्यति, अत एवैतदसन्तोषकारणं त्वां पृच्छामि।।५।। यतो भवता स पुराणः पुरुष उपासितः, यो मनसैव विश्वं सृजति पालयति नाशयति च।।६।। सर्वप्राणिनामन्तश्चरो वायुरिव भवान् त्रिलोकीं विचरति, अतो मयि या न्यूनता अस्ति तां ब्रूहि।।७।। *श्रीनारद उवाच* - भवता भवगतो वासुदेवस्य यशो न वर्णितम्, तदेव तवाऽसन्तोषकारणं ज्ञायते।।८।। भवता स्वीयग्रन्थेषु यथा धर्मादयः पुरुषार्था वर्णितास्तथा भगवतो महिमा न वर्णितः।।९।। यद्वचो जगत्पवित्रं हरेर्यशः न कथयति तत् विद्वांसः काकतीर्थं मन्यन्ते, तद्वचो भागवतपरमहंसा न शृण्वन्ति।।१०।। प्रतिश्लोकमसम्बन्धे वचःप्रयोगे सत्यपि यदि तत्र भगवद्यशो वर्णितमस्ति चेत्, तर्हि स एव

नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः।।११।।
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्।।१२।। अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः। उरुक्रमस्याखिलबन्धमुक्तये समाधिनानुस्मर तद्विचेष्टितम्।।१३।। अतोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः। न कुत्रचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदम्।।१४।। जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः। यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः।।१५।। विचक्षणोऽस्यार्हति वेदितुं विभोरनन्त-पारस्य निवृत्तितः सुखम्। प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान् दर्शय चेष्टितं विभोः।।१६।। त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि। यत्र क्व वाऽभद्रमभूदमुष्य किं को वाऽर्थ आप्तोऽभजतां स्वधर्मतः।।१७।। तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः।

सङ्ग्रहोक्तिः

वाक्प्रयोगः सफलः, तमेव साधवः शृण्वन्ति गायन्ति च।।११।। नैष्कर्म्यमपि ज्ञानं यदि भक्तिरहितं स्याच्चेत्तदा तन्न शोभते, कुतः पुनरीश्वरायाऽनर्पितं दुःखरूपं काम्यं कर्म शोभेत।।१२।। हे महाभाग! भवान् सफलदृष्टिः पुण्यश्लोकः सत्यरतश्चाऽस्ति, अतोऽखिलजनानां बन्धनच्छेदनाय चित्तैकाग्र्यं कृत्वा भगवतो लीलामनुस्मर वर्णय च।।१३।। हरेर्लीलाऽतिरिक्तं वर्णयतः पुरुषस्य बुद्धिर्वायुनाऽऽहता नौरिव क्वापि स्थिरं स्थानं न लभते।।१४।। स्वभावतः काम्ये कर्मणि आसक्तस्य पुरुषस्य भारतादिषु तदेव काम्यादिवर्णयतस्तव तज्जुगुप्सितं कर्माऽभूत्, यतस्त्वदुक्तं वाक्यं धर्मं मन्वाना जनास्तत्त्वज्ञानिना भवता क्रियमाणं निवारणं न मन्यन्ते।।१५।। विद्वान् पुरुषोऽनन्तपारस्य परमात्मनः स्वरूपं कर्मनिवृत्या ज्ञातुं शक्नोति, प्रवृत्तिस्वभावो जनस्तु तथा कर्तुं न क्षमः, अतो गुणेषु प्रवृत्तान् जनान् भगवतः कर्माणि दर्शय।।१६।। स्वधर्मं परित्यज्य हरेश्चरणाम्बुजं भजन्नपक्वो भक्तो यदि कुत्रापि पतति चेत्तदा तस्य किमकल्याणं भवति? हरिमभजतां प्राणिनां स्वधर्मतः को नु अर्थः प्राप्यते।।१७।। अतः कोविदः पुरुषो भक्त्यर्थमेव प्रयतेत, सांसारिकं विषयसुखं तु विना प्रयत्नेन कालेन

तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ।।१८।। न वै जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् । स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ।।१९।। इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः । तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम् ।।२०।। त्वमात्मनाऽऽत्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलाम् । अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽधिगण्यताम् ।।२१।। *इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः । अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ।।२२।।* अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् । निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥२३।। ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि । चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ।।२४।। उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः । एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ।।२५।। तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः । -

---

सङ्ग्रहोक्तिः

दुःखवल्लभ्यत एव ।।१८।। हे प्रिय! व्यास! भगवत्सेवी पुमान् संसृतिं न प्राप्नोति, मुकुन्दचरण सेवमानो जनः कदापि भजनं त्यक्तुं नोत्सहते ।।१९।। यतोऽस्य विश्वस्योत्पत्तिस्थितिप्रलयादयो भवन्ति स एव भगवान् वर्तते, एतत्तु भवान् स्वयमेव जानाति ।।२०।। यतो भवानमोघदृक् भगवदंशसम्भूतश्चाऽस्ति, अतो महानुभावस्य हरेर्गुणजन्मकर्मादिलीला गायताम् ।।२१।। भगवद्गुणानुकीर्तनमेव हि पुरुषस्य सर्वशुभकर्मणामुत्तमं फलमस्ति, एतदेव हि महद्भिः कविभिर्निरूपितमस्ति ।।२२।। स्वीयं जीवनमेवोदाहरन्नाह - हे मुने! पूर्वजन्मन्यहं केषांचिद् वेदज्ञानां दास्याः पुत्रोऽभवम्, एकदैकत्र वर्षावासं कर्तुमिच्छतां तेषां योगिनां सेवायामहं नियुक्तः ।।२३।। शान्तस्वभावेऽल्पभाषिणि बाले मयि तुल्यदर्शना मुनयो परां कृपां चक्रुः ।।२४।। तेषामनुज्ञया तद्भोजनशिष्टं भक्षयतो मे पापानि नष्टानि, अस्यां स्थितौ विशुद्धचेतसो मे मनसि तेषां धर्मे रुचिः सञ्जाताः ।।२५ ।। तेषां मुखात् कृष्णकथाः शृण्वतो मे हृदये -

ता: श्रद्धया मेऽनुपदं विश्रृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रतिः।।२६।। तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम। ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे।।२७।। इत्थं शरत्प्रावृषिकावृतू हरेर्विश्रृण्वतो मेऽनुसवं यशोऽमलम्। संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा।।२८।। तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः। श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च।।२९।। ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम्। अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः।।३०।। येनैवाहं भगवतो वासुदेवस्य वेधसः। मायानुभावमविदं येन गच्छन्ति तत्पदम्।।३१।।एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्।यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्।।३२।। *आमयो येन भूतानां जायते यश्च सुव्रत। तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम्।।३३।। एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः। त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ।।३४।।*

सङ्ग्रहोक्तिः

कृष्णभक्तिरुत्पन्ना, बुद्धिस्तस्मिन्नेव संलग्नाऽभवत्।।२६।। हे महामुने! यदा भगवति भक्तिर्जाता तदा तत्स्वरूपे मे मतिःस्थिरा बभूव, एवं च इदं कार्यकारणत्मकं सर्वं जगत् तत्संकल्पैनैव जातं तथा सर्वान्तरात्मनि तस्मिन्नेव स्थितमिति बुद्धवान्।।२७।। अनया रीत्या शरत्प्रावृड्ऋतुपर्यन्तं भगवतः पूतं यशः श्रृण्वानस्य ममान्तःकरणे रजोगुणतमोगुणप्रभावनाशिनी भक्तिः सुदृढा जाता।।२८।। ततः श्रद्धायुक्तस्य जितेन्द्रियस्याऽनुचरस्य मम सेवया प्रसन्नास्तथा तत्स्थानादन्यत्र गच्छन्तस्ते मुनयो मह्यं भगवतो गूढातिगूढं गुह्यतमं ज्ञानमूचुः ।।२९-३०।।येन ज्ञानेन भगवतो वासुदेवस्य त्रिगुणात्मकप्रकृतिमहिमानमहमविदम्।।३१।। हे ब्रह्मन्! षडैश्वर्यसम्पन्ने परमेश्वरे भावितमेव कर्म आध्यात्मिकादितापत्रयनिवारकमस्तीति श्रुतिस्मृत्यादिभिः संसूचितं वर्तते।।३२।। हे सुव्रत! मानवानां यो रोगो येन घृतादिना जातः तदेव घृतादिद्रव्यं तस्य रोगस्य निवारकं न भवति, किन्तु ताम्रभस्मादिभिर्यदि भावितं स्यात् तदा तद् द्रव्यं रोगनिवारकं भवति, एवं संसारिणां सर्वेऽपि क्रियालक्षणा उपायाः संसारहेतवो भवन्ति, यदि त उपायाः परमात्मन्यर्पिताः स्युः तदा ते सर्व दुष्कर्मनिवारणाय समर्था -

यदत्र क्रियते कर्म भगवत्परितोषणम्। ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ।।३५।। कुर्वाणा यत्र कर्माणि भगवच्छिक्षयाऽसकृत्। गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च।।३६।। ॐनमो भगवते तुभ्यं वासुदेवाय धीमहि। प्रद्युम्नाया-निरुद्धाय नमः सङ्कर्षणाय च।।३७।। इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम्। यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्।।३८।। इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम्। अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः।।३९।। त्वमप्यऽदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम्। प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा।।४०।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे पञ्चमोऽध्यायः।।५।।

सङ्ग्रहोक्तिः

जायन्ते।।३३-३४।। भगवत्प्रीत्यर्थं यत् कर्म क्रियते तत् भक्तियोगसमन्वितं ज्ञानमुत्पादयति ।।३५।। ये पुरुषा भगवच्छिक्षया "यत्करोषि यदश्नासि" इति कर्माणि कुर्वन्ति ते श्रीकृष्णस्य गुणान् गायन्ति संस्मरन्ति च।।३६।। ॐ नमो भगवते वासुदेवाय धीमहि, प्रद्युम्नायानिरूद्धाय नमः संकर्षणाय च, यः पुमान् कर्मवश्यप्राकृतमूर्तिरहितं मन्त्रप्रकाश्यमूर्तिं परमपुरुषं यजति तस्य चेतसि सम्यग् ज्ञानमुत्पद्यते, एतन्मन्त्रयज्ञेन यः पुरुषः परमात्मानं यजत आराधयति स सम्यग्दर्शनो भवति।।३८।। स्वोपदेशानुसारमाचरते मह्यं भगवान् केशवो ज्ञानं भक्तिभावं च दत्तवान्।।३९।। हे अनल्पकीर्ते! त्वमपि भगवतो दिग्विख्यातं यशो ग्रन्थस्थं कुरु, येन विदुषां बुभुत्सा पूर्येत तथा त्रिविधतापतप्तानां जनानां शान्तिलाभो भविष्यति।।४०।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः।।५।।

अथ षष्ठोऽध्यायः ।।६।।

सूत उवाच - एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च। भूयः पप्रच्छ तं ब्रह्मन् व्यासः सत्यवतीसुतः।।१।। *व्यास उवाच* - भिक्षुभिर्विप्रवसिते विज्ञानदेष्टृभिस्तव। वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् ।।२।। स्वायम्भुव कया वृत्त्या वर्तितं ते परं वयः। कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरम् ।।३।। प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम। न ह्येष व्यवधात्काल एष सर्वनिराकृतिः।।४।। *नारद उवाच* - भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम। वर्तमानो वयस्याद्ये तत एतदकारषम् ।।५।। एकात्मजा मे जननी योषिन्मूढा च किंकरी। मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम् ।।६।। साऽस्वतन्त्रा न कल्पाऽऽसीद्योगक्षेमं ममेच्छती। ईशस्य हि वशे लोको योषा दारुमयी यथा।।७।। अहं च तद्ब्रह्मकुल ऊषिवांस्तदवेक्षया। दिग्देशकालव्युत्पन्नो बालकः पञ्चहायनः।।८।। एकदा निर्गतां गेहाद्दुहन्तीं निशि गां पथि। सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः।।९।।

सङ्ग्रहोक्तिः

अथ षष्ठोऽध्यायः ।।६।।

व्यासस्य विश्वासाय नारदस्य स्ववृत्तकथनम्

सूतउवाच - एवं नारदस्य जन्म कर्म च श्रुत्वा व्यासः पुनस्तं पप्रच्छ ।।१।। *व्यास उवाच* - तव ज्ञानोपदेष्टृषु भिक्षुषु दूरं गतेषु बाल्यावस्थायां वर्तमानो भवान् किमकरोत् ।।२।। हे ब्रह्मतनय! अवशिष्टं वयो भवता कया वृत्त्या यापितमन्ते तच्छरीरं च कथं त्यक्तम् ।।३।। सर्वेषां निवारकः कालस्ते पूर्वजन्मस्मृतिं कथं न नाशितवान् ।।४।। *नारद उवाच* - मम ज्ञानदायकैर्भिक्षुभिर्गमने कृते सति तस्मिन् बाल्ये वयसि मया यत् कृतं तच्छृणु ।।५।। यस्याः केवलमहमेक एव पुत्र आसम्, सा मेऽज्ञा जननी मय्यसाधारणं स्नेहं कृतवती ।।६।। मम योगक्षेमं कामयन्ती साऽस्वतन्त्राऽऽसीत्, यतः सर्वो हि लोको दारुपुत्रिकावत् परमेश्वरस्याधीनो वर्तते ।।७।। पञ्चहायनो बालोऽहं तेषां भिक्षूणां पुनरागमनाशया तदाश्रम एव न्यवसम् ।।८।। तत एकदा मे माता निशि गोदोहनार्थं गेहाद् बहिर्गता सती पथि पदा स्पृष्टेन सर्पेण दष्टा,

तदा तदहमीशस्य भक्तानां शमभीप्सतः। अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम् ।।१०।। स्फीताञ्जनपदांस्तत्र पुरग्रामव्रजाकरान्। खेटखर्वटवाटीश्च वनान्युपवनानि च।।११।। चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान्। जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः।।१२।। चित्रस्वनैः पत्ररथैर्विभ्रमभ्रमरश्रियः। एक एवातियातोऽहमद्राक्षं विपिनं महत्।।१३।। नलवेणुशरस्तम्बकुशकीचकगह्वरम्। घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरम्।।१४।। परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः। स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः।।१५।। तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आस्थितः। आत्मनाऽऽत्मानमात्मस्थं यथाश्रुतमचिन्तयम्।।१६।। ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा। औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः।।१७।। प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः। आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने।।१८।। रूपं भगवतो यत्तन्मनःकान्तं शुचापहम्। अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्मना इव।।१९।। दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि। वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः।।२०।।

सङ्ग्रहोक्तिः

तेन कारणेन सा मृता।।९।। तदा मातुर्मरणं भगवतोऽनुग्रहं मन्यमानोऽहं तस्मादाश्रमादुत्तरां दिशमगमम्।।१०।। तत्र देश-नगर-ग्राम-गोकुल-रत्नाद्युत्पत्ति-खेट-गिरितट-पूग-पुष्पादिवाटिका-वनोपवनानि।।११।। स्वर्णरजतादिधातुजनकान् पर्वतान् गजैर्भग्नान् वृक्षान् स्वच्छजलमयान् जलाशयानतिक्रम्य।।१२।। गतोऽहं पुरस्तात् नलवेणुशरस्तम्बादिभिर्दुर्गमं सर्पोलूकभल्लूकादिभिश्च घोरं वनमेकाक्येव प्रवेशं कृतवान्।।१३-१४।। ततस्तृषा व्याप्तो बुभुक्षितश्चाहं नद्यां स्नात्वा जलं पीत्वा विगतश्रमो जातः।।१५।। ततस्तस्मिन् निर्जनेऽरण्ये पिप्पलवृक्षतले चेतसि हृदयकमलस्थं परमहंसेभ्यो यथाश्रुतं परमात्मानमचिन्तयम्।।१६।। अभ्यासवशीकृतेन चेतसा हरेश्चरणकमलं ध्यायतो मे हृदि शनै र्हरिराविरासीत्।।१७।। तदा प्रेमातिरेकेण पुलकिताङ्गोऽहमानन्दमहापूरे मग्नः सन् देहमात्मानं च नाऽपश्यम्।।१८।। मनोमोहकं शोकापहं च भगवतस्तद्रूपमवलोक्य वैक्लव्यात् सहसा स्वासनादुत्थितः।।१९।।

एवं यतन्तं विजने मामाहागोचरो गिराम्। गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ।।२१।।हन्तास्मिञ्जन्मनि भवान् न मां द्रष्टुमिहार्हति। अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम्।।२२।। सकृद् यद् दर्शितं रूपमेतत्कामाय तेऽनघ। मत्कामः शनकैः साधुः सर्वान्मुञ्चति हृच्छयान्।।२३।। सत्सेवयाऽदीर्घया ते जाता मयि दृढा मतिः। हित्वावद्यमिमं लोकं गन्ता मज्जनतामसि।।२४।। मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्। प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात्।।२५।। एतावदुक्त्वा विरराम तन्महद् भूतं नभोलिङ्गमलिङ्गमीश्वरम्। अहं च तस्मै महतां महीयसे शीर्ष्णाऽवनामं विदधेऽनुकम्पितः।।२६।। नामान्यनन्तस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन्। गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः।।२७।। एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः। कालः प्रादुरभूत्काले विद्युत्सौदामनी यथा।।२८।। प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्। आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिकः।।२९।।

सङ्ग्रहोक्तिः

तद्रूपं पुनर्दिदृक्षुरहं प्रयतमानोऽपि नाऽपश्यम्।।२०।। तस्मिन् निर्जनेऽरण्य इत्थं प्रयतन्तं मामुद्दिश्य वाचामगोचरो भगवान् मम व्यथां शमयन्निव गम्भीरया मधुरया च वाचा मामवोचत् ।।२१।। हे नारद! अस्मिन् जन्मनि भवान् मां द्रष्टुं नार्हति, कुतः अविनष्टमनोमलानां कुयोगिनां कृतेऽहं दुदर्शोऽस्मि।।२२।।हे अनघ! मया सकृद् यद्रूपं दर्शितं तत्तु मय्यनुरागायैव. मां द्रष्टुं कामयमानः साधुः हृद्गतान् कामादीन् दोषान् मुञ्चति।।२३।। साधूनां सेवया ते मतिर्मयि दृढा जाता, अत एवेमं निन्द्यं लोकं परित्यज्य त्वं मत्पार्षदो भविता।।२४।। साधूनां सेवया ते मतिः स्मृतिश्च मदनुग्रहात् प्रलयेऽपि कर्ह्यपि न विनंक्ष्यति।।२५।।एतावन्मात्रमुक्त्वा नभोलिङ्गं दिव्यशरीरमन्तर्हितम्, मयाऽपि तस्मै महाभूताय प्रेम्णा शिरसा प्रणामः कृतः।।२६।। तदनन्तरं निर्लज्जः सन् भगवतो नामानि पठन्, तेन कृतानि मङ्गलमयानि चरित्राणि गायन् पृथिवीमटन्नहं कालस्य प्रतीक्षामकार्षम्।।२७।।एवं कृष्णमतेर्विमलमनसो विषयेष्वनासक्तस्य मे मृत्युकालः सम्प्राप्तः।।२८।। शुद्धां भागवतीं तनुं मयि प्राप्तवति सति प्रारब्धकर्मसमाप्तौ

कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः। शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः ।।३०।। सहस्रयुगपर्यन्ते उत्थायेदं सिसृक्षतः। मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे।।३१।। अन्तर्बहिश्च लोकांस्त्रीन् पर्येम्यस्कन्दितव्रतः। अनुग्रहान्महाविष्णोर-विघातगतिः क्वचित्।।३२।। देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम्। मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम्।।३३।। प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः। आहूत इव मे शीघ्रं दर्शनं याति चेतसि।।३४।। एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः। भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम्।।३५।। यमादिभिर्योगपथैः कामलोभहतो मुहुः मुकुन्दसेवया यद्वत्तथाऽऽत्माद्धा न शाम्यति।।३६।। सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयानघ। जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम्।।३७।। *सूत उवाच* - एवं सम्भाष्य भगवान्नारदो वासवीसुतम्। आमन्त्र्य वीणां रणयन् ययौ यादृच्छिको मुनिः।।३८।। अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः। गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत्।।३९।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे षष्ठोऽध्यायः।।६।।

सङ्ग्रहोक्तिः

पाञ्चभौतिको मम देहो न्यपतत्।।२९।। ततः कल्पान्त इदं जगत् स्वस्मिन् प्रविलाप्य प्रलयार्णवे शिशयिषोः ब्रह्मणः श्वासेन सहाऽहं तस्य हृदयेऽविशम्।।३०।। सहस्रयुगपरिमितस्वनिशावसाने विश्वं स्रष्टुमिच्छतो ब्रह्मणः प्राणेभ्योऽहं मरीचिमुख्या ऋषयश्च जज्ञिरे।।३१।। सोऽहं महाविष्णोरनुग्रहात् त्रिलोक्या अन्तर्बहिश्चाविहतगतिरखण्डितबृहद्व्रतः सन् सञ्चरामि।।३२।। इमां देवदत्तां महतीं वीणां वादयन् हरिकथां गायन्नहं ब्रह्माण्डं चरामि।।३३।। इत्थं भगवद्यशो गायतो मे भगवान् आहूत इव दर्शनं ददाति।।३४।। विषयासक्तचित्तानां जनानां कृते केवलं हरेर्गुणगानमेव मया प्लवो दृष्टः।।३५।। विषयिणां जनानां कामलोभादिभिरभिभूतं मनो यथा भगवत्सेवया शान्तिं लभते तथा यमनियमाद्युपायैर्न लभते।।३६।। हे पुण्यात्मन्! त्वया यत् पृष्टं तदात्मजन्मकर्मरहस्यं सर्वं वृत्तान्तमकथयम्।।३७।। *सूत उवाच* - वासवीपुत्रं व्यासमेवमाभाष्य स्वां वीणां रणयन् स्वेच्छाचारी नारदो ततो निर्जगाम।।३८।। अहो! देवर्षिर्धन्यः, यतः श्रीहरेर्यशो वीणया गायन् हर्षमग्नः सन्नातुरं जगत् रमयति।।३९।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः।।६।।

अथ सप्तमोऽध्यायः ।।७।।

शौनक उवाच – निर्गते नारदे सूत भगवान् बादरायणः। श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः।।१।। *सूत उवाच* – ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे। शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः।।२।। तस्मिन् स्व आश्रमे व्यासो बदरीषण्डमण्डिते। आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयम्।।३।। भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले। अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयाम्।।४।। यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्। परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते।।५।। अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे। लोकस्याजानतो विद्वांश्चक्रे सात्वत-संहिताम्।।६।। यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे। भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा।।७।। स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम्। शुकमध्यापयामास निवृत्तिनिरतं मुनिः।।८।।

सङ्ग्रहोक्तिः

अथ सप्तमोऽध्यायः ।।७।।

परीक्षिज्जन्म अश्वत्थाम्ने दण्डदानञ्च

शौनक उवाच – हे सूत! एवमुक्त्वा नारदे निर्गते सति भगवान् बादरायणो व्यासः किमकरोत्?।।१।। *सूत उवाच* – ब्रह्मनद्याः सरस्वत्याः पश्चिमे तटे शम्याप्रासनाम्ना प्रसिद्धो व्यासस्याऽऽश्रमोऽस्ति।।२।। बदरीतरुमण्डिते तस्मिन्नाश्रमे व्यास आचम्य स्थितः सन् मनसि चिन्तयामास।।३।। भक्तियोगेन विमले मनसि श्रीहरिमूर्तावस्थापिते सति प्रथमं परमपुरुषं ततस्तच्छरीरभूतां मायां चाऽपश्यत्।।४।। स्वरूपस्वभावगुणैः प्रकृतेः (मायायाः) विलक्षणोऽपि जीवो यया मोहितः सन् गुणत्रयपरिणामात्मकं शरीरमेव आत्मानं मनुते, तत्कृतमनर्थं च प्राप्नोति।।५।। प्रत्यक्षे परमेश्वरे भक्तियोग एव सर्वानर्थोपशमनोपाय इति विद्वान् व्यासोऽजानतो लोकस्यार्थे भागवतसन्दर्भरूपसंहितां चक्रे।।६।। यस्याः श्रवणे कृते सति पुंसः शोकमोहभयापहा परमपुरुषे श्रीकृष्णे भक्तिरुत्पद्यते।।७।। स मुनिर्व्यासः इमां भागवतीं संहितां विरचय्य निवृत्तिपरं स्वसुतं शुकदेवमध्यापयामास।।८।।

शौनक उवाच – स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः। कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ।।९।। *सूत उवाच– आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ।।१०।। हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः। अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ।।११।।* परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम्। संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम् ।।१२।। यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु। वृकोदराविद्धगदाभिमर्शभग्नोरुदण्डे धृतराष्ट्रपुत्रे ।।१३।। भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि। उपाहरद् विप्रियमेव तस्य तद् जुगुप्सितं कर्म विगर्हयन्ति ।।१४।। माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना। तदाऽरुदद्वाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ।।१५।। तदा शुचस्ते प्रमृजामि भद्रे यद् ब्रह्मबन्धोः शिर आततायिनः। गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा ।।१६।। इति प्रियां वल्गुविचित्रजल्पैः स सान्त्वयित्वाच्युतमित्रसूतः।

सङ्ग्रहोक्तिः

शौनक उवाच – सर्वत्रोपेक्षकः परमात्मैकपरः स शुकः कस्माद्धेतोरिमां विपुलां संहितामधीतवान्? ।।९।। *सूत उवाच* – अहंभावरूपहृदयग्रन्थिरहिताः स्वस्वरूपसुखे रममाणा मुनयोऽनन्यप्रयोजनां भक्तिं कुर्वन्ति, कुतः तथाभूतगुणो हरिर्वर्तते ।।१०।। निरतिशयज्ञानानन्दादिभिर्हरेर्गुणैराकृष्टमतिः नित्यं विष्णुभक्तप्रियः शुकः श्रीमद्भागवतरूपमाख्यानमध्यगात् ।।११।। अथ राजर्षेः परीक्षितो जन्म कर्म तस्य पाण्डवानां स्थितिं च इति कृष्णकथोदयं वृत्तान्तं कथयिष्यामि ।।१२।। कौरवपाण्डवानां युद्धे यदा बहवो वीराः स्वर्गं गताः, भीमगदया दुर्योधनस्योरुदण्डो भग्नः ।।१३।। तदा स्वस्वामिनः प्रियं कर्तुमश्वत्थामा रात्रौ शयानानां द्रौपदीसुतानां शिरांसि चिच्छेद, तदेतदश्वत्थाम्नो निन्द्यं कर्माद्यापि गर्हयन्ति ।।१४।। तदा सुतानां घोरनिधनं दृष्ट्वा श्रुत्वा च बाष्पपर्याकुलाक्षी द्रौपदी परितप्यमाना सत्यरुदत् तदाऽर्जुनस्तां परिसान्त्वयन्नाह ।।१५।। हे भद्रे! यदाऽहं ब्राह्मणाधमस्याश्वत्थाम्नः शिरः स्वबाणैः छित्वा त्वत्समीपमानीष्ये तदा तच्छिर आक्रम्य दग्धपुत्रा त्वं स्नास्यति ।।१६।। इत्थं सान्त्वनावचनैः प्रियामाश्वास्याऽर्जुनः श्रीकृष्णेन

अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ।।१७।। तमापतन्तं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन। पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथा कः।।१८।। यदाशरणमात्मानमैक्षत श्रान्तवाजिनम्। अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः।।१९।। अथोपस्पृश्य सलिलं संदधे तत्समाहितः। अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ।।२०।। ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतोदिशम्। प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह।।२१।। *अर्जुन उवाच* – कृष्ण कृष्ण महाबाहो भक्तानामभयंकर। त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः।।२२।। त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ।।२३।। स एव जीवलोकस्य मायामोहितचेतसः। विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ।।२४।। तथायं चावतारस्ते भुवो भारजिहीर्षया। स्वानां चानन्यभावानामनुध्यानाय चासकृत् ।।२५।। किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं। सर्वतोमुखमायाति तेजः परमदारुणम्।।२६।। *श्रीभगवानुवाच* – वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम्।

।। सङ्ग्रहोक्तिः ।।

साकं रथमारुह्य तमश्वत्थामानमन्वधावत् ।।१७।। स्वमनुधावन्तमर्जुनं दूरादेव वीक्ष्योद्विग्नमनाः कुमारघाती द्रौणिः प्राणपरीप्सया पलायते स्म ।।१८।। यदाऽऽश्वत्थाम्नो वाजिनः श्रान्तास्तदाऽन्यं कमपि स्वरक्षकं न दृष्ट्वा स ब्रह्मास्त्रमेव रक्षकं मेने ।।१९।। इत्थं प्राणसंकटे प्राप्ते तदुपसंहारमजानन्नप्यश्वत्थामा सलिलमुपस्पृश्य ब्रह्मास्त्रं सन्दधे ।।२०।। तदा सर्वतो दिशं प्रादुर्भूतं प्राणापद्रूपं तत्तेजो वीक्ष्याऽर्जुनः कृष्णमुवाच ।।२१।। हे महाभाग! कृष्ण! त्वं भक्तानां भयहारी संसारतापतप्तानां मुक्तिदायकोऽसि ।।२२।। त्वं साक्षात् परमेश्वर आद्यः पुरुषोऽसि, स्वचिच्छक्त्या मायां निराकृत्य स्वे महिम्नि प्रतिष्ठितो वर्तसे ।।२३।। स एव त्वं मायामोहितचेतसो जीवसमुदायस्य धर्मार्थकामादिलक्षणं श्रेयः स्ववीर्येण विधत्से ।।२४।। अयं तवावतारो भुवो भारहरणाय स्वभक्तानां मुहुर्मुहुर्ध्यानाय चास्ति ।।२५।। एतत् पुरो वर्तमानं प्रचण्डं ते सर्वतोमुखं तेजः किम् कुतो वा आयाति, तदहं न वेद्मि ।।२६।। *श्रीभगवानुवाच* – हे अर्जुन! –

नैवासौ वेद संहारं प्राणबाध उपस्थिते।।२७।। न ह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्षणम्। जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा।।२८।। *सूत उवाच* - श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा। स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे।।२९।। संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते। आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत्।।३०।। दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान् प्रदहन्महत्। दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत।।३१।। प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम्। मतं च वासुदेवस्य संजहारार्जुनो द्वयम्।।३२।। तत आसाद्य तरसा दारुणं गौतमीसुतम्। बबन्धामर्षताम्राक्षः पशुं रशनया यथा।।३३।। शिबिराय निनीषन्तं रज्वा बद्ध्वा रिपुं बलात्। प्राहार्जुनं प्रकुपितो भगवानम्बुजेक्षणः।।३४।। *मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि। योऽसावनागसः सुप्तानवधीन्निशि बालकान्।।३५।। मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम्। प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् ।।३६।।*

।। सङ्ग्रहोक्तिः ।।

एतदश्वत्थामप्रयुक्तं ब्रह्मास्त्रं जानीहि, सोऽस्य परिहारं न जानाति।।२७।। एवं च अस्य ब्रह्मास्त्रस्य निवारकमन्यत् किमप्यस्त्रं नास्ति, अस्त्रप्रयोगोपसंहारज्ञो भवान् ब्रह्मास्त्रतेजसैव एतत्तेजो जहि।।२८।। *सूत उवाच* - भगवद्वचनं श्रुत्वा परवीरहाऽर्जुनः अप आचम्य श्रीकृष्णं परिक्रम्य ब्रह्मास्त्रं निवर्तयितुं प्रतिभटं ब्रह्मास्त्रमेव सन्दधे।।२९।। तत उभयोरस्त्रयोस्तेजसी एकत्र भूत्वा वह्निसूर्यवदाकाशं भूमिं चाच्छाद्य ववृधाते।।३०।। एवं दह्यमानां त्रिलोकीमवलोक्य जनास्तं प्रलयकालाग्निं मेनिरे।।३१।। तदा लोकोपमर्दनरूपं प्रजोपद्रवं कृष्णाभिप्रायं च ज्ञात्वा तद् उभेऽप्यस्त्रे अर्जुनो निवारयामास।।३२।। ततः रोषताम्राक्षोऽर्जुनः समीपमेत्य दारुणमश्वत्थामानं रशनया पशुमिव बलेन बबन्ध।।३३।। रिपुं द्रोणपुत्रं बलाद् बध्वा शिबिरं प्रति नेतुमिच्छन्तमर्जुनं राजिवलोचनः कृष्णः प्रकुपितः सन् प्राह।।३४।। हे पार्थ! ब्राह्मणाधममेनं जीवयितुं त्वं नार्हसि, योऽसावश्वत्थामा रात्रौ सुप्तान् निरपराधान् बालकानवधीत्।।३५।। धर्मवित् पुमान् मद्यपानेन मदान्धं, प्रमत्तं, वातपित्तप्रकोपादिनोन्मत्तं सुप्तं, बालं, स्त्रीं, जडं,

स्वप्राणान् यः परप्राणैः प्रपुष्णात्यघृणः खलः। तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ।।३७।। प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम। आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा।।३८।। तदसौ वध्यतां पाप आततताय्यात्मबन्धुहा। भर्तुश्च विप्रियं वीर कृतवान् कुलपांसनः।।३९।। एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः। नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान्।।४०।। अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः। न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान् हतान्।।४१।। तथाऽऽहृतं पशुवत् पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन। निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च।।४२।। *उवाच चासहन्त्यस्य बन्धनानयनं सती। मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः।।४३।।* सरहस्यो धनुर्वेदः सविसर्गोपसंयमः। अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात्।।४४।। स एष भगवान् द्रोणः प्रजारूपेण वर्तते। तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी।।४५।। तद्धर्मज्ञः महाभाग भवद्भिर्गौरवं कुलम्।

।। सङ्ग्रहोक्तिः ।।

शरणागतं, रथादिसाधनशून्यं, भीतं रिपुमपि न हन्ति।।३६।। यो निर्दयः खलः परप्राणैः स्वप्राणान् पोषयति तस्य वध एव श्रेयान्, अन्यथा अकृतप्रायश्चित्तत्वात् पुमान् नरकं प्रयाति ।।३७।। "हे मानिनि! तव पुत्रहन्तुः शिरोऽहमानयिष्ये" इति मम शृण्वतः भवता पाञ्चाल्यै प्रतिज्ञातमस्ति।।३८।। हे वीर! अयं पापात्माऽऽततायी स्वामिनोऽप्यनिष्टकारी वर्तते, अत एष कुलदूषको वध्यताम्।।३९।। एवं धर्मं परीक्षता कृष्णेन प्रेरितोऽप्यर्जुनोऽश्वत्थामानं हन्तुं नैच्छत्।।४०।। अथाऽर्जुनः स्वशिबिरमुपेत्य शत्रुहतानात्मजान् शोचन्त्यै द्रौपद्यै तं द्रोणपुत्रं न्यवेदयत्।।४१।। पशुवत् पाशेन बद्ध्वाऽऽनीतं निन्द्येन कर्मणाऽधोमुखं तं गुरुसुतं दृष्ट्वा द्रौपदी ननाम तथा चाऽस्य बन्धनानयनमसहन्ती सती सा प्राह – "एनं मुच्यतां मुच्यताम्, अयं ब्राह्मणोऽस्माकं नितरां गुरुरस्ति।।४२-४३।। त्वयाऽस्य पितुः सकाशात् सरहस्यो धनुर्वेदः सप्रयोगोपसंयमोऽस्त्रनिचयश्च शिक्षितोऽस्ति।।४४।। एष तव गुरुः स द्रोणाचार्य एवाधुना पुत्ररूपेण विद्यते, वीरमाता कृपी पुत्रस्यैव हेतोरद्यापि जीवति।।४५।।

वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः॥४६॥ *मा रोदीदस्य जननी गौतमी पतिदेवता। यथाहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः॥४७॥* यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः। तत् कुलं प्रदहत्याशु सानुबन्धं शुचार्पितम्॥४८॥ *सूत उवाच* – धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत्। राजा धर्मसुतो राज्ञ्याः प्रत्यनन्दद्वचो द्विजाः॥४९॥ नकुलः सहदेवश्च युयुधानो धनञ्जयः। भगवान् देवकीपुत्रो ये चान्ये याश्च योषितः॥५०॥ तत्राहामर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः। न भर्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा॥५१॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः। आलोक्य वदनं सख्युरिदमाह हसन्निव॥५२॥ *श्रीभगवानुवाच – ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः। मयैवोभयमाम्नातं परिपाह्यनुशासनम्* ॥५३॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सान्त्वयता प्रियाम्। प्रियं च भीमसेनस्य द्रौपद्या मह्यमेव च॥५४॥ *सूत उवाच* – अर्जुनः सहसाऽऽज्ञाय हरेर्हार्दमथासिना। मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम्॥५५॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभम्। तेजसा मणिना हीनं शिबिरान्निरयापयत्॥५६॥

॥ सङ्ग्रहोक्तिः॥

हे धर्मज्ञ! शश्वत् पूज्यं गुरुकुलं सन्तापयितुं त्वं नार्हसि॥४६॥ मृतपुत्राऽश्रुमुखी यथाऽहं रोदिमि तथा पतिदेवता अस्य जननी कृपी मा रोदीत्॥४७॥ अजितात्मभी राजभिः कोपितं सन्तापितं च ब्रह्मकुलं सपरिवारं राजन्यकुलं प्रदहति॥४८॥ *सूत उवाच* – एवं धर्मयुक्तं न्यायसंगतं च द्रौपद्या वचनं श्रुत्वा युधिष्ठिरो नकुलः सहदेवः सात्यकि र्धनंजयो देवकीपुत्रः कृष्णश्चैते ते सर्वे तस्या अन्या योषितश्च प्रशंसां चक्रुः॥४९-५०॥ किन्तु तदा क्रुद्धो भीमः प्राह – आत्मनो भर्तुश्च विप्रियं कृत्वा येन सुप्ताः शिशवो वृथा हतास्तस्य वध एव न्याय्यः॥५१॥ द्रौपद्या भीमस्य च वचनं श्रुत्वा सख्युरर्जुनस्य मुखमवलोक्य प्रहसन्निव भगवानाह॥५२॥ *श्रीभगवानुवाच* – हे सखे! "वधयोग्योऽपि त्वमित्थं कार्यं कुरु, येन तव प्रतिज्ञातं सत्यं स्यात्," मम द्रौपद्या भीमस्य च सन्तोषः स्यात्॥५४॥ *सूत उवाच* – अर्जुनः कृष्णस्याभिप्रायं ज्ञात्वा स्वखड्गेनाश्वत्थाम्नो मूर्ध्नः केशैः सह मणिं जहार॥५५॥ रशनाबद्धं विमुच्य –

वपनं द्रविणादानं स्थानान्निर्यापणं तथा। एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः।।५७।। पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया। स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम्।।५८।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे सप्तमोऽध्यायः।।७।।

अथ अष्टमोऽध्यायः ।।८।।

सूत उवाच - अथ ते सम्परेतानां स्वानामुदकमिच्छताम्। दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुः स्त्रियः।।१।। ते निनीयोदकं सर्वे विलप्य च भृशं पुनः। आप्लुता हरिपादाब्जरजःपूतसरिज्जले।।२।। तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम्। गान्धारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः।।३।। सान्त्वयामास मुनिभिर्हतबन्धून् शुचार्पितान् भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम्।।४।।

।। सङ्ग्रहोक्तिः ।।

बालहत्याहतप्रभं तेजोहीनं तं शिबिरान्निःसारयामास।।५६।। शिरोमुण्डनं धनहरणं स्थानान्निःसारणमेव ब्राह्मणाधमानां कृते दण्डो विहितः, शारीरिकी यातना तु निषिद्धा।।५७।। ततो द्रौपद्या सह सर्वे पाण्डवाः शोकार्ताः सन्तो मृतानां बालकानां दाहाद्यौर्ध्वदैहिकं कर्म कृतवन्तः।।५८।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे सङ्ग्रहोक्त्यां सप्तमोऽध्यायः।।७।।

अथ अष्टमोऽध्यायः ।।८।।

अश्वत्थाम्नोऽस्त्रात् परीक्षितो रक्षा कुन्तीकृता कृष्णस्तुतिश्च

सूत उवाच - अथ पाण्डवा मृतानां बान्धवानां तिलोदकं कर्तुं द्रौपद्यादिस्त्रीः पुरस्कृत्य श्रीकृष्णेन सहिता गङ्गातटं ययुः।।१।। तत्र मृतकानामर्थे तिलोदकं दत्वा भृशं विलप्य पुनर्हरिचरणाब्जपूतसरिज्जले स्नात्वा तस्थुः।।२।। तदा तत्र विदुरेण सहासीनं धृतराष्ट्रं गान्धारीं पुत्रशोकार्तां द्रौपदीं कुन्तीं शोकार्तान् पांडवांश्च ऋषिभिः सह समुपस्थितः कृष्णो

साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतम्। घातयित्वासतो राज्ञः कचस्पर्श-क्षतायुषः।।५।। याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः। तद्यशः पावनं दिक्षु शतमन्योरिवातनोत्।।६।। आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः। द्वैपायनादिभि-र्विप्रैः पूजितैः प्रतिपूजितः।।७।। गन्तुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः। उपलेभे-ऽभिधावन्तीमुत्तरां भयविह्वलाम्।।८।। *उत्तरोवाच* - पाहि पाहि महायोगिन्देवदेव जगत्पते। नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम्।।९।। अभिद्रवति मामीश शरस्तप्तायसो विभो। कामं दहतु मां नाथ मा मे गर्भो निपात्यताम्।।१०।। *सूत उवाच* - उपधार्य वचस्तस्या भगवान् भक्तवत्सलः। अपाण्डवमिदं कर्त्तुं द्रौणेरस्त्र-मबुध्यत।।११।। तर्ह्येवाथ मुनिश्रेष्ठ पाण्डवाः पञ्च सायकान्। आत्मनोऽभिमुखा-न्दीप्तानालक्ष्यास्त्राण्युपाददुः।।१२।। व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम्। सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः।।१३।। अन्तःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः।

।। सङ्ग्रहोक्तिः।।

भूतेष्वनिवार्यां कालगतिं दर्शयन्नाश्वासयामास।।३-४।। कपटद्यूतातिभिर्हृतं युधिष्ठिरस्य राज्यं साधयित्वा, द्रौपद्याः केशापकर्षणेन क्षीणायुषो दुष्टान् नृपानर्जुनादिभिर्घातयित्वा, त्रिभिरश्वमेधैर्युधिष्ठिरं याजयित्वा, पूतं तद्यशो दिक्षु विदिक्षु च प्रसार्य, पाण्डवानापृच्छ्य व्यसादिभिः सत्कृतो भगवान् श्रीकृष्णः सात्यकिनोद्धवेन च सह द्वारकां गन्तुं रथमारुरोह, अस्मिन्नेवावसरे भयविह्वलां "हे कृष्ण! हे कृष्ण! मां पाहि" इत्युक्तवतीं धावन्तीमुत्तरां कृष्णः पुरतोऽपश्यत्, तदा साऽब्रवीत् "त्वदतिरिक्तः कोऽपि मम रक्षको नास्ति"।।५-९।। हे ईश! तप्तलोहमयः शरो मामभिधावति, स मां यथेष्टं दहतु, किन्तु मम गर्भं न निपात्यताम्।।१०।। *सूत उवाच* - भक्तवत्सलो भगवान् तस्या वचनमाकर्ण्याऽपाण्डवं भूतलं कर्तुमश्वत्थाम्ना प्रयुक्तमिदं ब्रह्मास्त्रं वर्तत इति ज्ञातवान्।।११।। हे मुनिश्रेष्ठ! तदानीमेवाभिमुखान् दीप्तान् पञ्च बाणान् समीक्ष्य युधिष्ठिरादयो पाण्डवा अस्त्राण्युपाददुः।।१२।। अनन्यानां स्वभक्तानामुपरि समायान्तं तत्संकटं वीक्ष्य श्रीकृष्णः स्वसुदर्शनेन चक्रेण स्वेषां तेषां रक्षां

स्वमाययाऽऽवृणोद्गर्भं वैराट्याः कुरुतन्तवे।।१४।। यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम्। वैष्णवं तेज आसाद्य समशाम्यद् भृगुद्वह।।१५।। मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते। य इदं मायया देव्या सृजत्यवति हन्त्यजः।।१६।। ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया। प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती।।१७।। *कुन्त्युवाच* – नमस्ये पुरुषं त्वाऽऽद्यमीश्वरं प्रकृतेः परम्। अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितम्।।१८।। मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम्। न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा।।१९।। तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः।।२०।। कृष्णाय वासुदेवाय देवकीनन्दनाय च। नन्दगोपकुमाराय गोविन्दाय नमो नमः।।२१।। नमः पङ्कजनाभाय नमः पङ्कजमालिने। नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ।।२२।। यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता। विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात्।।२३।।

।। सङ्ग्रहोक्तिः ।।

व्यधात्।।१३।। ततः सर्वान्तरात्मतयाऽवस्थितो योगेश्वरः कृष्णः कुरुवंशविस्तारं कर्तुमुत्तराया गर्भं स्वकीय योगसामर्थ्येनाऽऽवृणोत्।।१४।। यद्यपि ब्रह्मास्त्रममोघं प्रतिकाररहितं भवति तथापि वैष्णवं तेजः सुदर्शनमासाद्य तदशाम्यत्।।१५।। सर्वाश्चर्यशक्तिप्रचुरे कृष्ण एतदाश्चर्यं मा मंस्थाः, य इदं चिदचिदात्मकं जगत् मायात्मकाश्चर्यशक्त्या सृजति, अवति हन्ति च।।१६।। ब्रह्मास्त्रभयमुक्तैः पुत्रैर्युधिष्ठिरादिभिर्द्रौपद्या च सह सती कुन्ती प्रयाणाभिमुखं कृष्णमाह।।१७।। *कुन्त्युवाच* – सर्वजगत्कारणं प्रकृतेः परं परमेश्वरं ब्रह्मादिस्थावरान्तानामन्तर्बहिश्चाऽवस्थितं त्वां नमस्करोमि।।१८।। त्वं सदा स्वकीयया मायाजवनिकयाऽऽच्छन्नोऽसि, अतो मूढचक्षुषो जना अधोक्षजं त्वां नावलोकयन्ति।।१९।। निर्मलान्तःकरणानां मुनीनां भक्तियोगं कारयितुमवतीर्णं त्वां वयं स्त्रियः कथं जानीमहि।।२०।। अतो हे कृष्ण! वासुदेवाय, देवकीनन्दनाय, नन्दगोपकुमाराय, गोविन्दाय तुभ्यं नमो नमः, हे पद्मनाभ! कमलमालिने राजिवलोचनाय, पद्मपादाय तुभ्यं नमोऽस्तु।।२१-२२।। हे हृषीकेश! खलेन कंसेनातिचिरं

विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः। मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः।।२४।। *विपदः सन्तु नः शश्वत्तत्र तत्र जगद्गुरो। भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम्।।२५।।* जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्। नैवार्हत्यभिधातुं वै त्वामकिञ्चनगोचरम्।।२६।। नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये। आत्मारामाय शान्ताय कैवल्यपतये नमः।।२७।। न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडम्बनम्। न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद् द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम्।।२९।। जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः। तिर्यङ्नृषिषु यादस्सु तदत्यन्तविडम्बनम्।।३०।। गोप्याददे त्वयि कृतागसि दाम तावद् या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम्। वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति।।३१।। केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये। यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम्।।३२।।

।। सङ्ग्रहोक्तिः ।।

कारागारे रुद्धा देवकी यथा त्वया विमोचिता तथा सपुत्राऽहं नाथेन त्वया विपद्गणाद् विमोचिताऽस्मि।।२३।। हे हरे! कालकूटविषात्, लाक्षागृहे वह्नेः, हिडम्बादिराक्षसदर्शनात्, द्यूतस्थानात्, वनवाससंकटात्, युद्धे महारथिनामस्त्रेभ्यो द्रौण्यस्त्रतश्च त्वया रक्षिता स्मः, हे जगद्गुरो! तत्र तत्र नो शश्वत् विपदः सन्तु, यत आपत्सु तत्परिहारक्षमं भवतो दर्शनं स्यात्।।२४-२५।। ऐश्वर्यादिमदमत्ता जना दीनबन्धोर्भवतो नामापि वक्तुं न शक्नुवन्ति।।२६।। हे दीनसर्वस्व! गुणातीत! शान्त! आत्माराम! मोक्षपते! तुभ्यं नमोनमः।।२७।। हे कृष्ण! सर्वत्र समं व्याप्तमनादिनिधनं जगदीश्वरं कालं त्वामहं मन्ये।।२८।। नृणामेतदेव विडम्बनम्, यत् कोऽपि त्वच्चेष्टितं न जानाति, तव कश्चन द्वेष्यो प्रियो वा नास्ति।।२९।। हे विश्वात्मन्! अजन्मनस्तव पशु-मनुष्य-ऋषि-जल-जन्तुयोनिषु वराह-राम-वामन-मत्स्यादिरूपेण तव यज्जन्म तत्त्वनुकरणमात्रमेव।।३०।। दधिभाण्डस्फोटनरूपेण तवापराधेन क्रुद्धया यशोदया त्वां बद्धुं रज्जुं गृहीतवत्या "अहं ताडितः स्याम्" इति भियाऽऽधोमुखस्य मृत्योरपि भयदस्य तव स्मृता दशा मां विमोहयति।।३१।। अजन्मानमपि त्वां पुण्यकीर्तेर्यदोःकुले मलयाचले -

अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात्। अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ।।३३।। भारावतरणायान्ये भुवो नाव इवोदधौ। सीदन्त्या भूरिभारेण जातो ह्यात्मभुवार्थितः ।।३४।। भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः। श्रवणस्मरणार्हाणि करिष्यन्निति केचन ।।३५।। शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः। त एव पश्यन्त्यचिरेण तावकं भवप्रावाहोपरमं पदाम्बुजम् ।।३६।। अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः। येषां न चान्यद्भवतः पदाम्बुजात् परायणं राजसु योजितांहसाम् ।।३७।। के वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः। भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ।।३८।। नेयं शोभिष्यते तत्र यथेदानीं गदाधर। त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ।।३९।। इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः। वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षितैः ।।४०।।

।। सङ्ग्रहोक्तिः ।।

चन्दनमिव जातं केचिदाहुः ।।३२।। पूर्वजन्मनि सुतपःप्रश्निरूपयोर्वसुदेवदेवक्योः प्रार्थनया तद्गृहे लोकरक्षार्थमसुरनाशार्थं चाऽजन्मा त्वमुत्पन्न इति केचिदाहुः ।।३३।। पृथिव्याः पापभारावतारणाय ब्रह्मप्रार्थनया त्वमवतीर्ण इत्यन्ये ब्रुवन्ति ।।३४।। अस्मिन् संसारेऽविद्याकामकर्मभिः क्लिश्यमानानां मानवानां सुखाय श्रवणस्मरणयोग्यानि चरितानि कर्त्तुमेव त्वमवतीर्णोऽसि, इति केचिद्वदन्ति ।।३५।। ये जना तव लीला निरन्तरं शृण्वन्ति गायन्ति गृणन्ति स्मरन्ति च तवेहितं नन्दन्ति च ते संसारादुद्धारकं ते चरणकमलम-चिरेणैव पश्यन्ति ।।३६।। हे प्रभो! त्वमद्य भक्तान् नः त्यक्तुमिच्छसि किम्? अस्माकं त्वत्पादपद्मं विनाऽन्यः कोऽप्याश्रयो नास्ति ।।३७।। अपि चाऽस्मान् त्वं यदि स्वकीयत्वेन न पश्यति तदा मत्पुत्रा वीरा अपि त्वां विनाऽतितुच्छा एव ।।३८।। किं च त्वच्चरणचिह्नांकितेयं भूरधूना यथा शोभते तथा त्वयि द्वारकां गते सति न शोभिष्यते ।।३९।। त्वद्वीक्षणेन इमे जनपदाः सुपक्वौषधिवनस्पतयः वन-पर्वत-नदी-सागराश्च सर्वे समृद्धा भवन्ति ।।४०।।

अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे। स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु।।४१।। त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत्। रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति।।४२।। श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंश-दहनानपवर्गवीर्य। गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते।।४३।। *सूत उवाच* - पृथयेत्थं कलपदैः परिणूताखिलोदयः। मन्दं जहास वैकुण्ठो मोहयन्निव मायया।।४४।। तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम्। स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः।।४५।। व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा। प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचार्पितः।।४६।। आह राजा धर्मसुतश्चिन्तयन् सुहृदां वधम्। प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः।।४७।। अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः। पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः।।४८।। बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः। न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः।।४९।।

।। सङ्ग्रहोक्तिः।।

हे विश्वेश! विश्वरूप! आत्मीयपाण्डवयादवविषयकं मदीयं दृढं स्नेहबन्धनं त्वं छिन्धि।।४१।। हे मधुपते! मे मतिः त्वय्यनन्यवषया सती गङ्गा सागरे जलौघमिव स्नेहप्रवाहमुद्वहतात्।।४२।। हे श्रीकृष्ण! अखिलगुरो! हे भगवन्! तुभ्यं नमोऽस्तु।।४३।। *सूत उवाच* - इत्थं कुन्त्या मधुरशब्दैः परिगीतमहिमः श्रीकृष्ण आश्चर्यशक्त्या मोहयन्निव मन्दं जहास।।४४।। ततः कुन्तीप्रार्थनया यात्रातो निवृत्तः सन् हस्तिनापुरं प्रविश्य कतिपयदिनान्याऽऽस्थाय सुभद्रादिस्त्रियः कुन्तीं चानुज्ञाप्य पुनर्द्वारकां गन्तुमिच्छुः, स युधिष्ठिरेण निवारितः।।४५।। श्रीकृष्णाभिप्रायमजानद्भिर्व्यासादिभिः, अद्भुतकर्मणा कृष्णेन च बहुधेतिहासवचनैः प्रबोधितोऽपि युधिष्ठिरः शोकमुक्तो न जातः।।४६।। हे विप्राः! सुहृदामात्मीयानां च वधं चिन्तयन् धर्मपुत्रो युधिष्ठिरः स्नेहेन मोहं प्राप्तः सन्निदमाह।।४७।। अहो! दुरात्मनो मे हृदि दृढमज्ञानं पश्यत, श्वशृगालादिभक्ष्यस्य देहस्य कृते मया बह्व्योऽक्षौहिण्यः सेना हताः।।४८।। बाल-द्विज-सुहृत्-मित्र-पितृ-भ्रातृ-गुरूणां द्रोग्धुर्मे कोटिभिर्वर्षैरपि नरकान्मोक्षो न भविता।।४९।।

नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम्। इति मे न तु बोधाय कल्पते शासनं वचः।।५०।। स्त्रीणां मद्धतबन्धूनां द्रोहो योऽसाविहोत्थितः। कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम्।।५१।। यथा पङ्केन पङ्काङ्गं सुरया वा सुराकृतम्। भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति।।५२।।

इति श्रीमद्भावगते महापुराणे प्रथमस्कन्धे अष्टमोऽध्यायः।।८।।

अथ नवमोऽध्यायः ।।९।।

सूत उवाच - इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया। ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत्।।१।। तदा तद्भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः। अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा।।२।। भगवानपि विप्रर्षे रथेन सधनञ्जयः। स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः।।३।।

।। सङ्ग्रहोक्तिः ।।

"धर्मयुद्धे शत्रुवधजन्यं पापं राज्ञो न" इति शास्त्रवचनं प्रजापालकस्य राज्ञः पक्षे स्थितम्, स्वार्थाय वधकारिणो मे न, अतः पापमेवेदमभूत्।।५०।। समरहतयोद्धृणां विधवास्त्रीणां द्रोहो यो जातः स गृहस्थोचितयज्ञादिकर्मभिर्निवारयितुं शक्यो न।।५१।। पङ्कलिप्तमङ्गं पङ्केन न शुद्ध्यति यथा वा सुरालिप्तं पात्रं सुरया न शुद्ध्यति तथा प्राणिवधपापं यज्ञैर्मार्ष्टुं शक्यं नार्हति।।५२।।

इति श्रीमद्भावगते प्रथमस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः।।८।।

अथ नवमोऽध्यायः ।।९।।

कुरुक्षेत्रे युधिष्ठिराय भीष्मकृतो धर्मोपदेशः श्रीकृष्णस्तुतिश्च

सूत उवाच - इत्थं प्रजाद्रोहाद् भीतो युधिष्ठिरो यत्र कुरुक्षेत्रे भीष्मपितामहः पतितस्तत्र धर्मतत्त्वबुभूत्सया जगाम।।१।। तदा स्वलङ्कृताश्वरथस्था भीमादयो भ्रातरो व्यासधौम्यादयो विप्राश्च तमन्वययुः।।२।। हे विप्रर्षे! सधनञ्जयो भगवान् कृष्णोऽपि रथेन तमन्वगात्, -

दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम्। प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा।।४।। तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम। राजर्षयश्च तत्रासन् द्रष्टुं भरतपुङ्गवम्।।५।। पर्वतो नारदो धौम्यो भगवान् बादरायणः। बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः।।६।। वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः। कक्षीवान् गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः।।७।। अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयो-ऽमलाः। शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः।।८।। तान् समेतान् महाभागा-नुपलभ्य वसूत्तमः। पूजयामास धर्मज्ञो देशकालविभागवित् ।।९।। कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम्। हृदिस्थं पूजयामास माययोपात्तविग्रहम्।।१०।। पाण्डुपूत्रानुपासीनान् प्रश्रयप्रेमसङ्गतान्। अभ्याचष्टाऽनुरागास्रैरन्धीभूतेन चक्षुषा ।।११।। अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दनाः। जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः।।१२।। संस्थितेऽतिरथे पाण्डौ पृथा बालप्रजा वधूः। युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः।।१३।।

।। सङ्ग्रहोक्तिः।।

तदा यक्षैः कुबेर इव भ्रात्रादिभिर्युधिष्ठिरः शुशुभे।।३।। ततः स्वर्गात् भूमौ पतितं देवमिव शरशय्यायां स्थितं भीष्मं विलोक्य ते सर्वे युधिष्ठिरादयस्तं प्रणेमुः।।४।। तदा सर्वे ब्रह्मर्षयो देवर्षयो राजर्षयश्च तं भीष्मं द्रष्टुं तत्र समागता आसन्।।५।। ते यथा - पर्वतः, नारदः, धौम्यः, व्यासः, बृहदश्वः, भरद्वाजः, परशुरामः, वसिष्ठः, इन्द्रप्रमदः, त्रितः, गृत्समदः, असितः, कक्षीवान्, गौतमः, अत्रिः, कौशिकः, सुदर्शनः, शुकः, कश्यपः, बृहस्पतिश्च, तथाऽन्येऽपि बहवो मुनयः सशिष्यास्तं द्रष्टुं समागता आसन्।।६-८।। देशकालधर्मज्ञो भीष्मः शरशय्यायां शयानोऽपि समागतान् महाभागान् नमस्कृत्य पूजयामास।।९।। कृष्णमाहात्म्याभिज्ञो भीष्मः समीपस्थं स्वसंकल्पोपात्तविग्रहं जगदीश्वरं श्रीकृष्णं तु भगवद्बुद्ध्या विलोक्य सविशेषं पूजयामास ।।१०।। ततः पार्श्वस्थान् विनीतान् पाण्डवान् सस्नेहाश्रुपूर्णेन चक्षुषा पश्यन् भीष्मोऽभ्यभाषत ।।११।। हे पाण्डुपुत्राः! यूयं कष्टेन जीवितुं नाऽर्हथ, यतो विप्राणां कृष्णस्य धर्मस्य चाऽऽश्रयिणः स्थ।।१२।। पाण्डौ मृते सति बालप्रजा कुन्ती युष्माकं पालने मुहुर्बहून् क्लेशान् प्राप।।१३।।

सर्वं कालकृतं मन्ये भवतां च यदप्रियम्। सपालो यद्वशे लोको वायोरिव घनावलिः।।१४।। यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः। कृष्णोऽस्त्री गाण्डिवं चापं सुहृत्कृष्णस्ततो विपत्।।१५।। न ह्यस्य कर्हिचिद्राजन् पुमान् वेद विधित्सितम्। यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि।।१६।। तस्मादिदं दैवतन्त्रं व्यवस्य भरतर्षभ। तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो।।१७।। एष वै भगवान् साक्षादाद्यो नारायणः पुमान्। मोहयन्मायया लोकं गूढश्चरति वृष्णिषु।।१८।। अस्यानुभावं भगवान् वेद गुह्यतमं शिवः। देवर्षिर्नारदः साक्षाद्भगवान् कपिलो नृप।।१९।। यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम्। अकरोः सचिवं दूतं सौहृदादथ सारथिम्।।२०।। सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित्।।२१।। तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितम्। यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः।।२२।।

।। सङ्ग्रहोक्तिः ।।

युष्माभिर्यत् कष्टं प्राप्तं तत्सर्वं कालकृतं मन्ये, यथा मेघपङ्क्तिः वायोर्वशे तथा सपालो लोकः कालवशेऽस्ति।।१४।। यत्र साक्षाद् धर्मपुत्रो राजा, गदाधारी भीमो, गाण्डीवधारी अर्जुनः श्रीकृष्णो मित्रम्, तत्राऽपि विपद् महदाश्चर्यम्?।।१५।। हे राजन्! यत्र कवयोऽपि मुह्यन्ति तदस्य कृष्णस्य चिकीर्षितं ज्ञातुं न कोऽपि समर्थः।।१६।। अतस्त्वमिदं जगत् सकलं दैवाधीनमिति बुद्ध्या निश्चित्य कृष्णानुगामी सन्ननाथाः प्रजाः पालय।।१७।। एवं कृष्णः साक्षात् भगवानाद्यः पुरुषो नारायणः स्वसंकल्पमय्या शक्त्या गुढः सन् यादवेषु तिष्ठति।।१८।। हे नृप! अस्य कृष्णस्य साक्षात् महिमानं गुह्यतमं सन्तमपि भगवान् शंकरः देवर्षिर्नारदो भगवान् कपिलश्च प्रत्यक्षतया जानाति।।१९।। तं श्रीकृष्णं त्वं मातुलेयं प्रियमित्रं सहृत्तमं च वेत्सि, अथ कदाचिदेनं सचिवं दूतं सौहार्दात् सारथिमप्यकरोः।।२०।। सवान्तर्यामिणः समदृष्टेरद्वितीयस्य निरहङ्कृते र्निर्दोषस्य चास्य कृष्णस्य ममेदं योगयमयोग्यं वेति मतिवैषम्यं क्वचिदपि नास्ति।।२१।। हे भूप! तथाप्येकान्तिकेषु भक्तेषु अस्यानुकम्पां पश्य, यतः कृष्णः प्राणान् त्यजतो मम साक्षाद् दृष्टिविषतां गतो विराजते।।२२।।

भक्त्याऽऽवेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन्। त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः।।२३।। स देवदेवो भगवान् प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम्। प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः।।२४।। *सूत उवाच* - युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे। अपृच्छद्विविधान्धर्मानृषीणां चानुशृण्वताम्।।२५।। पुरुषस्वभावविहितान् यथावर्णं यथाश्रमम्। वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान्।।२६।। दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः। स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः।।२७।। धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने। नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित्।।२८।। धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः। यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः।।२९।। तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं मन आदिपूरुषे। कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेऽमीलितदृग्व्यधारयत्।।३०।। विशुद्धया धारणया हताशुभस्त-दीक्षयैवाशु गतायुधश्रमः। निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम् ।।३१।।

।। सङ्ग्रहोक्तिः।।

यस्मिन् कृष्णे भक्त्या मनो निवेश्य तन्नामसंकीर्तनपरो म्रियमाणो योगी मुक्तिं लभते।।२३।। अतो यावत् मम प्राणान्तो न भवेत् तावत्कालपर्यन्तं ध्यानविषयीभूतोऽपि प्रसन्नहासारुणलोचनः प्रोल्लसन्मुखकमलश्चतुर्भुजः स भगवान् मत्सम्मुखे स्थितो भवतु।।२४।। *सूत उवाच* - इत्थं भीष्मोक्तिं श्रुत्वा युधिष्ठिरः शय्यायां शयानं तं प्रति ऋषीणां समक्षं विविधान् धर्मानपृच्छत्।।२५।। भीष्मोऽपि पुराणादिषु समासतो विस्तारतश्च कथितान् पुरुषस्वभावस्थितिं विचार्य वर्णानामाश्रमाणानां सकामान् निष्कामांश्चाखिलान् धर्मान् दानधर्मान् राजधर्मान् मोक्षधर्मान् स्त्रीधर्मान् भगवद्धर्मांश्च विभागशः कथयामास।।२६-२७।।हे मुने! तत्त्वविद् भीष्म उपायसहितान् धर्मार्थकाममोक्षाख्यान् चतुरः पुरुषार्थान् नानाख्यानेतिहासेषु यथा सन्ति तथा वर्णयामास।।२८।। एवं विधान् धर्मान् वर्णयतस्तस्य भीष्मस्य योगिनामभीप्सित उत्तरायणोऽतियोग्यो मृत्युकालः प्राप्तः।।२९।। तदा सहस्राणां नायको भीष्मो मौनमवलम्ब्य निमीलितनयनः सन् पीताम्बरे चतुर्भुज आदिपुरुषे कृष्णे मनो व्यधारयत्।।३०।। तदा विशुद्धधारणया श्रीकृष्णदर्शनेन च

श्रीभीष्म उवाच – इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि। स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः।।३२।। त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने। वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या।।३३।। युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलङ्कृतास्ये। मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा।।३४।। सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य। स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु।।३५।। व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या। कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु।।३६।। स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः। धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः।।३७।। शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे। प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः।।३८।। विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये।

।। सङ्ग्रहोक्तिः।।

हताशुभो व्यपगतायुधश्रमो भीष्मः शरीरं त्यक्ष्यन् सन् श्रीकृष्णं तुष्टाव।।३१।। *श्रीभीष्म उवाच* – अहो यादवश्रेष्ठे क्वचिद् विहर्तुं मायात्मिकां स्वशक्तिं प्राप्तवति भगवति श्रीकृष्णे संप्रति मयाऽनन्यविषया मतिः स्थापिता।।३२।। अनन्यसुन्दरे नीलवर्णे पीताम्बरधरे कुञ्चितकेशलुलितमुखे श्रीकृष्णस्वरूपे मम प्रीतिरस्तु।।३३।। किं च रणे मत्सायकैर्विभिद्यमानत्वचि तुरगखुरोत्थधूलिधूसरितकेशे श्रमवार्यलंकृतास्ये श्रीकृष्णे मे मनः संलग्नं भवतु।।३४।। अर्जुनवचनमाश्रुत्य निजपरयोः सेनयोर्मध्ये रथमवस्थाप्य स्वदृष्ट्यैव परसैनिकायुर्हृतवति पार्थसखे भगवति श्रीकृष्णे मे प्रीतिर्भवतु।।३५।। दूरस्थितसैन्याग्रभागे स्थितान् भीष्मादीन् निरीक्ष्य तद्वधाद्विरतस्याऽर्जुनस्याऽज्ञानं योऽध्यात्मविद्यया हृतवान्, तस्य पादपद्मे मे रतिरस्तु।।३६।। यः "निःशस्त्रोऽहं युद्धसहायको भवेयम्" इति निजप्रतिज्ञां विहाय "युद्धे श्रीकृष्णं शस्त्रधारिणं कुर्याम्" इति मत्प्रतिज्ञां पुरयितुं रथादवतीर्य रथचक्रं धृत्वा मां हन्तुं मदभिमुखमाजगाम।।३७।। तदा मम तीक्ष्णबाणैर्विशीर्णकवचः निर्भिन्नशरीरो रुधिरप्लुताङ्गो यो भगवान्

भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम् ।।३९।। ललितगति-विलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः। कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्य गोपवध्वः।।४०।। मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषाम्। अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ।।४१।। तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम्। प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः।।४२।। *सूत उवाच* - कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः। आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ।। ४३ ।। सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले। सर्वे बभूवुस्ते तुष्णीं वयांसीव दिनात्यये ।।४४।। तत्र दुन्दुभयो नेदुर्देवमानववादिताः। शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः।।४५।। तस्य निर्हरणादीनि सम्परेतस्य भार्गव। युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ।।४६।।

।। सङ्ग्रहोक्तिः ।।

मुकुन्दो मद्वधार्थं मामुपागतः स म आश्रयो भवतु ।।३८।। दक्षिणहस्तेन प्रतोदं वामेन च हयरश्मिं ग्रहीतवति सारथियोग्यशोभया युक्तेऽर्जुनसारथौ श्रीकृष्णे म्रियमाणस्य मे रतिरस्तु, इह युद्धे यं निरीक्ष्य ये हतास्ते साधर्म्यमुक्तिं प्राप्ताः।।३९।। किं च यस्य रुचिरगतिविलासादिभिः प्राप्तसत्कारा अत एव प्रेमोन्मत्ताः तच्चरितानुकरणपरायणा गोपिकाः साधर्म्यमुक्तिं प्रापुः ।। ४०।। तथा च युधिष्ठिरस्य राजसूययज्ञे मुनिनृपगणानां दर्शनीयो यः श्रीकृष्णोऽग्रपूजां प्रपेदे, स एवेदानीमत्समक्षं स्थितः, इत्याश्चर्यम् ।। ४१ ।। एवंभूतं सर्वभूतानां हृद्देशेऽधिष्ठितं तमजन्मानं कृष्णं विगतभेदमोहोऽहं प्राप्तोऽस्मि ।। ४२।। *सूत उवाच* - एवं परमात्मनि कृष्णे मनोवाग्दृष्टि-वृत्तिभिः प्रत्यगात्मानमावेश्य स भीष्मोऽन्तर्लीनश्वासोऽभवत् ।। ४३ ।। तदा सर्वोपाधिविधूननपूर्वकं दिव्यब्रह्मगतिं प्राप्तं भीष्मं विज्ञाय तत्र स्थिताः युधिष्ठिरादयः सर्वे सायं पक्षिण इव तूष्णीं बभूवुः ।। ४४।। तदा देवैर्नरैश्च वादिता दुन्दुभयो नेदुः, सर्वे सज्जनाः प्रशशंसुः, आकाशात् पुष्पाणि ववृषुः ।। ४५ ।। हे शौनक! ततो युधिष्ठिरस्तस्य यथोचितानि दाहादिकर्माणि कारयित्वा मुहूर्तमात्रं दुःखितो बभूव ।। ४६ ।।

तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः। ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः।।४७।। ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम्। पितरं सान्त्वयामास गान्धारीं च तपस्विनीम्।।४८।। पित्रा चानुमतो राजा वासुदेवानुमोदितः। चकार राज्यं धर्मेण पितृपैतामहं विभुः।।४९।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे नवमोऽध्यायः।।९।।

अथ दशमोऽध्यायः ।।१०।।

शौनक उवाच - हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः। सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः।।१।। वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः। निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह।।२।। निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः।

।। सङ्ग्रहोक्तिः ।।

ततो हृष्टाः कृष्णहृदया मुनयस्तत्स्वरूपमाहात्म्यप्रकाशकैः स्तोत्रैः स्तुत्वा तन्मनस्काः सन्तः स्वाश्रमान् प्रति प्रययुः।।४७।। ततो युधिष्ठिरः श्रीकृष्णेन साकं हस्तिनापुरं गत्वा, तत्र धृतराष्ट्रं तपस्विनीं गान्धारीं च सान्त्वयामास।।४८।। ततः पित्रा धृतराष्ट्रेणाऽनुज्ञातः श्रीकृष्णेन चानुमोदितो युधिष्ठिरो धर्मेण पित्रादिक्रमप्राप्तं राज्यं चकार।।४९।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः।।९।।

अथ दशमोऽध्यायः ।।१०।।

भगवतः श्रीकृष्णस्य द्वारकागमनम्

शौनक उवाच- धर्मभृतां वरिष्ठो युधिष्ठिर स्वदायलिप्सूनाततायिनो दुर्योधनादीन् हत्वा स्वं राज्यं पुनः प्राप्याऽनुजैः सह किं कृतवान् ।।१।। लुप्तप्रायं कुरुवंशं गर्भे परीक्षितः संरक्षणेन पुनरङ्कुरितं कृत्वा, युधिष्ठिरं राज्ये पुनः संस्थाप्य, श्रीकृष्णः प्रसन्नचितो बभूव।।२।। भीष्मस्य श्रीकृष्णस्य चोपदेशवचनैर्विज्ञानविनष्टभ्रमोऽनुजैः सेवितः श्रीकृष्णाश्रयो युधिष्ठिर

शशास गामिन्द्र इवाजिताश्रयः परिध्युपान्तामनुजानुवर्तितः।।३।। कामं ववर्ष पर्जन्यः सर्वकामदुघा मही। सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा।।४।। नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः। फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै।।५।। नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः। अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित्।।६।। उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः। सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया।।७।। आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तम्। आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः।।८।। सुभद्रा द्रौपदी कुन्ती विराटतनया तथा। गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ।।९।। वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः। न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः।।१०।। सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः। कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम्।।११।। तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथम्। दर्शनस्पर्शसंलापशयनासनभोजनैः।।१२।।

।। सङ्ग्रहोक्तिः।।

इन्द्र इव आसमुद्रान्तां भुवं पालयामास ।।३।। युधिष्ठिरे राज्यमधिश्रिते सति मेघो यथेष्टं ववर्ष, पृथिवी प्रजायै कामदुघा बभूव, गावः प्रचुराणि क्षीराणि ददुः।।४।। नद्यः पर्वताः समुद्राश्च यथेष्टमनुकूला आसन्, वनस्पतिलतौषधयश्च यथर्तु फलदा बभूवुः।।५।। युधिष्ठिरराज्ये प्राणिनामाधयो दैवभूतनिमित्तका विपत्तयश्च का अपि नासन्।।६।। श्रीकृष्णो हस्तिनापुरे युधिष्ठिरादीनां शोकनाशाय सुभद्रायाः प्रियाचरणाय च कतिपय मासान् तस्थौ।।७।। ततो युधिष्ठिरानुज्ञां प्राप्य तं नमस्कृत्य कैश्चिदालिङ्गितः कैश्चिन्नमस्कृतश्च सन् श्रीकृष्णो द्वारकागमनाय रथमारुरोह।।८।। तदा सुभद्रा द्रौपदी कुन्ती उत्तरा गान्धारी युयुत्सुः कृपो नकुलः सहदेवो भीमो धौम्य सत्यवत्यादयः स्त्रियश्चैते सर्वे श्रीकृष्णस्य वियोगं न सेहिरे।।९-१०।। अहो! यस्य सत्संगाद् हरियशःसंकीर्तनमेकवारं श्रुत्वा बुधः कुसंगं त्यजति, स तं सत्संगं त्यक्तुं नोत्सहते ।।११।। दर्शन-स्पर्श-संलाप-शयन-आसन-भोजनैः तस्मिन्निबद्धचित्ताः पाण्डवाः कृष्णस्य वियोगं कथं सहेरन् ।।१२।।

सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः। वीक्षन्तः स्नेहसम्बद्धा विचेलुस्तत्र तत्र ह।।१३।। न्यरुधन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते। निर्यात्यगारान्नोऽभद्रमिति स्याद्बान्धवस्त्रियः।।१४।। मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः। धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा।।१५।। प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया। ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः।।१६।। सितातपत्रं जग्राह मुक्तादामविभूषितम्। रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह।।१७।। उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते। विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि।।१८।। अश्रूयन्ताशिषः सत्यास्तत्र तत्र द्विजेरिताः। नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः।।१९।। अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम्। कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ।।२०।। स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि। अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु।।२१।। स एव भूयो निजवीर्यनोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम्।

।। सङ्ग्रहोक्तिः ।।

निर्निमेषनेत्राः सर्वे पाण्डवास्तमेव श्रीकृष्णं विलोकमानाः सन्तस्तदर्थं पूजासामग्रीमानेतुं यथा तथा परिबभ्रमुः।।१३।। अथ श्रीकृष्णस्य निर्गमनसमये द्रौपद्याद्याः स्त्रियस्तस्याऽशुभं न स्याद् इत्यश्रूणि न मुमुचुः किन्तु तानि न्यरुन्धन्।।१४।। तदा मृदंग-शंख-भेरी-पणव-दुन्दुभ्यादीनि वाद्यानि नदन्ति स्म।।१५।। तदा कृष्णदिदृक्षया प्रासादाग्रे वर्तमानाः प्रेम-लज्जा-स्मितेक्षणाः कौरवनार्यस्तदुपरि पुष्पवर्षाश्चक्रुः।।१६।। तदाऽर्जुनो रत्नदण्डं मुक्तादाम-विभूषितं श्वेतच्छत्रं तदुपरि दधौ।।१७।। उद्धवः सात्यकिश्चाऽत्यद्भुते चामरे जगृहतुः राजमार्गे पुष्पैर्विकीर्यमाणः श्रीकृष्णो रेजे।।१८।। तदा तत्र तत्र प्राकृतगुणरहितस्य दिव्यगुणालंकृतस्य च श्रीकृष्णस्य युक्ता अयुक्ताश्च विप्रप्रयुक्ताः सत्या आशिषोऽश्रूयन्त।।१९।। तत्र श्रीकृष्ण-स्वरूपाकृष्टचेतसां हस्तिनापुरस्त्रीणां सर्वेषां श्रुतिमनोहरः परस्परमित्थं वार्तालापः संजात आसीत्।।२०।। सृष्टेः प्राक् प्रलये सर्वे जीवा अपि यस्मिन् अन्तर्लीना आसन् तदा यः पुरातनः पुरुष एक एवाऽऽसीत् सोऽयं श्रीकृष्णो वर्तते।।२१।। प्रलयावस्थायां नामरूपरहिते

अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत् ।।२२।। स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः। पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ।।२३।। स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः। य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ।।२४।। यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल। धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ।।२५।। अहो अलं श्लाघ्यतमं यदोः कुलम् अहो अलं पुण्यतमं मधोर्वनम्। यदेष पुंसामृषभः श्रियःप्रियः स्वजन्मना चङ्क्रमणेन चाञ्जति ।।२६।। अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः। पश्यन्ति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ।।२७।। नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः। पिबन्ति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः सम्मुमुहुर्यदाशयाः ।।२८।।

।। सङ्ग्रहोक्तिः ।।

चिद्वर्गे स्थिते सति पुनस्तस्य रूपनामानि सिसृक्षतीं चिद्वर्गस्य ज्ञानरूपधर्मस्य तिरोधायिकां प्रकृतिमन्तरात्मतया प्रविश्य नामरूपव्याकरणार्थं योऽनुससार सोऽयं शास्त्रकृत् श्रीकृष्णोऽस्ति ।।२२।। समाधिस्था योगिनो भक्तितः शुद्धान्तःकरणाः सन्तो यस्य स्वरूपं द्रष्टुं समर्था भवन्ति, स एवाऽयं कृष्णो नो बुद्धिं शुद्धां करोतु ।।२३।। हे सखि! वेदेषु वेदवादिभिरनुगीतसत्कथः स एक एव सन् लीलार्थं जगत् सृजति रक्षति संहरति च तथा च यस्तत्र न सज्जते स परमेश्वरोऽयं श्रीकृष्णो वर्तते।।२४।। यदा नृपा अधार्मिका भूत्वा लोकपीडां कुर्वन्ति तदाऽयं लोकधर्मसंरक्षणाय युगे युगे सत्त्वगुणेन भूमाववतरति, स एवायं कृष्णः ।।२५।। अहो! यदुकुलं धन्यं मथुराऽपि धन्यतमा,यत्र जन्मग्रहणं लीलाचरितं च कृत्वा पुरुषोत्तमेनानेन तद् द्वयमपि संमानितम् ।।२६।। इदानीं स्वर्गयशसः परिभवकर्त्री भुवः पुण्ययशस्करी च द्वारका नगरी आश्चर्यकारिणी वर्तते, यत्रत्याः सर्वाः प्रजाः सस्मितावलोकं स्वपतिं श्रीकृष्णं नित्यं पश्यन्ति ।।२७।। रुक्मिण्यादिभिरस्य पत्नीभिर्जन्मान्तरेषु व्रतस्नानहोमादिभिरीश्वरः सम्यगाराधितः, यतस्ताः मुहुर्मुहुरस्याऽधरामृतं पिबन्ति, यस्मिन् व्रजस्त्रियः भृशं मुमुहुः ।।२८।।

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः। प्रद्युम्नसाम्बामसुता-
दयोऽपरा याश्चाहृता भौमवधे सहस्रशः।।२९।। एताः परं स्त्रीत्वमपास्तपेशलं
निरस्तशौचं बत साधु कुर्वते। यासां गृहात्पुष्करलोचनः पति र्न जात्वपैत्याहृतिभिर्हृदि
स्पृशन्।।३०।। एवंविधा गदन्तीनां स गिरः पुरयोषिताम्। निरीक्षणेनाभिनन्दन्
सस्मितेन ययौ हरिः।।३१।। अजातशत्रुः पृतनां गोपीथाय मधुद्विषः। परेभ्यः
शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम्।।३२।।अथ दूरागतान् शौरिः कौरवान्
विरहातुरान्। संनिवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः।।३३।। कुरुजाङ्गल-
पाञ्चालान् शूरसेनान् सयामुनान्। ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ।।३४।।
मरुधन्वमतिक्रम्य सौवीराभीरयोः परान्। आनर्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः
।।३५।। तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः। सायं भेजे दिशं पश्चाद्गविष्ठो गां
गतस्तदा।।३६।।

✽ <u>इति श्रीमद्भागवत महापुराणे प्रथमस्कन्धे दशमोऽध्यायः।।१०।।</u> ✽

।। सङ्ग्रहोक्तिः ।।

स्वयंवरे चैद्यादीन् जित्वा वीर्यशुल्केनाहृता रुक्मिणादयस्तथा भौमं हत्वा समानीताः सहस्रशः स्त्रियः श्रीकृष्णपत्न्योऽतिधन्याः, या निरस्तशौचमपास्तस्वातन्त्र्यं स्त्रीत्वं शोभनं कुर्वते, यासां गृहाद् राजीवलोचनः पतिर्हृदयंगमः सन् जातु न गच्छति।।२९-३०।। इत्थं पुरवासिनीनां स्त्रीणां वचः श्रवणेन मन्दस्मितपूर्वकावलोकनेन तासामभिनन्दनं कुर्वन् श्रीकृष्णो द्वारकां जगाम।।३१।। तदा युधिष्ठिरः स्नेहात् शत्रोराक्रमणशंकानिवारणाय चतुरङ्गिणीं सेनां तदनु प्रेषितवान्।।३२।। अथ प्रेम्णा दूरमागतान् विरहातुरान् युधिष्ठिरादीन् कौरवान् निवर्त्योद्धवादिभिः सार्धं कृष्णः स्वपुरीं द्वारकां जगाम।।३३।। ततो मार्गप्राप्तान् कुरु-जांगल-पाञ्चाल-शूरसेन-यामुन-ब्रह्मावर्त-कुरुक्षेत्र-मत्स्य-सारस्वत-मरु-सौवीर-आभीर देशानतिक्रम्य किञ्चित् परिश्रान्ताश्वः श्रीकृष्णो द्वारकासमीपं प्राप।।३४-३५।। तत्र तत्र तद्देशस्थजनैः समर्पितोपायनः कृष्णः सायं पश्चिमां दिशं प्राप्तस्तदाऽशुंमानस्तं गतः।।३६।।

✽ <u>इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः।।१०।।</u> ✽

अथैकादशोऽध्यायः ।।११।।

सूत उवाच - आनर्तान् स उपव्रज्य स्वृद्धाञ्जनपदान् स्वकान्। दध्मौ दरवरं तेषां विषादं शमयन्निव।।१।। स उच्चकाशे धवलोदरो दरो दामोदरस्याऽधरशोण-शोणिमा। देध्मीयमानः करकञ्जसम्पुटे यथाब्जखण्डे कलहंस उत्स्वनः।।२।। तमुपश्रुत्य निनदं जगद्भयभयावहम्। प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः।।३।। तत्रोपनीतबलयो रवेर्दीपमिवादृताः। आत्मारामं पूर्णकामं निजलाभेन नित्यदा।।४।। प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा। पितरं सर्वसुहृदमवितारमिवार्भकाः।।५।। नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चवैरिञ्च्यसुरेन्द्रवन्दितम्। परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत् परः प्रभुः।।६।। भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता। त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम।।७।। अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम्। प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम्।।८।।

।। सङ्ग्रहोक्तिः ।।

अथैकादशोऽध्यायः ।।११।।

श्रीकृष्णस्य प्रजाकृतमभिनन्दनं द्वारकाप्रवेशश्च

सूत उवाच - ततः श्रीकृष्णः समृद्धान् स्वकानानर्तजनपदान् प्राप्य तत्रत्यानां जनानां विषादं शमयन्निव पाञ्चजन्यं शंखं दध्मौ।।१।। वाद्यमानः स शंखः श्रीकृष्णस्य रक्तकमलसदृशे करसम्पुटे कुजद् राजहंस इव शोभायमानोऽभवत्।।२।। दैत्यादीनां भयंकरं तं शंखध्वनिमाश्रुत्य कृष्णदर्शनलालसाः सर्वाः प्रजास्तदभिमुखं प्रययुः।।३।। ततः श्रीकृष्णेन कृतादराः प्रजा उपहारान् विविधां पूजां च कृष्णाय समर्प्य प्रेमोत्फुल्लाननाः सत्यः सर्वसुहृदमवितारं स्वात्मारामं च तं बालाः स्वपितरमिव हर्षगद्गदया गिरा प्रोचुः।।४-५।। हे नाथ! विधिसनकादिसुरेन्द्रवन्दितं श्रेयोर्थिनां शरणं कालातिगं त्वच्चरणकमलं वयं नमस्कुर्मः।।६।। हे विश्वभावन! त्वमस्माकं मातृपितृपतिसुहृद्गुरुरूपेण श्रेस्करो भव, यस्य तवानुवृत्त्या वयं नमस्कुर्मः।।७।। अहो! वयं भवता सनाथा स्मः, यतो देवानामपि दुर्लभं प्रेमस्मितस्निग्धाननं सर्वसौभगं भवत्स्वरूपं पश्यामः।।८।।

यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमः
क्षणो भवेद् रविं विनाक्ष्णोरिव नस्तवाच्युत ।।९।। इति चोदीरिता वाचः प्रजानां
भक्तवत्सलः। शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत्पुरीम् ।।१०।। मधुभोजदशा-
र्हार्हकुकुरान्धकवृष्णिभिः। आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ।।११।। सर्वर्तु-
सर्वविभवपुण्यवृक्षलताश्रमैः। उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ।।१२।। गोपुर-
द्वारमार्गेषु कृतकौतुकतोरणाम्। चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् ।।१३।।
सम्मार्जितमहामार्गरथ्यापणकचत्वराम्। सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः
।।१४।। द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः। अलंकृतां पूर्णकुम्भैर्बलिभिर्धूप-
दीपकैः।।१५।। निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः। अक्रूरश्चोग्रसेनश्च राम-
श्चाद्भुतविक्रमः।।१६।। प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः। प्रहर्षवेगोच्छ्वसित-
शयनासनभोजनाः।।१७।। वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः। शङ्खतूर्य-
निनादेन ब्रह्मघोषेण चादृताः। प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ।।१८।।

।। सङ्ग्रहोक्तिः।।

हे अरविन्दाक्ष! अच्युत! त्वयि सुहृद्दिदृक्षया हस्तिनापुरं गते सति रविं विनाऽक्ष्णोरिवाद्यावधि अस्माकं क्षणमात्रोऽपि समयः कोटिवर्षसम आसीत् ।।९।।इति प्रजानां प्रेमपूर्णा वाचः शृण्वानो भक्तवत्सलः कृपादृष्ट्या सर्वान् पश्यन् कृष्णो द्वारकां प्राविशत् ।।१०।। कथम्भूतां द्वारकाम् – आत्मतुल्यबलै र्मधुभोजदशार्हान्धकवृष्णिभिः संरक्षितां सर्वर्तुषु पुष्पफलशालिभिर्लतावृक्षादिभिः समलंकृतां, सुशोभितैरुद्यानादिभि र्विराजितां पुरे प्रतिगृहं प्रतिद्वारं तोरणध्वजपताकानिवेशनेन सघनच्छायावतीं सुगन्धिवारिभिः संसिक्तसर्वमार्गां फलपुष्पाक्षतादिभिरलंकृतां प्रतिद्वारं स्थापितैः पूर्णकलशैर्दध्यक्षतफलादिभिः सुशोभितां द्वारकां प्रविवेश।।११-१५।। ततो द्वारकामायान्तं प्रियतमं श्रीकृष्णमाकर्ण्य महामना वसुदेवोऽक्रूर उग्रसेनोऽद्भुतपराक्रमो बलरामः, प्रद्युम्नः, चारुदेष्णः, साम्बश्चैते सर्वे प्रहर्षाधिक्येन शयनासनाशनानि विहाय प्रत्युज्जग्मुः।।१६-१७।। करधृतमौक्तिकपूर्णघटं गजेन्द्रं पुरस्कृत्य करधृतपुष्पादिवस्तूनां ब्राह्मणानां वेदघोषेण शंखतूर्यनिनादेन च सह आदृताः सर्वे रथैः प्रत्युद्ययुः।।१८।।

वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः। लसत्कुण्डलनिर्भातकपोलवदनश्रियः
।।१९।। नटनर्तकगन्धर्वाः सूतमागधबन्दिनः । गायन्ति चोत्तमश्लोकचरिता-
न्यद्भुतानि च ।।२०।। भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम्। यथाविध्युपसंगम्य
सर्वेषां मानमादधे।।२१।। प्रह्वाभिवादनश्लेषकरस्पर्शस्मितेक्षणैः। आश्वास्य
चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ।।२२।। स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि।
आशीर्भिर्युज्यमानोऽन्यैर्बन्दिभिश्चाविशत्पुरम् ।।२३।। राजमार्गं गते कृष्णे द्वारिकायाः
कुलस्त्रियः। हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ।।२४।। नित्यं निरीक्षमाणानां
यदपि द्वारिकौकसाम्। नैव तृप्यन्ति हि दृशः श्रियो धामाङ्गमच्युतम्।।२५।।
श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम्। बाहवो लोकपालानां सारङ्गाणां
पदाम्बुजम्।।२६।। सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि।
पिशङ्गवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ।।२७।। प्रविष्टस्तु
गृहं पित्रोः परिष्वक्तः स्वमातृभिः।

।। सङ्ग्रहोक्तिः ।।

तथा तद्दर्शनोत्सुकाः वाराङ्गनाः सुन्दरवस्त्राभरणादिभिरलंकृताः सत्यो यानैर्जग्मुः।।१९।।
तथा नटनर्तकगन्धर्वास्तच्चरितानि गायन्तः प्रतिययुः, सुतमागधबन्दिनोऽद्भुतानि कृष्णचरितानि
गायन्ति स्म।।२०।। ततः श्रीकृष्णोऽपि शिरोनमन-प्रणाम-आलिङ्गन-करस्पर्श-सस्मितवीक्षणैः
-अभिमतैर्वरैश्च यथोचितं चाण्डालपर्यन्तानां पौराणां मित्राणां च मानं चक्रे।।२१-२२।। ततो
गुरुभिः, सदारैः विप्रैः स्थविरैश्चाऽऽशीर्वचनैः युज्यमानो कृष्णो पुरमाविशत्।।२३।। हे शौनक!
यदा कृष्णो राजमार्गं गतस्तदा कुलस्त्रियस्तदीक्षणमहोत्सवा सत्यो हर्मण्यारुरुहुः ।।२४।।
अहो, श्रियो निवासरूपं श्रीकृष्णं नित्यं पश्यतां द्वारकौकसां दृशो न वितृप्यन्ति।।२५।। यतः
श्रीकृष्णस्य वक्षो लक्ष्म्या वासस्थानं, यस्य मुखं पश्यज्जनदृष्टीनां पानपात्रं, बाहवो लोकपालानां
तथा मुनीनां तत्पादपंकजमाश्रयस्थानं वर्तते।।२६।। पथि सितातपत्रेण कुसुमवृष्टिभिः व्यजनैश्च
शोभमानः कृष्णो वनमालया पीताम्बरेण च मेघ इव शुशुभे।।२७।। ततः पितृभवनं प्रविष्टः स
मातापितृभ्यामालिङ्गितो देवकीप्रमुखा सप्त मातृः शिरसा ववन्दे।।२८।।

ववन्दे शिरसा सप्त देवकीप्रमुखा मुदा ।।२८।। ताः पुत्राङ्कमारोप्य स्नेहस्नुत-
पयोधराः। हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ।।२९।। अथाविशत् स्वभवनं
सर्वकाममनुत्तमम्। प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ।।३०।। पत्न्यः पतिं
प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः। उत्तस्थुरारात् सहसाऽऽ-
सनाशयात् साकं व्रतैर्व्रीडितलोचनाननाः ।।३१।। तमात्मजैर्दृष्टिभिरन्तरात्मना
दुरन्तभावाः परिरेभिरे पतिम्। निरुद्धमप्यास्रवदम्बु नेत्रयोर्विलज्जतीनां भृगुवर्य
वैक्लवात् ।।३२।। यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवम्।
पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ।।३३।। एवं नृपाणां
क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम्। विधाय वैरं श्वसनो यथानलं मिथो
वधेनोपरतो निरायुधः ।।३४।। स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया। रेमे
स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा ।।३५।। उद्दामभावपिशुनामलवल्गुहास-
व्रीडावलोकनहितो मदनोऽपि यासाम्। सम्मुह्य चापमजहात्प्रमदोत्तमास्ता यस्येन्द्रियं
विमथितुं कुहकैर्न शेकुः ।।३६।।

।। सङ्ग्रहोक्तिः ।।

स्नेहस्नुतपयोधरा देवक्यादयो मातरस्तं श्रीकृष्णमङ्कस्थं कृत्वा हर्षाश्रूणि मुमुचुः ।।२९।।
अथ अष्टोत्तरशताधिकषोडशसहस्रसंख्यकैः स्वपत्नीनां पृथक् पृथक् भवनैरुपशोभितं स्वभवनं
स प्रविवेश ।।३०।। ताः पत्न्य उपस्थितं स्वपतिं दृष्ट्वा व्रीडितलोचनाननाः संजातमहोत्सवाः
सत्यः सहसा स्वासनादिभ्य उत्थिता बभूवुः ।।३१।। ततस्ता आगमनात् पूर्वं मनसा, ततो
दृष्ट्या, ततः समीप आगतं तं पुत्रालिङ्गनमिषेणाऽऽलिङ्ग्य हर्षाश्रूणि मुमुचुः ।।३२।। यच्चरण-
युगलं चञ्चलाऽपि लक्ष्मीर्न त्यजति, तदा तदन्या का विरता भवेत्, अतो नित्यं पश्यन्तीनामपि
तासां कृते तस्य चरणयुगं प्रतिक्षणं नवं नवमिवाऽभवत् ।।३३।। एवं भुवो भारभूतानां नृपाणां
मनसि वैरभावमुत्पाद्य तान् विनाशयित्वा च स्वयं निःशस्त्रोऽपि सन् निवृत्तो बभूव ।।३४।।
अस्मिन् नरलोके स्वेच्छयाऽवतीर्णः स भगवान् स्त्रीरत्नसमुदाये स्थितः सन् प्राकृतनरवद्
रेमे ।।३५।। यासां स्त्रीणां गम्भीरभावसूचकविशुद्धहासव्रीडावलोकाश्रयमभिभूतो मदनोऽपि

तमयं मन्यते लोको ह्यसङ्गमपि सङ्गिनम्। आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः।।३७।। *एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः। न युज्यते सदाऽऽत्मस्थैर्यथा बुद्धिस्तदाश्रया।।३८।।* तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः। अप्रमाणविदो भर्तुरीश्वरं मतयो यथा।।३९।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्ध एकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः ।।१२।।

शौनक उवाच - अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा। उत्तराया हतो गर्भ ईशेनाजीवितः पुनः।।१।। तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः। निधनं च यथैवासीत्स प्रेत्य गतवान् यथा।।२।। तदिदं श्रोतुमिच्छामो गदितुं यदि मन्यसे।

।। सङ्ग्रहोक्तिः।।

संमुह्य चापं तत्याज ताः प्रमदाः कृष्णस्य मनः क्षोभयितुं न शेकुः।।३६।। मनुष्यवच्चेष्टमानं वस्तुतो निःसङ्गमपि आसक्तमिव भासमानं तमिमं भगवन्तं लोक आत्मौपम्येन मनुते, अतः स नितरामज्ञः।।३७।।एतदेव हि कृष्णस्य परमेश्वरत्वं वर्तते यत् स्वयं त्रिगुणात्मकप्रकृतावन्तर्यामितया स्थितोऽपि तद्गुणैर्न लिप्यते।।३८।।यथाऽसज्जनानां मतय ईश्वरं सन्तमपि न जानन्ति, किन्तु मौढ्यादंन्यथैव मेनिरे तदवत् ताः स्त्रियो मौढ्यात् तं भगवन्तं स्त्रीलम्पटं स्त्रीसमूहानुवर्तिनं च मेनिरे।।३९।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यामेकादशोऽध्यायः -।।११।।

अथ द्वादशोऽध्यायः ।।१२।।

परीक्षितो जन्मकर्माद्युत्कर्षकथनम्

शौनक उवाच - हे सूत! अश्वत्थाम्ना विसृष्टेन ब्रह्मास्त्रेण नष्टप्राय उत्तराया गर्भः श्रीकृष्णेन पुनराजीवितः।।१।। महानुभावस्य तस्य परीक्षितो जन्मकर्माणि निधनं च यथाऽऽसीत् तथा प्रेत्य यां गतिं प्राप, यस्मै शुको ज्ञानमदात्, तदिदं सर्वमहं श्रोतुमिच्छामि, यदि वक्तुं योग्यं

ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ।।३।। *सूत उवाच* – अपीपलद्धर्मराजः पितृवद् रञ्जयन् प्रजाः। निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ।।४।। सम्पदः क्रतवो लोका महिषी भ्रातरो मही। जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ।।५।। किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः। अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ।।६।। मातुर्गर्भगतो वीरः स तदा भृगुनन्दन। ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा ।।७।। अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम्। अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ।।८।। श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम्। क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम्। परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।।९।। अस्त्रतेजः स्वगदया नीहारमिव गोपतिः। विधमन्तं संनिकर्षे पर्यैक्षत क इत्यसौ ।।१०।। विधूय तदमेयात्मा भगवान्धर्मगुब् विभुः। मिषतो दशमास्यस्य तत्रैवान्तर्दधे हरिः ।।११।। ततः सर्वगुणोदर्के सानुकुलग्रहोदये। जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ।।१२।।

।। सङ्ग्रहोक्तिः ।।

स्यात्तर्हि श्रद्दधानानां नो ब्रूहि ।।२-३।। *सूत उवाच* – श्रीकृष्णचरणसेवया सर्वकामनिःस्पृहो राजा युधिष्ठिरः पितृवत् प्रजाः पालयामास ।।४।। श्रीकृष्णानन्यभक्तस्य तस्य संपत्तयो, यज्ञोपार्जिता लोका, महिषी द्रौपदी, भ्रातरो, जम्बूद्वीपाधिपत्यं, स्वर्गगामि यशश्चासीत् ।।५।। देवैरपि स्पृहणीया इमाः सम्पदः श्रीकृष्णनिष्ठमनसो युधिष्ठिरस्य हर्षाय नाऽऽसन्, बुभुक्षितस्य अन्नं विनाऽन्यद् वस्तु सुखरूपं भवति किम्? ।।६।। मातुर्गर्भस्थितो ब्रह्मास्त्रतेजसा दह्यमानः परीक्षित् अंगुष्ठमात्रं स्वर्णमुकुटधरं पीताम्बरं श्यामवदनं चतुर्भुजं स्वर्णकुण्डलिनं स्वस्य सर्वतो दिक्षु गदां भ्रामयन्तं स्वयं च भ्रमन्तं कंचित् पुरुषं ददर्श ।।७-९।। सूर्यो निहारमिव स्वगदया ब्रह्मास्त्रतेजः शमयन्तं संनिकटस्थं पुरुषं दृष्ट्वा "कोऽयं" इति परीक्षिद्वितर्कितवान् ।।१०।। दशमास्यस्य परीक्षितः पश्यतः सतो ब्रह्मास्त्रतेजो निरस्य हरिस्तत्रैवाऽन्तर्हितो बभूव ।।११।। ततः सर्वगुणोदये सानुकूलग्रहयुक्ते लग्ने पाण्डुवंशधरः परीक्षित् ओजसा पाण्डुरिव प्रादुर्बभूव ।।१२।।

तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः। जातकं कारयामास वाचयित्वा च मङ्गलम्।।१३।। हिरुण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान्। प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्।।१४।। तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयानतम्। एष ह्यस्मिन् प्रजातन्तौ कुरूणां पौरवर्षभ।।१५।। दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि। रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ।।१६।। तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः। भविष्यति न संदेहो महाभागवतो महान्।।१७।। *युधिष्ठिर उवाच* - अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः। अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः।।१८।। *ब्राह्मणा ऊचुः* - पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः। ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा।।१९।। एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः। यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम्।।२०।। धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः। हुताश इव दुर्धर्षः समुद्र इव दुस्तरः।।२१।। मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव।

।। सङ्ग्रहोक्तिः ।।

तदा प्रसन्नमना राजा युधिष्ठिरो धौम्यकृपादिभि र्विप्रैः मङ्गलवाचनपूर्वकं तस्य जातकर्मादिकं कारयामास ।।१३।।युधिष्ठिरस्तदा सुवर्णधेनुभूमिग्रामहस्तिह-यान्नादीनां दानानि ब्राह्मणेभ्यो ददौ ।।१४।।ततस्तुष्टा ब्राह्मणास्तं राजानं प्राहुः - दैवेन कुरुवंशे नष्टप्राये सति भवतामनुग्रहाय भगवता विष्णुना रातः अर्थात् दत्तः, अतोऽयं लोके विष्णुरात नाम्ना प्रसिद्धो हरिभक्तो भविष्यति ।।१५-१७।।। *युधिष्ठिर उवाच* - हे विप्रा! अयं परीक्षिद् अस्मत्पूर्वजानां राजर्षीणां यशोऽनुसरिष्यति किम्?।।१८।। *ब्राह्मणा उचुः* - हे युधिष्ठिर! अयं परीक्षिद् इक्ष्वाकुतुल्यः प्रजानां रक्षकः, श्रीरामसमः सत्यप्रतिज्ञो, विप्रहितैषी च भविष्यति ।।१९।। शिबिसमो दाता शरणागतरक्षकश्च, दुष्यन्तपुत्रभरततुल्यो ज्ञातीनां कीर्तिवर्धको भविष्यति ।।२०।। धनञ्जयकार्तवीर्ययोः समो धनुर्धरः, वह्नितुल्योऽप्रसह्यः समुद्रवद् गंभीरः।।२१।। सिंहसमः पराक्रमी, हिमालयसमः सज्जनसेव्यः पृथ्वीसमः क्षमाशीलः -

तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ।।२२।। पितामहसमः साम्ये प्रसादे गिरिशोपमः। आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ।।२३।। सर्वसद्गुणमाहात्म्ये एष कृष्णमनुव्रतः। रन्तिदेव इवोदारो ययातिरिव धार्मिकः ।।२४।। धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः। आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ।।२५।। राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम्। निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ।।२६।। तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात्। प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ।।२७।। जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ। हित्वेदं नृप गङ्गायां यास्यत्यद्धाऽकुतोभयम् ।।२८।। इति राज्ञ उपादिश्य विप्रा जातककोविदाः। लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ।।२९।। स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः। गर्भदृष्टमनुध्यायन् परीक्षेत नरेष्विह ।।३०।। स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः। आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ।।३१।। यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया। राजाऽलब्धधनो दध्यावन्यत्र करदण्डयोः ।।३२।।

।। सङ्ग्रहोक्तिः ।।

पितराविव सहिष्णुः ।।२२।। चतुराननसमः समदर्शी, शिवतुल्य आशुतोषः, विष्णुसमः सर्वभूतानामाश्रयः ।।२३।। कृष्ण इव सर्वसद्गुणसंपन्नः, रन्तिदेवसम उदारः, ययातितुल्यो धार्मिकः ।।२४।। बलिरिव धीरः, प्रह्लाद इव कृष्णभक्तः, अश्वमेधयज्ञकारकः, वृद्धोपासकः ।।२५।। राजर्षीणां जनकः, पापिनां शासकः, कलेर्निग्रहकारी, धर्मस्य धरायाश्च रक्षको भविष्यति ।।२६।। द्विजपुत्रशापेन तक्षकात् स्वमृत्युं श्रुत्वा विरक्तः सन् शुकदेवाद् ज्ञानं प्राप्य, गङ्गातटे शरीरं त्यक्त्वा, वैकुण्ठलोकं यास्यति ।।२७-२८।। इत्थं परीक्षितो जातकं फलं राजानं श्रावयित्वा दक्षिणां च गृहीत्वा विप्राः स्वगृहं गताः ।।२९।। यतोऽयं गर्भदृष्टं पुरुषं सर्वनरेष्वन्विष्यन् परीक्षां कुरुते, ततो लोके स नाम्ना परीक्षिदिति विश्रुतोऽभवत् ।।३०।। युधिष्ठिरादिभिः पाल्यमानः सुतः शुक्लपक्षगतश्चन्द्रमा इव ववृधे ।।३१।। प्राक् संक्षेपतोऽश्वमेधवर्णनं कृतम्, अधुना तद् विस्तरेण कथ्यते युधिष्ठिरो युद्धे –

तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः। धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः।।३३।। तेन सम्भृतसम्भारो धर्मपुत्रो युधिष्ठिरः। वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम्।।३४।। आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम्। उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया।।३५।। ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः। ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः।।३६।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

सूत उवाच - विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम्। ज्ञात्वाऽगाद्धास्तिनापुरं तयाऽवाप्तविधित्सितः।।१।।

।। सङ्ग्रहोक्तिः।।

गोत्रवधपापनिवारणायाऽश्वमेधयज्ञं कर्तुं प्रवृत्तः, करदण्डप्राप्तधनेन विना तदसंभवात् स चिंतितोऽभवत्।।३२।। युधिष्ठिराभिप्रेतमाज्ञाय, श्रीकृष्णप्रेरितास्तद्भ्रातरो भीमादय उदीच्यां दिशि मरुत्तयज्ञे पुरा त्यक्तमधुना वर्तमानं स्वर्णपात्रादिधनमानीय तस्मै ददुः।।३३।।ज्ञातिद्रोहाद् भीतः प्राप्तयज्ञसामग्रीको युधिष्ठिरोऽश्वमेधत्रयेण हरिं समयजत्।।३४।।तत्र राज्ञा निमन्त्रितो भगवान् कृष्णो द्विजैर्नृपं याजयित्वा सुहृदः प्रियकाम्यया कतिपयमासान् हस्तिनापुर उवास ।।३५।।ततो राज्ञो द्रौपद्या भीमादीनां च सादरं प्राप्तानुमतिः सार्जुनः कृष्णो यदुभिर्वृतः सन् द्वारवतीं ययौ।।३६।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

विदुरोपदेशेन गान्धार्या सह धृतराष्ट्रस्य वनाय प्रस्थानम्

सूत उवाच - विदुरस्तीर्थयात्रार्थं गतः, स गङ्गाद्वारे मैत्रेयात् परमात्मनो याथात्म्यं ज्ञात्वा कृतकृत्यः सन् पुनः हस्तिनापुरमगात्।।१।।

यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः। जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम
ह।।२।। तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः। धृतराष्ट्रो युयुत्सुश्च सूतः
शारद्वतः पृथा।।३।। गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी। अन्याश्च जामयः
पाण्डोर्ज्ञातयः ससुताः स्त्रियः। प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् ।।४।।
अभिसंगम्य विधिवत् परिष्वङ्गाभिवादनैः। मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः।
राजा तमर्हयाञ्चक्रे कृतासनपरिग्रहम्।।५।। तं भुक्तवन्तमासीनं विश्रान्तं सुखमासने।
प्रश्रयावनतो राजा प्राह तेषां च शृण्वताम्।।६।। *युधिष्ठिर उवाच* - अपि स्मरथ
नो युष्मत्पक्षच्छायासमेधितान्। विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः।।७।।
कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमण्डलम्। तीर्थानि क्षेत्रमुख्यानि सेवितानीह
भूतले।।८।। भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो। तीर्थीकुर्वन्ति तीर्थानि
स्वान्तःस्थेन गदाभृता।।९।। अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः। दृष्टाः
श्रुता वा यदवः स्वपुर्यां सुखमासते।।१०।।

।। सङ्ग्रहोक्तिः ।।

विदुरो मैत्रेयं यावतः प्रश्नान् कृतवान् तत्र कतिपयानामुत्तरैरेव भगवत्स्वरुपे जातभक्तिः सन्नवशिष्टप्रश्नेभ्य उपरराम।।२।। ततस्तमुपागतं विदुरं दृष्ट्वा भ्रातृभिः सह धर्मपुत्रो युधिष्ठिरः, धृतराष्ट्रः, युयुत्सुः, कृपः कुन्ती, गान्धारी, द्रौपदी, सुभद्रा, उत्तरा, कृपी, अन्याश्च ससुताः स्त्रियः प्राण आगते शरीरमिव सहसाऽभ्युत्थाय उपसंगम्य च परिष्वङ्गाभिवादनं विधाय ते सर्वे हर्षाश्रूणि मुमुचुः, ततो युधिष्ठिरस्तं विधिवत् पूजयामास, तदनन्तरं सुखोपविष्टं कृतभोजनं तं प्रश्रयावनतो राजा सर्वेषां शृण्वतां प्राह।।३-६।। *युधिष्ठिर उवाच* - हे विदुर! भवत्पक्षपातस्य छायया समेधितान् विषाग्न्यादिविपद्भ्यो वारंवारं मोचितान् समातृकान् नस्त्वं स्मरसि किम्।।७।। तीर्थयात्रायां त्वया देहवृत्तिसंपादनं कथं कृतम्, कानि तीर्थक्षेत्राणि च भूतले सेवितानि।।८।। भवादृशा भगवद्भक्ताः स्वयमेव तीर्थभूताः सन्ति, यूयं स्वान्तस्थेन भगवता तीर्थान्यपि शुद्धानि कुरुथ।।९।। अपि चास्माकं सुहृदः कृष्णाश्रया यादवा द्वारकायां सुखिनः सन्ति किम्? किं तेषां साक्षात्कारो जातः, किं तदीयवार्ताः श्रुता वा?।।१०।।

इत्युक्तो धर्मराजेन सर्वं तत् समवर्णयत्। यथानुभूतं क्रमशो विना यदुकुलक्षयम् ।।११।। नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम्। नावेदयत् सकरुणो दुःखितान् द्रष्टुमक्षमः ।।१२।। कञ्चित्कालमथावात्सीत्सत्कृतो देववत्स्वकैः। भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ।।१३।। अबिभ्रदर्यमा दण्डं यथावदघकारिषु। यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ।।१४।। युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरम्। भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ।।१५।। एवं गृहेषु सक्तानां प्रमत्तानां तदीहया। अत्यक्रामदविज्ञातः कालः परमदुस्तरः ।।१६।। विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत। राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ।।१७।। प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो। स एव भगवान् कालः सर्वेषां नः समागतः ।।१८।। येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि। जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ।।१९।।

।। सङ्ग्रहोक्तिः ।।

इत्थं युधिष्ठिरेण पृष्टो विदुरो यदुकुलक्षयं विनाऽन्यत् सर्वं यथानुभूतं क्रमशोऽन्ववर्णयत् ।।११।। नृणां स्वयमेवोपस्थितमप्रियं दुःसहं वर्तते, अत एव यदुकुलक्षयं श्रुत्वा पाण्डवा दुःखिताः स्युरिति मत्वा विदुरस्तन्नावर्णयत् ।।१२।। युधिष्ठिरादिभिः देववत् सत्कृतः, ज्येष्ठभ्रातुर्धृतराष्ट्रस्य श्रेयस्कृत् विदुरः सर्वेषां प्रेम संपादयन् सन् हस्तिनापुरे कंचित् कालमवात्सीत् ।।१३।। विदुरः शूद्र आसीदिति शंका न कार्या, यतो माण्डव्यशापात् यमः शतवर्षपर्यन्तं शूद्ररूपेणावतीर्णो विदुरनाम्ना ख्यातोऽभूत्, तावत्कालपर्यन्तमर्यमा पापिषु दण्डं यथावद् अबिभ्रत् ।।१४।। एवं युधिष्ठिरो राज्यं प्राप्य वंशधरं परीक्षितं दृष्ट्वा लोकपालोपमैर्भ्रातृभिः सह परया श्रिया मुमुदे ।।१५।। इत्थं गृहेष्वासक्तानां गृहव्यापारेण प्रमत्तानां तेषां प्रचुरः कालो व्यतीतः ।।१६।। तज्ज्ञात्वा विदुरो धृतराष्ट्रमाह - हे राजन्! गृहाच्छीघ्रं निर्गच्छ, प्राप्तमिमं भयदं मृत्युकालं पश्य ।।१७।। यस्य कालस्य कुतश्चित् कदाचिदपि निवर्तनक्रिया इह जीवलोके नास्ति, भगवन्नियाम्यः सोऽस्माकं सर्वेषां मृत्युकालः समुपस्थितः ।।१८।। येन कालेन ग्रस्तः प्राणी प्रियतमैः प्राणैरऽपि वियुज्यते, किं पुनः धनादिभिः ।।१९।।

पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः। आत्मा च जरया ग्रस्तः परगेहमुपाससे।।२०।।
अहो महीयसी जन्तोर्जीविताशा यया भवान्। भीमेनावर्जितं पिण्डमादत्ते
गृहपालवत्।।२१।। अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः। हृतं क्षेत्रं धनं येषां
तद्दत्तैरसुभिः कियत्।।२२।। तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः।
परैत्यनिच्छतो जीर्णो जरया वाससी इव।।२३।। गतस्वार्थमिमं देहं विरक्तो
मुक्तबन्धनः। अविज्ञातगतिर्जह्यात् स वै धीर उदाहृतः।।२४।। यः स्वकात्परतो
वेह जातनिर्वेद आत्मवान्। हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः।।२५।। अथोदीचीं
दिशं यातु स्वैरज्ञातगतिर्भवान्। इतोऽर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः।।२६।।
एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः। छित्त्वा स्वेषु स्नेहपाशान्द्रढिम्नो
निश्चक्राम भ्रातृसंदर्शिताध्वा।।२७।। पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम
साध्वी। हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनामिव सत्संप्रहारः।।२८।। अजातशत्रुः
कृतमैत्रो हुताग्निर्विप्रान् नत्वा तिलगोभूमिरुक्मैः।

।। सङ्ग्रहोक्तिः ।।

अहो! पाणिनो जीविताशाऽतीव बलवती, यया बद्धस्त्वं पुत्रनाशकेन भीमेन दत्तमन्नं कुक्कुरवद् भक्षयसि।।२१।। येषां पाण्डवानां कृते लाक्षागृहदाहो विषप्रयोगो द्रौपद्या वस्त्राकर्षणादिकं च कुकृत्यं कृतं, तैर्दत्तेनान्नेन प्राणरक्षणे किम्? न किञ्चिदपि।।२२।। एवंविधस्याऽतिदीनस्यापि तवेदं शरीरमुत्तरोत्तरं क्षीणं भवति, अतो धीरो भव।।२३।। यो निःस्वार्थमिमं देहं प्रति विरक्तः, पुण्यपापरूपबन्धनरहितो ज्ञातिभिरप्यविज्ञातगतिः सन् शरीरं जह्यादेष धीरः मोक्षभाक् कथितः।।२४।। यः स्वयं गुरुकृतोपदेशतो वा वैराग्यं धृत्वा हरिभक्तिं कुर्वन् गृहात् प्रव्रजति स मनुष्यः श्रेष्ठः कथ्यते।।२५।। त्वं नरोत्तमो नाऽसि, अतो धीरो भूत्वा ज्ञातिभिर-विदितगतिः सन् त्वमुत्तरस्यां दिशि हिमालयं याहि, अतः परं सर्वेषां नो मृत्युकाल आगमिष्यति ।।२६।। इत्थं विदुरेण बोधितो प्रज्ञाचक्षुर्धृतराष्ट्रो गृहमोहं त्यक्त्वा रात्रौ तेन सह गृहान्निष्क्रान्तः ।।२७।। पतिं धृतराष्ट्रं प्रयान्तं वीक्ष्य सती गान्धारी त्यागिनां हर्षवर्धनं हिमालयं शूरः शस्त्रप्रहारमिव कष्टानि सोढुमनुजगाम।।२८।।

गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत्पितरौ सौबलीं च ।।२९।। तत्र सञ्जयमासीनं पप्रच्छोद्विग्नमानसः। गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः।।३०।। अम्बा च हतपुत्राऽऽर्ता पितृव्यः क्व गतः सुहृत्। अपि मय्यकृतप्रज्ञे हतबन्धुः स भार्यया। आशंसमानः शमलं गङ्गायां दुःखितोऽपतत्।।३१।। पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून्। अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः।।३२।। *सूत उवाच* - कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः। आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ।।३३।। विमुज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना। अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन्।।३४।। *सञ्जय उवाच* - नाहं वेद व्यवसितं पित्रोर्वः कुलनन्दन। गान्धार्या वा महाबाहो मुषितोऽस्मि महात्मभिः।।३५।। अथाजगाम भगवान् नारदः सहतुम्बुरुः। प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन्निव।।३६।। *युधिष्ठिर उवाच* - नाहं वेद गतिं पित्रोर्भगवान् क्व गतावितः। अम्बा वा हतपुत्राऽऽर्ता क्व गता सा तपस्विनी।।३७।।

।। सङ्ग्रहोक्तिः ।।

ततोऽन्यस्मिन् दिने प्रातः कृतसंध्यादिकार्यो युधिष्ठिरो गुरुजनवन्दनाय गृहं प्रविष्टः, तत्र स धृतराष्ट्रं गान्धारीं च नापश्यत्।।२९।। उद्विग्नमानसः स तत्र स्थितं संजयं दृष्ट्वाऽपृच्छत्, हे संजय! अस्माकं नेत्रहीनस्तातः, हतपुत्रार्ता माता गान्धारी विदुरश्च, एते सर्वे कुत्र गताः, किं सभार्यः स मदपराधाद् दुःखितः सन् गङ्गायां न्यपतत्?।।३०-३१।। अस्माकं पितरि मृते सति यौ शिशून् नः पुत्रवत् रक्षितवन्तौ, तौ पितृव्यौ धृतराष्ट्रविदुरौ क्व गतौ?।।३२।। *सूत उवाच* - धृतराष्ट्रविरहकातरः संजयः कंचित् कालं श्रुत्वाऽपि प्रश्नोत्तरं न दत्तवान्।।३३।। कियत् क्षणानन्तरमश्रूणि विमृज्य कथंचन धैर्यं धृत्वा युधिष्ठिरं प्रत्युवाच।।३४।। *संजय उवाच* - हे कुलनन्दन! विदुरस्य धृतराष्ट्रस्य गान्धार्याश्च वा किमपि वृत्तं विचारं वाऽहं न जानामि, ते मां वञ्चितवन्तः।।३५।।तस्मिन्नेव समये दैवात् तुम्बुरुणा सह नारदः समायातः, तदा युधिष्ठिर आसनात् समुत्थाय सादरं तौ नत्वा प्राह।।३६।। युधिषिठर उवाच - हे भगवन्! अस्माकं पितृव्यौ हतपुत्रार्ता तपस्विनी गान्धारी च क्व गता इत्यहं न जाने,

दिष्ट्या नो भगवन् दृष्टो मग्नानां व्यसनार्णवे। कर्णधार इवापारे भगवान् पारदर्शनः।।३८।। *सूत उवाच* – इत्थं पृष्टः स सर्वज्ञो धर्मपुत्रेण भार्गव। तमाबभाषे भगवान् नारदो मुनिसत्तमः।।३९।। मा कंचन शुचो राजन् यदीश्वरवशं जगत्। लोकाः सपाला यस्येमे वहन्ति बलिमीशितुः। स संयुनक्ति भूतानि स एव वियुनक्ति च।।४०।। यथा गावो नसि प्रोतास्तन्त्यां बद्धाः स्वदामभिः। वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः।।४१।। यथा क्रीडोपस्कराणां संयोगविगमाविह। इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम्।।४२।। यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयम्। सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात्।।४३ ।। तस्माज्जह्यङ्ग वैक्लव्यमज्ञानकृतमात्मनः। कथं त्वनाथाः कृपणा वर्तेरन् बत मां विना।।४४।। कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः। कथमन्यांस्तु गोपायेत् सर्पग्रस्तो यथा परम्।।४५।। अहस्तानि सहस्तानामपदानि चतुष्पदाम्।

।। सङ्ग्रहोक्तिः ।।

सर्वज्ञतया तत् त्वं ब्रूहि, इदानीं ते क्व सन्ति।।३७।। दुःखार्णवे मग्नानामस्माकं भवद्दर्शनं सागरे कर्णधार इव आनन्दद्योतकं जातम्।।३८।। *सूत उवाच* – धर्मपुत्रेण युधिष्ठिरेण एवं पृष्टो मुनिवर्यो नारदो तमाबभाषे।।३९।। हे राजन्! कंचन मा शुचः, सर्वं जगत् परमेश्वरवशं वर्तते, सलोकपालाः सर्वे लोकपालास्तमेव पूजयन्ति, स परमेश्वर एव भूतानि संयोजयन्ति वियोजयन्ति च।।४०।। यथा स्वामिप्रेरिता नसि रज्जुबद्धा बलीवर्दा शकटादिभारं वहन्ति तद्वत् वेदलक्षणायां रज्जौ बद्धा जना परमेश्वरस्य बलिं वहन्ति।।४१।। बालानामिच्छया कन्दुकादीनामिवाऽस्माकमपि संयोगो वियोगो वा परमेश्वरेच्छयैव भवति।।४२।। तस्मादत्र लोके स्नेहादतिरिक्तः कश्चिदपि शोकस्य हेतुर्नास्ति।।४३।। हे राजन्! शोकस्य केवलं स्नेहहेतुत्वात् मनसो वैक्लव्यं त्यज, कृपणा अनाथा मां विना कथं वर्त्तेरन् इति पृच्छसि चेत् शृणु, कालकर्मगुणाधीनः पाञ्चभौतिको देहोऽयमस्ति स्वयं सर्पग्रस्तोऽन्यं कथं रक्षेत्?।।४४-४५।। मनुष्याणामन्नफलादीनि, पशूनां तृणादीनि, महतामजगरादीनां क्षुद्राणि भूतानि, एवं सर्वेषामीश्वरणैव जीवनधारकं भोजनं निर्दिष्टं वर्तते, अतस्तद्विषये चिन्ता न कर्त्तव्या।।४६।।

फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥४६॥ तदिदं भगवान् राजन्नेक आत्माऽऽत्मनां स्वदृक्। अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा॥४७॥ सोऽयमद्य महाराज भगवान् भूतभावनः। कालरूपोऽवतीर्णोऽस्यामभवाय सुरद्विषाम् ॥४८॥ निष्पादितं देवकृत्यमवशेषं प्रतीक्षते। तावद् यूयमवेक्षध्वं भवेद् यावदिहेश्वरः ॥४९॥ धृतराष्ट्रः सहभ्रात्रा गान्धार्या च स्वभार्यया। दक्षिणेन हिमवत ऋषीणामाश्रमं गतः॥५०॥ स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात्। सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते॥५१॥ स्नात्वानुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि। अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः॥५२॥ जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः। हरिभावनया ध्वस्तरजःसत्त्वतमोमलः॥५३॥ विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम्। ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे॥५४॥ ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः। निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः। तस्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः॥५५॥

॥ सङ्ग्रहोक्तिः॥

हे राजन्! इदं सर्वमस्वतन्त्रमनित्यं च वर्तते, स्वयंप्रकाशः स भगवान् एक एव सर्वेषामन्तरत्मा प्रशासकः सन् स्वक्रीयया स्वतन्त्रेच्छयैव बहुधा भाति॥४७॥ हे महाराज! स एव भूतभावनो भगवानिदानीमसुराणां विनाशाय कालरूपः सन्नवतीर्णोऽस्ति॥४८॥ स देवकार्यं कृत्वाऽवशिष्टं यदुकुलनाशं प्रतीक्षमाण आस्ते, ततः स्वं लोकं यास्यति, अतो यूयं तावत् प्रतीक्षध्वं यावत् स भगवान् वर्त्तते, ततो महाप्रस्थानं कुरुत॥४९॥ सांप्रतं धृतराष्ट्रो विदुरो गान्धारी च एते सर्वे हिमालयदक्षिणभागे ऋषीणामाश्रमे सन्ति॥५०॥ तत्र सप्तर्षीणां प्रीत्यै गङ्गा सप्तधाराभिः सप्तधा जाता, तत् सप्तस्रोतोनामकं तीर्थं प्रसिद्धं वर्तते॥५१॥ तत्र त्रिकालस्नानकारी कृताग्निहवनः शान्तचित्तो जलमात्राहारो विगतैषणो धृतराष्ट्र आस्ते॥५२॥ जितासनः प्राणायामपरो हरिं ध्यायन् ध्वस्तसत्त्वरजस्तमोमलः स धृतराष्ट्रो मनो बुद्धौ संयोज्य, बुद्धिं जीवे विलीनां कृत्वा, परब्रह्मणि प्रत्यगात्मानं संयोज्य, इन्द्रियव्यापारस्य निरुद्धत्वात् स्थाणुरिव तिष्ठति, तत्र गत्वा त्वं तस्य विघ्नकर्ता न भव॥५३-५५॥

स वा अद्यतनाद् राजन् परतः पञ्चमेऽहनि। कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति।।५६।। दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे। बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति।।५७।। विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन। हर्षशोकयुतस्तस्माद् गन्ता तीर्थनिषेवकः।।५८।। *सूत उवाच* - इत्युक्त्वाथारुहत् स्वर्गं नारदः सहतुम्बुरुः। युधिष्ठिरो वचस्तस्य हृदि कृत्वाऽजहाच्छुचः।।५९।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः ।।१४।।

सूत उवाच - सम्प्रस्थिते द्वारिकायां जिष्णौ बन्धुदिदृक्षया। ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम्।।१।। व्यतीताः कतिचिन्मासास्तदा नायात्ततोऽर्जुनः। ददर्श घोररूपाणि निमित्तानि कुरुद्वहः।।२।।

।। सङ्ग्रहोक्तिः ।।

हे राजन्! सोऽद्यदिनात् पञ्चमेऽहनि शरीरं त्यक्षति, तत्कलेवरं योगाग्निनैव भस्मसात् भविता।।५६।। ततः पर्णशालासहिते पत्युर्देहे दह्यमाने सति बहिःस्थिता सती गान्धारी तमग्निमनुप्रवेशं करिष्यति।।५७।। हे कुरुनन्दन! विदुरस्तु तदाश्चर्यपूर्णं कृत्यं दृष्ट्वा हर्षशोकग्रस्तहृदयेन तीर्थयात्रां कर्तुं निर्गमिष्यति।।५८।। *सूत उवाच* - इत्थं संभाष्य नारदस्तुम्बुरुणा सह स्वर्गं गतः, युधिष्ठिरोऽपि तद्वचः श्रवणेन शोकं तत्याज।।५९।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः ।।१४।।

अपशकुनदर्शनेन युधिष्ठिरस्य चिन्ता

सूत उवाच - यदूनां दिदृक्षया तथा पुण्यकीर्तेः श्रीकृष्णस्याऽभिप्रायं ज्ञातुमर्जुनो द्वारकां गत आसीत्।।१।। सप्तमासा व्यतीतास्तथाप्यर्जुनो द्वारिकातो यदा नाऽऽगच्छत् तदा युधिष्ठिरो घोराणि निमित्तानि = अपशकुनानि ददर्श।।२।।

कालस्य च गतिं रौद्रां विपर्यस्तर्त्तुधर्म्मणः। पापीयसीं नृणां वार्त्तां क्रोधलोभानृता-त्मनाम्।।३।। जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम्। पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनम्।।४।। कन्याविक्रयिणं तातं सुतं पित्रोरपोषकम्। ब्राह्मणान्वेदविमुखान् शूद्रांश्च ब्रह्मवादिनः।।५।। निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम्। लोभाद्य-धर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः।।६।। *युधिष्ठिर उवाच* - संप्रेषितो द्वारिकायां जिष्णुर्बन्धुदिदृक्षया। ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम्।।७।। गताः सप्ताधुना मासा भीमसेन तवानुजः। नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा।।८।। अपि देवर्षिणा दिष्टः स कालोऽयमुपस्थितः। यदात्मनोऽङ्गमाक्रीडं भगवानुत्सि-सृक्षति।।९।। यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः। आसन् सपत्नविजयो लोकाश्च यदनुग्रहात्।।१०।। पश्योत्पातान्नरव्याघ्र दिव्यान् भौमान् सदैहिकान्। दारुणान् शंसतोऽदूराद्भयं नो बुद्धिमोहनम्।।११।। ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनः पुनः। वेपथुश्चापि हृदय आराद्दास्यन्ति विप्रियम्।।१२।। शिवैषोद्यन्तमादित्यमभि रौत्यनलानना।

।। सङ्ग्रहोक्तिः ।।

कालस्य ऋतुविपर्यासरूपां भयङ्करां गतिम्, क्रोधलोभानृतभरितानां नृणां पापाचरणम्, कपटपूर्णं व्यवहारम्, शठतापूर्णां मैत्रीम्, पितृमातृसुहृद्भ्रातृदम्पतीनां कलहम्, कन्याविक्रयिणं पितरम्, पित्रोरपोषकं पुत्रम्, वेदविमुखान् विप्रान्, ब्रह्मवादिनः शूद्रान्, नृणां लोभादिपापस्वभावं च दृष्ट्वा युधिष्ठिरो भीमं प्रति जगाद।।३-६।। *युधिष्ठिर उवाच* - हे भीम! तवाऽनुजोऽर्जुनो बन्धुदिदृक्षया श्रीकृष्णाभिप्रायस्य जिज्ञासया च मत्प्रेरितः सन् द्वारिकां गतोऽस्ति, तस्य सप्त मासाः व्यतीताः तथापि स कस्माद्धेतोरत्र न परिवृत्तः, तदहं न जानामि।।७-८।। देवर्षिणा नारदेन निर्दिष्टः श्रीकृष्णस्य लीलावपुः त्यागस्य काल आगतः किम्?।।९।। यत्कृपयाऽस्माकं सम्पत्तयो राज्यं स्त्रियः प्राणाः प्रजाः शत्रुजयश्चैतत्सर्वमासीत्, तद्वियोगं कथं सहिष्यामः।।१०।। हे नरव्याघ्र! आकाशे भूमौ देहे चोत्पन्नान् आसन्नभयसूचकान् उत्पातान् विलोकय।।११।। मम वामोर्वक्षिबाहवाः पुनःपुनः स्फुरन्ति, जायमानो हृत्कम्पोऽप्यासन्नं विप्रियं सूचयति।।१२।।

मामङ्ग सारमेयोऽयमभिरोदित्यभीरुवत् ।।१३।। शस्ताः कुर्वन्ति मां सव्यं दक्षिणं
पशवोऽपरे। वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम।।१४।। मृत्युदूतः कपोतोऽयमुलूकः
कम्पयन्मनः। प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः।।१५।। धूम्रा दिशः परिधयः
कम्पते भूः सहाद्रिभिः। निर्घातश्च महानासीत्साकं च स्तनयित्नुभिः।।१६।। वायुर्वाति
खरस्पर्शो रजसा विसृजंस्तमः। असृग्वर्षन्ति जलदा बीभत्समिव सर्वतः।।१७।।
सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि। सुसंकुलैर्भूतगणैर्ज्वलिते इव रोदसि।।१८।।
नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च। न ज्वलत्यग्निराज्येन कालोऽयं किं
विधास्यति।।१९।। न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः। रुदन्त्यश्रुमुखा
गावो न हृष्यन्त्यृषभा व्रजे। दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च।।२०।। इमे
जनपदग्रामाः पुरोद्यानाकराश्रमाः। भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः।।२१।।
मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः। अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ।।२२।।

।। सङ्ग्रहोक्तिः ।।

एषा क्रोष्ट्री अग्निवदुग्रानना सत्युद्यन्तमादित्यमभिरौति, हे भीम! अयं सारमेयोऽपि निर्भीकवत्
मामभिरोदिति।।१३।। प्रशस्ता गवाश्वादयः पशवो मे वामपार्श्वं गच्छन्ति, अपरे खरादयो मे
दक्षिणं गच्छन्ति, हे पुरुषव्याघ्र! ममाश्वान् रुदतो लक्षये।।१४।। मृत्युदूतः कपोत उलूकश्च
इमौ द्वौ भयानककुह्वानैरिमं देशं शून्यमिच्छतः।।१५।। दिशो धूम्रा दृश्यन्ते सपर्वता पृथ्वी
कम्पते, अभ्ररहितो वज्रनिर्घोषोऽपि श्रूयते।।१६।। धूलिभिस्तमः प्रसारयन् खरो वायुर्वाति,
मेघा रुधिरं वर्षन्ति, सर्वत्र बीभत्समिव प्रतीयते।।१७।। दिवि हतप्रभं सूर्यं, मिथो ग्रहयुद्धं च
पश्य, संकुलैर्भूतगणैर्द्यावापृथिव्यौ ज्वलित इव दृश्येते।।१८।। नद्यो नदाः सरांसि मनांसि च
निमित्तं विना कलुषितानि जातानि, घृतस्याहुत्याऽपि वह्निर्न प्रज्वलति, कालोऽयं किं विधास्यति?
।।१९।। वत्साः स्तन्यं न पिबन्ति, गावः स्तन्यं न दुह्यन्ति, अश्रुमुख्यो गावो रुदन्ति, वृषा
व्रजे न हृष्यन्ति, देवप्रतिमा रुदन्तीव प्रस्विद्यन्ति।।२०।। इमे जनपदाः पुराणि ग्रामा आकरा
आश्रमा श्चैते सर्वे नष्टश्रियः सन्तः अस्माकं किं अघं=दुःखं दर्शयन्ति? इति वयं तु विद्मः।।२१।।
एतैरुत्पातैरहमनुमिनोमि यत् अनन्यचिन्हभूषितैर्भगवत्पादैः शून्या भूरियं हतभाग्या जाता।।२२।।

इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा। राज्ञः प्रत्यागमद् ब्रह्मन् यदुपुर्य्याः कपिध्वजः।।२३।। तं पादयोर्निपतितमयथापूर्वमातुरम्। अधोवदनमब्बिन्दून् मुञ्चन्तं नयनाब्जयोः।।२४।। विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः। पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम्।।२५।। *युधिष्ठिर उवाच* - कच्चिदानर्त्तपुर्यां नः स्वजनाः सुखमासते। मधुभोजदशार्हार्हाः सात्वतान्धकवृष्णयः।।२६।। शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिष। मातुलः सानुजः कच्चित् कुशल्यानकदुन्दुभिः ।।२७।। सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः। आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयम्।।२८।। कच्चिद्राजाऽहुको जीवत्यसत्पुत्रोऽस्य चानुजः। हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः।।२९।। आसते कुशलं कच्चिद्ये च शत्रुजिदादयः। कच्चिदास्ते सुखं रामो भगवान् सात्त्वतां पतिः।।३०।। प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः। गम्भीररयोऽनिरुद्धो वर्द्धते भगवानुत।।३१।। सुषेणश्चारुदेष्णश्च साम्बो जाम्बवती सुतः। अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः।।३२।।

।। सङ्ग्रहोक्तिः।।

हे ब्रह्मन्! इति चिन्तयतः युधिष्ठिरस्याऽग्रे द्वारकातः प्रतिनिवृतोऽर्जुनः समुपतस्थे।।२३।। साश्रुमुखं पादयोः प्रणमन्तं नयनाब्जयोरश्रुबिन्दून् मुञ्चन्तं हतश्रियमर्जुनं दृष्ट्वोद्विग्नमना नारदस्य वचनं स्मरन् युधिष्ठिरस्तं पृष्टवान्।।२४-२५।। *युधिष्ठिर उवाच* - हे अर्जुन! द्वारकायां मधुभोजदशार्हसात्वतान्धकवृष्णयः सर्वे नः स्वजना यादवाः शूरः सानुजो मातुलो वसुदेवश्च, तौ द्वौ कुशलिनौ आसाते।।२७।। परस्परं स्वसारः सप्त देवकीप्रमुखा अस्माकं मातुलान्यः सहात्मजाः सस्नुषाश्च सक्षेममासते।।२८।। उग्रसेनः तदनुजो देवकश्च जीवति किं, ससुतो हृदीकोऽक्रूरो जयन्तगदसारणाः, एते सर्वे कुशलिनः कच्चित्?।।२९।। ये शत्रुजिदादयः सर्वे कुशलिनः सन्ति? सात्वतां पतिर्भगवान् बलभद्रः सुखमास्ते।।३०।। सर्ववृष्णीनां मध्ये महारथः प्रद्युम्नः सुखमास्ते कच्चित्? गम्भीरवेगोऽनिरुद्धो मोदते किम्?।।३१।। सुषेणश्चारुदेष्णः साम्बोऽन्ये च ऋषभादयः कृष्णपुत्राः सपुत्राः सुखमासते कच्चित्?।।३२।।

तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः। सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः
।।३३।।अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः। अपि स्मरन्ति कुशलमस्माकं
बद्धसौहृदाः।।३४।। भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः। कच्चित् पुरे सुधर्मायां
सुखमास्ते सुहृद्वृतः।।३५।। मङ्गलाय च लोकानां क्षेमाय च भवाय च। आस्ते
यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान्।।३६।। यद्बाहुदण्डगुप्तायां स्वपुर्य्यां यदवो-
ऽर्च्चिताः। क्रीडन्ति परमानन्दं महापौरुषिका इव।।३७।। यत्पादशुश्रूषणमुख्य-
कर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः। निर्ज्जित्य संख्ये त्रिदशांस्तदाशिषो हरन्ति
वज्रायुधवल्लभोचिताः।।३८।। यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया
मुहुः। अधिक्रमन्त्यङ्घ्रिभिराहृतां बलात् सभां सुधर्मां सुरसत्तमोचिताम् ।।३९।।
कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे। अलब्धमानोऽवज्ञातः किं वा तात
चिरोषितः।।४०।। कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमङ्गलैः। न दत्तमुक्तमर्थिभ्य
आशया यत्प्रतिश्रुतम्।।४१।। कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगणं स्त्रियम्।

।। सङ्ग्रहोक्तिः ।।

तथैव श्रुतदेवोद्धवादयः कृष्णस्यानुचरा अन्ये च रामकृष्णभुजाश्रयाः सात्वर्षभाः सर्वे कुशलिन आसते? बद्धसौहृदास्ते सर्वेऽस्माकं कुशलं स्मरन्ति किम्।।३३-३४।। भक्तवत्सलो भगवान् कृष्णो द्वारिकायां सुधर्मायां सुहृदां मध्ये सुखमास्ते?।।३५।। स्वभक्तानां मङ्गलाय क्षेमाय स्वस्तये च बलभद्रसहितः कृष्णो यादवाम्भोधावास्ते किम्?।।३६।। गोविन्दभुजगुप्तायां द्वारकायां लोकैर्बहुमता यदवो वैकुण्ठनाथानुचरा इव क्रीडन्ति।।३७।। यच्चरणसेवया सत्यादयः षोडश सहस्रयोषितः शच्यादीनामुचिता अभीष्टार्थप्रदाः पारिजातकरूपा आशिषः स्वीकुर्वन्ति ।।३८।। यस्य बाहुप्रभावानुजीविनो यदुप्रवीरा निर्भयाः सन्तो देवराजोचितां यां सुधर्मां सभां पद्भिरधिक्रमन्ति स भगवान् कृष्णः सुखमास्ते किम्?।।३९।। हे तात! तवाऽऽरोग्यमस्ति किम्? निस्तेजाः संलक्षसे, बन्धुभ्योऽलब्धमानः किं वाऽवज्ञातोऽसि? बहुकालं किमर्थं तत्र स्थितः?।।४०।। भावशून्यशब्दैरभिहितः किम्? आशान्वितेभ्यो याचकेभ्यः प्रतिज्ञां कृत्वाऽपि न दत्तं किम्?।।४१।। अथवा त्वं ब्राह्मण-बालक-वृद्ध-गो-रोगि-स्त्रीजनानां शरणागतानां वा

शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः।।४२।। कच्चित्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियम्। पराजितो वाथ भवान् नोत्तमैर्नासमैः पथि।।४३।। अपि स्वित्पर्यभुङ्क्थास्त्वं संभोज्यान् वृद्धबालकान्। जुगुप्सितं कर्म किंचित् कृतवान्न यदक्षमम्।।४४।। जुगुप्सितं कर्म किंचित् कृतवान्न यदक्षमम्।।४४।। कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबन्धुना। शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक्।।४५।।

इति श्रीमद्भगवते महापुराणे प्रथमस्कन्धे चतुर्दशोऽध्यायः ।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

सूत उवाच – एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञाऽऽविकल्पितः। नानाशङ्कास्पदं रूपं कृष्णविश्लेष कर्शितः।।१।। शोकेन शुष्यद्वदवहृत्सरोजो हतप्रभः। विभुं तमेवानुध्यायन्नाशक्नोत् प्रतिभाषितुम्।।२।। कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः। परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः ।।३।।

।। सङ्ग्रहोक्तिः।।

रक्षणं न कृतवान् किम्?।।४२।।त्वयाऽगम्यस्त्रीगमनं कृतं किम्? अथवा मार्गे नीचैः समानैर्वा त्वं पराजितः किम्?।।४३।। किं च वृद्धान् बालकान् त्यक्त्वैकाकिना त्वया पूर्वं भोजनं कृतं किम्? अथवा किमपि निन्दितं कर्म कृतं किम्?।।४४।। यद्वा प्रेष्ठतमेन श्रीकृष्णेन रहितं, तेन शून्यमात्मानं मन्यसे किम्? अन्यथा ते मनोव्यथायाः सम्भवो न।।४५।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे सङ्ग्रहोक्त्यां चतुर्दशोऽध्यायः ।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

कलेः प्रवेशं विज्ञाय पाण्डवानां स्वर्गारोहणम्

सूत उवाच – इत्थं भ्रात्रा युधिष्ठिरेण नानाप्रश्नपूर्वकं परिपृष्टः कृष्णसखः कृष्णवियोगकर्षितः शुष्यद्वदनहृत्सरोजोऽर्जुनः किञ्चित् प्रत्युत्तरं दातुं न शशाक।।१-२।। ततो महता प्रयत्नेन

सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन्। नृपमग्रजमित्याह बाष्पगद्गदया गिरा ।।४।। *अर्जुन उवाच* - वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा। येन मेऽपहृतं तेजो देवविस्मापनं महत्।।५।। यस्य क्षणवियोगेन लोकोऽप्यप्रियदर्शनः। उक्थेन रहितो ह्येषः मृतकः प्रोच्यते यथा।।६।। *यत्संश्रयाद् द्रुपदगेह उपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम्। तेजो हृतं खलुमयाऽभिहतश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा।।७।।* यत्संनिधावहमु खाण्डवमग्नयेऽदामिन्द्रं च सामरगणं तरसा विजित्य। लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते।।८।। यत्तेजसा नृपशिरोऽङ्घ्रिमहन् मखार्थमार्य्योऽनुजस्तव गजायुतसत्त्ववीर्यः। तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन् बलिमध्वरे ते।।९।। पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायाम्। स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्तत्स्त्रियोऽकृत हतेशविमुक्तकेशाः।।१०।। यो नो जुगोप वनमेत्य दुरन्तकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः। शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्ताममंस्त सलिले विनिमग्नसंघः।।११।।

।। सङ्ग्रहोक्तिः ।।

शोकाश्रूणि संस्तभ्य पाणिनाऽऽमृज्य श्रीकृष्णविरहातुरस्तदीयं सारथ्यादिषु सख्यादिकं स्मृत्वा च युधिष्ठिरं गद्गदगिरोवाच।।३-४।। *अर्जुन उवाच* - हे महाराज! येन देवानामपि विस्मयकरं मत्तेजोपहृतं तेन बन्धुरूपिणा कृष्णेनाऽहं वञ्चितोऽस्मि।।५।। यथा पित्रादेर्देहः प्राणेन शून्यः सन् मृतकः प्रोच्यते तद्वत् यस्य कृष्णस्य क्षणवियोगेन मत्प्रभृतिकोऽयं लोकोऽप्रियदर्शनो जातः।।६।। द्रूपदगेहे स्वयंवर उपगतानां राज्ञां तेजो मया यस्य कृष्णस्य संश्रयात् हृतं, सज्जीकृतेन धनुषा मत्स्यो विद्धः द्रौपदी च लब्धा।।७।। यस्य सन्निधौ देवैः सहितं देवेन्द्रं निर्जित्याऽग्नितुष्टये खाण्डववनदाहः कारितः, ततश्च मयकृताद्भुतशिल्पपूर्णा सभा लब्धा।।८।। सहस्रगजवीर्यो भीमो यत्तेजसा जरासंधं निहतवान्, प्रमथनाथमखाय जरासंधेन निर्जित्यानीता नृपा मोचिताः, ये तवाध्वरे बलिमानीतवन्तः।।९।। सभायां द्रौपदीकेशाकर्षकाणां दुःशासनादीनां वधो यत्कृपया मया कृतः तत्पत्न्यश्च वैधव्येन मुक्तकेशाः कृताः।।१०।। अस्माकं वनवासकाले

यत्तेजसाऽथ भगवान् युधि शूलपाणिर्विस्मापितः स गिरिशोऽस्त्रमदान्निजं मे। अन्येऽपि चाऽहममुनैव कलेवरेण प्राप्तो महेन्द्रभवने महदासनार्द्धम्।।१२।। तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवलक्षणमरातिवधाय देवाः। सेन्द्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना।।१३।। यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततरेऽहमतीर्यसत्त्वम्। प्रत्याहृतं बहुधनं च मया परेषां तेजस्पदं मणिमयं च हृतं शिरोभ्यः।।१४।। यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमण्डलमण्डितासु। अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आर्च्छत्।।१५।। यद्दोष्षु मा प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्त्तशलसैन्धवबाह्लिकाद्यैः। अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरिदासमिवासुराणि।।१६।। सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे यत्पादपद्ममभवाय भजन्ति भव्याः। मां श्रान्तवाहमरयो रथिनो भुविष्ठं न प्राहरन् यदनुभावनिरस्तचित्ताः।।१७।।

।। सङ्ग्रहोक्तिः।।

भोजनान्ते यो भगवान् स्वयमागत्य पात्रलग्नं किञ्चित् शाकपत्रं भुङ्क्त्वा दुर्वाससः शापादस्मान् ररक्ष, तेन शाकभक्षणेन च दशसहस्रशिष्यैः सह स्नानं कुर्वन् दुर्वासाः तृप्तो बभूव, ततो भोजनमकृत्वैव स स्वस्थानं गतः।।११।। यस्य तेजसा मया युधि शूलपाणिर्विस्मापितः, स मां पाशुपतास्त्रमदात्, अनेन देहेनैव मया महेन्द्रभवनेऽर्द्धमिन्द्रासनं प्राप्तम्।।१२।। यदनुग्रहादेव दैत्यनाशार्थं स्वर्गे विहरतो मे भुजदण्डाश्रयमिन्द्रादयोऽपि कृतवन्तः, हे महाराज! तेन कृष्णेनाधुनाहं वञ्चितोऽस्मि।।१३।। यस्य साहाय्येन विराट्पतिपुत्रस्योत्तरस्य गोग्रहणे भीष्मादियुक्तं कुरुसैन्यं विजित्य गोधनं मया प्रत्याहृतम्, तेषां शिरोमुकुटादिकं च हृतम्।।१४।। यो कुरुक्षेत्रयुद्धे भीष्मकर्णद्रोणशल्यचमूषु पुरःस्थितासु सारथिरूपेण मदग्रे स्थितः सन् दृष्टिमात्रेणैव शत्रुसैनिकानामायुरुत्साहशक्तिं शस्त्रादिकौशलं चाहरत्।।१५।। भीष्मकर्णद्रौणि त्रिगर्तशल्यजयद्रथबाह्लिकादिभिः प्रयुक्तान्यस्त्राणि दैत्यैः प्रयुक्तान्यस्त्राणि प्रह्लादस्याऽङ्गानीव यस्यानुग्रहेण ममाङ्गानि नास्पृशन्।।१६।। अहो! यत्पादपङ्कजं भक्ता मुक्त्यै भजन्ति, स सर्वनियन्ता परमेश्वरः कुबुद्धिना मया सारथ्ये वृतः, यत्प्रभावमोहितधियो रथिनोऽपि शत्रवः

नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति। संजल्पितानि
नरदेव हृदिस्पृशानि स्मर्त्तुर्लुठन्ति हृदयं मम माधवस्य।।१८।। शय्याऽऽसनाऽटन-
विकत्थनभोजनादिष्वैक्याद्वयस्य कृतवानिति विप्रलब्धः। सख्युः सखेव
पितृवत्तनयस्य सर्वं सेहे महान् महितया कुमतेरघं मे।।१९।। *सोऽहं नृपेन्द्र रहितः
पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः। अध्वन्युरुक्रमपरिग्रहमङ्गरक्षन्
गोपैरसद्भिरबलेव विनिर्जितोऽस्मि।।२०।। तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आमनन्ति। सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन् हुतं
कुहुकराद्धमिवोप्तमूष्याम्*।।२१।। राजंस्त्वयाऽनुपृष्टानां सुहृदां नः सुहृत्पुरे।
विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः।।२२।। वारुणीं मदिरां पीत्वा मदोन्मथित-
चेतसाम्। अजानतामिवाऽन्योन्यं चतुःपञ्चावशेषिताः।।२३।। प्रायेणैतद्भगवत
ईश्वरस्य विचेष्टितम्। मिथो निघ्नन्ति भूतानि भावयन्ति च यन्मिथः।।२४।।

।। सङ्ग्रहोक्तिः।।

श्रान्तवाहं भुविष्ठं मां न प्राहरन्।।१७।। हे महाराज! मामुद्दिश्य कृष्णेनोच्चरितानि रुचिरस्मित-शोभितानि हे पार्थ! हे अर्जुन! हे सखे! इत्यादीनि नर्मवचनानि स्मृतानि सन्ति ममहृदयं छिन्दन्ति।।१८।। शय्याऽऽसनाऽटनविकत्थनभोजनादिषु कदाचित् कमपि व्यतिक्रमं दृष्ट्वा मित्रभावेन "सत्ययुक्तस्त्वसि" इति वक्रोक्त्या मया तिरस्कृतोऽपि यः कृष्णः पितृवत् मदपराधसहनं कृतवान्, अद्याऽहं तेन वञ्चितोऽस्मि।।१९।। हे नृपेन्द्र! मम प्रियेण सख्या पुरुषोत्तमेन रहितो हृदयेन शून्य इव जातः, सोऽहं मार्गे श्रीकृष्णस्य स्त्रीगणं नीत्वाऽऽगच्छन् सन् दुष्टैर्गोपैरबलेव विनिर्जितो लुण्ठितश्चाऽस्मि।।२०।। मम महारथस्य तदेव गाण्डीवं धनुः, त एव बाणाः, स एव रथः, त एवाश्वाः तदेतत् सर्वं भस्मनि हुतं हव्यमिव तद्वियोगाद् व्यर्थं जातम्।।२१।। हे महाराज! त्वया येषां कुशलादिकं पृष्टं तेषां विप्रशापाद् विमूढानां मद्यपानमत्तानाम् एरकायष्ट्याभृतमुष्टिभिर्मिथो निघ्नतां द्वारकावासिनां सुहृदां यादवानां मध्ये चत्वारः पञ्च वा संप्रत्यवविष्टाः सन्ति।।२२-२३।। अस्मिन् युद्धविषये तु परमेश्वरस्य कृष्णस्येच्छैव कारणम्, या मिथो भूतान्युत्पादयन्ति घ्नन्ति च।।२४।।

जलौकसां जले यद्वन्महान्तोऽदन्त्यऽणूयसः। दुर्बलान् बलिनो राजन् महान्तो बलिनो मिथः।।२५।। एवं बलिष्ठैर्यदुभिर्महद्भिरितरान् विभुः। यदून् यदुभिरन्योन्यं भूभारान् संजहार ह।।२६।। देशकालार्थयुक्तानि हृत्तापोपशमानि च। हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे।।२७।। एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम्। सौहार्देनातिगाढेन शान्ताऽऽसीद्विमला मतिः।।२८।। वासुदेवाङ्घ्र्यनुध्यानपरिबृंहित-रंहसा। भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः।।२९।। गीतं भगवता ज्ञानं यत् तत् सङ्ग्राममूर्धनि। कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः।।३०।। विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः। लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसंभवः।।३१।। निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च। स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः।।३२।। पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च ताम्। एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः।।३३।। ***ययाऽहरद्भुवोभारं तां तनुं विजहावजः। कण्टकं कण्टकेनेव द्वयं चापीशितुः समम्।।३४।।***

।। सङ्ग्रहोक्तिः।।

हे राजन्! यथा जले जलौकसां मध्ये महान्तो जलचरा अल्पीयसो घ्नन्ति अदन्ति च तद्वत् महतो बलिनः परस्परं घातयित्वा, बलिभिश्च दुर्बलान् यादवान् घातयित्वा भगवान् भुवो भारं हृतवान्।।२५-२६।। श्रीकृष्णं स्मरतो मे चित्तं देशकालार्थयुक्तानि श्रीकृष्णवचनानि हरन्ति ।।२७।। एवं श्रीकृष्णस्य चरणकमलमतिगाढेन सौहार्देन चिन्तयतोऽर्जुनस्य मतिः शान्ता विशुद्धा च जाता।।२८।। श्रीकृष्णपादपद्मध्यानेनाऽभिवृद्धिं गतया भक्त्याऽर्जुनस्य विषयवासना नष्टा।।२९।। कुरुक्षेत्रे युद्धे भगवता गीतारूपं ज्ञानमर्जुनायोपदिष्टं तत् पुनः अर्जुनः सस्मार।।३०।। भगवत्पराभक्तिफलकसम्यक्ज्ञानसंपन्नत्वात् देवमनुष्यत्वादिद्वैतसंशयरहित ऐश्वर्येच्छाशून्योऽर्जुनो विशोकोऽभवत्।।३१।। श्रीकृष्णस्य स्वधामगमनं यादवानां विनाशं च श्रुत्वा स्वस्थचित्तो भूत्वा युधिष्ठिरो निरतिशयसुखरूपलोकमार्गाय मतिं-विचारं चक्रे।।३२।। तदा कुन्त्यप्यर्जुनोक्तं यदुकुलविनाशं श्रीकृष्णस्य स्वधामगमनं च श्रुत्वा एकान्तभक्त्या भगवत्स्वरूपे मनो निवेश्य देहं त्यक्त्वा मुक्तिं प्राप।।३३।। अजन्मा श्रीकृष्णो यादवरूपया

यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः। भूभारः क्षपितो येन जहौ तच्च कलेवरम् ।।३५।। यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः। तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्त्तत ।।३६।। युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तदात्मनि। विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ।।३७।। स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः। तोयनीव्याः पतिं भूमेरभ्यषिञ्चद् गजाह्वये ।।३८।। मथुरायां तथा वज्रं शूरसेनपतिं ततः प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ।।३९।। विसृज्य तत्र तत्सर्वं दुकूलवलयादिकम्। निर्ममो निरहंकारो संछिन्नाशेषबन्धनः ।।४०।। वाचं जुहाव मनसि तत्प्राण इतरे च तम्। मृत्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ।।४१।। त्रित्वे हुत्वा च पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः। सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये ।।४२।। चीरवासा निराहारो बद्धवाङ् मुक्तमूर्द्धजः। दर्शयन्नाऽऽत्मनो रूपं जडोन्मत्तपिशाचवत् ।।४३।।

।। सङ्ग्रहोक्तिः ।।

तन्वा भुवो भारमहरत् कण्टकं कण्टकेनोद्धृत्येव तां तनुमपि विजहौ ।।३४।। भगवान् मत्स्यादिरूपाणि धत्ते जहाति च यथा नटो विविधानि वेषान्तराणि धृत्वा जहाति, तद्वत् कृष्णोऽपि येन कलेवरेण भूभारं क्षपितवान् तत् कलेवरं जहौ ।।३५।। यदा श्रवणीयसत्कथः श्रीकृष्ण इमां धरां तत्याज तदहरेवाऽविवेकिनामशुभहेतुः कलिः प्रावर्त्तत ।।३६।। तदा युधिष्ठिरो नगरे राज्ये स्वस्मिंश्च सर्वत्र कलिप्रवेशं दृष्ट्वा लोभानृतकपटहिंसाद्यधर्मचक्रं च प्रवृत्तं दृष्ट्वा स्वर्गगमनाय निश्चयं चक्रे ।।३७।। ततः स्वराड् युधिष्ठिरो गुणैरात्मनः समं विनयिनं पौत्रं परीक्षितं हस्तिनापुरराज्येऽभ्यषिञ्चत् ।।३८।। मथुरायामनिरुद्धपुत्रं वज्रनाभं शूरसेनपतिं कृत्वा युधिष्ठिर आहवनीयादीन् त्रेताग्नीन् स्वस्मिन् समारोपयामास ।।३९।। ततो दुकूलवलयादिकं राजोचितवेषं च परित्यज्य छिन्नबन्धनो ममतादिशून्यः सन् सर्वेन्द्रियाणि मनसि, मनः प्राणे, प्राणमपाने, अपानं मृत्यौ, मृत्युं देहे, देहं गुणत्रये, गुणत्रयमविद्यायां, अविद्यां जीवे, जीवं च ब्रह्मणि लीनं कृत्वा, वल्कलं परिधाय निराहारो मौनी विकीर्णकेशः सन्

अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा। उदीचीं प्रविवेशाऽऽशां गतपूर्वां महात्मभिः।
हृदि ब्रह्म परं ध्यायन्नाऽऽवर्त्तेत गतो यतः।।४४।। सर्वे तमनु निर्जग्मुर्भ्रातरः
कृतनिश्चयाः। कलिनाऽधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि।।४५।। तेऽसाधुकृत-
सर्वार्था ज्ञात्वाऽऽत्यन्तिकमात्मनः। मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम्।।४६।।
तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे। तस्मिन्नारायणपदे एकान्तमतयो गतिम्
।।४७।। अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः। विधूतकल्मषा स्थानं विरजेनाऽऽ-
त्मनैव हि।।४८।। विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान्। कृष्णावेशेन तच्चित्तः
पितृभिः स्वक्षयं ययौ।।४९।। द्रौपदी च तदाऽऽज्ञाय पतीनामनपेक्षताम्। वासुदेवे
भगवति ह्येकान्तमतिराप तम्।।५०।। यः श्रद्धयैतद्भगवत्प्रयाणं पाण्डोः सुतानामिति
संप्रयाणम्। शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम्।।५१।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे पञ्चदशोऽध्यायः ।।१५।।

।। सङ्ग्रहोक्तिः ।।

जडोन्मत्तादिवल्लोकं दर्शयन् भ्रातृणां प्रतीक्षामकुर्वाणो हृदि परं ब्रह्म चिन्तयंश्चोत्तरां दिशं जगाम।।४०-४४।। अधर्ममित्रेण कलिना स्पष्टाः सर्वाः प्रजा भुवि विलोक्य भीमादयोऽपि युधिष्ठिरमनुसस्रुः।।४५।। ते भीमादय आत्मनो देहस्याऽऽत्यन्तिकं मरणं ज्ञात्वा श्रीकृष्णपादपद्मं मनसा धारयामासुः।।४६।। श्रीकृष्णध्यानप्रवृद्धया भक्त्या विशुद्धधिषणा एकान्तमतयस्ते भीमादयो निष्पापाः सन्तो विषयात्मभिर्दुरात्मभि र्दुष्प्राप्यां श्रीनारायणचरणे गतिं रजस्तमोभ्यां रहितेन मनसाऽवापुः।।४७-४८।। विदुरोऽपि पाण्डवादीनां गतिमाकर्ण्य भगवति समाहितचित्तः सन् प्रभासे देहं परित्यज्य पितृभिः सह यमो भूत्वा स्वकं लोकं ययौ।।४९।। तदा द्रौपद्यपि पतीनां स्वापेक्षारहिततां ज्ञात्वा भगवति श्रीकृष्णे निश्चलां मतिं संस्थाप्य तं कृष्णमवाप।।५०।। इत्थं शुभावहं श्रीकृष्णस्वधामगमनं पाण्डवानां च संप्रयाणं यः पुमान् श्रद्धया शृणोति स श्रीकृष्णे भक्तिं लब्ध्वा मुक्तिमुपैति।।५१।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः।।१५।।

अथ षोडशोऽध्यायः ॥१६॥

सूत उवाच - ततः परीक्षिद् द्विजवर्यशिक्षया महीं महाभागवतः शशास ह। यथा हि सूत्यामभि जातकोविदाः समादिशन् विप्र महद्गुणस्तथा ॥१॥ स उत्तरस्य तनयामुपयेम इरावतीम्। जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् ॥२॥ आजहाराश्वमेधांस्त्रीन् गङ्गायां भूरिदक्षिणान्। शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥३॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित्। नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥४॥ *शौनक उवाच* - कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः। नृदेवचिह्नधृक् शूद्रः कोऽसौ गां यः पदाऽहनत् ॥५॥ तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम्। अथवाऽस्य पदाम्भोजमकरन्दलिहां सताम् ॥६॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः। क्षुद्रायुषां नृणामङ्ग मर्त्यानामृतमिच्छताम् ॥७॥ इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि। न कश्चिन्म्रियते तावद्यावदास्त इहान्तकः ॥८॥

॥ सङ्ग्रहोक्तिः ॥

अथ षोडशोऽध्यायः ॥१६॥

गोरूपधारिणोः पृथ्वीधर्मयोः संवादः

सूत उवाच - हे शौनक! जन्मावसर एव कथितसर्वसद्गुणः परमभागवतः परीक्षित् कृपाचार्यादि ब्राह्मणानामादेशानुसारेण महीं शशास ॥१॥ स मातुलस्योत्तरस्य तनयामिरावतीमुपयेमे, तस्यां जनमेजयादयश्चत्वारः पुत्रा अजायन्त ॥२॥ स कृपाचार्यं गुरुं कृत्वा गङ्गातीरे भूरिदक्षिणान् त्रीनश्वमेधांश्चक्रे, यत्र इन्द्रादयो प्रत्यक्षा बभूवुः ॥३॥ ततो दिग्विजयाय निर्गतः स परीक्षित् पृथ्वीधर्मरूपं गोमिथुनं पदा ताडयन्तं राजचिह्नं दधतं शूद्ररूपिणं कलिं निगृहीतवान् ॥४॥ *शौनक उवाच* - नृपः परीक्षित् कस्माद्धेतोः कलिं निजग्राह, यः पदा गामहनत् स राजचिह्नधारी शूद्रः क आसीत् ॥५॥ यद्येषा कथा कृष्णस्य तद्भक्तानां वा सम्बन्धिनी स्यात्तदा तां कथय ॥६॥ अल्पायुषां सद्रूपं परं ब्रह्म कामयमानानामस्माकमसत्कथया तु कालक्षेपो व्यर्थः स्यात् ॥७॥ भगवद्गुणश्रवणात्मकेऽस्मिन् ब्रह्मसत्रे मृत्युरपि कथाश्रवणार्थमाहूतोऽस्ति, अतो यावत् स इहास्ते तावत् कालपर्यन्तं कश्चिदपि न म्रियते ॥८॥

एतदर्थं हि भगवानाहूतः परमर्षिभिः। अहो नृलोके पीयेत हरिलीलामृतं वचः।।९।। मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै। निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ।।१०।। *सूत उवाच* – यदा परीक्षित् कुरुजाङ्गले वसन् कलिं प्रविष्टं निजचक्रवर्त्तिते। निशम्य वार्त्तामनतिप्रियां ततः शरासनं संयुगशौण्डिराददे।।११।। स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेन्द्रध्वजमास्थितः पुरात्। वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः।।१२।। भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून्। किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिम्।।१३।। तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम्। प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकम्।।१४।। आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः। स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे।।१५।। तेभ्यः परमसंतुष्टः प्रीत्युज्जृम्भितलोचनः। महाधनानि वासांसि ददौ हारान्महामनाः।।१६।। सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान्। स्निग्धेषु पाण्डुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिः स्म पदारविन्दे।।१७।। तस्यैवं वर्त्तमानस्य पूर्वेषां वृत्तिमन्वहम्। नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे।।१८।।

।। सङ्ग्रहोक्तिः ।।

एतदर्थमेव परमर्षिभिर्भगवान् मृत्युराहूतः, येन नृलोके जनैर्हरिलीलामृतं वचः पीयेत।।९।। मन्दमतेः स्वल्पायुषो जनस्याऽऽयुर्निशि निद्रया दिवा व्यर्थकर्मभिर्निष्फलं याति।।१०।। *सूत उवाच* – हस्तिनापुरे निवसन् परीक्षित् "स्वराज्ये कलिः प्रविष्टः" इत्यरुचिकरां वार्तां शुश्राव, तदा तन्निग्रहार्थं धनुराददे।। ११।। श्यामतुरङ्गयोजितं मृगेन्द्रध्वजं रथमारुह्य परीक्षित् चतुरङ्गिण्या सेनया सह दिग्विजयाय निर्जगाम।।१२।। स भद्राश्वं केतुमालं भारतवर्षम् उत्तरकुरून्, किम्पुरुषादिदेशान् विजित्य तत्रत्यनृपेभ्यः करं जग्राह।।१३।। तत्र तत्र लोकैः कीर्त्यमानं स्वपूर्वपुरुषाणां पाण्डवादीनां यशः, तथा स्वस्याऽश्वत्थामोपसृष्टब्रह्मास्त्रतो रक्षणम्, यादवपाण्डवानां कृष्णे भक्तिं च शृण्वन्नतिशयेन प्रसन्नो बभूव, एवं च तत्रत्येभ्यो लोकेभ्यो विपुलं धनं वस्त्रादिकं च ददौ।।१४-१६।। किं च पाण्डवानां कृते श्रीकृष्णकृतसारथ्य-पार्षद-सख्य-दौत्यादीनि कर्माणि शृण्वन् स परीक्षित् श्रीकृष्णचरणकमले भक्तिमकरोत्।।१७।। एवं युधिष्ठिरादीननुवर्तमानस्य तस्य समीप एकमाश्चर्यमभूत् तच्छृणु।।१८।।

धर्मः पदैकेन चरन् विच्छायामुपलभ्य गाम्। पृच्छति स्माश्रुवदनां विवत्सामिव मातरम्।।१९।। *धर्म उवाच* - कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायाऽसि म्लायतेषन्मुखेन। आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कंचनाऽम्ब।।२०।। पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणम्। अहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवत्यऽवर्षति।।२१।। अरक्ष्यमाणा स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्त्तान्। वाचं देवीं ब्रह्मकुले कुकर्मण्यऽब्रह्मण्ये राजकुले कुलाग्र्यान् ।।२२।। किं क्षत्रबन्धून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि। इतस्ततो वाऽशनपानवासःस्नानव्यवायोन्मुखजीवलोकम्।।२३।। यद्वाऽम्ब ते भूरिभराऽवतारकृताऽवतारस्य हरेर्धरित्रि। अन्तर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि।।२४।। इदं ममाचक्ष्व तवाऽऽधिमूलं वसुंधरे येन विकर्शिताऽसि। कालेन वा ते बलिनां बलीयसा सुरार्च्चितं किं हतमम्ब सौभगम्।।२५।। *धरण्युवाच* - भवान् हि वेद तत्सर्वं यन्मां धर्माऽनुपृच्छति। चतुर्भिर्वर्त्तसे येन पादैर्लोकसुखावहैः।।२६।।

।। सङ्ग्रहोक्तिः ।।

एकेन पादेन चरन् वृषरूपधरो धर्मोऽश्रुमुखीं विवत्सामिव स्थितां गोरूपधरां पृथिवीं पृच्छति स्म।।१९।। *धर्म उवाच* - हे भद्रे! तेऽनामयमस्ति किम्? किंचित् म्लायता मुखेन निस्तेजस्काऽसि ते हृदि किमपि महद्दुःखं लक्षये, हे अम्बे! दूरस्थं कमपि बन्धुं शोचसि?।।२०।। एकपादं माम् उत शूद्रप्रायै राजभिर्भोक्ष्यमाणामात्मानम् वा हृतयज्ञभागान् देवान् शोचसि दुर्भिक्षपीडितान् जनान्?।।२१।। किंवा स्वपतिभिर्न पाल्यमानाः स्त्रियः, जनकैर्न पाल्यमानान् बालान् वा दुष्टकर्मशीले विप्रकुले स्थितां सरस्वतीं शोचसि किम्?।।२२।। कलिना व्याप्तान् क्षत्रियाधर्मान् शोचसि? वा तैरुपद्रुतानि राष्ट्राणि, उत भोजनपानव्यवायपरायणान् जीवलोकान् शोचसि।।२३।। हे पृथ्वि! भुवो भारावतारणायाऽवतीर्णस्य कृष्णस्यान्तर्धानं शोचसि किम्?।।२४।। इदानीं ते कृशताकरस्याधेर्यत् कारणं स्यात् त्वं तत् कथय, हे अम्बे! सुरार्चितं ते सौन्दर्यं बलिना कालेनाऽद्यापहृतं किम्?।।२५।। *धरण्युवाच* - हे धर्म! मम पीडामूलं सर्वं त्वं जानास्येव

सत्यं शौचं दया क्षान्तिस्त्यागः संतोष आर्जवम्। शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्।।२७।। ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः। स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च।।२८।। प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः। गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः।।२९।। एते चान्ये च भगवन्नित्या यत्र महागुणाः। प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित्।।३०।। तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतम्। शोचामि रहितं लोकं पाप्मना कलिनेक्षितम्।।३१।। आत्मानं चानुशोचामि भवन्तं चामरोत्तमम्। देवान् पितॄनृषीन् साधून्सर्वान् वर्णांस्तथाश्रमान्।।३२।। ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामास्तपः समचरन् भगवत्प्रपन्ना। सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता।।३३।। तस्याऽहमब्जकुलिशाङ्कुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृताङ्गी। त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदन्ते।।३४।। यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतन्त्रः।

।। सङ्ग्रहोक्तिः।।

येन कृष्णेन भवान् सत्य-शौच-दया-तपोरूपैश्चतुर्भिः पादैर्युतोऽवर्त्तथाः, अधुनैकेन पादेन वर्तसे तदपि मे दुःखस्य कारणम्।।२६।। सत्यं, शौचं, दया, क्षान्तिः, त्यागः, सन्तोषः, आर्जवं, शमः, दमः, तपः, साम्यं, तितिक्षा, उपरतिः श्रुतं (१४) ज्ञानं, विरक्तिः, ऐश्वर्यं, शौर्यं, तेजः, बलं, धृतिः, स्वातन्त्र्यं, कौशलं, कान्तिः, धैर्यं, मार्दवं (१२) प्रागल्भ्यं, प्रश्रयः, शीलं, सहः, ओजः, बलं, भगः, गाम्भीर्यं, स्थैर्यं, आस्तिक्यं, कीर्तिः, मानः, गर्वाभावः (१३)।।२७-२९।।महत्त्वमिच्छद्भिः प्रार्थ्या एत एकोनचत्वारिंशद्गुणाः यस्मिन् सदाऽऽसन् तेन गुणपात्रेण श्रीनिवासेन रहितं पाप्मना कलिना च व्याप्तमिमं लोकं शोचामि।।३०-३१।।तथाऽहमात्मानं भवन्तं धर्मं देवर्षिपितृसाधुवर्णाश्रमांश्च शोचामि।।३२।। यस्या अनुग्रहं कामयमाना ब्रह्मादय बहुतिथं तपः समाचरन् सा लक्ष्मीः स्ववासगृहं कमलवनं विहाय यस्य चरणकमलं सेवते, कमलकुलिशाङ्कुशादिभिर्भगवच्छ्रीमत्पदैः समलङ्कृताङ्गीमत एव गर्वयुतां मां योऽत्यजत्।।३३-३४।।आत्मतन्त्रो यः श्रीकृष्णः स्वावतारेणासुरराज्ञां मम भाररूपमक्षौहिणीशतमपानुदत्,

त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन् यदुषु रम्यमबिभ्रदङ्गम् ।।३५।। का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः। स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: ।।३६।। तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा। परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम् ।।३७।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे षोडशोऽध्यायः ।।१६।।

अथ सप्तदशोऽध्यायः ।।१७।।

सूत उवाच - तत्र गोमिथुनं राजा हन्यमानमनाथवत्। दण्डहस्तं च वृषलं ददृशे नृपलाञ्छनम् ।।१।। वृषं मृणालधवलं मेहन्तमिव बिभ्यतम्। वेपमानं पदैकेन सीदन्तं शूद्रताडितम् ।।२।। गां च धर्मदुघां दीनां भृशं शूद्रपदा हताम्। विवत्सामश्रुवदनां क्षामां यवसमिच्छतीम् ।।३।।

।। सङ्ग्रहोक्तिः ।।

तथैव न्यूनचरणं त्वां सम्पूर्णचरणं कुर्वन् यदुकुलमलंकृतवान् ।।३५।। यः सप्रेम समीक्षणं रुचिरस्मितं मधुरभाषणं, च इत्येतै र्यादवस्त्रीणां मानमहरत् यस्य पादपद्मस्पर्शेन मम रोमोद्गमः बभूव, तस्य पुरुषोत्तमस्य विरहं मादृशी का वा सहेत ।।३६।। एवं पृथिवीधर्मयोः परस्परमालापं कुर्वतोः सतोरेव राजर्षिः परीक्षित् पूर्ववाहिन्याः सरस्वत्यास्तटं प्राप ।।३७।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां षोडशोऽध्यायः ।।१६।।

अथ सप्तदशोऽध्यायः ।।१७।।

परीक्षित्कृतः कलिनिग्रहः

सूत उवाच - परीक्षित् सरस्वतीतीरेऽनाथं पीड्यमानं गोमिथुनं राजवेषधारिणं शूद्रं चाऽपश्यत् ।।१।। तत्र श्वेतवर्णं भीतमिव मूत्रं मुञ्चन्तं वेपमानमेकेन पदा भग्नाङ्गवत्तिष्ठन्तं शूद्रेण ताडितं वृषभं ददर्श ।।२।। धर्मदुघां शूद्रेण वामपादेन ताडितां भृशं दीनामश्रुवदनां

प्रपच्छ रथमारूढः कार्त्तस्वरपरिच्छदम्। मेघगम्भीरया वाचा समारोपितकार्मुकः ।।४।। कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान् बली। नरदेवोऽसि वेषेण नटवत् कर्मणाऽद्विजः।।५।। कस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना। शोच्योऽस्यशोच्या-न्रहसि प्रहरन्वधमर्हसि।।६।। त्वं वा मृणालधवल पादैर्न्यूनः पदा चरन्। वृषरूपेण किं कश्चिद्देवो नः परिखेदयन्।।७।। न जातु कौरवेन्द्राणां दोर्दण्डपरिरम्भिते। भूतलेऽनुपतन्त्यस्मिन्विना ते प्राणिनां शुचः।।८।। मा सौरभेयाऽनुशुचो व्येतु ते वृषलाद्भयम्। मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि।।९।। यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते साध्व्यसाधुभिः। तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः।।१०।। एष राज्ञः परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः। अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ।।११।। कोऽवृश्चत्तव पादांस्त्रीन्सौरेभेय चतुष्पदः। मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्त्तिनाम्।।१२।। आख्याहि वृष भद्रं वः साधूनामकृतागसाम्। आत्मवैरूप्य-कर्त्तारं पार्थानां कीर्तिदूषणम्। जनेऽनागस्यघं युञ्जन् सर्वतोऽस्य च मद्भयम् ।।१३।।

।। सङ्ग्रहोक्तिः।।

कृशां तृणमिच्छन्तीं गां च ददर्श।।३।। रथमारूढः सज्जीकृतकार्मुकः परीक्षित् मेघगम्भीरया वाचा पप्रच्छ।।४।। त्वं कोऽसि मच्छरणे लोके बलवान् सन् दुर्बलान् हंसि? त्वं नटवत् वेषमात्रेणैव राजाऽसि, कर्मणा तु शूद्रोऽसि।।५।। अर्जुनेन सह श्रीकृष्णे स्वधाम गते सति अशोच्यान् रहसि प्रहरन् त्वं वधमर्हसि।।६।। अथ वृषभं पृच्छति - हे मृणालधवल! त्रिभिः पादैर्न्यूनः एकेन पादेन चरन् त्वं को भवसि? वृषभरूपेणाऽस्मान् खेदयंस्त्वं कश्चिद् देवो भवसि? कौरवपरिपालितेऽस्मिन् भूतले त्वां विना केषांचिदपि प्राणिनामश्रूणि नैव पतन्ति।।८।। हे वृष! शोकं मा कार्षीस्तव भयं नश्यतु, गामाश्वासयन्नाह - ते सुखमेव भविष्यति।।९।। यस्य राज्ये प्रजा दुष्टैः पीड्यन्ते प्रमादं कुर्वतस्तस्य राज्ञः कीर्तिरायुरैश्वर्यं सद्गतिश्च नश्यति ।।१०।। दुःखिनां दुःखदलनमेव राज्ञः परो धर्मः, अत एनं भूतद्रुहं शूद्रमहं हनिष्ये।।११।। हे चतुष्पाद! वृषभ! त्रींश्चरणांस्ते कश्छिनत्ति स्म, अस्मद्राज्ये त्वादृशा दुःखिता न सन्तु।।१२।।

अनागस्स्विह भूतेषु य आगस्कृन्निरङ्कुशः। आहर्त्तास्मि भुजं साक्षादमर्त्त्यस्यापि
साङ्गदम् ।।१४।। राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम्। शासतोऽन्यान्यथा
शास्त्रमनापद्युत्पथानिह ।।१५।। *धर्म उवाच* – एतद्वः पाण्डवेयानां युक्तमार्त्ताभयं
वचः। येषां गुणगणैः कृष्णो दौत्यादौ भगवान् कृतः ।।१६।। न वयं क्लेशबीजानि
यतः स्युः पुरुषर्षभ। पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ।।१७।। केचिद्विकल्प-
वसना आहुरात्मानमात्मनः। दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ।।१८।।
अप्रतर्क्यादनिर्द्देश्यादिति केष्वपि निश्चयः। अत्राऽनुरूपं राजर्षे विमृश स्वमनीषया
।।१९।। *सूत उवाच* – एवं धर्मे प्रवदति स सम्राट् द्विजसत्तम। समाहितेन मनसा
विखेदः प्रत्यचष्टत ।।२०।। *राजोवाच* – धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक्।
यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ।।२१।। अथवा देवमायाया नूनं
गतिरगोचरः। चेतसो वचसश्चापि भूतानामिति निश्चयः ।।२२।।

।। सङ्ग्रहोक्तिः ।।

हे वृष! निर्दोषाणां साधूनां वो भद्रमस्तु, पार्थानां कीर्तिदूषणं त्वत्पादच्छेदकर्तारं पुरुषमाख्याहि ।।१३।। निरपराधेषु जनेषु दुःखदाता कदाचित् देवोऽपि स्यात् तर्हि तस्य मया बाहुच्छेदः कार्यः का कथाऽन्यस्य नरस्य ।।१४।। धार्मिकाणां पालनमधर्मपथगामिनां शासनं चेति राज्ञः परमो धर्मः ।।१५।। *धर्म उवाच* – पाण्डुवंशे जातानां भवादृशां दुःखितानामभयदानं समुचितमेव येषां गुणगणैर्वशीकृतः कृष्णस्तेषां दौत्यादौ संप्रवृत्तः ।।१६।। हे पुरुषर्षभे! यस्मात् पुरुषात् दुःखकारणानि स्युः तं पुरुषं न विजानीम, यतो वयं वदतां विविधैर्वाक्यै र्विमोहिताः स्मः ।।१७।। वाक्यभेदान् दर्शयति – केचिदात्मानमात्मनो सुखदुःखदातारं कथयन्ति, केचिद् दैवं, केचित् स्वभावं, केचित् कर्म च वदन्ति ।।१८।। केचिदप्रतर्क्यादनिर्देश्याच्च कारणात् सुखदुःखानि भवन्ति, हे राजर्षे! यदनुरूपं कारणं भवेत् स्वमनीषया विचारय ।।१९।। *सूत उवाच* – हे शौनक! धर्म एवं वदति सति सम्राट् परीक्षित् खेदरहितः सन् समाहितेन मनसा धर्मस्याभिप्रायं निर्णीतवान् ।।२०।। *राजोवाच* – त्वं वृषरूपधरो धर्मोऽसि, यतस्त्वं हन्तारं जानन्नपि तं न बोधयसि, अधर्मकर्तुर्यत् पापं तत् सूचकस्यापि भवतीति नियमात् ।।२१।। अथवा भगवतो

तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः। अधर्मांशैस्त्रयो भग्ना स्मयसङ्गमदैस्तव ॥२३॥ इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः। तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः॥२४॥ इयं च भूर्भगवता न्यासितोरुभरा सती। श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका॥२५॥ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताधुना। अब्रह्मण्या नृपव्याजा शूद्रा भोक्ष्यन्ति मामिति॥२६॥ इति धर्मं महीं चैव सान्त्वयित्वा महारथः। निशातमाददे खड्गं कलयेऽधर्महेतवे॥२७॥ तं जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम्। तत्पादमूलं शिरसा समगाद्भयविह्वलः॥२८॥ पतितं पादयोर्वीरः कृपया दीनवत्सलः। शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव॥२९॥ *राजोवाच* - न ते गुडाकेशयशोधराणां बद्धञ्जलेर्वै भयमस्ति किंचित्। न वर्त्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबन्धुः॥३०॥ त्वां वर्त्तमानं नरदेवदेहेष्वनु प्रवृत्तोऽयमधर्मपुगः। लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः॥३१॥

॥ सङ्ग्रहोक्तिः॥

मायाया गतिर्भूतानां चेतसो वचसश्चाऽगोचरा वर्तते, तत्कारणादपि भवान् नोक्तवान्॥२२॥ हे धर्म! तव "तपः शौचं दया सत्यम्" इति चत्वारः पादाः वर्तन्ते, तेष्वधर्मांशैः स्मयः, सङ्गः, मदः, एभिस्त्रिभिस्त्रयः पादा भग्नाः॥२३॥ अथ वृषलं तच्चिकीर्षितं च निश्चित्य आह - हे धर्म! तव चतुर्थः पादः "सत्यम्" अस्ति, यतः स्वनिर्वाहं विधत्से, इदानीं तव सत्यात्मकं पादमपि अनृतेनैधितः कलिर्जिघृक्षति॥२४॥ इयं पृथिवी भगवताऽवतीर्य भारहरणात् सर्वत्र मङ्गलमयीत्यधुनैव तेन त्यक्ता, पुनरब्रह्मण्या नृपव्याजाः शूद्रा मां भोक्ष्यन्ति, इति चिन्तया अश्रूणि मुञ्चति॥२५-२६॥ इत्थं धर्मं पृथिवीं च सान्त्वयित्वा महारथः परीक्षित् अधर्महेतुं कलिं हन्तुं तीक्ष्णं खड्गमाददे॥२७॥ जिघांसुं तं वीक्ष्य कलिः स्वं राजचिह्नं त्यक्त्वा भयविह्वलः सन् परीक्षितश्चरणयोरपतत्॥२८॥ वीरः शरण्यो दीनवत्सलः परीक्षित् पादयोः पतितं नाऽवधीत्, किन्तु हसन्निव तं प्राह॥२९॥ *राजोवाच* - अस्माकं संन्निधौ बद्धाञ्जलेस्ते मत्तो भयं नास्ति, किन्तु हे कले! त्वया मदीये क्षेत्रे कथंचन न वर्तितव्यम्, यतस्त्वमधर्मबन्धुरसि॥३०॥ राज्ञां देहेषु वर्तमानं त्वामनुसृत्य लोभः, अनृतं, चौर्यं, दौर्जन्यं, पापं, अलक्ष्मीः

न वर्त्तितव्यं तदधर्मबन्धो धर्मेण सत्येन च वर्त्तितव्ये। ब्रह्मावर्त्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः।।३२।। यस्मिन् हरिर्भगवानिज्यमान इज्यामूर्त्तिर्यजतां शं तनोति। कामानमोघान् स्थिरजङ्गमानामन्तर्बहिर्वायुरिवैष आत्मा।।३३।। *सूत उवाच* - परीक्षितैवमादिष्टः स कलिर्जातवेपथुः। तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम्।।३४।। *कलिरुवाच* - यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया। लक्षये तत्र तत्राऽपि त्वामात्तेषु शरासनम्।।३५।। तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि। यत्रैव नियतो वत्स्ये आतिष्ठंस्तेऽनुशासनम्।।३६।। *सूत उवाच* - *अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ। द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ।।३७।। पुनश्च याचमानाय जातरूपमदात्प्रभुः। ततोऽनृतं मदं कामं रजो वैरं च पञ्चमम्।।३८।।* अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः। औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ।।३९।।

।। सङ्ग्रहोक्तिः।।

रागद्वेषादिकं चेति सर्वोऽप्यधर्मसमूहः प्रवर्तते।।३१।। हे अधर्मबन्धो! तस्माद् धर्मेण सत्येन च वर्त्तितव्येऽस्मिन् ब्रह्मावर्त्ते क्षेत्रे त्वया न वर्त्तितव्यम्, यत्र यज्ञकोविदाः परमपुरुषं यजन्ति ।।३२।।अपि च अत्र ब्रह्मावर्त इज्यमूर्तिर्यज्ञेनेज्यमानो भगवान् हरिर्योगकारिणां नृणामिष्टार्थान् मोक्षाख्यसुखं च तनोति।।३३।। *सूत उवाच* - परीक्षिता राज्ञेत्थमादिष्टो वेपमानः कलिरुद्यतासिं तं दण्डपाणिं यममिव वक्ष्यमाणं वचनमाह।।३४।। *कलिरुवाच* - हे सार्वभौम! त्वदाज्ञयाऽहं यत्र क्वापि वत्स्यामि तत्र तत्राऽऽत्तेषुशरासनं त्वां पश्यामि।।३५।। हे धर्मभृतां श्रेष्ठ! तन्मे वासस्थानं निदर्शय यत्राहं निश्चलः सन् भवदाज्ञानुसारं निवत्स्यामि।।३६।। *सूत उवाच* - तदा कलिनाऽभ्यर्थितः परीक्षित् तस्मै द्यूतं, मद्यपानं, पराङ्गनासङ्गः, प्राणिहिंसा चेति चत्वारि स्थानानि ददौ, यत्र चतुर्विधोऽधर्मस्तिष्ठति।।३७।।पुनरपि स्थानान्तरं याचते कलये सुवर्णमपि निवासाय ददौ, ततः पुनरपि स्थानानि याचमानाय तस्मै अनृतं, मदः, कामः, रजः, वैरं पञ्चमं, इति पञ्चापि स्थानानि परीक्षिता कलये दत्तानि, यत्राऽधर्मोत्पादकः कली राज्ञ आज्ञां पालयन् सन् न्यवसत्।।३८-३९।।

अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित्। विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ।।४०।। वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयामिति। प्रतिसंदध आश्वास्य महीं च समवर्द्धयत्।।४१।। स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम्। पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता।।४२।। आस्तेऽधुना स राजर्षिः कौरवेन्द्रः श्रियोल्लसन्। गजाह्वये महाभागश्चक्रवर्त्ती बृहच्छ्रवाः।।४३।। इत्थंभूतानुभावोऽयमभिमन्युसुतो नृपः। यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः।।४४।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे सप्तदशोऽध्यायः।।१७।।

अथाष्टादशोऽध्यायः ।।१८।।

सूत उवाच - यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरेः मृतः। अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः।।१।। ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात्।

।। सङ्ग्रहोक्तिः ।।

अतः श्रेयोर्थी जनः राजा तु विशेषेणैतानि द्यूतादीनि कदापि न सेवेत।।४०।। ततः परीक्षिद् वृषरूपधर्मस्य नष्टान् "तपः शौचं दयां" चेति त्रीन् पादान् प्रतिसन्दधे, तथा गोरूपधरां पृथ्वीमपि सान्त्वयित्वा समवर्द्धयत्।।४१।। स एव परीक्षित् राजर्षिणा युधिष्ठिरेण दत्ते सिंहासन आसीनोऽधुना हस्तिनापुरे सम्राड्रूपेण विराजते।।४२।। कौरवेन्द्रः सार्वभौमश्रिया राजमानः विपुलकीर्तिः चक्रवर्ती स राजर्षिरधुना हस्तिानपुर आस्ते।।४३।। इत्थं महाप्रभावशाल्यभिमन्युसुतो नृपोऽस्ति, क्षोणीं पालयतो यस्य शासन समये यूयं दीर्घसत्राय दीक्षिताः स्थ।।४४।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यां सप्तदशोऽध्यायः ।।१७।।

अथाऽष्टादशोऽध्यायः।।।१८।।

राज्ञो मुनिकुमारशापोपलम्भनम्

सूत उवाच - यः परीक्षिदश्वत्थाम्नो ब्रह्मास्त्राद् दग्धोऽप्यद्भुतपराक्रमस्य भगवतः श्रीकृष्णस्याऽनुग्रहान्न मृतः।।१।।

न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ।।२।। उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः। वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम् ।।३।। नोत्तम-श्लोकवार्त्तानां जुषतां तत्कथामृतम्। स्यात् संभ्रमोऽन्तकालेऽपि स्मरतां तत् पदाम्बुजम् ।।४।। तावत्कलिर्न प्रभवेत्प्रविष्टोऽपीह सर्वतः। यावदीशो महानुर्व्या-माभिमन्यव एकराट् ।।५।। यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम्। तदैवेहानुवृत्तो-ऽसावधर्मप्रभवः कलिः ।।६।। *नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्। कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत् ।।७।। किं नु बालेषु शूरेण कलिना धीरभीरुणा। अप्रमत्तः प्रमत्तेषु यो वृकोऽवीषु वर्त्तते ।।८।।* उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया। वासुदेवकथोपेतमाख्यानं यदपृच्छत ।।९।। या याः कथा भगवतः कथनीयोरुकर्मणः। गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः ।।१०।। *शौनक उवाच* - सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः।

।। सङ्ग्रहोक्तिः ।।

यः शृङ्गिकोपोद्भूतात् भयङ्करात् प्राणघातकात् तक्षकात् मोहं न प्राप्तः ।।२।। यः देहदैहिक-पदार्थेभ्य आसक्तिं त्यक्त्वा श्रीकृष्णस्वरूपनिष्ठो जातः एवं च शुकशिष्यो भूत्वा गङ्गायां स्वं कलेवरं जहौ ।।३।। भगवतः कथावार्तापरायणानां कृष्णपादपद्मं चिन्तयमानानां भक्तानाम-न्तकाले क्वचिदपि संभ्रमो न भवति ।।४।। इह लोके प्रविष्टोऽपि कलिः यावत् कालं सम्राट् परीक्षित् भुवं शशास तावत् कालपर्यन्तं तस्य प्रभावो न प्रसृतः ।। ५।। यस्मिन् दिने क्षणे चेमां क्षोणिं श्रीकृष्णः तत्याज तस्मिन्नेव दिने क्षणे चाऽधर्मप्रभवः कलिरस्मिन् लोके प्रविष्टो बभूव ।।६।। सम्राट् परीक्षित् यावज्जीवं सारग्राहिभ्रमरवत् कलिं नाऽनुद्वेष्टि, कलौ भगवन्नाम-कीर्तनादिरूपाणि कुशलानि पुण्यकर्माणि शीघ्रं सिद्धयन्ति, न त्वपुण्यत्मकानि कर्माणि ।।७।। बालवद् अज्ञेषु शूरेण धीरेषु भीरुणा किं नु कृतं स्यात्, न किमपि, यः कलिरवीषु वृकः इव प्रमत्तेषु एव हि प्रभवति न सावहितेषु ।।८।। हे मुनयः! भवद्भिर्यत् पृष्टं तत् कृष्णकथोपेतं पुण्यकारकं परीक्षितसबन्धयुतमाख्यानं युष्मभ्यं कथितम् ।।९।। गेयपुण्यचरितस्य भगवतो गुणचरित्रपूर्णा या याः कथाः स्युः ताः सर्वा अपि मुमुक्षुभिरवश्यं सेवनीयाः ।।१०।।

यस्त्वं शंससि कृष्णस्य मर्त्त्यानाममृतं हि नः।।११।। कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्। आपाययति गोविन्दपादपद्मासवं मधु।।१२।। *तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्। भगवत्सङ्गिसङ्गस्य मर्त्त्यानां किमुताशिषः*।।१३।। को नाम तृप्येद्रसवित्कथायां महत्तमैकान्तपरायणस्य। नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः।।१४।। तन्नो भवान्वै भगवत्प्रधानो महत्तमैकान्त-परायणस्य। हरेरुदाराचरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन्।।१५।। स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः। ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्।।१६।। तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठम्। आख्याह्यनन्ताचरितोपपन्नं पारीक्षितं भागवताभिरामम्।।१७।। *सूत उवाच* - अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्याऽपि विलोमजाताः। दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः।।१८।।

।। सङ्ग्रहोक्तिः।।

शौनक उवाच – हे सौम्य! त्वं शाश्वतीः समा जीव, यतो मर्त्त्यानाममृततुल्यं श्रीकृष्णस्य पवित्रं यशो वदसि।।११।। अविश्वसनीयेऽस्मिन् ज्ञानसत्रे कर्मजडानस्मान् त्वं श्रीकृष्णपादपद्मभक्तिरूपं मधु पाययसि।।१२।। ये भगवत्सङ्गिनो भक्ताः, तेषां यः समागमः, तस्य लवेनापि स्वर्गं वा मोक्षं न तुलयामः, तर्हि मर्त्त्यानां राज्यादिसंपदः किमु।।१३।। भगवतः श्रीकृष्णस्य कथायां कः कथारसज्ञः तृप्येत, प्राकृतगुणरहितस्य भगवतो दिव्यगुणानां पारं ते भवब्रह्मादयो योगेश्वरा अपि न यान्ति।।१४।। हे विद्वन्! भवान् भगवत्परायणोऽस्ति, अतो निजैकान्तिकभक्तपरायणस्य भगवतः श्रीकृष्णस्य विपुललीलाचरितं श्रोतुकामान् नो विस्तरेण कथयतु।।१५।। परम-भगवदीयो विशालबुद्धिः परीक्षित् शुकप्रोक्तेन येन भागवतज्ञानामृतेन मोक्षाख्यं गरुडध्वज-पादमूलं भेजे।।१६।। तत् भक्तप्रियं भगवच्चरित्रपरिपूर्णमद्भुतभक्तियोगनिष्ठं परीक्षिच्छ्रुतं श्रीमद्भागवतं नः आख्याहि।।१७।। *सूत उवाच* - अहो वयं संकरजातीया अपि भगवद्भक्तसेवया सफलजन्मानो जाताः, भवादृशानां संभाषणरूपः सम्बन्धोऽपि दुष्कुलप्रभवत्वरूपं मनः क्लेशं शीघ्रमपनयति।।१८।।

कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य। योऽनन्तशक्तिर्भगवाननन्तो
महद्गुणत्वाद्यमनन्तमाहुः ।।१९।। एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य।
हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः।।२०।। अथापि
यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः। सेशं पुनात्यऽन्यतमो मुकुन्दात्को
नाम लोके भगवत्पदार्थः।।२१।। यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु
सङ्गमूढम्। व्रजन्ति यत्पारमहंस्यमन्त्यं यस्मिन्नहिंसोपशमः स्वधर्मः।।२२।। अहं
हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान्। नभः पतन्त्यात्मसमं
पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः।।२३।। एकदा धनुरुद्यम्य विचरन् मृगयां
वने। मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम्।।२४।। जलाशयमचक्षाणः प्रविवेश
तमाश्रमम्। ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ।।२५।। प्रतिरुद्धेन्द्रियप्राण-
मनोबुद्धिमुपागतम्। स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम्।।२६।। विप्रकीर्णजटा-
च्छन्नं रौरवेणाजिनेन च। विशुष्यत्तालुरुदकं तथाभूतमयाचत।।२७।।

।। सङ्ग्रहोक्तिः ।।

अहो! भगवन्नामानि कीर्त्तयतः पुरुषस्य सद्भिः समागमो दुष्कुलीनताजन्यं मनस्तापं नाशयति।।१९।। किञ्च विरिञ्चिप्रभृतींस्त्यक्त्वा लक्ष्मीर्यस्य पादरजः सेवते, तस्य श्रीकृष्णस्यानुपमेयतया महत्त्वसूचनेनालम्।।२०।। अपि च तच्चरणाङ्गुष्ठनिःसृतं गङ्गाजलं शिवसहितं जगत् पवीत्रयति, तदपेक्षयाऽन्यः श्रेष्ठो जगति को नामाऽस्ति? न कोऽपि।।२१।। यस्मिन्ननुरागयुक्ता धीरा देहदैहिकादिषु रूढामासक्तिं विहाय तुरीयं भागवतपरमहंसाश्रमं व्रजन्ति, यस्मिन्नहिंसोपशमादिः धर्मो वर्तते।।२२।। हे ऋषयः! भवद्भिः पृष्टोऽहं यथाबुद्धि आख्यानं ब्रवीमि, यथा खगा यथाशक्ति आकाश उड्डीयन्ते तथा बुधा अपि यथाबुद्धि हरिलीलां कथयन्ति।।२३।। अथैकदा राजा परीक्षिदाखेटं कर्तुं धनुर्बाणमादाय वनं जगाम, तत्र मृगाननुधावन् श्रान्तो बुभुक्षितः तृषितश्च जातः।।२४।। ततः क्वापि जलाशयमचक्षाणः परीक्षित् तम् आश्रमं प्रविवेश, यत्र मीलितनयनः शान्तः, परमात्मस्वरूपे प्रतिरुद्धप्राणेन्द्रियमनोबुद्धिः अवस्थात्रयपारंगतः, ब्रह्मस्थितिं प्राप्य ध्यानमुद्रयोपविष्टो विप्रकीर्णजटाच्छन्नो मुनिराड्गिरस

अलब्धतृणभूम्यादिरसंप्राप्तार्घ्यसूनृतः। अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह।।२८।। स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा। विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागमत् ।।३०।। तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः। राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत्।।३२।। अहो अधर्मः पालानां पीव्नां बलिभुजामिव। स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव।।३३।। ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः। स कथं तद्गृहे द्वास्थः सभाण्डं भोक्तुमर्हति।।३४।। कृष्णे गते भगवति शास्तर्युत्पथ-गामिनाम्। तान् भिन्नसेतूनद्याऽहं शास्मि पश्यत मे बलम्।।३५।। इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान्। कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज्ज ह।।३६।। इति लङ्घितमर्यादं तक्षकः सप्तमेऽहनि। दङ्क्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम्।।३७।।

।। सङ्ग्रहोक्तिः।।

शमीक आसीन आसीत्, तथाभूतं मुनिं शुष्यत्तालू राजा जलमयाचत।।२५-२७।। ततस्तस्माद् ऋषेः कमपि सत्कारमप्राप्तो नृपः स्वमपमानितमिव निश्चित्य क्रुद्धोऽभवत्।।२८।। क्षुत्तृड्भ्यां व्याकुलचित्तस्य नृपस्य हृदये तदुत्कर्षासहनरूपो मत्सरः क्रोधश्च जातः।।२९।। ततः कुपितः स ऋषेः स्कन्धे कमपि मृतसर्पं धनुषोऽग्रभागेनाऽरोप्य हस्तिनापुरमगात्।।३०।। नियमिताशेषकरणो निमीलितेक्षणोऽयं सत्समाधिरसत्समाधिर्वा, इति बुद्ध्या सर्प आरोपितः अन्यथा क्षत्रबन्धोः किं प्रयोजनम्?।।३१।। ततोऽर्भकैः सह विहरन् शृङ्गीनामकः शमीकबालपुत्रो योऽतितेजस्वी आसीत्, तत् नृपकृतं पापकृत्यं श्रुत्वा बालकानां मध्ये इत्थमब्रवीत्।।३२।। अहो! बलिपुष्टानां काकानामिव द्वाररक्षकाणां शूनामिव दुष्टानां नृपाणामधर्मं पश्यत।।३३।। ब्राह्मणै राजा द्वारपालो नियुक्तः, स तस्य गृहे स्थितं भाण्डस्थं सर्वमन्नं भोक्तुं कथं योग्यो भवति।।३४।। दुष्टानां दण्डदातरि श्रीकृष्णे स्वधाम गते सति भिन्नमर्यादेभ्योऽहं दण्डं ददामि, पश्यत मे सामर्थ्यम्।।३५।। इत्युक्त्वा क्रोधरक्ताक्षः स शृङ्गी कौशिकी जलमाचम्य तं शापं ददौ।।३६।। तद्यथा - इत्थं मर्यादारहितं परीक्षितं मत्प्रेरितस्तक्षकसर्पः इतः सप्तमेऽहनि दङ्क्ष्यति।।३७।।

ततोऽभ्येत्याश्रमं बालो गलेसर्पकलेवरम्। पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद
ह।।३८।। स वा आङ्गिरसो ब्रह्मन् श्रुत्वा सुतविलापनम्। उन्मील्य शनकैर्नेत्रे
दृष्ट्वा स्वांसे मृतोरगम्।।३९।। विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्विरोदिषि। केन
वा तेऽप्यपकृतमित्युक्तः स न्यवेदयत्।।४०।। निशम्य शप्तमतदर्हं नरेन्द्रं स ब्राह्मणो
नात्मजमभ्यनन्दत्। अहो बतांऽहो महदज्ञ ते कृतमल्पीयसि द्रोह उरुर्दमो
धृतः।।४१।। न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे। यत्तेजसा दुर्विषहेण
गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः।।४२।। अलक्ष्यमाणे नरदेवनाम्नि रथाङ्ग-
पाणावयमङ्ग लोकः। तदा हि चौरप्रचुरो विनङ्क्ष्यत्यरक्ष्यमाणोऽविरूथवत् क्षणात्
।।४३।। तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुम्पकात्। परस्परं घ्नन्ति
शपन्ति वृञ्जते पशून् स्त्रियोऽर्थान्पुरुदस्यवो जनाः।।४४।। तदार्यधर्मश्च विलीयते
नृणां वर्णाश्रमाचारयुतस्त्रयीमयः। ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव
वर्णसंकरः।।४५।। धर्मपालो नरपतिः स तु सम्राट् बृहच्छ्रवाः। साक्षान्महाभागवतो
राजर्षिर्हयमेधयाट्। क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति ।।४६।।

।। सङ्ग्रहोक्तिः ।।

ततः स्वाश्रममभ्येत्य गले सर्पकलेवरं पितरं वीक्ष्य दुःखितः शृङ्गी मुक्तकण्ठं रुरोद।।३८।। पुत्ररुदनं श्रुत्वा शनकैर्नेत्र उन्मील्य शमीको मुनिः स्वांसस्थं मृतोरगं विलोक्य तं विसृज्य च हे पुत्र! कस्माद् रोदिषि, तव केनाऽपकृतम् इति पुत्रं पप्रच्छ, ततः स शृङ्गी सर्वमपि वृत्तान्तं न्यवेदयत्।।३९-४०।। तच्छापं श्रुत्वा ऋषिराह – हे पुत्र! त्वयेदं साधु न कृतम्, यतोऽल्पेऽपराधे त्वया महान् दण्डो धृतः।।४१।। हे अपक्वबुद्धे! राजा साधारणबुद्ध्या न द्रष्टव्यः, यतोऽस्यैव तत्प्रतापेन रक्षिताः प्रजाः मङ्गलानि सुखानि च प्राप्नुवन्ति।।४२।। तादृशे विष्णुतुल्ये नृपे मृते सति रक्षकाभावात् प्रजाश्चौरादिभिर्नष्टाः स्युः।।४३।।मृतनाथस्य लोकस्य धनं चौरादिभि-र्लुण्ठिष्यते, ततश्चौरबहुला लोका परस्परं घ्नन्ति, शपन्ति, पशून् स्त्रियश्च अपहरन्ति।।४४।। राज्ञोऽभावे वर्णाश्रमाचारयुतो वैदिको धर्मो विलीयते, ततोऽर्थकामाविष्टचेतसां जनानां शुनां कपीनामिव वर्णसङ्करो जायते।।४५।। परीक्षित्संज्ञकोऽयं राजा धर्मपालको विपुलकीर्तिः

अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना। पापं कृतं तद्भगवान् सर्वात्मा क्षन्तुमर्हति।।४७।। तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि। नास्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि हि।।४८।। इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः। स्वयं विप्रकृतो राज्ञा नैवाघं तदचिन्तयत्।।४९।। प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः। न व्यथन्ति न हृष्यन्ति यत आत्माऽगुणाश्रयः।।५०।।

इतिश्रीमद्भागवते महापुराणे प्रथमस्कन्धेऽष्टादशोऽध्यायः ।।१८।।

अथ एकोनविंशोऽध्यायः ।।१९।।

सूत उवाच - महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः। अहो मया नीचमनार्यवत् कृतं निरागसि ब्रह्मणि गूढतेजसि।।१।। ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात्।

।। सङ्ग्रहोक्तिः ।।

सार्वभौमः श्रीकृष्णभगवदेकान्तिकभक्तोऽस्ति अतः क्षुत्तृट्श्रमैर्दीनत्वात् अस्मच्छापं नैवार्हति।।४६।। ततो भगवन्तं प्रार्थयन्नाह - सर्वान्तरात्मा भगवान् निरपराधेषु भक्तजनेष्वपक्वबुद्धिना बालेन कृतमिदं पापं क्षंतुमर्हति।।४७।। यतः समर्था अपि हरेर्भक्ता आक्रोशिता वञ्चिता स्ताड़िता अवज्ञाता अपि तत्प्रतिकारं न कुर्वन्ति।।४८।। इति स्वसुतकृतापराधेनातिदुःखितः शमीको मुनिः स्वस्मिन् राजकृतमपराधं न चिन्तितवान्।।४९।। किंचाऽस्मिन् लोके सज्जना अन्यद्वारा सुखदुःखादिकं प्राप्यापि मनसि व्यथां हर्षं वा नाप्नुवन्ति।।५०।।

इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यामष्टादशोऽध्यायः ।।१८।।

अथ एकोनविंशोऽध्यायः ।।१९।।

गङ्गायां परीक्षिति प्रायोपविष्टे शुकागमनम्।

अथ पुर प्रवेशान्तरं परीक्षित् मुनेःस्कन्धे मृतसर्पारोपणलक्षणं निजकर्म विचिन्तयन् मनसि दुःखितोऽभवत्, तदेवाह, *सुत उवाच* - अहो मया मुर्खजनवत् निरपराधे मुनौ पापमिव कर्म

तदस्तु काममघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ।।२।। अद्यैव राज्यं
बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे। दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी
धीर्द्विजदेवगोभ्यः ।।३।। स चिन्तयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋति-
स्तक्षकाख्यः। स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम् ।।४।।
अथो विहायेममथं च लोकं विमर्शितौ हेतया पुरस्तात्। कृष्णाङ्घ्रिसेवामधिमन्यमान
उपाविशत्प्रायममर्त्यनद्याम् ।।५।। या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रि-
रेण्वभ्यधिकाम्बुनेत्री। पुनाति लोकानुभयत्र सेशान् कस्तां न सेवेत मरिष्यमाणः
।।६।। इति व्यवच्छिद्य स पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम्। दध्यौ
मुकुन्दाङ्घ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः ।।७।। तत्रोपजग्मुर्भुवनं पुनाना
महानुभावा मुनयः सशिष्याः। प्रायेण तीर्थाभिगमोपदेशैः स्वयं हि तीर्थानि पुनन्ति
सन्तः ।।८।। अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च। पराशरो
गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ ।।९।।

।। सङ्ग्रहोक्तिः ।।

कृतम् ।।१।। अतः शीघ्रमेव तत्पापजन्यं दुःखं मां प्राप्नोतु, येन पुनस्तादृशं दुष्कर्माऽहं न
कुर्याम् ।।२।। किं च ब्राह्मणकोपोत्थोऽग्निरधुनैव सैन्यकोशादिसहितं समृद्धं मे राज्यं दग्धं
कुर्यात्, येन मे पुनरेवं गोद्विजदेवपीडाकारिणी पापबुद्धिर्न भवेत् ।। ३ ।। इत्थं चिन्तयन्नेव स
राजा शमीकप्रेषितशिष्यद्वारा तक्षकनागात् स्वमृत्युमशृणोत्, स शापं साधु मन्यते स्म ।।४।।
पुरस्तादेव हेयतया विचारितौ "अयं लोकः परलोकश्च" इत्युभौ लोकौ विहाय
कृष्णाङ्घ्रिसेवामधिकं मन्यमानः सन् गङ्गायामनशनव्रतं निश्चित्योपाविशत् ।।५।। या गङ्गा
श्रीतुलसीमीलितकृष्णाङ्घ्रिरजोभिरुत्कृष्टाम्बुवाहिनी सती लोकपालसहितान् सर्वान् लोकान्
पावयति, तामासन्नमरणः कः पुमान्न सेवेत ।।६ ।।इत्थं निश्चित्य विमुक्तसमस्तसङ्गः मुनिव्रतः
स राजाऽनन्यभावेन श्रीकृष्णपादपद्मं दध्यौ ।।७।। तस्मिन्नेवावसरे भुवनं पुनाना महानुभावा
मुनयः सशिष्यास्तत्रोपजग्मुः, ये तीर्थयात्रानिमित्तेन तीर्थानि अपि पुनन्ति ।।८।। तान् मुनीन्
दर्शयति - अत्रिः, वसिष्ठः, च्यवनः, शरद्वान्, अरिष्टनेमिः, भृगुः, अङ्गिराः, पराशरः,

मेघातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्लादः। मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च॥१०॥ अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च। नानार्षेयप्रवरान् समेतानभ्यर्च्य राजा शिरसा ववन्दे॥११॥ सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत्। विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः॥१२॥ *परीक्षिदुवाच* - अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः। राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म॥१३॥ तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम्। निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तोऽभयमाशु धत्ते॥१४॥ तं मोपयातं प्रतियन्तु विप्रा गङ्गा च देवी धृतचित्तमीशे। द्विजोपसृष्टः कुहुकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः॥१५॥ पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु। महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः॥१६॥

॥ सङ्ग्रहोक्तिः ॥

विश्वामित्रः, परशुरामः, उतथ्यः, इन्द्रप्रमदः, इध्मवाहः, मेधातिथिः, देवलः, आर्ष्टिषेणः, भारद्वाजः, गौतमः, पिप्पलादः, मैत्रेयः, और्वः, कवषः, अगस्त्यः, व्यासः, नारदः॥९-१०॥ अन्ये च देवर्षिब्रह्मर्षिराजर्षिवर्या अरुणादयस्तत्राऽऽजग्मुः, राजर्षिः परीक्षित् नानागोत्रोत्पन्नान् ऋषीन् शिरसा ववन्दे॥११॥ ततस्तेषु सुखोपविष्टेषु पुनः प्रणमन् विविक्तचेता बद्धाञ्जलिः सन् स्वं चिकीर्षितं विज्ञापयामास॥१२॥ *परीक्षिदुवाच* - अहो! महत्तमानुग्रहपात्रशीला वयं धन्यतमाः राज्ञां कुलं ब्राह्मणपादशौचजलादपि दूरे स्थातुं योग्यमस्ति, तथापि भवद्भिरद्याऽनुगृहीतम्॥१३॥ निरन्तरं गृहेषु व्यासक्तचित्तस्य मे पापस्य निवारको वैराग्यहेतुः द्विजशापरूपः परावरेशः भगवानेव मामनुग्रहीतुं प्रवृत्तः, यस्मिन् मयि स शीघ्रमभयं धत्ते॥१४॥ हे विप्राः! भवन्तो देवी गङ्गा च मां शरणागतं जानन्तु, विप्रप्रेरितस्तक्षकः कपटात् साक्षाद्वा मां दशतु, नाहं बिभेमि, किन्तु यूयं मां विविधा विष्णुगाथाः कथयत॥१५॥ किं च भगवति कृष्णे मम भक्तिः स्यात् तथा तद्भक्तानां समगमश्च, पुनश्चाऽहं यद्यज्जन्म प्राप्नोमि तत्र सर्वत्र भवादृशेषु मैत्री स्यात्, द्विजेभ्यो वो नमोऽस्तु॥१६॥

इति स्म राजाध्यवसाययुक्तः प्राचीनकूलेषु कुशेषु धीरः। उदङ्मुखो दक्षिणकूल
आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः।।१७।। एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे
दिवि देवसंघाः। प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः।।१८।। महर्षयो
वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः। ऊचुः प्रजानुग्रहशीलसारा
यदुत्तमश्लोकगुणाभिरूपम्।।१९।। न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं
समनुव्रतेषु। येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः।।२०।। सर्वे
वयं तावदिहास्महेऽद्य कलेवरं यावदसौ विहाय। लोकं परं विरजस्कं विशोकं
यास्यत्ययं भागवतप्रधानः।।२१।। आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गु
चाव्यलीकम्। अभाषतैतानभिवन्द्य युक्तः शुश्रूषमाणश्चरितानि विष्णोः।।२२।।
समागताः सर्वत एव सर्वे वेदा यथा मूर्त्तिधरास्त्रिपृष्ठे। नेहाऽथवाऽमुत्र च कश्चनार्थ
ऋते परानुग्रहमात्मशीलम्।।२३।। ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा
इतिकृत्यतायाम्। सर्वात्मनाम्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः।।२४।।

।। सङ्ग्रहोक्तिः।।

इति निश्चयं कृत्वा राजा स्वपुत्रे राज्यभारं संस्थाप्य, गङ्गायाः दक्षिणे तटे पूर्वाग्रकुशा
उत्तराभिमुख उपविष्टः।।१७।। एवं परीक्षिते प्रायोपविष्टे सति दिवि देवसंघास्तं प्रशस्
तदुपरि भूमौ पुष्पवृष्टिं चक्रुः, भूयो भूयः दुन्दुभयो नेदुश्च।।१८।। ततो समुपागताः स
महर्षयोऽपि तं साधुवादं कृत्वाऽनुमोदन्तः सन्तः प्रोचुः यत् हे राजर्षिवर्य! श्रीकृष्णमनुवर्तमाने
भवत्सु एतदाश्चर्यं न हि, ये भवन्तः कृष्णसामीप्याभिलाषिणः सन्तः श्रीकृष्णस्वधामगमना
नन्तरमेव सार्वभौमसिंहासनं सद्यो जहुः।।१९-२०।। तदा ते सर्वे परस्परमिदमुक्तवन्तः
असौ नृपो यावत्तनुं त्यक्त्वा भगवद्धाम न यायात् तावद्वयं सर्वेऽत्र निवासं कुर्याम।।२१।।
परीक्षित् मधुरामृतस्रावि निष्कपटं च ऋषिगणवच आश्रुत्य तानभिवन्द्य हरेश्चरित्राणि शुश्रूषमा
सन्नभाषत।।२२।। सत्यलोके मूर्ततया विद्यमानाश्चतुर्वेदा इव परोपकारिणो भवन्तः स
मय्यनुग्रहं कृत्वा एवात्र समागता स्थ।।२३।। हे विप्रा! युष्मान् विश्वस्य इमं पृष्टव्य
विपृच्छे, मुमूर्षुभिर्जनैः सर्वप्रकारेण यत् कर्त्तव्यं शुद्धं कर्म तद्विमृश्य मामुपदिशत।।२४।।

तत्राऽभवद्भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः। अलक्ष्यलिङ्गो निजलाभतुष्टो वृतः स्त्रिबालैरवधूतवेषः ।।२५।। तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाहृंसकपोलगोत्रं। चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कम्बुसुजातकण्ठम् ।।२६।। निगूढजत्रुं पृथुतुङ्गवक्षसमावर्त्तनाभिं वलिवल्गूदरं च। दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम्।।२७।। श्यामं सदापीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन। प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम्।।२८।। स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसा जहार। ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः।।२९।। स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः। व्यरोचतालं भगवान्यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः।।३०।। प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य। प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिर्नत्वा गिरा सूनृतयान्वपृच्छत्।।३१।। अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबन्धवः। कृपयाऽतिथिरूपेण भवद्भिस्तीर्थकाः कृताः।।३२।। येषां संस्मरणात्पुंसां सद्यः शुद्ध्यन्ति वै गृहाः।

।। सङ्ग्रहोक्तिः ।।

तस्मिन्नेव समये अलक्ष्यलिङ्गो निजलाभतुष्टो गामटमानोऽवधूतवेषः स्त्रीबालवेष्टितः व्यासपुत्रः शुको यदृच्छया तत्राऽऽजगाम।।२५।।षोडशवर्षं कोमलकरचरणं सुनयनमुन्नतनासं सुभ्रूकर्णाननं कम्बुकण्ठं गूढकण्ठाधःस्थास्थिकं पृथुवक्षसं दिगम्बरं मुखलुलितसुकेशम् आजानुबाहुं हरिसमप्रभं श्यामवर्णं स्त्रीमनोहारिणं प्रच्छन्नतेजसमपि तं शुकं वीक्ष्य तच्चिह्नज्ञानवन्तो मुनयः स्वासनेभ्यः प्रत्युत्थिता अभवन्।।२६-२८।। परीक्षित् यदृच्छया तत्रागतस्य शुकस्य शिरसा प्रणामविधानपूर्वकं पूजां चक्रे, ततः पूजितः स महासन उपविवेश ।।२९।। महीयसामपि महान् स शुकः ब्रह्मर्षिदेवर्षिराजर्षिसंघमध्ये ग्रहनक्षत्रतारागणमध्ये चन्द्रमा इवालं व्यरोचत।।३०।। सात्विकवेशं ध्यानमुद्रयावस्थितं स्फुरत्मेधाविनं शुकं भागवतः परीक्षित् समीपमागत्य प्रणम्य च प्राञ्जलिः सन् मधुरया वाचाऽपृच्छत्।।३१।। हे ब्रह्मन्! वयं क्षत्रबन्धवोऽपि सतामनुग्राह्या अभूम, भवद्भिः करुणया वयं तीर्थवत् पवित्रीकृताः।।३२।।

किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः।।३३।। सांनिध्यात्ते महायोगिन्पातकानि महान्त्यपि। सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः।।३४।। अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः। पैतृष्वस्रेयप्रीत्यर्थं तद्गोत्रस्याप्तबान्धवः।।३५।। अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम्।। नितरां म्रियमाणानां संसिद्धस्य वनीयसः।।३६।। अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम्। पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ।।३७।। यच्छ्रोतव्यमथो जाप्यं यत्कर्त्तव्यं नृभिः प्रभो। स्मर्त्तव्यं भजनीयं वा ब्रूहि यद्वा विर्पयम्।।३८।। नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनाम्। न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित्।।३९।। *सूत उवाच* – एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा। प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः।।४०।।

इति श्रीमद्भागवते महापुराणे प्रथमस्कन्ध एकोनविंशोऽध्यायः।।१९।।

।। समाप्तोऽयं प्रथमस्कन्धः ।।

।। सङ्ग्रहोक्तिः।।

येषां स्मरणादपि पुंसां गृहाः सद्यः शुद्धा भवन्ति तेषां दर्शन-स्पर्शन-पादशौचासनादिभिः शुद्धा भवेयुस्तत्र किं वक्तव्यम्।।३३।। हे महायोगिन्! तव सांनिध्यात् मादृशानां जनानां महान्त्यपि पापानि विष्णोः सांनिध्यादसुरादयः इव सद्यो नश्यन्ति।।३४।। पाण्डवानां प्रियो भगवान् श्रीकृष्णोऽपि अद्य मयि प्रीतः, कृष्णस्य प्रसादं विना सांसारिकैरलक्ष्यगतेर्नित्यं वनवासिनः संसिद्धस्य तव दर्शनं कथं स्यात्, म्रियमाणानां तु कथमपि न स्यात्।।३५-३६।। अतो योगिनां परमं गुरुं त्वां मुक्तिसाधनं पृच्छामि, मुमुक्षोस्तत्रापि म्रियमाणस्य पुंसो यत् कर्त्तव्यं कार्यं स्यात्तन्मे ब्रूहि।।३७।। हे प्रभो! मुमूर्षुभिर्यत् श्रोतव्यं जप्यं कर्त्तव्यं स्मर्त्तव्यमपि च यत् भजनीयमाराध्यं वा स्यात् तद् ब्रूहि।।३८।। हे ब्रह्मन्! गृहस्थाश्रमिणां गृहेषु भवतोऽवस्थानं गोदोहमात्रमपि क्वचित् न लक्ष्यते।।३९।। *सूत उवाच* – एवं राज्ञाऽऽभाषितः पृष्टश्च धर्मज्ञो भगवान् बादरायणिः शुको विशुद्धया वाण्या प्रत्यभाषत ।।४०।।

❀ इति श्रीमद्भागवते प्रथमस्कन्धे सङ्ग्रहोक्त्यामेकोनविंशोऽध्यायः।।१९।। ❀

❀ इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां प्रथमस्कन्धः समाप्तः ❀

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम्।।

सङ्ग्रहोक्तिः टीकासहितम्

द्वितीय स्कन्धः

अथ प्रथमोऽध्यायः ।।१।।

श्रीशुक उवाच - वरीयानेष ते प्रश्नः कृतो लोकहितो नृप। आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः।।१।। श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः। अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम्।।२।। निद्रया ह्रियते नक्तं व्यवायेन च वा वयः। दिवा चार्थेहया राजन् कुटुम्बभरणेन वा।।३॥ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि।। तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति।।४।। *तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्त्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम्।।५।। एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः।।६।।* प्रायेण मुनयो राजन् निवृत्ता विधिषेधतः।

।। सङ्ग्रहोक्तिः ।।

अथ प्रथमोऽध्यायः ।।१।।

ध्यानविधिः भगवतो विराट्स्वरूपवर्णनं च

श्रीशुक उवाच - हे नृप! नृणां श्रोतव्यकीर्त्तितव्यादिषु आत्मविद्भिर्मुक्तैरपि संस्तुतो लोकहितकरः एष ते प्रश्नः सर्वश्रेष्ठोऽस्ति।।१।। हे राजेन्द्र! गृहासक्तानामात्मयाथात्म्यमजानतां गृहस्थानां श्रोत्तव्यादीनि तु सहस्रशः सन्ति।।२।। हे राजन्! तेषामायू रात्रौ निद्रया वा स्त्रीसंभोगेन ह्रियते, दिवा तु अर्थार्जनप्रवृत्त्या वा कुटुम्बभरणपोषणेन ह्रियते।।३।। देहस्त्रीपुत्रादिपरिकरेषु मिथ्याभूतेषु सत्सु, तेषां विनाशं पश्यन्नपि स आत्मनो हितं न पश्यति।।४।। तस्मात् हे भरतवंशोत्पन्न राजन्! मोक्षरूपाऽभयमिच्छतां नृणां कृते सर्वान्तर्यामी भगवान् श्रीहरिरेक एव श्रोतव्यः कीर्त्तितव्यः स्मर्तव्यश्च वर्तते।।५।। सांख्ययोगाभ्यां स्वधर्मनिष्ठया चैतावानेव जन्मप्राप्तेः फलरूपो लाभः यत् देहावसानसमये भगवतो नारायणस्यैव स्मृतिः।।६।। हे

नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः।।७।।इदं भागवतं नाम पुराणं ब्रह्मसंमितम्। अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम्।।८।। *परिनिष्ठितोऽपि नैर्गुण्य उत्तम-श्लोकलीलया। गृहीतचेता राजर्षे आख्यानं यदधीतवान्।।९।।* तदहं तेऽभिधास्यामि महापौरुषिको भवान्। यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती।।१०।। एतन्निर्विद्यमानानामिच्छतामकुतोभयम्। योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनम्।।११।। किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह। वरं मुहूर्त्तं विदितं घटेत श्रेयसे यतः।।१२।। खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः। मुहूर्त्तात्सर्वमुत्सृज्य गतवानभयं हरिम् ।।१३।। तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः। उपकल्पय तत्सर्वं तावद्यत्सांपरायिकम्।।१४।। अन्तकाले तु पुरुष आगते गतसाध्वसः। छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्।।१५।। गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः। शुचौ विविक्त आसीनो विधिवत्कल्पितासने।।१६।।

।। सङ्ग्रहोक्तिः ।।

राजन्! काम्यकर्मणो निवृत्ता मुनयो बहुधा प्राकृतहेयगुणरहितब्रह्मस्वरूपस्थाः सन्तः भगवतोश्रेयस्करगुणानुवर्णने एव रमन्ते।।७।। भगवत्स्वरूपनिष्ठसंमतमिदं भागवतं नाम पुराणं कलिद्वापरयोः संध्यारम्भे पितुः कृष्णद्वैपायनव्यासादहमधीतवान्।।८।। हे राजर्षे! त्रिगुणातीतेऽक्षरब्रह्मणि ऐकात्म्यभावेन संस्थितोऽपि अहं भगवद्गुणलीलयाऽऽकृष्टमनाः सन्निदं भागवतनामाख्यानमधीतवानस्मि।।९।। भवान् भगवद्भक्तोऽस्ति, अतस्तुभ्यमहं भागवतं कथयिष्यामि, यस्मिन् श्रद्धावतां जनानां मुक्तिप्रदे भगवति सद्यो भक्तिर्जायते।।१०।।हे नृप! विषयेभ्यो विरक्तानां मोक्षं कामयमानानां योगिनां श्रीकृष्णस्य नामानुकीर्तनमेव स्वेच्छितफलप्रदमिति निर्णीतमस्ति।।११।। विषयासक्तस्य व्यतीतैर्बहुभिर्वर्षैः किं सिद्ध्यति? मुहूर्तमायुरपि ज्ञानपूर्वं स्यात् तदा तत् श्रेष्ठम्, येन मुहूर्तेन श्रेयसे यत्नं कुर्यात्।।१२।। खट्वाङ्गो नाम राजर्षिरासीत्, स मुहूर्तमात्रमवशिष्टमायुर्ज्ञात्वा सर्वं परित्यज्य भगवन्तं हरिं शरणं गतः सन् मुक्तिं लेभे।।१३।। हे कुरुकुलोत्पन्न नृप! एतर्हि तवापि सप्ताहपर्यन्तं जीवितमवशिष्टम्, अतस्तावता कालेन पारलौकिकं साधनं सम्पादय।।१४।। मृत्युकाले उपस्थिते सति निर्भयः सन् पुमाननासक्तिशस्त्रेण देहस्त्रीपुत्रादिषु रूढामहंत्वममतां स्पृहां

अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्। मनो यच्छेज्जितश्वासो ब्रह्मबीजम-विस्मरन्।।१७।। नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया।।१८।। तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा। मनो निर्विषयं युङ्क्त्वा ततः किंचन न स्मरेत्।। पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति।।१९।। रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः। यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम्।।२०।। यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः। आशु संपद्यते योग आश्रयं भद्रमीक्षतः।।२१।। *राजोवाच* - यथा संधार्यते ब्रह्मन् धारणा यत्र संमता। यादृशी वा हरेदाशु पुरुषस्य मनोमलम्।।२२।। *श्रीशुक उवाच* - जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः। स्थूले भगवतो रूपे मनः संधारयेद्धिया।।२३।। विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम्। यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च यत्।।२४।।

।। सङ्ग्रहोक्तिः।।

च छिन्द्यात्।।१५।। ततो जितेन्द्रियः सन् गृहं संत्यज्य पुण्यतीर्थे स्नात्वा विविक्तदेशे पवित्रासन उपविश्य मनसा प्रणवं जपेत्, तथैव प्राणायामेन मनः स्ववशमानयेत्।।१६-१७।। बुद्धिसारथिः पुमान् मनसा सर्वाणीन्द्रियाणि स्वस्वविषयेभ्यो नियच्छेत्, पुनश्च कर्मवासनाभिर्विक्षिप्तं मनः शुभाश्रये भगवद्रूपे स्थिरं कुर्यात्।।१८।। एकाग्रतया भगवत्स्वरूपे मनः समाधाय ततः किमपि न चिन्तयेत्, यस्मिन् स्वरूपे चिन्त्यमाने सति मनः प्रसन्नं भवति तद् भगवतः स्थानं ज्ञेयम्।।१९।। रजस्तमोभ्यां विक्षिप्तमात्मनो मनो यदा विमूढं स्यात्तदा धीरः सन् पुमान् कथितधारणया पुनरपि वशीकुर्यात् या धारणा मनोमलं हन्ति।।२०।। यस्यां धारणायां क्रियमाणायां शुभाश्रयं भगवत्स्वरूपं निरीक्षमाणस्य योगिनो भक्तिलक्षणो योग आशु सम्पन्नो भवति।।२१।। *राजोवाच* - हे ब्रह्मन्! यया कृतया कर्त्तुर्मनोमलं दूरीभूतं स्यात् सा भगवत्संबंधिनी धारणा यथावत् भवान् कथयतु।।२२।। *शुक उवाच* - जितासनो जितश्वासो निःसङ्गो जितेन्द्रियश्च सन् पुमान् भगवतो विराड्रूपे धिया मनः संधारयेत्।।२३।। भगवतोऽयं विराड्देहोऽतिस्थूलानां मध्ये स्थूलतरोऽस्ति, यस्मिन् भूतं भविष्यद् वर्तमानं च समस्तमिदं जगद् दृश्यते।।२४।।

आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते। वैराजः पुरुषो योऽसौ भगवान्
धारणाश्रयः।।२५।। पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे।।२६।। द्वे जानुनी
सुतलं विश्वमूर्त्तेरूरुद्वयं वितलं चातलं च। महीतलं तज्जघनं महीपते नभस्तलं
नाभिसरो गृणन्ति।।२७।। उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य।
तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः।।२८।। इन्द्रादयो बाहव
आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः। नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य
गन्धो मुखमग्निरिद्धः।।२९।। द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी
उभे च। तद् भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोस्य तालू रस एव जिह्वा।।३०।।
छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि। हासो जनोन्मादकरी
च माया दुरन्तसर्गो यदपाङ्गमोक्षः।।३१।। व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः
स्तनोऽधर्मपथोऽस्य पृष्ठः। कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा
गिरयोऽस्थिसंघाः।।३२।। नद्योऽस्य नाड्योथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र

।। सङ्ग्रहोक्तिः।।

सप्तावरणसंयुतेऽण्डकोशाख्येऽस्मिन् शरीरे विराट् संज्ञः पुरुषोऽसौ, विश्वरूपस्य चरणतलं पातालम्, चरणयोः पूर्वपश्चिमभागौ रसातलम्, गुल्फौ महातलम्, जङ्घाद्वयम् तलातलं, जानुद्वयं सुतलम्, ऊरुद्वयस्याऽधोभागो वितलम्, ऊर्ध्वभागोऽतलम्, जघनं महीतलं, नाभिर्नभस्तलम्, उरःस्थलं स्वर्गः, ग्रीवा महर्लोकः, मुखं जनलोकः, ललाटं तपोलोकः, शिरांसि सत्यलोकः, इदं तत्त्वेनोपास्यं वदन्ति।।२६-२८।। इन्द्रादयो देवा वैराजपुरुषस्य बाहवः, कर्णौ दिशः, श्रोत्रेन्द्रियं शब्दः, अश्विनीकुमारौ नासिकापुटे, घ्राणेन्द्रियं गन्धः, अन्तरिक्षं चक्षुर्गोलकद्वयं, चक्षुरिन्द्रियं सूर्यः, रात्रिन्दिवं पक्ष्माणि, भ्रूविलासो ब्रह्मपदम्, तालु जलं, रसो जिह्वा, शिरो वेदाः, दंष्ट्राद्वयं यमः, दन्ताः सुतादिस्नेहलेशः, हासो जनोन्मादकरी माया, अनन्तसर्गः कटाक्षः, ऊर्ध्वौष्ठो लज्जा, अधरौष्ठो लोभः, स्तनद्वयं धर्मः, शिश्नं प्रजापतिः, वृषणद्वयं मित्रावरुणौ, कुक्षिः समुद्राः, अस्थिसमूहो गिरयः, नाड्यो नद्यः, रोमाणि वृक्षाः,

अनन्तवीर्यश्वसितं मातरिश्वा गतिर्वयः कर्म्म गुणप्रवाहः।।।३३।। ईशस्य केशान्वि-
दुरम्बुवाहान् वासस्तु संध्ये कुरुवर्य भूम्नः। अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः
सर्वविकारकोशः।।३४।। विज्ञानशक्तिं महिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम्।
अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे।।३५।। वयांसि तद्व्याकरणं
विचित्रं मनुर्मनीषा मनुजो निवासः। गन्धर्वविद्याधरचारणाप्सरः स्वरः स्मृतीरसुरा-
नीकवर्यः।।३६।। ब्रह्माननं क्षत्रभुजो महात्मा विड्रूरुरङ्घ्रिश्रितकृष्णवर्णः। नानाभिधा-
भीज्यगणोपपन्नो द्रव्यात्मकः कर्म वितानयोगः।।३७।। इयानसावीश्वरविग्रहस्य
यः संनिवेशः कथितो मया ते। संधार्यतेऽस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न
यतोऽस्ति किंचित्।।३८।। स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः।
तं सत्यमानन्दनिधिं भजेत। नान्यत्र सज्जेद्यत आत्मपातः।।३९।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे प्रथमोऽध्यायः।।१।।

।। सङ्ग्रहोक्तिः।।

श्वासो वायुः, गमनं कालः, संसारः कर्म।।२९-३३।। विश्वरूपस्य केशा मेघाः, सन्ध्या वस्त्रम्, प्रकृति र्हृदयम्, मनश्चन्द्रः, चित्तं महत्तत्त्वम्, अहङ्कारो रुद्रः, नखानि तुरगोष्ट्रगजादयः, श्रोणिदेशो मृगादयः पशवः।।३४-३५।। मनुष्य आश्रयः, गन्धर्वाप्सरः प्रभृतयः स्वराः, प्रह्लादः स्मृतिः, अथवा षड्जर्षभगान्धारादिसप्त स्वरस्मृतयो गन्धर्वादयः, वीर्यमसुरसैन्यम्।।३६।। मुखं ब्रह्मणाः, बाहवः क्षत्रियाः, ऊरू वैश्याः, पादौ शूद्राः, यागप्रयोगः कर्म।।३७।। इत्थं वैराजशरीरस्याऽवयवविन्यासस्ते मया कथितः, वैराजपुरुषसम्बन्धिनि स्थूले शरीरे मुमुक्षुभिः स्वबुद्ध्या मनः संधार्यते, अस्मादन्यत् किञ्चिन्नास्ति।।३८।। एवं जाग्रतस्वप्नाद्यवस्थासु कर्मफलप्रदत्वेनावस्थितं सत्यमानन्दनिधिं परमात्मानं भजेत, अब्रह्मात्मके वस्तुनि व्यासक्तो न भवेत्, यत आसक्त्या स्वस्य पातः संसारः स्यात्।।३९।।

इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः ।।२।।

श्री शुक उवाच – एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुद्ध तुष्टात्। तथा ससर्ज्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः।।१।। शाब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः। परिभ्रमंस्तत्र न विन्दतेऽर्थान्मायामये वासनया शयानः।।२।। अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः। सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः।।३।। सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम्। सत्याञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः।।४।। *चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्। रुद्धा गुहाः किमजितोऽवति नोपसन्नान्. कस्माद्भजन्ति कवयो धनदुर्मदान्धान्*।।५।। एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः। तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र।।६।।

।। सङ्ग्रहोक्तिः।।

अथ द्वितीयोऽध्यायः ।। २।।

धारणया निर्जितं मनः सर्वसाक्षिणि विष्णौ धार्यम्

श्रीशुक उवाच – पूर्वं ब्रह्मा पूर्वोक्तधारणया तुष्टाद्धरेः सकाशात् नष्टं सर्गविषयकज्ञानं लब्ध्वाऽमोघदृष्टिः सन् प्रलयात् पूर्वं यथाऽऽसीत् तथेदं विश्वं ससर्ज।।१।। साधकस्य बुद्धिर्व्यर्थैः स्वर्गादिशब्दैस्तत्प्राप्त्यभिलाषं करोति, इति वैदिकी परम्परा, वेदोक्तरीत्या विषयप्रधानं स्वार्गादिलोकं लब्ध्वाऽपि साधकोऽविनाशि मोक्षसुखं न प्राप्नोति।।२।। अतो बुद्धिमान् जनो भोग्यपदार्थे प्रकारान्तरेणाऽप्ययत्नेन सिद्धे सति तत्प्राप्त्यै श्रमं दृष्ट्वा प्रयत्नं न कुर्यात्।।३।। तदाह – शयनार्थं भूमौ सत्यां शय्याविषये प्रयत्नैः किम्, बाहौ सति उपधानैः किम्, अञ्जलौ सत्यां नानाविधैर्भोजनभाजनैः किम्, दिग्वल्कलादौ सति वस्त्रैः किम्।।४।। किं मार्गे पतितानि वस्त्रखण्डानि न सन्ति? किं तरवो भिक्षां न दास्यन्ति? किं जलपानाय नद्योऽशुष्यन्? निवासाय गुहा रुद्धा किम्? जगदीशः किं शरणागतान् न पाति? एवं सत्स्वपि विवेकिनो धनेन दुर्मदान्धान् किमर्थं सेवन्ते?।।५।। अतो विरक्तः सन् स्वमनसा सर्वान्तरात्मरूपिणं

कस्तां त्वनादृत्य परानुचिन्तामृते पशूनसतीं नाम युञ्ज्यात्। पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान्परितापान् जुषाणम्॥७॥ केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्। चतुर्भुजं कंजरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति॥८॥ प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम्। लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम्॥९॥ उन्निद्र-हृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम्। श्रीलक्ष्मणं कौस्तुभरत्न-कंधरमम्लानलक्ष्म्या वनमालयाचितम्॥१०॥ विभूषितं मेखलयाङ्गुलीयकैर्महाधनै-र्नूपुरकङ्कणादिभिः। स्निग्धामलाकुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम्॥११॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम्॥ ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते॥१२॥ एकैकशोऽङ्गानि धियानु-भावयेत्पादादि यावद्धसितं गदाभृतः। जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा॥१३॥ यावन्न जायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः। तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत॥१४॥

॥ सङ्ग्रहोक्तिः॥

हरिं केवलं भजेत, तस्य भजनेन मायानाशः संसारनिवृत्तिश्च स्यात्॥६॥ श्रीहरेस्तां धारणाम-नादृत्य पशून् विनाऽशोभनां विषयचिन्तां कः कुर्यात्, वैतरण्यां पतितं तत्र स्वकर्मजान् परितापान् सेवमानं जनं पश्यन् पशुरेव ज्ञेयः॥७॥ केचिन् जनाः स्वशरीरस्थे हृदयाकाशे-ऽङ्गुष्ठमात्रं शंखचक्रगदापद्मधरं चतुर्बाहुं पुरुषाकृतिम्॥८॥ प्रसन्नाननं पद्मनेत्रं पीताम्बर-किरीटकुण्डलाङ्गदहारयुक्तम्॥९॥ प्रफुल्लहृत्कमलकर्णिकामध्ये सनकादिस्थापितपाद-पल्लवम्, श्रीलक्ष्मणम्, कौस्तुभश्रीवत्सवनमालाशोभितम्॥१०॥ कटिसूत्राङ्गुलीकनूपुर-वलयादिभिरलङ्कृतं स्निग्धकुञ्चितनीलालकैः शोभितमुखम्॥११॥ विशदलीलाहसितेक्षणेन सुशोभितभ्रूभङ्गेन च दर्शितविपुलानुग्रहम् इत्थंभूतं परमेश्वरं यावन्मनो निश्चलं न स्यात् तावद्ध्यानेन पश्येत्॥१२॥ किं च हरेः पादादारभ्य स्मितपर्यन्तमेकैकाङ्गं ध्यानेन पश्येत्, तत्राऽनायासेन यद्यदङ्गं ध्यानदृष्टं स्यात् तत्तत् त्यजन्, तदुत्तरोत्तरं ध्यानेन पश्येत्॥१३॥

स्थिरं सुखं चासनमाश्रितो यतिर्यदा जिहासुरिममङ्ग लोकम्। काले च देशे च मनो न सज्जयेत्प्राणान्नियच्छेन्मनसा जितासुः।।१५।। मनः स्वबुद्ध्याऽमलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि। आत्मानमात्मन्यवरुद्ध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात्।।१६।। न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे। न यत्र सत्वं न रजस्तमश्च न वै विकारो न महान्प्रधानम्।।१७।। परं पदं वैष्णवमामनन्ति तद् यन्नेति नेतीत्यतदुत्सिसृक्षवः। विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे।।१८।। इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः। स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः।।१९।।नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः। ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत।।२०।।

।। सङ्ग्रहोक्तिः ।।

एवं यावत् परावरे विश्वेश्वरे ध्यानयोगो नोत्पद्येत तावत् सन्ध्यावन्दनादिक्रियान्ते भगवतः प्रादेशमात्रं स्थूलरूपं समाहितः सन् ध्यायेत।।१४।। हे राजन्! योगी प्रारब्धावसाने यदा देहं जिहासु र्भवति तदा मनो विशिष्टे देशे वा काले न सज्जयेत् किंतु स्थिरं सुखमासनमास्थितः सन् मनसेन्द्रियाणि नियच्छेत्।।१५।। विशुद्धया बुद्ध्या मनो नियम्य, तां बुद्धिं क्षेत्रज्ञे निनयेत्, क्षेत्राभिधं जीवमक्षरब्रह्मणि प्रापयेत्, ततोऽक्षरब्रह्मणैक्यं प्राप्तमात्मानं परमात्मसंज्ञके परब्रह्मणि निश्चलं कृत्वा धीरो लब्धोपशान्तिः सन् कृत्याद् विरमेत्।।१६।।यत्र परमात्मस्वरूपे देवेभ्यः परःकालः किमपि कर्तुं न समर्थः, तदा ते देवाः कुतः प्रभवेयुः? यत्र प्रकृतिः सत्वं रजस्तमश्चेति गुणाः न, महत्तत्त्वमहङ्कारश्च स्वकार्यजननक्षमा न भवन्ति तद्वैष्णवं = विष्णोः सम्बन्धि पदं = स्वरूपं वेदान्ता तत्र प्राकृतभावं निषेद्धुं "नेति नेति" बोधयन्तो वदन्ति, ततो दौरात्म्यं त्यक्त्वा भगवत्पादमनन्यसौहृदा सन्त आमनन्ति, तद् योगी हृदयेन क्षणे क्षणे आश्लिष्य कृतकृत्यो भवेत्।।१७-१८।।मुनिरित्थं देहादुपरमेत्, तद्यथा - सर्वं ब्रह्मात्मकमस्ति इति कृतव्यवस्थितमतिः, भगवदुपासनात्मकज्ञानेन वासनां निर्जित्य मुनिः स्वपार्ष्णिना गुदं निरुद्ध्य प्राणवायुं मूलाधारादिषु षट्सु चक्रेषूर्ध्वं नयेत्।।१९।। तदाह - मूलाधारस्थं वायुं

तस्माद्भ्रुवोरन्तरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः। स्थित्वा मुहूर्त्तार्द्धमकुण्ठदृष्टि-
र्निर्भिद्य मूर्द्धन् विसृजेत्परं गतः।।२१।। यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत
यद्विहारम्। अष्टाधिपत्यं गुणसंनिवाये सहैव गच्छेन्मनसेन्द्रियैश्च।।२२।। योगेश्वराणां
गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मना। न कर्मभिस्तां गतिमाप्नुवन्ति
विद्यातपोयोगसमाधिभाजाम्।।२३।। वैश्वानरं याति विहायसा गतः सुषुम्णया
ब्रह्मपथेन शोचिषा। विधूतकल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमारम्।।२४।।
तद्विश्वनाभिं त्वतिवर्त्त्य विष्णोरणीयसा विरजेनात्मनैकः। नमस्कृतं ब्रह्मविदामुपैति
कल्पायुषो यद्विबुधा रमन्ते।।२५।। अथो अनन्तस्य मुखानलेन दंदह्यमानं स
निरीक्ष्य विश्वम्। निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद् द्वैपरार्ध्यं त उ पारमेष्ठ्यम्
।।२६।। न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेगभये कुतश्चित्। यच्चित्ततोऽदः
क्रिययाऽनिदंविदां दुरन्तदुःखप्रभवानुदर्शनात्।।२७।।

।। सङ्ग्रहोक्तिः ।।

लिङ्गस्थानस्थितस्वाधिष्ठानचक्रे नीत्वा, ततस्तं नाभिस्थानस्थं मणिपूरचक्रं नयेत्, ततस्तं प्राणं हृदयस्थमनाहतचक्रं, ततो वक्षःस्थं विशुद्धिचक्रं नीत्वा शनैर्निजतालुमूलं नयेत्।।२०।। ततो भ्रुवोर्मध्ये स्थितमाज्ञाचक्रं नीत्वा तत्राऽर्धमुहूर्तमात्रं स्थित्वा परमात्मानमनुसंदधत् सन् ततो ब्रह्मरन्ध्रं विभिद्य शरीरत्यागं कुर्यात्।।२१।। हे राजन्! यदि साधकोऽणिमाद्यष्टसिद्धी-र्भोक्तुकामो महर्लोकादिब्रह्मलोकपर्यन्तेषु स्थानेषु गन्तुमिच्छां कुर्यात्, तदा मनसेन्द्रियैश्च सह तत्तल्लोकभोगार्थं गच्छेत्।।२२।। योगेश्वराणां गतिस्त्रिलोक्या मध्येबहिश्च भवति, किन्तु केवलकर्मकाण्डरतानां तादृशी गतिर्न भवति।।२३।। अथ मुमुक्षोरर्चिरादिमार्गगमनप्रकारमाह - हे नृप! ब्रह्मपथेन प्रकाशमानया सुषुम्णया देहान्निर्गत्य ब्रह्मधाम प्रति चलितो योगी वैश्वानरं (आतिवाहिकं) याति, अथ निवृत्तपुण्यपापः सन् उपरिस्थितं शिशुमाराख्यं चक्रं प्रयाति।।२४।। योगी एकः सन् तद् विश्वेषामाश्रयभूतं विष्णोः स्थानं ब्रह्मविद्भिर्नमस्कृतं शिशुमारचक्रमतिवर्त्त्य लिङ्गदेहेन जनलोकमुपैति।।२५।। स योगी शेषभगवतो मुखानलेन विश्वं दह्यमानं निरीक्ष्य द्विपरार्धस्थायि चतुर्मुखसम्बन्धि पारमेष्ठ्यं स्थानं याति।।२६।। यस्मिन् शोक-जरा-मृत्यु-

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोऽनलमूर्तिमत्वरन्। ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ।।२८।। घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव। श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी।।२९।। स भूतसूक्ष्मेन्द्रियसंनिकर्षं मनोमयं देवमयं विकार्यम्। संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधम् ।।३०।। तेनात्मनात्मानमुपैति शान्तमानन्द-मानन्दमयोऽवसाने। एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ।।३१।। एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह सनातने च। ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान् वासुदेवः।।३२।। *न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह। वासुदेवे भगवति भक्तियोगो यतो भवेत्*।।३३।। भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत्कूटस्थो रतिरात्मन् यतो भवेत् ।।३४।।

।। सङ्ग्रहोक्तिः ।।

दुःख-भयादयो न सन्ति, तत्र केवलं परब्रह्मस्वरूपज्ञानरहितानां पुनर्दुरन्तदुःखप्रभवसंसाराद् भयमुत्प्रेक्ष्यते ।।२७।। ततः पृथिवीमयमण्डकटाहं व्याप्य निर्भयः सन् जलावरणं प्रतिपद्यते, तत जलरूपेणाऽग्निं, ततोऽग्निरूपेण वायुं, वायुरूपेणचाकाशं लब्ध्वा ।।२८।। घ्राणेन गन्धं, जिह्वया रसं, दृष्ट्या रूपं, त्वचा स्पर्शं, श्रोत्रेण शब्दं च लब्ध्वा ।।२९।। योगी शब्दस्पर्शादिभूत-सूक्ष्मेन्द्रियदेवतोद्भवकारणं तामसादित्रिविधमहङ्कारं लब्ध्वा ततो महत्तत्त्वं ततः प्रकृतितत्त्वं च गच्छति ।।३०।। भूतसूक्ष्मेन्द्रियदेवतादीनां स्वकारणे प्रलयरूपावसाने सति आत्मना= स्वरूपेणोपलक्षितो योगी निरतिशयानन्दस्वरूपं परमात्मानं जीवः=परमात्मसाम्यापत्त्या-ऽतिशयितानन्दप्रचुरः सन्नुपैति, एतां भागवतीं गतिं=अर्चिरादि-मार्गं गतो योगी पुनरिह प्रकृतिमण्डले कर्माधीनं देहं न प्राप्नोति ।।३१।। हे नृप! एतौ द्वौ अर्चिरादिधूमादिसंज्ञौ मार्गौ वेदोक्तौ स्तः, पुरा ब्रह्मणा पृष्टो भगवान् वासुदेवः तस्मै तौ द्वापि कथयति स्म ।।३२।। इह संसार अनादिकालतः प्रविष्टस्य जनस्य अतोऽर्चिरादेरन्यः सुखकरः पन्था न विद्यते, यतो अर्चिरादिमार्गचिन्तनात् वासुदेवे भगवति भक्तियोगः स्यात् ।।३३।। स्वयं भगवान् ब्रह्मा एकाग्रचित्तः सन् त्रिवारं कार्त्स्न्येन वेदं विचार्य यतो भक्तियोगात् परमेश्वरे परमा प्रीतिर्भवेत्

भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः। दृश्यैर्बुध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ।।३५।।*तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यो भगवान्नृणाम्।।३६।।* पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतम्। पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम्।।३७।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः ।।३।।

श्रीशुक उवाच - एवमेतन्निगदितं पृष्टवान् यद्भवान्मम।। नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम्।।१।। ब्रह्मवर्च्चसकामस्तु यजेत ब्रह्मणस्पतिम्। इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन्।।२।।

।। सङ्ग्रहोक्तिः ।।

स एव भक्तियोगः संपाद्यः इति निश्चितवान्।।३४।। योगपरिशुद्धमनसा सर्वभूतेषु भगवान् साक्षात्कारयोग्योऽस्ति, सर्वज्ञत्वेन साक्षात् द्रष्टा सोऽनुभवगोचरबुद्ध्यादिभिः, वेदान्तवाक्यै-रनुमानैश्च साक्षात्कारार्हो भवति।।३५।।हे राजन्! तस्मात् कारणात् भगवान् हरिः सर्वदेशकालेषु सर्वप्रकारेण नृणां श्रौतव्यः कीर्त्तितव्यः स्मर्त्तव्यश्च भवति।।३६।। सद्भिः कर्णपुटेषु पूरितं सकलैश्वर्यसंपन्नस्य परमात्मनः कथामृतं ये पिबन्ति ते विषयविदूषितमन्तःकरणं पुनन्ति, हरिचरणसरोजान्तिकं गच्छन्ति च।।३७।।

इति श्रीमद्भागवते द्वितीयकन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः ।।२।।

अथ तृतीयोऽध्यायः ।। ३।

विवधदेवानामुपासना भगवद्भक्तिमाहात्म्यं च

श्रीशुक उवाच - मनुष्येष्वासन्नमृत्युना मनीषिणा यद्विशेषतः कर्त्तव्यं पुरा भवान् पृष्टवान् तदेतद् भगवच्चरित्रश्रवणादिकमेव कर्त्तव्यमित्युक्तम्।।१।।अथ ब्रह्मवर्चस्कामो जनो ब्रह्माणं बृहस्पतिं वा, इन्द्रियभोगसामर्थ्यकाम इन्द्रम्, प्रजार्थी दक्षादींश्च पूजयेत्।।२।।

देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम्। वसुकामो वसून् रुद्रान् वीर्यकामोऽथ वीर्यवान्।।३।। अन्नाद्यकामस्त्वऽदितिं स्वर्गकामोऽदितेः सुतान्। विश्वान् देवान् राज्यकामः साध्यान् संसाधको विशाम्।।४।। आयुःकामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत्। प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौं।।५।। रूपाभिकामो गन्धर्वान् स्त्रीकामोऽप्सरउर्वशीम्। आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम्।।६।। यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसम्। विद्याकामस्तु गिरिशं दांपत्यार्थमुमां सतीम् ।।७।। धर्मार्थमुत्तमश्लोकं तन्तुं तन्वन् पितृन्यजेत्। रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान्।।८।। राज्यकामो मनून् देवान्निर्ऋतिं त्वभिचरन् यजेत्। कामकामो यजेत्सोममकामः पुरुषं परम्।।९।। *अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्।।१०।।* एतावानेव यजतामिह निःश्रेयसोदयः। भगवत्यचलो भावो यद्भागवतसंगतः।।११।। ज्ञानं यदा प्रतिनिवृत्तगुणोर्म्मिचक्रमात्मप्रसाद उभयत्र गुणेष्वसङ्गः।

।। सङ्ग्रहोक्तिः ।।

लक्ष्मीकामो विष्णोर्मायां, तेजस्कामो वह्निं, धनार्थी वसून्, प्रभावार्थी रुद्रान् पूजयेत्।।३।। अन्नाद्यर्थी अदितिं, स्वर्गकामो द्वादशाऽऽदित्यान्, राज्यकामो विश्वेदेवान्, दिक्पतित्वकामः साध्यदेवान् पूजयेत्।।४।। दीर्घायुष्यकामोऽश्विनीकुमारौ, पुष्टिकामः पृथिवीं देवीं, प्रतिष्ठास्थिरतार्थी द्यावापृथिव्यौ पूजयेत्।।५।। सौन्दर्यार्थी कमदेवं, स्त्रीकाम उर्वशीम्, सर्वाधिपत्यार्थी परमेष्ठिनं विधिं पूजयेत्।।६।। यशस्कामो यज्ञरूपं विष्णुं, कोशकामो वरूणम्, ज्ञानप्राप्तिकामः शिवम्, दाम्पत्यार्थी पार्वतीं पूजयेत्।।७।। धर्मार्थी विष्णुं, पुत्रार्थी पितृन्, बाधानिवृत्यर्थी यक्षान्, बलार्थी मरुद्गणान् पूजयेत्।।८।। राज्यकामो मनून् देवान्, शत्रुवधार्थी निर्ऋतिं राक्षसम्, भोगार्थी सोमम्, वैराग्यार्थी विष्णुं पूजयेत्।।९।। भगवदेकान्त भक्त उक्तानुक्तसर्वार्थी मोक्षार्थी वा तीव्रेण भक्तियोगेन परं पुरुषं परमेश्वरं पूजयेत्।।१०।। इह लोके भजतां मोक्षस्य लाभ एतावानेव यत् भगवदेकान्तिकभक्तानां समागमः स्यात्, तस्मात् भगवत्यचले भावे सति निःश्रेयसोदयः सिद्ध एव।।११।। हरिकथाश्रवणेन ज्ञानं, वैराग्यं, मनःप्रसन्नता, मोक्षसम्मतः

कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात्।।१२।।
शौनक उवाच **-इत्यभिव्याहृतं राजा निशम्य भरतर्षभः। किमन्यत्पृष्टवान् भूयो वैयासकिमृषिं कविम्।।१३।। एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुम्। कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम्।।१४।। स वै भागवतो राजा पाण्डवेयो महारथः। बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे।।१५।। वैयासकिश्च भगवान् वासुदेवपरायणः। उरुगायगुणोदाराः सतां स्युर्हि समागमे।।१६।। आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया।।१७।। तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत। न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे।।१८।। श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम गदाग्रजः।।१९।।** ***बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य। जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः।।२०।।***

।। सङ्ग्रहोक्तिः ।।

पन्था भक्तिश्च लभ्यते, तदा हरिकथासु प्रीतिं को न कुर्यात्।।१२।। *शौनक उवाच* - हे सूत! इत्थमाकर्ण्य राजा शुकं प्रत्यन्यं कं प्रश्नं कृतवान्? यदन्यत् पृष्टवान् तच्छुश्रूषतां नः कथयितु मर्हसि, साधूनां समाजे भगवत्कथैव भवति, नान्यत् किमपि।।१३-१४।। पाण्डवपौत्रः स परीक्षित् भगवत एकान्तिको भक्त आसीत्, यो बाल्येऽपि बालक्रीडनकैः क्रीडन् सन् श्रीकृष्णपूजारूपामेव क्रीडां चकार।।१५।। व्यासपुत्रः शुकोऽपि वासुदेवपरायणः परमो भागवत आसीत्, तयो द्वयोरपि भगवद्भक्तत्वात्, तत्संवादे हरिकथैव प्राधान्येन भवति।।१६।। उदयमस्तं च गच्छन् सूर्यः पुंसामायुर्हरति, हरेः कथया यः कालो नीतः स एव सफलः, हरिकथां विना यावान् कालो यातः स निष्फलः।।१७।। जीवनधारणमेवाऽऽयुषः फलं चेत् तर्हि तरवः किं न जीवन्ति? भस्त्रिकाः किं न श्वसन्ति? पशवः किं न खादन्ति? मैथुनं च न कुर्वन्ति किं? यस्य श्रवणपथे हरेर्नामानि न गतानि, स क्रियया तुल्यत्वात् श्वग्राम्यशूकरखरोष्ट्रैः प्रशंस्यः स्यात्।।१९।। श्रीहरिचरित्रश्रवणं न कुर्वतो नरस्य ये कर्णपुटे, ते बिलतुल्ये स्तः, या जिह्वा हरिकथां न कथयति सा मण्डुकजिह्वातुल्यैवाऽस्ति।।२०।।

भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।। शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ।।२१।। बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये। पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ।।२२।।
जीवन् शवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलषेत यस्तु। श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसन् शवो यस्तु न वेद गन्धम् ।।२३।। तदश्मसारं हृदयं बतेदं यद् गृह्यमाणैर्हरिनामधेयैः। न विक्रियेताथ मुखे विकारो नेत्रे जलं गात्ररुहेषु हर्षः ।।२४।। अथाऽभिधेह्यङ्ग मनोनुकूलं प्रभाषसे भागवतप्रधानः। यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ।।२५।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे तृतीयोऽध्यायः ।।३।।

।। सङ्ग्रहोक्तिः ।।

यस्य मस्तकं श्रीहरिं न नमस्करोति तत् कौशेयपटमुकुटकिरीटादिसेवितमपिभाररूपमेवाऽस्ति, यौ करौ हरेः सेवां न कुरुतः तौ लसत्कङ्कणावपि शवकरतुल्यौ स्तः ।।२१।। ये नयने हरिमूर्तिदर्शनं न कुरुतस्ते मयूरपिच्छगनेत्रतुल्ये स्तः, यौ पादौ हरेर्द्वारकादिक्षेत्राणि न गच्छतस्तौ वृक्षमूलतुल्यौ स्तः ।।२२।। यो हरेर्भक्तानां चरणरेणुन् शिरसि न धारयेत्, यश्च श्रीहरिचरणार्पिततुलसीदलानां गन्धमाघ्राय न मोदते, स नरो जीवन्मृत एव ।।२३।। यद् हृदयं हरिनामग्रहणेनापि सात्त्विकभावयुक्तं न स्यात्, रोमाञ्चोऽश्रुस्रावश्च न स्यात्, तद्धृदयं वज्रतुल्यकठोरमेव ।।२४।। त्वं भगवद्भक्तेषु मुख्योऽसि, मनोभिरामं मे भाषसे, नृपेण सम्यक् पृष्टः अध्यात्मविद्याविशारदः शुकः परीक्षितं यदाह तन्नो ब्रूहि ।।२५।।

इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः ।।३।।

अथ चतुर्थोऽध्यायः ॥४॥

सूत उवाच - वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः। उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥१॥ आत्मजायासुतागारपशुद्रविणबन्धुषु। राज्ये चाविकले नित्यं निरूढां ममतां जहौ ॥२॥ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः। कृष्णानुभाव-श्रवणे श्रद्दधानो महामनाः ॥३॥ संस्थां विज्ञाय संन्यस्य कर्मत्रैवर्गिकं च यत्। वासुदेवे भगवति स्वात्मभावं दृढं गतः ॥४॥ *राजोवाच* - समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ। तमो विशीर्यते मह्यं हरेः कथयतः कथाः ॥५॥ भूय एव विवित्सामि भगवानात्ममायया। यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥६॥ यथा गोपायति विभुर्यथा संयच्छते पुनः। यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥७॥ आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च। नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः। दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥८॥

॥ सङ्ग्रहोक्तिः॥

अथ चतुर्थोऽध्यायः ॥४॥

सृष्टिविषयको नृपप्रश्नः शुककृतं मङ्गलं च

सूत उवाच -परमात्मनो यथार्थस्वरूपनिश्चयात्मकं शुकवचनं श्रुत्वा नृपः परीक्षित् "कृष्ण एव सेव्यः" इति सतीं मतिं व्याधात् ॥१॥ स देहस्त्रीपुत्रसौधपशुद्रविणादिषु निरुपद्रवे राज्ये च ममतां जहौ ॥२॥ हे शौनकादयः! श्रीकृष्णलीलाश्रवणे श्रद्दधानो महामना नृपो यूयं मां प्रति यं विषयं पृच्छथ, कृष्णचरित्रं श्रद्धया श्रोतुमिच्छन् सन् परीक्षित् तमेव विषयं शुकं पप्रच्छ ॥३॥ परीक्षित् स्वमासन्नमृत्युं ज्ञात्वा काम्यकर्मणां फलानि त्यक्त्वा श्रीकृष्णे मतिं स्थिरां चकार ॥४॥ *राजोवाच* - हे ब्रह्मन्! हरेः कथाः कथयतः सर्वज्ञस्य तव वचनं समीचीनमस्ति ॥५॥ हे मुने! भगवान् स्वेच्छया स्वशक्तिरूपया प्रकृत्या ब्रह्मादिभिरपि दुरुत्पाद्यमिदं विश्वं यथा सृजते, एतदेव पुनर्वेदितुमिच्छामि ॥६॥ अनन्तशक्तिः परमपुरुषः यां यां शक्तिमुपादाय जगतः सृष्टिं पालनं च यथा करोति ॥७॥ जीवं कर्मानुसारेण क्रीडयन् विविधान् अवतारान् धृत्वा स्वयमपि क्रीडन्, स भगवान् सामान्यतो विशेषतश्च यत्करोति तत्सर्वमहं वेदितुमिच्छामि, अद्भुतकर्मणो भगवतो चरित्रं विद्वद्भिरपि दुर्ज्ञेयमस्ति ॥८॥

यथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोऽपि वा। बिभर्त्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः।।९।। विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा। शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु।।१०।। *सूत उवाच* - इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः। हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे।।११।। *श्रीशुक उवाच*- नमः परस्मै पुरषाय भूयसे सदुद्भवस्थाननिरोधलीलया। गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलभ्यवर्त्मने।।१२।। भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्त्वमूर्त्तये। पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे।।१३।। नमो नमस्तेऽस्त्वृषभाय सात्त्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम्। निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः।।१४।। यत्कीर्त्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्। लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः।।१५।। विचक्षणा यच्चरणोपसादनात्सङ्गं व्युदस्योभयतोऽन्तरात्मनः। विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः।।१६।।

।। सङ्ग्रहोक्तिः ।।

स्वयमेको हरिरवतारैर्बहूनि चरित्राणि कुर्वन्, प्रकृतेः सत्त्वादिगुणान् युगपत् गृह्णाति क्रमशो वा, तदपि वेदितुमिच्छामि।।९।। एतत् सर्वं विचारार्हमस्ति, भवांस्तु शास्त्रेषु परब्रह्मस्वरूपे च निष्णातः=निष्ठावानसि, अतो मां ब्रवीतु।।१०।। *सूत उवाच* - इत्थं राज्ञा प्रार्थितो मुनिः शुको भगवन्तं हृषीकेशं संस्मृत्य प्रतिवक्तुमारेभे।।११।। *श्रीशुक उवाच* - स्वरूपतो गुणतो विभूतित ऐश्वर्यतश्च महते परस्मैं पुरुषाय नमः, यो सत्यस्य जगत उदयविभवलयाय ब्रह्माच्युतहररूपशक्तित्रयं गृह्णाति।।१२।। सतां पापविनाशकाय, दुर्जनानां विनाशकाय, संपूर्णदिव्यमूर्तये परमहंसानामात्मतत्त्वप्रदायिने नमो नमः।।१३।। यादवानां मध्ये श्रेष्ठाय, कुयोगिनां दुर्लभाय स्वतुल्याभ्यधिकराहित्यत्वात् स्वतैजसैश्वर्येणोपलक्षिताय, स्वब्रह्मपुरे धाम्नि रममाणाय तुभ्यं नमो नमः।।१४।। यस्य कीर्तनं स्मरणं दर्शनं नमनं श्रवणं पूजनं च जनस्य तत्क्षणमेव पापनाशकं भवति तस्मै मङ्गलकीर्त्तये नमो नमः।।१५।। विचक्षणा यस्य चरणसेवनादिह

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः। क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ।।१७।। *किरातहूणान्ध्रपुलिन्दपुष्कसा आभीरकङ्का यवनाः खसादयः। येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः*।।१८।। स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः। गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम्।।१९।। श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः। पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां गतिः।।२०।। यदङ्घ्र्यनुध्यानसमाधिधौतया धियाऽनुपश्यन्ति हि तत्त्वमात्मनः। वदन्ति चैतत्कवयो यथारुचं स मे मुकुन्दो भगवान् प्रसीदताम्।।२१।। प्रणोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणामृषभः प्रसीदताम् ।।२२।। भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः।

।। सङ्ग्रहोक्तिः ।।

परत्र चासक्तिं परित्यज्य मुक्तिं प्राप्नुवन्ति तस्मै मङ्गलकीर्त्तये नमः।।१६।। तपस्विनः, दानशीलाः, यशस्विनः, मन आदीन्द्रियनिग्रहपराः, मन्त्रविदः सुमङ्गलाः एते सर्वे यस्मिन् भगवति समर्पणं विना फलं न प्राप्नुवन्ति तस्मै मङ्गलकीर्त्तये नमः।।१७।। किराताः, हूणाः, अन्ध्राः, पुलिन्दाः, पुष्कसाः, आभीराः, कङ्काः, यवनाः, खसादयः ये केऽपि पापजातयः यस्य यदुपस्य भगवच्छ्रीकृष्णस्य आश्रितानामाश्रयग्रहणेन शुद्ध्यन्ति धर्माद् भक्तौ हरिकृष्णनाम्ना प्रभविष्यते श्रीकृष्णाय नमो नमः।।१८।। एष परमात्मा योगनिष्ठानामप्यधीश्वरः, कर्माराध्यत्वात् त्रयीमयः, धर्ममयः, तपोमयः, निर्दोषैरजशंकरादिभिरपि साश्चर्यं निरीक्षणीयोऽस्ति, स मयि प्रसीदताम्।।१९।। लक्ष्मीपतिः, यज्ञपतिः, प्रजापतिः, शुभधियां पतिः, सर्वलोकैकनाथः, भूलोकपालः, यादवानां पतिः, सत्पुरुषाणां गतिरूपश्च यो भगवानस्ति स मयि प्रसीदताम्।।२०।। विद्वांसो यस्य पादपद्मानुध्यानं कृत्वाऽऽत्मतत्त्वं लभन्ते स मुकुन्दो भगवानस्मासु प्रसन्नो भवतु।।२१।। सृष्ट्यारम्भे ब्रह्मणो हृदि सृष्टिविषयां स्मृतिं वितन्वता येन परमात्मना संप्रेरिता त्रयीरूपा सरस्वती ब्रह्मणो मुखात् प्रादुरभूत्, स ज्ञानप्रदानां श्रेष्ठः

भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान् वचांसि मे।।२३।।
नमस्तस्मै भगवते वासुदेवाय वेधसे। पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम्।।२४।।
एतदेवात्मभू राजन् नारदाय विपृच्छते। वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः
।।२५।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

श्रीनारद उवाच – देवदेव नमस्तेऽस्तु भूतभावन पूर्वज। तद्विजानीहि यज्ज्ञानमात्म-
तत्त्वनिदर्शनम्।।१।। यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो। यत्संस्थं यत्परं
यच्च तत्तत्त्वं वद तत्त्वतः।।२।। सर्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः।

।। सङ्ग्रहोक्तिः ।।

मे प्रसीदताम्।।२२।। यः परमात्मा महदादिपृथिव्यन्तैरिमाः शरीररूपपुरः निर्माय आसु शेते स पुरुषो यो विषयादिषोडशगुणान् भुङ्क्ते, स षोडशात्मको भगवान् मम वचांसि प्रीतिजनकानि कुर्यात्।।२३।। तस्मै सर्वज्ञाय भगवते व्यासाय नमः, सौम्या यच्छिष्या उद्धवनारदादयो वैशम्पायनादयश्च भगवद्भक्ता तन्मुखान्निःसृतं पद्ममकरन्दमिव ज्ञानामृतं पपुः।।२४।। हे राजन्! आदौ नारायणेन ब्रह्मणे यत् प्रोक्तं, ब्रह्मणा नारदाय, तेन व्यासाय, तेन च मह्यं यत्प्रोक्तं तदहं त्वां वक्ष्यामि।।२५।।

इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः ।। ५।।

कालकर्मादिशक्तिद्वारा विराट्सृष्टिरूपा हरेर्लीला

नारद उवाच – हे देवदेव! हे पूर्वज! तुभ्यं नमः, परमेश्वरस्य नितरां प्रकाशकं ज्ञानं मां विशेषेण ज्ञापय।।१।। इदं जगत् यदात्मकं, यतः सृष्टं, यदधिष्ठानं, यल्लयं, यत्शास्यम्, अस्योक्तातिरिक्तान्यन्यान्युपकारणानि स्युस्तानि यथार्थतया वद।।२।। हे ब्रह्मन्! भूतं भव्यं

करामलकवद्विश्वं विज्ञानावसितं तव ।।३।। यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः। एकः सृजसि भूतानि भूतैरेवात्ममायया ।।४।। आत्मन् भावयसे तानि न पराभावयन् स्वयम्। आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ।।५।। नाहं वेद परं ह्यस्मिन्नापरं न समं विभो। नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ।।६।। स भवानचरद् घोरं यत्तपः सुसमाहितः। तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि ।।७।। एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर। विजानीहि यथैवेदमहं बुध्येऽनुशासितः ।।८।। *ब्रह्मोवाच* - सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितम्। यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ।।९।। नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो। अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ।।१०।। येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम्। यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ।।११।। तस्मै नमो भगवते वासुदेवाय धीमहि। यन्मायया दुर्ज्जयया मां ब्रुवन्ति जगद्गुरुम् ।।१२।।

।। सङ्ग्रहोक्तिः ।।

भवच्च यत् सर्वं तद् भवान् हस्तामलकवत् निश्चितरूपेण जानासि ।।३।। त्वमेवैकाकी यस्माज्ज्ञानं लब्ध्वा यस्याधारेण यस्याधीनः सन् आत्मनः संकल्पेन पृथिव्यादिपञ्चभूतैः जगदुत्पादयसि ।।४।। तानि सृष्टानि भूतानि स्वस्मिन् स्वं पराभवम् प्रापयन् पालयसि, ऊर्णनाभिरिव स्वस्वप्रकृतिमवलम्ब्य श्रमरहितः सन् सर्वं जगत् सृजसि पासि संहरसि च ।।५।। हे विभो! अहं त्वस्मिन् जगति त्वदन्यं कमप्युत्तमं मध्यममधमं वा न जानामि, किन्तु त्वत्त एवं निखिलं भवतीति मन्ये ।।६।।इत्थं भूतोऽपि भवान् घोरं तपोऽकार्षीत् तेन मे मनसि त्वदन्योऽपि कश्चनेश्वरोऽस्तीति शङ्का भवति ।।७।। हे सर्वज्ञ! सकलेश्वर! अस्य सर्वस्य ज्ञानं यथा मम स्यात् तथा त्वं ब्रूहि ।।८।। *ब्रह्मोवाच* - हे वत्स! मयि करुणावतस्तवेदं विचिकित्सितम्, हे सौम्य! यस्मादहं भगवत्प्रभावज्ञापनरूपे धर्मे प्रवर्तितः ।।९।।हे नारद! तवेदं वचनं नाऽसत्यम्, किंतु मत्तः परं भगवन्तमज्ञात्वैव त्वं ब्रवीषि ।।१०।। स्वयंप्रकाशेन येन भगवता स्वरोचिषा प्रकाशितं जगदहं रचयामि, यथा सूर्यः स्वरोचिषा जगत् रोचयति तदेव वह्निसोमग्रहर्क्षतारकाः रोचयन्ति तद्वत् ।।११।। तस्मै मह्यमेवंभूतैश्वर्यप्रदाय वासुदेवाय भगवते नमस्कुर्महे, अहो,

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया। विमोहिता विकत्थन्ते ममाहमिति दुर्द्धियः।।१३।। द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। वासुदेवात्परो ब्रह्मन् चान्योऽर्थोऽस्ति तत्त्वतः।।१४।। नारायणपरा वेदा देवा नारायणाङ्गजाः। नारायणपरा लोका नारायणपरा मखाः।।१५।। नारायणपरो योगो नारायणपरं तपः। नारायणपरं ज्ञानं नारायणपरा गतिः।।१६।। तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः। सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः।।१७।। सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः। स्थितिसर्गनिरोधेषु गृहीता मायया विभोः।।१८।। कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः। बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः।।१९।। स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोक्षजः। स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः।।२०।। कालं कर्म स्वभावं च मायेशो मायया स्वया। आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे।।२१।।

।। सङ्ग्रहोक्तिः।।

दुर्जयया यन्मायाशक्त्या जना मां जगद्गुरुं वदन्ति।।१२।। यस्य दृष्टिपथे स्थातुं विलज्जमानयाऽमुया मायया विमोहिता दुर्धियो जनाः "ममाऽहम्" इति विकत्थन्ते।।१३।। हे ब्रह्मन्! द्रव्यं कर्म कालः स्वभावः जीवश्चैते सर्वे यन्मायामोहिता विकत्थन्ते, अतस्ते केऽपि परमार्थतो वासुदेवात् परा न सन्ति।।१४।। वेदा नारायणपराः, देवा नारायणाङ्गोद्भूताः, लोका यज्ञाश्च नारायणपराः सन्ति, योगतपोज्ञानगत्यादिकं सर्वं नारायणपरमेवाऽस्ति।।१५-१६।। सर्वान्तर्यामिणः सर्वज्ञस्य कूटस्थस्य नारायणस्य संकल्परूपज्ञानेन सृष्टोऽहं तेन संप्रेरितः सन्नेव सृज्यं सर्वमिदं सृजामि।।१७।। हेयगुणरहितेन दिव्यगुणेन च भगवता सृष्टिस्थितिसंहारपरिकरत्वेन मायाया सत्त्वादयो गुणाः परिगृहीताः।।१८।। भूतदेवतेन्द्रियरूपाः सत्त्वादयो गुणाः स्वरूपतो मुक्तमपि अनादिकालतो मायावश्यं जीवं शरीरेन्द्रियकर्तृत्वेन नित्यदा बध्नन्ति।।१९।। हे नारद! एभिः सत्त्वादित्रिभिर्गुणैरुपलक्षितः स्वतन्त्रगतिः स भगवान् सर्वेषां मम च नियन्ताऽस्ति।।२०।। मायाधिपतिः स स्वसंकल्पेन सर्गद्वारभूतया प्रकृत्या वा नानानामरूपभाग् भवितुमिच्छुः सन् यदृच्छयाऽऽत्मनि प्राप्तं कालं कर्म स्वभावं चोपाददे।।२१।।

कालाद्गुणव्यतिकरात् परिणामस्वभावतः। कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥ महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात्। तमःप्रधानस्त्वभवद् द्रव्यज्ञान-क्रियात्मकः॥२३॥ सोऽहङ्कार इति प्रोक्तो विकुर्वन् समभूत् त्रिधा। वैकारिक-स्तैजसश्च तामसश्चेति यद्भिदा। द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो॥२४॥ तामसादपि भूतादेर्विकुर्वाणादभून्नभः। तस्य मात्रा गुणः शब्दो लिङ्गं यद्द्रष्टृ-दृश्ययोः॥२५॥ नभसोऽथ विकुर्वाणदभूत्स्पर्शगुणोऽनिलः। परान्वयाच्छब्दवांश्च प्राण ओजः सहोबलम्॥२६॥ वायोरपि विकुर्वाणात् कालकर्मस्वभावतः। उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत्॥२७॥ तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम्। रूपवत्स्पर्शवच्चाम्भो घोषवच्च परान्वयात्॥२८॥ विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत्। परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः॥२९॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश। दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः॥३०॥

॥ सङ्ग्रहोक्तिः॥

ततः कालकृतगुणवैषम्यात् प्रकृतिपरिणामस्वभावात् जीवादृष्टाच्च हेतोः पुरुषाधिष्ठिताद् अव्यक्तात् महत्तत्त्वस्योत्पत्तिरभूत्॥२२॥ रजःसत्त्वोपबृंहितात् विकुर्वाणात् महत्तत्त्वतः द्रव्य-ज्ञानक्रियात्मकः तमःप्रधानो यो तत्त्वविशेषोऽभवत् सोऽहङ्कार इत्युच्यते, रूपान्तरं गच्छन् स त्रिधाऽभवत् वैकारिकः तैजसः तामसश्चेति, तस्याहङ्कारस्य सात्त्विक राजस तामस इति क्रमेण नामानि, तत्र द्रव्यशक्तिप्रधानस्तामसाहङ्कारः, क्रियाशक्तिप्रधानस्तैजसो राजसा-हङ्कारः, ज्ञानशक्तिप्रधानो वैकारिकः सात्त्विकाहङ्कारोऽस्ति॥२३-२४॥ तेषु विकुर्वाणात् तामसाहङ्कारात् शब्दगुणकमाकाशमभूत्॥२५॥ विकुर्वाणादाकाशाच्छब्दस्पर्शगुणको वायुरभूत्॥२६॥ कालकर्मस्वभावतो विकुर्वाणाद् वायोः शब्दस्पर्शरूपगुणकं तेजोऽभूत्॥२७॥ ततो विकुर्वाणात् तेजसः शब्दस्पर्शरूपरसगुणकं जलमुत्पन्नम्॥२८॥ विकुर्वाणाज्जलात् शब्दस्पर्शरूपरसगन्धगुणवती पृथिवी बभूव॥२९॥ वैकारिकात्सात्त्विकापरसंज्ञकादहङ्कारात् मनस्तदधिष्ठाता देवश्चन्द्रमा जातः, पञ्चज्ञानेन्द्रियाणां देवाः दिग्-वात-अर्क-वरुण-अश्विनामानः, कर्मेन्द्रियाणां देवाः वह्नि-इन्द्र-विष्णु-मित्र-प्रजापतिनामानश्च जज्ञिरे॥३०॥

तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाऽभवन्। ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ। श्रोत्रत्वग्घ्राणदृग्जिव्हावाग्दोर्मेढ्राङ्घ्रिपायवः।।३१।। यदेतेऽसंहता भावा भूतेन्द्रियमनोगुणाः। तदायतननिर्माणे न शेकुर्ब्रह्मवित्तम।।३२।। तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः।।३३।। वर्षपूगसहस्रान्ते तदण्डमुदकेशयम्। कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत्।।३४।। स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः। सहस्रोर्वङ्घ्रिबाव्हक्षः सहस्राननशीर्षवान्।।३५।। यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः। कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः।।३६।। पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः। ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत।।३७।। भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः। ह्रदा स्वर्लोक उरसा महर्लोको महात्मनः।।३८।। ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात्। मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः।।३९।।

।। सङ्ग्रहोक्तिः ।।

विकुर्वाणात् तैजसाद् राजसापरसंज्ञकादहङ्कारात् श्रोत्रत्वगादीनीन्द्रियाणि दश, तत्र श्रोत्र-त्वक्-चक्षुः-रसना-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्-पाणि-पाद-पायु-उपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, बुद्धिः प्राणश्च, एतेऽभवन्।।३१।।हे नारद! यदेमे पञ्चभूतदशेन्द्रियप्राणमन-आदयो भावा अमिलिता आसन् तदा ब्रह्माण्ड निर्माणं कर्तुं न शेकुः।।३२।। तदा भगवत-शरणं गताः, पश्चाद् भगवच्छक्तिप्रेरितास्ते परस्परं संहत्य सत्वं=पञ्चीकरणेन स्थूलत्वम् असत्त्वं=अपञ्चीकृतरूपेण सूक्ष्मत्वं च उपादाय सदसदात्मकमिमं ब्रह्माण्डं ससृजुः।।३३।। ततः प्रलयकालावसाने परमपुरुषः कालकर्मस्वभावस्थः सन् अचेतनं गर्भोदकावस्थितं तदण्ड-मजीवयत्।।३४।। ततः स एव ब्रह्मशरीरकः परमपुरुषो ब्रह्माण्डं निर्भिद्य तस्मान्निर्गतः सन् सहस्रोरु-चरण-भुज-नयन-मुख-मस्तक-युक्त उत्पन्नोऽभूत्।।३५।। उपासका यदीयैरवयवैः कट्यादिभिरधरतलादीन् सप्तलोकान् जघनादिभिरूर्ध्वं भूरादीन् सप्तलोकांश्च कल्पयन्ति ।।३६।।तस्य मुखाद् ब्राह्मणाः, बाहुभ्यां क्षत्रियाः, ऊरुभ्यां वैश्याः चरणाभ्यां शूद्रा जाताः।।३७।। तस्य चरणाभ्यां भूर्लोकः कल्पितः, नाभ्यां भुवर्लोकः, हृदि स्वर्गलोकः, वक्षसि महर्लोकः,

तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः। जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम्।।४०।। महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम्। पातालं पादतलत इति लोकमयः पुमान्।।४१।। भूर्ल्लोकः कल्पितः पद्भ्यां भुवर्ल्लोकोऽस्य नाभितः। स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना।।४२।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे पञ्चमोऽध्यायः।।५।।

अथ षष्ठोऽध्यायः ।।६।।

ब्रह्मोवाच - वाचो वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः। हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च।।१।। सर्वासूनां च वायोश्च तन्नासे परमायने। अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः।।२।। रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी। कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः।।३।।

।। सङ्ग्रहोक्तिः ।।

ग्रीवायां जनलोकः, स्तनयोस्तपोलोकः, मूर्द्धनि सत्यलोकः।।३८-३९।। तस्य पुरुषस्य कट्यामतलं, ऊरुद्वये वितलं, जानुद्वये सुतलं, जङ्घाद्वये तलातलम्।।४०।। गुल्फद्वये महातलं, पादद्वयाग्रे रसातलं, पादतलाद् पातालं च कल्पितमस्ति।।४१।। अथवा पादद्वयात् भूलोकः, नाभितो भुवर्लोकः, शिरसः स्वर्गलोकः कल्पितः इति लोककल्पना विज्ञेया।।४२।।

इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः।।५।।

अथ षष्ठोऽध्यायः ।।६।।

अध्यात्मादिभेदेन विराड्विभूतेर्वर्णनम्

ब्रह्मोवाच- तस्य वैराजपुरुषस्य मुखं वाचामग्नेश्चोत्पत्तिस्थानम्, त्वगादिसप्तधातवो गायत्र्यादिच्छन्दसाम् उत्पत्तिस्थानं, जिह्वा हव्यकव्यामृतान्नानां षड्रसानां वरुणस्य चोत्पत्तिस्थानम्।।१।। तस्य नासिके सर्वेषां प्राणानां वायोर्गन्धस्याऽश्विनीकुमारयोश्चोत्पत्तिस्थानम्।।२।। तस्य चक्षुरिन्द्रियं रूपाणां प्रकाशानां तथा नेत्रगोलके द्युलोकस्य सूर्यस्योत्पत्तिस्थानम्, कर्णौ

तद्घ्रात्रं वस्तुसाराणां सौभगस्य च भाजनम्। त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि।।४।। रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः। केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम्। बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम्।।५।। विक्रमो भूर्भुवःस्वश्च क्षेमस्य शरणस्य च। सर्वकामवरस्यापि हरेश्चरण आस्पदम्।।६।। अपां वीर्यस्य सर्गस्य पर्ज्जन्यस्य प्रजापतेः। पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः।।७।। पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद। हिंसायां निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः।।८।। पराभूतेरधर्मस्य तमसश्चापि पश्चिमः। नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः।।९।। अव्यक्तरससिन्धूनां भूतानां निधनस्य च। उदरं विदितं पुंसो हृदयं मनसः पदम्।।१०।। धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च। विज्ञानस्य च तत्त्वस्य परमात्मा परायणम्।।११।। अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः। सुरासुरनरा नागाः खगा मृगसरीसृपाः।।१२।।

।। सङ्ग्रहोक्तिः ।।

दिशां श्रोत्रेन्द्रियस्याकाशस्य शब्दस्य चोत्पत्तिस्थानम्।।३।। तस्य शरीरं वस्तुसारभागानां सौन्दर्यस्य स्थानम् तथा त्वक् स्पर्शस्य वायोर्यज्ञस्य चोत्पत्तिस्थानम्।।४।। तस्य रोमाणि सर्ववृक्षाणां, केशा मेघानां, श्मश्रूणि विद्युताम्, नखानि शिलालोहादीनां चोत्पत्तिस्थानम्, तस्य बाहव इन्द्रादिलोकपालानामुत्पत्तिस्थानम्, पादन्यासो भूरादिलोकानां लब्धस्य तथा भयाद्रक्षणस्य च स्थानम्, हरेश्चरणः सर्वेषां कामानां वरणस्य स्थानम्।।५-६।। शिश्नो जलस्य शुक्रस्य लोकसृष्टेः प्रजापतेश्चोत्पत्तिस्थानम्, तस्योपस्थेन्द्रियं तु मैथुनसुखस्य सन्तानार्थं, तथा गुदेन्द्रियं यममित्रयो र्देवतयोर्मलत्यागस्य चोत्पत्तिस्थानम् ।।७।। तस्य गुदो हिंसाया अलक्ष्म्या मृत्योर्निरयस्य चोत्पत्तिस्थानम्।।८।। पृष्ठभागः पराजयस्याऽज्ञानस्य चोत्पत्तिस्थानम्, तस्य नाड्यो नदनदीनामुत्पत्तिस्थानम्, अस्थिसमूहो गिरीणाम्।।९।। उदरं प्रधानस्यान्नादिरसानां सिन्धूनां भूतानां लयस्य चोत्पत्तिस्थानम्, उदरमस्मदादिलिङ्गशरीरस्य तथा हृदयं धर्मस्य, मम, तव, सनत्कुमाराणां, शंकरस्य, विज्ञानस्य, सत्त्वस्य चोत्पत्तिस्थानम् ।।१०-११।। अहं, भवान्, शंकरो, मरीच्यादयः, सुरासुर-नर-नाग-खग-मृग-गन्धर्वाप्सरो-

गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः। पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥१३॥ अन्ये च विविधा जीवा जलस्थलनभौकसः। ग्रहर्क्षकेतवस्तारास्तडित-स्तनयित्नवः॥१४॥ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्। तेनेदमावृतं विश्वं वितस्तिमधि तिष्ठति॥१५॥ स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ। एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान्। सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ॥१६॥ महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः। पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः॥१७॥ अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धसु। पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः। अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः॥१८॥ सृती विचक्रमे विष्वङ् साशनानशने उभे। यदविद्या च विद्या च पुरुषस्तूभयाश्रयः॥१९॥ यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः। तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन्॥२०॥

॥ सङ्ग्रहोक्तिः॥

यक्ष-रक्षो-भूतगण-सर्पाः, पशवः, पितरः सिद्ध विद्याधरचारणा वृक्षाः॥१२-१३॥ अन्येऽपि जलस्थलाकाशचारिणो जीवाः ग्रहनक्षत्रकेतवस्तारा विद्युतो मेघाः॥१४॥ भूतं भविष्यद् वर्तमानं च तत्तत् सकलं स परमः पुरुष एव, तेन पुरुषेणेदं व्याप्तं, स सकलं व्याप्य वितस्तिमधिष्ठितो भवति॥१५॥ यथा सूर्यः स्वमण्डलं प्रतपन् अन्तः प्रकाशयन् बहिः प्रदेशेऽपि प्रकाशयति तथा विराडन्तःस्थः परमात्माऽपि विराड्देहमन्तःप्रकाशयन् बहिरपि प्रकाशयति॥१६॥ सत्पुरुषोऽभयदः सन् मोक्षं दातुमपि समर्थः, अनित्यं कर्मफलमप्यतिक्रम्य स्थितः, हे नारद! अस्य पुरुषस्य महिमाऽपारः॥१७॥ सर्वाणि भूतानि अस्य पुरुषस्य पादः, त्रिलोक्या उपरितनेषु जनस्तपः सत्यलोकेषु क्रमेणाऽमृतक्षेमाऽभयानि निहितानि सन्ति, किं च नैष्ठिकब्रह्मचारिवानप्रस्थयतीनामाश्रमास्त्रिलोक्या बहिर्महर्लोकादौ सन्ति, ब्रह्मचर्यरहितो गृहस्थाश्रमस्तु त्रिलोक्या अन्तरस्ति॥१८॥ पुरुषः क्षेत्रज्ञो भोगापवर्गप्राप्तिसाधनौ द्वौ मार्गौ प्रति चलतिस्म, यो भोगात्मकः स अविद्यारूपः, त्यागात्मकः स विद्यारूपः, तत्र क्षेत्रज्ञः पुरुषो यथारुचि अन्यतमनिष्ठो जायते॥१९॥ विराट् = अण्डकारणभूतपुरुषो यदण्डं सृष्ट्वा तत्र स्वयमपि भूतेन्द्रियगुणात्मकः सन् जज्ञे, तद् द्रव्यात्मकं विश्वं व्यष्टिप्रपञ्चात्मकं विराड्देहं च

यदास्य नाभ्यान्नलिनादहमासं महात्मनः। नाविदं यज्ञसंभारान् पुरुषावयवादृते
।।२१।। तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः। इदं च देवयजनं कालश्चोरु-
गुणान्वितः।।२२।। वस्तून्योषधयः स्नेहा रसलोहमृदो जलम्। ऋचो यजूंषि सामानि
चातुर्होत्रं च सत्तम।।२३।। नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च। देवतानुक्रमः
कल्पः संकल्पस्तन्त्रमेव च।।२४।। गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम्।
पुरुषावयवैरेते संभाराः संभृता मया।।२५।। इति संभृतसंभारः पुरुषावयवैरहम्।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम्।।२६।। ततस्ते भ्रातर इमे प्रजानां पतयो
नव। अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः।।२७।। ततश्च मनवः काले ईजिरे
ऋषयोऽपरे। पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम्।।२८।। नारायणे भगवति
तदिदं विश्वमाहितम्। गृहीतमायोरुगुणः सर्गादावगुणः स्वतः।।२९।। सृजामि
तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ।।३०।।

।। सङ्ग्रहोक्तिः ।।

स्वमयूखैः प्रकाशयन् सूर्य इवात्यगात् = अतिक्रान्तवान्।।२०।। तस्य परमेश्वरस्य नाभिपद्मादह-
मुत्पन्नः सन् पुरुषाङ्गं विना यज्ञसंभारान् नाऽपश्यम्।।२१।। तदा तेषु पुरुषावयवेषु यज्ञस्य
साधनान्यकल्पयम्, ते च - पशवः सवनस्पतयः कुशाः, यागभूमिः, बहुगुणयुक्तः कालश्च।।२२।।
हे सत्तम! वस्तूनि, ओषधयः, आज्यादिस्नेहाः, क्षीरादयो रसाः, सुवर्णादिलोहाः, कपालाद्याः
मृदः, जलं, ऋचः, यजूंषि, सामानि, चतुर्होत्रं कर्म, नामधेयानि, मन्त्राः, दक्षिणाः, व्रतानि,
देवतानामनुक्रमः, कल्पः, संकल्पः, तन्त्रं, गतयः, मतयः, श्रद्धा, प्रायश्चित्तम्, समर्पणम्, एवं
सर्वाणि अपि यज्ञसाधनानि मया पुरुषावयवैरेव सम्पादितानि।।२३-२५।। एतान् सर्वान्
सम्भारानेकत्रकृत्वा तैरेव संभारैरीश्वरमहमयजम्।।२६।। ततः ते भ्रातरो मरीचिप्रभृतयो नव
प्रजापतयः समाहिताः सन्तः व्यक्तमिन्द्रादिरूपमव्यक्तं परमपुरुषं चायजन्।।२७।। ततः
स्वस्वावसरे मनवः, अपरे ऋषयश्च परमात्मानं यज्ञैरीजिरे, ततः पितरः, विबुधाः, दैत्याः
मनुष्याः परमात्मानं यज्ञैरीजिरे।।२८।।यः स्वतः सत्त्वादिगुणरहितोऽपि सर्गादौ गृहीतमायोरुगुणः
भवति, तस्मिन् नारायणे भगवत्याहितं भवति।।२९।। सः परमपुरुषः स्वशरीरभूतेन मया

इति तेऽभिहितं तात यथेदमनुपृच्छसि। नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् ।।३१।। न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः। न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः।।३२।। सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः। आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभवः।।३३।। नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलम्। यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वान्तमथापरे कुतः।।३४।। नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुताऽपरे सुराः। तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे।।३५।। यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः। न यं विन्दन्ति तत्त्वेन तस्मै भगवते नमः।।३६।। स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः। आत्माऽऽत्मन्यात्मनाऽऽत्मानं संयच्छति च पाति च।।३७।।

।। सङ्ग्रहोक्तिः।।

सृजति, तद्वत् रुद्ररूपेण हरति, पुरुषात्मविष्णुरूपेण पाति, एवं परमपुरुषः स त्रिशक्तिधृद् अस्ति।।३०।।हे तात! यत्त्वया पृष्टं तत्सर्वं मया कथितम्, सदसदात्मकम् = चेतनाचेतनात्मकं कृत्स्नं जगत् भगवतः सकाशात् पृथक् नाऽनुसंधयेम्।।३१।।हे नारद! यतो मया भक्तिभरितेन हृदयेन हरिर्वृतोऽस्ति, अतो मे वचो मिथ्या न, मे मनसो गतिर्मिथ्या न, एवं च ममेन्द्रियाणि कुपथेन न गच्छन्ति।।३२।। सोऽहं वेदप्रतिपाद्येषु प्रधानः, तपोमयः, प्रजापतिभिर्नमस्कृतः समाहितः सन् योगमास्थायाऽपि स्वजन्मदातारं तं परमात्मानं स्वरूपतो गुणतश्चैतावानिति न ज्ञातवान्।।३३।।अतस्तच्छरणं प्राप्तानां संसारनिवर्तकं, सुमङ्गलं, स्वस्त्ययनं तच्चरणारविन्दं नमस्कारं करोमि, यो नभोवत् स्वमायाविस्तारं स्वयमपि न जानाति तर्ह्यपरे कुतो जानीयुः ।।३४।।यस्य परमार्थं स्वरूपम् अहं यूयं सनकादयोः रुद्रो न वेत्ति तर्हि अन्ये तन्मायामोहितधियः कुतो जानीयुः।।३५।। यस्यावतारचरितानि अस्मदादयो ये गायन्ति तेऽपि यं भगवन्तं याथार्थ्येन न जानन्ति तस्मै भगवते नमः।।३६ ।।अजः कर्माधीनशरीररहितः स सर्वान्तरात्मा प्रतिकल्पं सर्वाधारभूते स्वात्मनि एव स्वस्वरूपेण उपादानभूतं स्वात्मानं सृजति संहरति

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम्। सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम्
।।३८।। ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः। यदा तदेवासत्तर्कैस्तिरोधीयेत
विप्लुतम्।।३९।। आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च। द्रव्यं
विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः।।४०।। अहं भवो
यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च। स्वर्लोकपालाः खगलोकपाला नृलोकपाला-
स्तललोकपालाः।।४१।। गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः। ये वा
ऋषीणामृषभाः पितृणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः। अन्ये च ये प्रेतपिशाचभूतकूष्माण्ड-
यादोमृगपश्वधीशाः।।४२।। यत्किं च लोके भगवन्महस्वदोजःसहस्वद्बलवत् क्षमावत्।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवतः स्वरूपम्।।४३।। प्राधान्यतो यानृष
आमनन्ति लीलावतारान् पुरुषस्य भूम्नः। आपीयतां कर्णकषायशोषाननुक्रमिष्ये त
इमान् सुपेशान्।।४४।। ❀ *इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे षष्ठोऽध्यायः ।।६।।* ❀

।। सङ्ग्रहोक्तिः ।।

रक्षति च।।३७।। हे नारद! यदा मुनय प्रशान्तदेहेन्द्रियमनसो भवन्ति तदा विशुद्धं केवलं ज्ञानमर्थान्तरानपेक्षितस्थितं सत्यं पूर्णं सत्त्वादिगुणरहितमनाद्यन्तं नित्यं परमात्मस्वरूपं जानन्ति। कुतर्कैस्तु तदेव स्वरूपं विप्लुतम् = अज्ञातवदेव स्यात्।।३८-३९।। विराट् पुरुषः भगवत आद्योऽवतारः कथितः अथाऽस्य विभूतीराह - कालः स्वभावः प्रकृतिरिति त्रयः शक्तयो महत्तत्त्वं, पञ्चभूतानि अहङ्कारः, सत्त्वादिगुणाः, इन्द्रियाणि, विराड् जीवः, स्थावरं जङ्गममित्यादीनि कार्याणि च सन्ति।।४०।। अहं भवो विष्णुः, यज्ञः, दक्षादयः, भवदादयः स्वर्लोक-खगलोक-नृलोक-तललोकानां पतयः, गन्धर्व-विद्याधर-चारण-यक्ष-सर्प-नागानां पतयः, अन्ये च प्रेत-पिशाच-भूत-कुष्माण्ड-जलजन्तु-मृग-पक्षिणामीशाः, ये वसिष्ठादय ऋषिश्रेष्ठाः, पितरः, दैत्येन्द्र-सिद्धेश्वर-दानवेन्द्राः।।४१-४२।। किं च लोके यद् भगवदैश्वर्ययुक्तं महस्वत्-ओजस्वत्-सहस्वत्-बलवत्-क्षमावत्-श्री-ह्री-विभूत्यात्मवत् अद्भुतशब्दवाच्यम् वर्तते तत्सर्वं भगवद्विभूतिरूपमस्ति।।४३।। हे नारद! कर्णकषायशोषकान् सुन्दरान् परमपुरुषस्य भगवतो यान् लीलाऽवतारान् मुनयः कथयन्तिताननुक्रमेण तेऽहं कथयिष्येऽतो भवान् शृणोतु।।४४।। ❀ *इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः ।।६।।* ❀

अथ सप्तमोऽध्यायः ।।७।।

ब्रह्मोवाच – यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनन्तः। अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार।।१।। जातो रुचेरजनयत्सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम्। लोकत्रयस्य महतीमहरद्यदार्त्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः।।२।। जज्ञे च कर्द्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे। ऊचे ययात्मशमलं गुणसङ्ग-पङ्कमस्मिन्विधूय कपिलस्य गतिं प्रपेदे।।३।। अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान् स दत्तः। यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धि-मापुरुभयीं यदुहैहयाद्याः।।४।। तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात् सुतपसः स चतुःसनोऽभूत्। प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ।।५।।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तमोऽध्यायः ।।७।।

तत्कर्मार्थगुणैः सह भगवल्लीलावताराणां वर्णनम्

ब्रह्मोवाच – यदाऽनन्तो सर्वयज्ञरूपो भगवान् क्षितितलोद्धरणाय वराहरूपं दधार, तदा समुद्रस्थितं हिरण्याक्षमादिदैत्यं इन्द्रो गिरिमिव सदंष्ट्रया युद्धे विदारितवान्।।१।। स एव भगवान् रुचिप्रजापतेः पत्न्यामाकूत्यां सुयज्ञनाम्नाऽवतीर्णः सन् दक्षिणाभिधायां स्वपत्न्यां सुयमान् नाम देवान् जनयामास, स एवेन्द्रो भूत्वा यदा त्रिलोक्याः पीडां हृतवांस्तदा स्वायम्भुवमनुस्तस्य हरिरिति नाम चकार।।२।। हे द्विज! स विष्णुः कर्दमगृहे देवहूत्यां नवभिर्भगिनीभिः सह जज्ञे, स्वजनन्यै ब्रह्मविद्याया उपदेशं चकार, यया सा कपिलप्रोक्तमोक्षगतिं लेभे।।३।। पुत्रार्थिनोऽत्रेरुपरि प्रसन्नः सन् मयाऽहमेव तुभ्यं दत्त इति यस्मात् भगवान् प्राह, ततः स "दत्त" इति नाम्नाऽवततार, यत्पाद-पङ्कजपरागपवित्रदेहाः यदुसहस्रार्जुनाद्या मुक्तिरूपां योगसिद्धिं प्रापुः।।४।। पुरा मया जगत् सिसृक्षया तपस्तप्तं, तस्य भगवदर्पणात् भगवान् सनकादिरूपेणावतीर्णः, पूर्वकल्पस्य नाशे सति विस्मृतमात्मतत्त्वमस्मिन् कल्पे यो पुनर्मां प्रोवाच।।५।।

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः। दृष्ट्वाऽऽत्मनो भगवतोऽनियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः।।६।। कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमपि ते न दहन्त्यसह्यम्। सोऽयं यदन्तरमलं निविशन्बिभेति कामः कथं नु पुनरस्य मनः श्रयेत।।७।। विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि। तस्मा अदाद् ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात्।।८।। यो वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तम्। त्रात्वाऽर्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन।।९।। नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्याम्। यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः।।१०।। सत्रे ममास भगवान् हयशीर्ष एष साक्षात्स यज्ञपुरुषस्तपनीयवर्णः। छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः।।११।।

।। सङ्ग्रहोक्तिः।।

यो भगवान् धर्मस्य पत्न्यां मूर्तौ "नरनारायणौ" इति मूर्तिद्वयेनावतीर्णः, इन्द्रप्रेषिताः मन्मथसेनारूपा रम्भाद्या यस्य तपसि विघ्नं कर्तुं न शेकुः।।६।। कामविजयिनः शिवाद्या असह्यं दहन्तं क्रोधं न दहन्ति, अयं क्रोधः यस्य भगवतो हृदये प्रवेष्टुं न शशाक, एवं विधस्य हरेर्मनसि कामः कथं प्रविशेत्।।७।। पितुरुत्तानपदः समीपे मातुः सपत्न्या सुरुच्या वाग्बाणविद्धो ध्रुवो बालोऽपि वनं जगाम, ततः प्रसन्नो भगवांस्तस्मै ध्रुवपदं ददौ, यद् ध्रुवपदं उपर्यधस्तात् स्थिताः सप्तर्षिप्रभृतयः स्तुवन्ति।।८।।यः पृथुः ऋषिभिः प्रार्थितः सन् कुमार्गगामिनं द्विजवाग्वज्रदग्धं निरयगामिनं स्वतातं नरकपतनात् संरक्ष्य "पुत्र" इति नाम सार्थकं चकार, येन पृथुना सकलानि वस्तूनि भूमेर्दुग्धानि।।९।। असौ भगवान् नाभिनृपात् मेरुदेव्यां महिष्यामृषभनाम्नाऽवतीर्य जडयोगाचरणं कृतवान्, यदाचरणमृषयः पारमहंस्यं पदं ब्रुवन्ति।।१०।। हिरण्यवर्णश्छन्दोमयो मखमयोऽखिलदेवतात्मा यो भगवान् मम विधेर्मखे हयग्रीवरूपेणावततार, तस्य नासाविवरान्निःश्वासेन सह वेदा निःसृताः।।११।।

मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः। विस्रंसिता-
नुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान्।।१२।। क्षीरोदधावमर-
दानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः। पृष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्त्तकषाणकण्डूः।।१३।। त्रैविष्टपोरुभयहारि नृसिंहरूपं कृत्वा
भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम्। दैत्येन्द्रमाशु गदया निपतन्तमारादूरौ निपात्य
विददार नखैः स्फुरन्तम्।।१४।। अन्तः सरस्यरुबलेन पदे गृहीतो ग्राहेण यूथपति-
रम्बुजहस्त आर्त्तः। आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमङ्गल-
नामधेय।।१५।। श्रुत्वाहरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः।
चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार।।१६।।
ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याञ्चामृते पथि चरन् प्रभुभिर्न चाल्यः।।१७।।
नार्थो बलेरयमुरुक्रमपादशौचमापः शिखां धृतवतो विबुधाधिपत्यम्। यो वै प्रतिश्रुतमृते
न चिकीर्षदन्यदात्मानमङ्ग शिरसा हरयेऽभिमेने।।१८।।

।। सङ्ग्रहोक्तिः।।

प्रलयकाले भाविना वैवस्वता मनुना स मत्स्यरूपेणाऽतीर्णो दृष्टः, स मत्स्यरूपो हरिरुरुभये सलिले मे मुखात् गलितान् वेदान् गृहीत्वा प्रलयजले सहर्षं विहृतवान्।।१२।। अमृतलब्धये क्षीरोदधिं मथ्नताम् अमरदानवयूथपानामग्रे यः कच्छपरूपेणावतीर्णः सन् स्वपृष्ठे मन्दराचलं दधार।।१३।।सुविपुलभयहारि, भ्रमद्भ्रुकुटिदंष्ट्राकरालमुखं नृसिंहरूपं धृत्वा गदया सम्मुखमाशु निपतन्तं दैत्येन्द्रं हिरण्यकशिपुं स्वोर्वोर्निपात्य यो नखैर्ददार।।१४।। सरोमध्ये ग्राहेणगृहीत-चरणं गजेन्द्रं "हे आदिपुरुष! हे लोकरक्षक! मां पाहि" इति दुःखेन ब्रुवन्तं वीक्ष्य, तद्रक्षणार्थं हरिरागत्य चक्रेण ग्राहमुत्पाट्य गजं शुण्डायां गृहीत्वोद्धृतवान्।।१५-१६।। आदित्यानां मध्ये कनिष्ठः सन्नपि वामनरूपेणावतीर्णो भगवान् गुणैर्ज्येष्ठो भवति यतः स एताँल्लोकान् पदक्रमै-र्विचक्रमे, स बलेर्महीं पदत्रययाच्ञाछलेन गृहीतवान्, हि धर्ममार्गे वर्तमानो जनः प्रभुभिरपि याच्ञां विना विचाल्यो न भवति।।१७।। यो बलिः शुक्राचार्येण निषिद्ध्यमानोऽपि दानप्रतिज्ञां

तुभ्यं च नारद भृशं भगवान् विवृद्धभावेन साधु परिपृष्ट उवाच योगम्। ज्ञानं च भागवतमात्मसुतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव॥१९॥ चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति। दृप्तेषु राजसु दमं व्यदधात् स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः॥२०॥ धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति। यज्ञे च भागममृतायुरवाप रुद्धमायुश्च वेदमनुशास्त्यवतीर्य लोके॥२१॥ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झित-पथं नरकार्तिलिप्सु। उद्धन्त्यसाववनिकण्टकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन॥२२॥ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे। तिष्ठन् वनं सदयितानुज आविवेश यस्मिन् विरुध्य दशकन्धर आर्तिमार्च्छत्॥२३॥ यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद् दिधक्षोः। दूरे सुहृन्मथित-रोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः॥२४॥ वक्षःस्थलस्पर्शरुग्णमहेन्द्र-वाहदन्तैर्विडम्बितककुब्जय रूढहासम्।

॥ सङ्ग्रहोक्तिः॥

पूरितवान् तथा हरये भूमिदानप्रतिनिधिरूपेण स्वशरीरमपि दत्तवान्॥१८॥ हे नारद हंसरूपेणाऽवतीर्णो भगवांस्त्वद्भक्तितः प्रसन्नः सन्नात्मतत्त्वप्रकाशकं ज्ञानसाधनं भक्तियोगं तुभ्यमुवाच॥१९॥ मन्वन्तरेषु मनुरूपेणावतीर्णो भगवान् दशसु दिक्ष्वप्रतिहतं स्वतेजो धारयति दिवि चरितैः कमनीयां कीर्त्तिं प्रथयन् गर्वितेषु दण्डं व्यदधात्॥२०॥ स भगवान् लोके धन्वन्तरिरूपेणाऽवतीर्णः सन् नृणां रोगान् स्वनाम्नैव नाशयति, यागे भागं प्राप्नोति आयुर्वेदशास्त्रं प्रचारयति च॥२१॥ स भगवान् परशुरामरूपेणावतीर्य भूमेर्भाररूपं क्षत्रियकुलं दीर्घतीक्ष्णधारावता परशुनैकविंशति वारमुत्पाटयति स्म॥२२॥ अस्मदुपरि प्रसादसुमुखः स भगवान् रामरूपेण इक्ष्वाकुकुलेऽवतीर्य पितुर्दशरथस्याज्ञां पालयन् सीतालक्ष्मणाभ्यां सह वनवासं विधाय विरोधिनं दशकन्धरं रावणं जघान॥२३॥ किं च यस्य रोषपूर्णदृशा समुद्रस्था जीवा मत्स्यादयः संतप्ता अभूवन् समुद्रोऽपि भीतः सन् यस्मै मार्गं दास्यति॥२४॥ ततः स रामो निजभार्याहर्तू रावणस्य गर्वं प्राणैः सार्धं हरिष्यति॥२५॥

सद्योऽसुभिः सह विनेष्यति दारहर्त्तुर्विस्फूर्ज्जितैर्धनुष उच्चरतोऽधिसैन्ये।।२५।। भूमेः सुरेतरवरूथविमर्द्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः। जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि।।२६।। तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः। यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम्।।२७।। यद्वै व्रजे व्रजपशून् विषतोयपीतान् पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या। तच्छुद्धयेऽतिविषवीर्यविलोल-जिह्वमुच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम्।।२८।। तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने। उन्नेष्यति व्रजमतोऽवसितान्तकालं नेत्रे पिधाय्य सबलोऽनधिगम्यवीर्यः।।२९।। गृह्णीत यद् यदुपबन्धममुष्य माता शुल्बं सुतस्य न तु तत् तदमुष्य माति। यज्जृम्भतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽऽसीत्।।३०।। नन्दं च मोक्ष्यति भयाद् वरुणस्य पाशाद् गोपान् बिलेषु पिहितान् मयसूनुना च। अन्ह्यापृतं निशि शयानमतिश्रमेण लोके विकुण्ठ उपनेष्यति गोकुलं स्म।।३१।। गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽतिवर्षति पशून् कृपया रिरक्षुः।

।। सङ्ग्रहोक्तिः ।।

स भगवान् कृष्णरूपेणावतीर्य दैत्यांशभूतनृपसैन्यभारेण पीडिताया पृथ्व्या दुःखनाशाय दिव्यानि चरित्राणि करिष्यति, यतः स साक्षादीश्वरः।।२६।। अन्यथा शिशुः सन्नपि पूतनायाः प्राणहरणं, चरणेन शकटासुरनिपातनं, जानुभ्यां चलन्नर्जुनवृक्षयोरुन्मूलनं च स कथं कुर्यात्।।२७।। किं च विषमयजलपानात् मृतान् पशून् गोपालांश्च दयादृष्ट्या पुनरुज्जीवितान् करिष्यति।।२८।। निशि यमुनातटे शयानं दावानलेन परिदह्यमानं व्रजजनमग्निं पीत्वा उद्धरिष्यति।।२९।। अस्य बन्धनार्थं यशोदया या या रज्जुर्गृहीता सा सा पर्याप्ता न स्यात्, अथ सा यशोदा जृम्भमाणस्यास्य मुखे विश्वदर्शने शङ्कितहृदया स्यात्, तदाऽनेन निजैश्वर्यं प्रदर्श्य बोधिता भविष्यति।।३०।। ततोऽसौ नन्दं वरुणस्य पाशात् मोक्ष्यति, व्योमासुरेण बिलेऽवरुद्धान् गोपालान् मोचयिष्यति, शयानं गोकुलं वैकुण्ठलोकं प्रापयिष्यति।।३१।। स्वयज्ञस्य परित्यागेन

धर्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम्॥३२॥
क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन। उद्दीपित-
स्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य॥३३॥ ये च प्रलम्बखर-
दर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः। अन्ये च शाल्वकपिबल्वल-
दन्तवक्त्रसप्तोक्षशम्बरविदूरथरुक्मिमुख्याः॥३४॥ ये वा मृधे समितिशालिन
आत्तचापाः काम्बोजमत्स्यकुरुकैकयसृञ्जयाद्याः। यास्यन्त्यदर्शनमलं बलभीमपार्थ-
व्याजाह्वयेन हरिणा निलयं तदीयम्॥३५॥ कालेन मीलितधियामवमृश्य नृणां
स्तोकायुषां स्वनिगमो बत दूरपारः। आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं
विटपशो विभजिष्यति स्म॥३६॥ देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन
विहिताभिरदृश्यतूर्भिः। लोकान् घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत
औपधर्म्यम्॥३७॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखण्डिनो द्विजजना
वृषला नृदेवाः। स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान्
युगान्ते॥३८॥

॥ सङ्ग्रहोक्तिः॥

क्रुद्ध इन्द्रे व्रजनाशाय वर्षति सति तद्रक्षार्थं सप्तवार्षिकोऽप्ययं सप्तदिनपर्यन्तं करेणैकेनैव गोवर्धनगिरिं धारयिष्यति॥३२॥ रासक्रीडार्थमुद्यतः सन् रात्रौ वने विहरन् गोपीनां हरणकारिणः शंखचूडस्य शिरश्छेत्स्यति॥३३॥ किंच प्रलम्ब-धेनुक-केशि-अरिष्ट-मल्ल-कुवलयापीडगज-कंस-कालयवन-भौमासुर-पौण्ड्रक-शाल्व-द्विविद-बल्वल-दन्तवक्त्र-सप्तवृष-शम्बर-विदूरथ-रुक्मिमुख्यान्॥३४॥ तथा कम्बोज-मत्स्य-कुरु-प्रभृतिवंश्यान् नृपादीन् युद्धे बलरामभीमार्जुनरूपी कृष्ण एव तत्तद्भावानुरूपं स्थानं प्रापयिष्यति॥३४-३५॥ स एव भगवान् पराशरात् सत्यवत्यां व्यासरूपेणावतीर्य वेदवृक्षं शाखाभेदेन विभागयुक्तं करिष्यति॥३६॥ ततः स ईश्वरो मयासुरनिर्मितनगरीत्रयेण लोकान् नाशयतां दैत्यानां मोहाय बुद्धरूपेणावतीर्य पाखण्डमयं बौद्धधर्ममुपदेक्ष्यति॥३७॥ यदा सतपुरुषाणां गृहेष्वपि हरेः कथा न स्युः, त्रैवर्णिका यदा पाखण्डिनः स्युः, शूद्रा राजानः स्युः "स्वाहा स्वधा वषड्" इति प्रकारा -

सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः। अन्ते त्वधर्महर-
मन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः।।३९।। विष्णोर्नु वीर्यगणनां
कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि। चस्कम्भ यः स्वरंहसाऽस्खलता
त्रिपृष्ठं यस्मात् त्रिसाम्यसदनादुरु कम्पयानम्।।४०।। नान्तं विदाम्यहममी मुनयोऽ-
ग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये। गायन् गुणान् दशशताननन आदिदेवः
शेषोऽधुनापि समवस्यति नास्य पारम्।।४१।। येषां स एव भगवान् दययेदनन्तः
सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम्। ते दुस्तरामतितरन्ति च देवमायां नैषां
ममाहमिति धीः श्वशृगालभक्ष्ये।।४२।। वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च
भगवानथ दैत्यवर्यः। पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हि ऋभुरङ्ग
उत ध्रुवश्च।।४३।। इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः।
मान्धात्रलर्कशतधन्वनुरन्तिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः।।४४।।

।। सङ्ग्रहोक्तिः।।

वाचो यदा न स्युः तदा युगान्ते कलेः शास्ता भगवान् कल्किरूपेणावतरिष्यति।।३८।। तपो ब्रह्मा मरीच्यादयो नव प्रजापतयः, एते सर्वे जगत्सर्गनिमित्ते पुरुशक्तिभाजो भगवद्विभूतयः सन्ति, धर्मः, यज्ञाः, मनवः, इन्द्राः, प्रियव्रतादयो नृपाः, एते सर्वे जगतः स्थितौ भगवद्विभूतयः सन्ति. अधर्मः, रुद्रः, क्रोधवशासुरादयः, एते सर्वे जगतः प्रलये पुरुशक्तिभाजो विभूतयः सन्ति।।३९।। हे नारद! कदाचिन्नरः पृथिव्या रजःकणान् गणयितुं शक्नुयात्, किन्तु हरेः पराक्रमान् गणयितुं कदापि समर्थो न स्यात्।।४०।। यस्यान्तमहं न जानामि, मुनयोऽपि न जानन्ति, शेषः सहस्रवदनैरपि यस्य गुणानुवर्णनं कुर्वन्नद्यावधि पारं न प्राप्तः।।४१।। येषां भक्तानां श्वशृगालभक्ष्ये कलेवरे "मम अहम्" इति बुद्धिर्न स्यात् तेषामुपरि भगवतः कृपा स्यात्, एवं च हरेः कृपापात्रभूतास्ते एव देवमायां तरेयुः।।४२।। किंच अहं ब्रह्मा, शङ्करः, प्रह्लाद-स्वायम्भुवमनु-शतरूपा-प्रियव्रत-उत्तानपाद-आकूति-देवहूति प्रभृतयः, प्राचीनबर्हिः, ऋभुः, अङ्गः,ध्रुवः।।४३।। इक्ष्वाकुः, पुरूरवा, मुचुकुन्दः, जनकः, गाधि-रघु-अम्बरीष-सगर-गय-ययातयः, मान्धाता, अलर्कः, शतधन्वा, रन्तिदेवः, भीष्मः बलिः, अमूर्तरयः,

सौभर्युतङ्कशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः। येऽन्ये विभीषण-हनूमदुपेन्द्रदत्ताः पार्थार्ष्टिषेणविदुरश्रुतदेववर्याः।।४५।। ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः। यद्यद्भुतक्रमपरायणशीलशिक्षास्ति-र्यग्जना अपि किमु शुभधारणा ये।।४६।। शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम्। शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना।।४७।। तद् वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद् विदुरजस्रसुखं विशोकम्। सध्र्यङ् नियम्य यतयो यदकर्त्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः।।४८।। स श्रेयसामपि विभुर्भगवान् यतोऽस्य भावस्वभाव-विहितस्य सतः प्रसिद्धिः। देहे स्वधातुविगमेऽनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्य्यतेऽजः।।४९।। सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः। समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत्।।५०।। इदं भागवतं नाम यन्मे भगवतोदितम्। संग्रहोऽयं विभूतीनां त्वमेतद् विपुलीकुरु।।५१।।

।। सङ्ग्रहोक्तिः।।

दिलीपः।।४४।। सौभरिः, उत्तङ्कः, शिबिः, देवलः, पिप्पलादः, सारस्वतः, उद्धवः, पराशरः, भूरिषेणः, विभीषणः, हनुमान्, शुकः, अर्जुनः, आर्ष्टिषेणः, विदुरः, श्रुतदेवः।।४५।।एते सर्वे परमात्मानं जानन्ति, देवमायामतितरन्ति च, भगवद्भक्तप्रसङ्गेन स्त्रीशूद्रहूणशबराः तिर्यग्जना अपि भगवद्भक्ताः सन्तो हरेर्मायां तरन्ति।।४६।। भगवतः स्वरूपमाह - शश्वत् प्रशान्तं भयरहितं शुद्धं सदसत्परं यत् परमात्मनः स्वरूपं तस्य सम्मुखं मायाऽपि विलज्जमाना सत्यपसर्पति, वेदपूर्वभागरूपः शब्दोऽपि तस्य साक्षात्बोधको नास्ति।।४७।।।एवंभूतं नित्यसुख-स्वरूपं विशोकं यद् "ब्रह्म" इति मुनयो विदन्ति, तत् परमात्मनः स्वरूपमस्ति।।४८।।स एव शुभाशुभकर्मणां फलप्रदाता विभुश्चास्ति, यस्माच्च कृतानां शमदमादिशुभकर्मणां सिद्धिर्भवति।।४९।।हे नारद! स पूर्वप्रतिपादिताकारो विश्वैककारणभूतः भगवान् ज्ञानशक्तिबलादिसम्पन्नः श्रीवासुदेवः समासेन मया तुभ्यमभिहितोऽस्ति।।५०।। भगवता प्रोक्तमिदं भगवतोऽवतार-विभूतीनां भागवतं मया संक्षेपेण तुभ्यं कथितं, तदेव त्वं सविस्तरं सर्वथा वर्णय।।५१।।

यथा हरौ भगवति नृणां भक्तिर्भविष्यति। सर्वात्मन्यखिलाधारे इति सङ्कल्प्य वर्णय।।५२।। नृजन्मनि न तुष्येत कृतेन भगवान् यदि। धर्मार्थकामैः किं तर्हि कार्यं सिद्ध्यति नश्वरैः।।५३।। *कृष्णे न चोत्तमश्लोके चेद्भक्तिरनपायिनी। किं स्याद्वर्णाश्रमाचारदानहोमादिभिः कृतैः।।५४।।* मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदितुः। श्रृण्वतः श्रद्धया नित्यं माययाऽऽत्मा न मुह्यति।।५५।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे सप्तमोऽध्यायः ।।७।।

अथाष्टमोऽध्यायः ।।८।।

राजोवाच - ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च। यस्मै यस्मै यथा प्राह नारदो देवदर्शनः।।१।। एतद्वेदितुमिच्छामि तत्त्वं वेदविदांवर। हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः।।२।।

।। सङ्ग्रहोक्तिः।।

मनुष्याणां भगवत्स्वरूपे यथा भक्तिः स्यात् तथा त्वं तद्वर्णनं कुरु।।५२।।इह मनुष्यजन्मनि कृतेन त्रिवर्गसाधककर्मणा यदि भगवान् न प्रसीदति तर्हि नश्वरैर्धमार्थकामैः किम् सिद्ध्यति? ।।५३।। श्रीकृष्णपरमात्मस्वरूपेऽव्यभिचारिणी भक्तिर्यदि न स्यात् तर्हि वर्णाश्रमाचारदानहोमादिभिः कृतैः किं फलम्?।।५४।। परमेश्वरस्य जगत्सृष्ट्यादिप्रकाररूपां मायां वर्णयतोऽनुमानं कुर्वतः श्रद्धया नित्यं श्रृण्वतश्च मनो मायया न मुह्यति।।५५।।

इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां सप्तमोऽध्यायः ।।७।।

अथाष्टमोऽध्यायः ।।८।।

ईशजीवयोर्देहसम्बन्धविषयः प्रश्नोऽन्ये च प्रश्नाः

राजोवाच - हे ब्रह्मन्! परमात्मस्वरूपस्याखण्डदर्शी नारदः प्राकृतगुणरहितस्य हरेर्दिव्यगुणसंकथने ब्रह्मणा प्रेरितः सन् यं यं प्रति येन येन प्रकारेणोक्तवान् तदहं वेदितुमिच्छामि, अद्भुतवीर्यस्य हरेः कथा लोकमङ्गलकारिणी भवति।।२।।

कथयस्व महाभाग यथाऽहमखिलात्मनि। कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम्।।३।। शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम्। कालेन नातिदीर्घेण भगवान् विशते हृदि।।४।। प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्। धुनोति शमलं कृष्णः सलिलस्य यथा शरत्।।५।। धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति। मुक्तसर्वपरिक्लेशः पान्थः स्वशरणं यथा।।६।। यदधातुमतो ब्रह्मन् देहारम्भोऽस्य धातुभिः। यदृच्छया हेतुना वा भवन्तो जानते यथा।।७।। आसीद् यदुदरात् पद्मं लोकसंस्थानलक्षणम्। यावानयं वै पुरुष इयत्तावयवैः पृथक्। तावानसाविति प्रोक्तः संस्थावयववानिव।।८।। अजः सृजति भूतानि भूतात्मा यदनुग्रहात्। ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः।।९।। स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः। मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुणाश्रयः।।१०।। पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः। लोकैरमुष्यावयवाः सपालैरिति शुश्रुमः।।११।। यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते।

।। सङ्ग्रहोक्तिः ।।

हे महाभाग! मह्यं तत्कथां ब्रूहि येनाऽहं सर्वान्तर्यामिणः कृष्णस्य स्वरूपे विशुद्धं मनः संस्थाप्य देहं त्यक्ष्यामि।।३।। श्रद्धया स्वलीलाकथां सदा शृण्वतां कथयतां च हृदि श्रवणमार्गेण शीघ्रं प्रविश्य कृष्णः पापं नाशयति यथा शरदृतुर्जलस्य मलिनतां नाशयति।।४-५।। निष्पापो भगवद्भक्तो मुक्तसर्वपरिक्लेशः सन् यथा प्रवासी विश्रमः सन् स्वगृहं न परित्यजति तद्वत् श्रीकृष्णपादमूलं स्वशरणं न मुञ्चति।।६।। हे ब्रह्मन्! वस्तुतो महाभूतसम्बन्धरहितस्याऽस्य जीवस्य भौतिकशरीरारम्भो भवति तत् किं कर्मादिना केनापि कारणेन भवति? किं वा कारणं विनैव।।७।। जगदाकारं पद्मं यस्योदरस्थनाभितो बभूव, असौ वैराजपुरुषः ईश्वरोऽपि जीववत्परिच्छिन्नावयवः कथितोऽस्ति।।८।। वैराजनाभिकमलसंभूतश्चतुर्मुखो विधि र्यदनुग्रहाद् भूतानि सृजति।।९।। विश्वस्योद्भवस्थितिलया यस्माद् भवन्ति स मायेशः पुरुषः स्वमायां मुक्त्वा पूर्णषाड्गुण्यः सन् यस्मिन् देशे वसति तं देशं कथय।।१०।। इमे लोका विराट्पुरुषस्याऽङ्गैः कल्पिता इति वयमशृण्म, पुनश्च लोकैः पुरुषस्याऽङ्गानि च श्रुतान्यस्माभिः, तद् द्वयं

भूतभव्यभवच्छब्द आयुर्मानं च यत् सतः।।१२।। कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि। यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम।।१३।। यस्मिन् कर्मसमावायो यथा येनोपगृह्यते। गुणानां गुणिनां चैव परिणामं सविस्तरम्।।१४।। भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम्। सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम्।।१५।। प्रमाणमण्डकोशस्य बाह्याभ्यन्तरवस्तुनः। महतां चानुचरितं वर्णाश्रमविनिश्चयः।।१६।। युगानि युगमानं च धर्मो यश्च युगे युगे। अवतारानुचरितं यदाश्चर्यतमं हरेः।।१७।। नृणां साधारणो धर्मः सविशेषश्च यादृशः। श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीविनाम्।।१८।। तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम्। पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च।।१९।। योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गश्च योगिनाम्। वेदोपवेदधर्माणामितिहासपुराणयोः।।२०।। सम्प्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः। इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः।।२१।। यश्चानुशायिनां सर्गः पाखण्डस्य च सम्भवः। आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः।।२२।।

।। सङ्ग्रहोक्तिः।।

कथं सम्भवति।।११।। महाकल्पस्याऽवान्तरकल्पस्य च कियत् परिमाणम्, भूतभविष्यद्वर्तमानशब्दवाच्यस्य कालस्य मानम्, देवादीनामायुर्मानम्।।१२।। कालस्य निमेषादिसूक्ष्मरूपा संवत्सरादिस्थूलरूपा च प्रवृत्तिः यावत्यो यत्प्रकाराश्च कर्मगतयः।।१३।। यस्मिन् देशे कर्मफलनिष्पत्तिः स देशः, सत्त्वादिगुणानां गुणिनां च परिणामं सविस्तरमुच्यताम्।।१४।। पृथ्वी-पाताल-दिङ्-नभो-ग्रह-नक्षत्र-गिरीणां नदी-नद-समुद्र-द्वीपानां चोत्पत्तिः।।१५।। ब्रह्माण्डस्य बाह्याभ्यन्तरवर्तिवस्तुनः प्रमाणम्, महतां चरितं, वर्णाश्रमाणां धर्माः।।१६।। हरेरवताराणां चरितानि, युगानां परिमाणं, युगे युगे धर्मश्च।।१७।। मनुष्याणां साधारणो धर्मः, तत्तद्व्यवहारोपजीविनां प्राणिनां धर्मः, राजर्षीणां धर्मश्च।।१८।। प्रकृत्यादिसर्वतत्त्वानां परिसंख्या, तेषां स्वरूपलक्षणादीनि, परमपुरुषाराधनप्रकारः ज्ञानयोगस्य प्रकारश्च।।१९।। योगेश्वराणामैश्वर्याणि, तेषां स्वरूपं, योगिनां सूक्ष्मशरीरपातश्च, वेद-उपवेद-धर्मशास्त्र-इतिहास-पुराणानां स्वरूपम्।।२०।। सर्वभूतानाम् उद्भव-स्थिरता-प्रलयाश्च, इष्टापूर्तकर्मणः, काम्यकर्मणः, धर्मार्थकामरूपत्रिवर्गस्य च विधिः ।।२१।।

यथाऽऽत्मतन्त्रो भगवान् विक्रीडत्यात्ममायया। विसृज्य वा यथा मायामुदास्ते
साक्षिवद् विभुः।।२३।।सर्वमेतच्च भगवन् पृच्छते मेऽनुपूर्वशः। तत्त्वतोऽर्हस्युदाहर्तुं
प्रपन्नाय महामुने।।२४।। अत्र प्रमाणं भगवान् परमेष्ठी यथाऽऽत्मभूः। परे
चेहानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम्।।२५।।न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी।
पिबतोऽच्युतपीयूषमन्यत्र कुपिताद् द्विजात्।।२६।। *सूत उवाच* – स उपामन्त्रितो
राज्ञा कथायामिति सत्पतेः। ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि।।२७।। प्राह
भागवतं नाम पुराणं ब्रह्मसम्मितम्। ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते।।२८।।
यद् यत् परीक्षिदृषभः पाण्डूनामनुपृच्छति आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे
।।२९।। *इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे प्रश्नवर्णनं नामाष्टमोऽध्यायः ।।८।।*

।। सङ्ग्रहोक्तिः ।।

परलोकभ्रष्टानां समुत्पत्तिप्रकारः, पाखण्डस्य संभवः, जीवस्य बन्धं मोक्षं स्वरूपतो व्यवस्थां
च।।२२।।स्वतन्त्रः सर्वान्तरात्मा श्रीहरिः स्वनियाम्यया प्रकृत्या यथा क्रीडति, प्रलये साक्षिवद्
उदासीनस्तिष्ठति च।।२३।।हे महामते! एतत् सर्वम् अपृष्टमपि पृच्छते प्रपन्नाय मे यथार्थतः
कथयितुं त्वमर्हसि।।२४।। अस्मिन् विषये परमेष्ठीवत् भवान् प्रमाणभूतोऽस्ति, पूर्वजैः
कृतमर्वाञ्चो जना इहलोक अनुतिष्ठन्ति, अत्र ब्रह्मनारदव्याससम्प्रदायोऽस्ति।।२५।।हे
ब्रह्मन्! हरिकथामृतपानं कुर्वतो मम प्राणा अनशनात् कुपितद्विजाद्वा व्याकुला न भवन्ति।।२६।।
सूत उवाच - संसदि विष्णुरातेन परीक्षिता भगवतः कथायां प्रवर्तितो ब्रह्मरातः शुकः सुतरां
प्रीतः सन्।।२७।। वेदतुल्यं, श्रीकृष्णस्वरूपज्ञानविषयकं, ब्राह्मे कल्पे विधये भगवता प्रोक्तं
श्रीमद्भागवतं नाम पुराणं प्राह।।२८।। पाण्डुकुलोत्पन्नानां मध्ये श्रेष्ठः परीक्षित् यद् यद्
अनुपृच्छति तत् सर्वं प्रश्नक्रमेणैव प्रतिवक्तुमुपचक्रमे।।२९।।

इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः ।।८।।

अथ नवमोऽध्यायः ।।९।।

श्रीशुक उवाच - आत्ममायामृते राजन् परस्यानुभवात्मनः। न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा।।१।। बहुरूप इवाभाति मायया बहुरूपया। रममाणो गुणेष्वस्या ममाहमिति मन्यते।।२।। यर्हि वाऽयं महिम्नि स्वे परस्मिन् कालमाययोः। रमेत गतसम्मोहस्त्यक्त्वोदास्ते तदोभयम्।।३।। आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम्। ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः।।४।। स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत। तां नाध्यगच्छद् दृशमत्र सम्मतां प्रपञ्चनिर्माण-विधिर्यया भवेत्।।५।। स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणोद् द्विर्गदितं वचो विभुः। स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद् धनं विदुः।।६।। निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः। स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः।।७।। दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः।

।। सङ्ग्रहोक्तिः ।।

अथ नवमोऽध्यायः ।।९।।

भगवता ब्रह्मणे चतुःश्लोकि भागवतं प्रोक्तम्

श्रीशुक उवाच - ज्ञानस्वरूपस्याऽचिद्विलक्षणस्य जीवस्य विषयसम्बन्धः परमात्मनियम्य प्रकृतिं विना तत्त्वतो न घटेत।।१।। विचित्रतया परिणामभाजा भगवतो मायात्मिकया शक्त्या जीवो बहुरूप इवाऽऽभाति, अस्या गुणेषु = शब्दादि विषयेषु रममाणः = भुञ्जानः सन्नेव "अहंममाकाराभ्यां" निबद्धो भवति।।२।। अयं जीवो यदा कालमायापरत्वरूपे महत्तत्त्वे वर्तेत तदा प्रकृतिकालवश्यत्वं त्यक्त्वा गतसंमोहः = निवृत्ताहंकारममकारः सन् विषयसंपादन-प्रवृत्तिशून्यो भवति।।३।। निर्दोषतपःप्रभृतिव्रतेनाऽऽराधितो भगवान् ब्रह्मणे द्विव्यां स्वमूर्तिं दर्शयन् तत्त्वविशुद्ध्यर्थं यद् सत्यमाह तत्कथयिष्यामि।।४।। सृष्ट्यारम्भे हरेर्नाभिकमलादुत्पन्नो ब्रह्मा कमले स्थितः सन् सृष्टिनिर्माणोपयोगिनीं बुद्धिं न प्राप्तवान्।।।५।। ततः स एकदा जले चिन्तयन् सन् तप इति द्व्यक्षरं वचो द्विवारं "तप तप" इति श्रुतवान्।।६।।

अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः।।८।। तस्मै स्वलोकं
भगवान् सभाजितः सन्दर्शयामास परं न यत्परम्। व्यपेतसंक्लेशविमोहसाध्वसं
स्वदृष्टवद्भिर्विबुधैरभिष्टुतम्।।९।। प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न
च कालविक्रमः। न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः।।१०।।
श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः। सर्वे चतुर्बाहव
उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः। प्रवालवैदूर्यमृणालवर्चसः परिस्फुर-
त्कुण्डलमौलिमालिनः।।११।। भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभि-
र्महात्मनाम्। विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः।।१२।।
श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः प्रेङ्खं श्रिता या
कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती।।१३।। ददर्श तत्राखिलसात्वतां पतिं
श्रियः पतिं यज्ञपतिं जगत्पतिम्। सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः
परिसेवितं विभुम्।।१४।। भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम्।
किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि लक्षितं श्रिया।।१५।।

।। सङ्ग्रहोक्तिः।।

ततस्तद्वक्तृदिदृक्षया दिशो व्यलोक्य गवेषयन् क्वापि वक्तारमप्राप्य निजहितं विचार्य तपस्तप्तुं संकल्पं कृतवान्।।७।। अथ स ब्रह्मा प्राणान् मनश्च नियम्याऽमोघसंकल्पः सन् दिव्यवर्ष-सहस्रपर्यन्तं तपस्तप्तवान्।।८।। अथ तपसा सम्यगाराधितो भगवान् तस्मै प्रसन्नः सन्नशेष-संक्लेशविमोहभयमुक्तं निजं वैकुण्ठं धाम दर्शयामास।।९।। यत्र वैकुण्ठे सत्त्वरजस्तमोगुणाः कालो मायादिका न सन्ति, किं पुनः कामक्रोधादयः? अपि च सर्वे पार्षदा हरितुल्याः श्यामाः पद्मनेत्राः पीताम्बराश्चतुर्भुजा रत्नाभूषणधराः किरीटकुण्डलिनश्च सन्ति।।१०-११।। यो वैकुण्ठलोको नित्यमुक्तानां भ्राजिष्णुभी रमणीयै र्विमानसमूहैः परितो विराजते, यश्च सविद्युन्मेघैर्नभ इव प्रमदोत्तमकान्तिभिः सुशोभमानो वर्तते।।१२।। यत्र च साक्षाल्लक्ष्मी-र्विराजमाना स्वयं हरेः पादपूजनं करोति।।१३।। तत्र वैकुण्ठे ब्रह्मा, भक्तानां, लक्ष्म्याः यज्ञानां जगतां चैकमात्रं पतिं सुनन्दादिभिः पार्षदैः सेव्यमानम्।।१४।।

अभ्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपञ्चशक्तिभिः। युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरम्।।१६।। तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः। ननाम पादाम्बुजमस्य विश्वसृग् यत् पारमहंस्येन पथाधिगम्यते ।।१७।। तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम्। बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन्।।१८।। *श्रीभगवानुवाच* - त्वयाहं तोषितः सध्र्यग्वेदगर्भ सिसृक्षया। चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ।।१९।। वरं वरय भद्रं ते वरेशं माभिवाञ्छितम्। ब्रह्मञ्छ्रेयः परिश्रामः पुंसो मद्दर्शनावधिः।।२०।। मनीषितानुभावोऽयं मम लोकावलोकनम्। यदुपश्रुत्य रहसि चकर्थ परमं तपः।।२१।। प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते। तपो मे हृदयं साक्षादात्माहं तपसोऽनघ।।२२।। सृजामि तपसैवेदं ग्रसामि तपसा पुनः। बिभर्मि तपसा विश्वं वीर्यं मे दुस्तरं तपः।।२३।। *ब्रह्मोवाच* - भगवन् सर्वभूतानामध्यक्षोऽवस्थितो गुहाम्। वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम्।।२४।।

।। सङ्ग्रहोक्तिः।।

भक्तप्रसादाभिमुखं प्रसन्नहासारुणलोचनम्, किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि श्रियाऽलङ्कृतम्।।१५।। सम्पूजनीयासनमास्थितं पञ्चविंशतितत्त्वाधिष्ठातृशक्तिभिर्वृतम् ऐश्वर्यादिषड्भगैर्युक्तं स्वे धाम्नि संक्रीडन्तं भगवन्तं दृष्टवान्।।१६।।तद्दर्शनेन हर्षोत्फुल्ललोचनः प्रेमाश्रूणि स्रवयन् विधिस्तत्पादपङ्कजं प्रणनाम।।१७।। ततो प्रजासर्जनरूपे कर्मणि समुपस्थितं निजशासनयोग्यं विधिं स्वपाणिना तत्पाणिं स्पृशन् प्रीतमना भगवान् ईषत्स्मितप्रभया गिरा तं बभाषे।।१८।। *श्रीभगवानुवाच* - कुयोगिना तोषयितुमशक्योहं सिसृक्षया चिरं कृतेन तपसा त्वया तोषितोऽस्मि ।।१९।। हे ब्रह्मन्! ते भद्रमस्तु, वरेशं मामभीष्टं वरं वरय, पुंसां श्रेयःसाधनप्रयासो मद्दर्शनावधिर्भवति।।२०।।तव वैकुण्ठदर्शनं जातं मत्संकल्पेनैवेति जानीहि, रहसि "तप तप" इति मद्वचनमाकर्ण्य त्वं परमं तपश्चकर्थ।।२१।। त्वां सृष्टौ किंकर्त्तव्य विमूढं दृष्ट्वा मयैव तद्वचः श्रावितम्, किं च तपो मे साक्षाद्धृदयं, अहं च तपोरूप्यस्मि।।२२।। हे ब्रह्मन्! अहं तपसा जगतः सृष्टिं रक्षणं संहारं च करोमि, अतस्तप एव मे शक्तिरस्ति।।२३।।

तथापि नाथमानस्य नाथ नाथय नाथितम्। परावरे यथा रूपे जानीयां ते त्वरूपिणः
।।२५।। यथाऽऽत्ममायायोगेन नानाशक्त्युपबृंहितम्। विलुम्पन् विसृजन् गृह्णन्
बिभ्रदात्मानमात्मना।।२६।। क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते। तथा
तद्विषयां धेहि मनीषां मयि माधव।।२७।। भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः।
नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात्।।२८।। यावत् सखा सख्युरिवेश ते कृतः
प्रजाविसर्गे विभजामि भो जनम्। अविक्लवस्ते परिकर्मणि स्थितो मा मे
समुन्नद्धमदोऽजमानिनः।।२९।। *श्रीभगवानुवाच* - ज्ञानं परमगुह्यं मे यद् विज्ञान-
समन्वितम्। सरहस्यं तदङ्गं च गृहाण गदितं मया।।३०।। यावानहं यथाभावो
यद्रूपगुणकर्मकः। तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्।।३१।। *अहमेवासमेवाग्रे*
नान्यद् यत् सदसत् परम्। पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्।।३२।।

।। सङ्ग्रहोक्तिः ।।

ब्रह्मोवाच - हे भगवन्! सर्वेषां हृदयस्थितो भवान् सकलेन्द्रियवृत्तीनां साक्षाद् द्रष्टाऽसि
अतः स्वकीयस्वाभाविकज्ञानेन सर्वं जानासि।।२४।। अतः हे नाथ! याचमानस्य मम याचितं
प्रयच्छ, कर्माधीनप्राकृतरूपरहितस्य तव परं= दिव्यम् अवरं= चिदचिदात्मकं स्वरूपं च
यथाऽहं जानीयाम्।।२५।।हे सत्यसंकल्प! सर्वान्तरात्मा त्वं स्वकीयालौकिकाश्चर्यशक्तिसम्बन्धेन
नानाशक्तिभि र्वृद्धिं गतं विश्वं सिसृक्षमाणः पालयन् नाशयन्नूर्णनाभिवत् क्रीडां करोषि
अतस्तद्विषयिणीं बुद्धिं मयि धारय।।२६-२७।। अहं भवदाज्ञामनुसृत्य सर्वं सृष्टिकार्यं कुर्याम्
किन्तु प्रजासृष्टिं कुर्वतो मम तत्र बन्धनं न स्यात् तथाऽनुग्रहं कुरु।।२८।। हे भगवन्! त्वया
सख्युः सखा इव स्पर्शादिना संमानितोऽहं त्वत्सेवारूपे सृष्टिकर्मणि धीरः सन्नेव यावत्कालं
लोकं सृजामि तावत्कालपर्यंतं मम प्रभुत्वाहंकारो न भवेत्।।२९।। *श्रीभगवानुवाच* - विज्ञानेन
सहितं सरहस्यं परमगुह्यं यज्ज्ञानमहं गदामि तत् त्वं गृहाण।।३०।। ज्ञानगुणकोऽहं
यावान्= यत्परिमाणकः यथास्वभावः, यादृशरूपो यादृशगुणः यादृशकर्मा चास्मि, तथैव
मत्स्वरूपं गुणविभूतियाथात्म्यविज्ञानं मदनुग्रहात् तव भवतु।।३१।। *चतुष्लोकिभागवतम्*-
सदसत्परम् = चेतनाचेतनाभ्यां विलक्षणं यद् ब्रह्माख्यं वस्तु तदहमेवाऽऽसम्, अन्यत् न

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि। तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः।।३३।। यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु। प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्।।३४।। एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः। अन्वय-व्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा।।३५।। एतन्मतं समातिष्ठ परमेण समाधिना। भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्।।३६।। *श्रीशुक उवाच* - सम्प्रदिश्यैवमजनो जनानां परमेष्ठिनम्। पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः।।३७।।

।। सङ्ग्रहोक्तिः ।।

अग्रे = सृष्टेः प्राग् यद् वस्तु, पश्चात् = सृष्टिकाले जातस्त्वम् यदेतत् = सृष्टं कार्यजातम्, तदपि अहमस्मि, योऽवशिष्येत = संहारकाले न संह्रीयेत सोऽप्यहमेवास्मि।।३२।। प्रकृत्यनुसंधाने केवलं तस्यां प्रतीयमानायां सत्यां यद् अचिद्वस्तु, अर्थं = चित्तत्त्वं ऋते = विना प्रतीयेत सर्वकालं जडमेव, न स चैतन्यमिति ज्ञायते, आत्मस्वरूपानुसंधानवेलायां आत्मनि केवले चित्स्वरूपे प्रतीयमाने सति तु यच्चित्तत्त्वं तत्, यदचित्तत्त्वं तत् च प्रतीयेत, न तु केवले चित्तत्त्वम्, तत्र यच्चित्स्वरूपं वस्तु तत्तु सर्वकालचेतनातावद् एव, यद् अचित्स्वरूपं वस्तु तज्जडमेव, एवं सति तयोर्मध्ये यद् अचित् तत् आत्मनो मायां विद्यात् एवं चित् प्रकाशस्वरूपम्, अचित् अप्रकाशस्वरूपम् इति तयोर्लक्षणे कथिते, अथ चित् प्रकाशे चिदचितोः प्रकाशनं यदभिहितं, तच्च विरुद्धाकारवेदनतः ततस्तद्दृष्टान्तेन समर्थयते, "यथा भास यथा तमः" इति।।३३।। यथा महाभूतानि भौतिकेषूच्चावचेषु प्रविष्टानि सन्त्यप्यप्रविष्टान्येव, तद्गतविकारास्पृष्टत्वात् एवमहमपि तेषु चेतनाचेतनेष्वन्तर्यामितया प्रविष्टोऽप्यप्रविष्ट एव तद्गतदोषैरस्पृष्टत्वात्।।३४।। परमात्मनः तत्त्वजिज्ञासुना = स्वरूपं ज्ञातुमिच्छुना परस्परपृथग्-भूतस्वभावयोश्चिदचितोरन्तरात्मभूतं यद् भगवत्स्वरूपं तदेव जिज्ञास्यम्, यद् भगवत्स्वरूपं अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात् (अन्वयः = सद्भावः, स च चिदचिच्छरीरकस्य परमात्मन एव कार्यात्मना कारणात्मना च विद्यमानत्वम्, व्यतिरेकः = चिदचिच्छरीरकपरमात्म-व्यतिरिक्तवस्त्वन्तराभाववेदनम्, ताभ्याम् अन्वयव्यतिरेकाभ्याम्)।।३५।।

अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः। सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत्
।।३८।। प्रजापतिर्धर्मपतिरेकदा नियमान् यमान्। भद्रं प्रजानामन्विच्छन्नातिष्ठत्
स्वार्थकाम्यया।।३९।। तं नारदः प्रियतमो रिक्थादानामनुव्रतः। शुश्रूषमाणः शीलेन
प्रश्रयेण दमेन च।।४०।। मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः। महाभागवतो
राजन् पितरं पर्यतोषयत्।।४१।। तुष्टं निशाम्य पितरं लोकानां प्रपितामहम्।
देवर्षिः परिपप्रच्छ भवान् यन्मानुपृच्छति।।४२।। तस्मा इदं भागवतं पुराणं दश-
लक्षणम्। प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत्।।४३।। नारदः प्राह मुनये
सरस्वत्यास्तटे नृप। ध्यायते ब्रह्म परमं व्यासायामिततेजसे।।४४।। यदुताहं त्वया
पृष्टो वैराजात् पुरुषादिदम्। यथाऽऽसीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः।।४५।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे नवमोऽध्यायः ।।९।।

।। सङ्ग्रहोक्तिः ।।

हे ब्रह्मन्! एतन्मम मतमेकाग्रचित्तः संस्त्वं यथावत् पालय, तेन कल्पेषु याः सृष्टयस्तासु
कर्तृत्वाभिमानरूपं मोहं न प्राप्स्यसि।।३६।। *श्रीशुक उवाच*– भगवानेवं ब्रह्माणमुपदिश्य तस्य
पश्यतः सत आत्मनः स्वरूपं तिरोभावयाम्बभूव।।३७।। ततोऽन्तर्हितप्रत्यक्षस्वरूपाय हरये
प्रणम्य सर्वभूतमयश्चतुर्मुख इदं विश्वं पूर्ववत् ससर्ज।।३८।। प्रजापतिर्ब्रह्मा प्रजानां मङ्गलं
विमृशन्नेकदा यमान् नियमांश्चाऽनुष्ठितवान्।।३९।। तदा विनयावनतः पितरं शुश्रूषमाणः
नारदो विष्णोर्मायाम् = आश्चर्यस्वरूपां शक्तिं विविदिषन् सन् ब्रह्माणं शीलेन प्रश्रयेण दमेन च
पर्यतोषयत्।।४०-४१।। ततः स लोकानां पितामहं पितरं प्रसन्नं दृष्ट्वा भवता मह्यं यत्
पृष्टं तदेव पृष्टवान्।।४२।। ब्रह्माऽपि प्रसन्नः सन् तस्मै नारदायेदं दशलक्षणयुक्तं भागवतं
नाम पुराणं प्राह।।४३।। हे राजन्! नारदः सरस्वतीतटे परमं ब्रह्म ध्यायते व्यासाय तदेवाऽवोचत्
स यत् मह्यमकथयत्।।४४।। "वैराजात् पुरुषादिदं कथमुत्पन्नम्" इत्येवंविधस्ते प्रश्न-
स्तथाऽन्यानपि नानाविधान् ते प्रश्नान् वक्ष्यामि, त्वं शृणु।।४५।।

✿ इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः।।९।। ✿

अथ दशमोऽध्यायः ।।१०।।

श्रीशुक उवाच - अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः।।१।। दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्। वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा।।२।। भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः। ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः।।३।। स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः। मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः।।४।। अवतारानुचरितं हरेरस्यानुवर्तिनाम्। सतामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः।।५।। निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः। मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः।।६।। आभासश्च निरोधश्च यतश्चाध्यवसीयते स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते।।७।। योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः।

।। सङ्ग्रहोक्तिः।।

अथदशमोऽध्यायः ।। १०।।

पुराणलक्षणं महापुरुषसंस्थानुवर्णनं च

श्रीशुक उवाच - अस्मिन् भागवते पुराणे सर्गः, विसर्गः, स्थानं, पोषणं, ऊतयः, मन्वन्तरकथनं, ईश्वरचरितं, निरोधः, मुक्तिः, आश्रयश्च, दश विषयाः प्रतिपाद्याः सन्ति।।१।। अत्र दशमस्याऽऽश्रयस्य परब्रह्मणस्तत्वतो ज्ञानार्थमिह नावानां स्वरूपं ज्ञानिनो वर्णयन्ति।।२।। परब्रह्मण सकाशात् जातात् गुणवैषम्यात् पञ्चमहाभूतानां शब्दादिपञ्चतन्मात्राणां दशेन्द्रियाणां च यज्जन्म स सर्गः कथितः, चतुर्मखकर्तृको यो सर्गः स विसर्गः कथितः।।३।। श्रीहरेर्दुष्टनिग्रहादिषु विजयः स्थितिः = स्थानं कथितम्, श्रीहरेर्जगद्रक्षणरूपोऽनुग्रहः, स प्रसादः = पोषणं कथितम्, सतां मन्वन्तराधिपानां धर्मो मन्वन्तराणि, कर्मविषयिण्यो वासना ऊतयः कथिताः ।।४।। हरेरवतारचरितानां भगवदैकान्तिकभक्तानां नानाख्यानोपबृंहिताः कथाः, ईशानुकथाः प्रोक्ताः।।५।। जीवसमूहस्य स्वकर्मशक्तिभिः सह सूक्ष्मावस्थयाऽवस्थानं निरोध उच्यते, कर्माधीनं देवादिरूपं हित्वा प्रादुर्भूताऽपहतपाप्मत्वादिगुणाष्टकविशिष्टवेषेणाऽवस्थानं मुक्तिरुच्यते।।६।। जगत उत्पत्तिर्लयश्च यतः प्रमाणेन प्रतीयते स परंब्रह्म परमात्मा "आश्रयः" कथ्यते।।७।।

यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः।।८।। एकमेकतराभावे यदा नोपलभामहे। त्रितयं तत्र यो वेद स आत्मा त्वाश्रयाश्रयः।।९।। पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः। आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ।।१०।। तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान्। तेन नारायणो नाम यदापः पुरुषोद्भवाः।।११।। द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रतः सन्ति न सन्ति यदुपेक्षया।।१२।। एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः। वीर्यं हिरण्मयं देहं मायया व्यसृजत् त्रिधा।।१३।। अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः। यथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु।।१४।। अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः ओजः सहो बलं जज्ञे ततः प्राणो महानसुः।।१५।।

।। सङ्ग्रहोक्तिः ।।

आत्मनि जीवे नियन्तृतया वर्तमानो य आध्यात्मिकः परमपरुषः स एव आधिदैविकः आदित्यादिषु वर्तमानोऽस्ति, स एवाऽऽधिभौतिकः, अधिभूतशब्दवाच्येषु शब्दादिविषयेषु तदन्तरात्मतया वर्तमानः स्मृतः, शरीरशरीर्यात्मकभेदेन अध्यात्मादीनां सर्वेषां भगवदात्मकत्वमेव ज्ञेयम्।।८।। वयं अध्यात्मादीनां मध्ये एकतराभावात् विषयोपलब्धिं न कुर्महे, किन्तु योऽयं परमात्मा ज्ञातृकरणज्ञेयरूपत्रिकस्यापि साक्षात् कर्ता अस्ति, अतः सः परामत्मा शरीराद्याश्रयस्य जीवस्यापि आश्रयो भवति अत स आश्रयाश्रय उच्यते।।९।। यदाऽयं वैराजपुरुषरूपः परमेश्वरोऽण्डं निर्भिद्य विनिर्गतस्तदा स्वस्य स्थानमन्विच्छन् शुद्धजलमस्राक्षीत्।।१०।। स्वसृष्टे तस्मिन् जले सहस्रपरिवत्सरानवात्सीत्, पुरुषोद्भवं जलं "नारा" इति प्रोक्तम्, तस्मिन् अयनात् स परमपुरुषः "नारायण" इति कथ्यते।।११।। द्रव्यं, कर्म, कालः स्वभावः जीवश्च एते सर्वे यस्य परमात्मनोऽनुग्रहात् सत्तावन्तो विद्यन्ते, यस्योपेक्षया एते सर्वे सत्तावर्जिता भवन्ति।।१२।। एक एव स स्वस्य बहुत्वमिच्छन् गर्भरूपं विराड्देहं भूतेन्द्रियदेवतारूपेण त्रेधा विभक्तवान्।।१३।। ईश्वरः एकमेव बीजं अधिदेवम्, अध्यात्मम्, अधिभूतम् इति त्रेधा व्यधात् तन्मत्तः शृणु।।१४।। प्राणव्यापारं कुर्वतो वैराजपुरुषस्य शरीरान्तवर्तिन आकाशात् इन्द्रियमनोदेहानां शक्तयः "ओजः सहो बलम्" इत्युत्पन्नाः, मुख्यः प्राणोऽप्युत्पन्नः।।१५।।

अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु। अपानन्तमपानन्ति नरदेवमिवानुगाः ।।१६।। प्राणेन क्षिपता क्षुत् तृडन्तरा जायते प्रभोः। पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत।।१७।। मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते। ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते।।१८।। विवक्षोर्मुखतो भूम्नो वह्निर्वाग् व्याहृतं तयोः। गले वै तस्य सुचिरं निरोधः समजायत।।१९।। नासिके निरभिद्येतां दोधूयति नभस्वति। तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः।।२०।। यदाऽऽत्मनि निरालोक-मात्मानं च दिदृक्षतः। निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः।।२१।। बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः। कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः ।।२२।। वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम्। जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोममहीरुहाः। तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः।।२३।। हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया। तयोस्तु बलवानिन्द्र आदानमुभयाश्रयम् ।।२४।। गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम्। पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः।।२५।।

।। सङ्ग्रहोक्तिः ।।

शरीरे यस्य प्राणस्य चेष्टयैवेन्द्रियाणि चेष्टां कुर्वन्ति, यं च शरीरं त्यजन्तं सन्तमिन्द्रियाणि चेष्टां त्यजन्ति।।१६।। प्राणेन चालयता सता बुभुक्षा तृषा चोत्पन्ने, पातुमत्तुं चेच्छतस्तस्य मुखं विभक्तमभूत्।।१७।। तस्मिन् तालुअधिष्ठानं जिह्वेन्द्रियं वरुणो देवता रसो विषयः, एवमग्रेऽपि सर्वत्राऽधिष्ठानमिन्द्रियं देवता विषयश्चेति चत्वारि ज्ञेयानि।।१८।।एवं वक्तुमिच्छोः पुरुषस्य मुखात् वागिन्द्रियं वह्निर्देवता वचनं विषयश्चेत्युत्पन्नानि।।१९।। तस्य प्राणवायौ चलति सति नासिक उत्पन्ने, तत्र घ्राणमिन्द्रियं वायुर्देवता, गन्धो विषयः।।२०।। द्रष्टुमिच्छो-स्तस्य नेत्रे समुत्पन्ने, तत्र चक्षुरिन्द्रियं, सूर्यो देवता, रूपं विषयः।।२१।। श्रोतुमिच्छोस्तस्य कर्णौ समुत्पन्नौ, तयोः श्रोत्रमिन्द्रियं, दिशो देवता, शब्दो विषयः।।२२।। वस्तुनो मृदुकाठिन्य-शीतोष्णादिज्ञातुमिच्छोः त्वगधिष्ठनमुत्पन्नं, तत्र रोमाणीन्द्रियाणि, वायुर्देवता, स्पर्शो विषयः ।।२३।। कर्माणि कर्तुमिच्छतस्तस्य हस्तौ रुरुहतुः, तत्र बलमिन्द्रियं, इन्द्रो देवता, हानो-पादानादिविषयः।।२४।।गमनं कर्तुमिच्छतस्तस्य पादौ रुरुहतुः, तत्र गतिकर्मिका शक्तिरिन्द्रियं,

निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः। उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम्
।।२६।। उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्। ततः पायुस्ततो मित्र उत्सर्ग
उभयाश्रयः।।२७।। आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः। तत्रापानस्ततो मृत्युः
पृथक्त्वमुभयाश्रयम्।।२८।। आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः। नद्यः
समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये।।२९।। निदिध्यासोरात्ममायां हृदयं निरभिद्यत।
ततो मनस्ततश्चन्द्रः सङ्कल्पः काम एव च।।३०।। त्वक्चर्ममांसरुधिरमेदो-
मज्जास्थिधातवः। भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः।।३१।। गुणात्म-
कानीन्द्रियाणि भूतादिप्रभवा गुणाः। मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी।।३२।।
एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया। मह्यादिभिश्चावरणैरष्टाभिर्बहिरावृतम्
।।३३।। अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम्। अनादिमध्यनिधनं नित्यं वाङ्मनसः
परम्।।३४।। अमुनी भगवद्रूपे मया ते अनुवर्णिते। उभे अपि न गृह्णन्ति मायासृष्टे
विपश्चितः।।३५।। स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक्।

।। सङ्ग्रहोक्तिः।।

विष्णुर्देवता, गमनं विषयः।।२५।। अपत्यं रतिं चेच्छतस्तस्य शिश्नो निरभिद्यत, तत्रोपस्थमिन्द्रियं प्रजापतिर्देवता, मूत्रोत्सर्गः कामसुखं च विषयः।।२६।। मलत्यागमिच्छतस्तस्य गुदं संजातम्, तत्र पायुरिन्द्रियं, मित्रो देवता, मलोत्सर्गो विषयः।।२७।। देहाद् देहान्तरं गन्तुमिच्छतस्तस्य नाभिद्वारं जातम्, तत्राऽपानमिन्द्रियं, मृत्युर्देवता, मरणं विषयः।।२८।। अन्नसंग्रहमिच्छतस्तस्य कुक्षिस्थानं जातम्, तत्राऽन्त्राणीन्द्रियं समुद्रो देवता, तुष्टिर्विषयः।।२९।। चिन्तयितुमिच्छोस्तस्य हृदयं जातम्, तत्र मन इन्द्रियं, चन्द्रो देवता, संकल्पो विषयः।।३०।। तथा चर्म-मांस-रुधिर-मेदो-मज्जा-ऽस्थि-शुक्र-संज्ञकाः सप्तधातवो जाताः।।३१।। अस्य मनः सर्वविकारात्म-स्वरूपं तथा बुद्धिरर्थविज्ञानरूपा जाता।।३२।। हे राजन्! भगवत एतत् स्थूलं रूपं तेऽभिहितम्, तत् पृथिव्यादिभिरष्टभिरावणैरावृतं वर्तते।।३३।। अस्मात् स्थूलरूपात् परं द्वितीयं सूक्ष्मतमम् अव्यक्तमतीन्द्रियमनादिमध्यनिधनं वाङ्मनंसयोः परं नित्यमस्ति।।३४।। स्थूलसूक्ष्म एते भगवद्रूपे मया तेऽनुवर्णिते भगवदिच्छया विरचित उभेऽपि रूपे जगति ये ज्ञानदुर्बला जनास्ते

नामरूपक्रिया धत्ते सकर्माकर्मकः परः ।।३६।। प्रजापतीन्मनून् देवानृषीन् पितृगणान् पृथक्। सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान् ।।३७।। किन्नराप्सरसो नागान् सर्पान् किम्पुरुषोरगान्। मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान् ।।३८।। कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि। खगान्मृगान् पशून् वृक्षान् गिरीन्नृप सरीसृपान् ।।३९।। द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः। कुशलाकुशला मिश्राः कर्मणां गतयः पराः ।।४०।। सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः। तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा। यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ।।४१।। स एवेदं जगद्धाता भगवान् धर्मरूपधृक्। पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ।।४२।। ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः। संनियच्छति तत् काले घनानीकमिवानिलः ।।४३।। इत्थंभावेन कथितो भगवान् भगवत्तमः। नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ।।४४।। नास्य कर्माणि जन्मादौ परस्यानुविधीयते। कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ।।४५।।

।। सङ्ग्रहोक्तिः ।।

न जानन्ति ।।३५।। वाच्यवाचकतयाऽवस्थितोऽकर्मवश्यः संकल्पमात्रव्यापारकः परमात्मा ब्रह्मरूपधरः नामरूपक्रिया धत्ते = व्याकरोति ।।३६।। स परमात्मा प्रजापतीन् मनून् देवान् ऋषीन्, पितृगणान्, सिद्धचारणगन्धर्वान् विद्याधरासुरगुह्यकान् ।।३७।। किन्नराप्सरसो नागान् सर्पान् किम्पुरुषोरगान् मातृरक्षःपिशाचान् प्रेतभूतविनायकान् ।।३८।। एवं स्थावरजङ्गमरूपेण द्विविधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण चतुर्विधास्तथा जलस्थलाकाशनिवासिनो ये जीवास्तानपि सृजति, तेषां पुण्यपापमिलितकर्मानुरूपा उत्तमनीचमध्यमरूपाश्च या गतयस्तासां रूपाण्यपि सृजति ।।४०।। हे राजन्! तत्राप्येकैकशः सत्त्वरजस्तमोभेदात् सुरनरलोकनरक-दायीनि कर्मफलानि त्रेधा भिद्यन्ते ।।४१।। जगद्धाता स एव भगवान् तिर्यङ्नरसुररूपैः स्वावतारैरिदं जगत् स्थापन् पालयन् धर्मशरीरकः सन् पुष्णाति ।।४२।। ततः प्रलयकाले प्राप्त आत्मना सृष्टमिदं कालाग्निरुद्रात्मा सन्, अनिलः घनघटामिव संहरति ।।४३।। एवं जगत्सृष्टृत्वादिरूपेण यो भगवान् श्रुत्या प्रतिपादितः, तं ब्रह्मविदः चिदचिद्रूपेण केवलं द्रष्टुं

अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः। विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः।।४६।। परिमाणं च कालस्य कल्पलक्षणविग्रहम्। यथा पुरस्ताद् व्याख्यास्ये पाद्मं कल्पमथो शृणु।।४७।। *शौनक उवाच* – यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः। चचार तीर्थानि भुवस्त्यक्त्वा बन्धून् सुदुस्त्यजान्।।४८।। कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसंमतः। यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह।।४९।। ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम्। बन्धुत्यागनिमित्तं च यथैवागतवान् पुनः।।५०।। *सूत उवाच* – राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः। तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ।।५१।।

इति श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे दशमोऽध्यायः ।।१०।।

❀ इति द्वितीयः स्कन्धः समाप्तः ❀

।। सङ्ग्रहोक्तिः ।।

नार्हन्ति।।४४।।जीवेषु कर्तृत्वं प्राकृतकरणकलेवरसापेक्षमारोपितम्, तथाविधं कर्तृत्वं भगवति नास्ति, अस्य चिदचिदात्मकस्य प्रपञ्चस्य जन्मादौ कर्मणि परमात्मनः प्रपञ्चवत् कर्मायत्तजन्मादिकं न प्रतिपाद्यते।।४५।। अयं तु ब्राह्मकल्पोऽवान्तरकल्पसहितः प्रोक्तः, यत्र महदादीनां स्थावरादीनां चोत्पत्तिप्रकारः कथितोऽस्ति।।४६।। अथ कालस्य स्थूलं सूक्ष्मं च रूपं तथा कल्पलक्षणमवान्तरकल्पं मन्वन्तरादिरूपं च विस्तारतोऽग्रे तृतीयस्कन्धे वक्ष्यामि, अथ वक्ष्यमाणं पाद्मं कल्पं शृणु।।४७।। *शौनक उवाच* - हे सूत! त्यक्तुमशक्यानपि बन्धूंस्त्यक्त्वा विदुरस्तीर्थयात्रां चकार, इति भवान् यदकथयत्।।४८।। तस्य विदुरस्य मैत्रेयस्य च संवादः कुत्राऽभूत्, मैत्रेयश्च विदुरं प्रति किं तत्त्वमवोचत्।।४९।। हे सौम्य! तदिदं विदुरस्य बन्धुत्यागनिमित्तम्, यत् भूयोऽपि स धृतराष्ट्रसमीप आगतवान् तदपि नो ब्रूहि।।५०।। *सूत उवाच* - राज्ञा परीक्षिता पृष्टो महामुनिः शुको यन्मैत्रेयोक्तमवोचत्, तदेव राजप्रश्नानु-सारेण वोऽभिधास्ये यूयं तच्छ्रवणं कुरुत।।५१।।

❀ इति श्रीमद्भागवते द्वितीयस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः ।।१०।। ❀

❀ इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां द्वितीयस्कन्धः समाप्तः ❀

ॐ

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम्।।

सङ्ग्रहोक्तिटीकासहितम्

तृतीय स्कन्धः

अथ प्रथमोऽध्यायः ।।१।।

श्रीशुक उवाच - एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल । क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ।।१।। यद्वा अयं मन्त्रकृद्वो भगवानखिलेश्वरः। पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ।।२।। *राजोवाच* - कुत्र क्षत्तुर्भगवतो मैत्रेयेणास संगमः। कदा वा सह संवाद एतद्वर्णय नः प्रभो ।।३।। न ह्यल्पार्थोदयस्तस्य विदुरस्य महात्मनः। तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ।।४।। *सूत उवाच* - स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता। प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ।।५।। *श्रीशुक उवाच* - यदा तु राजा स्वसुतानसाधूनपुष्णन्नधर्मेण विनष्टदृष्टिः। भ्रातुर्यविष्ठस्य सुतान्विबन्धून्प्रवेश्य लाक्षाभवने ददाह ।।६।। यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यम्।

।। सङ्ग्रहोक्तिः ।।

अथ प्रथमोऽध्यायः।।१।।

उद्धवविदुरयोः समागमः

श्रीशुक उवाच - हे राजन्! इत्थं पूर्वं समृद्धं स्वगृहं त्यक्त्वा वनं गतो विदुरो मैत्रेयं प्रत्यपृच्छत् ।।१।।पाण्डवानां शान्तिदूतोऽखिलेश्वरो भगवान् श्रीकृष्णो दुर्योधनगृहं परित्यज्याऽनाहुतोऽपि यस्यात्मसात् कृतं विदुरस्य गृहं प्रविवेश ।।२।। *राजोवाच* - हे प्रभो! ऐश्वर्यवतो विदुरस्य मैत्रेयेण सह कुत्र संगम आस, एवं च तेन सह कदा संवादोऽभूत्, एतन्नः कथय ।।३।। महात्मनो विदुरस्य मैत्रेयं प्रति प्रश्नः स्वल्पश्रेयस्करो न हि भविष्यति ।।४।। *सूत उवाच* - राज्ञा परीक्षिता एवं संपृष्टो बहुविदृषिवर्यः शुकः प्रीतमनाः सन् "श्रूयताम्" इति तं प्रत्याह ।।५।। *श्रीशुक उवाच* - यदा विनष्टदृष्टिः खलान् स्वसुतान् पोषयन् राजा धृतराष्ट्रः कनिष्ठभ्रातुः पाण्डोः पितृहीनान् सुतान् युधिष्ठिरादीन् लाक्षागृहे प्रवेश्य ददाह, (तदा स

न वारयामास नृपः स्नुषायाः स्वास्रैर्हरन्त्याः कुचकुङ्कुमानि ।। ७।। द्यूते त्वधर्मेण जितस्य साधोः सत्यावलम्बस्य वनागतस्य। न याचतोऽदात्समयेन दायं तमोजुषाणो यदजातशत्रोः।।८।। यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः। न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः।।९।। यदोपहूतो भवने प्रविष्टो मन्त्राय पृष्टः किल पूर्वजेन। अथाह तन्मन्त्रदृशां वरीयान् यन्मन्त्रिणो वैदुरिकं वदन्ति।।१०।। अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः। सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत्त्वमलं बिभेषि।।११।। पार्थांस्तु देवो भगवान्मुकुन्दो गृहीतवान्स क्षितिदेवदेवः। आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः।।१२।। स एष दोषः पुरुषद्विडस्ते गृहान्प्रविष्टो यमपत्यबुद्ध्या। पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय।।१३।। *श्रीशुक उवाच* - इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण। असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुज-सौबलेन।।१४।।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः ।।

विदुरो निर्गतः)।।६।। यदा स धृतराष्ट्रः सभायां पुत्रवध्वाः द्रौपद्या दुःशासनकृतकेशापकर्ष निंद्यमपि कर्म न निवारयामास।।७।। पुत्रवचनं मन्यमानो नृपो वनादागतस्य सत्यावलम्बिनः साधोर्द्यूतेऽधर्मेण जितस्याऽजातशत्रोः पूर्वं निश्चितमपि भागं याचमानस्य तद्भागं न दत्तवान् ।।८।। यदा च युधिष्ठिरेण प्रेषितः श्रीकृष्णः सामनीतियुक्तानि वचनानि सभायामुक्त-वांस्तानि स धृतराष्ट्रो नाऽनुमोदितवान्।।९।। यदा च मन्त्राणार्थं धृतराष्ट्रेणाऽऽहूतो विदुर आगत्य नीतिमयमिदं वचः प्राह।।१०।। हे धृतराष्ट्र! असह्यानपि तवापराधान् सहमानस्य युधिष्ठिरस्य भागस्त्वया तस्मै दातव्यः, अस्मिन्नपराधे सानुजो भीमः क्रुद्धः सर्प इव तव भयजनकं श्वासं मुञ्चति।।११।। यः श्रीकृष्णः परमैश्वर्यसंपन्नः सन् पाण्डवान् प्रति स्नेहं करोति, स उपप्लावाख्य नगर्यामेव ससुखं तिष्ठत्येव ससुखस्तिष्ठत्येव नान्यत्र गतः।।१२।। हे ज्येष्ठभ्रात! त्वं यं दुर्योधनं पुत्रबुद्ध्या पालयसि स कृष्णाद्विमुखो गतश्रीः मूर्तदोषरूपः सन्नेव त्वद्गृहप्रविष्टः, अतोऽमङ्गलरूपं तं कुलस्य क्षेमायाऽऽशु त्यज।।१३।। *श्रीशुक उवाच* - इति विदुरवचनमाकर्ण्य क्रोधस्फुरिताधरः कर्णदुःशासनशकुनिप्रेरितो दुर्योधनः

दुर्योधन उवाच- क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः। तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुरात् श्वसानः।।१५।। *श्रीशुक उवाच* - स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि। स्मयन् धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः।।१६।। स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थ-पदः पदानि। अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितो यानि सहस्रमूर्त्तिः।।१७।। पुरेषु पुण्योपवनाद्रिकुञ्जेष्वपङ्कतोयेषु सरित्सरस्सु ।अनन्तलिङ्गैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः।।१८।। गां पर्यटन् मेध्यविविक्तवृत्तिः सदाप्लुतोऽधःशयनो-ऽवधूतः। अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि।।१९।। इत्थं व्रजन् भारतमेव वर्षं कालेन यावद्गतवान्प्रभासम्। तावच्छशास क्षितिमेकचक्रामेकातपत्रा-मजितेन पार्थः।।२०।। तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम् । संस्पर्द्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगियाय तूष्णीम्।।२१।। तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः।।

स्पृहणीयशीलं विदुरं तिरस्कृत्य प्राह।।१४।। *दुर्योधन उवाच* - कुटिलो दासीपुत्रोऽयमत्र केनाऽऽहूतः, यो ममान्नपालितः सन्नपि मय्येव शत्रुवदाचरति, अतो जीवमात्रशेषमेनं नगरा-न्निष्क्रामय।।१५।। *श्रीशुक उवाच* - एवं धृतराष्ट्रस्य सम्मुखमेव मर्मान्तकैः कर्णशूलै र्वाग्बाणैस्ताडितो विदुरः सभाद्वारि धनुः संस्थाप्य शान्तभावेन हस्तिनापुरान्निश्चक्राम।।१६।। ततो कौरवपुण्यलब्धो हस्तिनापुरान्निर्गतो विदुर उर्व्यां पुण्यतीर्थचिकीर्षया विनिर्गतः।।१७।। साकेतादिपुरेषु पुण्योपवनाद्रिकुञ्जेषु, निर्मलजलेषु सरित्सरस्सु, भगवन्मूर्तिसमलङ्कृतेषु तीर्थदेवालयादिषु च भगवद्भक्तियोगनिष्ठ एकाकी स विचचार।।१८।।अपि चैवं भूमौ परिभ्रमन् तीर्थे तीर्थे स्नानं कुर्वन् भूमौ शयानोऽवधूतवेषः स हरिप्रसन्नताहेतूनि व्रतानि चचार।।१९।। इत्थं स यावता कालेन भारतवर्षं परिभ्रमन् प्रभासक्षेत्रं प्राप्तस्तावत् कृष्णसाहाय्येन युधिष्ठिरः साम्राज्यं प्राप्यैकातपत्रां भूमिं पालयति स्म।।२०।।तस्मिन् प्रभासे दावानलेन वनमिवाऽन्तः-क्लेशाग्निना कुरुकुलक्षयं सुहृद्विनाशं च श्रुत्वा शोकयुक्तो विदुरः पश्चिमवाहिनीं सरस्वतीं नदीं जगाम।।२१।।

तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे।।२२।। अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः। प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात्कृष्णमनुस्मरन्ति।।२३।। ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान् कुरुजाङ्गलांश्च। कालेन यावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श।।२४।। स वासुदेवानुचरं प्रशान्तं बृहस्पतेः प्राप्तनयं प्रतीतम् । आलिङ्ग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानाम्।।२५।। *विदुर उवाच* – कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ। आसात उर्व्यां कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ।।२६।। कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमङ्ग शौरिः। योऽसौ स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन।।२७।। कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमङ्ग वीर। यं रुक्मिणी केशवतोऽभिलेभे आराध्य विप्रान्स्मरमादिसर्गे ।।२८।। कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते। यमभ्यषिञ्चच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात्।।२९।। कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु साम्बः।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः ।।

ततस्तस्यास्तटे स त्रितर्षि-शुक्र-मनु-पृथु-वह्नि-वायूनां, असित-सुदास-गो-गुह-श्राद्धदेवानां च तीर्थानि क्रमशः सिषेवे।।२२।। ततश्चाऽन्यान्यपि श्रीकृष्णस्मृतिकारकानि ऋषिदेवमुनिस्थापितानि हरिमन्दिराणि ददर्श।।२३।। ततः सुराष्ट्र-सौवीर-कुरु-मत्स्य-प्रभृतिदेशान् गच्छन् स यमुनां प्राप्तः सन् तत्रैव भागवतमुद्धवमपश्यत्।।२४।। स विदुरः कृष्णभक्तं बृहस्पतिशिष्यं प्रशान्तमूर्तिं प्रसिद्धमुद्धवं स्नेहेन गाढमालिङ्ग्याऽऽत्मीयजनानां यादवपाण्डवानां कुशलमपृच्छत् ।।२५।। हे उद्धव! ब्रह्मणः प्रार्थनयाऽवतीर्णौ जगत्कल्याणं कुर्वन्तौ रामकृष्णौ कुशलिनौ किम्?।।२६।। अस्माकं परमबन्धुर्वसुदेवः सुखपूर्वकमस्ति किम्? यो भगिनीभ्यः पितृतुल्यः सन् धनादिकं ददाति।।२७।। हे उद्धव! यदूनां सेनापतिः प्रद्युम्नः सुखमास्ते, यं माता रुक्मिणी पूर्वजन्मनि विप्रानाराध्य केशवात् स्मरं पुत्ररूपेण लेभे।।२८।। राज्यप्राप्त्याशां परित्यज्य स्थितं यमुग्रसेनं कमलनयनः कृष्णः पुना राज्यासनेऽभ्यषिञ्चत्, स सात्वतवृष्णिभोजदाशार्हाणामधिपः सुखमास्ते।।२९।। हे सौम्य! हरितुल्यो जाम्बवतीसुतः रथिनामग्रणीः

असूत यं जाम्बवती व्रताढ्या देवं गुहं योऽम्बिकया धृतोऽग्रे।।३०।। क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः। लेभेऽञ्जसाऽधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम्।।३१।। कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः। यः कृष्णपादाङ्कितमार्गपांसुष्वचेष्टत: प्रेमविभिन्नधैर्यः।।३२।। कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः। या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम्।।३३।। अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः। यमामनन्ति स्म ह शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम्।।३४।। अपिस्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये। हृदीकसत्यात्मजचारुदेष्ण-गदादयः स्वस्ति चरन्ति सौम्य।।३५।। अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम्। दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या।।३६।। किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुञ्चत्। यस्याङ्घ्रि-पातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम्।।३७।। कच्चिद्यशोधा रथयूथपानां गाण्डीवधन्वोपरतारिरास्ते ।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः।।

साम्बः कुशली भवति?।।३०।। धनञ्जयाल्लब्धधनूरहस्यः सात्यकिः क्षेमान्वितोऽस्ति यः कृष्णसेवया यतिभिर्दुरापां गतिं लेभे।।३१।। यः कृष्णचरणचिह्नितमार्गधूलिषु लुण्ठति स्म, स भगवत्प्रपन्नोऽक्रूरः कुशली वर्तते किम्?।।३२।। यथा त्रयी यज्ञवितानमर्थं दधाति तथा या स्वगर्भे भगवन्तं श्रीकृष्णं धृतवती सा देवकी कुशलिनी किम्?।।३३।। यो भगवद्भक्तानाम-भीष्टपूरकोऽस्ति, यं सत्वमूर्ते भगवतो चतुर्थांशं कथयन्ति स भगवाननिरुद्धः सुखमास्ते? ।।३४।। हे सौम्य! अन्येऽपि हृदीक-चारुदेष्ण-गद-प्रभृतयः श्रीकृष्णसुताः कुशलिनः सन्ति किम्?।।३५।। अतः पाण्डवानां कुशलं प्रच्छन्नाह - हे उद्धव! यस्य सभायां साम्राज्यैश्वर्यदर्शनेन दुर्योधनो भृशं तप्तोऽभूत्, कृष्णार्जुनाभ्यां सह वर्तमानः स युधिष्ठिरो धर्ममर्यादां पालयति किम्?।।३६।। विचित्रतया गदां भ्रामयतो यस्य भीमस्य पादघातं संग्रामभूमिर्न सेहे, सर्पवदतिक्रोधी भीमः स्वापराधिषु क्रोधं त्यक्तवान् न वा?।।३७।।

अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ।। ३८।। यमावुतस्वित्स्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव। रेमात उद्दायमृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात् ।। ३९।। अहो पृथापि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन। यस्त्वेकवीरोऽतिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ।। ४०।। सौम्यानुशोचे तमधः पतन्तं भ्रात्रे परेताय विदुद्रुहे यः। निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान्समनुव्रतेन ।। ४१।। सोऽहं हरेर्मर्त्यविडम्बनेन दृशो नृणां चालयतो विधातुः। नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन् गतविस्मयोऽत्र ।।४२।। नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः। वधात्प्रपन्नार्तिजिहीर्षयेशो व्युपेक्षताघं भगवान् कुरूणाम् ।।४३।। अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्त्तुर्ग्रहणाय पुंसाम्। नन्वन्यथा कोऽर्हति देहयोगं परोगुणानामुत कर्मतन्त्रम् ।।४४।। तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे। अर्थाय जातस्य यदुष्वजस्य वार्त्तां सखे कीर्त्तय तीर्थकीर्त्तेः ।।४५।।

❀ इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे नाम प्रथमोऽध्यायः ।। १ ।। ❀

।। सङ्ग्रहोक्तिः ।।

रथिनां मध्ये यशोधरो गाण्डीवधन्वाऽर्जुनो विनष्टारिः सन् कुशलः किम्? ।।३८।। किंच नकुलसहदेवौ युधिष्ठिरभीमार्जुनैः पक्ष्मभिर्नेत्रे इव रक्षितौ सन्तौ दुर्योधनादिभ्यः स्वं राज्यमाहृत्य ससुखं भवतः किम्? ।।३९।। अहो! चतुर्दिग्विजयिनं पाण्डुं विनाऽपि पुत्रार्थे जीवन्त्याः कुन्त्याः कुशलं किं पृच्छेयम् ।।४०।। हे सौम्य! अधःपतन्तं धृतराष्ट्रमहमनुशोचे, यः पाण्डवान् पीडयन् मृतस्य पाण्डोरपि द्रोहं चकार, यो मित्रवत् हितार्थिनं मामपि हस्तिनापुरात् निष्कासितवान् ।।४१।। सोऽहं हरेरनुग्रहात् तन्माहात्म्यं पश्यन् विस्मयशून्योऽत्र पर्यटामि ।।४२।। नूनं श्रीकृष्णो दुष्टानां नृपाणां नाशाय भूभारहरणाय च कौरवाणामपराधान् सहते स्म ।।४३।। अजन्मनो हरेर्जन्म दुष्टविनाशार्थं तथा कर्त्तृत्वहीनस्य तस्य कर्माणि नृणां कर्मसु प्रवृत्त्यर्थं च भवन्ति ।।४४।। अतो हे सखे! निजाज्ञायामनुवर्तमानानां प्रपन्नाखिललोकपालानां प्रयोजनाय लोकक्षेमाय चावतीर्णस्य पवित्रकीर्त्तेः कृष्णस्य वार्तां कथय ।।४५।।

❀ इति श्रीमद्भागवते तृतीयस्कन्धे संङ्ग्रहोक्त्यां प्रथमोऽध्यायः ।। १ ।। ❀

अथ द्वितीयोऽध्यायः ।।२।।

श्रीशुक उवाच – इति भागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयाम् । प्रतिवक्तुं न चोत्सेह औत्कण्ठ्यात्स्मारितेश्वरः ।।१।। यः पञ्चहायनो मात्रा प्रातराशाय याचितः। तन्नैच्छद्रचयन्नस्य सपर्यां बाललीलया।।२।। स कथं सेवया तस्य कालेन जरसं गतः। पृष्टो वार्त्तां प्रति ब्रूयाद्भर्त्तुः पादावनुस्मरन् ।।३।। स मुहूर्त्तमभूत्तूष्णीं कृष्णाङ्घ्रिसुधया भृशम्। तीव्रेण भक्तियोगेन निमग्नः साधुनिर्वृतः।।४।। पुलकोद्भिन्नसर्वाङ्गो मुञ्चन्मीलद्दृशा शुचः ।पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ।।५।। शनकैर्भगवल्लोकान्नृलोकं पुनरागतः। विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन्।।६।। *उद्धव उवाच* – कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह। किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ।।७।। *दुर्भगो बत लोकोऽयं यदवो नितरामपि । ये संवसन्तो न विदुर्हरिं मीना इवोडुपम् ।।८।।*

।। सङ्ग्रहोक्तिः ।।

अथ द्वितीयोऽध्यायः ।।२।।

विदुरोद्धवसंवादे श्रीकृष्णबाललीलायाः कथनम्

श्रीशुक उवाच – विदुरेण स्वेष्टभगवद्वार्तां प्रति पृष्टः स्नेहविशेषात् स्मारितकृष्णः परमभगवदीय उद्धवः प्रत्युत्तरं वक्तुं नोत्सेहे ।।१।। य उद्धवः पञ्चहायनः प्रातर्बाललीलया कृष्णपूजां कुर्वन् मात्रा भोजनायाहूतोऽपि प्रातराशं नैच्छत् ।।२।। स तस्यैव सेवया वृद्धतां गतः सन् प्रभोश्चरणं स्मरन् श्रीकृष्णवार्ताः कथं कथयेत्?।।३।। श्रीकृष्णचरणामृते निमग्नः तीव्रेण भक्तियोगेन परमानन्दं प्राप्तः स मुहूर्तं तूष्णीमभूत् ।।४।। रोमाञ्चसर्वाङ्गः, अर्धोन्मीलितदृशाऽऽनन्दाश्रूणि मुञ्चन् स्नेहप्रवाहमग्नः स कृतकृत्य इव विदुरेण लक्षणतो ज्ञातः ।।५।। ततः श्रीकृष्णध्यानात् विस्मृतदेहः स पुनः शनै र्देहानुसंधानं प्राप्य नेत्रे विमृज्य विदुरं प्रत्युवाच ।।६।। *उद्धव उवाच* – श्रीकृष्णरूपे सूर्येऽस्तं गते सति कालाजगरेण निगीर्णानां यादवानां कुशलं किंनु कथयेम ।।७।।इदं जगत् भाग्यहीनम्, यादवास्तु नितरां भाग्यहीनाः, ये श्रीकृष्णेन साकं निवसन्तोऽपि जलाशयस्था मीनाश्चन्द्रमिव तमीश्वरं यथार्थं न विदुः ।।८।।

इङ्गितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः। सात्वतामृषभं सर्वे भूतावासममंसत
।।९।। देवस्य मायया स्पृष्टा ये चान्येऽप्यसदाश्रिताः । भ्राम्यते धीर्न तद्वाक्यैरात्म-
न्युप्तात्मनां हरौ।।१०।। प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायान्तरधाद्यस्तु
स्वबिम्बं लोकलोचनम्।।११।। यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता
गृहीतम्। विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम्।। १२।। यद्धर्म-
सूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः। कात्स्न्र्येन चाद्येह गतं विधातुर-
र्वाक्सृतौ कौशलमित्यमन्यत।।१३।। यस्यानुरागप्लुतहासरासलीलावलोकप्रति-
लब्धमानाः। व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः खिलकृत्यशेषाः।।१४।।
प्रशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा। परावरेशो महदंशयुक्तो
ह्यजोऽपि जातो भगवान्यथाग्निः।।१५।। मां खेदयत्येतदजस्य जन्मविडम्बनं
सद्वसुदेवगेहे। व्रजे च वासोऽरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनन्तवीर्यः।।१६।।
दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवन्द्य पित्रोः। तातम्ब कंसादुरुशङ्कितानां
प्रसीदतं नोऽकृतनिष्कृतीनाम् ।।१७।।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः ।।

इङ्गितज्ञा बहुनिपुणा यादवाः श्रीकृष्णमीश्वरं सन्तमपि यादवानां मध्ये श्रेष्ठममंसत।।९।।
देवस्य मायया मूढानां यादवानाम् अन्येषां शिशुपालादीनां च वचनैः कृष्णर्पितमनसां मादृशां
बुद्धिर्न भ्राम्यते।।१०।। अतृप्तदृष्टीन् लोकानतिसुन्दरं स्वस्वरूपं दर्शयित्वा योऽन्तर्हितोऽभवत्
।।११।। स्वस्याऽऽश्चर्यमय्या योगशक्त्या बलं दर्शयित्वा कृष्णेन गृहीतं लीलौपयिकं वपुः
सौभाग्यसमृद्धेः परं पदं भूषणभूषणाङ्गमासीत्।।१२।। युधिष्ठिरस्य राजसूययज्ञे जना यद्-
रूपं दृष्ट्वा ब्रह्मणो निर्माणशक्तौ सर्वातिशायि नैपुण्यं तर्कितवन्तः।।१३।। यस्य प्रेमभरित-
हास्येन रासलीलावलोकनेन च प्राप्तमाना गोप्यः स्वगृहकृत्यं परित्यज्य तं द्रष्टुमुत्सुका
बभूवुः।।१४।। दैत्यादिभिर्भृशं पीड्यमानेषु देवेषु कृपया तद्रक्षार्थं जन्मरहितोऽपि भगवानवततार
।।१५।। किंचाऽजन्मनस्तस्य वसुदेवगृहे जन्मग्रहणं, पुनरनन्तवीर्यस्य सर्वेश्वरस्य तत्र
कंसभयाद् व्रजे निवासः, इत्येतद् द्वयं मच्चित्तं खेदयति।।१६।। देवकीवसुदेवयोः पादौ

को वा अमुष्याङ्घ्रिसरोजरेणुं विस्मर्त्तुमीशीत पुमान्विजिघ्रन्। यो विस्फुरद् भ्रूविटपेन भूमेर्भारं कृतान्तेन तिरश्चकार।।१८।। दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः। यां योगिनः संस्पृहयन्ति सम्यग्योगेन कस्तद्विरहं सहेत।।१९।। तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविन्दम्। नेत्रैः पिबन्तो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य।।२०।। स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः। बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडित-पादपीठः।।२१।। तत्तस्य कैङ्कर्यमुपाश्रितान्नो विग्लापयत्यङ्ग यदुग्रसेनम्। तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति।।२२।। *अहो बकीयं स्तन-कालकूटं जिघांसया ऽपाययदप्यसाध्वी। लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं भजेम ।।२३।।* मन्येऽसुरान् भागवतांस्त्र्यधीशे संरम्भमार्गाभि-निविष्टचित्ताः। ये संयुगेऽचक्षत तार्क्ष्यपुत्रस्यांसे सुनाभायुधमापतन्तम्।।२४।। वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने। चिकीर्षुर्भगवानस्याः कमजेनाभियाचितः ।।२५।।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः ।।

प्रणम्य हे पितः! हे मातः! युवयोः सेवामकुर्वतामस्माकमुपरि युवां प्रसन्नौ स्याताम्, इति कृष्णो यत् प्राह तन्मे मनो दुनोति।।१७।। यो भ्रूभङ्गमात्रेणैव भुवो भारमपहर्तुं क्षमः, तस्य कृष्णस्य पादपद्मपरागं जिघ्रन् कस्तं विस्मर्तुं क्षमः स्यात्? न कोऽपि।।१८।। राजसूययज्ञे कृष्णद्वेषिण शिशुपालस्योत्तमां गतिं भवन्तो दृष्टवन्तः, यां गतिं सम्यग् योगिनोऽपि स्पृहयन्ति, तस्य कृष्णस्य वियोगं कः सहेत।।१९।। तथा च भक्तेभ्यः शत्रुभ्यश्चान्ये युद्धे ये राजानो नयनाभिरामं कृष्णमुखारविन्दं नेत्रैः पश्यन्तः सन्तोऽर्जुनास्त्रैः पूतास्तेऽपि कृष्णस्य पदमापुः ।।२०।। येन समः अधिको वाऽन्यः कोऽपि नास्ति प्रकृतिपुरुषकालानामधीशस्याऽवाप्त-समस्तकामस्य तस्य कृष्णस्य किंकरवद् व्यवहारो मां ग्लपयति, यतः स उग्रसेनस्याऽग्रे "देव मामाज्ञापय" इति कथयति।।२१-२२।। अहो! इयं पूतना यं जिघांसया स्तनलिप्तं कालकूटं पाययतिस्म, साऽपि मातृयोग्यां सद्गतिं प्राप, ईदृशं कारुणिकं हरिं त्यक्त्वाऽन्यं कं शरणं भजेम।।२३।। अहमसुरानपि भक्तानेव मन्ये. ये समरे गरुडस्थं चक्रधरं पश्यन्त

ततो नन्दव्रजमितः पित्रा कंसाद्विबिभ्यता। एकादश समास्तत्र गूढार्चिः सबलो-
ऽवसत् ।।२६।। परीतो वत्सपैर्वत्सांश्चारयन् व्याहरद्विभुः। यमुनोपवने कूजद्
द्विजसंकुलिताङ्घ्रिपे ।।२७।। कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम् ।रुदन्निव
हसन्मुग्धबालसिंहावलोकनः ।।२८।। स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम्
चारयन्ननुगान् गोपान् रणद्वेणुररीरमत् ।।२९।। प्रयुक्तान् भोजराजेन मायिनः
कामरूपिणः। लीलया व्यनुदत्तांस्तान्बालः क्रीडनकानिव ।।३०।। विपन्नान्विषपानेन
निगृह्य भुजगाधिपम्। उत्थाप्यापाययद् गावस्तत्तोयं प्रकृतिस्थितम् ।। ३१ ।। अयाजयद्
गोसवेन गोपराजं द्विजोत्तमैः। वित्तस्य चोरुभारस्य चिकीर्षन् सद्व्ययं प्रभुः ।।३२।।
वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः। गोत्रलीलातपत्त्रेण त्रातो भद्रानुगृह्णता
।।३३।। शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखम्। गायन्कलपदं रेमे स्त्रीणां
मण्डलमण्डनः ।।३४।। ❁ *इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे द्वितीयोऽध्यायः ।।२।।*❁

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः ।।

एव म्रियन्ते ।।२४।। यो धात्रा प्रार्थितः सन् भुवो भारं हर्तुं कंसकारागारे वसुदेवाद्
देवक्यामवतीर्णः ।।२५।। ततः कंसभयाद् वसुदेवो यं नंदगृहं प्रापितवान्, तत्र च बलरामेण
सहैकादशवर्षाणि यावत् यो वासं चकार ।।२६।। वत्सपालबालै परीतः संवेष्टितो वत्सान्
चारयन् सन् कुजत्पक्षिगणसम्भरिताङ्घ्रिपे यमुनोपवने सर्वान्तर्यामी य आक्रीडत् ।।२७।। य
व्रजवासिनां दर्शनीयां बाललीलां कुर्वन् कदाचिद् हसन्निव क्वचिद्रुदन्निव वर्तमानः मुग्ध
बालः सिंह इवाऽवलोकयन् विहारं चकार ।।२८।। स एव किंचिदधिकं वयो लब्ध्वा गाश्चारयन्
वंशीवादनं कुर्वंश्च गोपालान् रमयति स्म ।।२९।। यो कंसप्रेरितान् वञ्चकान्
शकटधेनुकारिष्टादीन् दैत्याननायासेन जघान ।।३०।। ततश्च कालियनागदमनं कृत्वा
विषजलपानेन निर्जीवान् गोगोपालान् पुनरुज्जीवयामास ।।३१।। वृद्धिंगतस्य वित्तस्य सद्व्ययं
चिकीर्षन् कृष्णो द्विजोत्तमैः सह गोसवाख्येन (इन्द्रपूजाभङ्गेन) क्रतुना नन्दमयाजयत् ।।३२।।
भग्नमान इन्द्रे कोपाद् वर्षति सति यो गोवर्धनपर्वतरूपछत्रेण गोगोपालादीन् ररक्ष ।।३३।।
किंच शरच्चन्द्रकिरणैरुज्ज्वलं रजनीमुखं कृतार्थं कुर्वन् गोपीगणं रासक्रीडया रमयन् स्वयं
च गायन् रेमे ।।३४।। ❁ **इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः ।।२।।**❁

अथ तृतीयोऽध्यायः ।। ३।।

उद्धव उवाच – ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः। निपत्य तुङ्गाद्रिपुयूथनाथं हतं व्यकर्षद् व्यसुमोजसोर्व्याम्।।१।। सान्दीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरम्। तस्मै प्रादाद्वरं पुत्रं मृतं पञ्चजनोदरात्।।२।। समाहुता भीष्मककन्या ये श्रियः सवर्णेनबुभूषयैषाम्। गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः।।३।। ककुद्मिनोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह। तद्भग्नमानानपि गृध्नतोऽज्ञान् जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः।।४।। प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्च्छद्द्युतरुं यदर्थे। वज्र्यद्रवत्तं सगणो रुषान्धः क्रीडामृगो नूनमयं वधूनाम्।।५।। सुतं मृधे खं वपुषा ग्रसन्तं दृष्ट्वा सुनाभोन्मथितं धरित्र्या। आमन्त्रितस्तत्तनयाय शेषं दत्त्वा तदन्तः पुरमाविवेश।।६।। तत्राहृतास्ता नरदेव-कन्याः कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्। उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुराग-प्रहितावलोकैः।। ७।।

।। सङ्ग्रहोक्तिः ।।

अथ तृतीयोऽध्यायः ।।३।।

विदुरोद्धवसंवादे मथुराद्वारिकायोर्लीलायाः यादवनां प्रभास गमनस्य च

उद्धव उवाच – देवकीवसुदेवयोः सुखं चिकीर्षन् बलदेवेन संयुतः कृष्णो व्रजात् मथुरामागत्य रिपुयूथनाथं कंसं बलेन राजमञ्चात् भूमौ निपात्य, हतं निष्प्राणं तं व्यकर्षत्।।१।। सांदीपनेः सकृत्प्रोक्तं वेदं षडङ्गमधीत्य पञ्चजनासुरस्योदरं विदार्य यमपुरीं गत्वा, ततो गुरुपुत्रमानीय, तस्मै प्रादात्।।२।। ततो रुक्मिण्याऽऽहूतः श्रीकृष्णः सर्वेषां पश्यतामाहृत्य गान्धर्वविधिना तामुद्वाहितवान्।।३।। ततोऽविद्धनासिकान् सप्त वृषभान् दमयित्वा स्वयंवरे प्राप्तां नाग्नजितीं मार्गे स्वं रुद्ध्यमानान् राजव्रजान् विजित्य उदवहत्।।४।। स्वयं स्वतन्त्रः सन्नपि ग्राम्यजनवत् सत्यभामायाः प्रियकाम्यया पारिजातवृक्षमहार्षीत्, ततस्तद्विमोचनाय सगणो देवराजः क्रोधान्धः सन् भगवन्तमाद्रवत्।।५।। भुवा प्रार्थितः सन् रणे भौमासुरं निहत्य तत्पुत्राय भगदत्ताय राज्यं दत्त्वा तदन्तर्गृहं विवेश।।६।। तत्र भौमासुरेणाऽऽहृत्याऽऽनीताः राजकन्यकाः कृष्णं दृष्ट्वा परमासक्ताः सत्यस्तं मनसा पतिरूपेण स्वीचक्रुः।।७।।

आसां मुहूर्त एकस्मिन्नानाऽगारेषु योषिताम्। सविधं जगृहे पाणीन् बहुरूपः स्वमायया
।।८।। तास्वपत्यान्यजनयदात्मतुल्यानि सर्वशः। एकैकस्यां दश दश प्रकृतेर्विबुभूषया
।।९।। कालमागधशाल्वादीननीकै रुन्धतः पुरीम् । अजीघनत्स्वयं दिव्यं स्वपुंसां
तेज आदिशत्।।१०।। शम्बरं द्विविदं बाणं मुरं बल्वलमेव च। अन्यांश्च दन्तवक्त्रादी-
नवधीत्कांश्च घातयत्।। ११।। अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान्। चचाल
भूः कुरुक्षेत्रं येषामापततां बलैः।। १२।। स कर्णदुःशासनसौबलानां कुमन्त्रपाकेन
हतश्रियायुषम्। सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननन्द पश्यन्।।१३।।
कियान् भुवोऽयं क्षपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः। अष्टादशाक्षौहिणिको
मदंशैरास्ते बलं दुर्विषहं यदूनाम्।। १४।। मिथो यदैषां भविता विवादो माध्व्या
मदात्ताम्रविलोचनानाम्। नैषां वधोपाय इयानितोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं
स्म।। १५।। एवं संचिन्त्य भगवान्स्वराज्ये स्थाप्य धर्मजम्।

।। सङ्ग्रहोक्तिः ।।

आसां योषितां पाणीन् विभिन्नसौधेष्वेकस्मिन्नेव मुहूर्ते स्वीयसंकल्पेन बहुरूपः सन् यथाविधि जगृहे।।८।। तासु स्त्रीषु एकैकस्यां भार्यायां सर्वप्रकारेणात्मतुल्यान् दश दश पुत्रान् प्रकृत्यात्मकस्वशक्ते र्विविधभावेन भवितुमिच्छयाऽजनयत्।।९।। स्वसैन्यैः स्वनगरीं मथुरां द्वारिकां च रुन्धतः कालयवनजरासन्धशाल्वादीन् स्वयमेव जघान, मुचुकुन्दभीमादिद्वारा घातयन् तेभ्यः स्वसामर्थ्यं प्रायच्छत्।।१०।। शम्बरं, द्विविदं, बाणं, मुरं, बल्वलं, दन्तवक्त्रादीनन्यांश्च स्वयं जघान कतिचनाऽन्यैश्चाऽघातयत्।।११।। कुरुक्षेत्रमागच्छतां नृपाणां सैन्यैः सकलाऽपि भूश्चकम्पे, तव भ्रातृपुत्रयुधिष्ठिरदुर्योधनपक्षेऽवस्थितान् सकलानपि नृपान् स कात्स्र्येनाऽघातयत् ।।१२।। कर्णदुःशासनशकुनीनां कुमन्त्रणया नष्टसम्दायुषं भग्नोरुं भूमौ पतितं सानुचरं दुर्योधनं पश्यन्नपि कृष्णः सन्तोषं न प्राप।।१३।। द्रोणभीष्मार्जुनभीमादिभिरष्टादशाक्षौहिणीरूपो भुवो भारोऽवतारितस्तथापि स कियान्? यतो यादवानामसह्यं सैन्यमिदानीमप्यास्ते।।१४।। माध्वीमदात् ताम्रविलोचनानां यादवानां मिथो विवादो भविता, एकात्मानोऽप्येते मयि स्वधामगन्तु-मुद्यते सति विवादेन स्वयमेव नंक्ष्यन्ति।।१५।। एवं संचिन्त्य युधिष्ठिरं हस्तिनापुरराज्ये-

नन्दयामास सुहृदः साधूनां वर्त्म दर्शयन् ।।१६।। उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना । स वै द्रोण्यस्त्रसंभिन्नः पुनर्भगवता धृतः ।।१७।। अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः । सोऽपि क्ष्मामनुजै रक्षन् रेमे कृष्णमनुव्रतः ।।१८।। भगवानपि विश्वात्मा लोकवेदपथानुगः । कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः ।।१९।। स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया । चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ।।२०।। इमं लोकममुं चैव रमयन्सुतरां यदून् । रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः ।।२१।। तस्यैवं रममाणस्य संवत्सरगणान् बहून् । गृहमेधेषु योगेषु विरागः समजायत ।।२२।। दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् । को विश्रम्भेत योगेन योगेश्वरमनुव्रतः ।।२३।। पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः । कोपिता मुनयः शेपुर्भगवन्मतकोविदा ।।२४।। ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयः । ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः ।।२५।। तत्र स्नात्वा पितृन्देवानृषींश्चैव तदम्भसा । तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः ।।२६।।

।। सङ्ग्रहोक्तिः ।।

स्थापयित्वा साधूनां वर्त्म दर्शयन् सर्वान् सुहृदो नन्दयामास ।।१६।। पुरुवंशो गर्भरूपेणाऽभिमन्युना उत्तरायां स्थापितः, स द्रौण्यस्त्रेण दग्धोऽपि श्रीकृष्णेन रक्षितोऽभूत् ।।१७।। विभुः कृष्णो युधिष्ठिरं त्रिभिरश्वमेधैर्याजयति स्म, ततः सोऽपि भ्रातृभिः सह प्रजा रक्षन् राज्यसुखभोगं चकार ।।१८।। विश्वात्मा भगवान् कृष्णोऽपि श्रौतस्मार्तधर्माननुवर्तमानः सांख्यविचारमाश्रितश्चरन् द्वारिकायां कामान् सिषिवे ।।१९।। सस्नेहस्मितपूर्णदृष्ट्याऽमृतसमानया वाचा निर्दोषेण चरित्रेण च लक्ष्म्याश्रयेण शरीरेणमं लोकं यादवांश्च सुतरां रमयन् दत्तावसराभिः स्त्रीभिः क्षणसौहृदः कृष्णो रेमे ।।२०-२१।। ततो बहूनि वर्षाणि यावदेवं गृहस्थसुखमनुभवतः कृष्णस्य गृहेष्वौदासीन्यं जातम् ।।२२।। योगेश्वरं भगवन्तं भक्तियोगेन सेवमानः स्वयं दैवाधीनः कः पुमान् दैवाधीनेषु विषयेषु प्रीतिं कुर्यात् ।।२३।। कदाचिद् द्वारिकायां क्रीडद्भिर्यादवकुमारैर्मुनयः कोपिताः सन्तो भगवदिच्छया यदुकुलनाशाय शापं ददुः ।।२४।। ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयो दैवेन मोहिताः सन्तो रथेन शापनिवृत्त्यर्थं प्रभासक्षेत्रं ययुः ।।२५।।

हिरण्यं रजतं शय्यां वासांस्यजिनकम्बलान्। हयान् रथानिभान् कन्या धरां वृत्तिकरीमपि।।२७।। अन्नं चारुरसं तेभ्यो दत्त्वा भगवदर्पणम्। गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्द्धभिः।। २८।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे तृतीयोऽध्यायः ।। ३।।

अथ चतुर्थोऽध्यायः ।।४।।

उद्धव उवाच - अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणिम् ।तया विस्रंसितज्ञाना दुरुक्तैर्मर्म पस्पृशुः।।१।। तेषां मैरेयदोषेण विषमीकृतचेतसाम्। निम्लोचति रवावासीद्वेणूनामिव मर्द्दनम्।।२।। भगवानात्ममायाया गतिं तामवलोक्य सः। सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत्।। ३।। अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह। बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा।।४।।

।। सङ्ग्रहोक्तिः ।।

ते तत्र स्नात्वा देवान् ऋषीन् पितृंश्च तर्पयित्वा विप्रेभ्यो बहुगुणा गावो ददुः।।२६।। सुवर्ण-रजत-शय्या-वस्त्र-मृगचर्म-कम्बलानि रथाश्व-गज-कन्याः वृत्तिकरीं भुवं, चारुरसं चतुर्विधमन्नं च भगवदर्पणभावनया विप्रेभ्यो दत्त्वा श्रद्धालवः शूरा यादवाः भुवि निपत्य मूर्द्धभिः ता... प्रणेमुः।।२७-२८।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः ।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

यदुवंशसंहारकथा उद्धवोक्तज्ञानप्राप्त्यै विदुरस्य मैत्रेयसन्निधौ गमनं च

उद्धव उवाच - अथ विप्रैरनुज्ञातास्ते यादवा भोजनानन्तरं मद्यपानेन विवेकभ्रष्टाः सन्तो दुर्वचनै र्मर्मणि जघ्नुः।।१।। मैरेयदोषेण मत्तानां यादवानां सायं वाक्कलहानन्तरं वेणूनामिव परस्परं युद्धेन नाशोऽभवत्।।२।। भगवान् कृष्णोऽपि प्राक्तनस्वसंकल्परूपेच्छायाः फलोपलब्धिं विलोक्य सरस्वत्यां स्नात्वा वृक्षमूलमुपाविशत्।।३।। पूर्वं द्वारिकायां प्रपन्नार्तिहरेण स्वकुलं

अथापि तदभिप्रेतं जानन्नहमरिंदम। पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥५॥ अद्राक्षमेकमासीनं विचिन्वन् दयितं पतिम् । श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥६॥ श्यामावदातं विरजं प्रशान्तारुणलोचनम्। दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च॥७॥ वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम्। उपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ॥८॥ तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः। लोकाननुचरन् सिद्ध आससाद यदृच्छया॥९॥ तस्यानुरक्तस्य मुनेर्मुकुन्दः प्रमोदभावानतकंधरस्य। संशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच॥१०॥ *श्रीभगवानुवाच* - वेदाहमन्तर्मनसेप्सितं ते ददामि यत्तद्दुरवापमन्यैः । सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः॥११॥ स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत्। यन्मां नृलोकान् रह उत्सृजन्तं दिष्ट्या ददृश्वान्विशदानुवृत्त्या॥१२॥ पुरा मया प्रोक्तमजाय नाभ्ये सपाद्मे निषण्णाय यदादिसर्गे । ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदन्ति॥१३॥

॥ सङ्ग्रहोक्तिः॥

संजिहिर्षुणा भगवता कृष्णेन "हे उद्धव! त्वं बदरिकाश्रमं याहि" इति कथितम्॥४॥ हे विदुर! एवं सत्यपि श्रीकृष्णस्याभिप्रेतं जानन्नहं श्रीकृष्णचरणवियोगेऽसमर्थः सन् प्रभासे गमनं कुर्वतः कृष्णस्य पश्चाद् अन्वगमम्॥५॥ सरस्वतीनदीतीरे कृतनिवासमेकमासीनं दयितं श्रीनिवासं पतिं गवेषमाणोऽहं तमद्राक्षम्॥६॥ नीलश्वेतवर्णं निर्मलं प्रसन्नारुणलोचनं चतुर्भुजैः पीताम्बरेणाऽयं कृष्ण इति विदितं वाम ऊरौ दक्षिणपादपद्मं स्थापयित्वा पृष्ठेनाऽश्वत्थवृक्षमवष्टभ्य च स्थितमपश्यम्॥७-८॥ तस्मिन्नेव समये व्याससुहृत् महाभागवतो मैत्रेयोऽपि लोकाननुचरन् स्वयमेव तत्र समागतः॥९॥ तदा सानन्दभक्त्यानतकन्धरस्य सप्रेम शृण्वतो मैत्रेयस्य समक्षं श्रीकृष्णः मां सस्मितेक्षणेन गतक्लमं कुर्वन्नवोचत्॥१०॥ *श्रीभगवानुवाच* - हे उद्धव! पूर्वजन्मनि त्वयाऽहं सम्यगाराधितः, अतस्त्वन्मनोवाञ्छितमहं वेद, त्वदितरैर्दुरापं त्वदीप्सितं त्वां दास्यामि॥११॥ हे साधो! त्वमत्र जन्मनि मम सफलमनुग्रहं प्राप्तोऽसि, मर्त्यलोकमेकान्ते त्यजन्तं मामेकान्तिकया भक्त्या दृष्टवानसि, एतद् दिष्ट्या॥१२॥ हे उद्धव! आदिसृष्ट्यारम्भे

उद्धव उवाच – इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोऽहम्। स्नेहोत्थरोम
स्खलिताक्षरस्तं मुञ्चन् शुचः प्राञ्जलिराबभाषे ।।१४।। कोन्वीश ते पादसरोजभाजां
सुदुर्लभोऽर्थेषु चतुर्ष्वपीह। तथापि नाहं प्रवृणोमि भूमन् भवत्पदाम्भोजनिषेवणो-
त्सुक्तः।।१५।। कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनम्।
कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन् रतेः खिद्यति धीर्विदामिह।।१६।। मन्त्रे
मां वा उपहूय यस्त्वमकुण्ठिताखण्डसदात्मबोधः। पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो
मनो मोहयतीव देव।।१७।। ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रम्।
अपि क्षमं नो ग्रहणाय भर्त्तर्वदाञ्जसा यद्वृजिनं तरेम।।१८।। इत्यावेदितहार्दाय
मह्यं स भगवान्परः। आदिदेशारविन्दाक्ष आत्मनः परमां स्थितिम्।।१९।। स
एवमाराधितपादतीर्थादधीततत्त्वात्मविबोधमार्गः। प्रणम्य पादौ परिवृत्य देवमिहागतो-
ऽहं विरहातुरात्मा।।२०।।

।। सङ्ग्रहोक्तिः ।।

नाभिकमले निषण्णाय ब्रह्मणे पुरा मया प्रोक्तं मन्महिमाप्रकाशकं, यच्च सूरयो भागवतं
वदन्ति, तत् सर्वोत्तमं ज्ञानं तुभ्यं ददामि।।१३।। श्रीकृष्णेनैवं सादरं कथितोऽहं पुलकिताङ्गः
साश्रुवदनो बद्धाञ्जलिः सन् भगवन्तमवोचम्।।१४।। हे ईश! त्वत्पादपद्मसेविनां नृणां धर्मार्थ-
काममोक्षाणां मध्ये कश्चिदपि पुरुषार्थो न दुर्लभः, तथापि भवच्चरणकमलसेवोत्सुकोऽहं तान्
पुरुषार्थान् न वाञ्छामि।।१५।। तथापि निर्व्यापारस्य ते कर्माणि, अजन्मनस्ते जन्म, काल-
रूपिणोऽपि ते रिपुभयात् पलायनं, स्वात्मारामस्य स्त्रीभिः सह रमणम्, इत्येतत् सर्वं यत्
कर्म तत् ज्ञानिनामपि मनः खेदयति।।१६।। अकुण्ठिताखण्ड स्वस्वरूपज्ञानपूर्णोऽपि त्वं
कर्त्तव्यनिश्चयार्थं यद् रहसि मामाहूय मूढवत् "मया किं कर्त्तव्यम्" इति पुराऽपृच्छः, तत्
चित्तं मोहयति।।१७।। हे स्वामिन्! यज्ज्ञानं त्वं पुरा ब्रह्मणे प्रोक्तवान्, तदस्माकं ग्रहणे
योग्यं स्यात्, तर्हि तदेव ज्ञानं मां कथय, येन वयं पुरुदुःखरूपसंसारं सुखेन तरेम।।१८।।
एवं स्वाभिप्रायं निवेदितवते मह्यं स भगवान् ज्ञातव्यान्तररहितस्वस्वरूपिविषयं याथार्थ्य-
=ज्ञानमकथयत्।।१९।। एवमाराधितपादतीर्थात् श्रीकृष्णाद् आत्मपरमात्मस्वरूपप्रकाशक

सोऽहं तद्दर्शनाह्लादवियोगार्त्तियुतः प्रभो । गमिष्ये दयितं तस्य बदर्याश्रममण्डलम् ॥२१॥ यत्र नारायणो देवो नरश्च भगवानृषिः। मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ॥ २२॥ *श्रीशुक उवाच* - इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधम्। ज्ञानेनाशमयत् क्षत्ता शोकमुत्पतितं बुधः॥ २३॥ स तं महाभागवतं व्रजन्तं कौरवर्षभः। विश्रम्भादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे॥२४॥ *विदुर उवाच* - ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते। वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरन्ति॥२५॥ *उद्धव उवाच* - ननु ते तत्त्वसंराध्य ऋषिः कौषारवोऽन्ति मे। साक्षाद्भगवतादिष्टो मर्त्त्यलोकं जिहासता॥२६॥ *श्रीशुक उवाच* - इति सह विदुरेण विश्वमूर्त्तेर्गुणकथया सुधयाप्लुतोरुतापः। क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात्॥२७॥ *राजोवाच* - निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः। स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः॥२८॥

॥ सङ्ग्रहोक्तिः॥

ज्ञानं प्राप्य, तच्चरणौ नत्वा तं प्रदक्षिणीकृत्य तद्वियोगकातरः सन्नत्राऽगच्छम्॥२०॥ अतः परं तद् दर्शनजातानन्देन तद्वियोगोत्पन्नदुःखेन च युक्तोऽहं तस्य प्रियं बदरिकाश्रमं यास्यामि ॥२१॥ यत्र ऋषिर्नारायणदेवो नरश्च भगवान् विराजते, तौ लोकभावनावुभौ मृदु तीव्रं च दीर्घं तपस्तेपाते॥२२॥ *श्रीशुक उवाच* - बुधो विदुर इत्थं दुःसहं सुहृदां विनाशमाश्रुत्य जातं शोकं ज्ञानेन दूरी चकार॥२३॥ ततः कुरुश्रेष्ठो विदुर बदर्याश्रमं व्रजिष्यन्तं महाभागवतमुद्धवं श्रीकृष्णानुग्रहे मुख्यं ज्ञात्वा विश्वासं प्राप्य चेदं वक्ष्यमाणं कथितवान्॥२४॥ *विदुर उवाच* - हे उद्धव! योगेश्वरः श्रीकृष्णः स्वस्वरूपरहस्यप्रकाशकं यज्ज्ञानं तुभ्यमाह, तज्ज्ञानं भवानस्मभ्यं वक्तुमर्हसि॥२५॥ *उद्धव उवाच* - हे विदुर! त्वया मैत्रेयः ऋषिस्तत्त्वज्ञानोपदेशग्रहणाय संपूज्यः, स्वयं मर्त्यलोकं त्यक्षन् कृष्णो मैत्रेयमादिदेश यत् "मैत्रेय! त्वामुपसन्नाय विदुराय मदादिष्टं ज्ञानमेतदुपादिशेः" इति॥२६॥ *श्रीशुक उवाच* - इत्थं विदुरेण साकं हरिगुणवर्णनं कुर्वन्नुद्धवो यमुनातीर एकां रात्रिमुशित्वा बदरिकाश्रमं जगाम॥२७॥ *राजोवाच* - हे मुने! यदा विप्रशापात् सर्वेऽपि वृष्णिभोजान्धकादयो यादवा मृत्युं प्राप्तास्तदा श्रीकृष्णोऽप्यन्ते -

श्रीशुक उवाच - ब्रह्मशापापदेशेन कालेनामोघवाञ्छितः। संहृत्य स्वकुलं स्फीतं
त्यक्ष्यन्देहमचिन्तयत् ।।२९।। *श्रीभगवानुवाच - अस्माल्लोकादुपरते मयि ज्ञानं*
मदाश्रयम् । अर्हत्युद्धव एवाद्धा संप्रत्यात्मवतां वरः।।३०।। नोद्धवोऽण्वपि मन्न्यूनो
यद्गुणैनार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ।।३१।। श्रीशुक
उवाच - एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना । बदर्याश्रममासाद्य हरिमीजे
समाधिना ।।३२।। विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः । क्रीडयोपात्तदेहस्य
कर्माणि श्लाघितानि च ।। ३३।। देहन्यासं च तस्यैव धीराणां धैर्यवर्द्धनम् ।
अन्येषां दुष्करतरं पशूनां विक्लवात्मनाम् ।।३४।। आत्मानं च कुरुश्रेष्ठ कृष्णेन
मनसेक्षितम् । ध्यायन् गते भागवते रुरोद प्रेमविह्वलः ।। ३५।। कालिन्द्याः
कतिभिः सिद्ध अहोभिर्भरतर्षभः । प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ।।
३६।।

❁ *इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे चतुर्थोऽध्यायः ।।४।।* ❁

।। सङ्ग्रहोक्तिः ।।

स्वतनुं त्यक्तवान्, तर्हि कथमुद्धव एक एवावशिष्टः? ।।२८।। *श्री शुक उवाच* - सत्यसंकल्पो भगवान् विप्रशापाभिधानेन कालेन समृद्धं स्वकुलं संहृत्य देहं = भुवं त्यक्ष्यन्नचिन्तयत् ।।२९।। अस्माद् भूलोकान्मयि स्वलोके गते सति मद्विषयं ज्ञानमिदानीं स्वात्मपरमात्मयाथात्म्यज्ञानवतां मध्ये श्रेष्ठ उद्धव एव तत्त्वतोऽर्हति ।।३०।। उद्धवोऽणुमात्रमपि मत्तो न्यूनो न भवति, अतः स्ववशीकृतेन्द्रियवर्गः स मत्स्वरूपविषयं ज्ञानं लोकं ग्राहयन्निह मर्त्यलोके तिष्ठतु ।।३१।। इत्थं त्रिलोकगुरुणा वैदिकज्ञानजनकेनाऽऽज्ञप्त उद्धवो बदरिकाश्रमं प्राप्य ध्यानयोगेन हरिमाराधयामास ।।३२।। विदुरोऽपि लीलायै गृहीतशरीरस्य श्रीकृष्णस्य प्रशंस्यानि चरित्राणि तथा धीराणामपि धैर्यवर्धकं तदीयं स्वधामगमनं चोद्धवादाश्रुत्य हे राजन्! तस्मिन्नेव समये भगवता कृतं स्वस्य स्मरणमप्याकर्ण्य, उद्धवगमनानन्तरं तत्सर्वं स्मरन् प्रेमविह्वलः सन् रुरोद ।।३३-३५।। संसिद्धभक्तियोगो भरतकुलश्रेष्ठो विदुरः कतिचिद्भिर्दिनैः यमुनायाः सकाशात् निर्गत्य यत्र गङ्गातीरे मैत्रेय आस्ते तत्र हरिद्वारे गङ्गां प्राप्तः ।।३६।।

❁ *इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः ।।४।।* ❁

अथ पञ्चमोऽध्यायः ।।५।।

श्रीशुक उवाच - द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम्। क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः।। १।। *विदुर उवाच* - सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा । विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्नः।।२।। जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य। अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य।।३।। तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसाम् । हृदि स्थितो यच्छति भक्तिपूते ज्ञानं स तत्त्वाधिगमं पुराणम्।।४।। करोति कर्माणि कृतावतारो यान्यात्मतन्त्रो भगवांस्त्र्यधीशः। यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते।।५।। यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः। योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत्।। ६।।

।। सङ्ग्रहोक्तिः।।

अथ पञ्चमोऽध्यायः ।।५।।

सृष्टेः क्रमवर्णनं तत्त्वात्मकदेवकृतं भगवत्स्तवनं च

श्रीशुक उवाच - गङ्गाद्वारे स्थितमगाधबोधं मैत्रेयमुपसृत्य भगवद्भक्तिशुद्धः सौशिल्यादिसद्गुणातितुष्टो विदुरः पप्रच्छ।।१।। *विदुर उवाच* - हे मैत्रेय! जनः सुखार्थमेव सर्वाणि कर्माणि करोति, किन्तु तैः सुखं वा दुःखशान्तिं न लभते, अपितु पुनः पुनः दुःखमेव प्राप्नोति, अतो लोके यत् युक्तं श्रेयस्कृत् कर्म स्यात् तद् ब्रवीतु।।२।। भवादृशा भगवदेकान्तिका भक्ता इह लोके दैवादधर्मशीलस्य हरिविमुखस्य नितरां दुःखितस्य जनस्याऽनुग्रहायैव विचरन्ति ।।३।। हे सत्तम! येन सम्यगाराधितो भगवान् कृष्णः पुंसां भक्तिपवित्रे हृदये स्थितः प्रसन्नः सन् स्वस्वरूपावभासकं ज्ञानं यच्छति तत्साधनमार्गं मां ब्रूहि।।४।। त्रिलोकेशः स्वतन्त्रो भगवान् ब्रह्मादिरूपेण कृतावतारः सन् यानि कर्माणि करोति तथा सृष्टेः पूर्वं निर्व्यापारः सन् यथा विश्वं ससर्ज, तद् रक्षां च कृत्वा जगतो जीविकां यथा विधत्ते, तद्वर्णय।।५।। किंच स हरिः प्रलये जगदिदं निजहृदयाकाशे संस्थाप्य यथा योगनिद्रामुपास्ते, पुनः सृष्टिसमय एक

क्रीडन्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः। मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ।।७।। यैस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान्सह लोकपालान्। अचीक्लृपद्यत्र हि सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः।। ८।। येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त। नारायणो विश्वसृडात्मयोनि-रेतच्च नो वर्णय विप्रवर्य।। ९।। परावरेषां भगवन्व्रतानि श्रुतानि मे व्यासमुखाद-भीक्ष्णम्। अतृप्नुमः क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् ।।१०।। कस्तृप्नु-यात्तीर्थपदोऽभिधानात्सत्रेषु वः सूरिभिरीड्यमानात्। यः कर्णनाडीं पुरुषस्य यातो भवप्रदां देहरतिं छिनत्ति।। ११।। मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः। यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीतानु हरेः कथायाम्।।१२।। सा श्रद्दधानस्य विवर्द्धमाना विरक्तिमन्यत्र करोति पुंसः। हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते।। १३।। तान् शोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन।

।। सङ्ग्रहोक्तिः ।।

एव ब्रह्मादिस्वरूपेण बहुरूपो यथाऽभूत् ।। ६।। द्विजगोसुराणां सुखाय भगवान् नानावतारैर्यानि चरित्राणि करोति, तानि कथय, यतस्तच्चरितामृतानि शृण्वतो मे मनो न तृप्यति।।७।। लोकनाथाधिपतिः स भगवान् महदादितत्त्वैः सहलोकपालान् लोकान् अलोकांश्च यथा कल्पयामास, तथा तेषु सर्वप्राणिसमुदायानामुत्पत्तिरीतिश्च कथयतु ।। ८।। जगत्सृष्टा नारायणः प्रजानामिन्द्रियाणि रूपाणि नामानि च यया रीत्या सृजति, तत्सर्वं वर्णय।। ९।। हे मैत्रेय व्यासमुखात् त्रैवर्णिकानां स्त्रीशूद्रादीनां च धर्मव्रतादीनि बहुशः श्रुतानि ततस्तृप्तिरप्यभूत् किंतु हरिकथाश्रवणे तृप्तिर्न बभूव ।।१०।। सतां समाजेषु विद्वद्भिः प्रस्तूयमानात् भगवतश्चरित्रात् कः तृप्तिं प्राप्नुयात्? न कोऽपि, यो भगवान् कथाश्रवणतो हृदयं प्रविष्टः सन् देहाद्यासक्तिं छिनत्ति ।।११।। भगवद्गुणानां विवक्षुर्व्यासो महाभारतं व्यचरयत्, तत्र ग्राम्यसुखोपदेशेन जनानां मतिर्हरिकथासु स्थापिता वर्तते।।१२।। हरिकथायां स्थापिता मतिः विवर्द्धमाना सती श्रद्धालोर्विरक्तिं जनयति, हरिस्मृतेः संजातसुखस्य पुंसः समस्तदुःखानां नाशो भवति।।१३।।

क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनाम्।।१४।। तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारम्। उद्धृत्य पुष्पेभ्य इवार्त्तबन्धो शिवाय नः कीर्त्तय तीर्थकीर्त्तेः।।१५।। स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः। चकार कर्माण्यतिपूरुषाणि यानीश्वरः कीर्त्तय तानि मह्यम्।।१६।। *श्रीशुक उवाच* - एवं स भगवान्पृष्टः क्षत्त्रा कौषारविर्मुनिः। पुंसां निःश्रेयसार्थाय तमाह बहु मानयन्।। १७।। *मैत्रेय उवाच* - साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता। कीर्त्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः।।१८।। नैतच्चित्रं त्वयि क्षत्तर्बादरायण-वीर्यजे। गृहीतोऽनन्यभावेन यत्त्वया हरिरीश्वरः।। १९।। माण्डव्यशापाद्भगवान्-प्रजासंयमनो यमः। भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात्।। २०।। भवान् भगवतो नित्यं संमतः सानुगस्य ह । यच्च ज्ञानोपदेशाय मादिशद्भगवान् व्रजन् ।।२१।। अथ ते भगवल्लीला योगमायोपबृंहिताः। विश्वस्थित्युद्भवान्तार्था वर्णयाम्य-नुपूर्वशः।।२२।।

।। सङ्ग्रहोक्तिः।।

ये जना हरिकथाया विमुखाः, तेषां मनोवाणीक्रियारूपा सर्वाः प्रवृत्तयो निष्फलाः, तेषामायुः सूर्यः क्षिणोति, ते जना नितरां शोच्याः सन्ति।।१४।। अतो हे मैत्रेय! सर्वकथासु श्रेष्ठां हरिकथामेव लोकहिताय मां ब्रूहि।।१५।। स जगतः सर्जनपालनसंहारार्थं नानावतारान् गृह्णन् यानि चरित्राणि कृतवांस्तानि मां कथय।।१६।। *श्रीशुक उवाच* - विदुरेण पुंसां निःश्रेयसायैवं पृष्टः कुशारवसुतो मैत्रेयो विदुरं बहु सम्मानयन्नाह।।१७।। *मैत्रेय उवाच* - हे साधो! लोकोपकारं कुर्वता कृष्णमानसस्य स्वस्य कीर्त्तिं विस्तारयता च त्वया समीचीनं पृष्टम्।।१८।। हे विदुर! व्यासात्मजे त्वय्येवंविधप्रश्नकरण आश्चर्यं न हि, यतस्त्वयाऽनन्यभक्त्या हरिर्हृदि स्थापितः।।१९।। यतो भवान् माण्डव्यशापात् व्यासाद् दास्यामुत्पन्नः साक्षाद् यमोऽस्ति ।।२०।। भवान् सभक्तस्य भगवतो नित्यं प्रीतिविषयो भवति, अतो भगवता स्वधामगमनवेलायां भवते ज्ञानोपदेशं कर्तुमहमाज्ञप्तोऽस्मि।।२१।। भगवन्नियाम्ययाऽऽश्चर्यशक्त्योपकल्पिताः विश्वस्योत्पत्तिस्थितिलयान्ताः सर्वा भगवल्लीला अनुक्रमेण ते वर्णयामि।।२२।।

भगवानेक आसेदमग्र आत्मात्मनां विभुः । आत्मेच्छानुगतावात्मा नानामत्युपलक्षितः ।
२३ ।। स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् । मेने सन्तमिवात्मानं सुप्तशक्ति-
सुप्तदृक् ।। २४ ।। सा वा एतस्य सद्द्रष्टुः शक्तिः सदसदात्मिका । माया नाम
महाभाग ययेदं निर्ममे विभुः ।। २५ ।। कालवृत्त्यां तु मायायां गुणमय्यामधोक्षजः
पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ।।२६।। ततोऽभवन्महत्तत्त्वमव्यक्तात्काल-
चोदितात् । विज्ञानात्मात्मदेहस्थं विश्वं व्यञ्जंस्तमोनुदः ।।२७।। सोऽप्यंशगुणकालात्म
भगवद्दृष्टिगोचरः । आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ।।२८।। महत्तत्त्वा-
द्विकुर्वाणादहं तत्त्वं व्यजायत । कार्यकारणकर्त्तात्मा भूतेन्द्रियमनोभवः ।।२९।।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा । अहं तत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत्
वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः ।।३०।।

।। सङ्ग्रहोक्तिः ।।

सृष्टेः पूर्वकाले जीवानामन्तः प्रविश्य धारकः स्वामी एको भगवानेव आसीत्, स भगवान्
सृष्ट्युपयोगिसंकल्पे जाते सति देवादिनानानामरूपविषयबुद्धिबोध्य आस ।।२३।। तदा
प्रलयदशायां सोऽयं भगवान् सर्वज्ञोऽसंकुचितज्ञानः, एकराट् सुप्तशक्तिः स दृश्यं का-
नाऽपश्यत्, किन्तु आत्मानम् असन्तं = नामरूपरहितमिव मेने ।।२४।। हे महाभाग! सत्
दृष्टुरेतस्य भगवतः शक्तिः मायासंज्ञया प्रसिद्धा, प्रकृतिः सदसदात्मिका = चेतनाचेतनात्मि-
अस्ति, यया प्रकृत्या परमेश्वर इदं जगन् निर्ममे ।।२५।। अधोक्षजः कालानुगुणवृत्तिम-
गुणमय्यां मायायां स्वशरीरभूतेन महापुरुषेण सामर्थ्यवान् सन्नेव वीर्यं = सृष्टिसाम-
सम्पादितवान् ।।२६।। ततः पुरुषाहितविर्यायाः कालप्रेरितायाः प्रधानापरसंज्ञायाः प्रकृतेः
(मायायाः) महत्तत्त्वमभूत्, स महान् विज्ञानस्वरूपः स्वस्मिन् स्थितं विश्वं प्रकाश-
तमोनुदः = ध्वान्तं निवर्तयन्नभवत् ।।२७।। जीवगुणकालस्वरूपो भगवदृष्टिगोचरो मह-
(महत्तत्त्वम्) अपि अस्य विश्वस्य सिसृक्षया स्वस्वरूपं व्यकरोत् = परिणामयत् ।।२८।।
विकुर्वाणात् महत्तत्त्वात् कार्यकारणकर्ता भूतेन्द्रियमनोजनकोऽहङ्कारो व्यजायत ।।२९।।
सोऽहंकारो वैकारिकः तैजसः तामसः (भूतादिः) इति त्रिविधोऽजातः तत्र परिणमत -

तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च। तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः ।।३१।। कालमायांशयोगेन भगवद्वीक्षितं नभः। नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम्।। ३२।। अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः। ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम्।।३३।। अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम्। आधत्ताम्भो रसमयं कालमायांशयोगतः।।३४।। ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम्। महीं गन्धगुणामाधात्कालमायांशयोगतः।। ३५।। भूतानां नभ आदीनां यद्यद्द्रव्य परात्परम्। तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः।। ३६।। एते देवाः कला विष्णोः कालमायांशलिङ्गिनः। एते देवाः कला विष्णोः कालमायांशलिङ्गिनः। नानात्वात्स्वक्रियानीशाः प्रोचुः प्राञ्जलयो विभुम् ।।३७।। *देवा उचुः* - नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम्। यन्मूलकेता यतयोऽञ्जसोरु संसारदुःखं बहिरुत्क्षिपन्ति ।।३८।।

।। सङ्ग्रहोक्तिः।।

वैकारिकात् सात्त्विकादहङ्कारात् मनो जातम्, तथा विषयाभिव्यञ्जका दिगादयो देवा जाताः।।३०।। तैजसात् (राजसात्) अहंकारात् पञ्चज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि समुत्पन्नानि, तामसाद् अहंकारात् शब्दः तत्कार्यमाकाशं च जातम्।।३१।। कालमायांशयोगेन भगवद्वीक्षितमाकाशमभूत्, विकुर्वाणाद् आकाशात् स्पर्शतन्मात्रमुत्पन्नम्, तस्माद् शब्दस्पर्शगुणो वायुरुत्पन्नः।। ३२।। वायुरप्यधिकबलयुतः सन् रूपतन्मात्रं ससर्ज, तद्रूपतन्मात्रं लोकप्रकाशकं शब्दस्पर्शरूपगुणकं तेजः ससर्ज।।३३।। ततोऽनिलेन संयुतं भगवद्वीक्षितं कालमायांशयोगतो विकुर्वत् तेजः रसतन्मात्रसहितं शब्दस्पर्शरूपरसगुणकं जलं ससर्ज।।३४।। कालमायांशयोगतः विकुर्वत् ब्रह्मवीक्षितं तेजसाऽनुसंसृष्टं जलमपि गन्धतन्मात्रकां शब्दस्पर्शरूपरसगन्धगुणां पृथिवीं ससर्ज ।।३५।। हे विदुर! इत्थमाकाशादीनां क्रमेणोत्तरोत्तरमेकैकाधिकान् शब्दस्पर्शादीन् गुणान् जानीयाः।। ३६।। एते सर्वे महत्तत्त्वादयो देवा भगवतो शरीरभूता अपि परस्परसम्बन्धाभावात् ब्रह्मांडरचनारूपे स्वकार्यकरणेऽसमर्थाः सन्तः परमात्मानं तुष्टुवुः।।३७।। *देवा ऊचुः* - शरण-प्राप्तानां जनानां सन्तापहरणं छत्रतुल्यं त्वत्पादपद्मं वयं नुमः, यच्चरणतलमाश्रिता यतयोऽनायासेन संसारदुःखं त्यजन्ति।।३८।।

ऋते यदस्मिन् भव ईश जीवास्तापत्रयेणाभिहता न शर्म । आत्मँल्लभन्ते भगवंस्तवा-
ङ्घ्रिच्छायां सविद्यामत आश्रयेम ।। ३९ ।। मार्गन्ति यत्ते मुखपद्मनीडैश्छन्दःसुपर्णै-
र्ऋषयो विविक्ते । यस्याघमर्षोदसरिद्वरायाः परं पदं तीर्थपदः प्रपन्नाः ।।४० ।। यच्छ्रद्धया
श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधार्य । ज्ञानेन वैराग्यबलेन धीरा व्रजेम
तत्तेऽङ्घ्रिसरोजपीठम् ।।४१।। विश्वस्य सर्गस्थितिसंयमार्थे कृतावतारस्य पदाम्बुजं
ते । व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसाम् ।।४२।। यत्सानुबन्धे सति
देहगेहे ममाहमित्यूढदुराग्रहाणाम् । पुंसां सुदूरं वसतोऽपि पुर्यां व्रजेम तत्ते भगवन्-
पदाब्जम् ।। ४३ ।। तान् वा असद्वृत्तिभिरक्षिभिर्ये पराहृतान्तर्मनसः परेश । अथो न
पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ।। ४४ ।। पानेन ते देव कथासुधायाः
प्रवृद्धभक्त्या विशदाशया ये । वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसान्वीयुरकुण्ठ-
धिष्ण्यम् ।। ४५ ।। तथाऽपरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते ।।४६ ।।

।। सङ्ग्रहोक्तिः ।।

हे ईश! अस्मिन् संसारे भवच्चरणारविन्दोपासनं विना तापत्रयाभितप्ता जीवा सुखं न लभन्ते,
अत उपासनाश्रयां त्वच्चरणछायां प्राप्नुम ।। ३९ ।। ऋषयो वेदाश्रयेण यत् ते चरणान्वेषणं
कुर्वन्ति तादृशं त्वच्चरणं वयं प्रपन्नाः स्मः, श्रद्धया निष्कामभक्त्या वैराग्यबलेन ज्ञानेन च
विशुद्धे हृदये त्वच्चरणकमलपीठमवधार्य मुनयोऽ-न्वेषयन्ति, तत् शरणं व्रजेम ।। ४०-४१ ।।
विश्वस्य जन्मावनविलयार्थं कृतावतारस्य ते पदाम्बुजं भक्तजनान् अभयं ददाति, तत् स्मृतं
सत् मोक्षसुखं च प्रयच्छति ।। ४२ ।। स्वदेहे गेहे च अहंममत्वं दधतां मूढजनानां हृदयगुहायां
वसतोऽपि भवतः यत् पदाब्जं दुरापं, तस्य शरणं व्रजामः ।। ४३ ।। हे परमेश्वर! विषयासक्तचित्ता
जनास्त्वच्चरणन्यासशोभाचिन्तकान् त्वद्भक्तान् अपि नूनं न पश्यन्ति ।। ४४ ।। ये
त्वत्कथामृतपानेन प्रवृद्धया भक्त्या विशुद्धमनसो जातास्ते वैराग्यसाररूपं ज्ञानं लब्ध्वा सुखेन
भगवद्धाम प्रापुः ।। ४५ ।। अन्ये ज्ञानिनो योगद्वारा श्रमेण मोक्षं लभन्ते, किन्तु तव
भक्तास्त्वत्कथाकीर्तनादिनाऽनायासेन मोक्षं प्राप्नुवन्ति ।। ४६ ।।

त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते।।४६।। तत्ते वयं लोकसिसृक्षयाद्य त्वयानुसृष्टास्त्रिभिरात्मनि स्म। सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत्प्रतिहर्त्तवे ते।।४७।। यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र। यथोभयेषां त इमे हि लोका बलिं हरन्तोऽन्नमदन्त्यनूहाः।।४८।। त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः। त्वं देव शक्त्या गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः।।४९।। ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते । त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणाम्।।५०।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।।६।।

मैत्रेय उवाच – इति तासां स्वशक्तीनां सतीनामसमेत्य सः। प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः।।१।। कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः।

।। सङ्ग्रहोक्तिः ।।

हे आद्य! त्वं यदर्थमस्मान् सृष्टवान् तत् त्वदीयं किमपि कार्यं कर्तुं वयं न शक्नुमः।।४७।।हे अज! वयं तत्तदवसरे तवोपहारं यथा समर्पयाम, यत्र स्थिता वयमप्यन्नमदाम, स्रक्ष्यमाणा देवादयोऽपि ज्ञानेन्द्रियकर्मेन्द्रियाणां विषयान् निःसंशयाः सन्तः सुखमनुभवन्ति तथा कर्तुं वयं न शक्नुमः ।।४८।। हे देव! त्वमेव सर्वेषामस्माकं सृष्टिकर्ता सर्वाद्यः कूटस्थः पुरुषोऽसि।।४९।। हे आत्मन्! यया वयं ब्रह्माण्डं रचयितुं समर्थाः स्याम, तां शक्तिं ज्ञानं चास्मभ्यं देहि।।५०।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।। ६।।

परमेश्वरशक्तिप्रवेशेन विराड्विग्रहोत्पत्तिः

मैत्रेय उवाच – इत्थं तत्त्वसंस्तुतः परमेश्वरः पृथक् पृथग्वर्तमानानां प्रसुप्तलोकरचनासामर्थ्यानां तत्त्वाभिमानिदेवतानां स्थितिं दृष्ट्वा ततः कालसंज्ञां दैवीं शक्तिं बिभ्रद्भगवान् त्रयोविंशतितत्त्वानां

त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ।।२ ।। सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् । भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ।।३ ।। प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः । प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषम् ।।४ ।। परेणाविशता स्वस्मिन् मात्रया विश्वसृड्गणः । चुक्षोभान्योन्यमासाद्य यस्मिँल्लोकाश्चराचराः ।।५।। हिरण्मयः स पुरुषः सहस्रं परिवत्सरान् । अण्डकोश उवासाप्सु सर्वसत्त्वोपबृंहितः ।।६ ।। स वै विश्वसृजां गर्भो दैवकर्मात्मशक्तिमान् । विबभाजात्मनात्मानमेकधा दशधा त्रिधा ।। ७ ।। एष ह्यशेषतत्त्वानामात्मांशः परमात्मनः । आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ।। ८ ।। साध्यात्मः साधिभूतश्च साधिदैव इति त्रिधा । विराट् प्राणो दशविध एकधा हृदयेन च ।। ९ ।। स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षजः । विराजमतपत्स्वेन तेजसैषां विवृद्धये ।।१०।। अथ तस्याभितप्तस्य कति चायतनानि ह । निरभिद्यन्त देवानां तानि मे गदतः शृणु ।।११।।

।। सङ्ग्रहोक्तिः ।।

गणमाविशत् ।।१-२।। तदा स मिथो भिन्नानि तानि तत्त्वानि चेष्टारूपया क्रियाशक्त्या संयोजितवान् ।।३।। भगवतः संकल्पेन प्रबुद्धकर्मा स त्रयोविंशतिको गणः स्वांशैः विराड्ब्रह्म-शरीरमजनयत् ।।४।। स तत्त्वसंघः परस्परं संयुक्तः सन् स्वांशेन पुरुषरूपत्वं प्राप ।।५।। सर्वसत्त्वोपबृंहितो हिरण्मयः वैराजाख्यपुरुषो ब्रह्माण्डकोशे स्थितः सन् सहस्रवर्षपर्यन्तं गर्भोदके वसति स्म ।।६।। स स्वं ज्ञानशक्त्यात्मना एकधा अध्यात्म-अधिभूत-अधिदैवात्मक शक्त्या त्रिधा, प्राण-अपान-समान-व्यान-उदान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जय रूपेण दशधा व्यभजत् ।।७।।एषः समष्टिपुरुषोऽशेषतत्त्वानामाधारः परमात्मनः प्रथमावतारः कथितः, यस्मिन् समष्टिपुरुषे व्यष्टिसमष्टिभूतजातं विविधमुत्पद्यते ।।८।। अयं समष्टिपुरुषः, अध्यात्मानि इन्द्रियाणि, तत्सहितः साध्यात्मः, अधिभूतशब्दवाच्यगोलकतद्भोग्यविषयाभ्यां सहवर्तमानः साधिभूतः, इन्द्रियाधिष्ठितदेवैः सह वर्तमानः साधिदेवः, इत्यमुना प्रकारेण स त्रिधा, प्राणरूपेण दशविधः, ज्ञानशक्त्यात्मना एकधाऽपि कथ्यते ।।९।। परमेश्वरः महदादीनां प्रार्थितं स्मरन् तेषां विवृद्धये स्वेन ज्ञानेन विराजं समष्टिपुरुषमालोचयत् ।।१०।। तदनन्तरं तस्मात् पुरुषात्

तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदम्। वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते।।१२।। निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः। जिह्वयांशेन च रसं ययासौ प्रतिपद्यते।।१३।। निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम्। घ्राणेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत्।।१४।। निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद्विभोः। चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत्।।१५।। निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत्। प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते।। १६।। कर्णावस्य विनिर्भिनौ धिष्ण्यं स्वं विविशुर्दिशः। श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते।।१७।। त्वचमस्य विनिर्भिन्ना विविशुर्धिष्ण्यमौषधीः। अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते।।१८।। मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत्। रेतसांशेन येनासावानन्दं प्रतिपद्यते।।१९।। गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत्। पायुनांशेन येनासौ विसर्गं प्रतिपद्यते।।२०।। हस्तावस्य विनिर्भिन्नाविन्द्रः स्वर्पतिराविशत्। वार्त्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते।।२१।।

।। सङ्ग्रहोक्तिः ।।

देवतासहितेन्द्रियाणां कतिपयानि स्थानानि उदभूवन्, तानि मत्त शृणु।।११।। पूर्वं तस्य मुखं जातं, तत्राऽग्निर्देवता, वाग् इन्द्रियं, वक्तव्यं विषय येन शब्दोच्चारणं भवति ।।१२।। ततस्तालु जातं, तत्र वरुणो देवता, जिह्वेन्द्रियं, रसो विषय, येन रसज्ञानं जायते ।।१३।। ततो नासिके जाते, तत्राश्विनीकुमारौ देवता, घ्राणमिन्द्रियं, गन्धो विषयः, येन गन्ध-ज्ञानं जायते।।१४।। ततो नेत्रे जाते, तत्र सूर्यो देवता, चक्षुरिन्द्रियं, रूपं विषयः, येन रूप-ज्ञानं स्यात्।।१५।। ततश्चर्माणि जातानि, तत्र वायुर्देवता, त्वगिन्द्रियं, स्पर्शो विषयः, येन स्पर्शज्ञानं स्यात्।।१६।। ततः कर्णौ जातौ, तत्र दिग् देवता, श्रोत्रमिन्द्रियं, शब्दो विषयः, येन शब्दज्ञानं जायते।।१७।। ततस्त्वग् जाता, तत्रौषधयो देवताः रोमाणीन्द्रियं, कण्डूज्ञानं स्यात् ।।१८।। ततो मेढ्रं जातं, तत्र प्रजापतिर्देवता, रेतरिन्द्रियं, सुखं विषयः, येनानन्दानुभवः स्यात्।।१९।। ततो गुदं जातं, तत्र मित्रो देवता, पायुरिन्द्रियं, मलोत्सर्गो विषयः, येन विष्ठा-त्यागः स्यात्।।२०।। ततो हस्तौ जातौ, तत्रेन्द्रो देवता, वार्ता = क्रयविक्रयादिर्वृत्तिः, इन्द्रियं, जीविका -

पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत्। गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते।।२२।। हृदयं चास्य निर्भिन्नं चन्द्रमा धिष्ण्यमाविशत् । मनसांशेन येनासौ विक्रियां प्रतिपद्यते।।२३।। बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत्। बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत्।।२४।। आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदम् ।कर्मणांशेन येनासौ कर्त्तव्यं प्रतिपद्यते।।२५।। सत्त्वं चास्य विनिर्भिन्नं महान्धिष्ण्यमुपाविशत्। चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते।। २६।। शीर्ष्णोऽस्य द्यौर्द्धरा पद्भ्यां खं नाभेरुदपद्यत। गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः।।२७।। आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे । धरां रजःस्वभावेन पणयो ये च ताननु ।।२८।। तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः। उभयोरन्तरं व्योम ये रुद्रपार्षदां गणाः।।२९।। मुखतोऽवर्त्तत ब्रह्म पुरुषस्य कुरूद्वह। यत्तन्मुखत्वाद्वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः।।३०।। बाहुभ्योऽवर्त्तत क्षत्त्रं क्षत्त्रियस्तदनुव्रतः । यो जातस्त्रायते वर्णान्पौरुषः कण्टकक्षतात्।। ३१।।

।। सङ्ग्रहोक्तिः ।।

विषयः, येन जनव्यापारं संपादयति।।२१।।ततः पादौ जातौ, तत्र विष्णुर्देवता, गतिरिन्द्रियम्, गन्तव्यं विषयः, येन जनो गमनागमने विदधाति।।२२।। ततो बुद्धिर्जाता, तत्र ब्रह्मा देवता, ज्ञानमिन्द्रियं, ज्ञातव्यं विषयः, येन निश्चयात्मकं ज्ञानमुत्पद्यते।।२३।। ततो हृदयं जातम्, तत्र चन्द्रमा देवता, मन इन्द्रियं, संकल्पविकल्पौ विषयः, याभ्यां कर्तव्याकर्तव्य विचारः स्यात्।।२४।। ततोऽहङ्कारो जातः, तत्र रुद्रो देवता, अहंवृत्तिरिन्द्रियम्, क्रिया विषयः येन कर्तृत्वाभिमानो भवति।।२५।। ततोऽन्तःकरणं जातं, तत्र क्षेत्रज्ञो देवता, चित्तमिन्द्रियं, विज्ञानं विषयः, येन विवेको भवति।।२६।।तस्य विराट्पुरुषस्य मस्तकात् स्वर्गोजातः, चरणाभ्यां भूः, नाभेराकाशं जातं, एतेषु स्वर्गादिषु सत्त्वादीनां गुणानां परिणामाः सुरादयो दृश्यन्ते।।२७।। तत्र सत्त्वगुणेन देवाः स्वर्गं, रजोगुणेन नराः पृथिवीं, तमोगुणेन भूतसंघा नभश्च प्रापुः।।२८-२९।। समष्ट्यात्मक वैराजपुरुषस्य मुखात् वर्णानां गुरु र्ब्राह्मणो जातः।।३०।। बाहुभ्यां क्षत्रियो जातः, यः प्रजारक्षकोऽभवत् ।।३१।।

विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः। वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्त्तयत् ।।३२।। पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये। तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः।।३३।। एते वर्णाः स्वधर्मेण यजन्ति स्वगुरुं हरिम्। श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः।।३४।। एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः। कः श्रद्दध्यादुपाकर्त्तुं योगमायाबलोदयम्।। ३५।। अथापि कीर्त्तयाम्यङ्ग यथामति यथाश्रुतम्। कीर्त्तिं हरेः स्वां सत्कर्त्तुं गिरमन्याभिधाऽसतीम्।।३६।। एकान्तलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः। श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम्।।३७।। आत्मनोऽवसितो वत्स महिमा कविनादिना। संवत्सरसहस्रान्ते धिया योगविपक्वया।। ३८।। अहो भागवती माया मायिनामपि मोहिनी। यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे।।३९।। यतोऽप्राप्य निवर्त्तन्ते वाचश्च मनसा सह। अहं चान्य इमे देवास्तस्मै भगवते नमः।।४०।।

❁ इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे षष्ठोऽध्यायः।।६।।❁

।। सङ्ग्रहोक्तिः ।।

ऊरुभ्यां वैश्यो जातः, यः प्रजानां जीविकाकृदभूत्।।३२।। भगवतः पद्भ्यां धर्मसिद्धये शुश्रूषा जज्ञे, शूद्रः तस्यामवर्त्तत, यया शुश्रूषया हरिः तुष्यति।।३३।। एते ब्राह्मणादयश्चत्वारो वर्णाः स्वधर्मेण श्रद्धयाऽऽत्मशुद्ध्यर्थं स्वगुरुं भगवन्तं यजन्ति, यतस्ते वृत्तिभिः सह हरेर्जाताः।।३४।। विराड्रूपस्य भगवतो योगाधिष्ठेयायाः मायायाः जननसामर्थ्यं कार्त्स्न्येन वर्णयितुं कः समर्थः स्यात्।।३५।। हे विदुर! तथापि गुरुमुखात् यथाश्रुतं तथा यथामति हरेः कीर्त्तिं मम दुष्टां गिरं शुद्धां कर्तुं कीर्त्तयामि।।३६।। समुज्ज्वलकीर्त्तेर्भगवतो गुणानुकीर्त्तनं तत्कथाश्रवणं च मुक्तिरूपमेकान्तफलं यच्छतीति श्रुतिस्मृतिपुराणज्ञाः कथयन्ति।।३७।। हे विदुर! आदिकविर्ब्रह्माऽपि भगवतो महिमानं योगपरिपक्वया धिया वर्षसहस्रैः किं ज्ञातवान्?।।३८।। भगवत्सम्बन्धिनी माया = आश्चर्यमयी शक्तिः मायिनामपि = आश्चर्यशक्तिमतामपि आश्चर्यजनयित्री वर्तते, सर्वात्मा स्वयं हरिरपि स्वयोगमायायाः शक्तिं न वेद।।३९।। योगशुद्धेन मनसा सह वेदवचांसि, रुद्रोऽन्ये देवाश्च यमप्राप्य निवर्तन्ते तस्मै भगवते नमः।।४०।।

❁ इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः ।।६।।❁

अथ सप्तमोऽध्यायः ।।७।।

श्रीशुक उवाच – एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः। प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ।।१।। *विदुर उवाच* – ब्रह्मन्कथं भगवतश्चिन्मात्रस्याविकारिणः। लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ।।२।। क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः। स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः ।।३।। अस्राक्षीद्भगवान्विश्वं गुणमय्यात्ममायया ।तया संस्थापयत्येतद्भूयः प्रत्यभिधास्यति ।।४।। देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः। अविलुप्तावबोधात्मा स युज्येताजया कथम् ।।५।। भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः। अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ।।६।। एतस्मिन्मे मनो विद्वन् खिद्यतेऽज्ञानसंकटे। तन्नः पराणुद विभो कश्मलं मानसं महत् ।।७।। *श्रीशुक उवाच* – स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः। प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तमोऽध्यायः ।।७।।

निर्गुणस्य भगवतो गुणादिसम्बन्धः कथम्? इत्यस्योत्तरं संस्तूय विदूरेण विविधाः प्रश्नाः कृताः

श्रीशुक उवाच – तत्त्वदर्शी विदुरः स्वगिरा प्रीणयन्निव उपर्युक्तप्रकारेण ब्रुवन्तं मैत्रेयं प्रत्यभाषत ।।१।। *विदुर उवाच* – हे ब्रह्मन्! पूर्णषाड्गुण्यस्य चिदात्मकस्याऽविकारिणो निर्गुणस्य गुणकार्यभूताः क्लेशादयः क्रियाः परिणामादयश्च लीलयाऽपि कथं युज्येरन्? ।।२।। बालकस्य क्रीडायामुद्यमस्तु स्वेच्छा वा क्रीडोपकरणैश्चिक्रीडिषा च स्यात्, परमेश्वरस्य तु स्वतस्तृप्तस्य स्वव्यतिरिक्तस्वतन्त्रक्रीडोपकरणै र्निवृत्तस्य चिक्रीडिषा च कथं स्यात्? ।। ३ ।। यतो यो भगवान् गुणमय्याऽऽत्ममायया विश्वं सृजति, अवति, संहरति च ।।४।। योऽसौ परमात्मा देशतः कालतोऽवस्थातः स्वतोऽन्यतो वा लुप्तज्ञानरूपो न भवति, ईदृशः परमात्मा मायया कथं युज्येत ।।५।।एक एव एष भगवान् सर्वशरीरेष्ववस्थितः, जीवान्तर्यामितयाऽवस्थितः, अमुष्य भगवतो दुर्भगत्वं कर्मभिः क्लेशो वा कथं स्यात्? ।।६।। हे मैत्रेय! एतस्मिन्नज्ञानसंकटे मे मनः खिद्यते, तस्माद् हे विभो! अस्माकं मानसं महान्तं खेदमपाकुरुत ।।७।। *श्रीशुक उवाच*

मैत्रेय उवाच - सेयं भगवतो माया यन्न येन विरुध्यते। ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम्।।९।। यदर्थेन विनामुष्य पुंस आत्मविपर्ययः । प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः।।१०।। यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः । दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः।।११।। स वै निवृत्तिधर्मेण वासुदेवानुकम्पया। भगवद्भक्तियोगेन तिरोधत्ते शनैरिह।।१२।। यदेन्द्रियोपरामोऽर्थान् दृष्टात्मनि परे हरौ । विलीयन्ते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः।।१३।। *अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः । कुतः पुनस्तच्चरणारविन्दपरागसेवारतिरात्मलब्धा*।।१४।। *विदुर उवाच* - संछिन्नः संशयो मह्यं तव सूक्तासिना विभो। उभयत्रापि भगवन्मनो मे संप्रधावति।।१५।। साध्वेतद्व्याहृतं विद्वन्नात्ममायायनं हरेः। आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः।।१६।।

।। सङ्ग्रहोक्तिः।।

- इत्थं तत्त्वजिज्ञासुना साग्रहं प्रार्थितो भगवच्चित्तो गतस्मयो मैत्रेयो मुनिः स्मयन्निव विदुरं प्रत्याह।।८।। *मैत्रेय उवाच* - परमेश्वरस्य कृपणत्वं तथा च विमुक्तस्याऽपि तस्य बद्धवत् प्रतीयमानत्वं च येन हेतुना न विरुद्ध्यते, विरुद्धं सदपि विरुद्धवत् न प्रतीयते सेयं भगवतो माया=आश्चर्यशक्तिरस्ति ।।९।। यत् कर्मवश्यस्य जीवस्य पुरुषार्थभूतेनात्मस्वरूपेण विना देवमुनुष्यादिभावः प्रतीयते, तत्प्रयुक्तः स्वशिरच्छेदनादिकः शोकः, उपद्रष्टुः= देहमेवाऽऽत्मतादात्म्येनाऽनुसंदधतः प्रतीयते, साऽपि भगवतो मायैव।।१०।। यथा जले चन्द्रमस्यविद्यमानोऽपि तत्कृतः कम्पादिगुणो दृश्यते, एवमात्मन्यविद्यमानोऽपि अनात्मनः-देहस्य गुणो द्रष्टुः दृश्यते।।११।। स हेयगुणो निवृत्तिधर्मेण, वासुदेवानुकम्पया, भक्तियोगेन चेहैव शनैस्तिरोधत्ते।।१२।।यदा शब्दादिविषयान् प्रतीन्द्रियाणामुपरतिर्भवेत्, तदा प्रकृतिपुरुषविलक्षणे हरौ परमात्मनि दृष्टे सति संसुप्तस्येव कृत्स्नशः क्लेशा विलीयन्ते ।।१३।।यदा श्रीहरेर्गुणानां संकीर्त्तनश्रवणे समग्रदुःखानां निवृत्तिं कुरुतः तदा स्वात्मनि प्राप्ता भगवच्चरणारविन्दपरागरतिः समग्रदुःखानां नाशं विधत्ते, तत्र किमुवक्तव्यम्?।।१४।। *विदुर उवाच* - हे मैत्रेय! तव सयुक्तिकवाक्यखड्गेन मम संशयश्छिन्नः, इदानीं मे मन उभयत्र =भगवद्गुणानुश्रवणे -

यश्च मूढतमो लोके यश्च बुद्धेः परं गतः। -तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः।।१७।। अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः। तां चापि युष्मच्चरण-सेवयाहं पराणुदे।।१८।। यत्सेवया भगवतः कूटस्थस्य मधुद्विषः। रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः।। १९।। दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु। यत्रोपगीयते नित्यं देवदेवो जनार्दनः।।२०।। सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात्। तेभ्यो विराजमुद्धृत्य तमनुप्राविशद्विभुः।।२१।। यमाहुराद्यं पुरुषं सहस्राङ्घ्र्युरुबाहुकम् । यत्र विश्व इमे लोकाः सविकाशं समासते।।२२।। यस्मिन् दशविधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रिवृत्। त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः।।२३।। यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः। प्रजा विचित्राकृतय आसन्याभिरिदं ततम् ।।२४।।

।। सङ्ग्रहोक्तिः ।।

तच्चरणारविन्दपरागसेवायां च प्रधावति।।१५।। हे विद्वन्! जीवो माया च, उभे परमात्मनो वासस्थानमिति यत्त्वयोक्तं तत् साधु व्याहृतम्, विश्वमूलं यद् ब्रह्म तज्जगतो बहिर्वर्ति न भवति किन्त्वन्तःप्रविष्टमस्ति, किंचेदं जगत् निर्मूलम् अब्रह्मात्मकमाभाति इति यद्वचनं तदपि भ्रान्तिरूपमपार्थम्।।१६।। लोके यो जनो मूढतमः, यश्च बुद्धेः परंगतः = ब्रह्मात्मकं स्वात्मान-मिवावगतवान् तावुभौ सुखिनौ भवतः, अन्तरितः संशयात्मा तु क्लिश्यति।।१७।। आत्मतादा-त्म्येन प्रतीयमानस्य देहस्य आत्मत्त्वाभावं विनिश्चित्य तां देहात्मप्रतीतिमपि युष्मच्चरणसेवया-ऽहमपाकरिष्यामि ।।१८।। साधुनां सेवयैव निर्विकारस्य परमेश्वरपादपद्मयोस्तीव्रः प्रेमातिशयो भवेत्।।१९।। यत्र देवदेवो भगवान् नित्यं गीयते तथाभूतेषु वैकुण्ठप्रापकेषु भगवद्भक्तेषु सेवा प्राप्तिस्तपोहीनस्य दुरापैव।।२०।। यो भगवान् सृष्टेः पूर्वं सविकारैर्महत्तत्त्वादिभिरंशैर्विराजमुत्पाद्य तन्मध्ये प्रविवेश।।२१।। यं मुनयः सहस्रकरचरणोरुयुक्तं पुरुषं कथयन्ति, यस्मिंश्च सर्वं जगत् सावकाशं स्थितं स्यात्।।२२।। यस्मिन्निन्द्रियविषयदेवताभिः सहिता दशप्राणाः सन्ति, यतो वर्णा उत्पन्ना इति कथितं तस्य हरेर्ब्रह्माद्या विभूतीर्नो ब्रूहि।।२३।। यत्र वैराजशरीरभूते ब्रह्माण्डे पुत्र-पौत्र-प्रपौत्र-गोत्रजादिभिर्युक्ताः प्रजाः सन्ति, याभिरिदं व्याप्तमस्ति।।२४।।

प्रजापतीनां स पतिश्चक्लृपे कान् प्रजापतीन्। सर्गांश्चैवानुसर्गांश्च मनून्मन्वन्तराधिपान् ।।२५।। एतेषामपि वंश्यांश्च वंश्यानुचरितानि च। उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते। तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय।। २६।। तिर्यङ्मानुषदेवानां सरीसृपपतत्त्रिणाम्। वद नः सर्गसंव्यूहं गार्भस्वेदाऽण्डजोद्भिजाम् ।।२७।। गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम्। सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् ।।२८।। वर्णाश्रमविभागांश्च रूपशीलस्वभावतः। ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणम्।। २९।। यज्ञस्य च वितानानि योगस्य च पथः प्रभो। नैष्कर्म्यस्य च सांख्यस्य तन्त्रं च भगवत्स्मृतम्।। ३०।। पाषण्डपथवैषम्यं प्रतिलोमनिवेशनम्। जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः।।३१।। धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः। वार्त्ताया दण्डनीतेश्च श्रुतस्य च विधिं पृथक्।। ३२।। श्राद्धस्य च विधिं ब्रह्मन् पितृणां सर्गमेव च। ग्रहनक्षत्रताराणां कालावयवसंस्थितिम् ।।३३।। दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलम्। प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि ।।३४।।

।। सङ्ग्रहोक्तिः ।।

प्रजापतीनां पतिर्ब्रह्मा कान् प्रजापतीन् सर्गान् अनुसर्गान् मनून् मन्वन्तराधीशांश्च सृष्टवान् ।।२५।। हे मित्रात्मज! मन्वन्तराधिपानामपि वंश्यानुचरितानि, लोकत्रयस्य सन्निवेशं प्रमाणं च कथय ।।२६।। जरायुजस्वेदजाण्डजोद्भिजचतुर्विधखन्युद्भवानां तिर्यङ्नरसुरसरिसृपपक्षिणां च सर्गविभागं नो वद ।।२७।। गुणावतारै र्जगद्व्यापारं कुर्वतो भगवतो जगत्सर्गस्थितिप्रलयविषयं महान्तं व्यापारं व्याचक्ष्व ।।२८।। रूपशीलस्वभावानुसारं वर्णाश्रमाणां विभागान्, ऋषीणां जन्मकर्माणि, वेदानां विभागांश्च ब्रूहि ।।२९।। यज्ञानां विस्तारान्, निष्कामकर्मयोगस्य मार्गान्, सांख्यज्ञानस्य पथः, श्रीमुखप्रोक्तं पाञ्चरात्रतन्त्रं च कथय ।।३०।। पाखण्डमार्गोत्पत्तिं, प्रतिलोमविवाहादिकं जीवस्य गुणकर्मजा गतयश्च, उच्यताम् ।।३१।। धर्मार्थकाममोक्षविषयकान् निर्विरोधानुपायान्, व्यपारादिवार्तायाः दण्डनीतेः श्रुत्युक्तसन्ध्योपासनादेश्च विधिं ब्रूहि ।।३२।। श्राद्धस्य विधिं, पितृणां सर्गं, ग्रहनक्षत्रताराणां कालचक्रे स्थितिं ।।३३।। दानतपइष्टापूर्तानां फलं, प्रवासस्थस्य पुंसो धर्मम्, आपद्धर्मं च कथय ।।३४।।

येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः। संप्रसीदति वा येषामेतदाख्याहि चानघ।।३५।।
अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम । अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः
।।३६।। तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः। तत्रेमं क उपासीरन्क उ
स्विदनुशेरते।।३७।। पुरुषस्य च संस्थानं स्वरूपं वा परस्य च। ज्ञानं च नैगमं
यत्तद् गुरुशिष्यप्रयोजनम्।।३८।। निमित्तानि च तस्येह प्रोक्तान्यनघसूरिभिः। स्वतो
ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव च।।३९।। एतान्मे पृच्छतः प्रश्नान् हरेः कर्म-
विवित्सया। ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः।। ४०।। *सर्वे वेदाश्च यज्ञाश्च
तपो ज्ञानानि चानघ। जीवाभयप्रदानस्य न कुर्वीरन्कलामपि।।४१।।* *श्रीशुक
उवाच* - स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः। प्रवृद्धहर्षो
भगवत्कथायां संचोदितस्तं प्रहसन्निवाह।।४२।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे सप्तमोऽध्यायः।।७।।

।। सङ्ग्रहोक्तिः।।

हे अनघ! धर्मप्रवर्तको भगवान् तेन मार्गेण येषां तुष्येदेतत् सर्वमाख्याहि।।३५।। हे द्विजोत्तम!
दीनवत्सला गुरवोऽनुव्रतेभ्यः शिष्येभ्यः पुत्रेभ्यश्चाऽनापृष्टमप्यर्थं ब्रूयुः।। ३६।। हे मैत्रेय! तेषां
पृथिव्यादितत्त्वानां प्रलयः कतिधा? प्रलये परमात्मानमनुपसंहृताः के सेवन्ते, उत के वा जना
उपसंह्रियन्ते।।३७।। जीवस्य स्वकीयासाधारणं स्वरूपं परमात्मनो वा स्वरूपं, शास्त्रजन्यं
गुरुशिष्यसंमेलनसंसाध्यं च यज्ज्ञानं तद् ब्रूहि।।३८।। हे अनघ! बुधैस्तस्य ज्ञानस्य यानि
साधनानि प्रोक्तानि तानि च कथय, गुरूपदेशमन्तरा पुंसां ज्ञानं वैराग्यं भक्तिश्च कुत एव
भूयात्।।३९।। भगवच्चेष्टितविवित्सया कृतान् एतान् प्रश्नान् पृच्छतः प्रकृत्या हृतज्ञानस्य च
मे मित्रत्वात् त्वं मे ब्रूहि।।४०।। सर्वे वेदाः मखास्तपांसि ज्ञानानि च जीवाभयप्रदानस्य
कलामपि न कुर्वीरन्, अभयदानफललेशमपि नैते संपादयितुमर्हन्ति।।४१।। *श्रीशुक उवाच*-
विदुरेण भगवत्कथायां प्रेरितो मुनिवर्यः प्रहसन्निव तं विदुरं प्रत्याह।।४२।।

इति श्रीमद्भागवते तृतीयस्कन्धे सप्तमोऽध्यायः।।७।।

अथ अष्टमोऽध्यायः ।।८।।

मैत्रेय उवाच – सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः। बभूविथेहाजितकीर्त्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् ।। १ ।। सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य । प्रवर्त्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः ।।२।। आसीनमुर्व्यां भगवन्तमाद्यं संकर्षणं देवमकुण्ठसत्त्वम् । विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ।। ३ ।। स्वमेव धिष्ण्यं बहु मानयन्तं यं वासुदेवाभिधमामनन्ति । प्रत्यग्धृताक्षाम्बुजकोशमीषदुन्मीलयन्तं विबुधोदयाय ।।४।। स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशन्तश्चरणोपधानम् । पद्मं यदर्चन्त्यहिराजकन्याः सप्रेम नानाबलिभिर्वरार्थाः ।। ५ ।। मुहुर्गृणन्तो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः। किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रम् ।।६।। प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन। सनत्कुमाराय स चाह पृष्टः सांख्यायनायाङ्ग धृतव्रताय ।। ७।।

।। सङ्ग्रहोक्तिः ।।

अथ अष्टमोऽध्यायः ।। ८।।

विष्णोर्नाभिकमलाद् ब्रह्मोत्पत्तिवर्णनम्

मैत्रेय उवाच – हे विदुर! अहो! पुरुवंशः सद्भिः सेव्यः, यत्र भगवत्प्रधानो लोकपालो यमस्त्वमवतीर्णः सन् हरेः कीर्त्तिं प्रतिक्षणं नवीनामिव पुनः पुनः शृणोषि ।।१।। अतो मया दुःखीनां दुःखनाशाय परमसुखप्राप्तये च भागवतं पुराणं वक्तुमारभ्यते, तच्छंकर्षणेन सनत्कुमारादिभ्य ऋषिभ्यः साक्षादुक्तम् ।।२।। उर्व्यां पातालतल उपविष्टमाद्यमकुण्ठसत्त्वं भगवन्तं संकर्षणं देवं परमात्मनो याथात्म्यं वेत्तुमिच्छव सनत्त्कुमारप्रभृतयश्चत्वारो मुनयोऽन्वपृच्छन् ।।३।। भगवन्तं वासुदेवं सर्वोत्कर्षेण पूजयन्तं मुकुलितनेत्रकमलकोशं सनकादीनामभ्युदयाय नेत्रे इषदुन्मीलयन्तम्, किरीटसहस्रजटितप्रवेकप्रद्योतितफणासहस्रं शेषं गङ्गाजलार्द्रस्वजटाकलापैः पादपीठमुपस्पृशन्तः अनुरागस्खलत्पदेन भगवच्चेष्टितानि मुहुः गृणन्तः सनत्कुमारादय अन्वपृच्छन् ।।४-६।। तत स शेषो निवृत्तिधर्माभिरतं सनत्कुमारादिकं प्रति भागवतं पुराणं

सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः। जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ।।८।। प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम्। सोऽहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ।।९।। उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयाऽमीलितदृङ्न्यमीलयत्। अहीन्द्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतावहीनः ।।१०।। सोन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः। उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः ।।११।। चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या । कालाख्ययासादित-कर्मतन्त्रो लोकान्निपीतान् ददृशे स्वदेहे ।। १२।। तस्यार्थसूक्ष्माभिनिविष्टदृष्टे-रन्तर्गतोऽर्थो रजसा तनीयान्। गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् ।।१३।। सपद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधितेन ।स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः।। १४।। तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम्।

।। सङ्ग्रहोक्तिः ।।

बभाषे, ततः सनत्कुमारः पृच्छते धृतव्रताय सांख्यायनाय तदेव पुराणमकथयत् ।।७।। एकान्तिकधर्मनिष्ठः सांख्यायनोऽपि मम बृहस्पतेश्च गुरवे पराशराय प्रोवाच ।।८।। स पराशरो मह्यं मैत्रेयाय प्रोवाच, सोऽहं नित्यमनुव्रताय श्रद्धालवे तुभ्यमेतद् भागवतं कथयामि ।।९।। यदा परमात्मा शेषशय्यायामधिशयान एकः स्वात्मसुखपूर्णः सन् योगनिद्रया लोचने न्यमीलयत् ।।१०।। तदा स भूतसूक्ष्माणि स्वान्तःशरीरेऽन्तर्धाप्य कालरूपां शक्तिं प्रेरयन् स भगवान् स्वकीये पदे रुद्धवीर्योऽनलो दारुणीव सलिल उवास ।।११।। चतुर्युगसहस्रान्तमेकार्णवोदके स्वपन् कालसंज्ञया स्वशक्त्या प्रापितकर्मतन्त्रः सन् स्वस्मिन् लीनान् भूतसूक्ष्मरूपानर्थान् ददृशे ।।१२।। ततः कालानुगतेनोद्भूतरजसा विराड्देहान्तःस्थितं भूतसूक्ष्मजातं जगदात्मकपद्म-रूपेण परिणतम् ।।१३।। परमात्मसृष्टः स कमलकोशः स्वरोचिषा सलिलं सूर्य इव विद्योतयन् कर्मप्रबोधितेन कालेन यथा स्वस्मिन् चतुर्दशभुवनरचना स्यात् तथा प्रवृद्धोऽभूत् ।।१४।। सर्वगुणावभासं तल्लोकपद्मं यस्माज्जातं स भगवान् अन्तर्यामितया तस्मिन् पद्मे प्रविवेश।

तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदन्ति सोऽभूत् ।।१५।। तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः। परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ।।१६।। तस्माद्युगान्तश्वसनावघूर्णजलोर्मिचक्रात् सलिलाद्विरूढम्। उपाश्रितः कञ्जमु लोकतत्त्वं नात्मानमद्धाऽविददादिदेवः ।।१७।। क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाऽब्जमनन्यदप्सु। अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सतानुभाव्यम् ।।१८।। स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरन्तर्जलमाविवेश। नार्वाग्गतस्तत्खरनालपद्मनाभिं विचिन्वंस्तदविन्दताजः ।।१९।। तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिणेमिः। यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः ।।२०।। ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः। शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ।।२१।। कालेन सोऽजः पुरुषायुषाऽभिप्रवृत्तयोगेन विरूढबोधः। स्वयं तदन्तर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वम् ।।२२।। मृणालगौरायतशेषभोगपर्यङ्क एकं पुरुषं शयानम्। फणातपत्रायुतमूर्द्धरत्नद्युभिर्हतध्वान्तयुगान्ततोये ।।२३।।

।। सङ्ग्रहोक्तिः ।।

ततो यं स्वयंभुवं वदन्ति स वेदमयो विधाता तस्मिन् पद्मे समुत्पन्नोऽभूत् ।।१५।। स स्वयंभूरपि कमलमध्यदेशेऽवस्थितः सन् लोकमपश्यमानः कमलमध्ये चतुर्दिक्षु परिभ्रमन्ननुदिशं चत्वारि मुखानि लेभे ।।१६।। प्रलयान्तपवनावघूर्णे जलोर्मीचक्रे विरुढं पद्ममाश्रितो ब्रह्मा पद्मतत्त्वं स्वं च तत्त्वेन नाऽविदत् ।।१७।। कमलकर्णिकायां स्थितोऽहं कः? अद्वितीयं पद्म केन हेतुना जातम्, एतस्याऽधिष्ठानं किम्? केनचिदधिष्ठानेन भाव्यम् ।।१८।। स ब्रह्माऽधः इत्थमुद्वीक्ष्य तन्नालनाडीभिरन्तर्जलमाविवेश, पद्माधिष्ठानं गवेषयन् अधः प्रदेशं गतःसन्नपि तदधिष्ठानं न लेभे ।।१९।। हे विदुर! अपारे तमसि स्वकारणं विचिन्वतो ब्रह्मणः संवत्सरशतमितो दीर्घः कालो व्यतीतोऽभवत् ।।२०।। ततोऽन्वेषणपराङ्मुखः सन् ब्रह्मा पुनस्तत्पद्म आस्थाय समाधिस्थोऽभूत् ।।२१।। एवं संवत्सरशतेन समाधिना तन्मनसि ज्ञानमुत्पन्नम्, यत् समाधेः पूर्वं स्वयं विचिन्वन् सन्नपि नाऽपश्यत् तत् स्वान्तर्हृदयेऽवभातमपश्यत् ।।२२।।

प्रेक्षां क्षिपन्तं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्द्धनः। रत्नोदधारौषधिसौमनस्य-
वनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः।।२४।। आयामतो विस्तरतः स्वमानदेहेन लोकत्रय-
संग्रहेण। विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रितवेषदेहम्।।२५।। पुंसां
स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मम्। प्रदर्शयन्तं कृपया नखेन्दु-
मयूखभिन्नाङ्गुलिचारुपत्रम्।।२६।। मुखेन लोकार्त्तिहरस्मितेन परिस्फुरत्कुण्डल-
मण्डितेन। शोणायितेनाधरबिम्बभासा प्रत्यर्हयन्तं सुनसेन सुभ्र्वा।।२७।।
कदम्बकिञ्जल्कपिशङ्गवाससा स्वलंकृतं मेखलया नितम्बे। हारेण चानन्तधनेन
वत्स श्रीवत्सवक्षःस्थलवल्लभेन ।।२८।। परार्घ्यकेयूरमणिप्रवेकपर्यस्तदोर्दण्ड-
सहस्रशाखम् । अव्यक्तमूलं भुवनाङ्घ्रिपेन्द्रमहीन्द्रभोगैरधिवीतवल्शम्।। २९।।
चराचरौको भगवन्महीध्रमहीन्द्रबन्धुं सलिलोपगूढम्। किरीटसाहस्रहिरण्यशृङ्गमा-
विर्भवत्कौस्तुभरत्नगर्भम्।।३०।। निवीतमाम्नायमधुव्रतश्रिया स्वकीर्त्तिमय्या
वनमालया हरिम्। सूर्येन्दुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदम्।।३१।।

।। सङ्ग्रहोक्तिः ।।

यो मृणालवद्गौरशेषाभोगपर्यंके शयान आसीत् छत्रवत्फणासहस्रमूर्द्धस्थितरत्नकिरीटा-
लंकृतमूर्द्धा, कौस्तुभरत्नधरः नैकविधमौक्तिकमालाधरः, वनजतुलसीमञ्जरीमालार्चितः दीर्घ-
दोर्दण्डमण्डितः प्रणतार्तिहारी सर्वसुखकरपादपद्मः आसीत्।।२३-२४।।तस्य देहः विचित्रदिव्य-
वस्त्राभरणैः सुशोभितः, लोकत्रयसंग्रहीतदैर्घ्येण प्रमाणरूप आसीत्।।२५।।तस्य चरणकमलं
स्वमनोरथसिद्ध्या आराधयतां जनानां कामदुघमासीत्,।।२६।।तस्य मुखं लोकार्त्तिहरस्मितं,
प्रोज्ज्वलकुण्डलाभ्यां मण्डितम्, अरुणाधरबिम्बभासा भक्तान् सस्नेहं सम्मानयन्तं बभूव
।।२७।। तस्य स्वरूपं कदम्बकिञ्जल्कवत्पीतवाससा मेखलया च नितम्बे विराजितम्
श्रीवत्सवक्षः स्थातिप्रियेण बहमूल्येन हारेण च भूषितमभवत्।।२८।। बहुमूल्याङ्गदालंकृत-
बाहुदण्डयुक्तं शेषफणावेष्टितस्कन्धम्।।२९।।चराचराणामाश्रयम्, अहीन्द्रबन्धुम्, सलीलोपगूढं
किरीटसाहस्रशृंगं, आविर्भवत्कौस्तुभरत्नमासीत्।।३०।।स्वकीर्त्तिं गायद्भि र्वेदरूपभ्रमरैराहित-
शोभया वनमालयाऽलंकृतम्, सूर्येन्दुवाय्वग्निभिः स्वव्यापारैराकलयितुमशक्यं, त्रिभुवने

तर्ह्येव तन्नाभिसरःसरोजमात्मानमम्भः श्वसनं वियच्च । ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ।। ३२ ।। स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा । अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ।। ३३ ।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे नामाष्टमोऽध्यायः ।।८।।

अथ नवमोऽध्यायः ।। ९।।

ब्रह्मोवाच - ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यम् । नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ।। १ ।। रूपं यदेतदवबोधरसोदयस्य शश्वन्निवृत्ततमसः सदनुग्रहाय । आदौ गृहीतमवतारशतैक-बीजं यन्नाभिपद्मभवनादहमाविरासम् ।।२।।

।। सङ्ग्रहोक्तिः ।।

भक्तरक्षार्थं परिभ्रमद्भिः सुदर्शनादिभिर्दुरासदं भगवन्तं विधिरपश्यत् ।। ३१ ।। यदा हरिमपश्यत् तदैव लोकसृष्ट्यर्थकज्ञानवान् ब्रह्मा भगवन्नाभिसरोजं, वायुं, स्वात्मानम्, आकाशं च ददर्श, तदन्यत् किमपि न ददर्श ।। ३२ ।। स ब्रह्मा रजोगुणयुक्तः अतः प्रजाः स्रष्टुमिच्छन्नपि नाभि-सरोजादिकमेव लोकसृष्टेः कारणमस्ति इति दृष्ट्वा लोकसर्जनप्रवणः भूत्वा भगवन्निवेशितात्मा सन् स्तुत्यं तमस्तौत् ।। ३३ ।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः ।।८।।

अथ नवमोऽध्यायः ।। ९।।

ब्रह्मकृता भगवत्स्तुतिः भगवतो ब्रह्मणे वरदानं च

ब्रह्मोवाच - हे भगवन्! बहुकालोपार्जितेन तपसा त्वमधुना मया ज्ञातोऽसि, तव स्वरूपं जनैर्न ज्ञायते, तज्जीवानां महान् दोषः, तत्त्वादिशरीरकमात्मानं परिणमय्य तन्मय एव जगद्रूपो भवसि ।।१।। त्वं सकलावतारकारणरूपमेतत्स्वरूपं भक्तानुग्रहाकांक्षया प्रकटितवान्, यस्य नाभिपद्मान्ममोत्पत्तिर्जाता ।।२।।

नातः परं परम यद्भवतः स्वरूपमानन्दमात्रमविकल्पमविद्धवर्चः। पश्यामि विश्वसृज-
मेकमविश्वमात्मन् भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ।। ३ ।। तद्वा इदं भुवनमङ्गल
मङ्गलाय ध्याने स्म नो दर्शितं त उपासकानाम्। तस्मै नमो भगवतेऽनुविधेम
तुभ्यं योऽनादृतो नरकभाग्भिरसत्प्रसङ्गैः ।।४।। ये तु त्वदीयचरणाम्बुजकोशगन्धं
जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम्। भक्त्या गृहीतचरणः परया च तेषां नापैषि
नाथ हृदयाम्बुरुहात्स्वपुंसाम् ।।५।। तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा
परिभवो विपुलश्च लोभः। तावत् ममेत्यसदवग्रह आर्त्तिमूलं यावन्न तेऽङ्घ्रिमभयं
प्रवृणीत लोकः ।।६।। दैवेन ते हतधियो भवतः प्रसङ्गात्सर्वाशुभोपशमनाद्वि-
मुखेन्द्रिया ये। कुर्वन्ति कामसुखलेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि
शश्वत् ।।७।। क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च।
कामाग्निनाच्युतरुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ।।८।। यावत्पृथ-
क्त्वमिदमात्मन इन्द्रियार्थं मायाबलं भगवतो जन ईश पश्येत्। तावन्न संसृतिरसौ
प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहति क्रियार्था ।। ९ ।।

।। सङ्ग्रहोक्तिः ।।

अनावृतप्रकाशं जातिगुणादिभेदरहितमानन्दमयं भवतो यत्स्वरूपं पश्यामि, अस्माद् भिन्नरूपं न पश्यामि, अत विश्वसृजं विश्वविलक्षणं तवैतद्रूपमहमुपाश्रितोऽस्मि ।।३ ।। हे भुवनमङ्गल! अस्माकं मङ्लाय येन त्वया समाधौ यद्रूपं दर्शितं तस्मै ते नमोऽस्तु ।।४ ।। ये तु कर्णविवरागतं कथायां श्रुतं त्वच्चरणकमलकोशगन्धं जिघ्रति तेषां भक्तानां हृदयकमलाद् भक्तिगृहीतचरणस्त्वं क्वापि नापसरसि ।।५ ।। किंच लोकस्य तावदेव धनगृहमित्रादिनिमित्तं भयशोकममत्वादिकं भवति, यावज्जनोऽभयदं त्वत्पादमूलं नाश्रयति ।।६ ।। ये लोभाभिभूतमनसः केवलं कामसुखायैवाऽकुशलानि कर्माणि कुर्वन्ति तथा सर्वाशुभनिवारकात् भवत्प्रसंगात् विमुखास्तिष्ठन्ति ते दैवाद् दुर्भाग्याः सन्ति ।।७ ।। हे उरुक्रम! क्षुधापिपासाशीतोष्णादिभिः, कामाग्निना, क्रोधेन च पीड्यमानाः प्रजाः पश्यतः मे मनो भृशं सीदति ।।८ ।। हे ईश! त्वन्मायाबलकारितं इन्द्रियविषयभोगार्थं देहगतपृथग्भावमात्मसंबन्धितया जनो यावत् पश्यति तावत् तस्य संसृतिबन्धनं न

अह्न्यापृतार्त्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः। दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति।।१०।। त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम्। यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय।।११।। नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः। यत्सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदन्तरात्मा।। १२।। पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च। आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः कर्हिचित् ह्रियते न यत्र।।१३।। शश्वत्स्वरूपमहसैव निरस्तभेदमोहावबोधधिषणाय नमः परस्मै। विश्वोद्भवस्थितिलयेषु निमित्तलीलारागाय ते नम इदं चकृमेश्वराय।।१४।। यस्यावतारगुणकर्मविडम्बनानि नामानि येऽसुविगमे विवशा गृणन्ति। तेऽनेकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये।।१५।। यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलम्। भित्त्वा त्रिपाद्ववृध एक उरुप्रोहस्तस्मै नमो भगवते भुवनद्रुमाय।। १६।।

।। सङ्ग्रहोक्तिः।।

निवर्तते।।९।।ये त्वद्भक्तिहीनाः सन्ति ते ऋषयोऽपि दिवसेऽतृप्तार्तकरणा निशि निःशयानाः, नानामनोरथधिया क्षणभग्ननिद्राः दैवेन विनष्टार्थोद्योगा संसारदुःखमनुभवन्ति।।१०।।शास्त्रप्रदर्शितमार्गस्त्वं भक्तियोगपरिशुद्धे भक्तहृत्कमले वससि, भक्ता यादृक्स्वरूपं त्वां ध्यायन्ति, भवानपि तादृशविग्रहविशेषो भवति।।११।।हे भगवन्! सर्वेषामन्तर्यामी भवान् असत्सु अलभ्यया सर्वभूतदयया यथा प्रसीदति तथा बद्धकामैः सुरगणैः पुष्कलपुष्पाद्युपहारैः आराधितः सन्नपि न प्रसीदति।।१२।।यज्ञदानतपोव्रतरूपै र्विविधनिष्कामकर्मभिः भगवत आराधनरूप आचरितो धर्मः कदापि न नश्यति।।१३।।सदा स्वरूपज्ञानेन भेदमोहादिनिवारकाय जगदुत्पत्तिस्थितिप्रलयनिमित्तलीलारसाय परमेश्वराय तुभ्यं नमस्कुर्महे।।१४।। ये जनाः प्राणान्तकालेऽपि यस्य तवावतारगुणचरित्रपूरितानि नामान्युच्चारयन्ति तेऽनेकजन्मजपापं सहसैव हित्वा विशुद्धं सत्यस्वरूपं त्वां प्राप्नुवन्ति, तमजन्मानमहं प्रपद्ये।।१५।। यो भुवनद्रुमः प्रथममेकः, स

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे। यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै।।१७।। यस्माद्बिभेम्यहमपि द्विपरार्द्धर्यधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत्। तेपे तपो बहुसवोऽवरुरुत्स्यमानस्तस्मै नमो भगवतेऽधिमखाय तुभ्यम्।।१८।। तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वाऽऽत्मेच्छयात्मकृतसेतुपरीप्सया यः। रेमे निरस्तरतिरप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय।।१९।। योऽविद्ययानुपहतोऽपि दशार्द्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः। अन्तर्जलेऽहिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन्।। २०।। यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण। तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय।।२१।। सोऽयं समस्तजगतां सुहृदेक आत्मा सत्त्वेन यन्मृडयते भगवान् भगेन। तनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ।। २२।।

।। सङ्ग्रहोक्तिः।।

जगदुद्भवावनलयाय अहं ब्रह्मा विष्णुः शिवश्च इति त्रिपाद्रूपो जातः, पश्चाद् बहुशाखः सन् प्रधानं गुणत्रयरूपेण विभज्य ववृधे, तस्मै भुवनद्रुमाय नमः।।१६।। हे हरे! अयं जनस्त्वदुदिते तवाराधनरूपे कुशले कर्मणि प्रमादयुक्तो वैषयिकसुखेष्वासक्तः सन् यावद्वर्त्तेत तावत् कालात्मा भवानिह लोके निबद्धां तस्य जीविताशां क्षिणोति, तस्मै ते कालरूपिणे नमः।।१७।। सर्वलोकनमस्कृतं सत्यलोकमारूढोऽहमपि कालशरीरात्त्वत्तो बिभेमि, एवं विधोऽहं त्वां समवाप्तुमिच्छन् बहुकालं बह्वयागान् कुर्वन् तपस्तेपे, तस्मा अधिमखाय भगवते नमः।।१८।। धर्मरक्षणाय तिर्यङ्मनुष्यदेवादिषु जीवयोनिषु स्वेच्छया देहं स्वीकृत्याऽस्पृष्टविषयसुखः सन् यस्त्वं लीलां करोषि तस्मै भगवते पुरुषोत्तमाय नमः।।१९।।यो भवान् पञ्चपर्वात्मिकयाऽविद्ययाऽनभिभूतः जठरस्थितजगद्वृत्तान्तः सन् भीमोर्मिमालिनि जले शेषशय्यायां जनसुखं प्रदर्शयन् योगनिद्रामनुभवति।।२०।। हे ईड्य! यस्य तव नाभिभवनाल्लोकत्रयोपकरणरूपोऽहं तवानुग्रहादेव जातोऽस्मि, योगनिद्रावसाने विकसत्कमलनेत्राय तुभ्यं नमः।।२१।। समस्तजगतां य एकः सहृद् आत्मा च भवति, यो भगवान् ज्ञानेनैश्वर्येण च विश्वं सुखयति, स मे प्रज्ञां तेन -

एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः। तस्मिन्स्वविक्रममिदं सृजतोऽपि चेतो युञ्जीत कर्मशमलं च यथा विजह्याम्॥२३॥ नाभिह्रदादिह सतोम्भसि यस्य पुंसो विज्ञानशक्तिरहमासमनन्तशक्तेः। रूपं विचित्रमिदमस्य विवृण्वतो मे मारीरिषीष्ट निगमस्य गिरां विसर्गः॥२४॥ सोऽसावदभ्रकरुणो भगवान्विवृद्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् । उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः॥ २५॥ *मैत्रेय उवाच* - स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः। यावन्मनोवचः स्तुत्वा विरराम स खिन्नवत्॥२६॥ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः । विषण्णचेतसस्तेन कल्पव्यतिकराम्भसा ॥२७॥ लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः। तमाहागाधया वाचा कश्मलं शमयन्निव॥२८॥ *श्रीभगवानुवाच* - मा वेदगर्भ गास्तन्द्रीं सर्ग उद्यममावह। तन्मयापादितं ह्यग्रे यन्मां प्रार्थयते भवान्॥२९॥ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम्। ताभ्यामन्तर्हृदि ब्रह्मँल्लोकान्द्रक्ष्यस्यपावृतान्॥३०॥

॥ सङ्ग्रहोक्तिः॥

ज्ञानेनैश्वर्येण च योजयतु येनाहं विश्वं पूर्ववत् स्रक्ष्यामि॥२२॥ भवदाज्ञयाऽस्य विश्वस्य सृष्टिं कुर्वतो मे मनस्तथाविधं करोतु यथा सृष्टिसम्भूतं विषमतामूलं पापं मां न संस्पृशेत्॥२३॥ इहाम्भसि शयानस्याऽनन्तशक्तेः पुंसो नाभिह्रदादहं जातः, अस्य भगवतो रूपं जगद् विवृण्वतो मे निगमगिरामुच्चारणं क्षीणं न स्यात्॥२४॥ अनल्पकरुणोऽसौ भगवान् स्नेहस्मितेन नयन कमलं विकासयन् सन् जगदुद्भवाय मधुरया गिरा नः खेदमपनयतात्॥२५॥ *मैत्रेय उवाच* - ब्रह्मा स्वजनकं भगवन्तं तपोविद्यासमाधिभिर्यावन् मनोवाग्बलं संस्तूय श्रान्तवद् विरराम ॥२६॥ ततो मधुसूदनो हरिः ब्रह्मणो भावं ज्ञात्वा प्रलयकालीनसमुद्रजलदर्शनेन ब्रह्माणं भीतं विलोक्य तदीयं मोहं निवारयन् गम्भीरया वाचा प्रोवाच॥२७-२८॥ *श्रीभगवानुवाच* - हे वेदगर्भ! त्वमालस्यं न कुरु, सृष्टौ प्रयत्नं कुरु, भवान् मां यत् प्रार्थयते, तन्मया पूर्वमेव सम्पादितमस्ति॥२९॥ हे ब्रह्मन्! त्वं पुनरपि तपो विद्यां = मदुपासनां च कुरु, तपोविद्याभ्यां स्वहृदये सर्वान् लोकान् स्पष्टरूपेण द्रक्ष्यसि॥३०॥

तत आत्मनि लोके च भक्तियुक्तः समाहितः। द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनः।।३१।। यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितम्। प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलम् ।। ३२।। यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः। स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति।।३३।। नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः । नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः।।३४।। ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः। यन्मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि ते।।३५।। ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम्। यन्मां त्वं मन्यसेऽयुक्तं भूतेन्द्रियगुणात्मभिः ।।३६।। तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः। नालेन सलिले मूलं पुष्करस्य विचिन्वते।। ३७।। यच्चकर्थाङ्ग मत्स्तोत्रं मत्कथाभ्युदयाङ्कितम्। यद्वा तपसि ते निष्ठा स एष मदनुग्रहः।। ३८।। प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया। यदस्तौषीद् गुणमयं निर्गुणं मानुवर्णयन्।। ३९।। य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत्। तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः।। ४०।।

।। सङ्ग्रहोक्तिः।।

ततो मद्भक्तियुक्तः समाहितस्त्वं त्वयि लोके च व्याप्तं मां, मयि च मच्छरीरभूतान् लोकान् द्रक्ष्यसि।।३१।। हे ब्रह्मन्! काष्ठेषु वह्निमिव सर्वभूतेषु स्थितं मां यदा लोकः पश्येत्, तदा स कश्मलं=दुःखं मोहं च जह्यात्।।३२।। यदा जनो भूतानि, इन्द्रियाणि, सत्त्वादिगुणाः, सवासनमन्तःकरणम्, इत्येतैर्विरहितं मया व्याप्तं च जीवं पश्येत् तदा सोऽकर्मवश्यत्वं प्राप्नोति।।३३ ।। अनेकविधकर्मविस्तारेण बहुविधाः प्रजाः सिसृक्षतस्तव चित्तं मदनुग्रहात् मोहं न प्राप्स्यति।।३४।। पापीयान् रजोगुणस्त्वां न बध्नीयात्, प्रजाः सृजतस्ते मनो मयि नितरामासक्तं भविष्यति।।३५।। अद्य त्वं देहासक्तानां दुर्ज्ञेयं मां ज्ञातवानसि, यतस्त्वं मां प्राकृतभूतेन्द्रियगुणात्मभिरयुक्तं मन्यसे।।३६।। मद्विषके विचारे सति सलिले कमलस्य नालेन मां विचिन्वते तुभ्यमिदं मद्रूपं दर्शितवानस्मि।।३७।। त्वमिमां मद्विषयकां स्तुतिं कृतवानसि, एवं च तपसि या निष्ठा वर्तते, एतत् सर्वं मदनुग्रहेणैव जातम्।।३८।। कल्याणगुणप्रचुरं हेयगुणवर्जितं च मामनुवर्णयन् त्वं लोकसर्गेच्छया यदस्तौषीत् तेनाऽहं प्रसन्नोऽस्मि, तव

पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना। राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम्
।।४१।। अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि। अतो मयि रतिं कुर्याद्देहादि-
र्यत्कृते प्रियः।।४२।। सर्ववेदमयेनेदमात्मनात्मात्मयोनिना। प्रजाः सृज यथापूर्वं
याश्च मय्यनुशेरते।।४३।। *मैत्रेय उवाच* - तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः।
व्यज्येदं स्वेन रूपेण कञ्जनाभस्तिरोदधे।।४४।।

इति श्रीमद्भागवते तृतीयस्कन्धे नवमोऽध्यायः ।।९।।

अथ दशमोऽध्यायः ।।१०।।

विदुर उवाच - अन्तर्हिते भगवति ब्रह्मा लोकपितामहः। प्रजाः ससर्ज कतिधा
दैहिकीर्मानसीर्विभुः।।१।।

।। सङ्ग्रहोक्तिः ।।

कल्याणमस्तु।।३९।। यः पुमान् भवत्कृतेन स्तोत्रेण नित्यं स्तुत्वा मां भजेत् तस्योपरि सर्वकामानां वराणां चेश्वरोऽहमाशु प्रसीदेयम्।।४०।।पूर्त-यज्ञ-दान-तपो-योगसमाधिभिर्निष्पन्नं यन्मोक्षरूपं फलं तत् सर्वं मत्प्रीतिरिवेति तत्त्वज्ञानां मतम्।।४१।। हे धातः! अहं जीवानां धारक आत्माऽस्मि, अत एव प्रेयसामपि प्रष्ठोऽस्मि, आत्मत्वात् प्रेष्ठत्वाच्च मय्येव भक्तिं कुर्यात्, देहादिस्तु भक्त्यर्थं प्रीयोऽस्ति।।४२।।जीवानामन्तरात्मना परमेश्वरेण सृष्टेन वेदोक्त-ज्ञानेन यथापूर्वं प्रजाः सृज, या मत्स्वरूप उपसंहृतास्तिष्ठन्ति।।४३।।प्रकृतिपुरुषयोर्नियन्ता भगवान् पद्मनाभो ब्रह्मण इदं ज्ञापयित्वा तिरोदधे।।४४।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः ।। ९।।

अथ दशमोऽध्यायः ।। १०।।

दशविधसर्गवर्णनम्

विदुर उवाच - भगवति नारायणे तिरोहिते सति लोकपितामहो ब्रह्मा देहजाताः संकल्पजाताश्च प्रजाः कतिधा ससर्ज।।१।।

ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम। तान्वदस्वानुपूर्व्येण छिन्धि नः सर्वसंशयान् ।।२।। *श्रीशुक उवाच* - एवं संचोदितस्तेन क्षत्त्रा कौषारवो मुनिः। प्रीतः प्रत्याह तान्प्रश्नान् हृदि स्थानथ भारत।। ३।। *मैत्रेय उवाच* - विरञ्चोऽपि तथा चक्रे दिव्यं वर्षशतं तपः। आत्मन्यात्मानमावेश्य यदाह भगवानजः।।४।। तद्विलोक्याब्ज-संभूतो वायुना यदधिष्ठितः। पद्ममम्भश्च तत्कालकृतवीर्येण कम्पितम्।।५।। तपसा ह्येधमानेन विद्यया वात्मसंस्थया। विवृद्धविज्ञानबलो न्यपाद्वायुं सहाम्भसा।।६।। तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितः। अनेन लोकान्प्राग्लीनान्कल्पिता-स्मीत्यचिन्तयत्।।७।। पद्मकोशं तदाविश्य भगवत्कर्मचोदितः। एकं व्यभाङ्क्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा।।८।। एतावान् जीवलोकस्य संस्थाभेद उदाहृतः। धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ।। ९।। *विदुर उवाच* - यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः। कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो।। १०।। *मैत्रेय उवाच* - गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः। पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत् ।। ११।।

।। सङ्ग्रहोक्तिः।।

हे मैत्रेय! मया येऽन्ये प्रश्नास्तुभ्यं पृष्टास्तानानुपूर्व्येण वदस्व, हे बहुवित्तम! अस्माकं सर्वसंशयान् छिन्धि।।२।। *श्रीशुक उवाच* – हे भारत! इत्थं विदुरेण पृष्टो मुनिर्मैत्रेयः प्रीतः सन् हृदिस्थान् सर्वान् प्रश्नान् प्रत्याह।।३।। वैराजो भगवान् यदाह तथा ब्रह्माऽपि परमात्मनि मनःस्थिरं कृत्वा देवमानेन शतवर्षपर्यन्तं तपश्चक्रे।।४।। ततः कमलोत्पन्नो ब्रह्माऽपि यत् पद्ममधिष्ठितः तत् पद्मं जलं च प्रलयकालेन वायुना कम्पितं विलोक्य तपोविद्याभ्यां विवृद्धविज्ञानबलः सन्नम्भसा सह वायुं पपौ।।५-६।। ततो विधिर्यत् पद्ममधिष्ठाय स्थितः तद्विलोक्याऽनेन पद्मेन प्राक् लीनान् लोकान् स्रक्ष्यामीति व्यचिन्तयत्।।७।। कर्मणि भगवता प्रेरितः ब्रह्मा तत् पद्मकोशं त्रिधा = भूम्यन्तरिक्षस्वर्गात्मना चतुर्दशधाऽपि विभक्तं कृतवान्।।८।। ब्रह्मणो जीवानां भोगस्थानस्य रचनाविशेष एतावानेव कथितः, यतो निष्कामस्य धर्मस्याऽसौ ब्रह्मा फलस्वरूपो भवति।।९।। *विदुर उवाच* – हे ब्रह्मन्! चिदचिदात्मना बहुरूपभाजोऽद्भुतकर्मणो हरेः कालाख्यं

विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया। ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना ॥१२॥ यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशम्। सर्गो नवविधस्तस्य प्राकृतो वैकृतश्च यः॥१३॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः। आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः॥१४॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः। भूतसर्गस्तृतीय-स्तु तन्मात्रद्रव्यशक्तिमान्॥ १५॥ चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः। वैकारिको देवसर्गः पञ्चमो यन्मयं मनः॥१६॥ षष्ठस्तु तामसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु॥१७॥ रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः॥ १८॥ वनस्पत्योषधि-लतास्त्वक्सारा वीरुधो द्रुमाः। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः॥ १९॥ तिरश्चामष्टमः सर्ग सोऽष्टाविंशद्विधो मतः।

॥ सङ्ग्रहोक्तिः॥

स्वरूपं यथावद् वर्णय ॥१०॥ *मैत्रेय उवाच*– प्रधानाकारः पृथिव्यादिविशेषरहितः कारणान्तर-शून्यः परमपुरुषः प्रधानशरीरतया जगद्रूपेणात्मानमसृजत्॥११॥ विश्वाकारं ब्रह्म प्रकृत्यवस्था-मात्रविशिष्टं सत् भगवत्संकल्पसहकृतेन ईश्वरेण कालेन वशीकृतमासीत्॥१२॥ यथेदानीं कालपरिच्छिन्नं जगदस्ति तथा पूर्वमपि कालपरिच्छिन्नमासीत्, पश्चादपि जगत् कालपरि-च्छिन्नमेव भविष्यति, तस्य कालकृतः वस्तुनः सर्गः प्राकृतः वैकृतश्च पुनः नवधा कथितः, तत्र महत्तत्त्वादयः षट् प्राकृतसर्गाः मनुजादयस्त्रयो वैकृताः सर्गाः तदुभयमिलितो दशमः सर्गः॥१३॥ अस्य सर्गस्य कालद्रव्य गुणकृतः प्रलयः त्रिविधः, तत्र कालकृतो नित्यप्रलयः, द्रव्यकृतो नैमित्तिकः प्रलयः, गुणकृतः प्राकृतः प्रलयः, गुणानां वैषम्यरूपो महत्तत्त्वस्य सर्गः प्रथमः, अहङ्कारस्य सर्गो द्वितीयः, महाभूतानां सर्गस्तृतीयः, इन्द्रियाणां सर्गश्चतुर्थः, देवतानां सर्गः पञ्चमः॥१४-१६॥ ब्रह्मणाऽज्ञानपूर्वं कृतस्तामसः = पञ्चपर्वा-ऽविद्यात्मकः सर्गः षष्ठः, इमे षट् सर्गाः प्राकृताः, अथ वैकृतान् सर्गान् शृणु॥१७॥ विधिशरीरकस्य भगवतः इयं सर्गसर्जनरूपा लीला भवति, स्थावराणां सर्गः सप्तमः, स षड्विधः॥१८॥ ते स्थावराः – वनस्पतयः, ओषधयः, लताः, त्वक्साराः वीरुधः, द्रुमाः, एते षड्॥१९॥ पशुपक्षिणां सर्गोऽष्टमः,

अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः।। २०।। गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम।।२१।। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः शृणु पञ्चनखान्पशून्।।२२।। श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ। सिंह कपिर्गजः कूर्मो गोधा च मकरादयः।।२३।। कङ्कगृध्रवटश्येनभासभल्लूकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः।।२४।। अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम्। रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः।।२५।। वैकृतास्त्रय एवैते देवसर्गश्च सत्तम। वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः।।२६।। देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याध्राः किंनरादयः।।२७।। दशैते विदुराख्याताः सर्गास्ते विश्वसृट्कृताः। अतः परं प्रवक्ष्यामि वंशान्मन्वन्तराणि च।।२८।। एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः। सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना।।२९।।

।। सङ्ग्रहोक्तिः ।।

स चाष्टाविंशतिधा।।२०।। ते च गौः, अजः, महिषः, हरिणः, शूकरः, गवयः, रुरुः, मेषः उष्ट्रः एते नव द्वि शफाः।।२१।। खरः, अश्वः, अश्वतरः, गौरः, शरभः, चमरी एते षट् एक शफाः।।२२।। कुक्करः, शृगालः, वृकः, व्याघ्रः, मार्जारः, शशः, शल्लकः, सिंहः, कपिः, गजः कूर्मः, गोधा, मकरादय एते त्रयोदश पञ्चनखाः।।२३।। कङ्कः, गृध्रः, वटः, श्येनः, भासः भल्लूकः, मयूरः, हंसः, सारसः, चक्रवाकः, काकः, उलूकः, एते खगाः।।२४।। एकविधो मानवानां सर्गः नवमः, ते मानवा रजःप्रधानाः, कर्मपराः दुःखे सुखमानिनो भवन्ति।।२५।। एवं स्थावरतिर्यङ्मानुषभेदेन वैकृतः सर्गः त्रिविधः देवसर्गोऽपि वैकृतः एव, कौमारसर्गस्तूभयात्मकः।।२६।।देवसर्गोऽष्टविधः – देवाः, पितरः, असुराः, गन्धर्वाप्सरसः, यक्षरक्षांसि, भूतप्रेत-पिशाचाः, सिद्धचारणाः विद्याधरकिन्नरादयः एते अष्ट।।२७।। एवं ब्रह्मकृताः प्राकृतवैकृतोभयात्मका दश सर्गाः तुभ्यमाख्याताः, अतःपरं राज्ञां वंशान् मन्वन्तराणि च वक्ष्यामि।।२८।। हे विदुर! एवं कल्पादौ ब्रह्मशरीरकः सत्यसङ्कल्पः परमात्मा उद्रिक्तरजोगुणः सन्

गुणव्यत्यय एतस्मिन्मायावित्वादधीशितुः। पौर्वापर्यं न चेच्छन्ति सृष्टे नद्यां यथा भ्रमेः।। ३०।। देवासुरादयो नामरूपाभ्यां ये प्रकीर्त्तिताः। अस्मिन् कल्पे त एवासन् क्षत्तर्मन्वन्तरान्तरे ।। ३१।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे दशमोऽध्यायः ।।१०।।

अथ एकादशोऽध्यायः ।।११।।

मैत्रेय उवाच – चरमः सद्विशेषाणामनेकोऽसंयुतः सदा। परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ।।१।। सत एव पदार्थस्य स्वरूपावस्थितस्य यत्। कैवल्यं परममहानविशेषो निरन्तरः।। २।। एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम। संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः।। ३।।

।। सङ्ग्रहोक्तिः।।

सूक्ष्मचिदचिद्विशिष्टं जगत् स्वयमेव स्थूलचिदचिद्विशिष्टरूपेण सृजति।।२९।। अधीश्वरस्य परमात्मन आश्चर्यशक्त्युपेतत्त्वात् यथा नद्यामावर्तबुद्बुदादीनामुत्पत्तिर्युगपद्भवति तद्वदेवास्मिन्नण्डसर्गे ब्रह्माण्डस्योत्पत्तिर्युगपदेव भवति।।३०।। हे विदुर! अस्मिन् कल्पे ये देवासुरादयो नामरूपाभ्यां प्रकीर्त्तिताः, मन्वन्तरान्तरे कल्पान्तरेऽपि त एवासन्।।३१।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः ।।१०।।

अथ एकादशोऽध्यायः ।।११।।

मन्वन्तरादिकालपरिमाणनिरूपणम्

मैत्रेय उवाच – कार्यस्यांशानां योऽन्त्यांशः= अत्यल्पो भागः, यस्यांशो नास्ति, यः कार्यावस्थामप्राप्तः, समुदायावस्थां चाऽप्राप्तः स परामणु विज्ञेयः।।१।। यस्याऽन्त्यांशः परमाणुस्तस्यैव कार्यमात्रस्य यदैक्यं स परममहान् = निरतिशयप्रकर्षो ज्ञेयः योऽविशेषो निरन्तरश्च भवति।।२।। हे सत्तम! यथा सूक्ष्मः स्थूलश्चायं पदार्थः, एवं कालोऽप्यनुमितो विभुः परमाणवाद्यवस्थाव्याप्त्या व्यक्तं व्याप्नोति।।३।।

स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्। सतो विशेषभुग्यस्तु स कालः परमो
महान्।।४।। अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रिभिः स्मृतः। जालार्करश्म्यवगतः
खमेवानुपतन्नगात्।।५।। त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः। शतभागस्तु
वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः।।६।। निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः
क्षणः। क्षणान् पञ्च विदुः काष्ठां लघु ता दश पञ्च च।।७।। लघूनि वै समाम्नाता
दश पञ्च च नाडिका। ते द्वे मुहूर्त्तः प्रहरः षड् यामः सप्त वा नृणाम्।।८।।
द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः। स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम्
।।९।। यामाश्चत्वारश्चत्वारो मर्त्त्यानामहनी उभे। पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च
मानद।।१०।। तयोः समुच्चयो मासः पितृणां तदहर्निशम्। द्वौ तावृतुः षडयनं
दक्षिणं चोत्तरं दिवि।।११।। अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः।

।। सङ्ग्रहोक्तिः ।।

हे विदुर! कालमानं शृणु - सूर्यो यावता कालेन परमाणुदेशमतिक्रामति, तावान् कालः परमाणुः, यावता च द्वादशराश्यात्मकं सर्वभुवनकोशमतिक्रामति, स परममहान् कालः संवत्सरात्मकः।।४।। परमाणू द्वावणुः, अणुत्रये त्रसरेणुः, स जालार्करश्मिषु दृश्यते, अतिलघुत्वेन खमनुपतन् सन्नेवाऽगात्, स भूमिं न पतति।।५।। त्रसरेणुत्रयं त्रुटिकालः, त्रुटीनां शतेन वेधः, त्रिभिर्वेधैर्लवः स्मृतः।।६।। त्रिभिर्लवैर्निमेषः, त्रिभिर्निमेषैः क्षणः, पञ्चभिः क्षणैः काष्ठा, पञ्चदशभिः काष्ठाभिर्लघु।।७।। पञ्चदश लघूनि नाडिका, द्वेनाडिके एको मुहूर्तः, षट् सप्त वा नाडिका नृणां प्रहरः।।८।। षट्पलपरिमितताम्रपात्रस्य ताम्रकूटेन प्रस्थजलपूर्णं पात्रं विधाप्य, तन्मध्यदेशे विंशतिगुञ्जातुलितसुवर्णस्य चतुरङ्गुलायतशलाकां सुवर्णकारेण कारयित्वा तस्याः अन्तः प्रवेशो यावता छिद्रेण स्यात्तावच्छिद्रं च कारयित्वा, पात्रान्तरभृतजलोपरि निधाप्य प्रस्थजलपूर्त्या यावन्निमज्जेत् तावान् कालो नाडिका = घटिका ज्ञेयः।।९।। नृणामष्टौ यामा अहोरात्रम्, पञ्चदशाऽहोरात्रैः पक्षः, स शुक्लः कृष्णश्च द्वौ।।१०।। पक्षद्वयेन मासः तत् पितृणामहोरात्रम्, मासद्वयेन ऋतुः, त्रिभिः ऋतुभिरयनम्, तद् दक्षिणमुत्तरं च।।११।। द्वाभ्यामयनाभ्यां देवानामहोरात्रम्, तदेव नृणां संवत्सरः, एवं

संवत्सरशतं नृणां परमायुर्निरूपितम् ।।१२।। ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् । संवत्सरावसानेन पर्येत्यनिमिषो विभुः ।।१३।। संवत्सरः परिवत्सर इडावत्सर एव च । अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ।।१४।। यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः । कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपञ्चकाय ।।१५।। *विदुर उवाच* – पितृदेवमनुष्याणामायुः परमिदं स्मृतम् । परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ।।१६।। भगवान्वेद कालस्य गतिं भगवतो ननु । विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ।।१७।। *मैत्रेय उवाच* – कृतं त्रेता द्वापारं च कलिश्चेति चतुर्युगम् । दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम् ।।१८।। चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् । संख्यातानि सहस्राणि द्विगुणानि शतानि च ।।१९।। संध्यांशयोरन्तरेण यः कालः शतसंख्ययोः । तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ।।२०।। धर्मश्चतुष्पान्मनुजान्कृते समनुवर्त्तते । स एवान्येष्वधर्मेण व्येति पादेन वर्द्धता ।।२१।।

।। सङ्ग्रहोक्तिः ।।

नृणामायुः संवत्सरशतम् ।।१२।। ग्रहर्क्षताराचक्रस्थः सूर्यः परमाण्वादिना संवत्सरावसानेन भुवनकोशं पर्यटति ।।१३।। संवत्सराः पञ्चविधाः, ते च संवत्सरः परिवत्सर इडावत्सरोऽनुवत्सरो वत्सरश्चेति ।।१४।। हे जनाः! यः परमात्मा स्वशक्त्या सृज्यानां शक्तिं परिणामयन् पुंसो मोहनाशायाऽन्तरिक्षे धावति तस्मै संवत्सरपञ्चकप्रवर्तकाय पूजां कुरुत ।।१५।। *विदुर उवाच* - पितृदेवमनुष्याणामायुस्त्वयोक्तं तच्छ्रुतम्, ये तु त्रैलोक्याद् बहिः स्थिताः, तेषां गतिं वद ।।१६।। भवान् भगवतः कालस्य गतिं वेद, यतो योगिनो योगसिद्धेन चक्षुषा विश्वं पश्यन्ति ।।१७।। *मैत्रेय उवाच* – कृतं, त्रेता, द्वापरं, कलिश्चेति चतुर्युगं देवानां द्वादशभिर्वर्षसहस्रैर्भवति ।।१८।। कृतादियुगेषु चत्वारि त्रीणि द्वे एकमिति यथाक्रमं सहस्राणि द्विगुणानि शतानि च वर्षाणां प्रमाणं कथयन्ति ।।१९।। वर्षाणां या शतसंख्या प्रोक्ता सा युगस्याद्यन्तयोः सन्ध्यांशकालः, सन्ध्यांशयोर्मध्ये यः कालस्तं युगं ब्रुवन्ति ।।२०।। कृतयुगे चतुर्भिः पादैः पूर्णो धर्मो भवति, स एव धर्मस्त्रेतादियुगेषु एकैकचतुर्थांशेन वर्धमानेनाऽधर्मेणैकैकचतुर्थांशः क्षीणो भवति ।।२१।।

त्रैलोक्याद्युगसाहस्रं बहिराब्रह्मणो दिनम्। तावत्येव निशा तात यन्निमीलति विश्वसृक्।।२२।। निशावसान आरब्धो लोककल्पोऽनुवर्त्तते। यावद्दिनं भगवतो मनून् भुञ्जंश्चतुर्दश। स्वं स्वं कालं मनुर्भुङ्क्ते साधिकां ह्येकसप्ततिम्।।२३।। मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः। प्रभवन्ति ते युगपत्सुरेशाश्चानु ये च तान् ।।२४।। एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः। तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः।।२५।।मन्वन्तरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्त्तिभिः। मन्वादिभिरिदं विश्वमव-त्युदितपौरुषः।।२६।। तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः। कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये।।२७।। तमेवान्वपिधीयन्ते लोका भूरादयस्त्रयः। निशायामनुवृत्तायां निर्मुक्तशशिभास्करम्।।२८।। त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना। यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः।।२९ ।। तावत्त्रिभुवनं सद्यः कल्पान्तै-धितसिन्धवः। प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्मयः।। ३०।। अन्तः स तस्मिन्स-लिले आस्तेऽनन्तासनो हरिः। योगनिद्रामीलिताक्षः स्तूयमानो जनालयैः।। ३१।। एवंविधैरहोरात्रैः कालगत्योपलक्षितैः। अपक्षितमिवास्यापि परमायुर्वयःशतम्।।३२।।

।। सङ्ग्रहोक्तिः ।।

महर्लोकादिषु निवासिनां भृग्वादीनां चतुर्युगानां सहस्रमेकं दिनं तावन्मिता रात्रिश्च, यत्र ब्रह्मा शेते।।२२।। निशावसान आरब्धे लोककल्पे ब्रह्मणो दिने चतुर्दश मनवो जायन्ते।।२३।। ते मनवः किंचिदधिकां चतुर्युगानामेकसप्ततिं स्वं कालं भुञ्जते, तेषु मन्वन्तरेषु मनवः, मनुपुत्राः, ऋषयः, देवाः, इन्द्रः, हरेरवताराश्च जायन्ते।।२४।। त्रैलोक्यवृत्ति र्ब्रह्मण एष दैनन्दिनः सर्गः यस्मिन् पशु-पक्षि-नृ-देवानां स्वकर्मानुसारेण जन्मानि भवन्ति।।२५।। शुद्धं सत्वं बिभ्रत् भगवान् प्रतिमन्वन्तरं स्वावतारैर्मन्वादिभिश्च विश्वं रक्षति।।२६।।सायंकाले ब्रह्मा सृष्टिव्यापारा-णामुपसंहारं कृत्वा शेते।।२७।। ब्रह्मणो निशायां प्रवृत्तायां सूर्यचन्द्राभ्यां विना भूरादयस्त्रयो लोकाः प्रलयं यान्ति।।२८।। तस्मिन्नवसरे शेषमुखोत्थेन वह्निना त्रिषु लोकेषु दह्यमानेषु भृग्वादयो महर्षयः तप्ताः सन्तः महर्लोकाज्जनलोकं गच्छन्ति।।२९।। ततो वृद्धिं प्राप्ताः चतुःसमुद्रास्त्रिलोकीं प्लावयन्ति।।३०।। ततो जनलोकवासिभिः स्तूयमानो हरिः शेषशय्यायां

यदर्द्धमायुषस्तस्य परार्द्धमभिधीयते। पूर्वः परार्द्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्त्तते ।।३३।। पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत्। कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः।।३४।। तस्यैव चान्ते कल्पोऽभूद्यं पाद्ममभिचक्षते। यद्धरेर्नाभिसरस आसील्लोकसरोरुहम्।।३५।। अयं तु कथितः कल्पो द्वितीयस्यापि भारत। वाराह इति विख्यातो यत्रासीच्छूकरो हरिः।।३६।। कालोऽयं द्विपरार्द्धाख्यो निमेष उपचर्यते। अव्याकृतस्यानन्तस्य ह्यनादेर्जगदात्मनः।।३७।। कालोऽयं परमाण्वादिर्द्विपरार्द्धान्त ईश्वरः। नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनाम्।।३८।। विकारैः सहितो युक्तैर्विशेषादिभिरावृतः। अण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः।।३९।। दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्। लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः।।४०।। तदाहुरक्षरं ब्रह्म सर्वकारणकारणम्। विष्णोर्द्धाम परं साक्षात्पुरुषस्य महात्मनः ।।४१।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे एकादशोऽध्यायः ।।११।।

।। सङ्ग्रहोक्तिः ।।

स्वपिति।।३१।। कालगत्यैवंविधैरहोरात्रैर्ब्रह्मणः शतवर्षमितमायुर्व्यतीतप्रायमिव भवति।।३२।। ब्रह्मण आयुषोऽर्धं परार्धं कथ्यते, तत्र प्रथमः परार्धो व्यतीतः, अधुना द्वितीयः परार्धः प्रवर्तमानोऽस्ति।।३३।। पूर्वपरार्धस्याऽऽदौ ब्राह्मोनाम कल्पोऽभूत्, यस्मिन् कल्पे ब्रह्माणं "शब्दब्रह्म" इति विदुः।।३४।। पूर्वपरार्धस्यान्ते पाद्मः कल्पोऽभूत् यस्मिन् हरेर्नाभिसरसो भुवनकोशात्मकं कमलमासीत्।।३५।। अधुना द्वितीयपरार्धस्यादौ वाराहः कल्पः कथितः, यस्मिन् हरिर्वराहोऽभवत्।।३६।। अयं द्विपरार्धाख्यः कालोऽनन्तस्य सर्वान्तर्यामिणो नारायणस्य निमेषतुल्यो भवति।।३७।। एवं परमाण्वादि द्विपरार्धान्तः कालः परमात्मानं नियन्तुं समर्थो नैव भवति किन्त्वयं कालो देहगृहाद्यभिमानिनामेव नियामको भवति।।३८।। दशगुणमुत्तरोत्तराधिकैः पृथिव्याद्यष्टावरणैरावृतोऽयं ब्रह्माण्डकोशो बहिः पञ्चाशत्कोटियोजनमितो विशालोऽस्ति ।।३९।।स यस्मिन् परमात्मनि प्रविष्टः सन् परमाणुवल्लक्ष्यते, तस्य परमात्मनो रोमकूपेष्वीदृशाः कोटिशो ब्रह्माण्डराशय उड्डीयमाना लक्ष्यन्ते।।४०।। निगमागमादयः सर्वकारणकारणं तदक्षरं

अथ द्वादशोऽध्यायः ।। १२ ।।

मैत्रेय उवाच - इति मे वर्णितः क्षत्तः कालाख्यः परमात्मनः। महिमा वेदगर्भोऽथ यथास्राक्षीन्निबोध मे ।। १ ।। ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् । महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ।। २ ।। दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत। भगवद्ध्यानपूतेन मनसान्यांस्ततोऽसृजत् ।।३।। सनकं च सनन्दं च सनातनमथात्मभूः। सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ।।४।। तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः। तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ।। ५ ।। सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः। क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे ।।६ ।। धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः। सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ।। ७ ।।

।। सङ्ग्रहोक्तिः ।।

ब्रह्म आहुः, यन्महात्मनः पुरुषाकृतेः सर्वान्तर्यामिणः श्रीहरेः परंधाम = सर्वोत्कृष्टं निवासस्थानमाहुः तत्र कालः कथं प्रभुः स्यात् ।। ४१ ।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यामेकादशोऽध्यायः ।। ११ ।।

अथ द्वादशोऽध्यायः ।। १२ ।।

सनकादि-रुद्र-मरीच्यादि-सरस्वती-वेदादीनामुत्पत्तिः, मनोः शतरूपायाश्च जन्म

मैत्रेय उवाच - हे विदुर! एवं परमात्मनः कालरूपस्य महत्त्वं कथितम्, अथ वेदगर्भो यथा प्रजाः सृष्टवान् तच्छ्रूयताम् ।। १ ।। व्यष्टिसृष्ट्यादौ ब्रह्मा १- तमः = स्वरूपाप्रकाशः, २- मोहः = देहाद्यहंबुद्धिः, ३- महामोहः = ग्राम्यभोगेच्छा, ४ तामिस्रः = भोगप्रतिरोधे क्रोधः, ५- अन्धतामिस्रः = भोगनाशे मृतोऽस्मीति धीः, इति पञ्चाविद्या वृत्तीः ससर्ज ।। २ ।। तस्याः पापसृष्टेः संतोषमप्राप्य ब्रह्मा भगवद्ध्यानेन पूतमनसाऽन्यान् सनक-सनन्दन-सनातन-सनत्कुमाराख्यान् चतुर ऊर्ध्वरेतसः मुनीन् ससर्ज ।। ३-४ ।। किन्तु वासुदेवपरायणा मोक्षधर्माणस्ते तन्नैच्छन् ।। ५ ।। तदाऽनुशासनमस्वीकुर्वद्भिस्तैरवज्ञातः सन्नपि तत्कालोत्पन्नं दुर्विषहं क्रोधं नियुन्तुमुपचक्रमे ।। ६ ।। बुद्ध्या निगृह्यमाणोऽपि स क्रोधः प्रजापतेर्भ्रुवोर्मध्यात्

स वै रुरोद देवानां पूर्वजो भगवान् भवः। नामानि कुरु मे धातः स्थानानि च
जगद्गुरो।। ८।। इति तस्य वचः पाद्मो भगवान्परिपालयन्। अभ्यधाद्भद्रया वाचा
मा रोदीस्तत्करोमि ते।।९।। यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः। ततस्त्वामभि-
धास्यन्ति नाम्ना रुद्र इति प्रजाः।।१०।। हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही।
सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कृतानि मे।।११।। मन्युर्मनुर्महेशानो महान् शिव
ऋतध्वजः। धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलाम्बिका। इरावती सुधा दीक्षा रुद्राण्यो
रुद्र ते स्त्रियः।।१३।। गृहाणैतानि नामानि स्थानानि च सयोषिणः। एभिः सृज
प्रजा बह्वीः प्रजानामसि यत्पतिः।।१४।। इत्यादिष्टः स गुरुणा भगवान्नीललोहितः।
सत्त्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः।। १५।। रुद्राणां रुद्रसृष्टानां समंताद्
ग्रसतां जगत्। निशाम्यासंख्यशो यूथान्प्रजापतिरशङ्कत।। १६।। अलं प्रजाभिः
सृष्टाभिरीदृशीभिः सुरोत्तम। मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः।।१७।।

।। सङ्ग्रहोक्तिः।।

सद्यो नीललोहितः कुमारः मन्युनामकपुत्ररूपेणोत्पन्नोऽभूत्।।७।। देवानां पूर्वजः स भवो रुदन्नाह हे जगद्गुरो! मम नामानि स्थानानि च निर्दिश।।८।।ततः पद्मोद्भवो ब्रह्मा तद्वचःश्रुत्वो-वाच, हे वत्स! मा रोदीः, त्वदुक्त्यनुसारेणाऽहं करोमि।।९।। हे सुरश्रेष्ठ! यतस्त्वं सोद्वेगं बालकवद् रोदनमकरोस्ततस्त्वां "रुद्र" इति नाम्ना प्रजाः कथयिष्यन्ति ।।१०।। हे रुद्र! मयाऽग्रे तव हृदयम्, इन्द्रियाणि, प्राणाः, नभः, वायुः, वह्निः, जलं, भूः, सूर्यः, चन्द्रः, तपः, इति स्थानानि कृतानि सन्ति।।११।। मन्युः, मनुः, महेशानः, महान्, शिवः, ऋतध्वजः, उग्ररेताः, भवः, कालः, वामदेवः, धृतव्रतः, इति चैकादश नामानि तव सन्ति।।१२।। धीः, वृत्तिः उशना, उमा, नियुत्, सर्पिः, इला, अम्बिका, इरावती, सुधा, दीक्षा चेति, हे रुद्र! एता रुद्राण्यस्ते स्त्रियः सन्ति।।१३।। हे रुद्र! त्वं सस्त्रीकः सन् इमानि नामानि स्थानानि च गृहीत्वा बह्वीः प्रजाः सृज।।१४।। इति ब्रह्मणाऽऽदिष्टः कुमारो नीललोहितो रुद्रो स्वस्य नीलवर्णबलस्वभावानुरूपाः बह्वीः प्रजाः ससर्ज।।१५।।ततो जगद् ग्रसतां रुद्रसृष्टानां समन्तात् रुद्राणां यूथानि दृष्ट्वा प्रजापतिराशङ्क्याह।।१६।। हे सुरोत्तम! उल्बणैश्चक्षुर्भिर्मां दिशश्च

तप आतिष्ठ भद्रं ते सर्वभूतसुखावहम्। तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान्
।।१८।। तपसैव परं ज्योतिर्भगवन्तमधोक्षजम्। सर्वभूतगुणावासमञ्जसा विन्दते
पुमान्।।१९।। *मैत्रेय उवाच*– एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिम्। बाढमित्यमु-
मामन्त्र्य विवेश तपसे वनम्।।२०।। अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे।
भगवच्छक्तियुक्तस्य लोकसंतानहेतवः।।२१।। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः
क्रतुः। भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः।।२२।। उत्सङ्गान्नारदो जज्ञे
दक्षोऽङ्गुष्ठात्स्वयंभुवः। प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः।।२३।। पुलहो
नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः। अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत्
।।२४।। धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयम्। अधर्मः पृष्ठतो यस्मान्मृत्यु-
र्लोकभयंकरः।। २५।। हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात्। आस्याद्वाक्
सिन्धवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः।। २६।। छायायाः कर्दमो जज्ञे देवहूत्याः
पतिः प्रभुः। मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत्।। २७।।

।। सङ्ग्रहोक्तिः।।

दहन्तीभिः सृष्टाभिरीदृशीभिः प्रजाभिरलम्।।१७।। हे रुद्र! ते कल्याणमस्तु, त्वं सर्वभूतसुखावहं
तपश्चर, त्वं तपसैव यथापूर्वं विश्वं स्रक्ष्यसि।।१८।। यतो जनः सर्वभूतगुणावासमधोक्षजं
तेजोमयं भगवन्तं तपोद्वारा निश्चितं लभते।।१९।। *मैत्रेय उवाच* - इत्थं विधिनाऽऽदिष्टो
रुद्रो ब्रह्माणं परिक्रम्य, "बाढम्" इत्युक्त्वा तपश्चरितुं वनं विवेश।।२०।। अथ प्रजासर्गं
चिन्तयतो भगवच्छक्तियुक्तस्य ब्रह्मणो लोकसंततिवृद्धिकरा दश पुत्राः प्रजज्ञिरे।।२१।।तान्नाम्ना
निर्दिशति – मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः पुलहः, क्रतुः, भृगुः, वसिष्ठः, दक्षः, दशमो
नारदश्च।।२२।। तत्र ब्रह्मण उत्सङ्गान्नारदः, अङ्गुष्ठाद् दक्षः, प्राणाद् वसिष्ठः, त्वचो
भृगुः, करात् क्रतुः।।२३।। नाभेः पुलहः, कर्णाभ्यां पुलस्त्यः, मुखादङ्गिराः, नयनाद् अत्रिः
मनसो मरीचिः।।२४।। दक्षिणस्तनाद् धर्मः, पृष्ठाद् अधर्मश्च जातस्तस्मान्मृत्युर्जातः।।२५।।
हृदयात् कामः, भ्रुवः क्रोधः, अधरोष्ठाल्लोभः, मुखात् सरस्वती, लिङ्गात् समुद्राः
गुदाद्राक्षसाः।।२६।। छायायाः देवहूत्याः पतिः कर्दमः निर्जातः, एवं ब्रह्मणो मनसो देहाच्च

वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः। अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् ।।२८।। तमधर्मे कृतमतिं विलोक्य पितरं सुताः। मरीचिमुख्या ऋषयो विस्रम्भात् प्रत्यबोधयन्।।२९।। *मरीच्यादय ऊचुः* – नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे। यत्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः।।३०।। तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो। यद्वृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पते।।३१।। तस्मै नमो भगवते य इदं स्वेन शोचिषा। आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति।।३२।। *मैत्रेय उवाच* – स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन्। प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्ततः। तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः।।३३।। कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मखात्। कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथापुरा।।३४।। चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह। धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः।।३५।। *विदुर उवाच* – स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत्। यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन।। ३६ ।।

।। सङ्ग्रहोक्तिः ।।

जगत् जातम्।।२७।। हे विदुर! ब्रह्मा स्त्रीरूपां मनो हरन्तीं स्वसुतां सरस्वतीमकामामपि सकामः सन्नुपभोक्तुमैच्छदिति श्रुतम्।।२८।। अधर्मे कृतमतिं पितरं विलोक्य मरीचिमुख्याः सुता विश्वासाधिक्यात् तं प्रत्यबोधयन्।।२९।। *मरीच्यादय ऊचुः* – समर्थस्त्वं काममनिगृह्य दुरितरं गच्छेः यत्, एतत् पूर्वैर्ब्रह्मभिर्न कृतम्, अद्य न कुर्वन्ति, भाविनश्चापि न करिष्यन्ति।।३०।। हे जगद्गुरो! तेजिष्ठानामप्येतत् कर्म श्लाघार्हं न भवति, यतः श्रेष्ठानामाचारमनुतिष्ठन् जनः क्षेमाय कल्पते।।३१।। यः स्वसंकल्पज्ञानेनेदं जगदुपादयति स एव धर्मं रक्षितुं योग्यः, तस्मै भगवते नमः।।३२।। इत्थं संभाषमाणान् प्रजापतीन् पुत्रान् वीक्ष्य व्रीडितः प्रजापतिर्ब्रह्मा तां स्वां तनुं विजहौ, ब्रह्मणो घोरां तां तनुं दिशो जगृहुः, विज्ञाः यां तनुं निहारं तमो विदुः।।३३।। पूर्ववत् सुसंगतान् लोकानहं स्रक्ष्यामि, इति कदाचिद् ध्यायतो ब्रह्मणश्चतुर्भ्यो मुखेभ्यश्चत्वारो वेदा आविर्भूता अभवन्।।३४।। चातुर्होत्रं कर्म, यज्ञविस्तारः, आयुर्वेदाद्युपवेदाः, न्यायः, धर्मस्य तपःसत्यदयाशौचाख्याः पादाः, आश्रमास्तद्धर्माश्च जाताः।।३५।। *विदुर उवाच* – ब्रह्मा

मैत्रेय उवाच – ऋग्यजुःसामाथर्वाख्यान् वेदान्पूर्वादिभिर्मुखैः। शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात् क्रमात्।।३७।। आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः। स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः।।३८।। इतिहासपुराणानि पञ्चमं वेदमीश्वरः। सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः।।३९।। षोडश्युक्थ्यौ पूर्ववक्त्रात्पुरिष्यग्निष्टुतावथ। आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम्।।४०।। विद्या दानं तपः सत्यं धर्मस्येति पदानि च। आश्रमांश्च यथासंख्यमसृत्सह वृत्तिभिः।।४१।। सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा। वार्त्तासंचयशालीनशिलोञ्छ इति वै गृहे।।४२।। वैखानसा वालखिल्यौदुम्बराः फेनपा वने। न्यासे कुटिचकः पूर्वं बह्वोदो हंसनिष्क्रियौ।।४३।। आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च। एवं व्याहृतयश्चासन्प्रणवो ह्यस्य हृत्खतः।।४४।। तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः।

।। सङ्ग्रहोक्तिः ।।

वेदादीन् मुखतोऽसृजत् इति ज्ञातम्, किंतु हे तपोधन! ब्रह्मा येन येन यद् यद् असृजत् तन्मह्यं ब्रूहि।।३६।। *मैत्रेय उवाच* – ब्रह्मा पूर्वादिमुखैः ऋग्यजुःसामाथर्वाख्यान् वेदान् व्यदधात्, एवं होत्रम् इज्यां स्तुतिस्तोमं, प्रायश्चित्तं च क्रमाद् व्यधात्।।३७।। स पूर्वादिमुखैः आयुर्वेदं धनुर्वेदं गान्धर्ववेदं स्थापत्यं च क्रमाद् असृजत्।।३८।। सर्वदर्शनो ब्रह्मा इतिहासः पुराणानि मिलित्वा पञ्चमं वेदं सर्वेभ्यो वक्त्रेभ्यः ससृजे।।३९।।। षोडश्युक्थौ, चयनाग्निष्टोमौ, आप्तोर्यामातिरात्रौ, वाजपेयगोसवौ चेति यागान् पूर्वादिभ्यो मुखेभ्योऽसृजत्।।४०।। विद्या, दानं, तपः, सत्यमिति धर्मपादान्. वृत्तिसहितान् चतुर आश्रमान् असृजत्।।४१।। सावित्रं = त्रिरात्रम्, प्राजापत्यं = वर्षपर्यन्तम्, ब्राह्मं = वेदग्रहणान्तम्. नैष्ठिकं = आजीवनम्, ब्रह्मचर्यं = ब्रह्मचारिणां वृत्तीश्च, वार्ता, सञ्चयः, शालीनम्, शिलोञ्छश्चेति गृहस्थानां वृत्तीः सृष्टवान्।।४२।।वैखानसाः, वालखिल्यः औदुम्बरः, फेनपश्चेतिवानप्रस्थास्तद्वृत्तीश्च, कुटीचकः, बह्वोदः, हंसः, परमहंसश्चेति संन्यासिनस्तेषां वृत्तीश्चाऽसृजत्।।४३।। आन्वीक्षिकी = अध्यात्म-विद्या, त्रयी = कर्मविद्या, वार्ता = कृष्यादिरूपा, दण्डनीतिः = अर्थफला, पूर्वादिमुखक्रमेण व्याहृतयः, ब्रह्माऽसृजत्, तस्य हृदयाकाशात् प्रणवो बभूव।।४४।। प्रजापतेः लोमभ्य उष्णिक्

त्रिष्टुप् मांसात्स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ।।४५।। मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् । स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ।।४६।। ऊष्माण इन्द्रियाण्याहुरन्तस्था बलमात्मनः । स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः ।।४७।। शब्दब्रह्मात्मनस्तात व्यक्ताव्यक्तात्मनः परः । ब्रह्मावभाति विततो नाना-शक्त्युपबृंहितः ।।४८।। ततोऽपरामुपादाय स सर्गाय मनो दधे । ऋषीणां भूरिवीर्याणा-मपि सर्गमविस्तृतम् । ज्ञात्वा तद्वृद्धये भूयश्चिन्तयामास कौरव ।।४९।। अहो अद्भुत-मेतन्मे व्यापृतस्यापि नित्यदा । न ह्येधन्ते प्रजा नूनं दैवमत्र विघातकम् ।। ५०।। एवं युक्तकृतस्तस्य दैवं चापेक्षतस्तदा । कस्य रूपमभूद् द्वेधा यत्कायमभिचक्षते ।।५१।। ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत । यस्तु तत्र पुमान्सोऽभून्मनुः स्वायंभुवः स्वराट् ।।५२।। स्त्री याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः । तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे ।।५३।। स चापि शतरूपायां पञ्चापत्यान्यजीजनत् ।

।। सङ्ग्रहोक्तिः ।।

छन्दः त्वचो गायत्री छन्दः, मांसात् त्रिष्टुप् छन्दः, स्नायोः अनुष्टुप् छन्दः, अस्थ्नः जगतीछन्दः, मज्जायाः पङ्क्तिः छन्दः, प्राणात् बृहती छन्दश्च अभवत्, ब्रह्मणो जीवात् स्पर्शाः कादिमावसानाः, देहात् स्वराः अच् उत्पन्नाः ।।४५-४६।। ब्रह्मण इन्द्रियेभ्य ऊष्माणः शल्, बलाद् अन्तस्थाः यण्, क्रीडया षड्जर्षभादयः सप्त स्वरा अभवन् ।।४७।। शब्दब्रह्मशरीरः व्यक्ताव्यक्तात्मस्वरूपः परब्रह्म परमेश्वरो नानाशक्तिसमृद्धः सर्वान्तरात्मतयाऽवस्थितोऽवभाति ।।४८।। हे विदुर! ततः शब्दब्रह्मात्मकशरीराद् अन्यच्छरीरमादाय सर्गाय सृष्टिं विधातुं मनसाऽचिन्तयत्, भूरिसामर्थ्या-नामृषीणां सर्गविवृद्ध्यर्थं भूयश्चिन्तयामास ।।४९।। अहो, सर्वदा प्रजासर्गे प्रवृत्तस्य मे प्रजा न ह्येधन्ते, अत्र दैवमेव विघ्नकृद् इति प्रतिभाति ।।५०।। एवम् उचितचिन्तनरूपं कृतवतो ब्रह्मणो दैवानुकूल्येन रूपं द्वेधाऽभवत्, यद् रूपं शरीरं व्याहरन्ति ।।५१।। तस्माद् द्वितीयाद् रूपविभागात् स्त्रीपुंसात्मकं द्वन्द्वं समपद्यत, तत्र यः पुमान् स सम्राट् स्वायंभुवमनुरभूत् या स्त्री आसीत् सा स्वायंभुवमनोः महिषी शतरूपाख्या आसीत् ।।५२।। तदा मिथुनधर्मेण प्रजा एधाम्बभूविरे ।।५३।। मनुः स्वभार्यायां शतरूपायां पञ्चाऽपत्यान्यजीजनत्, प्रियव्रतः

प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत। आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम।।५४।। आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमाम् । दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ।। ५५।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः।। १३।।

श्रीशुक उवाच – निशम्य वाचं वदतो मुनेः पुण्यतमां नृप । भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः।।१।। *विदुर उवाच* – स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः। प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने।।२।। चरितं तस्य राजर्षेरादिराजस्य सत्तम। ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ।।३।। श्रुतस्य पुंसां सुचिरश्रमस्य नन्वञ्जसा सूरिभिरीडितोऽर्थः।

।। सङ्ग्रहोक्तिः।।

उत्तानपादश्चेति द्वौ पुत्रौ, आकूतिः देवहूतिः प्रसूतिश्चेति तिस्रः कन्याश्च।।५४।। मनुराकूतिं कन्यां रुचिमुनये, देवहूतिं कर्दमाय, प्रसूतिं दक्षप्रजापतये चाऽदात्, याभ्य उत्पन्नाभिः प्रजाभिर्जगदापूरितम्।।५५।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

यज्ञवराहस्य चरितं ऋषिभिः कृता तत्स्तुतिश्च

श्रीशुक उवाच – वदतो मुनेः पुण्यतमां वाचं निशम्य वासुदेवकथादृतो विदुरो मैत्रेयं पुनः पप्रच्छ।।१।। *मैत्रेय उवाच* – हे मैत्रेय! ब्रह्मणः प्रियः पुत्रः स्वायंभुवो मनुः प्रियां पत्नीं प्राप्य किं चकार।।२।। हे सत्तम! राजर्षेस्तस्य चरितं श्रद्धालवे मह्यं ब्रूहि, यतः स भगवद्भक्त आसीत्।।३।।सुचिरं कृतस्याऽध्ययनश्रमस्य एतदेव प्रयोजनं यत् मुकुन्दपादारविन्दाश्रितानां

यत्तद्गुणानुश्रवणं मुकुन्दपादारविन्दं हृदयेषु येषाम् ।। ४।। *श्रीशुक उवाच* - इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानम् । प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ।। ५।। *मैत्रेय उवाच* - यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः। प्राञ्जलिः प्रणतश्चैनं वेदगर्भमभाषत ।। ६।। *मनुरुवाच* - त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता। अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ।। ७।। तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु । यत्कृत्वेह यशो विष्वगमुत्र च भवेद् गतिः ।।८।। *ब्रह्मोवाच* - प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर। यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितम् ।।९।। एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ। शक्त्याऽप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ।।१०।। स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः। उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ।।११।। परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप। भगवांस्ते प्रजाभर्त्तुर्हृषीकेशोऽनुतुष्यति ।।१२।। येषां न तुष्टो भगवान्यज्ञलिङ्गः सनातनः । तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम् ।।१३।।

।। सङ्ग्रहोक्तिः ।।

भगवद्भक्तानां गुणानुवादश्रवणं कृतं भवेत् ।।४।। इति पृच्छन्तं विनीतं भगवत्पादपीठं विदुरं भगवत्कथायां प्रवर्त्त्यमानो मुनिर्मैत्रेयोऽभ्यभाषत ।।५।। यदा स्वायंभुवो मनुः स्वभार्यया सह जातः, तदा स विनम्रः प्राञ्जलिःसन् ब्रह्माणमभाषत ।।६।। त्वमेक एव सर्वभूतानां पिता पोषकश्चासि, अतस्तव सेवा केन कर्मणा भवेत् तद् ब्रूहि ।।७।। हे ईड्य! अस्मच्छक्येषु कर्मसु मध्ये केन कर्मणा ते सेवा स्यात्, येन कृतेन कर्मणाऽस्मिन् लोके यशः परलोके च सद्गतिः स्यात् ।।८।। *ब्रह्मोवाच* - हे तात! तुभ्यमहं प्रीतोऽस्मि, हे क्षितीश्वर! युवाभ्यां स्वस्ति स्तात्, यतः शुद्धेन मनसा "मां शाधि" इति स्वयमेवाऽऽवेदितम् ।।९।। हे वीर! पुत्रैः पितुरेतावती एव पूजा कार्या यत् यथाशक्ति पितुराज्ञा सादरं स्वीकार्या ।।१०।। अतस्त्वं स्वपत्न्यां गुणैः स्वसदृशानि सन्तानान्युत्पाद्य धर्मेण पृथिवीं पालयन् यागै र्हरिं यज ।।११।। हे नृप! प्रजारक्षयैव मम सर्वोत्तमा सेवा स्यात्, प्रजापालकस्य तवोपरि भगवान् विष्णुरतितुष्टो भविष्यति ।।१२।। यत्र यज्ञमूर्तिर्भगवान् येषां न तुष्टः तेषां धनविद्योपार्जनश्रमो निरर्थको भवति, -

मनुरुवाच – आदेशेऽहं भगवतो वर्त्तेयामीवसूदन । स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ।।१४।। यदोकः सर्वसत्त्वानां मही मग्ना महाम्भसि । अस्या उद्धरणे यत्नो देव देव्या विधीयताम्।।१५।। *मैत्रेय उवाच* – परमेष्ठी त्वपां मध्ये तदासन्नामवेक्ष्य गाम्। कथमेनां समुन्नेष्य इति दध्यौ धिया चिरम्।।१६।। पीतं मया जलं सर्वं पृथिवी च निवेशिता। सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता ।।१७।। अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः। यस्याहं हृदयादास स ईशो विदधातु मे।।१८।। इत्यभिध्यायतो नासाविवरात्सहसानघ। वराहतोको निरगादङ्गुष्ठ-परिमाणकः।।१९।। तस्याभिपश्यतः खस्थः क्षणेन किल भारत। गजमात्रः प्रववृधे तदद्भुतमिवाभवत्।।२०।। मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह। दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा।।२१।। किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितम्। अहो बताश्चर्यमिदं नासाया मे विनिःसृतम्।।२२।।

।। सङ्ग्रहोक्तिः ।।

यतस्तेनाऽन्तस्थो भगवानुपेक्षितः।।१३।। *मनुरुवाच* – हे पापनाशन! अहं भगवत आज्ञायां वर्तिष्ये, किन्तु हे प्रभो! प्रजानां मम च निवासस्थानं निर्दिश, अत्र स्थातव्यमित्यनुज्ञां देहि।।१४।। सर्वभूतानां निवासस्थानभूता भूमिरेकार्णवजले मग्नाऽस्ति, हे देव! अस्या उद्धरणे यत्नो विधीयताम्।।१५।। *मैत्रेय उवाच* – ब्रह्मा तु जलमध्ये निमग्नां भूमिं ज्ञात्वा एनां कथमुद्धरिष्यामि, इति मनीषया चिरं चिन्तयामास।।१६।। प्रालयिकं कृत्स्नं जलं मया पीतं, पृथिवी च स्थापिता, ततः प्रजाः सृजतः क्षितिः जलैः प्लाव्यमाना सती रसातलं गताऽस्ति ।।१७।।सृष्टिविधाने प्रयुक्तैरस्माभिः किं विधेयम्? यस्य भगवतो हृदयादहं जातः स म इदं कर्त्तव्यं विदधातु।।१८।। हे अनघ! इत्थं हृदि विचारयतो ब्रह्मणो नासाविवरात् सहसाऽङ्गुष्ठमात्रो वराहपोतो निर्गतः।।१९।।हे भारत! अभिपश्यतस्तस्याऽग्रे स वराहपोतः क्षणमात्रेण गजपरिमाणो ववृधे, तदत्याश्चर्यमिवाऽभवत्।।२०।। मरीचिप्रमुखाः कुमारा मनुश्च ब्रह्मणः पुत्रा तद्वराहरूपं दृष्ट्वाऽनेकधा तर्कयामासुः।।२१।। ब्रह्माऽपि "इदं सौकरनिमित्तं दिव्यमद्भुतं सत्त्वं किम्?" यन्मे नासाया विनिःसृतम् अहो! आश्चर्यं इत्याह।।२२।।

दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद् गण्डशिलासमः। अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः।।२३।। इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः। भगवान्यज्ञपुरुषो जगर्जागेन्द्रसंनिभः।।२४।। ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान्। स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः।।२५।। निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामय-सूकरस्य। जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म।।२६।। तेषां सतां वेदवितानमूर्त्तिर्ब्रह्मावधार्यात्मगुणानुवादम्। विनद्य भूयो विबुधोदयाय गजेन्द्र-लीलो जलमाविवेश।।२७।। उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् खररोम-शत्वक्। खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः।। २८।। घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वराङ्गः। करालदंष्ट्रोऽप्यकरालदृग्भ्या-मुद्वीक्ष्य विप्रान् गृणतोऽविशत्कम्।।२९।। स वज्रकूटाङ्गनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान्। उत्सृष्टदीर्घोर्मिभुजैरिवार्त्तश्चुक्रोश यज्ञेश्वर पाहि मेति।। ३०।। खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायाम्। ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त।। ३१।।

।। सङ्ग्रहोक्तिः ।।

प्रथममङ्गुष्ठपर्वमात्रो दृष्टः, क्षणेन गण्डशिलासमो जातः, मम मनः खेदयन्नयं भगवान् यज्ञो भवेदपि स्वित्।।२३।। इत्थं पुत्रैः सह ब्रह्मणो विचारयतः सतः गिरीन्द्रसदृशो भगवान् जगर्ज।।२४।। दिशो निनादयता स्वगर्जितेन वराहमूर्तिर्भगवान् विधिं मरीच्यादींश्च हर्षयामास।।२५।। आश्चर्यमयवराहस्वरूपस्य स्वखेदनिवारकं घर्घरध्वनिं श्रुत्वा जनतपसत्यलोकनिवासि-नस्तं त्रयीसूक्तैः स्तुवन्ति स्म।।२६।। यज्ञमूर्तिः स वराहो मरीच्यादिभिः कृतं स्वगुणानुवादं निशम्य भूयो गर्जनं विधाय देवानां हिताय पुनर्जलमाविवेश।।२७।। उत्क्षिप्तपुच्छोऽन्तरिक्षचारी कठोरः सटा विधुन्वन् खुराहताभ्रः सितदंष्ट्रो महीध्रो भगवान् बभासे।।२८।। वराहछद्मा करालदंष्ट्रो स घ्राणेन पृथिवीमार्गमन्वेशयन् स सौम्यदृष्ट्यास्तोतॄन् विप्रान् समीक्ष्य जलमाविशत्।।२९।। वज्रकूटाङ्गस्य भगवतो जले पतनेन विशीर्णकुक्षिः समुद्र उत्सृष्टदीर्घोर्मिभुजैः प्रणम्येवाऽऽर्तः सन् "यज्ञेश्वर मां पाहि" इति चुक्रोश।।३०।। स भगवान् प्रलयसमये जीवधानीं

स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः। तत्रापि दैत्यं
गदयापतन्तं सुनाभसंदीपिततीव्रमन्युः।।३२।। जघान रुन्धानमसह्यविक्रमं
सलीलयेभं मृगराडिवाम्भसि। तद्रक्तपङ्क्ताङ्कितगण्डतुण्डो यथा गजेन्द्रो जगती
विभिन्दन्।।३३।। तमालनीलं सितदन्तकोट्या क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग।
प्रज्ञाय बद्धाञ्जलयोऽनुवाकैर्विरिञ्चिमुख्या उपतस्थुरीशम् ।।३४।। *ऋषय उचुः*
- जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः। यद्रोमगर्तेषु
निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते।।३५।। रूपं तवैतन्ननु दुष्कृतात्मनां
दुर्दर्शनं देव यदध्वरात्मकम्। छन्दांसि यस्य त्वचि बर्हि रोमस्वाज्यं दृशि त्वङ्घ्रिषु
चातुर्होत्रम्।। ३६।। स्रुक्तुण्ड आसीत्स्रुवः ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम्।।३७।।
दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः। जिह्वा प्रवर्ग्यस्तव शीर्षकं
क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते।।३८।।

।। सङ्ग्रहोक्तिः ।।

यां धरां जठरे धृतवान् तां क्षुरप्रैः खूरैरपो विदलयन् रसातले ददर्श।।३१।। जलमग्नां पृथिवीमुद्धृत्य रसातलाद् उद्गच्छन् यज्ञवराह शुशुभे, तत्र जले गदया सहापतन्तं हिरण्याक्षं वीक्ष्य भृशं कुपितो भगवान् स्वमार्गं रुन्धानमसह्यविक्रमं तमादिदैत्यं मृगेन्द्र इभमिव लीलया जघान।।३२-३३।।तमालनीलं सितदन्तकोट्या महीमुत्क्षिपन्तं यज्ञवराहमालक्ष्य विरिञ्चिमुख्या मुनयो बद्धाञ्जलिपुटाः सन्तस्तं स्तोत्रैस्तुष्टुवुः।।३४।। *ऋषय ऊचुः*- हे अजित! यज्ञभावन! त्वया जितं जितम्!!! यस्य रोमगर्तेषु यज्ञा लीना बभूवुः तस्मै कारणसूकराय ते नमः।।३५।। हे देव! तव यद् अध्वरात्मकं रूपं तद् दुरात्मानां दुर्दर्शं भवति, यस्य त्वचि गायत्र्यादीनि छन्दांसि, रोमसु कुशाः, नेत्रयोर्घृतम्, पादेषु होत्रादिकर्मचतुष्कं चास्ति।।३६।। यस्य तव मुखाग्रे स्रुक्, नासयोः स्रुवः, उदरे भोजनपात्रम्, श्रवणविवरे चमसाः, मुखे प्राशित्रम्, ग्रसने सोमपात्रं चास्ति, हे देव! ते चर्वणमग्निहोत्रमस्ति।।३७।। तव ग्रीवायां दीक्षानुजन्मोपसद एतदिष्टित्रयम्, दंष्ट्रयोर्दीक्षान्तरोष्टिः समाप्तेष्टिश्च।।३८।।

सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देहधातवः। सत्राणि सर्वाणि शरीरसंधयस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः।। ३९।। नमो नमस्तेऽखिलमन्त्रदेवता-द्रव्याय सर्वक्रतवे क्रियात्मने । वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः।।४०।। दंष्ट्राग्रकोट्या भगवंस्तया धृता विराजते भूधर भूः सभूधरा। यथा वनान्निःसरतो दता धृता मतङ्गजेन्द्रस्य सपङ्कपद्मिनी ।।४१।। त्रयीमयं रूपमिदं च सौकरं भूमण्डलेनाथ दता धृतेन ते। चकास्ति शृङ्गोढघनेन भूयसा कुलाचलेन्द्रस्य यथैव विभ्रमः।। ४२।। संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता। विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवा-रणावधाः।। ४३।। कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम्। न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम्।।४४।। विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयम्। सटाशिखोद्धूतशिवाम्बुबिन्दुभि-र्विमृज्यमाना भृशमीश पाविताः।। ४५।। स वै बत भ्रष्टमतिस्तवैषते यः कर्मणां पारमपारकर्मणः। यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शम्।।४६।।

।। सङ्ग्रहोक्तिः।।

शुक्रे सोमपानम्, बाल्याद्यवस्थातु प्रातःसवनानि, सन्धिषु सर्वसत्राणि च सन्ति।।३९।। त्वमखिलमन्त्रदेवताद्रव्यरूपोऽसि, क्रियात्मा, सर्वक्रतुशरीरश्चाऽसि, अत वैराग्यभक्त्यनुभावित-ज्ञानाय विद्यागुरवे तुभ्यं नमो नमः।।४०।। हे भूधर! भगवन्! त्वया दंष्ट्राग्रकोट्या धृता सभूधरा धरा वनान्निःसरता मतङ्गजेन दता धृता सपङ्का पद्मिनीव विराजते।।४१।। हे नाथ! त्वया दता धृतेन भूमण्डलेन इदं त्रयीमयं सौकरं रूपं शिखरोपरि स्थितेन घनेन कुलाचल इव विभाति।।४२।। स्थावरसहितानां जङ्गमानां निवासाय तवाङ्गनां मातरं महीं जलोपरि स्थापय, यतस्त्वं जगतः पिताऽसि, पित्रा सहाऽस्यै मात्रे वयं नमस्करिष्यामः।।४३।। हे प्रभो! त्वदन्यः को धराया उद्धारं कुर्यात्? न कोऽपि, यस्त्वमाश्चर्योत्पादिकया स्वशक्त्येदं जगत् सृजसि, अतस्त्वयि नैतच्चित्रम्।।४४।। वेदमयं निजं वपुः विधुन्वतः तव सटाशिखो-च्चलितैः शिवाम्बुबिन्दुभिः सिच्यमाना जनतपसत्यवासिनो वयं भृशं पाविताः स्मः।।४५।।

मैत्रेय उवाच - इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः। सलिले स्वखुराक्रान्त उपाधत्ताऽविताऽवनिम्।।४७।। स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः। रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः।।४८।। य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः। शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति।।४९।। तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः। अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पराम्।।५०।। को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधाम्। आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम्।। ५१।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे त्रयोदशोऽध्यायः।।१३।।

।। सङ्ग्रहोक्तिः।।

यस्तवापारकर्मणां पारं गन्तुमिच्छेत् स बुद्धिहीनः स्यात्, हे भगवन्! तवानन्तशक्तिगुणमोहि जगद् यथा सुखी स्यात् तता विधेहि।।४६।। इत्थं वेदवादिभिर्मरीच्यादिभिः संस्तूयमानः रक्षको भगवान् भूमिं जले स्थापयामास।।४७।। प्रजारक्षकः षाड्गुण्यपूर्णः स हरिर्लील रसातलाद् उद्धृतां धरामपामुपरि प्रतिष्ठाप्याऽन्तर्दधे ।।४८।। कथनीयाश्चर्यशक्तिमतो ह संसारतापहारिणीं कथां यः पुमान् शृणुयात् वाऽन्यान् श्रावयेत्, अस्य हृदि प्रसन्नो भगवा प्रविशति।।४९।।सर्वपुरुषार्थानां प्रदातरि हरौ प्रसन्ने सति दुर्लभं किं स्यात्? एकान्तभक्त भजतां जनानां हृदयस्थः भगवान् स्वयमेव परां स्वगतिं प्रापयति।।५०।।लोके पुरुषार्थसारवि भवापहां भगवत्कथासुधां कणाञ्जलिभिः पीत्वा पशुं विना को नरो विरज्येत।।५१।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः।। १३।।

अथ चतुर्दशोऽध्यायः।।१४।।

श्रीशुक उवाच – निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः। पुनः
स पप्रच्छ तमुद्धृताञ्जलिर्न चातितृप्तो विदुरो धृतव्रतः।।१।। *विदुर उवाच* –
तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्त्तिना। आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुमः।।२।।
तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया । दैत्यराजस्य च ब्रह्मन्कस्माद्धेतोरभू-
न्मृधः।।३।। *मैत्रेय उवाच* – साधु वीर त्वया पृष्टमवतारकथां हरेः। यत्त्वं पृच्छसि
मर्त्यानां मृत्युपाशविशातनीम्।।४।। ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः। मृत्योः
कृत्वैव मूर्ध्न्यङ्घ्रिमारुरोह हरेः पदम्।।५।। अथात्रापीतिहासोऽयं श्रुतो मे वर्णितः
पुरा। ब्रह्मणा देवदेवेन देवानामनुपृच्छताम्।।६।। दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं
पतिम्। अपत्यकामा चकमे संध्यायां हृच्छयार्दिता।। ७।। हुत्वाग्निजिह्वं पयसा
पुरुषं यजुषां पतिम्। निम्लोचत्यर्क आसीनमग्न्यागारे समाहितम्।।८।। *दितिरुवाच*
– एष मां त्वत्कृते विद्वन्काम आत्तशरासनः।

।। सङ्ग्रहोक्तिः।।

अथ चतुर्दशोऽध्यायः ।।१४।।

दितिकश्यपसंवादः दित्यां कश्यपद्वारा गर्भस्थापनं च

श्रीशुक उवाच – मैत्रेयेण कथितं वराहावतारचरितं श्रुत्वाऽपि नातितृप्तमना विदुरः बद्धाञ्जलिः सन् पुनस्तं पप्रच्छ।।१ ।। *विदुर उवाच* – हे मुनिश्रेष्ठ! यज्ञमूर्तिना वराहेण भगवताऽऽदिदैत्यो हिरण्याक्षो हत इति मया श्रुतम्।।२ ।।हे ब्रह्मन्! लीलया स्वदंष्ट्राग्रेण महीमुद्धरतो यज्ञमूर्तेर्दैत्य-राजस्य च युद्धं किमर्थमभूत्?।।३ ।। *मैत्रेय उवाच* – हे वीर! त्वया साधु पृष्टम्, यतस्त्वं मनुष्याणां मृत्युपाशविमोचिनीं "हरेः कथां" पृच्छसि।।४।। यया कथया ध्रुवो मृत्योर्मूर्ध्नि पदं निधाय हरेः पदमारुरोह।।५ ।।हे विदुर! एतद्विषये पुरा ब्रह्मा देवान् प्रति यमितिहासं कथितवान्, स मयाऽपि श्रुतस्तमाकर्णय।।६ ।। हे विदुर! यज्ञपतिं परमपुरुषं पयसा हुत्वा सूर्यास्तसमये-ऽग्निहोत्रशालायामासीनं ध्यानस्थं स्वपतिं कश्यपमपत्यकामा दक्षपुत्री दितिः कामार्दिता सती चकमे।।७-८।। *दितिरुवाच* – हे विद्वन्! आत्तशरासन एषः कामस्तदर्थं दीनां मां मत्तः करी

दुनोति दीनां विक्रम्य रम्भामिव मतङ्गजः।। ९।। तन्द्भवान् दह्यमानायां सपत्नीनां
समृद्धिभिः। प्रजावतीनां भद्रं ते मय्यायुङ्क्तामनुग्रहम्।। १०।। भर्त्तर्याप्तोरुमानानां
लोकानाविशते यशः। पतिर्भवद्विधो यासां प्रजया ह्यनुजायते।। ११।। पुरा पिता नो
भगवान् दक्षो दुहितृवत्सलः। कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक्।। १२।।
स विदित्वात्मजानां नो भावं संतानभावनः। त्रयोदशाददत्तासां यास्ते शीलमनुव्रताः
।। १३।। अथ मे कुरु कल्याण कामं कञ्जविलोचन। आर्त्तोपसर्पणं भूमन्नमोघं
हि महीयसि।। १४।। *मैत्रेय उवाच* - इति तां वीरमारीचः कृपणां बहुभाषिणीम्।
प्रत्याहानुनयन्वाचा प्रवृद्धानङ्गकश्मलाम्।।१५।। *कश्यप उवाच* - एष तेऽहं
विधास्यामि प्रियं भीरु यदिच्छसि। तस्याः कामं न कः कुर्यात् सिद्धिस्त्रैवर्गिकी
यतः।।१६।। सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान्। व्यसनार्णवमत्येति
जलयानैर्यथार्णवम्।। १७।। यामाहुरात्मनो ह्यर्द्धं श्रेयस्कामस्य मानिनि। यस्यां
स्वधुरमध्यस्य पुमांश्चरति विज्वरः।।१८।।यामाश्रित्येन्द्रियारातीन् दुर्जयानितराश्रमैः।
वयं जयेम हेलाभिर्दस्यून् दुर्गपतिर्यथा।।१९।।

।। सङ्ग्रहोक्तिः।।

कदलीमिव परितापयति।।९।। सपत्नीनां पुत्राणां समृद्धिभिर्दह्यमानायां मयि त्वमनुग्रहं
कुरु।।१०।। भर्तुः प्राप्तमानानां स्त्रीणां यशो लोकेषु विस्तृतं भवति, स्त्रीणामयमेव मान
यत् यः पतिः स्वभार्यायां पुत्ररूपेण जायते।।११।। पुराऽस्माकं पिता दक्षोऽस्मान् पृथक्
पृथक् पृष्टवान्, हे वत्साः! यूयं कं पतिं वाञ्छथ?।।१२।।ततो दक्षोऽस्माकं त्वयि परमानुराग
ज्ञात्वा त्रयोदशाऽस्मान् तुभ्यमदात्।।१३।। अतो हे कञ्जविलोचन! मेऽभिलषितं संपादय
हे भूमन्! महत्तरे पुरुष आर्तानामुपसर्पणं निष्फलं न भवति।।१४।। *मैत्रेय उवाच* - जितेन्द्रिय
कश्यपः प्रवृद्धकाममोहितां कृपणां तां सान्त्वयन् प्रत्याह।।१५।। *कश्यप उवाच* - हे भीरु
धर्मार्थकामदात्र्यास्तव प्रियमहं करिष्यामि।।१६।। भार्यावान् गृहस्थोऽन्यांस्त्रीनाश्रमानुपकृत्य
स्वाश्रमेण नौभिरर्णवमिव दुःखसागरमत्येति।।१७।। हे मानिनि! विज्ञाः पुंसोऽर्धाङ्गं स्त्रियं
कथयन्ति, तस्यां गृहकार्यमास्थाप्य पुमान् निश्चिन्तो भवति।।१८।।यां पत्नीमाश्रित्य -

न वयं प्रभवस्तां त्वामनुकर्त्तुं गृहेश्वरि। अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः ॥२०॥ अथापि काममेतं ते प्रजात्यै करवाण्यलम्। यथा मां नातिवोचन्ती मुहूर्त्तं प्रतिपालय॥२१॥ एषा घोरतमा वेला घोराणां घोरदर्शना। चरन्ति यस्यां भूतानि भूतेशानुचराणि ह॥२२॥ एतस्यां साध्वि संध्यायां भगवान् भूतभावनः। परितो भूतपर्षद्भिर्वृषेणाटति भूतराट्॥२३॥ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योत-जटाकलापः। भस्मावगुण्ठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते॥२४॥ न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः। वयं व्रतैर्यच्चरणापविद्धा-माशास्महेऽजां बत भुक्तभोगाम्॥२५॥ यस्यानवद्याचरितं मनीषिणो गृणन्त्यविद्या-पटलं बिभित्सवः। निरस्तसाम्यातिशयोऽपि यः स्वयं पिशाचचर्यामचरद् गतिः सताम्॥२६॥ हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मन् रतस्याविदुषः समीहितम्। यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम्॥२७॥ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया।

॥ सङ्ग्रहोक्तिः॥

ब्रह्मचर्याश्रमाद्यैर्दुर्जयान् इन्द्रियारातीन् दुर्गपतिर्दस्यूनिव लीलया वयं जयेम॥१९॥ हे गृहेश्वरि! वयं पुरुषायुषाऽपि त्वां प्रत्युपकर्त्तुं समर्था न भवामः॥२०॥ तव पुत्रोत्पत्तये यः कामस्तमहं शीघ्रं पूर्णं कुर्याम्, तथापि त्वं क्षणं धैर्यमालम्ब्य प्रतीक्षां कुरु॥२१॥ एषा वेला भयङ्करा वर्तते, यस्यां भूतेशः शंभुस्तथा तस्याऽनुचराणि भूतानि सर्वतः परिभ्रमन्ति॥२२॥ एतस्यां संध्यायां भूतभावनो रुद्रः प्रमथादिगणैर्वेष्टितः सन् नन्दिकेश्वरेण संचरति॥२३॥ श्मशानचक्रा-निलधूलिधूसरितजटाजूटो भस्मावगुण्ठितरुक्मदेहस्ते देवरस्त्रिभिर्नयनैः पश्यन्नास्ते॥२४॥ यस्य लोके कश्चित् स्वजनः परो वा नास्ति, न च कश्चित् स्तुत्यो गर्ह्यो वा भवति, येन तिरस्कृत्य त्यक्तां संपत्तिं वयं गृह्णीमः॥२५॥ यस्य निर्दोषं चरित्रं बुद्धिमन्तो जिज्ञासवः कीर्त्तयन्ति, यः स्वयं निरस्तसाम्यातिशयः सन्नपि पिशाचचर्यां चरति॥२६॥ श्वभोजनयोग्यं स्वदेहं "अयं देह एव आत्मा इति बुद्ध्वा तं देहं ये वस्त्रमाल्याभरणानुलेपनै र्लालयन्ति" ते दुर्भगा अविद्वांस एव यस्याचरितं हसन्ति॥२७॥ ब्रह्मादयो यस्य कृतां मर्यादां पालयन्ति, यो

आज्ञाकरी यस्य पिशाचचर्या अहो विभूम्नश्चरितं विडम्बनम् ।।२८।। मैत्रेय उवाच - सैवं संवेदिते भर्त्रा मन्मथोन्मथितेन्द्रिया । जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा ।।२९।। स विदित्वाथ भार्यायास्तं निर्बन्धं विकर्मणि । नत्वा दिष्टाय रहसि तयाथोपविवेश ह ।।३०।। अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः। ध्यायन् जजाप विरजं ब्रह्म ज्योतिः सनातनम् ।।३१।। दितिस्तु व्रीडिता तेन कर्मावद्येन भारत। उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ।।३२।। *दितिरुवाच* - मा मे गर्भमिमं ब्रह्मन् भूतानामृषभो वधीत्। रुद्रः पतिर्हि भूतानां यस्याकरवमंहसम् ।।३३।। नमो रुद्राय महते देवायोग्राय मीढुषे। शिवाय न्यस्तदण्डाय धृतदण्डाय मन्यवे ।।३४।। स नः प्रसीदतां भामो भगवानुर्वनुग्रहः। व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सतीपतिः।।३५।। *मैत्रेय उवाच* - स्वगर्भस्याशिषं लोक्यामाशासाना प्रवेपतीम्। निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः।।३६।। *कश्यप उवाच* - अप्रायत्यादात्मनस्ते दोषान्मौहूर्त्तिकादुत। मन्नियोगातिचारेण देवानां चातिहेलनात् ।।३७।। भविष्यतस्तवाभद्रावभद्रे जाठराधमौ।

।। सङ्ग्रहोक्तिः ।।

विश्वैककारणरूपोऽस्ति, अहंकृत्यामिका प्रकृतिरपि यस्याज्ञाकारी वर्तते तस्य रुद्रस्य पिशाचवद्वर्तनं विडम्बनमेव ।।२८।। *मैत्रेय उवाच* - भर्त्रा इत्थं कथिते सत्यपि कामविह्वला गतत्रपा दिति वैश्यावत् पत्युर्वस्त्रं जग्राह ।।२९।। कश्यपो भार्याया विरुद्धकर्मणि दुराग्रहं दृष्ट्वा दैवाय नत्वा दित्या सह रहस्युपविवेश ।।३०।। तत स्नात्वा प्राणायामं कृत्वा धृतमौनः कश्यपो निर्विकारं सनातनं परमात्मानं ध्यायन् गायत्रीजपं चकार ।।३१।। हे विदुर! कर्मदोषेण व्रीडिता दितिस्तु विप्रर्षिमुपसंगम्याऽधोमुखी सत्यभाषत ।।३२।। हे ब्रह्मन्! भूतपती रुद्रो मे गर्भं मा वधीत्, यतस्तस्याऽपराधमहं कृतवती ।।३३।। दुष्टदण्डधराय शिवाय महते रुद्राय मन्यवे तस्मै नमः ।।३४।। मम भगिनीपतिः परमकारुणिको भगवान् सतीपतिर्नः प्रसन्नः स्यात् ।।३५।। *मैत्रेय उवाच* - स्वगर्भस्य शुभं प्रार्थयन्तीं प्रवेपन्तीं भार्यां दितिं निवृत्तसंध्यानियमः प्रजापतिः कश्यप आह ।।३६।। *कश्यप उवाच* - हे भद्रे! तव चेतसोऽशुद्धत्वात् मदाज्ञायाः

लोकान्सपालांस्त्रींश्चण्डौ मुहुराक्रन्दयिष्यतः।।३८।। प्राणिनां हन्यमानानां दीनानामकृतागसाम्। स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु।।३९।। तदा विश्वेश्वरः क्रुद्धो भगवाँल्लोकभावनः। हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृत्।।४०।। *दितिरुवाच* - वधं भगवता साक्षात्सुनाभोदारबाहुना। आशासे पुत्रयोर्मह्यं मा क्रुद्धाद् ब्राह्मणात्प्रभो।।४१।। न ब्रह्मदण्डदग्धस्य न भूतभयदस्य च। नारकाश्चानुगृह्णन्ति यां यां योनिमसौ गतः।।४२।। *कश्यप उवाच* - कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात्। भगवत्युरुमानाच्च भवे मय्यपि चादरात्।।४३।। पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः। गास्यन्ति यद्यशः शुद्धं भगवद्यशसा समम्।।४४।। योगैर्हेमेव दुर्वर्णं भावयिष्यन्ति साधवः। निर्वैरादिभिरात्मानं यच्छीलमनुवर्त्तितुम्।।४५।। यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम्। स स्वदृग्भगवान् यस्य तोष्यतेऽनन्यया दृशा।।४६।। स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः। प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुण्ठमतद्विहास्यति।। ४७।।

।। सङ्ग्रहोक्तिः।।

उल्लंघनात् कालदोषाद् देवहेलनाच्च तवोदरे त्रैलोक्यपीडकौ लोकानाममंगलकरौ चण्डावधमौ द्वौ पुत्रौ भविष्यतः।।३७-३८।। ताभ्यां हन्यमानानां दीनानां निर्दोषाणां स्त्रीणां निगृह्यमाणानां दुःखदर्शनेन कुपितो लोकभावनो विश्वेश्वरो भगवान् अवतीर्य वज्रधर इन्द्रोऽद्रीनिव तौ त्वत्पुत्रौ व्यापादयिष्यति।।३९-४०।। *दितिरुवाच* - चक्रसुशोभितबाहोर्भगवतः साक्षात् स्वहस्ताभ्यां स्वपुत्रवधमनुमन्ये किन्तु कुपितात् ब्राह्मणाद् वधं नानुमन्ये।।४१।। ब्राह्मणशापाद् दग्धान् भूतभयदान् जनान् नरकवासिनोऽपि नाऽनुगृह्णन्ति।।४२।। *कश्यप उवाच* - स्वकुकृत्ये पश्चात्तापात् युक्तायुक्तविचारात् हरौ हरे मयि चादरभावात् ते पुत्रस्य पुत्राणां मध्य एकः पुत्रः साधुसंमतो भविता यस्य शुद्धं यशो भगवद्यशसा समं जना गास्यन्ति।।४३-४४।। यस्य स्वभावमनुसरन्तः साधवः निर्वैरत्वादिभिः क्षारादिभिर्दुर्वर्णं हेम इवात्मानं शोधयिष्यन्ते।।४५।। यदुपरि भगवान् प्रसन्नः स्यात् तदुपरि सकलविश्वं प्रसन्नं भवेत् स भगवान् त्वत्पौत्रस्याऽनन्यया भक्त्या तोष्यते।।४६।। महाभागवतो निर्मलान्तःकरणः स त्वत्पौत्रः प्रवृद्धभक्त्या विशुद्धचित्ते

अलम्पटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु। अभूतशत्रुर्जगतः शोकहर्ता नैदाघिकं तापमिवोडुराजः॥४८॥ अन्तर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपम्। पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुण्डलमण्डिताननम् ॥४९॥ *मैत्रेय उवाच* - श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम्। पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामनाः ॥५०॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे चतुर्दशोऽध्यायः॥१४॥

अथ पञ्चदशोऽध्यायः ॥१५॥

मैत्रेय उवाच - प्राजापत्यं तु तत्तेजः परतेजोहरं दितिः । दधार वर्षाणि शतं शङ्कमाना सुरार्दनात्॥१॥ लोके तेन हतालोके लोकपाला हतौजसः। न्यवेदयन्विश्वसृजे ध्वान्तव्यतिकरं दिशाम्॥२॥ *देवा ऊचुः* - त्वमेवैतद्विभो वेत्थ संविग्ना यद्वयं भृशम्। न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः॥३॥

॥ सङ्ग्रहोक्तिः॥

भगवन्तमवस्थाप्य तद्व्यतिरिक्तं महैश्वर्यादिकं त्यक्षति ॥४७॥ सोऽलोलुपः सुस्वभावो, गुणाकरः परसमृद्ध्या हृष्टः, परदुःखे दुःखितोऽजातशत्रुः ग्रीष्मकाल उदितश्चन्द्र इव जगतः शोकहर्ता भविष्यति॥४८॥ स श्रीभूषणं स्फुरत्कुण्डलमण्डिताननमप्राकृतशरीरं कमलनयनं निरस्तहेयगुणं श्रीहरिं स्वहृदि बहिश्च द्रक्ष्यति॥४९॥ दितिः पौत्रं भगवदेकान्तिकं भक्तं श्रुत्वा भृशं मुमुदे, स्वसुतयोर्वधं कृष्णाच्च विदित्वा महामना आसीत्॥५०॥

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां चतुर्दशोऽध्यायः ॥१४॥

अथ पञ्चदशोऽध्यायः॥ १५॥

दिव्यवैकुण्ठे जयविजययोः सनकादिशापः

मैत्रेय उवाच - परतेजोहरं कश्यपसंबन्धिनं गर्भं सुरार्दनात् शंकमाना दितिः शतवर्षपर्यन्तं दधार॥१॥ लोकेंऽधकारव्याप्ते सति हतप्रभा लोकपाला दिक्षु व्याप्तमन्धकारं ब्रह्मणे

देवदेव जगद्धातर्लोकनाथ शिखामणे। परेषामपरेषां त्वं भूतानामसि भाववित् ॥४॥
नमो विज्ञानवीर्याय माययेदमुपेयुषे। गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ॥५॥
ये त्वाऽनन्येन भावेन भावयन्त्यात्मभावनम् ।आत्मनि प्रोतभुवनं परं सदसदात्मकम्
॥६॥ तेषां सुपक्वयोगानां जितश्वासेन्द्रियात्मनाम्। लब्धयुष्मत्प्रसादानां न कुतश्चि-
त्पराभवः ॥७॥ यस्य वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः ।हरन्ति बलिमायत्ता-
स्तस्मै मुख्याय ते नमः॥ ८॥ स त्वं विधत्स्व शं भूमंस्तमसा लुप्तकर्मणाम्।
अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुम् ॥९॥ एष देव दितेर्गर्भ ओजः काश्यपम-
र्पितम्। दिशिस्तिमिरयन् सर्वा वर्द्धतेऽग्निरिवैधसि ॥१०॥ *मैत्रेय उवाच* - स
प्रहस्य महाबाहो भगवान् शब्दगोचरः। प्रत्याचष्टात्मभूर्देवान्प्रीणन् रुचिरया गिरा
॥११॥ *ब्रह्मोवाच* - मानसा मे सुता युष्मत्पूर्वजाः सनकादयः। चेरुर्विहायसा
लोकाँल्लोकेषु विगतस्पृहाः॥१२॥ त एकदा भगवतो वैकुण्ठस्यामलात्मनः।
ययुर्वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ॥ १३॥

॥ सङ्ग्रहोक्तिः॥

व्यवेदयन् ॥२॥ वयमत्यन्तं भीताः स्म, एतत् कारणं त्वमेव वेत्थ,तवाऽज्ञातं किमपि नास्ति ॥३॥
हे देवदेव! लोकनाथशिरोमणे! उत्तमानां वाऽधमानां भूतानां भाववित् त्वमेवाऽसि ॥४॥
जगत्कारणाय विज्ञानवीर्याय गृहीतगुणभेदाय ब्रह्मणे तुभ्यं नमः॥५॥ सर्वजीवान् भावयन्तं
भुवनधारकं सदसदात्मकं त्वां येऽनन्यभावेन उपासते तेषां सुपक्वयोगानां जितप्राणेन्द्रियात्मनां
भवत्कृपापात्राणां जनानां क्वापि पराभवो न जायते॥६-७॥ यस्य तव वेदवाण्या सर्वाः
प्रजाः तन्तीबद्धा वृषभा इव त्वद्वशाः सन्ति, ताः सर्वाः ते पूजामर्पयन्ति, तस्मै मुख्याय भगवते
नमः ॥८॥ हे भूमन्! तमसा लुप्तकर्मणामस्माकं सुखं कुरु, आपद्गतान् नो दयादृष्ट्या
द्रष्टुमर्हसि॥९॥ हे देव! दितेरुदरे निहितः काश्यपशुक्ररूपो गर्भो सर्वाः दिशस्तिमिरयन्
काष्ठे वह्निरिव वर्द्धते ॥१०॥ *मैत्रेय उवाच*- हे विदुर! वेदवेद्यः स्वयंभूर्ब्रह्मा प्रहस्य मधुरया
गिरा देवान् प्रीणयन् प्रोवाच॥११॥ *ब्रह्मोवाच* - हे देवाः! युष्मत्पूर्वजा मे मानसाः सुताः
सनकादयो लोकेषु विगतस्पृहाः सन्त आकाशमार्गेण लोकान् विचेरुः॥१२॥

वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठमूर्त्तयः। येऽनिमित्तनिमित्तेन धर्मेणाराधयन् हरिम्
।।१४।। यत्र चाद्यः पुमानास्ते भगवान् शब्दगोचरः। सत्त्वं विष्टभ्य विरजं स्वानां
नो मृडयन् वृषः।।१५।। यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः। सर्वर्त्तुश्रीभिर्विभ्राज-
त्कैवल्यमिव मूर्त्तिमत्।।१६।। वैमानिकाः सललनाश्चरितानि यत्र गायन्ति लोकश-
मलक्षपणानि भर्त्तुः। अन्तर्जलेऽनुविकसन्मधुमाधवीनां गन्धेन खण्डितधियोऽप्य-
निलं क्षिपन्तः।।१७।। पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरबर्हिणां
यः। कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृङ्गाधिपे हरिकथामिव गायमाने।।१८।।
मन्दारकुन्दकुरबोत्पलचम्पकार्णपुन्नागनागबकुलाम्बुजपारिजाताः। गन्धेऽर्चिते
तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयन्ति।।१९।। तत्संकुलं
हरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः। येषां बृहत्कटितटाः स्मितशो-
ऽभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः।। २०।।

।। सङ्ग्रहोक्तिः ।।

त एकदा दिव्यमङ्गलमूर्तेर्भगवतः सर्वलोकनमस्कृतं वैकुण्ठं धाम ययुः।।१३।। यत्र वैकुण्ठे
ये पुरुषा निष्कामेन धर्मेण हरिमाराधितवन्त स्ते सर्वे वैकुण्ठसममूर्त्तय सन्तस्तत्र वसन्ति।।१४।।
यत्र वैकुण्ठलोके शास्त्रैकप्रमाणकः षाड्गुण्यपूर्णः परमकारणभूतपरमपुरुषः शुद्धसत्त्वमयं
देहं धृत्वा स्वान् सुखयन्नास्ते।।१५।।।यत्र नैःश्रेयसाख्यं वनमस्ति, यत् सवर्तुशोभैः कामदुघैः
र्द्रुमैर्भ्राजमानं केवलं ब्रह्म इव स्थितम्।।१६।। यत्र सलिलतटप्रदेशे प्रफुल्लमधुमाधवीनां
गन्धेनाऽनाकृष्टचित्ताः सललना वैमानिका भक्ता भगवतो लोकपापशमनानि चरित्राणि गायन्ति
।।१७।। भृङ्गराजे हरिकथामिवोच्चैर्गायमाने सति पारावत-कोकिल-सारस-चक्रवाक-
कालकण्ठ-हंस-शुकादीनां पक्षिणां कोलाहलः क्षणमात्रं विरमति।।१८।। यत्र वने मन्दार-
कुन्द-तिलक-उत्पल-चम्पक-पुन्नाग-बकुल-अम्बुजादिपुष्पाणां सौरभः प्रसरन्नपि तुलस्या
गन्धे सम्मानिते सति तत्र वने तुलस्याः पूर्वोपार्जितं तपस्तद्वनस्था पारिजादयो वृक्षा बहु
मानयन्ति।।१९।। यत् नैःश्रेयसं वनं वैदुर्यमारकतहेममयैः हरिप्रणामसमय एव दृष्टैः विमानैः
व्याप्तमासीत्, येषु समारूढानां कृष्णात्मनां मुक्तानां मनसि स्मेरमुख्यः स्त्रिय उत्स्मयाद्यैः

श्री रूपिणी क्वणयती चरणारविन्दं लीलाम्बुजेन हरिसद्मनि मुक्तदोषा । संलक्ष्यते स्फटिककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहणेऽन्ययत्नः।। २१।। वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशम्। अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमताङ्ग यच्छ्रीः।। २२।। यन्न व्रजन्त्यघभिदो रचनानुवादाच्छृण्वन्ति येऽन्यविषयाः कुकथा मतिघ्नीः। यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपन्त्यशरणेषु तमःसु हन्त।। २३।। येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सह धर्म यत्र। नाराधनं भगवतो वितरन्त्यमुष्य संमोहिता विततया बत मायया ते।। २४।। यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः। भर्त्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुलकीकृताङ्गाः।।२५।। तद्विश्वगुर्वधिकृतं भुवनैकवन्द्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः। आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुण्ठम्।। २६।।

।। सङ्ग्रहोक्तिः।।

कामं न जनयामासुः।। २०।। यत्र संचरणेन पादपद्मं शब्दायन्ती नित्यनिर्दोषा मूर्तिमती स्वयं लक्ष्मीः स्फटिककुड्ये हरिसद्मनि लीलाम्बुजेन संमार्जयतीव संलक्ष्यते।। २१।। यत्र वैकुण्ठे परिचारिकाभिः सहिता लक्ष्मीर्वृन्दामञ्जरीभिर्भगवन्तमर्चयन्ती सती विद्रुमरत्नबद्धासु वापीषु स्वलकमुन्नतनासिकं स्वमुखं प्रतिबिम्बितं वीक्ष्य स्वपतिचुम्बितमिति अमन्यत।। २२।। हरेरन्याः केवलार्थकामादिविषया बुद्धिभ्रंशकरा भाग्यहीनैः श्रुताः कथाः श्रोतृजनान् नरकेषु क्षिपन्ति, ये जना एवंविधाः कुकथाः शृण्वन्ति ते तद्वैकुण्ठं न व्रजन्ति।। २३।। मनुष्यजन्मन्येव निवृत्तिधर्मेण सह भगवद्विषयं ज्ञानं जायते, ये अस्माभिरपि प्रार्थितं नृजन्म प्राप्य भगवत आराधनं न कुर्वन्ति ते बत मायया संमोहिताः सन्ति।। २४।। ये देवदेवस्य सेवया दूरीकृतयमलोका अत एव पुण्यचरिताः परमात्मनः पुण्यकीर्तेः परस्परकथनैः बाष्पकलया पुलकीकृताङ्गाः भवन्ति एत एव तद् वैकुण्ठं व्रजन्ति।। २५।। ते सनकादयो मुनयो भगवदधिष्ठितं भुवनैकवन्द्यं दिव्यं विचित्रविबुधविमानाग्र्यविद्योतितं वैकुण्ठमणिमाद्यैश्वर्यबलेन प्राप्य परां मुदमापुः।।२६।।

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायाम्। देवावचक्षत
गृहीतगदौ परार्ध्यकेयूरकुण्डलकिरीटविटङ्कवेषौ।।२७।। मत्तद्विरेफवनमालिकया
निवीतौ विन्यस्तयाऽसितचतुष्टयबाहुमध्ये। वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां
रक्तेक्षणेन च मनाग्रभसं दधानौ।।२८।। द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा
पुरटवज्रकपाटिका याः। सर्वत्र तेऽविषमया मुनयः स्वदृष्ट्या विश्वं चरन्त्यविहता
विगताभिशङ्काः।।२९।। तान्वीक्ष्य वातरशनांश्चतुरः कुमारान्वृद्धान्दशार्द्धवयसो
विदितात्मतत्त्वान्। वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूल-
शीलौ।।३०।। ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्याम्।
ऊचुः सुहृत्तमदिदृक्षितभङ्ग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः।।३१।। *मुनय*
ऊचुः - को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः।
तस्मिन्प्रशान्तपुरुषे गतविग्रहे वां को वात्मवत्कुहकयोः परिशङ्कनीयः।।३२।। न
ह्यन्तरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः। पश्यन्ति यत्र
युवयोः सुरलिङ्गिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य।।३३।।

।। सङ्ग्रहोक्तिः ।।

वैकुण्ठे कैश्चिदप्यनिवार्यमाणाः सन्तः षट् प्राकारद्वाराणि व्यतिक्रान्ताः, अथ सप्तमे द्वारि
समानवयसौ गृहीतगदौ परार्घ्यकुण्डलकटककेयूररुचिरवेषौ द्वारपालौ दृष्टवन्तः।।२७।।
श्यामबाहुचतुष्टयमध्ये मत्तभ्रमरवनमालिकयाऽलङ्कृतौ कुटिलया भ्रुवा रक्तेक्षणेन मनागुग्र
वक्त्रं दधानावपश्यन्।।२८।। ये मुनयोऽनिवारिता अनिमिषया दृष्ट्या विगताभिशङ्का
विश्वंचरन्ति, तयोर्द्वारपालयोः पश्यतोः तावपृष्ट्वैव सप्तमे द्वारि निविविशुः।।२९।। भगवत्
प्रतिकूलशीलौ तौ देवौ दिगम्बरान् वृद्धान् सतो पञ्चवर्षबालसदृशान् तान् कुमारान् वीक्ष्य
परिहासं कृत्वा यष्ट्या प्रवेशप्रतिरोधं चक्रतुः।।३०।। देवेषु पश्यत्सु सत्सु द्वारपालाभ्यां
निषिध्यमाना भगवद्दिदृक्षाभङ्गे सति कोपव्याकुलनेत्रास्ते कुमारा ऊचुः।।३१।। *मुनय ऊचुः*
उच्चैर्भगवत्सेवार्थमिमं वैकुण्ठलोकं प्राप्य निवसतां मुक्तानां मध्ये युवयो र्विषमः स्वभावः कुतः
प्रशान्तपुरुषे गतविग्रहे वैकुण्ठे भवादृशस्य कुटिलस्य प्रवेशो शङ्कनीयः?।।३२।। सर्वाधारे

तद्धाममुष्य परमस्य विकुण्ठभर्त्तुः कर्त्तुः प्रकृष्टमिह धीमहि मन्दधीभ्याम्। लोकानितो व्रजतमन्तरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र ।। ३४।। *ब्रह्मोवाच* - तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदण्डमनिवारणमस्त्रपूगैः। सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण।।३५।। *द्वारपावूचतुः*- भूयादघोनि भगवद्भिरकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषम्। मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः।।३६।। *ब्रह्मोवाच* - एवं तदैव भगवानरविन्दनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः। तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः।। ३७।। तं त्वागतं प्रतिहृतौपयिकं स्वपुम्भिस्तेऽचक्षताक्षिविषयं स्वसमाधिभोग्यम्। हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकराम्बुम्।।३८।। कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशन्तम्। श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयन्तमिवात्मधिष्ण्यम्।। ३९।।

।। सङ्ग्रहोक्तिः।।

परमेश्वरे भेदद्योतकं वैषम्यं नास्ति, प्रतिशरीरमन्तर्यामित्वेनाऽवस्थितस्य हरेरस्माद् भयं इति बुद्धिरुत्पादिता, तद् किम्?।।३३।। वैकुण्ठनाथस्य परमात्मनः मन्दबुद्धिभ्यां द्वारपालाभ्यां कृतं यत् तद् युक्तं किम्? इति विचारयामः, तत् यत्र भेददृष्टयः कामक्रोधलोभाः अस्य रिपवः सन्ति तान् लोकान् व्रजतम्।।३४।। *ब्रह्मोवाच* - अस्त्रसमूहैरप्यनिवार्यमतितीव्रं ब्रह्मशापरूपदण्डमवधार्य सद्यो हरेरनुचरौ तौ भयेन मुनीनां पादग्रहणं कुर्वन्तौ सन्तौ दण्डवत्प्रणामपूर्वकं विज्ञापयामासतुः।।३५।। *द्वारपालावूचतुः*- इहापराधवति यो दण्डो भवद्भिरकारि, तत्र भवतो दोषो न, किन्तु मूढयोनिषु व्रजतोरावयोः भगवत्स्मृतिविनाशको मोहो न स्यात् इत्यावयोरनुगृह्णत।।३६।। *ब्रह्मोवाच* - एवंभूतं स्वपार्षदाभ्यां सनकादिषु कृतमपराधं ज्ञात्वाऽरविन्दनाभो भगवान् वैकुण्ठनाथः सत्सेवनीयाभ्यां चरणाभ्यां चलन् सद्यो लक्ष्म्या सह तत्राऽऽजगाम।।३७।। तदा ते सनकादयः स्वपार्षदैरानीय दत्तैः छत्रचामरव्यजनपादुकादिभिः सुशोभितं स्वसमाधिभोग्यं तत्र सहसाऽक्षिविषयं प्राप्तं हरिमचक्षत।।३८।। सम्पूर्णानुग्रहसुमुखं, स्पृहणीयसद्गुणानामाश्रयम्,

पीतांशुके पृथुनितम्बिनि विस्फुरन्त्या काञ्च्यालिभिर्विरुतया वनमालया च
वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जम् ।।४०।।
विद्युत्क्षिपन्मकरकुण्डलमण्डनार्हगण्डस्थलोन्नसमुखं मणिमत्किरीटम्। दोर्दण्ड
खण्डविवरे हरता परार्ध्यहारेण कन्धरगतेन च कौस्तुभेन ।।४१।। अत्रोपसृष्टमिति
चोत्स्मितमिन्दिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यम्। मह्यं भवस्य भवतां
च भजन्तमङ्गं नेमुर्निरीक्ष्य नवितृप्तदृशो मुदा कैः।। ४२।। तस्यारविन्दनयनस्य
पदारविन्दकिंजल्कमिश्रतुलसीमकरन्दवायुः। अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरजुषामपि चित्ततन्वोः।। ४३ ।। ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य
सुन्दरतराधरकुन्दहासम्। लब्धाशिषः पुनरवेक्ष्य तदीयमङ्घ्रिद्वन्द्वं नखारुणमणि-
श्रयणं निदध्युः।।४४।। पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं
नयनाभिरामम्। पौस्नं वपुर्दरशयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः।।४५।।

।। सङ्ग्रहोक्तिः ।।

स्नेहावलोकयनकलया चित्तमपरहन्तं पृथुवक्षसि श्रीवत्सं धारयन्तं स्ववैकुण्ठलोकं सुशोभयन्तं
।।३९।। पृथुनितम्बस्थ पीताम्बरोपरि काञ्च्या वनमालया च विराजमानं, वल्गुप्रकोष्ठवलं
वामहस्तं गरुडस्कन्धे निदधानं, दक्षिणहस्तेनाब्जं धुनानम् ।।४०।। विद्युत्क्षिपन्मकरकुण्डले
दधानं, शुभगण्डोल्लसन्मुखं, मणिमत्किरीटम्, विशाले वक्षसि परार्ध्यहारेण, कण्ठस्थेन
कौस्तुभेन च शोभमानम् ।।४१।। निरतिशयसौन्दर्यवत्या लक्ष्म्या अपि निरवधिकातिशयसुन्दरं
स्वभक्तमनोरथपूर्त्तये धृतेन सौन्दर्येणाऽऽढ्यम्, मम भवस्य च देवानामपि भजनीयम्, भगवन्तं
निरीक्ष्य मुनयो मस्तकैः प्रणेमुः।।४२।। राजिवलोचनस्य पादारविन्दरजोमिश्रतुलसीसुगन्धो
नासाविवरेणाऽन्तःप्रविश्य ब्रह्मानन्दसेविनां मुनीनां चित्ततन्वोः संक्षोभं चकार।।४३।।
सुन्दराधरयोः कुन्दवद्धास्यं दधानं, असितपद्मकोशवद् विलसितं मुखं संवीक्ष्य लब्धमनोरथा
मुनयो नखारुणमणिमिश्रितचरणद्वन्द्वं पुनः पुनः निदध्युः।।४४।। योगमार्गैः स्वरूपं मृगयतां
पुंसां ध्यानास्पदं, नयनाभिरामं पौरुषं शरीरं दर्शयन्तं, स्वाभाविकैर्गुणाष्टकैर्युतं भगवन्तं
मुनयोऽस्तुवन् ।।४५।।

सनकादय ऊचुः– योऽन्तर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनन्त राद्धः। यर्ह्येव कर्णविवरेण गुहां गतो नः पित्रानुवर्णितरहा भवदुद्भवेन।।४६।। तं त्वां विदाम भगवन्परमात्मतत्त्वं सत्त्वेन संप्रति रतिं रचयन्तमेषाम्। यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रन्थयो हृदि विदुर्मुनयो विरागाः।।४७।। नात्यन्तिकं विगणयन्त्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते। येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः कीर्त्तन्यतीर्थयशसः कुशला रसज्ञाः।।४८।। कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पदयो रमेत। वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः।।४९।। प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः। तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान्प्रतीतः।।५०।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे पञ्चदशोऽध्यायः ।।१५।।

।। सङ्ग्रहोक्तिः ।।

सनकादय ऊचुः – हे अनन्त! त्वं दुरात्मनां हृदि विद्यमानः सन्नपि तिरोहितोऽसि अस्मत्पित्रा कथितस्त्वं कर्णविवरेण हृदयं गतोऽपि नो नयनविषयतां तु सांप्रतमेव प्राप्तोऽसि।।४६।। हे भगवन्! शुद्धेन सत्त्वमयदेहेन भक्तानां वर्धमानां प्रीतिं सांप्रतं विचारयन्तं त्वां वयं विदामः, संसारनिर्वेदलब्धैर्दृढभक्तियोगैर्निरहंकारा मुनयो हृदि यदात्मतत्त्वं विदुस्तत् त्वमेवाऽसि।।४७।। त्वत्कथाश्रवणमात्रेण स्वात्मनः कृतार्थतां मन्यमानास्ते भवता दत्तं मोक्षमपि नाद्रियन्ते, तदा स्वर्गादीनामनादरस्य का वार्ता?।।४८।। हे भगवन्! स्वदुरितैरस्माकं नीचयोनिषु जन्म कामं भवतु, किन्तु तत्राऽस्माकं चेतः कमलेषु भ्रमरवद् तव पादयोः रमेत, वाचस्त्वदङ्घ्रिस्तुतिपराः, कर्णौ त्वत्कथाश्रवणपरौ भवेताम्।।४९।। हे भगवन्! भवता यदिदं स्वरूपं दर्शितं तेनास्माकं दृशः पुरु सुखमवापुः, यो भवानजितेन्द्रियाणां दुरवगमोऽसि, तस्मै भगवते नमस्कुर्मः।।५०।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः ।।१५।।

अथ षोडशोऽध्यायः ।।१६।।

ब्रह्मोवाच - इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम्। प्रतिनन्द्य जगादेदं विकुण्ठनिलयो विभुः।।१।। *श्रीभगवानुवाच* - एतौ तौ पार्षदौ मह्यं जयो विजय एव च। कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम्।।२।। यस्त्वेतयोर्धृतो दण्डो भवद्भिर्मामनुव्रतैः। स एवानुमतोऽस्माभिर्मुनयो देवहेलनात्।।३।। तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे। तद्धीत्यात्मकृतं मन्ये यत्स्वपुम्भिरसत्कृताः।।४।। यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि। सोऽसाधुवादस्तत्कीर्त्तिं हन्ति त्वचमिवामयः।।५।। *यस्यामलामृतयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुण्ठः। सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्त्तिश्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम्।। ६।।* यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलम्। न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थमितरे नियमान्वहन्ति।। ७।।

।। सङ्ग्रहोक्तिः ।।

अथ षोडशोऽध्यायः।।१६।।

भगवत्कृतं मुनीनां सान्त्वनं वैकुण्ठाज्जयविजययोः पतनं च

ब्रह्मोवाच - भक्तियोगधर्मिणां स्तुवतां मुनीनां भाषितं प्रतिनन्द्य भगवान् वैकुण्ठनाथ इदं जगाद।।१।। *श्रीभगवानुवाच* - हे मुनयः! जयः विजयश्च, एतौ मम पार्षदौ मामवज्ञाय युष्मभ्यमपचारमकुरुताम्।।२।। तस्माद् मामनुवृतैर्भवद्भिः एतयोर्यो दण्डो धृतः, स अस्माभिः दैवहेलनादङ्गीकृतः।।३।। तस्मादहं वोऽद्य क्षमापयामि, हि ब्राह्मणा मे श्रेष्ठदेवतारूपाः सन्ति, मदीयैर्यदपकृतं तन्मया कृतं मन्ये।।४।। किंच भृत्येनाऽपि कृतेऽपराधे जनैः तत्स्वामिनो नामोल्लेखः क्रियते, तेन च स्वामिनोऽपयशोऽपि भवति।।५।। यस्य मम पवित्रममृतमयं यशः श्रुतं सद् आश्वपचाद् विश्वं सद्यः पुनाति, सोऽहं वैकुण्ठनाथः भवद्भ्य एव सुशोभनां कीर्तिं प्राप्तोऽस्मि, ततो वः प्रतिकूलं मम बाहुर्यदि वर्तेत तर्हि तमप्यहं छिन्द्याम्।।६।।स्वपादरेणूनां पवित्रत्वं विशुद्धं शीलस्वभावादिकं चापि मया ब्राह्मणसेवया लब्धं यत्कृपाकटाक्षार्थमितरे व्रतानि कुर्वन्ति, सा लक्ष्मीरपि मां विरक्तमपि ब्राह्मणसेवाप्रभावेणैव न जहाति।।७।।

नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन। यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः।।८।। येषां बिभर्म्यहमखण्ड-विकुण्ठयोगमायाविभूतिरमलाङ्घ्रिरजः किरीटैः। विप्रास्तु को न विषहेत यदर्हणाम्भः सद्यः पुनाति सहचन्द्रललामलोकान्।।९।। ये मे तनूर्द्विजवरान् दुहतीर्मदीया भूतान्य-लब्धशरणानि च भेदबुद्ध्या। द्रक्ष्यन्त्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषन्त्यधि दण्डनेतुः।।१०।। ये ब्राह्मणान्मयि धिया क्षिपतोऽर्चयन्तस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः। वाण्यानुरागकलयात्मजवद्गृणन्तः संबोधयन्त्यहमिवाह-मुपाहृतस्तैः।।११।। तन्मे स्वभर्त्तुरवसायमलक्ष्यमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः। भूयो ममान्तिकमितां तदनुग्रहो मे यत्कल्पतामचिरतो भृतयोर्विवासः।।१२।। *ब्रह्मोवाच* - अथ तस्योशतीं दैवीमृषिकुल्यां सरस्वतीम्। नास्वाद्य मन्युदष्टानां तेषामात्माप्यतृप्यत।।१३।। सतीमादाय शृण्वन्तो लघ्वीं गुर्वर्थगह्वराम्। विगाह्यागाध-गम्भीरां न विदुस्तच्चिकीर्षितम्।।१४।।

।। सङ्ग्रहोक्तिः ।।

अग्न्यादिष्वन्तर्यामित्वेन स्थितोऽहं यागीयं श्चोतद्घृतप्लुतं हविर्भुञ्जानो भगवानहं यथा ब्राह्मणमुखेन तुष्यामि तथा यज्ञीये न तुष्यामि।।८।। अनन्तापत्तिहर्ताऽऽश्चर्यशक्ति-सम्पन्नोऽहमस्मि यस्य मे चरणोदकरूपां गङ्गां शिवोऽपि शिरसा वहति, सोऽहं ब्राह्मणानां चरणधूलिं किरीटैर्बिभर्मि, तिरस्कुर्वतोऽपि ब्राह्मणान् को न विषहेत?।।९।। गाव ब्राह्मणाश्च मम तनवः, पापदृष्टयोऽहिमन्यवश्च ये जनाः तेभ्यो द्रुह्यन्ति, तान् पापिनो गृध्रसमानदेहा यमदूता क्रोधेन चञ्चुभिश्छिन्दन्ति।।१०।। तिरस्कुर्वतोऽपि ब्राह्मणान् मदात्मकबुद्ध्या येऽर्चयन्ति, तान् स्मितसुधासिक्तेन मुखेन मधुरया वाण्याऽऽभाषयन्ति च तेषामहं वशो भवामि।।११।। ममोक्तविधं निश्चयमजानन्ताविमौ युष्मदपराधफलं प्राप्य सद्यो भूयो ममान्तिकं प्राप्नुताम्, पुनराशु मत्समीपागमनमेव मदनुग्रहः ।।१२।। *ब्रह्मोवाच*- अथ भगवत ऋषिकुलयोग्यां दैवीं कमनीयां च गिरं श्रुत्वा मन्युव्याप्तानां मुनीनामन्तःकरणं नाऽतृप्यत।।१३।। सतीमल्पाक्षरामर्थगौरवां दुर्विज्ञेयां च हरेर्वाचं शृण्वन्तोऽपि ते कुमारास्तच्चिकीर्षितं न -

ते योगमाययारब्धपारमेष्ठ्यमहोदयम्। प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः कुपितत्वचः
।।१५।। *मुनय ऊचुः*- न वयं भगवन्विद्मस्तव देवचिकीर्षितम्। कृतो मेऽनुग्रहश्चेति
यदध्यक्षः प्रभाषसे।।१६।। ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो। विप्राणां
देवदेवानां भगवानात्मदैवतम्।।१७।। त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव।
धर्मस्य परमो गुह्यो निर्विकल्पो भवान्मतः।।१८।। तरन्ति ह्यञ्जसा मृत्युं निवृत्ता
यदनुग्रहात्। योगिनः स भवान् किं स्विदनुगृह्येत यत्परैः।।१९।। यं वै विभूतिरुपया-
त्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः। धन्यार्पिताङ्घ्रितुलसीनवदामधाम्नो
लोकं मधुव्रतपतेरिव कामयाना।।२०।। यस्तां विविक्तचरितैरनुवर्त्तमानां नात्याद्रिय-
त्परमभागवतप्रसङ्गः। तं त्वां द्विजानुपथपुण्यरजः पुनीतः श्रीवत्सलक्ष्म किमगा
भगभाजनस्त्वम्।।२१।। धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचरमिदं
द्विजदेवतार्थम्। नूनं भृतं तदभिघाति रजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य
।।२२।। न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषः स्वरहणेन ससूनृतेन तर्हि
नङ्क्ष्यति शिवस्तव वेदपन्था लोकोऽग्रहीष्यदृषभस्य हि तत्प्रमाणम्।।२३।।

।। सङ्ग्रहोक्तिः।।

विदुः।।१४।। विचित्रविश्वसर्गकारिण्या प्रकृत्या जगतः सर्वोत्कृष्टाधिपत्यं प्राप्तं हरिं रोमाञ्चित
हृष्टा मुनयो प्राञ्जलयः सन्तः प्रोचुः।।१५।। हे देव! भगवन्! तव यच्चिकीर्षितं तद्वयं न
विद्मः, किन्तु त्वं वाङ्मनोऽगोचरः सन्नपि अस्मान् प्रभाषसे सोऽनुग्रह एव।।१६।। हे प्रभो!
ब्राह्मणहितपरस्य ते ब्राह्मणाः परं दैवतं किल, तेषां ब्राह्मणानामपि भवानात्मदैवतमस्ति।।१७।।
त्वमवतारैः सनातनं धर्मं रक्षसि धर्मस्य फलरूपो गुह्यो भवानेवाऽस्ति।।१८।। भवदनुग्रहाद्
योगिनोऽपि सुखेन मृत्युं तरन्ति, स भवान् किं परैरनुगृह्येत?।।१९।। चतुर्विधपुरुषार्थार्थिभिः
शिरसा धृतपादरेणुर्लक्ष्मीर्भवत्पदारविन्दरेणुं कामयाना सती तत्तदुचितसेवावसरेषु यथायथं
त्वां सेवते।।२०।। परिशुद्धचरितैरनुवर्तमानां तां स्वं सेवमानां लक्ष्मीमपि यो भवान् नाऽत्यादृतवान्
स परमभागवतेषु स्नेहबद्धोसि।।२१।। सत्वात्मिकया श्रीमूर्त्या रजस्तमसी पराभूय धर्मस्य
तपोदानदयात्मकैस्त्रिभिः पादैः द्विजदेवादीनां रक्षणं कुर्वन् सर्वं चराचरं जगद्रक्षसि।।२२।।

ततेऽनभीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः। नैतावता त्र्यधिपते बत विश्वभर्त्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः।।२४।। यं वानयोर्दम-मधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकम्। अस्मासु वा य उचितो ध्रियतां स दण्डो येनागसौ वयमयुङ्क्ष्महि किल्बिषेण।। २५।। *श्रीभगवानुवाच* - एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरम्भसंभृतसमाध्यनुबद्धयोगौ। भूयः सकाशमुप-यास्यत आशु यो वः शापो मयैव विहितस्तदवैत विप्राः।।२६।। *ब्रह्मोवाच* - अथ ते मुनयो दृष्ट्वा नयनानन्दभाजनम्। वैकुण्ठं तदधिष्ठानं विकुण्ठं च स्वयंप्रभम् ।।२७।। भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च। प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम्।।२८।। भगवाननुगावाह यातं मा भैष्टमस्तु शम्। ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छे मतं हि मे।।२९।। एतत्पुरैव निर्दिष्टं रमया क्रुद्धयाऽनया। उपारते मयि द्वारि युवाभ्यां यन्निवारिता।।३०।।

।। सङ्ग्रहोक्तिः।।

भवता रक्षणीयं द्विजकुलं प्रियवचनसहितेन शोभनपूजनेन यदि त्वं रक्षिता न भवेः तर्हि श्रेयस्करो वेदमार्गो नङ्क्ष्यति।।२३।। शुद्धसत्त्वैकाधारस्य जनानां क्षेमं विधित्सोर्निजशक्तिभि-रुन्मूलितारेः विश्वभर्तुः ब्राह्मणान् अवनतस्य तेजो नैव क्षतम् किन्तु ते प्रणामाचरणं लीलाविलास एव भवति।।२४।। हे अधीश! स्वभृत्ययोरस्मद्विहितं दण्डं वा यथापूर्वं वर्तनं भवान् यद्वि-धास्यति तत् सत्यमेव भविष्यति, अस्मास्वपि योग्यं दण्डं दीयताम्, यौ निरपराधौ शापेना-ऽयुङ्क्ष्महि।।२५।। *श्रीभगवानुवाच* - हे विप्रा! एतौ पार्षदौ आसुरं जन्म प्राप्य क्रोधसंजात-सततमत्स्मरणयोगेन शीघ्रमेव पुनर्मत्सकाशमागमिष्यतः, अयं शापोऽपि मदिच्छयैव जात इति यूयं वेत्थ।।२६।। *ब्रह्मोवाच* - अथ नयनानन्दकरं भगवन्तं वैकुण्ठनाथं वैकुण्ठलोकं च दृष्ट्वा ते मुनयः प्रसन्ना जाताः, ततो वैकुण्ठनाथं परिक्रम्य प्रणम्याऽनुज्ञाप्य च वैष्णवीं श्रियं प्रशंसन्तः प्रमुदिताश्च सन्तः प्रतिजग्मुः।।२७-२८।। भगवान् वैकुण्ठनाथ आह - हे भृत्यौ! युवां गच्छतम्, मा भैष्टम्, युवयोः सुखमस्तु, अहं ब्रह्मतेजो निरसितुं शक्तोऽपि तन्नैच्छम्, यस्मात् तन्मे संमतं भवति, एतत् पूरेव क्रुद्धयाऽनया रमया निर्दिष्टमासीत्।।२९-३०।।

मयि संरम्भयोगेन निस्तीर्य ब्रह्महेलनम्। प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा
पुनः।।३१।। द्वाःस्थावादिश्य भगवान् विमानश्रेणिभूषणम्। सर्वातिशयया लक्ष्म्या
जुष्टं स्वं धिष्ण्यमाविशत्।।३२।। तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः हतश्रियौ
ब्रह्मशापादभूतां विगतस्मयौ।।३३।। तदा विकुण्ठधिषणात्तयोर्निपतमानयोः। हाहाकारो
महानासीद्विमानाग्र्येषु पुत्रकाः।।३४।। तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः।
दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणम्।।३५।। तयोरसुरयोरद्य तेजसा यमयोर्हि
वः। आक्षिप्तं तेज एतर्हि भगवांस्तद्विधास्यति।।३६।। विश्वस्य यः स्थितिलयोद्भव-
हेतुराद्यो योगेश्वरैरपि दुरत्ययोगमायः। क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रा-
स्मदीयविमृशेन कियानिहार्थः।। ३७।।

इति श्रीमद्भागवते महपुराणे तृतीयस्कन्धे षोडशोऽध्यायः ।।१६।।

।। सङ्ग्रहोक्तिः ।।

अतो मयि क्रोधस्य योगेनाऽनवरतमत्संबन्धात् ब्रह्महेलनफलं निस्तीर्याऽल्पीयसा काले
पुनरपि मम समीपं प्रत्येष्यतम्।।३१।। भगवान् द्वारपालावित्यादिश्य विमानश्रेणिभू-
सर्वातिशयया लक्ष्म्या जुष्टं स्वं स्थानमाविशत्।।३२।। तौ पार्षदवरौ तु दुस्तराद् ब्रह्मशा-
श्रीहरेर्लोक एव हतश्रियौ विगतगर्वावभूताम्।।३३।।हे देवाः! तदा वैकुण्ठस्थानात् निपतमान-
सतोः विमानेषु वसतां देवानां महान् हाहाकार आसीत्।।३४।।हे देवाः! तावेव हरेः पार्षदप्र-
दितेः कुक्षौ प्रविष्टमुल्बणं वीर्यं प्रति सांप्रतमेव प्राप्तौ भवतः।।३५।। तयोर्यमयोरसुर-
तेजसाऽद्य युष्माकं तेजोऽभिभूतमस्ति, इदानीं भगवान् भवतां तत्तेजो विधास्यति।।३६।।
विश्वस्य स्थितिलयोद्भवहेतुरस्ति, यस्य विचित्रसर्गकारिण्यात्मशक्तिरद्भुता वर्तते,
त्रैलोक्याधिपतिर्भगवान् नः क्षेमं विधास्यति, एवं भूते भगवत्यस्मदिष्टस्य विचा-
कियान्?।।३७।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां षोडशोऽध्यायः।।१६।।

अथ सप्तदशोऽध्यायः ।। १७।।

मैत्रेय उवाच – निशम्यात्मभुवा गीतं कारणं शङ्कयोज्झिताः। ततः सर्वे न्यवर्त्तन्त त्रिदिवाय दिवौकसः।।१।। दितिस्तु भर्त्तुरादेशादपत्यपरिशङ्किनी। पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ।।२।। उत्पाता बहवस्तत्र निपेतुर्जायमानयोः। दिवि भुव्यन्तरिक्षे च लोकस्योरुभयावहाः।।३।। सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः। सोल्काश्चाशनयः पेतुः केतवश्चार्त्तिहेतवः।।४।। ववौ वायुः सुदुःस्पर्शः फूत्कारा-नीरयन्मुहुः। उन्मूलयन्नगपतीन्वात्यानीको रजोध्वजः।।५।। उद्धसत्तडिदम्भोदघटया नष्टभागणे। व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदम्।।६।। चुक्रोश विमना वार्द्धिरुदूर्मिक्षुभितोदरः। सोदपानाश्च सरितश्चुक्षुभुः शुष्कपङ्कजाः।।७।। मुहुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः। निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे।।८।। अन्तर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम्। शृगालोलूकटङ्कारैः प्रणेदुरशिवं शिवाः ।।९।।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तदशोऽध्यायः ।।१७।।

हिरण्याक्षहिरण्यकशिप्वोर्जन्म हिरण्याक्षदिग्विजयश्च

मैत्रेय उवाच – ब्रह्मणा कथितं दुःखकारणं निशम्य निःशङ्काः सर्वे देवा ब्रह्मलोकात् त्रिदिवं प्रतिगन्तुं न्यवर्तन्त।।१।। साध्वी दितिस्तु भर्तुरादेशात् स्वापत्याभ्यां परिशङ्किनी सती वर्षशते पूर्णे सति यमौ पुत्रौ सुषुवे।।२।। तत्र जायमानयोस्तयोः सतोः दिवि भुव्यन्तरिक्षे च बहवो लोकभयङ्करा उत्पाता निपेतुः।।३।। पर्वतैः सह भूभागाश्चेलुः, सर्वा दिशः प्रजज्वलुः, सोल्का अशनयः पेतुः, पीडासूचकाः केतव उद्बभूवुः।।४।। मुहुः फूत्कारान् कुर्वन् कठोरो वायुर्ववौ, श्रेष्ठवृक्षान् उन्मूलयन् चक्रवातो ववौ।।५।। प्रस्फूरत्तडिता सह घनघटया नष्टभगणे व्योम्नि प्रविष्टतमसा सूर्यादिस्थानं न व्यदृश्यत।।६।। समुद्रः दुःखितचितः क्षुभितोदरः सन् चुक्रोशः, वापीकूपतडागादिभिः सहिताः शुष्कपङ्कजाः सरितश्चुक्षुभुः।।७।। राहुणा सूर्यचन्द्रयोर्ग्रहणं मण्डलं च मुहुर्मुहुरभवत्, गिरिगुहाभ्यां रथशब्दवत् ध्वनयो निःसृताः।।८।।

संगीतवद्रोदनवदुन्नमय्य शिरोधराम्। व्यमुञ्चन्विविधा वाचो ग्रामसिंहास्ततस्ततः
।।१०।। खराश्च कर्कशैः क्षत्तः खुरैर्घ्नन्तो धरातलम्। खार्काररभसा मत्ताः पर्यधाव-
न्वरूथशः।।११।। रुदन्तो रासभत्रस्ता नीडादुदपतन्खगाः। घोषेऽरण्ये च पशवः
शकृन्मूत्रमकुर्वत।।१२।। गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः। व्यरुदन् देव-
लिङ्गानि द्रुमाः पेतुर्विनानिलम्।।१३।। ग्रहान्पुण्यतमानन्ये भगणांश्चातिपीडिताः।
अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम्।।१४।। दृष्ट्वान्यांश्च महोत्पातानतत्तत्त्वविदः
प्रजाः। ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवम्।।१५।। तावादिदैत्यौ सहसा व्यज्य-
मानात्मपौरुषौ। ववृधातेऽश्मसारेण कायेनाद्रिपती इव।।१६।। दिविस्पृशौ हेम-
किरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदङ्गदाभुजौ। गां कम्पयन्तौ चरणैः पदे पदे
कट्या सुकाञ्च्यार्कमतीत्य तस्थतुः।।१७।। प्रजापतिर्नाम तयोरकार्षीद्यः प्राक्
स्वदेहाद्यमयोरजायत। तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत
साग्रतः।।१८।। चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च।

।। सङ्ग्रहोक्तिः ।।

ग्रामेषु शृगालोलूकानां शब्दैः सह शृगालीगणा मुखतोऽग्निवमनं कुर्वन्तो दुष्टरवं चक्रुः।।९।।
श्वानः कंधरामुन्नमय्य संगीतवत् रोदनवच्च विविधा वाचोऽकुर्वन्।।१०।। गर्दभाः कर्कशैः
खुरैर्भुवं ताड़यन्तः कर्कशं स्वजातिशब्दं कुर्वन्तो धावनं चक्रुः।।११।। गर्दभध्वनिभीताः खगा
रुदन्तः सन्तः स्वनीडेभ्य उदपतन्, घोषेऽरण्ये च पशवः शकृत् मूत्रं चं उत्ससृजुः।।१२।।
रक्तं दुहन्त्यो गावोऽत्रसन्, मेघाः पूयवर्षिणोऽभुवन्, देवप्रतिमा व्यरुदन्, वायुं विनापि द्रुमाः
पेतुः।।१३।। शुभग्रहान् भगणांश्च क्रूरग्रहा वक्रगत्याऽतिक्रम्य ययुः, परस्परं युयुधुश्च।।१४।।
इतरानपि महोत्पातान् दृष्ट्वा तदजानन्त्यः प्रजा भीताः सत्यो जगत्संहारं मेनिरे।।१५।।
प्रकटपूर्वपौरुषावादिदैत्यौ सहसा जातौ सन्तौ वज्रसारशरीरेण पर्वतश्रेष्ठाविव ववृधाते।।१६।।
सुवर्णमुकुटकोटिभिर्दिवं स्पृशन्तौ दिग्व्याप्तौ चरणैः पदे पदे भूमिं कम्पयन्तौ सुवर्णकाञ्च्या
कट्या सूर्यमतिक्रम्य तस्थतुः।।१७।। पुत्रयुग्मे कश्यपाद् यः प्रथमो जातः तस्य नाम
हिरण्यकशिपुरिति, दिति यं प्रथमं सुषुवे तस्य नाम हिरण्याक्षरिति प्रजा विदुः।।१८।।

वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः।।१९।। हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहम्। गदापाणिर्दिवं यातो युयुत्सुर्मृगयन् रणम्।।२०।। तं वीक्ष्य दुःसहजवं रणत्काञ्चननूपुरम्। वैजयन्त्या स्रजा जुष्टमंसन्यस्तमहागदम्।।२१।। मनोवीर्यवरोद्रिक्तमसृण्यमकुतोभयम्। भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः।।२२।। स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट्। सेन्द्रान् देवगणान् क्षीबानपश्यन् व्यनदद्भृशम्।।२३।। ततो निवृत्तः क्रीडिष्यन् गम्भीरं भीमनिस्वनम्। विजगाहे महासत्त्वो वार्द्धिं मत्त इव द्विपः।।२४।। तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्निधयः ससाध्वसाः। अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः।।२५।। स वर्षपूगानुदधौ महाबलश्चलन्महोर्मीन् श्वसनेरितान्मुहुः। मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः।।२६।। तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसम्। स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम्।। २७।।

।। सङ्ग्रहोक्तिः।।

हिरण्यकशिपुः स्वभुजबलेनोद्धतः सन् ब्रह्मवरेणाऽकुतोमृत्युः, सपालान् त्रीन् लोकान् स्वाधीनान् चकार।।१९।। तस्य प्रियोऽनुजो हिरण्याक्षो गदापाणिः सन् युद्धं मृगयन् दिवं गतः।।२०।। दुःसहवेगं रणत्काञ्चननूपुरं वैजयन्त्या स्रजाऽलंकृतं स्कन्धस्थगदं मनोबलवरगर्वितं निरङ्कुशं तं दृष्ट्वा भीताः सर्वे देवाः तार्क्ष्यं दृष्ट्वा अहय इव निलिल्यिरे।।२१-२२।। स दैत्यराट् स्वेन तेजसा तिरोहितान् सेन्द्रान् देवान् अपौरुषान् ज्ञात्वा मदोद्धतः स तान् न पश्यन् भृशं व्यनदत्।।२३।। ततः दिवः प्रत्यावृत्तो विहरिष्यन् महाबलो हिरण्याक्षो भीमनिस्वनं गम्भीरं सागरं मत्तो द्विप इव प्रविवेश।।२४।। हिरण्याक्षे सागरे प्रविष्टे सति वरुणस्य सैनिका यादोगणा भयसुंक्ताः दुःखितचित्तास्तेनाऽताडिता अपि तस्य तेजसाऽभिभूताः सन्तो दूरतरं प्रदुद्रुवुः।।।२५।।महाबलो हिरण्याक्षो बहुसंवत्सरान् समुद्रे चलन् निजश्वासेनोत्थितान् तरङ्गान् गदया प्रजहार, हे विदुर! ततः स विभावरीं नाम नगरीं प्रविवेश।।२६।।तत्राऽसुरलोकपालकं यादोगणाधिपम् वरुणं संप्राप्य स्मयन्नुपहसितुं नीचवत् तं प्रणम्य हे वरुण! मह्यं "युद्धं देहि"

त्वं लोकपालाधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनाम् । विजित्य लोकेऽखिल-
दैत्यदानवान्यद्राजसूयेन पुराऽयजत्प्रभो ।।२८।। स एवमुद्रिक्तमदेन विद्विषा दृढं
प्रलब्धो भगवानपां पतिः। रोषं समुत्थं शमयन्स्वया धिया न्यवोचदङ्गोपशमं गता
वयम् ।।२९।। पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदम्।
आराधयिष्यत्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ।।३०।। तं वीरमारादभिपद्य
विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः। यस्त्वद्विधानामसतां प्रशान्तये रूपाणि धत्ते
सदनुग्रहेच्छया ।।३१।।

इति श्रीमद्भागवते महपुराणे तृतीयस्कन्धे सप्तदशमोऽध्यायः ।। १७।।

अथाष्टादशोऽध्यायः ।।१८।।

मैत्रेय उवाच – तदेवमाकर्ण्यजलेशभाषितं महामनास्तद्विगणय्य दुर्मदः। हरेर्विदित्वा
गतिमङ्ग नारदाद्रसातलं निर्विविशे त्वरान्वितः।। १।।

।। सङ्ग्रहोक्तिः ।।

इति जगाद ।।२७।। हे प्रभो! भवान् लोकपालानामधिपो वीरमानिनां वीर्यापहोऽसि, पुरा
दैत्यदानवान् विजित्य राजसूयेनाऽयजत् ।।२८।। तदा वरुणः मदोद्धतेन विद्विषा इत्थं प्रलब्धः
समुत्थं क्रोधं धिया शमयन् तं न्यवोचत्, हे असुर! वयं युद्धादुपरमं प्राप्ताः स्मः ।।२९।। हे
असुरश्रेष्ठ! पुरातनात् परमपुरुषादन्यं रणकोविदं न पश्यामि, यस्त्वां युद्धे तोषयिष्यति।
भवादृशा यं परमपुरुषं स्तुवन्ति ।।३०।। वीरं तं परमपुरुषं समीपं गत्वा विगतगर्वस्त्वं रणप्रदेशे
श्वभिर्वृतः सन् शयिष्यसे, यस्त्वद्विधानामसतां विनाशाय साधूनां रक्षणाय च वराहाद्यवतारान्
धत्ते ।।३१।। *इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां सप्तदशोऽध्यायः ।।१७।।*

अथाष्टादशोऽध्यायः ।। १८।।

हिरण्याक्षमहावराहयोर्युद्धम्

मैत्रेय उवाच – हे विदुर! एवं विधं वरुणवचनमाकर्ण्य सोत्साहमानसो दुर्मदस्तमविगणय्य

दद॑र्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया। मुष्णन्तमक्ष्णा स्वरुचो-
ऽरुणश्रिया जहास चाहो वनगोचरो मृगः।। २।। आहैनमेह्यज्ञ महीं विमुञ्च नो
रसौकसां विश्वसृजेयमर्पिता। न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादित-
सूकराकृते ।।३।। त्वं नः सपत्नैरभवाय किं भृतो यो मायया हन्त्यसुरान्परोक्षजित्।
त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छुचः।।४।। त्वयि संस्थिते
गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यम् । बलिं हरन्त्यृषयो ये च देवाः
स्वयं सर्वे न भविष्यन्त्यमूलाः।।५।। स तुद्यमानोऽरिदुरुक्तितोमरैर्दंष्ट्राग्रगां
गामुपलभ्य भीताम्। तोदं मृषन्निरगादम्बुमध्यात् ग्राहाहतः सकरेणुर्यथेभः।।६।।
तं निःसरन्तं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः। करालदंष्ट्रोऽशनि-
निस्वनोऽब्रवीद् गतह्रियां किं न्वसतां विगर्हितम्।।७।। स गामुदस्तात्ससिलस्य
गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वम्।

।। साकारत्वबोधिनी - सङ्ग्रहोक्तिः।।

हरेर्गतिं नारदाद् विदित्वा सत्वरं रसातलं निर्विविशे।।१।। हिरण्याक्षः रसातले धराधरं दंष्ट्राग्रेणाऽवनीमूर्ध्वं नयन्तमरुणरुचा नेत्रेण स्वरुचं मुष्णन्तमभिजितं हरिं ददर्श, अहो! अयं जलचरो मृगः? इत्युक्त्वाऽपहसितवान्।।२।।हे वनमृग! अज्ञ! एहि, इमां पृथ्वीं विमुञ्च यतो ब्रह्मणा इयं मही पातालवासीनां नोऽर्पिताऽस्ति, हे सुराधम! हे सुकराकृते! मम पश्यतः सतोऽनया भूम्या सह त्वं कुशलो न यास्यसि।।३।। यो भवान् परोक्षजित् सन् असुरान् केवलेन कपटयुद्धेन हन्ति, स त्वमस्मत्सपत्नैः सुरैरस्माकं विनाशाय पुष्टीकृतोऽसि, हे मूढ! कपटोपायबलवन्तं त्वां हत्वाऽस्मत्सुहृन्नेत्राश्रूणि मार्जयिष्यामि।।४।।मद्धस्तविसृष्टया गदया भिन्नशीर्ष्णि त्वयि हते सति ये देवर्षयस्त्वां पूजयन्ति ते सर्वे नष्टमूलाः सन्तः स्वयमेव विनश्यन्ति।।५।। स वराहः शत्रुदुरुक्तितोमरैः पीड्यमानः दंष्ट्राग्रस्थां भूमिं भीतामुपलक्ष्य दुरुक्तिव्यथां सहमानः सन्नेव जलमध्यात् ग्राहाहतः सकरेणुर्गजराज इव बहिर्निरगात्।।६।। करालदंष्ट्रः वज्रनिःस्वनो हिरण्याक्षो जलान्निःसरन्तं हरिं द्विरदं मकरः इवाऽनुद्रुत आह च, निर्लज्जानां दुर्जनानां भवतां विगर्हितं किम्?।।७।। स भगवान् सलिलस्योपरि योग्यदेशे

अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः॥८॥ परानुषक्तं तपनीयोपकल्पं महागदं काञ्चनचित्रदंशम्। मर्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः प्रचण्डमन्युः प्रहसंस्तं बभाषे॥९॥ *श्रीभगवानुवाच* - सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान्। न मृत्युपाशैः प्रतिमुक्तस्य धीरा विकत्थनं तव गृह्णन्त्यभद्रम्॥१०॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताास्ते। तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरम्॥११॥ त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः। संस्थाप्य चाऽस्मान्प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्त्यसभ्यः ॥१२॥ *मैत्रेय उवाच* - सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशम्। आजहारोल्बणं क्रोधं क्रीड्यमानोऽहिराडिव॥१३॥ सृजन्नमर्षितः श्वासान्मन्युप्रचलितेन्द्रियः। आसाद्य तरसा दैत्यो गदयाभ्यहनद्धरिम्॥१४॥ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि। अवञ्चयत्तीरश्चीनो योगारूढ इवान्तकम्॥१५॥

॥ साकारत्वबोधिनी - सङ्ग्रहोक्तिः॥

भूमिं शत्रोःपश्यतः सतः संस्थाप्य, भूमावाधारशक्तिमदधात्, ततो ब्रह्मणाऽभिष्टुतः दैवैः पुष्पैर्विकीर्यमाणः स वराहः,॥८॥ स्वमनुद्रवन्तं स्वर्णभूषणं महागदं दुर्वचनैर्मर्मणि तुदन्तं हिरण्याक्षं प्रहसन् भगवान् तं बभाषे॥९॥ *श्रीभगवानुवाच* - हे असुर! सत्यं वयं वनमृगाः किन्तु युष्माद्विधान् ग्रामसिंहान् = भषकानन्वेषयामि, मृत्युपाशैः प्रतिबद्धस्य तव विकत्थनं शूरा नाभिनन्दन्ति॥१०॥ हे हिरण्याक्ष! अहो! वयं रसातलवासिनामाधारभुवो हर्तारः गतलज्जाः त्वया गदया विद्राविताः स्मः, तथापि संग्रामे त्वदग्रे तिष्ठामहे, बलिना वैरमुत्पाद्य क्व यामः? ॥११॥ त्वमस्माकं पराभवाय शीघ्रं यतस्व, निःशङ्कमस्मान्निहत्य स्वकानामश्रूणि निर्वर्त्तय, यः स्वां प्रतिज्ञां न पूरयति सोऽसभ्यो गण्यते॥१२॥ *मैत्रेय उवाच* - भगवतेत्थमधिक्षिप्तः प्रहसितश्च सोऽसुरः क्रूद्धोऽहिराडिव भृशं चुक्रोध॥१३॥ अत्यन्तं क्रुद्धः निःश्वासान् विमुञ्चन् स दैत्यः समीपमागत्य तरसा गदया हरिमभ्यहनत्॥१४॥ भगवांस्तु रिपुणोरसि विसृष्टं गदावेगं तिर्यग्गमनः सन् योगी कालमिवाऽवञ्चयत्॥१५॥

पुनर्गदां स्वामादाय भ्रामयन्तमभीक्ष्णशः। अभ्यधावद्धरिः क्रुद्धः संरम्भाद्दष्टदच्छदः ।।१६।। ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः। आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत् ।। १७।। एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च। जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः ।।१८।। तयोः स्पृधोस्तिग्मगदाहताङ्गयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः। विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः।।१९।। दैत्यस्य यज्ञावयवस्य मायया गृहीतवाराहतनोर्महात्मनः। कौरव्य मह्यां द्विषतोर्विमर्द्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ।।२०।। आसन्नशौण्डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम्। विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरम् ।।२१।। *ब्रह्मोवाच* - एष ते देव देवानामङ्घ्रिमूलमुपेयुषाम्। विप्राणां सौरभेयीणां भूतानामप्यनागसाम् ।।२२।। आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः। अन्वेषन्नप्रतिरथो लोकानटति कण्टकः।।२३।। मैनं मायाविनं दृप्तं निरङ्कुशमसत्तमम्। आक्रीड बालवद्देव यथाशीविषमुत्थितम् ।।२४।।

।। सङ्ग्रहोक्तिः ।।

पुनः क्रुद्धो हरिः स्वां कौमोदकीं गदामादाय गदां भ्रामयन्तमसुरं प्रत्यभ्यधावत् ।।१६।। ततो हरिः स्वकौमोदक्या गदया शत्रुं दक्षिणस्यां भ्रुवि प्रजहार, किन्तु हे सौम्य! गदायुद्धे कुशलः स तामप्राप्तां गदां स्वगदयाऽऽजघ्ने ।।१७।। एवं हिरण्याक्षः वराहश्च तावुभौ क्रुद्धौ सन्तौ जिगीषया गुर्वीभ्यां गदाभ्यामन्योन्यमभिजघ्नतुः।।१८।। परस्परं स्पर्धमानयोस्तीक्ष्णगदाहताङ्गयो रुधिरावघ्राणविवृद्धक्रोधयोर्जिगीषया विचित्रमार्गान् चरतोस्तयोःसंग्रामः मत्तवृषभयोरिव बभौ ।।१९।। हे विदुर! स्वसंकल्पेन गृहीततनोर्यज्ञमूर्त्तेर्हरेर्हिरण्याक्षस्य च युद्धं दिदृक्षुः स्वराट् ब्रह्मा मरीच्यादिभिः सह तत्राऽऽययौ ।।२०।। दुर्मदं निर्भयं प्रतीकारतत्परमसह्यविक्रमं च हिरण्याक्षं विलक्ष्य ब्रह्माऽऽदिवराहं नारायणं जगाद ।।२१।। *ब्रह्मोवाच* - एष असुरो निर्दोषाणां देवर्षिगोभूतानामपराधकर्ता भयंकरः दुष्कर्मकृच्चास्ति, अस्मल्लब्धवरोऽप्रतिरथः प्रतिरथं मृगयन् लोकानटति ।।२२-२३।। हे देव! मायाविनं दृप्तं निरङ्कुशं दुरात्मानमेनं दैत्यं सफूत्कारं सर्पमिव बालवत् नैव क्रीडय ।।२४।।

न यावदेष वर्द्धेत स्वां वेलां प्राप्य दारुणः। स्वां देव मायामास्थाय तावज्जह्यघमच्युत ।।२५।। एषा घोरतमा संध्या लोकशंबट्करी प्रभो। उपसर्पति सर्वात्मन्सुराणां जयमावह।। २६।। अधुनैषोऽभिजिन्नाम योगो मौहूर्त्तिको ह्यगात्। शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम्।।२७।। दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम् । विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि।। २८।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे हिरण्याक्षयुद्धं नामाष्टादशोऽध्यायः ।।१८।।

अथ एकोनविंशोऽध्यायः ।।१९।।

मैत्रेय उवाच - अवधार्य विरिञ्चस्य निर्व्यलीकामृतं वचः। प्रहस्य प्रेमगर्भेण तदपाङ्गेन सोऽग्रहीत्।।१।। ततः सपत्नं मुखतश्चरन्तमकुतोभयम्। जघानोत्पत्य गदया हनावसुरमक्षजः।।२।। सा हता तेन गदया विहता भगवत्करात्। विघूर्णिताऽपतद्रेजे तदद्भुतमिवाभवत्।।३।।

।। सङ्ग्रहोक्तिः ।।

हे अच्युत! दारुण एष दैत्यः स्वबलकरीं सन्ध्यां वेलां प्राप्य न वर्द्धेत तावदेव स्वकीययोगमायाबलमाश्रित्य पापरूपमेनं जहि।।२५।। हे प्रभो! लोकप्रतिकूला घोरतमैषा संध्योपसर्पति. अतो हे सर्वात्मन्! देवानां जयमाशु संपादय।।२६।। अधुनैव एषोऽभिजिन्नामा मौहूर्तिको योग आगतः, अतस्त्वदीयसुहृदां शिवाय दुर्जयं दैत्यमाशु जहि।।२७।। अस्य पित्रैव दितिं प्रति कथितं यद् अयमसुरो दैवेनैव मृत्युमासादित.इति।।२८।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यामष्टादशोऽध्यायः ।।१८।।

अथ एकोनविंशोऽध्यायः ।। १९।।

हिरण्याक्षवधः

मैत्रेय उवाच - ब्रह्मणो निर्दोषममृततुल्यं च वचः श्रुत्वा प्रहस्य च स भगवान् वराहः कटाक्षेण तदग्रहीत्।।१।। ततोऽकुतोभयं स्वाभिमुखप्रदेश एव चरन्तं तमसुरं भगवान् उत्प्लुत्य गदया

स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम्। संमानयन् मृधे धर्मं विष्वक्सेनं प्रकोपयन्।।४।। गदायामपविद्धायां हाहाकारे विनिर्गते। मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः।। ५।। तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्षदमुख्येन विषज्जमानम्। चित्रा वाचोऽतद्विदां खेचराणां तत्र स्मासन्स्वस्ति तेऽमुं जहीति।। ६।। स तं निशाम्यात्तरथाङ्गमग्रतो व्यवस्थितं पद्मपलाशलोचनम्। विलोक्य चामर्षपरिप्लुतेन्द्रियो रुषा स्वदन्तच्छदमादशच्छ्वसन्।।८।। पदा सव्येन तां साधो भगवान्यज्ञशूकरः। लीलया मिषतः शत्रोः प्राहरद्वातरंहसम्।।९।। आह चायुधमादत्स्व घटस्व त्वं जिगीषसि। इत्युक्तः स तया भूयस्ताडयन् व्यनदद्भृशम्।।१०।। तां स आपततीं वीक्ष्य भगवान्समवस्थितः। जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम्।। ११।। स्वपौरुषे प्रतिहते हतमानो महासुरः। नैच्छद्गदां दीयमानां हरिणा विगतप्रभः।।१२।। जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपम्।

।। सङ्ग्रहोक्तिः ।।

हनौ जघान।।२।। भगवत्प्रयुक्ता सा गदा हिरण्याक्षेण स्वगदयैव हता सती विघूर्णिता भूत्वाऽधः पपात।। ३।। सोऽसुरो लब्धावकाशः सन्नपि निरायुधं भगवन्तं कोपयन् युद्धधर्मं सम्मानयंश्च न प्राहरत्।।४।। स्वहस्ताद् गदायां विगलितायां सत्यां हाहाकारे विनिर्गते सति भगवान् तद्धर्मं मानयामास एवं च स्वीयं सुदर्शनं चक्रमस्मरत्।।५।। चक्रधारिणं पूर्वं स्वपार्षदमुख्येन हिरण्याक्षेण विषज्जमानं वराहभगवन्तं दृष्ट्वा खेचराणां देवानां "असुरं जहि" "ते स्वस्त्यस्तु" एवं चित्रा वाचस्तत्राऽऽसन्।। ६।। सोऽसुरः पद्मपलाशलोचनं गृहीतचक्रं हरिं स्वपुरःप्रदेशे विलोक्य क्रोधक्षुब्धेन्द्रियः करालदंष्ट्रः, स्वचक्षुर्भ्यां दहन्निव पश्यन्नभिद्रुत्य "हतोऽसि" इत्युच्चरन् हरिं स्वगदया प्रजघान।।७-८।। हे विदुर! भगवान् यज्ञवराहो वायुवेगां तां गदां वामपादेन शत्रोर्मिषतः सतो लीलया प्राहरत्।।९।। "आयुधं गृहाण, यतस्व त्वं जिगीषसि" एवमभिहितोऽसुरः पतितया तया गदया भगवन्तं भूयस्ताडयन् भृशं व्यनदत्।।१०।। तामापततीं गदां वीक्ष्य समवस्थितः स वराहः प्राप्तां तां गरुडः सर्पिणीमिव लीलया जग्राह।।११।। एवं स्वपौरुषे प्रतिहते सति हतमानो विगतप्रभः सोऽसुरः प्रभुणा दीयमानां गदां ग्रहीतुं नैच्छत्।।१२।।

यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा ।।१३ ।। तदोजसा दैत्यमहाभटार्पितं चकास-
दन्तः ख उदीर्णदीधिति । चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितम्
।।१४।। वृक्णे स्वशूले बहुधाऽरिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् । प्रवृद्धरोषः
स कठोरमुष्टिना नदन्प्रहृत्यान्तरधीयतासुरः ।।१५।। तेनेत्थमाहतः क्षत्तर्भगवानादि-
शूकरः । नाकम्पत मनाक्क्वापि स्रजाहत इव द्विपः ।।१६ ।। अथोरुधाऽसृजन्मायां
योगमायेश्वरे हरौ । यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ।।१७।। प्रववुर्वायव-
श्चण्डास्तमः पांसवमैरयन् । दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ।।१८।। द्यौर्नष्ट-
भगणाभ्रौघैः सविद्युत्स्तनयित्नुभिः । वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत्
।।१९।। गिरयः प्रत्यदृश्यन्त नानायुधमुचोऽनघ । दिग्वाससो यातुधान्यः शूलिन्यो
मुक्तमूर्द्धजाः ।।२०।। बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुञ्जरैः । आततायिभिरुत्सृष्टा
हिंस्रा वाचोऽतिवैशसाः ।।२१।। प्रादुष्कृतानां मायानामासुरीणां विनाशनम् ।
सुदर्शनास्त्रं भगवान् प्रायुङ्क्त दयितं त्रिपात् ।।२२।।

।। सङ्ग्रहोक्तिः ।।

किंतु प्रदीप्ताग्निसमिद्धं त्रिशूलं धृतमूर्तये यज्ञवराहाय प्राहिणोत् ।।१३।। तदा दैत्यमहाभटेन प्रयुक्तमाकाशमध्ये दीप्त्या प्रकाशमानं तत् त्रिशूलं भगवान् तीक्ष्णधारेण चक्रेण चिच्छेद ।।१४।। हरिणा चक्रेण स्वत्रिशूले छिन्ने सति प्रवृद्धरोषोऽसुरो नादं कुर्वन् सन् सम्मुखमागत्य कठोरमुष्टिना लक्ष्म्याश्रयभूतं विशालं हरेर्वृक्षः प्रताड्याऽन्तरधीयत ।।१५।। हे विदुर! तेनेत्थमाहतो भगवानादिवराहो पुष्पदाम्ना ताडितो गज इव मनागपि नाऽकम्पत ।।१६।। अन्तर्धानानन्तरं स स्वसम्बन्ध्याश्चर्यशक्तीनां नेतरि हरौ बहुप्रकारां मायामसृजत्, यां विलोक्य प्रजा विश्वस्य प्रलयं मेनिरे ।।१७।। तीव्रवेगा वायवो पांसवं तम ऐरयन् सन्तः प्रववुः, अश्मशकलानि क्षेपणैः क्षेपिता इव निपेतुः ।।१८।। पूयं, केशान्, रुधिरं, विष्ठां, मूत्रं अस्थीनि च, एतानि भूयोभूयः वर्षद्भि र्मेघैर्द्यौः नष्टनक्षत्रगणाऽभूत् ।।१९।। हे अनघ! पर्वता नानायुधानि मुञ्चन्तो दृष्टाः बभूवुः, त्रिशूलधारिण्यो मुक्तकेशा दिगम्बरा यातुधान्यः प्रत्यदृश्यन्त ।।२०।। पत्त्यश्वरथ-कुञ्जरस्थै हिंसाशीलै र्यक्षरक्षोभिः प्रयुक्ता अतिक्रूरा वाचः प्रत्यश्रृण्वन्त ।।२१।। एवं -

तदा दितेः समभवत्सहसा हृदि वेपथुः। स्मरन्त्या भर्त्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे ।।२३।। विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवम्। रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः।।२४।। तं मुष्टिभिर्विनिघ्नन्तं वज्रसारैरधोक्षजः। करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः।।२५।। स आहतो विश्वसृजा ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः। विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतद्यथा नगेन्द्रो लुलितो नभस्वता ।।२६।। क्षितौ शयानं तमकुण्ठवर्चसं करालदंष्ट्रं परिदष्टदच्छदम्। अजादयो वीक्ष्य शशंसुरागता अहो इमां को नु लभेत संस्थितिम्।।२७।। यं योगिनो योगसमाधिना रहो ध्यायन्ति लिङ्गादसतो मुमुक्षया। तस्यैष दैत्यर्षभः पदा हतो मुखं प्रपश्यंस्तनुमुत्ससर्ज ह।।२८।। एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिम्। पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः।। २९।। नमो नमस्तेऽखिलयज्ञतन्तवे स्थितौ गृहीतामलसत्त्वमूर्त्तये। दिष्ट्या हतोऽयं जगतामरुन्तुदस्त्वत्पादभक्त्या वयमीश निर्वृताः।।३०।।

।। सङ्ग्रहोक्तिः।।

प्रादुष्कृतानामासुरीणां मायानां नाशनाय भगवान् स्वातिप्रियं सुदर्शनं प्रायङ्क्त।।२२।। तदा कश्यपस्य वचनं स्मरन्त्या दितेर्हृदि कम्पः समुत्पन्नः, स्तनाद्रुधिरं प्रसुस्रुवे।।२३।।स्वमायासु विनष्टासु सतीषु हिरण्याक्षो भूयोऽभिमुखमागत्य रुषा केशवं बाह्वोरन्तरे निधाय संघटयन्नपि तं बहिः स्थितं ददर्श।।२४।। अधोक्षजो हरिर्वज्रसारैर्मुष्टिभिर्विनिघ्नन्तं तं इन्द्रो वृत्रमिव करेण कर्णमूले जघान।।२५।।एवं भगवताऽवज्ञापूर्वकमाहतः स दैत्यः परिभ्रमद्गात्रः, बहिर्निर्गतलोचनो विशीर्णभुजचरणकेशः सन् वायुनोत्पाटितो महाद्रुम इव भुवि पपात।।२६।। भूमौ शयानमप्रतिहततेजस्कं करालदंष्ट्रं तमसुरं तत्रागता ब्रह्मादयो वीक्ष्य अहो! ईदृशं भगवद्धस्ततो मरणं को लभेत? इति शशंसुः।।२७।। अहो! योगिभिर्ध्यानगम्यस्य हरे मुखं पश्यत एव प्राणांस्त्यजतोऽस्य दैत्यस्य भाग्यं वर्णनातीतमस्ति।।२८।।एतौ हिरण्याक्षहिरण्यकशिपू भगवतः पार्षदौ भवतः, तौ ब्रह्मशापादसद्गतिं प्राप्तौ, पुनश्च कतिपयैर्जन्मभिर्वैकुण्ठं प्राप्स्येते।।२९।। तदा देवा आहुः - अखिलयज्ञतन्तवे, जगत्स्थितौ गृहीतामलसत्त्वमूर्त्तये तस्मै भगवते नमः, -

एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिशूकरः। जगाम लोकं स्वमखण्डि-
तोत्सवं समीडितः पुष्करविष्टरादिभिः।।३१।। मया यथाऽनूक्तमवादि ते हरेः
कृतावतारस्य सुमित्र चेष्टितम् ।। यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनव-
न्निराकृतः।।३२।। *श्रीशुक उवाच*- इति कौषारवाख्यातामाश्रुत्य भगवत्कथाम्।
क्षत्तानन्दं परं लेभे महाभागवतो नृप।।३३।। अन्येषां पुण्यश्लोकानामुद्दामयशसां
सताम्। उपश्रुत्य भवेन्मोदः श्रीवत्साङ्कस्य किं पुनः।।३४।। यो गजेन्द्रं झषग्रस्तं
ध्यायन्तं चरणाम्बुजम् । क्रोशन्तीनां करेणूनां कृच्छ्रतोऽमोचयद् द्रुतम्।।३५।।
तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः। कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः
।।३६।। यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः। शृणोति
गायत्यनुमोदतेऽञ्जसा विमुच्यते ब्रह्मवधादपि द्विजः।।३७।। एतन्महापुण्यमलं
पवित्रं धन्यं यशस्यं पदमायुराशिषाम्। प्राणेन्द्रियाणां युधि शौर्यवर्द्धनं नारायणो-
ऽन्ते गतिरङ्ग शृण्वताम् ।।३८।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे एकोनविंशोऽध्यायः ।।१९।।

।। सङ्ग्रहोक्तिः ।।

जगतां पीडकोऽयं हतः, दिष्ट्या, हे ईश! त्वत्पादभक्त्या वयं सुखिनो जाताः।।३०।।
एवमसह्यविक्रमं हिरण्याक्षं निहत्याऽऽदिवराहो हरिर्ब्रह्मादिभिः स्तुतः सन् स्वं वैकुण्ठं लोकं
जगाम।।३१।। हे विदुर! उदारविक्रमो हिरण्याक्षः संग्रामे क्रीडनवत् भगवता यथा निहतः
तत् भगवतो वराहावतारस्य चरितं ते मया कथितम्।।३२।। हे नृप! मैत्रेयकथितां
भगवत्कथामाकर्ण्य विदुरः परमानन्दं लेभे।।३३।।पुण्यश्लोकानां भगवदितरेषां कथामुपश्रुत्य
मोदो भवेत् तदा श्रीवत्साङ्कस्य भगवतः कथामुपश्रुत्यानन्दो भवेद् अत्र किम् वक्तव्यम्।।३४।।
ग्राहग्रस्तपादं स्वचरणारविन्दं ध्यायन्तं गजेन्द्रं यो भगवान् द्रुतं कष्टादमोचयत्।।३५।।
अनन्यशरणैर्नरैः सुखाराध्यं असाधुभिर्दुराराध्यं तं भगवन्तं कृतज्ञः को न सेवेत।।३६।।
महाद्भुतं जगद्रक्षणार्थं धृतशूकरशरीरस्य भगवतः क्रीडारूपं हिरण्याक्षवधं यो द्विजः शृणोति

अथ विंशोऽध्यायः ।।२०।।

शौनक उवाच – महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः। कान्यन्वतिष्ठद् द्वाराणि मार्गायावरजन्मनाम् ।।१।। क्षत्ता महाभागवतः कृष्णस्यैकान्तिकः सुहृत् । यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति ।।२।। द्वैपायनादनवरो महित्वे तस्य देहजः। सर्वात्मनाश्रितः कृष्णं तत्परांश्चाप्यनुव्रतः।।३।। किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थ-सेवया। उपगम्य कुशावर्त आसीनं तत्त्ववित्तमम् ।।४।। तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः। आपो गाङ्गा इवाघघ्न्यो हरेः पादाम्बुजाश्रयाः।।५।। ता नः कीर्त्तय भद्रं ते कीर्त्तन्योदारकर्मणः ।रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन् ।।६।।
व्यास उवाच – एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः।

।। सङ्ग्रहोक्तिः ।।

गायत्यभिनन्दति वा स आशु ब्रह्मवधपापाद् विमुच्यते ।।३७।।एतद्भगवच्चरितं महापुण्यमति-पवित्रं धन्यं यशस्यमायुःसंपादकं बलबुद्धिवृद्धिकरं चास्ति, हे राजन्! एतच्छृण्वतां नृणां नारायणप्राप्तिरेव फलमस्ति ।।३८।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां एकोनविंशोऽध्यायः ।।१९।।

अथ विंशोऽध्यायः ।।२०।।

ब्रह्मकृतविविधसृष्टिवर्णनम्

शौनक उवाच – हे सूत! भूमिं स्वस्य स्थानभूतां प्राप्य स्वायंभुवो मनुरर्वाचीनान् प्राणिनः कैरुपायैः सृष्टवान् ।।१।। कृष्णस्यैकान्तिकः सुहृद् विदुरो महाभागवत आसीत् "अयं कृष्णे सापराधः" इति कृत्वा यः सापत्यं धृतराष्ट्रं तत्याज ।।२।। माहात्म्ये यो व्यासान् न्यूनो न, स व्यासपुत्रो विदुरः सर्वात्मना कृष्णमाश्रितः, तद्भक्तांश्च सेवमानो वर्तते ।।३।। तीर्थसेवया शुद्धमनाः स विदुरः कुशावर्ते आसीनं तत्त्ववित्तमं मैत्रेयमुपगम्याऽन्यत् किं पृष्टवान् ।।४।। विदुरमैत्रेययोः संवादं कुर्वतोः सतोः हरेः पादाम्बुजाश्रयाः कथाः गङ्गाया आप इव पापनिवर्तकाः प्रवृत्ताः स्युः ।।५।। गेयचरितस्य तस्य भगवतः कथाः कथय, तव स्वस्त्यस्तु, हरिकथामृतं पीबन्

भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ।।७।। *सूत उवाच* - हरेर्धृतक्रोडतनोः
स्वमायया निशम्य गोरुद्धरणं रसातलात् ।लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो
मुनिमाह भारतः।।८।। *विदुर उवाच*- प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन्।
किमारभत मे ब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित् ।। ९ ।। ये मरिच्यादयो विप्रा यस्तु स्वायंभुवो
मनुः। ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ।। १० ।। सद्वितीयाः किमसृजन्स्वतन्त्रा
उत कर्मसु । आहोस्वित्संहताः सर्वे इदं स्म समकल्पयन् ।।११।। *मैत्रेय उवाच*
दैवेन दुर्वितर्क्येण परेणानिमिषेण च। जातक्षोभाद्भगवतो महानासीद्गुणत्रयात्।।१२।।
रजःप्रधानान्महतस्त्रिलिङ्गो दैवचोदितात्। जातः ससर्ज भूतादिर्वियदादीनि पञ्चशः
।।१३।। तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम्। संहत्य दैवयोगेन हैममण्ड-
मथासृजन् ।। १४ ।। सोऽशयिष्टाधिसलिलमण्डकोशो निरात्मकः। साग्रं वै वर्षसाहस्र-
मन्ववात्सीत्तमीश्वरः।।१५।। यस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति।

।। सङ्ग्रहोक्तिः ।।

रसज्ञः कः तृप्येत ।। ६ ।। *व्यास उवाच* - नैमिषक्षेत्रवासिभिः ऋषिभिरेवं पृष्टः उग्रश्रवा भगवति
स्वं मनः कृत्वा तान् श्रूयतामित्याह ।। ७।। *सूत उवाच* - स्वेच्छाधृतवराहरूपस्य हरेर्लीलास्य
रसातलात्पृथिव्या उद्धरणं सावज्ञं हिरण्याक्षवधं च श्रुत्वा संजातहर्षो विदुरो मैत्रयं पप्रच्छ ।।८।।
विदुर उवाच - मरीच्यादीनां पतिर्ब्रह्मा प्रजापतीन् सृष्ट्वा किमकुर्वत, हे ब्रह्मन्! तन्मे ब्रूहि
त्वमतीन्द्रियमार्गं जानासि ।। ९ ।। ये मरीच्यादयो विप्राः, यश्च स्वायंभुवो मनुः, एते सर्वे ब्रह्मण
आदेशात् एतद्विश्वं कथमसृजन् ।।१०।। एते सृष्टिं सभार्या अकुर्वन्, भार्यानपेक्ष्या अकुर्वन्
संभूयाऽकुर्वन् वा पृथक् पृथक् स्वतन्त्राः सृष्टिमकुर्वन् ।। ११ ।। *मैत्रेय उवाच* - अचिन्त्यप्रभावे
श्वरेण विलक्षणेन कालेन च भगवच्छरीरभूतात् गुणत्रयात्मकप्रधानात् महत्तत्त्वमासीत् ।।१२।।
भगवत्प्रेरितात् रजःप्रधानात् महत्तत्त्वात् भूतादिरहङ्कारो जातः, स पञ्चतन्मात्रमहाभूत
ज्ञानकर्मेन्द्रियदेवतात्मकः भूतादिः वियदादीनि ससर्ज ।। १३ ।। तान्येकैकशः सृष्टुमशक्तानि
दैवेन संहत्य हैममण्डमसृजन् ।।१४।। निरात्मकोऽण्डकोशः सलिलेऽशयिष्ट, तमण्डकोशं
वैराजो वर्षसाहस्रमन्ववात्सीत् ।।१५।। अण्डकोशे शयानस्य यस्य भगवतो नाभेः

सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ।।१६।। सोऽनुविष्टो भगवता यः शेते सलिलाशये। लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया ।।१७।। ससर्ज च्छायया-ऽविद्यां पञ्चपर्वाणमग्रतः। तामिस्रमन्धतामिस्रं तमो मोहो महातमः ।।१८।। विससर्जात्मनः कायं नाभिनन्दंस्तमोमयम्। जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवाम् ।।१९।। क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः। मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ।।२०।। देवस्तानाह संविग्नो मा मां जक्षत रक्षत। अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ ।।२१।। देवताः प्रभया या या दीव्यन्प्रमुखतोऽसृजत्। ते अहार्षुर्देवयन्तो विसृष्टां तां प्रभामहः ।।२२।। देवोऽदेवान् जघनतः सृजति स्मातिलोलुपान्। त एनं लोलुपतया मैथुनायाभिपेदिरे ।।२३।। ततो हसन्स भगवानसुरैर्निरपत्रपैः। अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ।।२४।। स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिम्। अनुग्रहाय भक्तानामनुरूपात्मदर्शनम् ।।२५।। पाहि मां परमात्मंस्ते प्रेक्षणेनासृजं प्रजाः। ता इमा यभितुं पापा उपाक्रामन्ति मां प्रभो ।।२६।।

।। सङ्ग्रहोक्तिः ।।

सहस्रार्काधिकप्रकाशं पद्ममभूत्, यत्र स्वयं ब्रह्माऽभूत् ।।१६।। तस्मिन् सलिलाशये भगवत्प्रेरणया सलिले शयः स ब्रह्मा पूर्वकल्पानुसारेण लोकानां विन्यासं निर्ममे ।।१७।। छायया "तामिस्रम् अन्धतामिस्रं तमः मोहः महामोहः" इति पञ्चपर्वात्मिकामविद्यां प्रथमतः ससर्ज ।।१८।। सृष्टा तमोमयं तं कार्यमनभिनन्दन् तत्याज, तस्माज्जातां क्षुत्तृट्समुद्भवां रात्रिं यक्षरक्षांसि जगृहुः ।।१९।। क्षुत्तृड्भ्यां पीडितास्ते "एनं मा रक्षत, किन्तु भक्षध्वम्" इत्युक्तवन्तः ते तमभिदुद्रवुः, तदा भीतो ब्रह्मा "मां मा जक्षत रक्षत" इत्याह, ततस्ते "यक्षाः राक्षसाः" इति लोके प्रसिद्धा जाताः ।।२०-२१।। प्रभया दिव्यन् ब्रह्मा यान् प्राधान्येनाऽसृजत् ते देवा जाताः, ततः ब्रह्मणा त्यक्तां दिवसात्मिकां तनुं देवा अहार्षुः ।।२२।। ब्रह्मा जघनप्रदेशाद् अतिलोलुपान् असुरान् ससर्ज, तेऽतिकामासक्ततया मैथुनाय ब्रह्माणमभिपेदिरे ।।२३।। ततो ब्रह्मा निर्लज्जैरसुरैरन्वीयमानः क्रुद्धः सन् तरसा पर्यधावत् ।।२४।। स ब्रह्मा प्रपन्नार्तिहरं भक्तानामनुरूपदर्शनं वरदं हरिं शरणं प्राप्याऽऽह – हे परमात्मन्! मां पाहि, त्वत्संकल्पानुसारेण सृष्टाः इमाः पापा मैथुनाय

त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः। त्वमेकः क्लेशदस्तेषामनासन्नपदां
तव।।२७।। सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः। विमुञ्चात्मतनुं घोरा-
मित्युक्तो विमुमोच ह।।२८।। तां क्वणच्चरणाम्भोजां मदविह्वललोचनाम्। काञ्ची-
कलापविलसद्दुकूलच्छन्नरोधसम्।।२९।। अन्योन्याश्लेषणोत्तुङ्गनिरन्तरपयो-
धराम्। सुनासां सुद्विजां स्निग्धहासलीलावलोकनाम्।।३०।। गूहन्तीं व्रीडयात्मानं
नीलालकवरूथिनीम्। उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियम्।।३१।। अहो
रूपमहो स्थैर्यमहो अस्या नवं वयः। मध्ये कामयमानानामकामेव विसर्पति।।३२।।
वितर्कयन्तो बहुधा तां सन्ध्यां प्रमदाकृतिम्। अभिसंभाव्य विश्रम्भात्पर्यपृच्छन्
कुमेधसः।।३३।। *असुरा ऊचुः*- कासि कस्यासि रम्भोरु कोऽवार्थस्तेऽत्र भामिनि।
रूपद्रविणपण्येन दुर्भगान्नो विबाधसे।।३४।। या वा काचित्त्वमबले दिष्ट्या संदर्शनं
तव। उत्सुनोषीक्षमाणानां कन्दुकक्रीडया मनः।।३५।। नैकत्र ते जयति शालिनि
पादपद्मं घ्नन्त्या मुहुः करतलेन पतत्पतङ्गम्। मध्यं विषीदति बृहत्स्तनभारभीतं
श्रान्तेव दृष्टिरमला सुशिखासमूहः।।३६।।

।। सङ्ग्रहोक्तिः।।

मामुपाक्रामन्ति।।२५-२६।।दुःखितानां क्लेशनिवारकः, अनाश्रितानां दुःखदश्च त्वमेक एवासि
।।२७।। ब्रह्मणो दुःखं विलोक्य भगवान् ब्रह्मणस्तां तनुं तेनैव मोचयामास।।२८।। ब्रह्म-
त्यक्तः स देहः स्त्रीरूपा सायंकालिका सन्ध्याऽभूत्, क्वणच्चरणांभोजां मदविह्वलल-
काञ्चीकलापविलसत्क्षौमच्छन्ननितम्बां सुनासां सुद्विजां नीलालकवरूथिनीं संध्यारूपां तां
स्त्रीं दृष्ट्वाऽसुरा मोहिताः सन्तोऽवोचन्।।२९-३१।। अस्याः स्थैर्यं नवं रूपं च अहो
कामयमानानां मध्येऽकामेव गच्छति।।३२।। इत्थं नानाविधानेन तर्कयन्तः कुमेधसोऽसुरा
प्रमदाकृतिं संध्यां सत्कृत्य विश्रम्भात् पर्यपृच्छन्।।३३।। *असुरा ऊचुः*- रम्भोरु! त्वं कासि
कस्याऽसि, त्वं सौन्दर्यातिशयेन दुर्भगानस्मान् क्लेशयसे।।३४।। हे अबले! त्वं या का-
स्याः, दिष्ट्या तव सन्दर्शनं जातम्, ईक्षमाणानां नो मनः कन्दुकक्रीडया हरसि।।३५।।
शालिनि! कन्दुकक्रीडावशात् तव पादपद्ममेकत्र स्थिरं न भवति, अमला दृष्टिः श्रान्ता

मैत्रेय उवाच– इति सायंतनीं संध्यामसुराः प्रमदायतीम्। प्रलोभयन्तीं जगृहुर्मत्वा मूढधियः स्त्रियम्।।३७।। प्रहस्य भावगम्भीरं जिघ्रन्नात्मानमात्मना। कान्त्या ससर्ज भगवान्गन्धर्वाप्सरसां गणान्।।३८।। विससर्ज तनुं तां वै ज्योत्स्नां कान्तिमतीं प्रियाम्। त एव चाददुः प्रीता विश्वावसुपुरोगमाः।।३९।। सृष्ट्वा भूतपिशाचांश्च भगवानात्मतन्द्रिणा। दिग्वाससो मुक्तकेशान्वीक्ष्य चामीलयद् दृशौ।।४०।। जगृहुस्तद्विसृष्टां तां जृम्भणाख्यां तनुं प्रभो। निद्रामिन्द्रियविक्लेदो यया भूतेषु दृश्यते। येनोच्छिष्टान् धर्षयन्ति तमुन्मादं प्रचक्षते।।४१।। ऊर्जस्वन्तं मन्यमानः आत्मानं भगवानजः। साध्यान् गणान्पितृगणान्परोक्षेणासृजत्प्रभुः।।४२।। तमात्मसर्गं तत्कायं पितरः प्रतिपेदिरे । साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते।। ४३।। सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत्। तेभ्यो ददौ तमात्मानमन्तर्द्धानाख्य-मद्भुतम्।।४४।। सकिंनरान्किंपुरुषान् प्रत्यात्म्येनासृजत्प्रभुः। मानयन्नात्मनात्मन-मात्मभासं विलोकयन्।।४५।। ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना। मिथुनीभूय गायन्तस्तमेवोषसि कर्मभिः।।४६।।

।। सङ्ग्रहोक्तिः।।

प्रसरति।।३६।। इत्थं स्त्रियमिवाचरन्तीं मोहमुत्पादयन्तीं सायन्तनीं सन्ध्यां मूढधियोऽसुराः स्त्रियं मत्वा जगृहुः।।३७।। ब्रह्मा भावगम्भीरं प्रहस्य स्वदेहं स्वयमेव जिघ्रन् सौन्दर्येण गन्धर्वाप्सरसां गणान् ससर्ज।।३८।। कान्तिमतीं तां स्वां तनुं स विससर्ज, विश्वावसुप्रमुखा गन्धर्वाणां गणाः तां प्रीताः सन्तः जगृहुः।।३९।। ब्रह्मा स्वतन्द्रया भूतपिशाचादीन् ससर्ज, मुक्तकेशान् दिगम्बरान् तान् वीक्ष्य दृशावमीलयत्।।४०।। हे विदुर! ब्रह्मणा त्यक्तां विजृम्भणाख्यां तां तनुं भूतादय उपाददुः, यया ब्रह्मतन्वा इन्द्रियक्लेदो भूतेषु दृश्यते तां निद्रां प्रचक्षते।।४१।। ब्रह्मा स्वं बलवन्तं मन्यमानः सन् साध्यगणान् पितृगणांश्चाऽदृश्यरूपेण ससर्ज।।४२।। तं कायं पितरः साध्याश्च जगृहुः, कुशलाः पितृभ्यः साध्येभ्यश्च हव्यकव्यार्पणेनाऽऽराधयन्ति।।४३।। स तिरोधानशक्त्या सिद्धान् विद्याधरांश्चाऽसृजत्, तेभ्यः सिद्धादिभ्योऽन्तर्धानाख्यं स्वं कायं ददौ।।४४।। ब्रह्मा स्वप्रतिबिम्बं स्वयं विलोकयन्, तं बहुमानयंश्च स्वप्रतिबिम्बेनैव किंनरान्

देहेन वै भोगवता शयानो बहुचिन्तया। सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः।।४७।।
येऽहीयन्तामुतः केशा अहयस्तेऽङ्ग जज्ञिरे। सर्पाः प्रसर्पतः क्रूरा नागा भोगोरु-
कन्धराः।।४८।। स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः। तदा मनून्ससर्जान्ते
मनसा लोकभावनान्।।४९।। तेभ्यः सोऽत्यसृजत्स्वीयं पुरं पुरुषमात्मवान्। तान्
दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम्।।५०।। अहो एतज्जगत्स्रष्टः सुकृतं
बत ते कृतम्। प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदामहे ।।५१।। तपसा विद्यया
युक्तो योगेन सुसमाधिना। ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः।।५२।। तेभ्यश्चै-
कैकशः स्वस्य देहस्यांशमदादजः। यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत्।।५३।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे विंशोऽध्यायः ।।२०।।

।। सङ्ग्रहोक्तिः ।।

किंपुरुषांश्चाऽसृजत्।।४५।। ब्रह्मणा परित्यक्तं तद्रूपं ते किन्नरादयो जगृहुः, पुनः मिथुनीभूय
त उषसि ब्रह्माणमेव स्तुतिरूपेण गायन्ति स्म।।४६।। सर्गे वृद्धिमप्राप्ते ब्रह्मा क्रोधं सम्प्राप्य
बहुचिन्तया भोगवता दैर्घ्यवता च देहेन शयानः सन्नेव तं देहमुत्ससर्ज।।४७।। हे विदुर!
भोगवतो देहात् ये केशा प्रच्युताः तेऽहयोऽभूवन्, प्रसर्पतो देहात् क्रूराः सर्पाः नागाश्च विविधा
अभवन्।।४८।। स ब्रह्मा यदा स्वं कृतकृत्यमिव मन्यमान आसीत् तदाऽन्ते मनसा मनून्
ससर्ज।।४९।। स्वस्वरूपाभिज्ञानवान् ब्रह्मा मनुभ्य स्वीयं पुरुषाकारं देहं ददौ, तान् दृष्ट्वा
तेन ये पुरा सृष्टास्ते सर्वे ब्रह्माणं प्रशशंसुः।।५०।। हे ब्रह्मन्! त्वया मानवसृष्टिं कृत्वाऽतिपुण्यं
कार्यं कृतम्, यतो मानवकृतयज्ञादिना सुरैः सहाऽस्माकमपि भोजनप्राप्तिर्भविष्यति।।५१।।
एकदा तपसा विद्यया योगेन सुसमाधिना च युक्तो ब्रह्माऽभिमताः प्रजाः ऋषीन् ससर्ज।।५२।।
ब्रह्मा तेभ्य ऋषिभ्यः स्वदेहस्यैकैकांशं ददौ, तेंऽशाः समाधिः, योगः, ऐश्वर्यं, तपः, विद्या
विरक्तिः, एतद्रूपा आसन्।।५३।।

इति श्रीमद्भागवते तृतीतयस्कन्धे सङ्ग्रहोक्त्यां विंशोऽध्यायः ।।२०।।

अथ एकविंशोऽध्यायः ।। २१।।

विदुर उवाच- स्वायंभुवस्य च मनोर्वंशः परमसंमतः। कथ्यतां भगवन्यत्र मैथुने-
नैधिरे प्रजाः।।१।। प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै। यथाधर्मं जुगुपतुः
सप्तद्वीपवतीं महीम्।।२।। तस्य वै दुहिता ब्रह्मन् देवहूतीति विश्रुता। पत्नी प्रजापते-
रुक्ता कर्दमस्य त्वयाऽनघ।।३।। तस्यां स वै महायोगी युक्तायां योगलक्षणैः।
ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद।।४।। रुचिर्यो भगवान्ब्रह्मन् दक्षो वा
ब्रह्मणः सुतः। यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीम्।।५।। *मैत्रेय उवाच*-
प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः। सरस्वत्यां तपस्तेपे सहस्राणां समा
दश।।६।। ततः समाधियोगेन क्रियायोगेन कर्दमः। संप्रपेदे हरिं भक्त्या प्रपन्नवरदा-
शुषम्।।७।। तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे। दर्शयामास तं क्षत्तः
शाब्दं ब्रह्म दधद्वपुः।।८।। स तं विरजमर्काभं सितपद्मोत्पलस्रजम्।
स्निग्धनीलालकव्रातवक्त्राब्जं विरजोऽम्बरम्।।९।।

।। सङ्ग्रहोक्तिः।।

अथ एकविंशोऽध्यायः ।। २१।।

तपस्यया तुष्टेन विष्णुना कर्दमाय वरदानं कर्दमाश्रमे मनोरागमनं च

विदुर उवाच- हे मैत्रेय! स्वायंभुवस्य सर्वोत्तमैर्मान्यो वंशः कथ्यताम्, यत्र प्रजा मैथुनेनैधिरे।।१।।
हे अनघ! स्वायंभुवस्य सुतौ प्रियव्रतः उत्तानपादश्च आस्ताम्, तौ सप्तद्वीपवतीं भूमिं धर्मेण
जुगुपतुः।।२।। तस्य मनोर्देवहूतिनाम्ना विश्रुता पुत्री कर्दमस्य पत्नी इति भवता उक्ता।।३।।
शमदमादिभिः सम्पन्नायां तस्यां कर्दमः कति सन्तानान्यजनयत्, तदेतत् शुश्रूषवे मे वद।।४।।
हे मैत्रेय! ब्रह्मणः सुतो रुचिः तथा दक्षः, मानवीं पुत्रीं क्रमात् आकूतिं प्रसूतिं च लब्ध्वा
कत्यपत्यानि ससर्ज तन्मे वद।।५।। *मैत्रेय उवाच*- ब्रह्मणा "प्रजाः सृज" इत्याज्ञापितः
कर्दमः सरस्वत्यां दशसहस्रसंवत्सरपर्यन्तं तपस्तेपे।।६।। तस्मिंस्तपसि कर्दमः समाधियोगेन
क्रियायोगेन भक्त्या च प्रसन्नवरदातारं हरिं सिषेवे।।७।। हे विदुर! कृते युगे कमलनयनो
भगवान् तस्मै प्रसन्नः सन् शाब्दं ब्रह्म दिव्यमङ्लविग्रहं कर्दमं दर्शयामास।।८।।

किरीटिनं कुण्डलिनं शङ्खचक्रगदाधरम्। श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मिते-
क्षणम्।।१०।।विन्यस्तचरणाम्भोजमंसदेशे गरुत्मतः। दृष्ट्वा खेऽवस्थितं वक्षःश्रियं
कौस्तुभकन्धरम्।।११।।जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः। गीर्भिश्चाभ्यगृणा-
त्प्रीतिस्वभावात्मा कृताञ्जलिः।।१२।। *कर्दम उवाच*- जुष्टं बताद्याखिलसत्त्वराशेः
सांसिद्ध्यमक्ष्णोस्तव दर्शनान्नः। यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो
रूढयोगाः।।१३।।ये मायया ते हतमेधसस्त्वत्पादारविन्दं भवसिन्धुपोतम् ।उपासते
कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः।।१४।।तथा स चाहं परिवोढुकामः
समानशीलां गृहमेधधेनुम्। उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघाङ्घ्रिपस्य
।।१५।। प्रजापतेस्ते वचसाधीश तन्त्या लोकः किलायं कामहतोऽनुबद्धः। अहं च
लोकानुगतो वहामि बलिं च शुक्लानिमिषाय तुभ्यम्।।१६।। लोकांश्च लोकानुगतान्
पशूंश्च हित्वाश्रितास्ते चरणातपत्रम्।परस्परं त्वद्गुणवादसीधुपीयुषनिर्वापितदेहधर्माः
।।१७।। न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतंषष्टिपर्व।

।। सङ्ग्रहोक्तिः ।।

निर्मलमर्काभं सितपद्मोत्पलस्रजं स्निग्धनीलालकव्रातमुखाब्जं किरीटिनं कुण्डलिनं शंखचक्र-
गदाधरं मनोज्ञस्मितेक्षणं गरुडस्कन्धे संस्थापितचरणाम्बुजं खेऽवस्थितं कौस्तुभकन्धरं च
तं दृष्ट्वा कर्दमः संजातहर्षः प्राप्तमनोरथश्च सन् क्षितौ मूर्ध्ना दण्डवन्ननाम, ततः कृताञ्जलिः
सन् प्रेम्णाऽस्तौषीत्।।९-१२।। *कर्दम उवाच*- हे ईड्य! अखिलशुद्धसत्त्वमयस्य तव दर्शनात्
नो नैत्रयोः साफल्यमद्य सम्प्राप्तम्, यद्दर्शनं योगिनोऽनेकजन्मभिः प्रार्थयन्ते।।१३।।ये मायया
मोहितधियो जनाः संसारसिन्धौ नौकारूपं त्वच्चरणारविन्दं कामसुखलवायोपासते तेषां कामांस्त्वं
ददासि, ये कामा निरयतुल्यनीचयोनावपि स्युः।।१४।। सोऽहं गृहस्थाश्रमे कामधेनुतुल्यां
त्रिवर्गदोग्ध्रीं समानशीलां भार्यां परिणेतुमिच्छन् त्वदङ्घ्रिमुपेयिवानस्मि ।।१५।। हे अधीश!
प्रजापतिरूपस्य तव वचोरज्ज्वा कामहतोऽयं लोको बद्धोऽस्ति, संसारानुसृतोऽहं कालरूपाय
तुभ्यं गृहस्थाश्रमोचितधर्मरूपं बलिमर्पयामि।।१६।।कामाभिभूतलोकान् तदनुसृतान् पशुतुल्यान्
मादृशान् हित्वा ये त्वद्गुणानुवादामृतनिवारितदेहधर्माः सन्ति ते भवच्चरणच्छत्रमाश्रयन्ति।।१७।।

षण्नेम्यनन्तच्छदि यत्त्रिणाभि करालस्रोतो जगदाच्छिद्य धावत् ।।१८।। एकः स्वयं सन् जगतः सिसृक्षया द्वितीययात्मन्नधियोगमायया। सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवान्स्वशक्तिभिः।।१९।।नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मम्। अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः।।२०।। तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्त्तितलोकतन्त्रम्। नमाम्यभीक्ष्णं नमनीय-पादसरोजमल्पीयसि कामवर्षम्।।२१।। *मैत्रेय उवाच*- इत्यव्यलीकं प्रणुतोऽब्ज-नाभस्तमाबभाषे वचसामृतेन। सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः ।।२२।। *श्रीभगवानुवाच*- विदित्वा तव चैत्यं मे पुरैव समयोजि तत्। यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः।।२३।। न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम्। भवद्विधेष्वतितरां मयि संगृभितात्मसु।।२४।। प्रजापतिसुतः सम्राट् मनुर्विख्यातमङ्गलः। ब्रह्मावर्त्तं योऽधिवसन् शास्ति सप्तार्णवां महीम्।।२५।।

।। सङ्ग्रहोक्तिः ।।

हे भगवन्! मासरूपत्रयोदशारं दिवसरूपत्रिशताधिकषष्टिपर्वं षड्ऋतुनेमि नैकक्षणलवादिपत्रं त्वदीयं कालचक्रं जगदाकृष्य भ्रमदपि भवदाश्रितानामायुष आकर्षकं न भवति।।१८।। हे भगवन्! नामरूपविभागानर्हसूक्ष्मचिदचित्काशरीरतया सृष्टेः प्रागेक एव सन्नपि त्वं जगतः सिसृक्षया स्वशरीरभूतमायाद्वारेण स्वशक्तिभिर्जगत् सृजसि पासि संहरसि च।।१९।। हे नाथ! यद्यपि त्वं भक्तेभ्यो विषयसुखं दातुं नेच्छसि तथापि आस्माकीमिच्छामाकलय्य शब्दादि-विषयसुखं तनुषे, साक्षात्त्वद्दर्शनवानहमृणत्रयापाकरणानन्तरमेवापवर्गाय त्वां भजिष्यामि।।२०।। स्वात्मानुभावेन निवृत्तोऽपि भवान् स्वमायया लोकतन्त्रं धारयसि, अल्पीयसि जनेऽपि कामवर्षं भवत्पादपद्ममहं सततं नतोऽस्मि।।२१।। *मैत्रेय उवाच* - इत्थं निर्व्याजभावेन स्तुतः गरुड-स्कन्धोपरि विराजमानः प्रेमस्मित पूर्ण दृष्ट्या वीक्षमाणः पद्मनाभो भगवान् अमृततुल्येन वचसा कर्दममाबभाषे।।२२।।हे मुने! तव हृद्गताभिप्रायं ज्ञात्वैव त्वदभिप्रेतं मया पुरैव समयोजि, यदर्थं त्वया सनियमं मदर्चनं कृतम्।।२३।।हे प्रजाध्यक्ष! मदाराधनं जातु निष्फलं न स्यात् एकाग्रमनःसु भवद्विधेषु तु कदापि निष्फलं न हि।।२४।।

स चेह विप्र राजर्षिर्महिष्या शतरूपया। आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदम्
।।२६।। आत्मजामसितापाङ्गीं वयःशीलगुणान्विताम्। मृगयन्तीं पतिं दास्यत्य-
नुरूपाय ते प्रभो।।२७।।समाहितं ते हृदयं यत्रेमान्परिवत्सरान्। सा त्वां ब्रह्मन्नृपवधूः
काममाशु भजिष्यति।।२८।। या त आत्मभूतं वीर्यं नवधा प्रसविष्यति। वीर्ये
त्वदीये ऋषय आधास्यन्त्यञ्जसात्मनः।।२९।। त्वं च सम्यगनुष्ठाय निदेशं म
उशत्तमः। मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे।।३०।। कृत्वा दयां च जीवेषु
दत्त्वा चाभयमात्मवान्। मय्यात्मानं सह जगद् द्रक्ष्यस्यात्मनि चापि माम्।।३१।।
सहाहं स्वांशकलया त्वद्वीर्येण महामुने। तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहिताम्
।।३२।। *मैत्रेय उवाच*- एवं तमनुभाष्याथ भगवान्प्रत्यगक्षजः। जगाम बिन्दुसरसः
सरस्वत्या परिश्रितात्।।३३।।निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः।
आकर्णयन्पत्ररथेन्द्रपक्षैरुच्चारितं स्तोममुदीर्णसाम।।३४।। अथ संप्रस्थिते शुक्ले
कर्दमो भगवानृषिः। आस्ते स्म बिन्दुसरसि तं कालं प्रतिपालयन्।।३५।।

।। सङ्ग्रहोक्तिः ।।

ब्रह्मणः पुत्रः स्वायम्भुवः सम्राट् इदानीं शतरूपया महिष्या सह धर्मकोविदं त्वां दृष्टुं परश्व
इहागमिष्यति।।२६।। वयःशीलगुणाढ्यां स्वानुरूपं पतिं मृगयन्तीं देवहूत्याख्यां स्वपुत्रीम्
अनुरूपाय ते दास्यति।।२७।। हे ब्रह्मन्! यावन्ति इमानि वर्षाणि व्यतीतानि तावत्पर्यन्तं
समाहितहृदयं त्वां सा राजकन्या यथेष्टं भजिष्यति।।२८।।त्वया तस्यां सिक्तं वीर्यं देवहूतिर्नवधा
प्रसविष्यति, त्वदुत्पन्नासु नवसु पुत्रीषु मरीच्यादय आशु आत्मनः पुत्रानुत्पादयिष्यन्ति।।२९।।
त्वमपि ममाज्ञां सम्यक् परिपाल्य मदाराधनतत्परः मां च सर्वाः क्रियाः समर्प्य मां प्राप्स्यसे।।३०।।
जितान्तःकरणस्त्वं जीवेषु दयां कृत्वाऽभयं च दत्त्वा जगदात्मनि मयि विश्वं पश्यसि, एवं च
विश्वस्मिन्नन्तरात्मतयावस्थितं मां च पश्यसि।।३१।।हे मुने! त्वदीयद्वारा स्वांशेन देवहूत्याम-
वतीर्याऽहं प्रकृतिपुरुषेश्वरात्मकतत्त्वस्वरूपविवेचनीं संहितां कथयिष्यामि।।३२।।प्रत्यक्षदृष्टो
भगवान् तं कर्दममेवं कथयित्वा पश्चाद् सरस्वत्या परिवेष्टितात् आश्रमात् जगाम।।३३।।
यस्य कल्याणगुणगणज्ञानप्रकारः सिद्धैरपि संस्तूयते स भगवान् गरुडपक्षैर्गीयमानं बृहद्रथन्तरं

मनुः स्यन्दनमास्थाय शातकौम्भपरिच्छदम्। आरोप्य स्वां दुहितरं सभार्यः पर्यटन्-महीम्॥३६॥ तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत्। उपायादाश्रमपदं मुनेः शान्तव्रतस्य तत्॥३७॥ यस्मिन् भगवतो नेत्रादपतन्नश्रुबिन्दवः। कृपया संपरीतस्य प्रपन्नेऽर्पितया भृशम्॥३८॥ तद्वै बिन्दुसरो नाम सरस्वत्या परिश्रितम्। पुण्यं शिवामृतजलं महर्षिगणसेवितम्॥३९॥ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः। सर्वर्त्तुफलपुष्पाढ्यवनराजिश्रियान्वितम्॥४०॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम्। मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम्॥४१॥ कदम्बचम्पकाशोककरञ्जबकुला-सनैः। कुन्दमन्दारकूटजैश्चूतपोतैरलंकृतम्॥४२॥ कारण्डवैः प्लवैर्हंसैः कुररै-र्जलकुक्कुटैः। सारसैश्चक्रवाकैश्च चकोरैर्वल्गु कूजितम्॥४३॥ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुञ्जरैः। गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम्॥४४॥ प्रविश्य तत्तीर्थ-वरमादिराजः सहानुगः। ददर्श मुनिमासीनं तस्मिन् हुतहुताशनम्॥४५॥ विद्योतमानं वपुषा तपस्युग्रयुजा चिरम्। नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात्।

॥ सङ्ग्रहोक्तिः॥

साम शृण्वन् ययौ॥३४॥ अथ भगवति प्रस्थिते सति कर्दमो भगवदभिहितं कालं प्रतीक्षमाणः सन् बिन्दुसरसि उपविष्टः॥३५॥ स्वायम्भुवो मनुः सौवर्णपरिच्छदं रथमधिष्ठाय, तत्र स्वां दुहितरमारोप्य सभार्यो महीं पर्यटन्, भगवान् यद् दिवसं निर्दिष्टवान् तस्मिन्नेव दिने मुनेराश्रम-स्थानं प्रत्युपायात्॥३६-३७॥ कर्दमोपरि कृपया पूर्णस्य भगवतो नयनाद् अश्रुबिन्दवो न्यपतन्, तद् बिन्दुसरः नाम सरः सरस्वत्या नद्या परिवृत्तं शिवामृतजलं महर्षिगणसेवितं पुण्यतमं वर्तते॥३८-३९॥ तद् बिन्दुसरः द्रुमलताजालैः कूजत्पक्षिगणैः सर्वर्तुपुष्पफलाढ्यवनराजिभिश्च सम्पन्नमभूत्॥४०॥ मत्तपक्षिगणै सेवितं, मत्तभ्रमरविलसितं, मत्तबर्हिनाट्योपेतं, मत्तकोकिलम् अतो रम्यमासीत्॥४१॥ कदम्ब-चम्पक-अशोक-करञ्ज-बकुल-कुन्द-मन्दार-चूतपोतैर-लंकृतमभूत्॥४२॥ कारण्डव-हंस-जलकुक्कुट-सारस-चक्रवाक-चकोरैः सुन्दरं कूजितं चाऽभवत्॥४३॥ हरिण-क्रोड-गवय-कुञ्जरैः चमर-मृगेन्द्र-मर्कटादिवन्यैः पशुभिश्च वृतं बभूव॥४४॥ सहानुगो मनुस्तत् तीर्थवरं प्रविश्य तत्र हुतहुताशनमुपविष्टं मुनिं ददर्श॥४५॥

तद्व्याहृतामृतकलापीयूषश्रवणेन च ।।४६।। प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससम्।
उपसंसृत्य मलिनं यथार्हणमसंस्कृतम् ।।४७।। अथोटजमुपायातं नृदेव प्रणतं
पुरः। सपर्यया प्रत्यगृह्णात्प्रतिनन्द्यानुरूपया ।।४८।। गृहीतार्हणमासीनं संयतं
प्रीणयन्मुनिः। स्मरन् भगवदादेशमित्याह श्लक्ष्णया गिरा ।।४९।। *कर्दम उवाच*-
नूनं चङ्क्रमणं देव सतां संरक्षणाय ते। वधाय चासतां यत्त्वं हरेः शक्तिर्हि
पालिनी ।।५०।। योऽर्केन्द्वग्नीन्द्रवायूनां यमधर्मप्रचेतसाम्। रूपाणि स्थान आधत्से
तस्मै शुक्लाय ते नमः ।।५१।। न यदा रथमास्थाय जैत्रं मणिगणार्पितम्। विस्फूर्ज-
च्चण्डकोदण्डो रथेन त्रासयन्नघान् ।।५२।। स्वसैन्यचरणक्षुण्णं वेपयन्मण्डलं
भुवः। विकर्षयन्महतीं सेनां पर्यटस्यंशुमानिव ।।५३।। तदैव सेतवः सर्वे वर्णाश्रम-
निबन्धनाः। भगवद्रचिता राजन् भिद्येरन् बत दस्युभिः ।।५४।। अधर्मश्च समेधेत
लोलुपैर्व्यङ्कुशैर्नृभिः। शयाने त्वयि लोकोऽयं दस्युग्रस्तो विनङ्क्ष्यति ।।५५।। अथापि
पृच्छे त्वां वीर यदर्थं त्वमिहागतः। तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ।।५६।।

इति श्रीमद्भागवते तृतीयस्कन्धे एकविंशोऽध्यायः ।।२१।।

।। सङ्ग्रहोक्तिः ।।

अत्युग्रतपोयुक्तेन शरीरेण विद्योतमानं भगवतः स्नेहपूर्णदृगवलोकनात् पीयूषसम-
मधुरवचनश्रवणाच्च नाऽतिक्षामम् ।।४६।। प्राशुं, जटिलं, कमलदलायतनयनं, चीरवाससं,
असंस्कृतं महारत्नमिव मलिनं महामुनिं समीपमागत्य ददर्श ।।४७।। स्वां पर्णशालामुपयातं,
पुरो नमस्कुर्वन्तं मनुमभिनन्द्य योग्यया पूजया सत्कृतवान् ।।४८।। आतिथ्यग्रहणानन्तरमुपविष्टं
मनुं कर्दमो मधुरया वाण्या प्रीणयन् भगवदादेशं स्मरन्नाह ।।४९।। *कर्दम उवाच* - हे देव!
तव पर्यटनं सतां रक्षणाय, असतां वधाय च भवति, यत भवान् जगत्पालनकर्त्री हरेः
शक्तिरस्ति ।।५०।। यस्त्वं सूर्य-चन्द्र-वह्नि-इन्द्र-वायु-यम-धर्म-वरुणप्रभृतीनां गुणधर्मान्
लोकहिताय धत्से तस्मै विष्णुरूपाय तुभ्यं नमः ।।५१।। हे नृप! त्वं जैत्रं मणिगणखचितं
रथमधिरुह्य विस्फुर्जच्चण्डकोदण्डः सन् पापीनस्त्वं रथेन त्रासयसि ।।५२।। स्वसैन्यचरणक्षुण्णं

अथ द्वाविंशोऽध्यायः ।।२२।।

मैत्रेय उवाच- एवमाविष्कृताशेषगुणकर्मोदयो मुनिम् । सव्रीड इव तं सम्राडुपारत-मुवाच ह।।१।। *मनुरुवाच* - ब्रह्माऽसृजत्स्वमुखतो युष्मानात्मपरीप्सया। छन्दोमय-स्तपोविद्यायोगयुक्तानलंपटान्।।२।। तत्त्राणायासृजच्चास्मान् दोःसहस्रात्सहस्रपात्। हृदयं तस्य हि ब्रह्म क्षत्रमङ्गं प्रचक्षते।।३।। अतो ह्यन्योन्यमात्मानं ब्रह्मक्षत्रं च रक्षतः। रक्षति स्माऽव्ययो देवः स यः सदसदात्मकः।।४।। तव संदर्शनादेव च्छिन्ना मे सर्वसंशयाः। यत्स्वयं भगवान्प्रीत्या धर्मानाह रिरक्षिषोः।।५।। दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो योऽकृतात्मनाम्।

।। सङ्ग्रहोक्तिः ।।

भूमण्डलं कम्पयन् महतीं सेनां विकर्षन् यदा भूमण्डलं न अटसि चेत् तदा हे राजन्! भगवद्रचिताः वर्णाश्रमनिबन्धनाः सर्वेऽपि सेतवो दस्युभिर्भिद्येरन्।।५३-५४।। निरंकुशैरर्थ-कामपरैर्नृभिरधर्मो वर्द्धेत, त्वयि न्यायान्यायशून्ये सति दस्युग्रस्तोऽयं लोको विनङ्क्ष्यति ।।५५।। एवं सत्यपि हे वीर! यदर्थं त्वमिहागतः, तत् त्वां पृच्छामि, वयं निष्कपटेन चित्तेन तदङ्गीकुर्महे।।५६।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां एकविंशोऽध्यायः ।।२१।।

अथ द्वाविंशोऽध्यायः ।।२२।।

मनुकर्दमसंवादः कर्दमदेवहूतिविवाहश्च

मैत्रेय उवाच - यस्याऽशेषगुणकर्मादयः प्रकटाः स मनुः सलज्जः सन् निवृत्तिधर्मनिष्ठं मुनि-मुवाच।।१।। *मनुरुवाच* - वेदप्रचुरो ब्रह्मा विद्यातपोयोगयुक्तान् विषयेष्वलालसान् युष्मान् ब्राह्मणान् वेदधर्मस्य रिरक्षया स्वमुखतोऽसृजत्।।२।। भगवान् भुजसहस्राद् अस्मान् क्षत्रियान् ब्राह्मणरक्षणायऽसृजत्, तस्य ब्राह्मणः मुखं क्षत्रियोऽङ्गं प्रचक्षते।।३।। अतो वेदपालनाय ब्राह्मणान्, ब्राह्मणपालनाय चास्मान् सृष्टवान्, अतः अन्योन्यमात्मानं ब्रह्मक्षत्रं रक्षतः, चेतनाचेतनशरीरकः स देवः रक्षति।।४।। हे मुने! तव संदर्शनादेव मे सर्वसन्देहाः छिन्नाः, यतः भगवान् स्वयं प्रीत्या प्रजाः रिरक्षिषोर्मम धर्मानाह।।५।। अपुण्यानां दुदर्शः भवान् सद्भाग्येन

दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवम् ।।६।। दिष्ट्या त्वयानुशिष्टोऽहं
कृतश्चानुग्रहो महान्। अपावृतैः कर्णरन्ध्रैर्जुष्टा दिष्ट्योशतीर्गिरः।।७।। स भवान्
दुहितृस्नेहपरिक्लिष्टात्मनो मम। श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने।।८।।
प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम। अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः
।।९।। यदा तु भवतः शीलश्रुतरूपगुणोदयान् । अशृणोन्नारदादेषा त्वय्यासीत्कृत-
निश्चया।।१०।। तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपाहृतां मया। सर्वात्मनानुरूपां ते
गृहमेधेषु कर्मसु।।११।। उद्यतस्य हि कामस्य प्रतिवादो न शस्यते। अपि निर्मुक्त-
सङ्गस्य कामरक्तस्य किं पुनः।।१२।। य उद्यतमनादृत्य कीनाशमभियाचते।
क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः।।१३।। अहं त्वाऽशृणवं विद्वन्नुद्वाहार्थं
समुद्यतम्। अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे ।।१४।। *ऋषिरुवाच* – बाढमुद्वोढु-
कामोऽहमप्रत्ता च तवात्मजा। आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः।।१५।।

।। सङ्ग्रहोक्तिः ।।

मया दृष्टः, तव शिवं पादरजः मे शिर्ष्णा स्पृष्टम्, तदपि भद्रं जातम् ।। ६ ।। दिष्ट्या त्वयाऽहम-
नुशिक्षितः, भवता महाननुग्रहः कृतः, अनावृतैः कर्णपुटैः कमनीया गिरोऽपि सेविताः।।७।।
दुहितृस्नेहान् मे मनः परिक्लिष्टं वर्तते, अतो दीनेन मया कथितं वचनं श्रोतुं त्वमर्हसि।।८।।
प्रियव्रतोत्तानपदोः स्वसा इयं देवहूतिर्मे दुहिता वर्तते, सा वयःशीलगुणादिभिर्योग्यं पतिमन्विच्छति
।।९।। यदैषा नारदमुखात् भवतः शीलश्रुतरूपगुणादीनशृणोत् तदा प्रभृति त्वयि कृतनिश्चया
वर्तते ।।१०।। हे द्विजवर्य! मया श्रद्धया समर्पितां तव गार्हस्थ्येषु सर्वप्रकारैरनुकूलामिमां
मत्कन्यां प्रतिगृहाण ।।११।।दैवात् प्राप्तस्य विषयाभिलाषस्य प्रत्याख्यानं विषयसङ्गमनिच्छतो-
ऽपि न शस्यते, तर्हि कामरतस्य तु किम्? ।।१२।। यः स्वतः प्राप्तं स्वाभिलाषमनादृत्य पश्चात्
कृपणं प्रति याचते तस्य प्रवृद्धमपि यशो नश्यति, अवज्ञया मानो विनष्टो भवति ।।१३।। हे
विद्वन्! अहं त्वामुद्वाहार्थं समुद्यतमशृण्वम्, अतस्त्वं उपकुर्वाणः = सावधिकब्रह्मचर्यवानसि,
ततो मया दत्तां कन्यां प्रतिगृहाण ।।१४।। कर्दमस्तदुक्तमङ्गीकुर्वन्नाह – *ऋषिरुवाच* – हे
मनो! अहं परिणेतुकामोऽस्मि, तवात्मजाऽपि कस्मैचिदप्रदत्ता च, अत आवयोरसावाद्यो

कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः। क एव ते तनयां नाद्रियेत स्वयैव कान्त्या क्षिपतीमिव श्रियम्।।१६।। यां हर्म्यपृष्ठे क्वणदङ्घ्रिशोभां विक्रीडतीं कन्दुकविह्वलाक्षीम्। विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः।।१७।। तां प्रार्थयन्तीं ललनाललामसेवितश्रीचरणैरदृष्टाम्। वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियाताम्।।१८।। अतो भजिष्ये समयेन साध्वीं यावत्तेजोबिभृयादात्मनो मे। अतो धर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान् बहु मन्येऽविहिंस्रान्।।१९।। यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वावतिष्ठते। प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननन्तः।।२०।। *मैत्रेय उवाच*- स उग्रधन्वन्नियदेवाबभाषे आसीच्च तूष्णीमरविन्दनाभम्। धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः।।२१।। सोऽनुज्ञात्वा व्यवस्थितं महिष्या दुहितुः स्फुटम्। तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः।।२२।। शतरूपा महाराज्ञी पारिबर्हान्महाधनान्। दम्पत्योः पर्यदात्प्रीत्या भूषावासः परिच्छदान्।।२३।।

।। सङ्ग्रहोक्तिः।।

ब्राह्मो विवाहोऽस्ति।।१५।। हे नरदेव! तवाऽस्याः पुत्र्या विवाहः वैदिकविधिना सम्यग् भवेत् या भवत्पुत्री स्वेन सौन्दर्येण श्रियमपि क्षीपतीमिव एतादृशीं को नाम नाद्रियेत।।१६।।प्रासादोपरि कन्दुकविह्वलाक्षीं क्रीडन्तीं यां त्वत्पुत्रीं निरीक्ष्य विश्वावसुनामा गन्धर्वो मोहितचित्तः सन् स्वकीयाद् विमानात् पपात।।१७।। पतिं कामयानां ललनाललामं, लक्ष्म्यभक्तैरदृष्टामुत्तानपादभगिनीं त्वत्पुत्रीं तामिमां देवहूतिं बुधः को नाऽनुमन्येत।।१८।। अत इयं मे वीर्यं यावत् बिभृयात् तावत् कालपर्यंतमिमां स्वीकरिष्ये, अतः परं परमहंसाश्रमे भगवदुक्तान् विवेकविमोकादीनविहिंस्रान् धर्माननुष्ठास्यामि।।१९।। यत इदं विश्वमुत्पन्नं यावत् कालं संस्थास्यतेऽवतिष्ठते च तावत् कालं भगवाननन्तो मे प्रमाणमस्ति।।२०।। हे विदुर! कर्दम एतावदेवाऽऽबभाषे, तदनन्तरं मनसा भगवन्तं चिन्तयन् तूष्णीमासीत्, स्मितशोभितेन मुखेन देवहूत्याश्चेतो लुलुभे।।२१।।मनुः शतरूपाया देवहूत्याश्च निश्चितं ज्ञात्वा गुणगणाढ्याय कर्दमाय योग्यां कन्यां प्रहर्षितः सन् ददौ।।२२।। महाराज्ञी शतरूपा बहुमुल्यान् पारिबर्हान् -

प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः। उपगुह्य च बाहुभ्यामौत्कण्ठ्योन्मथिताशयः
।।२४।। अशक्नुवंस्तद्विरहं मुञ्चन्बाष्पकला मुहुः। आसिञ्चदम्ब वत्सेति नेत्रो-
दैर्दुहितुः शिखाः।।२५।। आमन्त्र्य तं मुनिवरमनुज्ञातः सहानुगः। प्रतस्थे रथमारुह्य
सभार्यः स्वपुरं नृपः।।२६।। उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः। ऋषीणा-
मुपशान्तानां पश्यन्नाश्रमसंपदः।।२७।। तमायान्तमभिप्रेत्य ब्रह्मावर्त्तात्प्रजाः पतिम्।
गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः।।२८।। बर्हिष्मती नाम पुरी सर्वसंप-
त्समन्विता। न्यपतन्यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः।।२९।। कुशाः काशास्त
एवासन् शश्वद्धरितवर्चसः। ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे।।३०।।
कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः। अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवः
।।३१।। बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत्। तस्यां प्रविष्टो भवनं तापत्रय-
विनाशनम्। सभार्यः सप्रजः कामान्बुभुजेऽन्याविरोधतः।।३२।। संगीयमानसत्कीर्तिः
सस्त्रीभिः सुरगायकैः। प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन् हरेः कथाः।।३३।।

।। सङ्ग्रहोक्तिः ।।

वस्त्राभरणपरिच्छदान् प्रीत्या दम्पत्योः पर्यदात् ।।२३।। सदृशाय दत्तां दुहितरं सम्राट्
मनुर्गतव्यथः सन् बाहुभ्यामुपगुह्य स्नेहक्षुभितमना बभूव, ततो नेत्रयोरश्रूणि विमुञ्चन्, तैर्दुहितुः
शिखाः आसिञ्चत्।।२४-२५।।ततो मुनिवरं कर्दमं "याम" इत्याज्ञामुपादाय, मुनिनाऽनुज्ञातः
सभार्यो नृपः रथमारुह्य सहानुगः स्वपुरं प्रति, सरस्वत्या द्वयोः शोभनतटयोः ऋषीणामाश्रमेषु
संपदः पश्यन् प्रतस्थे।।२६-२७।। आगच्छन्तं मनुं ज्ञात्वा प्रहर्षिताः प्रजाः ब्रह्मावर्ताद् देशाद्
गीतवादित्रनिःस्वनैः प्रत्युज्जग्मुः ।।२८।।यत्र स्वशरीरं धुन्वतो यज्ञवराहस्य रोमाणि न्यपतन्
तत्र सर्वसंपत्समन्विता कुशाः काशाश्चाभवन्, यैः कुशकाशैर्मुनयो यज्ञघ्नान् राक्षसान् पराभाव्य
यज्ञं कृतवन्तः।।३०।। भगवान् मनुः कुशकाशमयं बर्हिः आस्तीर्य भुवः स्थानं लब्ध्वा तमेव
यज्ञपुरुषं यज्ञैराराधितवान्।।३१।। मनु यां बर्हिष्मतीं निर्विश्य पूर्वं समावसत् तस्यां पुर्यां
तापत्रयविनाशनं स्वभवनं प्रविष्टः सभार्यः सपुत्रश्च सन् धर्माविरोधेन कामान् बुभुजे।।३२।।
सस्त्रीभिः सुरगायकैः संगीयमानसत्कीर्त्तिः स मनुः प्रातः स्नेहसिक्तेन हृदयेन हरेः कथाः

निष्णातं योगमायासु मुनिं स्वायंभुवं मनुम्। यदाऽऽभ्रंशयितुं भोगा न शेकुर्भगवत्परम्
।।३४।। अयातयामास्तस्यासन्यामाः स्वान्तरयापनाः । शृण्वतो ध्यायतो विष्णोः
कुर्वतो ब्रुवतः कथाः।।३५।। स एवं स्वान्तरं निन्ये युगानामेकसप्ततिम्।
वासुदेवप्रसङ्गेन परिभूतगतित्रयः।।३६।। शारीरा मानसा दिव्या वैयासे ये च
मानुषाः। भौतिकाश्च कथं क्लेशा बाधन्ते हरिसंश्रयम्।।३७।। यः पृष्टो मुनिभिः
प्राह धर्मान्नानाविधान् शुभान्। नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा।।३८।।
एतत्ते आदिराजस्य मनोश्चरितमद्भुतम्। वर्णितं वर्णनीयस्य तदपत्योदयं शृणु।।३९।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे द्वाविंशोऽध्यायः ।।२२।।

।। सङ्ग्रहोक्तिः।।

शृण्वन् कामान् बुभुजे।।३३।। भगवत्परं मनुं कामभोगेषु निष्णातमपि कामभोगा तं भ्रंशयितुं समर्था नाऽभवन्।।३४।। विष्णोः कथाः शृण्वतः, ब्रुवतः, भगवदाराधनं कुर्वतः, ध्यायतश्च तस्य मनोः स्वशासनकालान्तर्गताः यामाः सफला आसन्।।३५।। स मनुः स्वशासनकालं युगानामेकसप्ततिं वासुदेवप्रसङ्गेनैव गुणत्रयपरिणामरूपाः तिस्रः गतीः पराभाव्य निन्ये ।।३६।। हे विदुरः! तत्र शासनावसरे आध्यात्मिकाधिदैविकाधिभौतिकाः क्लेशा श्रीहर्याश्रितं तं मनुं कथं बाधन्ते।।३७।।सदाभूतहिते रतो यो मनुर्मुनिभिः पृष्टः सन् वर्णाश्रमवतां नृणां नानाविधान् शुभान् धर्मान् प्राह।।३८।।कथनीयकीर्त्तेरादिराजस्य मनोरद्भुतमेतच्चरित्रं तुभ्यं मया कथितम् अथ तदपत्यस्य देवहूतेः प्रभावं शृणु।।३९।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां द्वाविंशोऽध्यायः ।।२२।।

अथ त्रयोविंशोऽध्यायः ।।२३।।

मैत्रेय उवाच - पितृभ्यां प्रस्थिते साध्वी पतिमिङ्गितकोविदा। नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुम् ।।१।। विश्रम्भेणात्मशौचेन गौरवेण दमेन च। शुश्रूषया सौहृदेन वाचा मधुरया च भो ।।२।। विसृज्य कामं दम्भं च द्वेषं लोभमघं मदम्। अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ।।३।। स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम्। दैवाद् गरीयसः पत्युराशासानां महाशिषः ।।४।। कालेन भूयसा क्षामां कर्शितां व्रतचर्यया। प्रेमगद्गदया वाचा पीडितः कृपयाऽब्रवीत् ।।५।। *कर्दम उवाच* - तुष्टोऽहमद्य तव मानवि मानदायाः शुश्रूषया परमया परया च भक्त्या। यो देहिनामयमतीव सुहृत्स्वदेहो नापेक्षितः समुचितः क्षपितुं मदर्थे ।।६।। ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः। तानेव ते मदनुसेवनयावरुद्धान् दृष्टिं प्रपश्य वितराम्यभयानशोकान् ।।७।। अन्ये पुनर्भगवतो भ्रुव उद्विजृम्भविभ्रंशितार्थरचनाः किमुरुक्रमस्य।

।। सङ्ग्रहोक्तिः ।।

अथ त्रयोविंशोऽध्यायः ।।२३।।

कामगे विमाने दम्पत्योर्विहारो रतिश्च

मैत्रेय उवाच - मनुशतरूपाभ्यां गमने कृते सति साध्वीङ्गितकोविदा देवहूतिः भवानी भवमिव स्वस्वामिनं कर्दमं नित्यं पर्यचरत् ।।१।। हे विदुर! देवहूतिः कामदम्भद्वेषलोभपापमदादीन् दोषान् परित्यज्य विश्वास-शम-दम-बुद्धि-सौहार्द-मधुर-वागादिभिर्गुणैः सावहिता पतिसेवातत्परा सती तेजीयांसं पतिं नित्यं प्रीणयामासः ।। २-३।। नित्यं पतिमनुवर्तमाना मनुपत्री देवहूतिः रपत्यप्राप्तिरूपामाशिषमाशासानाऽऽसीत्, एकदा देवर्षिवर्यः कृपालुः कर्दमो भूयसा कालेन व्रतकृशां क्षामां देवहूतिं प्रेमगद्गया वाचा अब्रवीत् ।।४-५।। *कर्दम उवाच* - हे मानिनि! मानदायास्तव सेवया परमया भक्त्या चाहमद्य तुष्टः, देहिनां स्वदेहोऽतीव प्रियो भवति, स त्वया मदर्थे क्षपितः ।। ६।।स्वधर्मनिरतेन मया तपःसमाधिविद्यात्मयोगादिभि र्यो भगवदनुग्रहः लब्धः स मत्सेवया त्वयाऽपि लब्धः, अभयमशोकं च तदनुग्रहं त्वं पश्य, त्वां दिव्यां दृष्टिं

सिद्धासि भुङ्क्ष्व विभवान्निजधर्मदोहान् दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ।।८।। *मैत्रेय उवाच* – एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत्। संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाह ।।९।। *देवहूतिरुवाच* - राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभौ तदवैमि भर्त्तः। यस्तेऽभ्यधायि समयः सकृदङ्गसङ्गो भूयाद् गरीयसि गुणः प्रसवः सतीनाम् ।।१०।। तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे करशितोऽतिरिरंसयात्मा । सिद्ध्येत ते कृतमनोभवधर्षिताया दीनस्तदीश भवनं सदृशं विचक्ष्व ।।११।। *मैत्रेय उवाच* – प्रियायाः प्रियमन्विच्छन्कर्द्दमो योगमाश्रितः। विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् ।।१२।। सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितम्। सर्वर्द्ध्युपचयोदर्कं मणिस्तम्भैरुपस्कृतम् ।।१३।। दिव्योपकरणोपेतं सर्वकालसुखावहम्। पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतम् ।।१४।। स्रग्भिर्विचित्रमाल्याभिर्मञ्जुशिञ्जत्षडङ्घ्रिभिः।

।। सङ्ग्रहोक्तिः ।।

ददामि ।।७।। कालकवलरूपैः तुच्छैः सुखैः किम्? निजधर्मप्राप्तान् इतरदुर्लभान् दिव्यान् भोगान् भुङ्क्ष्व ।।८।। एवं ब्रुवाणं पतिमखिलयोगमायाविद्याविचक्षणं ज्ञात्वा देवहूतिः विगतमनोव्यथाऽऽसीत्, ततः सलज्जहसितानना सा सविनयस्नेहविह्वलया गिरा पतिमाह ।।९।। *देवहूतिरुवाच* – हे द्विजोत्तम! सकलैश्वर्यसम्पन्ने त्वयि सर्वं सिद्धमेव, हे भर्तः! त्वया सकृदपत्यजननपर्यन्तसहवासरूपो यः कालोऽभिहितः स भूयात्, गरीयसि पत्यौ सतीनां प्रजोदयः महान् लाभो भवति ।।१०।। हे ईश! तत्र सहवासे यथोपयुक्तं साधनकलापं सम्पादय, येन मेऽतिकृशो देहो रतिसमर्थो भवेत्, ततस्तदनुरूपं भोगस्थानभवनपि रचय ।।११।। *मैत्रेय उवाच* – हे विदुर! प्रियायाः प्रियं कर्तुमिच्छन् कर्दमो योगमायामाश्रितः सन् कामगं विमानं तत्क्षणमेवाऽऽविर्भावयामास ।।१२।। तद् विमानं वर्णयति – सर्वकामपूरकं, दिव्यं सर्वरत्नसमन्वितं, सर्वसम्पत्समुच्चितं, मणिस्तम्भैरलंकृतं, दिव्योपकरणोपेतं, सर्वकालसुखावहं, विचित्रध्वजपताकाभिरलंकृतं ।।१३-१४।। विविध पुष्पहारदुकुलक्षौमादिनानाविधवस्त्रैर्विराजितम् ।।१५।। उपर्युपरि स्थितगृहेषु पृथक् पृथगास्थापिताभिः शय्याभिः –

दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ।।१५।। उपर्युपरि विन्यस्तनिलयेषु पृथक् पृथक्। क्षिप्तैः कशिपुभिः कान्तं पर्यङ्कव्यजनासनैः ।।१६।। तत्र तत्र विनिक्षिप्त-नानाशिल्पोपशोभितम्। महामरकतस्थल्यां जुष्टं विद्रुमवेदिभिः ।।१७।। द्वास्सु विद्रुमदेहल्या भातं वज्रकपाटवत्। शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिष्ठितम् ।।१८।। चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः। जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः ।।१९।। हंसपारावतव्रातैस्तत्र तत्र निकूजितम्। कृत्रिमान्मन्यमानै स्वानधिरुह्याधिरुह्य च ।।२०।। विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः। यथोपजोषं रचितैर्विस्मापन-मिवात्मनः ।।२१।। ईदृग्गृहं तत्पश्यन्तीं नातिप्रीतेन चेतसा। सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः प्रियाम् ।।२२।। *कर्दम उवाच*- निमज्जास्मिन् ह्रदे भीरु विमानमिदमारुह। इदं शुक्लकृतं तीर्थमाशिषां प्रापकं नृणाम् ।।२३।। *मैत्रेय उवाच* - सा तद्भर्त्तुः समादाय वचः कुवलयेक्षणा। सरजं बिभ्रती वासो वेणीभूतांश्च मूर्द्धजान् ।।२४।। अङ्गं च मलपङ्केन संछन्नं शबलस्तनम्। आविवेश सरस्वत्याः सरः शिवजलाशयम् ।।२५।।

।। सङ्ग्रहोक्तिः ।।

पर्यङ्कव्यजनासनैर्मनोहरम् ।।१६।। तत्र तत्र भित्त्यादिषु विनिक्षिप्तनानाविधशिल्पादिभिरुप-शोभितम्, महामरकतस्थल्यां विद्रुमवेदिभिर्युक्तम् ।।१७।। द्वारेषु विद्रुमदेहल्या शोभितम्, इन्द्रनीलमणिशिखरेषु सुवर्णकलशैः समाश्रितम् ।।१८।। वज्रभित्तिषु मेषोन्मेषकुर्वद्भिरिव पद्मरागश्रेष्ठैरधिष्ठितं, विचित्रवितानैर्हेमतोरणैश्च सुशोभितम् ।।१९।। कृत्रिमान् अपि स्वान् मन्यमानै हंसपारावतव्रातैरधिरुह्याधिरुह्य निकूजितम् ।।२०।। यथासुखं रचितैः विहारस्थान-विश्राम-संवेश-प्राङ्गणा-ऽजिरैर्विस्मयजनकम् ।।२१।। ईदृग्विमानात्मकं सौधं नातिप्रीतेन चेतसा पश्यन्तीं प्रियां देवहूतिं कर्दमः प्रावोचत् ।।२२।। *कर्दम उवाच* - हे भीरु! इदं भगवद्विहितमाकांक्षितप्रापकं तीर्थमस्ति, अस्मिन् बिन्दुसरसि स्नाहि, इदं विमानं चाधिरुह ।।२३।। *मैत्रेय उवाच* - कमलनयना देवहूतिर्भर्तुर्वचनं गृहीत्वा सरजं वस्त्रं वेणीभूतान् केशान् मलपङ्केन संछन्नं शरीरं बिभ्रती सती शिवजलाशयं बिन्दुसरमाविवेश ।।२४-२५।।

सान्तःसरसि वेश्मस्थाः शतानि दश कन्यकाः। सर्वाः किशोरवयसो ददर्शोत्पलगन्धयः।।२६।। तां दृष्ट्वा सहसोत्थाय प्रोचुः प्राञ्जलयः स्त्रियः। वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किम्।।२७।। स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम्। दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः।।२८।। भूषणानि परार्घ्यानि वरीयांसि द्युमन्ति च। अन्नं सर्वगुणोपेतं पानं चैवामृतासवम्।।२९।। अथादर्शे स्वमात्मानं स्रग्विणं विरजाम्बरम्। विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितम्।।३०।। स्नातं कृतशिरःस्नानं सर्वाभरणभूषितम्। निष्कग्रीवं वलयिनं कूजत्काञ्चन-नूपुरम्।।३१।। श्रोण्योरध्यस्तया काञ्च्या काञ्चन्या बहुरत्नया। हारेण च महार्हेण रुचकेन च भूषितम्।।३२।। सुभ्रुवा सुदता श्लक्ष्णस्निग्धापाङ्गेन चक्षुषा। पद्मकोश-स्पृधा नीलैरलकैश्च लसन्मुखम्।।३३।। यदा सस्मार ऋषभमृषीणां दयितं पतिम्। तत्रैवास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः।।३४।। भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा। निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत।।३५।।

।। सङ्ग्रहोक्तिः।।

सा सरसि निमग्ना सती जलान्तःस्थमन्दिरस्थाः सहस्रपरिमिता उत्पलगन्धयः कन्या ददर्श।।२६।। देवहूतिं दृष्ट्वा ताः सर्वा उत्थाय प्राञ्जलयः सत्यो वयं सर्वास्ते दास्यो भवामः, अत आज्ञां कुरु, किं करवाम इति प्रोचुः।।२७।। ता देवहूतिं महार्हेण स्नानेन स्नापयित्वा, तस्यै निर्मले नवीने दुकूले वाससी ददुः।।२८।। श्रेष्ठतमानि दीप्तिमन्ति वरीयांसि भूषणानि, सर्वगुणोपेतमन्नं, सुस्वादु पानं च ददुः।।२९।। ततो देवहूतिर्दर्पणे स्वशरीरं स्रग्विणं, विरजाम्बरं, कृतस्वस्त्ययनं, कन्याभिर्बहुमानितं, कृतशिरःस्नानं सर्वाभरणभूषितं, निष्कग्रीवं, वलयिनं कूजत्काञ्चननूपुरं।।३०-३१।। बहुरत्नया काञ्चन काञ्च्या हारेण रुचकेन च भूषितम् ददर्श।।३२।। सुभ्रुवा, सुदता, कमलकुड्मलस्पर्धिना चक्षुषा नीलैरलकैश्च सुशोभितं स्वमुखं दृष्ट्वा यदा सा प्रियं पतिं सस्मार तदा यत्र प्रजापतिः कर्दम आस्ते तत्रैव स्वयमपि स्त्रिभिः सह उपविष्टां स्वां ददर्श।।३३-३४।। भर्तुः पुरस्तात् स्त्रीसहस्रैर्वृतमात्मानं दृष्ट्वा तत्क्षणे देवहूतिस्तद्योगप्रभावं प्रति विस्मयं प्राप।।३५।।

स तां कृतमलस्नानां विभ्राजन्तीमपूर्ववत्। आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीम्
।।३६।। विद्याधरीसहस्रेण सेव्यमानां सुवाससम्। जातभावो विमानं तदारोहयद-
मित्रहन्।।३७।। तस्मिन्नलुप्तमहिमा प्रिययानुषक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने।
बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः।।३८।। तेनाष्ट-
लोकपविहारकुलाचलेन्द्रद्रोणीष्वनङ्गसखमारुतसौभगासु। सिद्धैर्नुतो द्युधुनिपात-
शिवस्वनासु रेमे चिरं धनदवल्ललनावरूथी।।३९।। वैश्रम्भके सुरसने नन्दने
पुष्पभद्रके। मानसे चैत्ररथ्ये च स रेमे रामया रतः।।४०।। भ्राजिष्णुना विमानेन
कामगेन महीयसा। वैमानिकानत्यशेत चरँल्लोकान्यथानिलः।।४१।। किं दुरापादनं
तेषां पुंसामुद्दामचेतसाम्। यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः।।४२।। प्रेक्षयित्वा
भुवो गोलं पत्न्यै यावान्स्वसंस्थया। बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्त्तत।।४३।।
विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम्। रामां विरमयन् रेमे वर्षपूगान्मुहूर्त्तवत्
।।४४।।

।। सङ्ग्रहोक्तिः ।।

हे विदुर! कृतमलस्नानां, विशेषेण भ्राजमानां संवीतरुचिरस्तनीं विद्याधरीसहस्रेण सेव्यमानां देवहूतिं प्रति जातभावः कर्दमस्तद् विमानमारोहयामास।।३६-३७।।तस्मिन् विमानेऽलुप्तमहिमा प्रिययाऽनुषक्तो विद्याधरीभिः संसेविततनुः कर्दमः प्रफुल्लकुमुद्गणो दर्शनीयस्ताराभिर्वृतो नभस्थः पूर्णचन्द्र इव बभ्राजे।।३८।। स तेन विमानेनाऽष्टलोकपालविहारासु मेरोर्गुहासु स्त्रीरत्न-समूहवान् कुबेर इव सिद्धैः स्तुतः सन् देवहूत्या सह चिरं रेमे।।३९।। वैश्रम्भके, सुरसने, नन्दने, पुष्पभद्रके, चैत्ररथ्ये, मानसे सरसि च प्रीतः सन् कर्दमः स्त्रिया सह रेमे।।४०।। स मुनिः प्रकाशमानेनाऽतिश्रेष्ठेन कामगेन विमानेन वायुरिव चरन् वैमानिकान् लोकानतिक्रम्य स्थितः।।४१।। यैः तापत्रयनाशनो भगवतश्चरण आश्रितः, तेषां योगपरिशुद्धमनसां पुंसां दुष्प्रापं किमपि नास्ति।।४२।। द्वीपवर्षादिसंमानेन यावत् परिमाणः भूगोलो वर्तते तावन्तम-तिविस्मयावहं भुवो गोलं पत्न्यै दर्शयित्वा कर्दमः स्वाश्रमं प्रत्याजगाम।।४३।। कर्दमो मनसः स्ववीर्यं नवधा विभज्य सुरत उत्सुकां मनुपुत्रीं स्वपत्नीं विरमयन् वर्षगणान् मुहूर्तवद्-

तस्मिन्विमाने उत्कृष्टां शय्यां रतिकरीं श्रिता। न चाबुध्यत तं कालं पत्यापीच्येन संगता।।४५।। एवं योगानुभावेन दम्पत्यो रममाणयोः। शतं व्यतीयुः शरदः कामलालसयोर्मनाक्।।४६।। तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित्। नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः।।४७।। अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः। सर्वास्ताश्चारुसर्वाङ्ग्यो लोहितोत्पलगन्धयः।।४८।। पतिं सा प्रव्रजिष्यन्तं तदालक्ष्योशती सती। स्मयमाना विक्लवेन हृदयेन विदूयता ।।४९।। लिखन्त्यधोमुखी भूमिं पदा नखमणिश्रिया। उवाच ललितां वाचं निरुन्ध्याश्रुकणान् शनैः।।५०।। *देवहूतिरुवाच* – सर्वं तद् भगवान् मह्यमुपोवाह प्रतिश्रुतम्। अथापि मे प्रपन्नाया अभयं दातुमर्हसि।।५१।। ब्रह्मन् दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः। कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनम्।।५२।। एतावतालं कालेन व्यतिक्रान्तेन मे प्रभो। इन्द्रियार्थप्रसङ्गेन परित्यक्तपरात्मनः।।५३।। इन्द्रियार्थेषु सज्जन्त्या प्रसङ्गस्त्वयि मे कृतः।

।। सङ्ग्रहोक्तिः ।।

रेमे।।४४।। तस्मिन् विमान उत्कृष्टां रतिकरीं शय्यां श्रिता सुन्दरेण पत्या संयुक्ता सा देवहूतिरनेकवर्षात्मकं कालं नावबुद्धत।।४५।। एवं योगप्रभावेण कामलालसयोर्दम्पत्यो रममाणयोः सतोः शतं संवत्सरा मनागिव व्यतीयुः।।४६।। जीवपरमात्मस्वरूपयाथात्म्यवित् सर्वसंकल्पवित् कर्दमस्तां स्वदेहार्धरूपेण भावयन् सन् स्ववीर्यं नवधा विभज्य पत्न्यां निहितवान् ।।४७।। अथान्तरं देवहूतिः सद्यः प्रजाः पुत्र्यः सुषुवे, सर्वा नवापि कन्यकाः सुन्दरसर्वाङ्ग्यः रक्तोत्पलगन्धय आसन्।।४८।। तदा प्रव्रजिष्यन्तं पतिं वितर्क्य कमनीया स्मयमाना पदा भूमिं विलिखन्ती देवहूतिरधोमुखी सती, अश्रूणि शनैर्निरुध्य विह्वलेन हृदयेन ललितां वाचमुवाच ।।४९-५०।। *देवहूतिरुवाच* – हे भगवन्! भवान् मह्यं यत् प्रतिश्रुतवान् तत् सम्पादितवानसि, अथापि प्रपन्नाया मेऽभयं देहि।।५१।। हे ब्रह्मन्! दुहितृभिर्वयःशीलादिभिः समाः तासां पतयस्त्वयाऽन्ववेषणीयाः, त्वयि वनं गते सति मम विशोकाय पुत्रोत्पादनाय कंचित्कालं गृहे स्थातव्यम् ।।५२।। विषयभोगप्रसङ्गेन परमात्मोपासनमकुर्वन्त्या मे व्यतीतेन

अजानन्त्या परं भावं तथाप्यस्त्वभयाय मे।।५४।। सङ्गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया। स एव साधुषु कृतो निःसङ्गत्वाय कल्पते।।५५।। नेह यत्कर्म धर्माय न विरागाय कल्पते। न तीर्थपदसेवायै जीवन्नपि मृतो हि सः।।५६।।साहं भगवतो नूनं वञ्चिता मायया दृढम्। या त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बन्धनात् ।।५७।। *इति श्रीमद्भागवते तृतीयस्कन्धे त्रयोविंशोऽध्यायः ।।२३।।*

अथ चतुर्विंशोऽध्यायः ।। २४।।

मैत्रेय उवाच - निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः। दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ।।१।। *ऋषिरुवाच* - मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिन्दिते। भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्यते ।।२।।

।। सङ्ग्रहोक्तिः।।

कालेनाऽलम्।।५३।। विषयेषु सज्जन्त्या मया त्वत्प्रसङ्गः कृतः, त्वत्परं भावमजानन्त्या अपि स प्रसङ्गः मेऽभयायाऽस्तु।।५४।। अज्ञानेनाऽसज्जनेषु कृतः सङ्गः संसृतेर्हेतुर्भवति तथा भवादृशेषु साधुषु कृतः सङ्गो विरागत्वाय कल्पते।।५५।। यत् कर्म न धर्माय, न वैराग्याय च कल्पते, तद्द्वारा च यत् कर्म हरेः सेवार्थं न परिणमेत्, स जीवन्नेव मृतः कथ्यते।।५६।। साऽहं विषयासक्ता सती भगवन्माययाऽत्यन्तं वञ्चिताऽस्मि, याऽहं मुक्तिदं त्वां प्राप्याऽपि बन्धनात् मोक्तुमिच्छां न कृतवती।।५७।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां त्रयोविंशोऽध्यायः ।।२३।।

अथ चतुर्विंशोऽध्यायः ।।२४।।

कपिलजन्म कर्दमकन्यानां विवाहश्च

मैत्रेय उवाच - निर्वेदवादिनीं शालिनीं मनोर्दुहितरं स्वगृहिणीं देवहूतिं दयालुः कर्दमो भगवद्वचनं स्मरन्नाह।।१।। *ऋषिरुवाच* - हे राजपुत्रि! आत्मानं प्रतीत्थं मा खिद, निरस्तप्राकृतगुणो हरिः शीघ्रमेव त्वद्गर्भं संप्रतिपत्स्यते।।२।।

धृतव्रतासि भद्रं ते दमेन नियमेन च। तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज।।३।।
स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः। छेत्ता ते हृदयग्रन्थिमौदर्यो ब्रह्मभावनः
।।४।। *मैत्रेय उवाच* – देवहूत्यपि संदेशं गौरवेण प्रजापतेः। सम्यक् श्रद्धाय पुरुषं
कूटस्थमभजद् गुरुम्।।५।। तस्यां बहुतिथे काले भगवान्मधूसूदनः। कार्दमं वीर्यमा-
पन्नो जज्ञेऽग्निरिव दारुणि।।६।। अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः।
गायन्ति स्म सगन्धर्वा नृत्यन्त्यप्सरसो मुदा।।७।। पेतुः सुमनसो दिव्याः खेचरैरप-
वर्जिताः। प्रसेदुश्च दिशः सर्वा अम्भांसि च मनांसि च।।८।। तत्कर्दमाश्रमपदं
सरस्वत्या परिश्रितम्। स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्यगात् ।।९।। भगवन्तं
परं ब्रह्म सत्त्वेनांशेन शत्रुहन्। तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ।।१०।।
सभाजयन् विशुद्धेन चेतसा तच्चिकीर्षितम्। प्रहृष्यमाणैरसुभिः कर्दमं
चेदमभ्यधात्।।११।। *ब्रह्मोवाच* – त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः।
यन्मे संजगृहे वाक्यं भवान्मानद मानयन्।।१२।।

।। सङ्ग्रहोक्तिः।।

तुभ्यं भद्रमस्तु, त्वं धृतव्रताऽसि, शम-दम-तपो-दान-श्रद्धादिभिरीश्वरं भज।।३।। त्वयाऽऽराधितः भगवान् मदीयं यशो विस्तारयन् त्वदुदरात् संजनिष्यते, ततस्त्वां ब्रह्मोपदेशं कृत्वा तव हृदयग्रंथिं छेत्स्यति।।४।। *मैत्रेय उवाच* – देवहूतिरपि कर्दमस्याऽऽज्ञां गौरवेण विश्वस्य निर्विकारं गुरुं परमपुरुषमभजत्।।५।। बहुतिथे काले गते सति भगवान् मधुसूदनः कर्दमसम्बन्धि वीर्यं प्राप्तः सन् दारुणि वह्निरिव जज्ञे।।६।। तदा व्योम्नि देवाः शंखमृदङ्गादीनि वादित्राण्यवादयन्, घनवृष्टिरभूत्, सगन्धर्वाप्सरसो मुदा नृत्यन्ति स्म।।७।। देवैर्वर्षितानि दिव्यानि पुष्पाणि पेतुः, सर्वा दिशः सरांसि जनानां मनांसि च प्रसेदुः।।८।। सरस्वत्या वेष्टितं कर्दमाश्रमं प्रति ब्रह्मा मरीच्यादिभिः ऋषिभिः साकमभ्यगात्।।९।। हे विदुर! प्रकृतिपुरुषेश्वराणां तत्वानां ज्ञप्त्यर्थं सत्त्वेनांशेन जातं परंब्रह्म भगवन्तं जानन् ब्रह्मा भगवच्चिकीर्षितं विशुद्धेन चेतसाऽभिनन्दयन् हर्षरोमाञ्चितहृदयादिभिरुपलक्षितः सन् कर्दमं देवहूतिं चाऽभ्यधात्।।१०-११।। *ब्रह्मोवाच* – हे पुत्र! त्वया मे पूजा निष्कपटभावतः कृता, हे मानद! भवान् मम वाक्यं

एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः। बाढमित्यनुमन्येत गौरवेण गुरोर्वचः।।१३।। इमा दुहितरः सत्यस्तव वत्स सुमध्यमाः। सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यन्त्यनेकधा।।१४।। अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि। आत्मजा परिदेह्यद्य विस्तृणीहि यशो भुवि।।१५।। वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया । भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने।।१६।। ज्ञानविज्ञानयोगेन कर्मणामुद्धरन् जटाः। हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः।।१७।। एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः। अविद्यासंशयग्रन्थिं छित्त्वा गां विचरिष्यति।।१८।। अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः। लोके कपिल इत्याख्यां गन्ता ते कीर्त्तिवर्द्धनः।।१९।। *मैत्रेय उवाच*- तावाश्वास्य जगत्स्रष्टा कुमारैः सह नारदः। हंसो हंसेन यानेन त्रिधामपरमं ययौ ।।२०।। गते शतधृतौ क्षत्तः कर्द्दमस्तेन चोदितः। यथोचितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः।।२१।।

।। सङ्ग्रहोक्तिः ।।

मानयन् सन् गृहीतवान् तदेव मे पूजा।।१२।। पितरि पुत्रैः कार्या पूजा शुश्रूषा च पितुर्वाक्यं गौरवेण बाढमित्यनुमन्येत, "प्रजाः सृज" इति योऽभिहितस्त्वं तथैवाऽकार्षीः, अतः मम पूजा कृता।।१३।। हे वत्स! इमाः साधुशीलास्तव दुहितरः स्वैर्वंशैरेतं सर्गमनेकधा वर्द्धयिष्यन्ति ।।१४।। अतस्त्वं मरीच्यादिभ्यो ऋषिमुख्येभ्यो दुहितॄ र्यथारुचि यथाशीलं प्रयच्छ, एवं च अधुना भुवि यशो विस्तृणीहि।।१५।। हे मुने! आत्मीयसंकल्पेनाऽवतीर्णं भूतानां निधिं देहं बिभ्राणं कपिलमहं जगत्कारणं परमपुरुषं वेद।।१६।।हे मनुपुत्रि! जीवपरमात्मयाथात्म्यज्ञानयोगेन कर्मणां मूलान्युत्पाटयितुं हिरण्यकेशः पद्माक्षः कैटभारिर्भगवान् ते गर्भं प्रविष्टः सन्नविद्याग्रन्थिं छित्त्वा भूमिं विचरिष्यति।।१७-१८।। अयं त्वत्पुत्रः सिद्धगणाधीशः ते कीर्त्तिवर्द्धनः सांख्याचार्यैर्बहुमतः सन् लोके "कपिल" इति नाम प्राप्स्यति।।१९।। *मैत्रेय उवाच*- देवहूतिं कर्दमं च सांत्वयित्वा मरीच्यादीन् विवाहार्थं तत्र स्थापयित्वा ब्रह्मा नारदसनकादिभिः सह हंसयानेन सत्यलोकं ययौ।।२०।। हे विदुर! ब्रह्मणि गते सति तेनादिष्टः कर्दमः स्वदुहितॄः प्रजापतिभ्यो यथोचितं प्रायच्छत्।।२१।।

मरीचये कलां प्रादादनसूयामथात्रये। श्रद्धामङ्गिरसेऽयच्छत्पुलस्त्याय हविर्भुवम् ॥२२॥ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीम्। ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुन्धतीम्॥२३॥ अथर्वणेऽददाच्छान्तिं यया यज्ञो वितन्यते। विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत्॥२४॥ ततस्ते ऋषयः क्षत्तः कृतदारा निमन्त्र्य तम्। प्रातिष्ठन्नन्दिमापन्नाः स्वं स्वमाश्रममण्डलम्॥२५॥ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् । विविक्त उपसंगम्य प्रणम्य समभाषत॥२६॥ *कर्दम उवाच* – अहो पापच्यमानानां निरये स्वैरमङ्गलैः। कालेन भूयसा नूनं प्रसीदन्तीह देवताः ॥२७॥ बहुजन्मविपाकेन सम्यग्योगसमाधिना। द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदम्॥२८॥ स एष भगवानद्य हेलनं न गणय्य नः। गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः॥२९॥ स्वीयं वाक्यमृतं कर्त्तुमवतीर्णोऽसि मे गृहे। चिकीर्षुर्भगवान् ज्ञानं भक्तानां मानवर्द्धनः॥३०॥ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव। यानि यानीह रोचन्ते स्वजनानामरूपिणः॥३१॥

॥ सङ्ग्रहोक्तिः॥

मरीचये कलां सुतां प्रादात्, एवमत्रयेऽनसूयां, अङ्गिरसे श्रद्धां, पुलस्त्याय हविर्भुवं, पुलहाय गतिं, क्रतवे क्रियां, भृगवे ख्यातिं, वसिष्ठायाऽरुन्धतीमयच्छत्॥२२-२३॥ अथर्वणे शांतिमयच्छत् यया यज्ञो वितन्यते, एवं कृतविवाहान् सदारान् मरीच्यादिद्विजश्रेष्ठान् वैवाहिकवस्त्राभरणादिपारिबर्हप्रदानेन कर्दमः संतोषितवान्॥२४॥ हे विदुर! कृतदाराः ते ऋषयः कर्दममुनिं पृष्ट्वा हर्षमापन्नाः सन्तः स्वस्वाश्रमस्थानं प्रातिष्ठन्॥२५॥ अथ कर्दमः षडैश्वर्यसंपन्नं भगवन्तं स्वगृहे प्रादुर्भावं प्राप्तमाज्ञाय विविक्ते समुपेत्य नत्वा मधुराक्षरं समभाषत ॥२६॥ *कर्दम उवाच* – स्वपापैर्निरये भृशं दह्यमानानां जनानामपरि बहुना कालेन देवताः प्रसिदन्ति अहो!॥२७॥ बहुजन्मपरिपक्वेन सम्यग्योगसमाधिना यत्स्वरूपं हृदयस्थानेषु द्रष्टुं यतयो यतन्ते॥२८॥ स एष भगवान् अस्मत्कृतामवज्ञामनादृत्य ग्राम्याणामस्माकं गृहेऽवतीर्णः, यस्त्वं स्वभक्तानां पक्षपोषकोऽसि॥२९॥ भक्तानां मानवर्धनः सांख्यतन्त्रं चिकीर्षुः सन् स्वीयं वाक्यं सत्यं कर्तुं मम गृहे भगवांस्त्वमवतीर्णोऽसि॥३०॥

तं सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठम्। ऐश्वर्यवैराग्ययशोव-
बोधवीर्यश्रियां पूर्त्तमहं प्रपद्ये ।।३२।। परं प्रधानं पुरुषं महान्तं कालं कविं त्रिवृतं
लोकपालम्। आत्मानुभूत्यानुगतप्रपञ्चं स्वच्छन्दशक्तिं कपिलं प्रपद्ये ।।३३।। आस्माभि-
पृच्छेऽद्य पतिं प्रजानां त्वयावतीर्णार्ण उताप्तकामः। परिव्रजत्पदवीमास्थितोऽहं चरिष्ये
त्वां हृदि युञ्जन् विशोकः।।३४।। *श्रीभगवानुवाच* – मया प्रोक्तं हि लोकस्य प्रमाणं
सत्यलौकिके। अथाऽजनि मया तुभ्यं यदवोचमृतं मुने ।।३५।। एतन्मे जन्म लोकेऽस्मि-
न्मुमुक्षूणां दुराशयात्। प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ।।३५।। एष आत्मपथो-
ऽव्यक्तो नष्टः कालेन भूयसा। तं प्रवर्त्तयितुं देहमिमं विद्धि मया धृतम् ।।३७।। गच्छ
कामं मयाऽऽपृष्टो मयि संन्यस्तकर्मणा। जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ।।३८।।
मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयम्। आत्मन्येवात्मनान्वीक्षन् विशोकोऽभयमृच्छसि
।।३९।। मात्र आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणाम्।

।। सङ्ग्रहोक्तिः ।।

हे भगवन्! कर्माधीनदेवादिसमानशरीररहितस्य तव चतुर्भुजादिशरीराणि स्वभक्तानां यानि
रोचन्ते तान्येव स्वरूपाणि तवाप्यभिमतानि बिभर्षि ।।३१।। सुधीभिस्तत्त्वजिज्ञासया सदा
वन्द्यपादपीठमैश्वर्यविरागयशोवबोधवीर्यश्रीप्रभृतिभिः पूर्णं त्वामहं शरणं प्रपद्ये ।।३२।। प्रकृति-
पुरुषविलक्षणं प्रकृतिपुरुषकालादिशरीरकं सर्वज्ञं लोकपालमात्मानुभूत्यानुगतप्रपञ्चं स्वच्छन्द-
शक्तिं कपिलं त्वां प्रपद्ये ।।३३।। त्वयाऽवतीर्य मामृणत्रयान्मोचितः, इदानीमहमाप्तकामो विशोको-
ऽस्मि, अतस्त्वां पृच्छामि यदहं परिव्रजतां मार्गमाश्रित्य संचरिष्यामि ।।३४।। *श्रीभगवानुवाच*
– वैदिके लौकिके च कर्मणि मया प्रोक्तं तत् लोकस्य प्रमाणम्, हे मुने! तुभ्यमहं यदवोचं तद्
यथा सत्यं स्यात् तथा मया जन्म स्वीकृतम् ।।३५।। देहात् मुक्तिमिच्छतां प्रकृतिविविक्तजीवात्म-
परमात्मविज्ञानरूपतत्वकथनायऽस्मिन् लोके मम जन्म जातमस्ति ।।३६।। एतदात्मतत्वपथः
सूक्ष्मो दुर्ज्ञेयः, भूयसा कालेन नष्टः, तमेवाऽऽत्मतत्त्वपथं प्रवर्तयितुं मयाऽयं देहो धृत इति
विद्धि ।।३७।। मयाऽऽदिष्टो यथेच्छं गच्छ मयि समर्पितेन कर्मणा दुर्जयं मृत्युं जित्वाऽमृतत्वाय
मां भज ।।३८।। जीवानामन्तरात्मानं स्वयंप्रकाशं सर्वभूतगुहाशयं निर्भयं मां स्वात्मनि मनसा

वितरिष्ये यया चासौ भयं चातितरिष्यति ।।४०।। *मैत्रेय उवाच* - एवं समुदितेन कपिलेन प्रजापतिः। दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ।।४१।। आस्थितः स व्रतं मौनमात्मैकशरणो मुनिः। निःसङ्गो व्यचरत् क्षोणीमनग्निरनिकेतनः ।।४२।। मनो ब्रह्मणि युञ्जानो यत्तत्सदसतः परम्। गुणावभासे विगुण एकभक्त्यानुभाविते ।।४३।। निरहंकृतिर्निर्ममश्च निर्द्वन्द्वः समदृक् स्वदृक्। प्रत्यक् प्रशान्तधीर्धीरः प्रशान्तोर्मिरिवोदधिः ।।४४।। वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि। परेण भक्तिभावेन लब्धात्मा मुक्तबन्धनः ।।४५।। आत्मानं सर्वभूतेषु भगवन्तमवस्थितम्। अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ।।४६।। इच्छाद्वेषविहीनेन सर्वत्र समचेतसा । भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ।।४७।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे चतुर्विंशोऽध्यायः ।।२४।।

।। सङ्ग्रहोक्तिः ।।

साक्षात्कुर्वन् विशोकः सन् त्वं मामेव प्राप्स्यसि ।।३९।। यया ब्रह्मविद्ययाऽसौ मम माता मृत्युं तरिष्यति तां सर्वकर्मणां विनाशिनीमाध्यात्मिकीं विद्यामहं मात्र उपदेक्ष्यामि ।।४०।। *मैत्रेय उवाच* - इत्थं कपिलेन समुदितः कर्दमस्तं कपिलं प्रदक्षिणीकृत्य प्रीतः सन् वनं प्रति जगाम ।।४१।। स कर्दमस्तत्र मौनं गृहीत्वा परमात्मैकशरणो निःसङ्गोऽनिकेतनः सन् महीं व्यचरत् ।।४२।। चिदचिद्भ्यां विलक्षणे कल्याणगुणावभासिते हेयगुणरहिते भक्त्यैकमात्रगोचरे ब्रह्मणि मनो युञ्जानः ।।४३।। निरहङ्कारो निर्ममो निर्द्वन्द्वः समदृष्टिः स्वात्मदर्शी प्रशान्तोर्मिः सागर इव धीरः ।।४४।। सर्वज्ञे प्रत्यगात्मनियन्तरि भगवति वासुदेवे परेण भक्तिभावेन लब्धमतिरत एव मुक्तबन्धनः ।।४५।। सर्वभूतेष्वात्मवर्गधारकं भगवन्तमपश्यत् तथा धारके परमात्मनि धार्याणि सर्वभूतान्यपश्यत् ।।४६।। रागद्वेषविहीनेन सर्वत्र समचेतसा भगवद्भक्तिं कुर्वाणेन कर्दमेन भागवती मुक्तिरधिगता ।।४७।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां चतुर्विंशोऽध्यायः ।।२४।।

अथ पञ्चविंशोऽध्यायः ।।२५।।

शौनक उवाच - कपिलस्तत्त्वसंख्याता भगवानात्ममायया। जातः स्वयमजः
साक्षादात्मप्रज्ञप्तये नृणाम् ।।१।। नह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनाम्
विश्रुतौ श्रुतदेवस्य भूरि तृप्यन्ति मेऽसवः ।।२।। यद्यद्विधत्ते भगवान् स्वच्छन्दात्मा-
ऽऽत्ममायया। तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ।।३।। *सूत उवाच* -
द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा। प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः
।।४।। *मैत्रेय उवाच* - पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया। तस्मिन् बिन्दुसर-
स्तीरे ह्यवात्सीद्भगवान् किल ।।५।। तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनम्। स्वसुतं
देवहूत्याह धातुः संस्मरती वचः ।। ६।। *देवहूतिरुवाच* - निर्विण्णा नितरां भूमन्नसदि-
न्द्रियतर्पणात्। येन सम्भाव्यमानेन प्रपन्नान्धं तमः प्रभो ।।७।। तस्य त्वं तमसोऽन्धस्य
दुष्पारस्याद्य पारगम्। सच्चक्षुर्जन्मनामन्ते लब्धं मे त्वदनुग्रहात् ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ पञ्चविंशोऽध्यायः ।।२५।।

देवहूतिकपिलसंवादः, तत्र कपिलप्रोक्तं भक्तिलक्षणम्

शौनक उवाच - स्वयमजो भगवान् नृणामात्मपरमात्मयाथात्म्यविशदीकरणाय तत्त्वसंख्याता
कपिलः स्वेच्छयाऽवतीर्ण आसीत् ।।१।। सर्वेषां नृणां योगिनां च मध्ये श्रेष्ठं कपिलं श्रुत्वाऽपि
मे प्राणाः कात्स्न्येन न तृप्यन्ति ।।२।। स्वेच्छोपात्तशरीरो भगवान् कपिलः स्वसंकल्पेन यद्यत्
चरित्रमकरोत् संकीर्तनीयानि तानि चरित्राणि मह्यं संश्रावय ।।३।। *सूत उवाच* - व्याससखो
मैत्रेयस्तत्त्वनिरूपणे यथा त्वं मां प्रेरयसि तथा प्रेरितोऽत एव प्रसन्नः सन् विदुरं प्रति त्वत्प्रश्नानुसारेण
प्रोवाच ।।४।। *मैत्रेय उवाच* - पितरि कर्दमे वनं गते सति भगवान् कपिलो मातुः प्रियचिकीर्षया
तस्मिन् बिन्दुसरस्तीर एवाऽवात्सीत् ।।५।। बिन्दुसरस्तट एव निषण्णं तत्त्वानां पारदृश्वानं
शान्तं कपिलं देवहूतिर्ब्रह्मवाक्यं स्मरन्ती प्राह ।।६।। *देवहूतिरुवाच* - हे भूमन्! असतामिन्द्रियाणां
तर्पणादहं निर्विण्णाऽस्मि, येनेन्द्रियतर्पणेनाऽज्ञानं प्राप्ताऽस्मि ।।७।।दुष्पारस्याऽन्धस्य तमसः
पारगं त्वद्रूपं सच्चक्षुर्बहूनां जन्मनामन्ते त्वदनुग्रहात् सांप्रतमेव मया लब्धम् ।।८।।

य आद्यो भगवान् पुंसामीश्वरो वै भवान् किल। लोकस्य तमसान्धस्य चक्षुः सूर्य इवोदितः।।९।। अपि मे देव सम्मोहमपाक्रष्टुं त्वमर्हसि। योऽवग्रहोऽहंममेतीत्येतस्मिन् योजितस्त्वया।।१०।। तं त्वा गताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम्। जिज्ञासयाहं प्रकृतेः पूरुषस्य नमामि सद्धर्मविदां वरिष्ठम्।।११।। *मैत्रेय उवाच* - इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्द्धनम्। धियाभिनन्द्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः।।१२।। *श्रीभगवानुवाच* - योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे। अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च।।१३।। तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे। ऋषीणां श्रोतुकामानां योगं सर्वाङ्गनैपुणम्।।१४।। चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम्। गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये।।१५।। अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः। वीतं यदा मनः शुद्धमदुःखमसुखं समम्।।१६।। तदा पुरुष आत्मानं केवलं प्रकृतेः परम्। निरन्तरं स्वयंज्योतिरणिमानमखण्डितम्।।१७।।

।। सङ्ग्रहोक्तिः ।।

जीवानां नियन्ताऽऽद्यो यो भगवान् स भवान् तमसाऽन्धस्य चक्षुः सूर्य इव उदितो भवति।।९।। अस्मिन् देहे "अहं मम" इत्येवं रूपो योऽभिमानरूपः संमोहः स त्वयैव योजितः, तं संमोहमुदितस्त्वमेवाऽपनेतुमर्हसि।।१०।।स्वभक्तानां संसारतरोः कुठारं सद्धर्मविदां वरिष्ठं शरण्यं च त्वां प्रकृतेः पुरुषस्य च (तत्त्वत्रयस्य) जिज्ञासया शरणं गताऽस्मि।।११।। *मैत्रेय उवाच* - निगृहीतमनसां सतां गतिरूपः कपिलो मोक्षरुचिकरं निर्दोषं मातुरभिप्रेतं श्रुत्वा मनसा तदभिनन्द्य मन्दहासरुचिराननः सन् बभाषे।।१२।। *श्रीभगवानुवाच* - प्रकृतिविविक्तात्मयाथात्मज्ञानरूप आध्यात्मिको योगः पुंसां मोक्षाय मया मतः, तस्मिन्नाध्यात्मिके योगे निष्पन्ने सति वैषयिकसुखदुःखयोर्विनाशो भवति।।१३।। हे मातः! यमध्यात्मयोगं श्रोतुकामानां सनकादिकानां पुरः पुराऽहं हंसरूपेण प्रोक्तवानस्मि, तं साङ्गं योगं तुभ्यं वक्ष्यामि।।१४।। जीवस्य बन्धाय मोक्षाय च कारणं चित्तमेवास्ति, शब्दादिविषयेष्वासक्तं चित्तं बन्धाय, परमेश्वरबद्धं चित्तं मुक्तये च भवति।।१५।। अहंत्वममत्त्वाभिमानेनोत्थितैः कामलोभादिभिर्दोषैर्विरहितं शुद्धं मनः

ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना। परिपश्यत्युदासीनं प्रकृतिं च हतौजसम्
।।१८।। न युज्यमानया भक्त्या भगवत्यखिलात्मनि। सदृशोऽस्ति शिवः पन्था
योगिनां ब्रह्मसिद्धये।।१९।। *प्रसङ्गमजरं पाशमात्मनः कवयो विदुः। स एव
साधुषु कृतो मोक्षद्वारमपावृतम्।।२०।।* तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः।।२१।। मय्यनन्येन भावेन भक्तिं कुर्वन्ति
ये दृढाम्। मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः।।२२।। मदाश्रयकथाहृष्टाः
शृण्वन्ति कथयन्ति च। तपन्ति विविधास्तापानैतान्मद्गतचेतसः ।।२३।। त एते
साधवः साध्वि सर्वसङ्गविवर्जिताः। सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि
ते।।२४।। *सतां प्रसङ्गान्मम वीर्यसंविदो भवन्ति हृत्कर्ण रसायनाः कथाः।
तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति* ।।२५।। भक्त्या
पुमाञ्जातविराग ऐन्द्रियाद् दृष्टश्रुतान्मद्रचनानुचिन्तया।

।। सङ्ग्रहोक्तिः ।।

यदा सुखदुःखैरनभिभूतं समरूपं जायते तदा पुरुषः ज्ञानवैराग्यभक्तिभिर्युक्तेन मनसा प्रकृतेः परं स्वयंप्रकाशमणुपरिमाणमखण्डितं निर्व्यापारं चात्मानं हतौजसं प्रकृतिं च पश्यति।।१६-१८।।जीवानामात्मभूते भगवति युज्यमानया भक्त्या सदृशः साधर्म्यमुक्तिसिद्धये योगिनामन्यः शिवः पन्था नास्ति।।१९।। विषयतदासक्तानां प्रसङ्गो जीवानां कृते दृढं पाशं सुधियो वदन्ति, स एव प्रसङ्गः साधुषु कृतश्चेत् तस्य मोक्षद्वारं निरावरणं स्यात्।।२०।। ते साधवः के? तदाह – साधवः सहनशीलाः, कारुणिकाः, सर्वदेहिनां सुहृदः, अजातशत्रवः, शान्ताः साधुभूषणाः, ये मय्यनन्यभावेन दृढां भक्तिं कुर्वन्ति, मत्कृते त्यक्तमदाराधनविरोधिप्रवृत्तिधर्माः त्यक्तस्वजनबान्धवाः, ये मदाश्रयकथाश्रवणादिभिर्नितरां प्रसन्नाः, मद्गतचेतसस्तान् विविधास्तापा नैव तापयन्ति।।२१-२३।। हे साध्वि! मातः! एते साधवः प्रोक्ताः, एतेषां समागमस्त्वया प्रार्थनीयः, यत इमे साधवो विषयासक्तिजन्यान् सर्वान् दोषान् हरन्ति ।।२४।। साधूनां समागमात् हृत्कर्णयो रसायनरूपा मम वीर्यज्ञापिकाः कथाः प्रवर्त्तन्ते, तासां कथानां सेवनात् प्रथमं श्रद्धा, ततो हरौ प्रीतिः ततो भक्तिः, इत्यनुक्रमेण भविष्यति ।।२५।।

चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः।।२६।। असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृम्भितेन। योगेन मय्यर्पितया च भक्त्या मां प्रत्यंगात्मानमिहावरुन्धे।।२७।। *देवहूतिरुवाच* - काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा। यया पदं ते निर्वाणमञ्जसान्वश्नवा अहम्।।२८।। यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः। कीदृशः कति चाङ्गानि यतस्तत्त्वावबोधनम्।।२९।। तदेतन्मे विजानीहि यथाहं मन्दधीर्हरे। सुखं बुद्ध्येय दुर्बोधं योषा भवदनुग्रहात्।।३०।। *मैत्रेय उवाच* - विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः। तत्त्वाम्नायं यत्प्रवदन्ति सांख्यं प्रोवाच वै भक्तिवितानयोगम्।।३१।। *कपिल उवाच* - देवानां गुणलिङ्गानामानुश्रविककर्मणाम्। सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या।।३२।। अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी। जरयत्याशु या कोशं निगीर्णमनलो यथा।।३३।। *नैकात्मतां मे स्पृहयन्ति केचिन् मत्पादसेवाभिरता मदीहाः।*

।। सङ्ग्रहोक्तिः।।

ममाऽद्भुतरचनानुचिन्तनेन भक्त्या च दृष्टश्रुताखिलविषयेभ्यो लौकिकपारलौकिकेभ्यो विरक्तः पुमान् निष्कामकर्मयोगज्ञानयोगाभ्यां युक्तः सन् भगवन्मूर्तौ चित्तस्य नियमने यत्नं कुर्यात्।।२६।। शब्दादिविषयाणां परित्यागेन वैराग्येण च वृद्धिंगतया भक्त्या जनोऽस्मिन्नेव जन्मनि साक्षिरूपेणावस्थितं मां साक्षात्करोति।।२७।। *देवहूतिरुवाच* - त्वयि मुक्तिं साधयितुं योग्या भक्तिः का? ययाऽहं ते निरतिशयसुखरूपं पदं सुखेन प्राप्नुयाम्।।२८।। हेसुखमूर्ते! यो योगो बाणवद् भगवन्तमेव लक्ष्यीकरोति स कीदृशः, तस्याऽङ्गानि च कति, येभ्यस्तत्त्वावबोधनं स्यात्।।२९।। हे हरे! एतं दुर्बोधं विषयं मन्दबुद्धिः स्त्रीजातिरहं भवदनुग्रहात् सुखेन यथा जानीयां तथा मह्यं विज्ञापय।।३०।। *मैत्रेय उवाच* - कपिलो मातुः प्रश्नविषयं विज्ञाय, यस्यां तन्वा जातः, अत एव जातस्नेहः सन् ज्ञानिनो यत् साख्यशास्त्रं वदन्ति तत् भक्तिविस्ताररूपं तत्त्वसंख्यानं प्रोवाच।।३१।। *कपिल उवाच* - देवतासहितानां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणामेकाग्रतायुक्तमनसश्च शुद्धसत्त्वमये भगवद्विग्रहे स्वाभाविकी निष्कामा या वृत्तिः, सा

येऽन्योन्यतो भागवताः प्रसज्ज्य सभाजयन्ते मम पौरुषाणि ।।३४।। पश्यन्ति ते मे रुचिराण्यम्ब सन्तः प्रसन्नवक्त्रारुणलोचनानि। रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदन्ति ।।३५।। तैर्दर्शनीयावयवैरुदारविलासहासेक्षणवामसूक्तैः। हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते ।।३६।। अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टाङ्गमनुप्रवृत्तम्। श्रियं भागवतीं वास्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते तु लोके ।।३७।। न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः। येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ।।३८।। इमं लोकं तथैवामुमात्मानमुभयायिनम्। आत्मानमनु ये चेह ये रायः पशवो गृहाः ।।३९।। विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखम्। भजन्त्यनन्यया भक्त्या तान्मृत्योरतिपारये ।।४०।।

।। सङ्ग्रहोक्तिः ।।

भगवत्संबन्धिनी भक्तिः कैवल्यादिसिद्धेरपि गरीयसी वर्तते, या वासनारूपं लिङ्गशरीरमपि जठरानलो भुक्तमन्नमिव शीघ्रं नाशयति ।।३२-३३।। मच्चरणसेवायामासक्ता मदर्थमेव सर्वेन्द्रियचेष्टा ये भागवताः सन्ति ते परस्परं मिलित्वा मम कल्याणगुणप्रकाशकानि चरित्राण्येव सेवन्ते, ते साधर्म्यमुक्तिमपि न स्पृहयन्ति ।।३४।। हे अम्ब! ते साधवः सुन्दराणि दिव्यानि प्रसन्नवक्त्राण्यरुणलोचनानि च मे स्वरूपाणि ध्यानेन पश्यन्ति, स्पृहणीया वार्ताश्च परस्परं कथयन्ति ।।३५।। दर्शनीयावयवैरुदारविलासहास्यावलोकनमृदुवचनैः मत्स्वरूपैर्हृतचेतसः हृतप्राणान् मुक्तिमनिच्छतो साधून् भक्तिः मुक्तिं प्रापयति ।।३६।। मुक्तिप्राप्त्यनन्तरं योगमायास्वामिनो मम विभूतिमष्टसिद्धिं मङ्गलरूपां भागवतीं श्रियं च ते साधव नेच्छन्ति, किन्तु मदिच्छया मद्धाम्नि ते प्राप्नुवन्ति ।।३७।। येषां मद्भक्तानामहमेव प्रियः, आत्मा, सुतः, सखा, गुरुः, सुहृद्, दैवं, इष्टं च भवेयं, तान् भक्तान् मे कालचक्रमपि न ग्रसति, ते मुक्ताः शान्तरूपे मल्लोके मत्पराः सन्तः कदाचिदपि न नङ्क्ष्यन्ति ।।३८।। ये भक्ताः इहामुत्र लोकौ हेयौ इति निश्चित्य, तत्रस्थं देहं, धनानि, पशून्, गृहाणि, अन्यान् सर्वान् परिग्रहांश्च परित्यज्य सर्वज्ञं मामनन्यया भक्त्या भजन्ति तानहं संसारात् पारं नयामि ।।३९-४०।।

नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात्। आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते॥४१॥ *मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात्। वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥४२॥* ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः। क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयम्॥४३॥ *एतावानेव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः। तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम्॥४४॥*

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे पञ्चविंशोऽध्यायः॥२५॥

अथ षड्विंशोऽध्यायः॥२६॥

***श्रीभगवानुवाच* – अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्। यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः॥१॥ ज्ञानं निःश्रेसार्थाय पुरुषस्यात्मदर्शनम्।**

॥ सङ्ग्रहोक्तिः॥

सर्वभूतानां धारकात् प्रधानपुरुषयोरीश्वरात् भगवतो मत्तोऽन्यस्मिन् सेव्यमाने सति दुःसहं गर्भजन्मजरामरणादिसांसारिकं भयं न निवर्तते॥४१॥ अयं वायुर्मद्भयाद् वाति, सूर्यो मद्भयात्तपति, इन्द्रो वर्षति, अग्निर्दहति, यमोऽपि मदाज्ञाभङ्गभयात् चरति॥४२॥ मदुपासका योगिनो ज्ञानवैराग्याभ्यां युक्तेन भक्तियोगेन सुखाय सदा सर्वदा निर्भयं मे पादमूलं भजन्ते॥४३॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं सत् तत्रैव स्थिरं भवति, एतावानेवाऽस्मिन् लोके पुंसां = बद्धजीवानां परमपुरुषार्थोत्कर्षो भवति॥४४॥

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां पञ्चविंशोऽध्यायः ॥२५॥

अथ षड्विंशोध्यायः ॥२६॥

महदादितत्त्वानामुत्पत्तिवर्णनं सद्धर्मवर्णनं च

श्रीभगवानुवाच – हे मातः! अथ प्रकृतिपुरुषकालादीनां पृथक् पृथक् लक्षणानि ते संप्रवक्ष्यामि, एतद्विदित्वा मुमुक्षुः प्रकृतिसम्बन्धिभिः गुणैर्विमुच्येत॥१॥ वेदान्ताः परमपुरुषस्य साक्षाद्

यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम् ।।२।। अनादिरात्मा पुरुषो निर्गुणः प्रकृते
परः। प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ।।३।। न जायते न म्रियते देही
देहाद्युपाधिभिः। यथा निमित्तैर्देहात्मा स्वप्नद्रष्टा न नश्यति ।।४।। स एष प्रकृतिं
सूक्ष्मां दैवीं गुणमयीं विभुः। यदृच्छयैवोपगतामभ्यपद्यत लीलया ।।५।। गुणैर्विचित्रा
सृजतीं सरूपाः प्रकृतिं प्रजाः। विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ।।६।। ए
पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान्। कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ।।७।।
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम्। भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः
।।८।। कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः। भोक्तृत्वे सुखदुःखानां पुरुषं
प्रकृतेः परम् ।।९।। *देवहूतिरुवाच* - प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम। ब्रूहि
कारणयोरस्य सदसच्च यदात्मकम् ।।१०।।

।। सङ्ग्रहोक्तिः ।।

दर्शनं मुमुक्षोर्मोक्षायाऽऽहुः, अज्ञानविर्तकं तज्ज्ञानं ते=तुभ्यं वर्णये ।।२।। पुरुषः=जीवोऽनादिः
स्वयंप्रकाशः स्वस्मै प्रकाशमानस्वरूपः, प्रकृतेः स्वरूपस्वभावादिना विलक्षणोऽत एव निर्गुणः
आत्मा, येनाऽऽत्मस्वरूपेण विश्वं व्याप्तमस्ति ।।३।। अत एव देही देहाद्युपाधिभिः सह न
जायते न च म्रियते, पुण्यपापरूपनिमितैरारोपितदेहधर्माऽस्ति, यथा स्वप्नद्रष्टा स्वप्नपदार्थ
नाशेऽपि न नश्यति तद्वत् ।।४।। स एष प्रत्यगात्मा सूक्ष्मां दैवीं लीलया यदृच्छया प्राप्तां
गुणमयीं प्रकृतिं-मायां प्राप्तवान् ।।५।। स जीवाख्यः पुरुषः कार्यदशायां विचित्राः प्र
सत्त्वादिगुणैः सृजतीं प्रकृतिं विलोक्य ज्ञानतिरोधायिन्या तया सद्यो मुमुहे ।।६।।
प्रकृतिचिन्तनेन जीवः प्रकृतेर्गुणैः क्रियमाणेषु कर्मसु कर्तृत्वमात्मनि मन्यते ।।७।।
अकर्तुरकर्मवश्यस्य साक्षिणोऽस्य आनन्दरूपस्य जीवस्य प्रकृतिसंसर्गकृतकर्तृत्वात् संसार
बन्धः, पारतन्त्र्यं च भवति ।।८।। शरीरेन्द्रियादीनां क्रियाकारित्वे प्रकृतिं हेतुं विदुः, सुखदुःखानां
भोक्तृत्वे शरीरात् परं पुरुषमात्मानं कारणं विदुः ।।९।। *देवहूतिरुवाच* - हे पुरुषोत्तम
सत्=कार्यम्, असत्=कारणम्, यदात्मकं=प्रकृतिपुरुषात्मकं विद्यते, अस्य जगतः कारणयोः
प्रकृतिपुरुषयोः लक्षणं ब्रूहि ।।१०।।

श्रीभगवानुवाच – यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्। प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्।।११।। पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा। एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः।।१२।। महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः। तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे।।१३।। इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः। वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते।।१४।। मनो बुद्धिरहङ्कारश्चित्तमित्यन्त-रात्मकम्। चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया।।१५।। एतावानेव सङ्ख्यातो ब्रह्मणः सगुणस्य ह। सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः।।१६।। प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्। अहङ्कारविमूढस्य कर्तुः प्रकृतिमीयुषः।।१७।। प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि। चेष्टा यतः स भगवान् काल इत्युपलक्षितः।।१८।। अन्तः पुरुषरूपेण कालरूपेण यो बहिः। समन्वेत्येष सत्त्वानां भगवानात्म-मायया।।१९।। दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान्। -

---

।। सङ्ग्रहोक्तिः ।।

कपिल उवाच - अविशेषं=पृथिव्यादिविशेषरहितं, अव्यक्तं-नामरूपविभागानर्हं, त्रिगुणं, नित्यं, कार्यावस्थायां पृथ्व्यादिविशेषवत्, कार्यकारणात्मकं यत् प्रधानं तदेव प्रकृतिं प्राहुः।।११।। पञ्चभिर्भूतैः, पञ्चभिस्तन्मात्रैः, मनोबुद्धिचित्ताहङ्कारैश्चतुर्भिः, दशभिः ज्ञानकर्मोभयैरिन्द्रियैः, इति चतुर्विंशतिसंख्याकं गणं प्रधानकार्यात्मकं विदुः।।१२।। भूमिः, आपः, अनलः, वायुः, नभः, इति पञ्च भूतानि, गन्ध-रस-रूप-स्पर्श-शब्दात्मकानि पञ्च तन्मात्राणि मे मतानि।।१३।। श्रोत्रं, त्वक्, चक्षुः, रसना, घ्राणः इति पञ्च ज्ञानेन्द्रियाणि, वाक्, पाणी, पादौ, पायुः, उपस्थं चेति पञ्च कर्मेन्द्रियाणि।।१४।। अन्तःकरणम्=मनः, बुद्धिः, अहङ्कारः, चित्तम्=प्रवृत्तिभेदेन चतुर्धा लक्ष्यते।।१५।। सत्वादिगुणकस्य प्रधानस्य अवस्थाविशेष=संनिवेशः चतुर्विंशति संख्याको गणितः तत्र कालः पञ्चविंशकः कथितः।।१६।। पुरुषसम्बन्धिप्रभाव एव कालः, पौरुषप्रभावरूपात् यस्मात् कालात् भयं भवति, इति केचिद् वदन्ति, अहंकारेण विमूढस्य संसारदशां प्राप्तस्य जीवस्य गुणसाम्यस्य निर्विशेषस्य प्रधानस्य यतः चेष्टा=व्यापारो भवति स कालो भगवदात्मक उच्यते।।१७-१८।।

आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम् ।।२०।। विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः। स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः।।२१।। यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम्। यदाहुर्वासुदेवाख्यं चित्तं यन्महदात्मकम् ।।२२।। स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः। वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ।।२३।। महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यनोदितात्। क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत ।।२४।। वैकारिकस्तैजसश्च तामसश्च यतो भवः। मनसश्चेन्द्रियाणां च भूतानां महतामपि।।२५।। सहस्रशिरसं साक्षाद्यमनन्तं प्रचक्षते। सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम्।।२६।। कर्तृत्वं करणत्वं व कार्यत्वं चेति लक्षणम्। शान्तघोरविमूढत्वमिति वा स्यादहंकृतेः।।२७।। वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत। यत्सङ्कल्पविकल्पाभ्यां वर्तते कामसम्भवः।।२८।।

।। सङ्ग्रहोक्तिः।।

य एष स्वसंकल्पेन सत्त्वानामन्तः पुरुषरूपेण बहिः कालरूपेण च अवभासते स भगवान् कालः।।१९।।परमपुरुषो स्वसंकल्पात् क्षुभितधर्मिण्यां जगद्योनौ प्रकृत्यां महदादि सृष्टिसामर्थ्य वीर्यमाधत्त, ततः प्रकृतिः हिरण्मयं महत्तत्त्वमसूत ।।२०।। जगदङ्कुरभूतः कूटस्थः महान् स्वस्मिन् लीनं विश्वं व्यञ्जयन् स्वसंकल्पतेजसा तीव्रं प्राकृतं तमोऽभिभूतमकरोत्।।२१।। यत् भगवदुपलम्भस्थानं शान्तं स्वच्छं सत्त्वगुणकं यच्च वासुदेवाधिष्ठितं तच्चित्तं महत्तत्त्वनाम्नाऽवस्थितम् ।।२२।।स्वच्छत्वम्, अविकारित्वं शान्तत्वं इत्यादिवृत्तिभिश्चित्तस्य लक्षणमुक्तम् ।।२३।। भगवत्संकल्परूपज्ञानेन प्रेरितात् विकुर्वाणात् महत्तत्त्वात् वैकारिकः=सात्त्विकः तैजसः=राजसः, तामसश्चेति त्रिविधः क्रियाशक्तिरहंकारः समपद्यत, तस्मात् मनसः ज्ञानकर्मोभयेन्द्रियाणां महाभूतानां च उत्पत्तिर्भवति।।२४-२५।। सहस्रशिरसं साक्षात् संकर्षणाख्यं पुरुषं यमनन्तं भूतेन्द्रियमनोमयं प्रचक्षते।।२६।। देवतादिरूपेण कर्तृत्वम्, इन्द्रियरूपेण करणत्वम्, भूतरूपेण कार्यत्वम्, तथा शान्तत्वं घोरत्वं मूढत्वं चेति त्रिविधस्याहंकारस्य लक्षणानि सन्ति।।२७।।विकुर्वाणात् सात्त्विकाहंकारात् मनोऽजायत, यत्संकल्पविकल्पाभ्यां कामसंभवो जायते।।२८।।

यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम्। शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः॥२९॥ तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत्सति। द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः॥३०॥ संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च। स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्॥३१॥ तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः। प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता॥३२॥ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात्। शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम्॥३३॥ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च। तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः॥३४॥ भूतानां छिद्रदातृत्वं बहिरन्तरमेव च। प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम्॥३५॥ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः। स्पर्शोऽभवत्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः॥३६॥ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च। एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः॥३७॥ चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः। सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम्॥३८॥

॥ सङ्ग्रहोक्तिः॥

यन्मन इन्द्रियाणां नियन्तारं शारदेन्दीवरश्यामं योगिभिः शनैराराध्यमनिरुद्धाख्यं वदन्ति॥२९॥ विकुर्वाणाद् राजसाहंकाराद् इन्द्रियाणामनुग्राहकं बुद्धितत्त्वमभूत्, यद् द्रव्यस्फुरणविज्ञानरूपमस्ति॥३०॥ संशयः, विपर्यः, निश्चयः, स्मतिः, निद्रा च वृत्तितो यतो जायते सा बुद्धिः॥३१॥ क्रियाज्ञानरूपविभागद्वयेन तैजसानि इन्द्रियाणि सन्ति, प्राणस्य क्रियाशक्तिः कर्मेन्द्रियेषु, बुद्धेः ज्ञानशक्तिः ज्ञानेन्द्रियेषु उपकारिका भवति॥३२॥ भगवत् संकल्पप्रेरितात् विकुर्वाणात् तामसाहंकारात् शब्दतन्मात्रमभूत्, तस्मात् नभ अभूत्, श्रोत्रेन्द्रियं शब्दं गच्छति॥३३॥ अर्थाश्रयत्वं द्रष्टुर्लिङ्गत्वं नभसस्तन्मात्रत्वं चेति शब्दस्य लक्षणम्॥३४॥ भूतानां छिद्रदातृत्वं अन्तर्बहिर्व्यवहारदातृत्वं प्राणेन्द्रियादीनां स्थानत्वम् आकाशस्य लक्षणम्॥३५॥ कालगत्या विकुर्वाणात् शब्दगुणकाद् आकाशात् स्पर्शतन्मात्रमभूत्, तस्माद् वायुरभूत्, त्वगिन्द्रियं स्पर्शग्राहकमस्ति॥३६॥ मृदुत्वं कठिनत्वं शैत्यम् औष्ण्यम् वायोस्तन्मात्रत्वम् चैतत् स्पर्शस्य लक्षणम्॥३७॥ वृक्षादेश्चालनं व्यूहनं संयोजकत्वं द्रव्यशब्दयोर्नेतृत्वं सर्वेन्द्रियाणामात्मत्वं

वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत्। समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनम्।।३९।। द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च। तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः।।४०।। द्योतनं पचनं पानमदनं हिममर्दनम्। तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च।।४१।। रूपमात्राद्विकुर्वाणात्तेजसो दैवनोदितात्। रसमात्रामभूत्तस्मादम्भो जिह्वा रसग्रहः।।४२।। कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा। भौतिकानां विकारेण रस एको विभिद्यते।।४३।। क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनौदनम्। तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः।।४४।। रसमात्राद्विकुर्वाणादम्भसोदैवनोदितात्। गन्धमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गन्धगः।।४५।। करम्भपूतिसौरभ्यशान्तोग्राम्लादिभिः पृथक्। द्रव्यावयववैषम्याद्गन्ध एको विभिद्यते।।४६।। भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम्। सर्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम्।।४७।। नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते।

।। सङ्ग्रहोक्तिः ।।

चेति वायोर्लक्षणम्।।३८।। भगवत्प्रेरितात् स्पर्शतन्मात्राद् वायोः रूपतन्मात्रमभूत्, तस्मात् तेजो जातम्, चक्षुरिन्द्रियं रूपग्राहकं भवति।।३९।। द्रव्याकृतित्वं द्रव्यगुणत्वं व्यक्तिसंस्थात्वं तेजसस्तन्मात्रत्वं चेति रूपलक्षणम्।।४०।। प्रकाशनं, पचनं, क्षुत्तृडिच्छाकरणं, शोषणं, हिमनिवारणं, इत्यादीनि तेजोलक्षणानि सन्ति।।४१।। भगवत्प्रेरितात् विकुर्वाणात् रूपतन्मात्रात् तेजसो रसतन्मात्रमभूत्, तस्माद् जलमभूत्, रसनेन्द्रियं जिह्वा रसग्राहकं भवति।।४२।। मधुराम्ललवणकटुकषायतिक्तभेदेन रसो भौतिकानां विकारेण नैकधा विभिद्यते।।४३।। क्लेदनं पिण्डीकरणं तृप्तिकरणं प्राणनं आप्यायनं मृदुकरणं तापनिवारणं भूयस्त्वम् इत्येवमादीनि जलस्य लक्षणानि सन्ति।।४४।। भगवत्प्रेरिताद् विकुर्वाणाद् रसतन्मात्राद् अम्भसः गन्धतन्मात्रमभूत्, तस्माद् पृथ्वी जाता, गन्धग्राहकमिन्द्रियं घ्राणमस्ति।।४५।। एको गन्धः द्रव्यावयववैषम्यात् मिश्र-दुर्गन्ध-सौरभ्य-शान्त-उग्र-अम्लादिभेदाद् विभिन्नप्रकारो वर्तते।।४६।। भगवतो प्रतिमादिरूपेण साकारतापादनं, स्थानं, धारणं, आकाशादीनां विभागकरणं, सर्वसत्वानां गुणानामुद्भेदनं इत्यादीनि पृथिव्याः लक्षणानि सन्ति।।४७।।

वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः।।४८।। तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते। अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः। भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते।।४९।। परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात्। अतो विशेषो भावानां भूमावेवोपलक्ष्यते।।५०।। एतान्यसंहत्य यदा महदादीनि सप्त वै। कालकर्मगुणोपेतो जगदादिरुपाविशत्।।५१।। ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डम-चेतनम्। उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ।।५२।। एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः। तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः। यत्र लोकवितानोऽयं रूपं भगवतो हरेः।।५३।। हिरण्मयादण्डकोशादुत्थाय सलिलेशयात्। तमाविश्य महादेवो बहुधा निर्बिभेद खम्।।५४।। निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत्। वाण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः।।५५।। घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः। तस्मात्सूर्योऽन्वभिद्येतां कर्णौ श्रोत्रं ततो दिशः।।५६।।

।। सङ्ग्रहोक्तिः।।

आकाशस्य गुणः शब्दः, तस्य ग्राहकमिन्द्रियं श्रोत्रमुच्यते, वायोर्गुणः स्पर्शः, तस्य ग्राहकमिन्द्रियं त्वगुच्यते।।४८।। तेजसोगुणो रूपम्, तस्य ग्राहकमिन्द्रियं चक्षुरुच्यते, अम्भसो गुणो रसः, तस्य ग्राहकमिन्द्रियं जिह्वा उच्यते, भूमेर्गुणो गन्धः, तस्य ग्राहकमिन्द्रियं घ्राणमित्युच्यते।।४९।। परस्य कारणस्य आकाशादेर्गुणोऽपरस्मिन् वाय्वादिषु समन्वयाद् दृश्यते, अतो भावानामा-काशादीनां विशेषगुणाः भूमावेव दृश्यते।।५०।। एतानि महदादीनि सप्त तत्त्वानि यदाऽसंहत्य स्थितानि तदा कालः, कर्म, गुणः, एतैरुपेतो जगदीश्वर तेषु सप्तसु प्रविवेश।।५१।। ईश्वरानु-प्रवेशेन संहतेभ्य तेभ्यस्तत्त्वेभ्य अचेतनमण्डमुत्पन्नमभूत्, यस्माद् असौ विराट्पुरुषः समष्ट्यात्मकः समभवत्।।५२।। विशेषाख्यं तदण्डं प्रकृत्या आवृतैः दशदशगुणाधिकैस्तोया-दिभिः परिवृतमभूत्, यस्मिन्नण्डेऽयं लोकविस्तारो भवति, तद् भगवतः शरीरमस्ति।।५३।। सलिले शयात् हिरण्मयाद् अण्डकोशात् उत्थाय भगवान् श्रीहरिस्तं विराट्पुरुषमाविश्य मुखादीन्द्रियस्थानं बहुधा निर्बिभेद।।५४।। अस्य विराजः प्रथमं मुखं निरभिद्यत, ततः वाणी जाता, वाण्या सह तद् देवताऽग्निरभवत्, ततो विराजो नासे निरभिद्येताम्, नासाबिलयोः

निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः। तत ओषधयश्चासन् शिश्नंनिर्बिभिदे
ततः।।५७।। रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम्। गुदादपानोऽपानाच्च
मृत्युर्लोकभयङ्करः।।५८।। हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट्। पादौ
च निरभिद्येतां गतिस्ताभ्यां ततो हरिः।।५९।। नाड्योऽस्य निरभिद्यन्त ताभ्यो
लोहितमाभृतम्। नद्यस्ततः समभवन्नुदरं निरभिद्यत।।६०।। क्षुत्पिपासे ततः स्यातां
समुद्रस्त्वेतयोरभूत्। अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम्।।६१।। मनसश्चन्द्रमा
जातो बुद्धिर्बुद्धेर्गिरां पतिः। अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत्।।६२।।
एते ह्यभ्युत्थिता देवा न चास्योत्थापनेऽशकन्। पुनराविविशुः खानि तमुत्थापयितुं
क्रमात्।।६३।। वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट्।

।। सङ्ग्रहोक्तिः ।।

प्राणो जातः, तेन सह घ्राणेन्द्रियमभवत्।।५५।। घ्राणात् वायुरभूत्, ततोऽक्षिणी निरभिद्येताम्,
एतयोश्चक्षुरिन्द्रियमभवत्, तस्मात् सूर्योऽधिष्ठाताऽभवत्, अथाकर्णावधिष्ठानेऽन्वभिद्येताम्,
तयोः श्रोत्रमिन्द्रियमभूत्, ततः दिग्देवता जाता।।५६।। ततः त्वग् निर्बिभिदे, ततो रोमश्मश्रु
आदयः जाताः, तत ओषधयश्चासन्, ततः शिश्नं निर्बिभिदे।।५७।। तस्मात् रेत आसीत्
तस्माद् आप आसन्, ततोऽस्य गुदं निरभिद्यत, गुदाद् अपानः, अपानाच्च लोकभयंकरो
मृत्युरासीत्।।५८।। किंच अस्य करौ निरभिद्येताम्, ताभ्यां बलमभूत्, ततः स्वराट् इन्द्रो
देवताऽभवत्, किंचास्य पादौ निरभिद्येताम, ताभ्यां गतिरभवत्, ततो विष्णुः देवताऽभवत्
।।५९।। अस्य नाड्यो निरभिद्यन्त, ताभ्यो लोहितमाभृतम्, ततो नद्यो देवता स्थानीया
समभवन्, तत उदरमधिष्ठानं निरभिद्यत।।६०।। ततः क्षुत्पिपास इन्द्रियस्थानीयेऽभूताम्,
एतयोः समुद्रोऽधिदेवता अभूत्, अस्याधिष्ठानं हृदयं जातम्, हृदयात् मनो जातम्।।६१।।
मनसोऽधिदेवता चन्द्रमा जातः, ततो बुद्धिर्जाता, बुद्धे र्दैवता ब्रह्मा जातः, अथाहंकारो जातः
ततस्तदधिदेवता रुद्रो जातः, अथ चित्तं जातम्, ततश्चैत्यः क्षेत्रज्ञोऽभवत्।।६२।। विराज-
मुत्थापयितुमुद्युक्ताः एते देवा विराज उत्थापने नैवाऽशकन्, तदा तमुत्थापयितुं पुनः क्रमशः
पूर्वोक्तानि खानि आविविशुः।।६३।। वह्निः देवता वागिन्द्रियेण सह मुखमाविशत् तदापि अ...

घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट्।।६४।। अक्षिणी चक्षुषाऽदित्यो नोदतिष्ठत्तदा विराट्। श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट्।।६५।। त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट्। रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट्।।६६।। गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट्। हस्ताविन्द्रो बलेनैव नोदतिष्ठत्तदा विराट्।।६७।। विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट्। नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट्।।६८।। क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्तदा विराट्। हृदयं मनसा चन्द्रो नोदतिष्ठत्तदा विराट्।।६९।। बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट्। रुद्रोभिमत्या हृदयं नोदतिष्ठत्तदा विराट्।।७०।। चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा। विराट् तदैव पुरुषः सलिलादुदतिष्ठत।।७१।। यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः। प्रभवन्ति विना येन नोत्थापयितु मोजसा।।७२।।

।। सङ्ग्रहोक्तिः।।

विराट् नोदतिष्ठत्, वायुः प्राणेन नासिके आविशत् तदा विराट् नोदतिष्ठत्।।६४।।आदित्यश्चक्षुषा सहाविशत् तदा विराट् नोदतिष्ठत्, दिशः श्रोत्रेणेन्द्रियेण कर्णौ अधिष्ठानं भेजिरे, तदा विराट् नोदतिष्ठत्।।६५।। ओषधयो रोमभिः त्वचं भेजिरे, तदा विराट् नोदतिष्ठत्, आपो रेतसा शिश्नं भेजिरे तदा विराट् नोदतिष्ठत्।।६६।। मृत्युरपानेन गुदं प्रविष्टः, तदा विराट् नोदतिष्ठत्, इन्द्रो बलेनैव हस्तौ प्रविष्टः, तदा विराट् नोदतिष्ठत् ।।६७।। विष्णुर्गत्या एव चरणौ विवेश, तदा विराट् नोदतिष्ठत्, नद्यो लोहितेन नाडीः भेजिरे तदा विराट् नोदतिष्ठत् ।।६८।। सिन्धुः क्षुतृड्भ्यामुदरं प्रविष्टः, तदा विराट् नोदतिष्ठत्, चन्द्रो मनसा हृदयं विवेश, तदा विराट् नोदतिष्ठत्।।६९।। ब्रह्माऽपि बुद्ध्या हृदयं प्रविवेश, तदा विराट् नोदतिष्ठत्, रुद्रोऽभिमत्या हृदयं विवेश, तदा विराट् नोदतिष्ठत्।।७०।। चित्यः क्षेत्रज्ञो वासुदेवः चित्तेनेन्द्रियेण हृदयमधिष्ठानं यदा प्राविशत् तदैव विराट् पुरुषः सलिलादुदतिष्ठत् ।।७१।। प्राणः इन्द्रियाणि मनो धीश्च एते सुप्तं पुरुषं जीवात्मानं येन क्षत्रज्ञेन विना = यदिच्छामन्तरेण यथा ओजसा बलेन च उत्थापयितुं समर्था न भवन्ति तथा देवा अपीन्द्रियैः सह प्रविश्यापि क्षेत्रज्ञप्रवेशं विना समर्था नैवाऽभवन्।।७२।।

तमस्मिन् प्रत्यगात्मानं धिया योगप्रवृत्तया। भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत् ।।७३।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे षड्विंशोऽध्यायः ।।२६।।

अथ सप्तविंशोऽध्यायः ।।२७।।

कपिल उवाच - प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः। अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ।।१।। स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते। अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ।।२।। तेन संसारपदवीमवशोऽभ्येत्यनिर्वृतः। प्रासङ्गिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ।।३।। अर्थेह्यविद्यमानेऽपि संसृतिर्न निवर्तते। ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ।।४।।

।। सङ्ग्रहोक्तिः ।।

तं वासुदेवं योगेन प्रवृत्तया धियाऽस्मिन् देहे जीवात् पृथक्कृत्य भक्त्या विरक्त्या ज्ञानेन च मनसि चिन्तयेत् ।।७३।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां षड्विंशोऽध्यायः ।।२६।।

। सङ्ग्रहोक्तिः ।।

अथ सप्तविंशोऽध्यायः ।।२७।।

प्रकृतिपुरुषस्वरूपविवेकेन मोक्षप्राप्तिविवेचनम्

कपिल उवाच - पुरुषः प्रत्यगात्मा जीवो प्रकृतिपरिणामरूपशरीरस्थोऽपि तस्य अविकारत्वात्, अकर्तृत्वात् निर्गुणत्वाच्च हेतोः प्राकृतैर्धर्मैः स न लीप्यते ।।१।। एष जीवः प्रकृतिविलक्षणोऽपि प्रकृतेर्गुणेषु शब्दादिविषयेषु यदा विषज्जते तदाऽहङ्कारविमूढात्मा स "अहं कर्ताऽस्मि" इति अभिमन्यते ।।२।। तेनाभिमानेन कर्मपरतन्त्रः स सुखमलभमान सन् संसर्गजैः कर्मदोषैः उत्तमाधममध्यमरूपासु देवतिर्यङ्नरादिषु योनिषु संसारमभ्येति ।।३।। देवाद्याकारेऽविद्यमानेऽपि शब्दादीन् विषयान् चिन्तयतः तस्य संसृतिर्न निवर्तते ।।४।।

अत एव शनैश्चित्तं प्रसक्तमसतां पथि। भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशम्॥५॥ यमादिभिर्योगपथैरभ्यसन् श्रद्धयान्वितः। मयि भावेन सत्येन मत्कथाश्रवणेन च ॥६॥ सर्वभूतसमत्वेन निर्वैरेणाऽप्रसङ्गतः। ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ॥७॥ यदृच्छयोपलब्धेन सन्तुष्टो मितभुङ् मुनिः। विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्॥८॥ सानुबन्धे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम्। ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च॥९॥ निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः। उपलभ्यात्मनाऽऽत्मानं चक्षुषेवार्कमात्मदृक्॥१०॥ मुक्तलिङ्गं सदाभासमसति प्रतिपद्युतम्। सतो बन्धुमसच्चक्षुः सर्वानुस्यूतमद्वयम्॥११॥ यथा जलस्थ आभासः स्थलस्थेनावदृश्यते। स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः॥१२॥ एवं त्रिवृदहङ्कारो भूतेन्द्रियमनोमयैः। स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक्॥१३॥ भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया। लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः॥१४॥

॥ सङ्ग्रहोक्तिः॥

अत एवाऽसद्रूपाणामिन्द्रियाणां मार्गे शब्दादिविषयेषु आसक्तं चित्तं तीव्रेण भक्तियोगेन वैराग्येण च वशं नयेत्॥५॥ श्रद्धया युक्तो मुमुक्षुः योगसाधनैर्यमादिभिरभ्यसन् मयि चानन्यभावेन मत्कथाश्रवणेन च मनो वशं नयेत्॥६॥ सर्वभूतेषु समभावेन निर्वैरेण मौनेन ब्रह्मचर्येण स्वधर्माचरणेन दैवोपलब्धेन च सन्तुष्टो भवेत्, एकान्तप्रियः, शान्तः, सकरुण आत्मनिष्ठश्च भवेत्॥७-८॥ स्त्रीपुत्रादिसहितेऽस्मिन् देहे अहंममता चाऽकुर्वन् प्रकृतेः पुरुषस्य च दृष्टतत्त्वेन ज्ञानेन युक्तो भवेत्॥९॥ देहत्रयं जीवसत्तातः पृथक् पश्यन्, योगी चक्षुषा सूर्यमिव शुद्धान्तःकरणस्थेनात्मना शुद्धस्वरूपमात्मानं चिन्तयेत्॥१०॥ आत्मदर्शी योगी देहत्रयोपाधिरहितं देहाद्यहंकारे सद्रूपेण भासमानं सदसद्विवेकबुद्धिमन्तं सर्वानुस्यूतमविनाशिनं शुद्धं जीवं यमादिसाधनैः प्रतिपद्यते॥११॥ गृहकोणस्थजनैर्भित्यादौ स्थितेन सूर्यप्रतिबिम्बेन यथा प्रथमं जलस्थसूर्यप्रतिबिम्बावलोकनं क्रियते, ततस्तेनैव चाकाशस्थः सूर्यो लक्ष्यते॥१२॥ तथैव देहेन्द्रियमनोभिरवच्छिन्नैरात्मबिम्बैस्त्रिगुणोऽहङ्कारो लक्षितो भवति. तेन प्रतिबिम्बयुक्ताहंकारेण परमार्थज्ञानरूप आत्मा लक्ष्यते॥१३॥ भूतसूक्ष्मेन्द्रियादिषु निद्रया यदाऽज्ञाने लीनेषु सत्सु

मन्यमानस्तदाऽऽत्मानमनष्टो नष्टवन्मृषा। नष्टेऽहङ्करणे द्रष्टा नष्टवित्त इवातुरः
।।१५।। एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते। साहङ्कारस्य द्रव्यस्य योऽवस्था-
नमनुग्रहः।।१६।। *देवहूतिरुवाच* - पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति कर्हिचित्।
अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो।।१७।। यथा गन्धस्य भूमेश्च न भावो
व्यतिरेकतः। अपां रसस्य च यथा तथा बुद्धेः परस्य च।।१८।। अकर्तुः कर्मबन्धोऽयं
पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम् ।।१९।। क्वचित्
तत्त्वावमर्शेन निवृत्तं भयमुल्बणम्। अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते।।२०।।
श्रीभगवानुवाच - अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना। तीव्रया मयि भक्त्या च
श्रुतसम्भृतया चिरम्।।२१।। ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा। तपोयुक्तेन
योगेन तीव्रेणात्मसमाधिना।।२२।।

।। सङ्ग्रहोक्तिः ।।

अपि यो निरहंकार आत्मा निद्रारहितः सन् जागर्ति।।१४।। द्रष्टा स्वयमात्मा यदा
सुषुप्त्यादावहंकारस्य लये जाते, अहङ्कारे नष्टे आत्मानमपि नष्टवत् मन्यमान आतुरो
जायते।।१५।। एवं विमृश्य प्रकृतिविविक्तस्वरूपजिज्ञासुर्योगी शुद्धं प्रत्यगात्मानं प्रतिपद्यते,
ततो देहेन्द्रियादिसंघातस्याश्रयभूतो भवति।।१६।। *देवहूतिरुवाच* - हे ब्रह्मन्! जीवं प्रकृतिः
कर्हिचिदपि न मुञ्चति, अनयोरुभयोः नित्यत्वात् इतरेतरोपकारित्वाच्च जीवस्य प्रकृतेः
पृथगवस्थानं न सम्भवति।।१७।। यथा गन्धस्य भूमेश्च पृथगवस्थानं यथा वा अपां रसस्य च
पृथगवस्थानं न संभवति तथा प्रकृतेः आत्मनश्च पृथग्भावो न संभवति।।१८।। स्वतोऽकर्तुः
जीवस्य कर्मबन्धनं प्रकृतिगुणाश्रयमेव वर्तते, अतः तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य=जीवस्य
कैवल्यं कथं स्यात्।।१९।। संसाररूपा भीतिः क्वचित् तत्त्वावमर्शेन निवृत्ता स्यादपि, तथापि
प्रकृतिसंबन्धस्याऽनिवृत्तत्वात् पुनरपि संसाररूपा भीतिः स्यादेव।।२०।। *श्रीभगवानुवाच* -
फलाभिसंधिरहितेन धर्मेण, विशुद्धमनसा, मत्कथाश्रवणेन संजातया तीव्रया मद्भक्त्या च
प्रकृतिरात्मानं विमुञ्चति।।२१।। दृष्टतत्त्वेन ज्ञानेन, बलीयसा वैराग्येण, तपोयुक्तेन योगेन
तीव्रेण आत्मसमाधिना च इह लोके रात्रिंदिवं दह्यमाना प्रकृतिः शनकैर्निःशेषा भवति,

प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम्। तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ।।२३।। भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः। नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च।।२४।। यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत्। स एव प्रतिबुद्धस्य न वै मोहाय कल्पते।।२५।। एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसम्। युञ्जतो नापकुरुत आत्मारामस्य कर्हिचित्।।२६।। यदैवमध्यात्मरतः कालेन बहुजन्मना। सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः।।२७।। मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा। निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम्।।२८।। प्राप्नोतीहाञ्जसा धीरः स्वदृशा छिन्नसंशयः। यद्गत्वा न निवर्तेत योगी लिङ्गाद्विनिर्गमे।।२९।। यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग। अनन्यहेतुष्वथ मे गतिः स्याद् आत्यन्तिकी यत्र न मृत्युहासः।।३०।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे सप्तविंशोऽध्यायः।।२७।।

।। सङ्ग्रहोक्तिः ।।

यथाऽग्नेर्योनिररणिः अग्निनैव दह्यते तथा ससाधनभक्त्युद्भवहेतुभूता प्रकृतिरपि तया दह्यते ।।२२-२३।। भुक्तभोगा नित्यं दृष्टदोषा परित्यक्ता प्रकृतिः अकर्मवश्यस्य स्वमहिम्नि स्थितस्याऽऽत्मनः संसारं न संपादयति।।२४।। निद्रितस्य स्वप्नः बह्वनर्थकृत् जायते, किंतु स एव स्वप्नो जाग्रतोऽनर्थाय न भवति।।२५।। एवं विदिततत्त्वस्य मयि मानसं युञ्जत आत्मारामस्य कर्हिचिदपि प्रकृतिर्बन्धं न करोति।।२६।। मुनिर्यदाऽध्यात्मरतः, बहुजन्मना कालेन विदितात्मतत्त्व आब्रह्मभुवनात् सर्वत्र जातवैराग्यः मद्भक्तः भूयसा मदनुग्रहेण निःश्रेयसं कैवल्याख्यं मद्धाम देहे विद्यमानेऽपि प्राप्नोति, ततः स्वदृशा छिन्नसंशयः धीरो योगी प्रारब्धावसाने यत्स्थानं प्राप्यापि न पुनरावर्त्तेत।।२७-२९।। हे अम्ब! योगेन समृद्धास्वनन्यहेतुष्वणिमादिषु सिद्धिषु योगिनश्चेतो न विषज्जते तदाऽऽत्यन्तिकी गतिः= मत्संबन्धिनी प्राप्तिर्भवति।।३०।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां सप्तविंशोऽध्यायः।।२७।।

अथाष्टाविंशोऽध्यायः ।। २८।।

श्रीभगवानुवाच - योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे। मनो येनैव विधिना प्रसन्नं याति सत्पथम् ।।१।। स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम्। दैवाल्लब्धेन सन्तोष आत्मविच्चरणार्चनम् ।।२ ।। ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा। मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ।।३।। अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः। ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ।।४।। मौनं सदाऽऽसनजयस्थैर्यं प्राणजयः शनैः। प्रत्याहारश्चेन्द्रियाणां विषयान् मनसा हृदि ।।५।। स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम्। वैकुण्ठलीलाभिध्यानं समाधानं तथाऽऽत्मनः ।।६।। एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम्। बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ।।७।। शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्। तस्मिन् स्वस्तिक आसीन ऋजुकायः समभ्यसेत् ।।८।। प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः। प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलम् ।।९।।

।। सङ्ग्रहोक्तिः ।।

अथ अष्टाविंशोऽध्यायः ।।२८।।

सबीजयोगः साङ्गोपाङ्गसावयवभगवत्स्वरूपध्यानं च

श्रीकपिल उवाच - हे मनुपुत्रि! सबीजस्य योगस्य लक्षणं वक्ष्ये, विहितेन येन योगेन मनः प्रसन्नं सत् शुभाश्रयं याति ।।१।। यथाशक्ति स्वधर्माचरणं, विधर्मान्निवृत्तिः दैवाल्लब्धेन सन्तोषः, आत्मतत्त्वज्ञस्य चरणार्चनं, काम्यधर्मनिवृत्तिः, मोक्षधर्मेषु रतिः, शुद्धस्वल्पाहारः एकान्तक्षेमकुशलवासः ।।२-३।। अहिंसा, सत्यम्, अस्तेयं, प्रयोजनानुसारेण वस्तुसंग्रहः ब्रह्मचर्य-तपः-शौच-स्वाध्याय-हरिपूजनानि ।।४।। मौनं सदा जितासनतास्थैर्यं, प्राणायाम इन्द्रियाणां विषयेभ्यः समाकर्षणम् ।।५।। मूलाधारादिषट्चक्राणामन्यतमे कस्मिंश्चित् मनःप्राणयोर्धारणम्, हरे र्लीलाचिन्तनं ।।६।। एतैरुपायैः सदोषं कुमार्गगं मनो बुद्ध्या अतन्द्रितः सन् शनैः शुभाश्रयप्रवणं कुर्यात् ।।७।। जितासनः शुचौ देशे शुद्धमास्तरणं प्रतिष्ठाप्य, तस्मिन् आसने ऋजुकायः स्वस्तिकासनेनाऽऽसीनः सन् प्राणं समभ्यसेत् ।।८।।

मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः। वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्।।१०।। प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्। प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान् गुणान्।।११।। यदा मनः स्वं विरजं योगेन सुसमाहितम्। काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः।।१२।। प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्। नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम्।।१३।। लसत्पङ्कजकिञ्जल्कपीतकौशयवाससम्। श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम्।।१४।। मत्तद्विरेफकलया परीतं वनमालया। परार्घ्यहारवलयकिरीटाङ्गदनूपुरम्।।१५।। काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम्। दर्शनीयतमं शान्तं मनोनयनवर्धनम्।।१६।। अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतम्। सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम्।।१७।। कीर्त्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम्। ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः।।१८।। स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम्। प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा।।१९।। तस्मिँल्लब्धपदं चित्तं सर्वावयवसंस्थितम्। विलक्ष्यैकत्र संयुज्यादङ्गे भगवतो मुनिः।।२०।।

।। सङ्ग्रहोक्तिः।।

प्रतिकूलेन वा रेचकपूरक-कुम्भकैर्वा यथा चित्तं स्थिरं सत् चञ्चलं न स्यात् तथा प्राणमार्गं शोधयेत्।।९।। वाय्वाग्निभ्यां तप्तं सुवर्णादिकं यथा मलं त्यजति तथा जितप्राणस्य योगिनो मनः निर्मलं भवति।।१०।।प्राणायामैर्वातादिदेहदोषान् दहेत्, धारणाभिः पापानि दहेत्, प्रत्याहारेण विषयसंसर्गान् दहेत्, ध्यानेन क्लेशादीन् दहेत्।।११।। यदा प्राणायामादिना मनः शुद्धं स्यात् नासाग्रदृष्टिः सन् भगवन्मूर्तिं ध्यायेत्।।१२।।तद्यथा-प्रसन्नवदनाम्भोजं पद्मारुणलोचनं नीलोत्पलदलश्यामं शंखचक्रगदाधरं, पीतकौशेयवाससं, श्रीवत्सवक्षसं, कौस्तुभकण्ठं वनमाला-हार-वलय-किरीटांगद-नूपुरादिभूषितं।।१३-१५।। भक्तानां हृत्पद्मस्थितं शान्तं मनोनयनानन्दवर्द्धनं।।१६।। अतीव मनोहरं सर्वलोकनमस्कृतं किशोरवयसं भक्तानुग्रहतत्परं।।१७।। पवित्रकीर्त्तिं पुण्यश्लोकयशस्करं हरिं समग्राङ्गं ध्यायेत्, यावन्मनो न चलति।।१८।।स्थितं व्रजन्तं सिंहासन आसीनं शयानं वा भगवन्तं शुद्धभावेन चेतसा ध्यायेत्।।१९।।

सिञ्चिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम्।
उत्तुङ्गरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयान्धकारम्॥२१॥
यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्। ध्यातुर्मनः
शमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविन्दम्॥२२॥ जानुद्वयं जलज-
लोचनया जनन्या लक्ष्म्याखिलस्य सुरवन्दितया विधातुः। ऊर्वोर्निधाय करपल्लव-
रोचिषा यत् संलालितं हृदि विभोरभवस्य कुर्यात्॥२३॥ ऊरू सुपर्णभुजयोरधि-
शोभमानावोजोनिधी अतसिकाकुसुमावभासौ। व्यालम्बिपीतवरवाससि वर्तमान-
काञ्चीकलापपरिरम्भि नितम्बबिम्बम्॥२४॥ नाभिह्रदं भुवनकोशगुहोदरस्थं
यत्रात्मयोनिधिषणाखिललोकपद्मम्। व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद् द्वयं
विशदहारमयूखगौरम्॥२५॥ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयन-
निर्वृतमादधानम्। कण्ठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोक-
नमस्कृतस्य॥२६॥ बाहूंश्च मन्दरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोक-
पालान्। सञ्चिन्तयेद्दशशतारमसह्यतेजः शङ्खं च तत्करसरोरुहराजहंसम्॥२७॥

॥ सङ्ग्रहोक्तिः ॥

भगवतः सर्वावयवेषु स्थिरं चित्तं लक्ष्यीकृत्य मुनिस्तदेकस्मिन्नङ्गे संयोजयेत्॥२०॥ तत्रादौ पादादारभ्य ध्यानं यथा-ध्वज-यव-वज्र-सरोरुहादिभिश्चिह्नैर्युक्तं भगवतश्चरणकमलं ध्यायेत्॥२१॥ ध्यातुः पापपर्वतविनाशने वज्रसमं चरणपद्मं वर्तते यत्पादोदकरूपिणीं गङ्गां शिरसि धृत्वा शंकरोऽपि सुखी बभूव॥२२॥ पद्मलोचनया जगज्जनन्या सुरवन्दितया लक्ष्म्या लालितं हरेर्जानुद्वयं हृदि ध्यायेत्॥२३॥ औज्ज्वलनिधी अतसिगुच्छसमभासमानौ गरुडस्कन्धे विराजमानावूरू ध्यायेत् काञ्चीकलापपरिरम्भि पीताम्बरेण विभूष्यमाणं कटिदेशं ध्यायेत्॥२४॥ यत्र ब्रह्मजन्मस्थानभूतं पद्मं जातं तन्नाभिह्रदं ध्यायेत्, विशदहारमयूखगौरं मरकतमणिवि... स्तनद्वयं च चिन्तयेत्॥२५॥ लक्ष्म्या निवासस्थानं ध्यातृमनोनयनाभिरामं भगवतो वक्षः ध्यायेत्, अखिललोकनमस्कृतस्य प्रभोः कौस्तुभशोभितं कण्ठं च ध्यायेत्॥२६॥ मन्दरगिरेः परिवर्तनेनोज्ज्वलबलयुतान् बाहून् सहस्रारं चक्रं करसरोरुहराजहंसं शंखं च चिन्तयेत्॥२७॥

कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन। मालां मधुव्रत-
वरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे ।।२८।। भृत्यानुकम्पितधियेह
गृहीतमूर्तेः सञ्चिन्तयेद्भगवतो वदनारविन्दम्। यद्विस्फुरन्मकरकुण्डलवल्गितेन
विद्योतितामलकपोलमुदारनासम् ।।२९।। यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या
स्वया कुटिलकुन्तलवृन्दजुष्टम्। मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन् मनोमयम-
तन्द्रित उल्लसद्भ्रु ।।३०।। तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय
निसृष्टमक्ष्णोः। स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विततभावनया
गुहायाम् ।।३१।। हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम्।
सम्मोहनाय रचितं निजमाययास्य भ्रूमण्डलं मुनिकृते मकरध्वजस्य ।।३२।।
ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुन्दपङ्क्ति। ध्यायेत्स्वदेह-
कुहरेऽवसितस्य विष्णोर्भक्त्याऽऽर्द्रयार्पितमना न पृथग्दिदृक्षेत् ।।३३।। एवं हरौ
भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्। औत्कण्ठ्यबाष्प-
कलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ।।३४।।

।। सङ्ग्रहोक्तिः ।।

शत्रुशोणितकर्दमव्याप्तां हरेः प्रियां कौमोदकीं गदां, कौस्तुभं मणिमपि चिन्तयेत् ।।२८।। भक्तानुग्रहगृहीतमूर्तेः चलन्मकरकुण्डलमण्डितं विद्योतितामलकपोलं सुनासं रुचिराननाम्बुजं च ध्यायेत् ।।२९।। श्रीनिकेतं कुटिलकुन्तललुलितं नेत्रकमलद्वयं उल्लसद्भ्रुवौ चाऽतन्द्रितः सन् चिन्तयेत् ।।३०।। जीवानामतिघोरतापत्रयोपशमनाय नेत्राभ्यां प्रयुक्तं स्निग्धस्मितानुगुणितं विपुलप्रसादं भगवतः कृपापूर्णमवलोकनं हृदये भावसहितं चिरं ध्यायेत् ।।३१।। अखिलभक्त-शोकाश्रुसागरविशोषणमुदारं हासं, मुनीन् मोहयितुं प्रवृत्तस्य मकरध्वजस्य संमोहनाय रचितं भ्रूमण्डलं च ध्यायेत् ।।३२।। अरुणाधरोष्ठमध्यकुन्दसमविशदद्विजपंक्तिं, हरेरच्चैर्हसितं स्वहृदये ध्यातस्य विष्णोर्भक्त्या तदर्पितमनाः सन् ध्यायेत्, तद्व्यतिरिक्तं किमपि न दिदृक्षेत् ।।३३।। एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय औत्कण्ठ्यबाष्पकलयाऽवरुद्धकण्ठो भक्तयोगी बडिशमिव भगवन्मूर्तीक्षणेऽवरोधकं चित्तमपि ध्येयाद् विमुक्तं कुर्यात् ।।३४।।

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः। आत्मानमत्र-
पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः।।३५।। सोऽप्येतया चरमया
मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये। हेतुत्वमप्यसति कर्तरि
दुःखयोर्यत् स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः।।३६।। देहं च तं न चरमः
स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत्स्वरूपम्। दैवादुपेतमथ दैववशादपेतं
वासो यथा परिकृतं मदिरामदान्धः।।३७।। देहोऽपि दैववशगः खलु कर्म यावत्
स्वारम्भकं प्रतिसमीक्षत एव सासुः। तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न
भजते प्रतिबुद्धवस्तुः।।३८।। यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते। अप्यात्म-
त्वेनाभिमताद्देहादेः पुरुषस्तथा।।३९।। यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापि
स्वसम्भवात्। अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुच्यते।।४०।। भूतेन्द्रियान्तः
करणात्प्रधानाज्जीवसंज्ञितात्। आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञितः।।४१।।

।। सङ्ग्रहोक्तिः ।।

यदा मनो निर्धूमदीपशिखेव निश्चलं विरक्तं निर्विषयं मुक्ताश्रयं च जायते तदा सहसा निर्वाणं गच्छति, एवंभूतः पुरुषोऽपगतदेहात्माभिमानः सन् परमात्मनि साक्षात् संबद्धमात्मानं शुद्धस्वरूपभाजं स्वमन्वीक्षते।।३५।।योगी चरमया मनसो निवृत्त्या भक्त्या परमात्मस्वरूपनिष्ठः सुखदुःखादिभावपरे महामहिम्नि वर्तमानः सन् सुखदुःखयोर्हेतुं देहात्माभिमानं पश्यति, नात्मानम्।।३६।। सिद्धदशां प्राप्तो योगी आनन्दरूपं भगवत्स्वरूपं प्राप्तवान्, तत-स्वदेहं स्थितमुत्थितं वा न पश्यति, यथा मदिरामदान्धः परिधृतं वस्त्रमपि न स्मरति तद्वत् स्वदेहादिकं किमपि न स्मरति।।३७।। अस्य योगिनो देहोऽपि दैववशगः यावत् स्वारम्भकं कर्म स्यात् तावत् सेन्द्रियः स्वकर्म प्रतिसमीक्षते, सम्प्राप्तसमाधियोगः-प्रतिबुद्धवस्तुर्योगी स्वाप्नमिव तं देहं पुनर्न भजते।।३८।।यथा पुत्रात् वित्ताच्च मर्त्यो भिन्न एव प्रतीयते तथाऽऽत्मत्वेनाऽभिमतात् देहादेरपि प्रत्यगात्मा पृथगेव।।३९।। यथा उल्मुकाद् विस्फुल्लिङ्गात् स्वसंभवाद् धूमाच्च वह्निः पृथगुच्यते तथा आत्मत्वेनाऽभिमतात् देहात् दैहिकाच्च प्रत्यगात्मा पृथगुच्यते।।४०।। भूतेन्द्रियान्तःकरणात् प्रधानात् तथा जीवसंज्ञकात् क्षेत्रज्ञाच्च अन्तःप्रविश्य तेषां धारको-

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। ईक्षेताऽनन्यभावेन भूतेष्विव तदात्मताम्
।।४२।। स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते। योनीनां गुणवैषम्यात्तथाऽऽत्मा
प्रकृतौ स्थितः।।४३।। तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम्। दुर्विभाव्यां
पराभाव्य स्वरूपेणावतिष्ठते।।४४।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे अष्टाविंशोऽध्यायः ।।२८।।

अथैकोनत्रिंशोऽध्यायः ।।२९।।

देहूतिरुवाच – लक्षणं महदादीनां प्रकृतेः पुरुषस्य च। स्वरूपं लक्ष्यतेऽमीषां येन
तत्पारमार्थिकम्।।१।। यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते। भक्तियोगस्य मे
मार्गं ब्रूहि विस्तरशः प्रभो।।२।।

।। सङ्ग्रहोक्तिः ।।

द्रष्टा षाड्गुण्यपूर्णः सर्वज्ञो ब्रह्मशब्दवाच्यः परमात्माऽपि तेभ्यो पृथगेव वर्तते।।४१।। सर्वभूतेषु अन्तःप्रविश्य धारकत्वेनाऽवस्थितं जीवात्मानं अणुत्वाद्याकारेण पश्येत्, आत्मनि च चतुर्विध-भूतानि पश्येत्, भूतेषु जीवेषु च परमात्मात्मकत्वं पश्येत्।।४२।। तृणदार्वादिषु एक एवाऽग्निर्गुण-वैशम्यात् यथा नाना प्रतीयते तथा देवादिशरीरे स्थितो जीवो देहभेदेन नाना प्रतीयते।।४३।। तस्माद् योगी दैवीं कार्यकारणरूपेणावस्थितां दुर्विभाव्यां प्रकृतिं पराभाव्य गुणाष्टकविशिष्ट-स्वरूपेणाऽवतिष्ठेत।।४४।।

इति श्रीमद्भागवते तृतीयस्कन्शे सङ्ग्रहोक्त्यामष्टादशोऽध्यायः।।२८।।

अथ एकोनत्रिंशोऽध्यायः ।।२९।।

भक्तियोगरहस्यं कालप्रभावश्च

देवहूतिरुवाच – हे भगवन्! मूलप्रकृतेः, महत्तत्त्वादीनां, प्रत्यगात्मनः, परमात्मनश्च इत्येतेषां स्वरूपं येन लक्ष्यते तल्लक्षणं तत्त्वया कथितं, यद् भक्त्याः मूलं कथ्यते, हे प्रभो! इदानीं तस्य भक्तियोगस्य मार्गं मह्यं यथावत् विस्तारतः ब्रूहि।।१-२।।

विरागो येन पुरुषो भगवन् सर्वतो भवेत्। आचक्ष्व जीवलोकस्य विविधा मम
संसृतीः।।३।। कालस्येश्वररूपस्य परेषां च परस्य ते। स्वरूपं बत कुर्वन्ति
यद्धेतोः कुशलं जनाः।।४।। लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य
तमस्यनाश्रये। श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः
।।५।। *मैत्रेय उवाच* - इति मातुर्वचः श्लक्ष्णं प्रतिनन्द्य महामुनिः। आबभाषे
कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः।।६।। *श्रीभगवानुवाच* - भक्तियोगो बहुविधो
मार्गैर्भामिनि भाव्यते। स्वभावगुणमार्गेण पुंसां भावो विभिद्यते।।७।। अभिसन्धाय
यद्धिंसां दम्भं मात्सर्यमेव वा। संरम्भी भिन्नदृग्भावं मयि कुर्यात्स तामसः।।८।।
विषयानभिसन्धाय यश ऐश्वर्यमेव वा। अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः।।९।।
कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्। यजेद्यष्टव्यमिति वा पृथग्भावः स
सात्त्विकः।।१०।। मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये। मनोगतिरविच्छिन्ना यथा
गङ्गाम्भसोऽम्बुधौ।।११।। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्। अहैतुक्य-
व्यवहिता या भक्तिः पुरुषोत्तमे।।१२।।

।। सङ्ग्रहोक्तिः ।।

हे भगवन्! यस्य ज्ञानेन पुमान् इहामूत्र सर्वत्र विरक्तो भवेत् ता जीवलोकस्य विविधा [illegible]
संसृतीः मामाचक्ष्व।।३।।ईश्वरशरीरकस्य त्वदात्मकस्य ब्रह्मादीनामपि परस्य कालस्य स्वरूपं [illegible]
वद, यस्य भयात् लोका सुकृतं कुर्वन्ति।।४।। मिथ्याभिमानिनोऽज्ञस्याऽविवेकवत्या धि[illegible]
श्रान्तस्य संसारे प्रसुप्तस्य लोकस्य बोधाय ज्ञानयोगादित्यस्त्वमाविर्भूतोऽसि।।५।। *मैत्रेय*
उवाच – हे विदुर! इत्थं मातुः सुन्दरं वचः प्रतिनन्द्य महामुनिः कपिलः प्रीतः सकरुणश्च स[illegible]
तां प्रत्याबभाषे।।६।। *श्रीभगवानुवाच* – हे भामिनि! पुंसां स्वभावानुसारेण प्रकारविशेषैर्भक्तियोग[illegible]
बहुप्रकारो प्रतीयते, स भक्तियोगः पुंसां मनोवृत्त्यनुसारं भिद्यते।।७।। हिंसां दम्भं मात्सर्यं [illegible]
संकल्प्य क्रोधयुक्तः सन्नेव मयि यो भक्तिं कुर्यात् स तामसः उक्तः।।८।। विषयान् यश ऐश्व[illegible]
चाऽभिसंधाय पृथग्भावः सन् यो मां प्रतिमादावर्चयेत् स पुमान् राजसः स्मृतः।।९।। पाप[illegible]
परमात्मसमर्पणं वा एतन्मम कर्त्तव्यमेव इत्यभिसंधाय पृथग्भावः सन् यो मां भजति स

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः।।१३।। स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ।।१४।। निषेवितेनानिमित्तेन स्वधर्मेण महीयसा। क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः।।१५।। मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः। भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च।।१६।। महतां बहुमानेन दीनानामनुकम्पया। मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च।।१७।। आध्यात्मिकानुश्रवणान्नामसङ्कीर्तनाच्च मे। आर्जवेनार्यसङ्गेन निरहंक्रियया तथा।।१८।। मद्धर्मिणो गुणैरेतैः परिसंशुद्ध आशयः। पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम्।।१९।। यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात्। एवं योगरतं चेत आत्मानमविकारि यत्।।२०।। अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा।

।। सङ्ग्रहोक्तिः ।।

सात्विकः।।१०।।हे मातः! सर्वान्तर्यामिणि मयि मदवतारचरित्रश्रवणेन गङ्गाजलस्य समुद्रे इव अविच्छिन्ना या मनोगतिः सा भक्तिर्ज्ञेया, सा च मयि पुरुषोत्तमे निष्कामा निरन्तराया च भवेद्यदि तर्हि तद् भक्तियोगस्य लक्षणं कथितम्।।११-१२।। निर्गुणभक्तिमन्तो जनाः मत्सेवनं विना मया दीनमानं सालोक्यं=मया सहैकस्मिन् लोके निवसनम्, सार्ष्टिः=समानैश्वर्यम्, सामीप्यं=निकटवर्तित्वम्, सारूप्यं=समानरूपताम्, एकत्वं=सायुजं=समानगुणाष्टकाविर्भावरूपम्, अपि न गृह्णन्ति।।१३।।येन भक्तियोगेन सत्त्वादिगुणत्रयमतिक्रम्य मत्साम्यापत्तये योग्यो भवति, स एव भक्तियोगः परमकाष्ठां गत उच्यते।।१४।। फलाभिसन्धिरहितेन बलवत्तरेण स्वधर्मेण, परपीडावर्जितेन शस्तेन क्रियायोगेन ।।१५।।मम प्रतिमादीनां दर्शन-स्पर्श-पूजा-स्तुति-प्रणामैः, भूतेषु मद्भावनया, वैराग्येण।।१६।। स्वाधिकानां बहुमानेन, दीनानामनुकम्पया, समानेषु मैत्र्या, यमेन, नियमेन ।।१७।।वेदान्तश्रवणेन, मम नामसंकीर्त्तनेन, आर्जवेन, स्वधर्मनिष्ठसत्संगेन, निरहंक्रियया च।।१८।।एतैर्गुणैस्तप्तमुद्रोर्ध्वपुण्ड्रादिमद्धर्मिणः पुरुषस्य निर्मलं चित्तं मामयत्नेनाऽभ्येति ।।१९।। यथा वातरथो गन्धः पुष्पादेः सकाशात् घ्राणेन्द्रियमयत्नेन प्राप्नोति तथा योगरथमविकारि चेत आत्मानं मामात्मसात् करोति।।२०।।

तमवज्ञाय मां मर्त्यः कुरुतेऽर्च्चाविडम्बनम् ॥२१॥ यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम्। हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः॥२२॥ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः। भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति॥२३॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे। नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः॥२४॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मदृक्। यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम्॥२५॥ आत्मनश्च परस्यापि यः करोत्यन्तरोदरम्। तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम्॥२६॥ अथ मां सर्वभूतेषु भूतात्मानं कृतालयम्। अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा॥२७॥ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे। ततः सचित्ता : प्रवरास्ततश्चेन्द्रियवृत्तयः॥२८॥ तत्रापि स्पर्शवेदिभ्यः प्रवराः रसवेदिनः। तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः॥२९॥ रूपभेदविदस्तत्र ततश्चोभयतो दतः। तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात्॥३०॥

॥ सङ्ग्रहोक्तिः ॥

भूतात्माऽहं सर्वेषु भूतेष्वन्तरात्मतयाऽवस्थितोऽस्मि, तं मामवज्ञाय मर्त्योऽर्चाविडम्बनं करोति ॥२१॥ सर्वेषु भूतेष्वन्तरात्मतयाऽवस्थितमीश्वरं मां त्यक्त्वा मूढतया मम प्रतिमापूजनं करोति, स भस्मन्येव जुहोति॥२२॥ देहाभिमानिन अत एव परकाये स्थितं मां द्विषतो भिन्नदर्शिनो मनः शांतिं न प्राप्नोति॥२३॥ अहमुत्कृष्टापकृष्टैर्द्रव्यैः पूजयाऽर्चितोऽपि भूतसमूहापमानकर्तुस्तुष्टो नैव भवामि॥२४॥ अत एव सर्वभूतस्थं मां यावत् स्वहृदि न वेद तावत् स्वधर्मनिष्ठः सन् मामर्चादौ पूजयेत्॥२५॥ यः स्वात्मनः परस्यात्मनश्च मध्ये भेदं मन्यते तादृशो भिन्नदृशः पुंसः कालशरीरकोऽहं संसारं विदधामि॥२६॥ अतः सर्वभूतेषु कृतनिवासं, तेषामन्तर्यामिणं मां दानमानाभ्यां, समदृष्ट्या, मैत्र्या च यथार्हं मानयेत्॥२७॥ अजीवेभ्यः सजीवाः श्रेष्ठाः तेभ्यः प्राणिनः श्रेष्ठाः, तेभ्यो ज्ञानवन्तः प्रवराः, तेभ्य इन्द्रियवृत्तयो वृक्षाः श्रेष्ठाः॥२८॥ तेभ्यः स्पर्शवेदिनः प्रवराः, तेभ्यो रसवेदिनः श्रेष्ठाः, तेभ्यो गन्धविदः श्रेष्ठाः, तेभ्यः शब्दविदः प्रवराः॥२९॥ तेभ्यो रूपभेदविदः प्रवराः, तेभ्य उभयतोदतः श्रेष्ठाः, तेभ्यो बहुपदाः श्रेष्ठाः तेभ्यश्चतुष्पादाः श्रेष्ठाः, ततो द्विपान्मनुष्यः श्रेष्ठः॥३०॥

ततो वर्णाश्च चत्वारस्तेषां ब्रह्मण उत्तमः। ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥३१॥ अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान् स्वकर्मकृत्। मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ॥३२॥ तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः। मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः। न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥३३॥ मनसैतानि भूतानि प्रणमेद् बहु मानयन्। ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥३४॥ भक्तियोगश्च योगश्च मया मानव्युदीरितः। ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥३५॥ एतद्भगवतो रूपं ब्रह्मणः परमात्मनः। परं प्रधानं पुरुषं दैवं कर्मविचेष्टितम् ॥३६॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते। भूतानां महदादीनां यतो भिन्नदृशां भयम् ॥३७॥ योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः। स विष्णवाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः ॥३८॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः। आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् ॥३९॥

॥ सङ्ग्रहोक्तिः ॥

तेषां मध्ये चत्वारो वर्णाः प्रवराः, तन्मध्ये ब्राह्मणः श्रेष्ठः, तेषु वेदज्ञः श्रेष्ठः, तेषु अर्थज्ञोऽधिकः ॥३१॥ अर्थज्ञादपि संशयच्छेत्ता, ततः स्वकर्मकृत्, ततः मुक्तसङ्गः श्रेष्ठः, यतः स आत्मनो धर्मं न दुह्यति अर्थात् निष्काम उच्यते ॥३२॥ निष्कामादपि यो मां स्वीयाः सर्वाः क्रियाः, तत्फलानि, स्वात्मानं च समर्पयति स ज्ञानी श्रेष्ठः, अतः मयि समर्पितात्मनः, संन्यस्तकर्मणः, अकर्तुः, समदर्शनाच्च परमुत्कृष्टं कमपि न पश्यामि ॥३३॥ परमात्मा जीवेषु अन्तर्यामितया प्रविष्टो वर्तते, एवं मनसा निश्चित्य चराचराणि भूतानि बहु मानयन् सन् प्रणमेत् ॥३४॥ हे मानवि! एवं साङ्गो भक्तियोगो ज्ञानयोगश्च मया कथितः, ययोरेकतरेण ब्रह्मप्रेप्सुः पुमान् परमपुरुषं प्राप्नुयात् ॥३५॥ प्रकृतेर्जीवाच्च परं दैवं वस्तुरूपभेदकरं दिव्यमेतद् भगवतो ब्रह्मणः परमात्मनो रूपं "कालः" इत्यभिधीयते, यतः कालात् भिन्नदृशां महदादिपर्यन्तानां भयं भवति ॥३६-३७॥ यः कालरूपी भगवान् अन्तः प्रविश्य भूतैरेव भूतान्यभिसंहरति, योऽसौ कालो विश्वाधार विष्णुनामा यज्ञात्मकः सर्वं वशीकुर्वतां ब्रह्मादीनामपि वशीकर्ता प्रभुरस्ति ॥३८॥ अस्य कालस्य कश्चिदपि दयितो द्वेष्यो वा बान्धवो न विद्यते, सावहितोऽयं

यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात्। यद्भयाद्वर्षते देवो भगणो भाति
यद्भयात् ।।४०।। यद्वनस्पतयो भीता लताश्चौषधिभिः सह। स्वे स्वे कालेऽभिगृह्णन्ति
पुष्पाणि च फलानि च ।।४१।। स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः। अग्निरिन्धे
सगिरिभिर्भूर्न मज्जति यद्भयात् ।।४२।। नभो ददाति श्वसतां पदं यन्नियमाददः।
लोकं स्वदेहं तनुते महान् सप्तभिरावृतम् ।।४३।। गुणाभिमानिनो देवाः सर्गादिष्वस्य
यद्भयात्। वर्तन्तेऽनुयुगं येषां वश एतच्चराचरम् ।।४४।। सोऽनन्तोऽन्तकरः
कालोऽनादिरादिकृदव्ययः। जनं जनेन जनयन्मारयन्मृत्युनान्तकम् ।।४५।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः ।।२९।।

।। सङ्ग्रहोक्तिः ।।

भगवान् कालः संहर्ता सन् प्रमत्तं जनं परिच्छिनत्ति ।।३९।। यस्य कालात्मनो भगवतो भयाद् वायुर्वाति, यद्भयात् सूर्यस्तपति, पर्जन्यो जलं वर्षति, नक्षत्रगणो भाति ।।४०।। यस्माद् भीताः सत्यो वनस्पतयः औषधिभिः सहीता लताश्च स्वे स्वे काले पुष्पाणि फलानि चाभिगृह्णन्ति ।।४१।।यतो भीताः सरितः स्यन्दन्ते, समुद्रो वेलामतीत्य न गच्छति, अग्निर्ज्वलति गिरिभिः सह पृथ्वी समुद्रजले न मज्जति ।।४२।। यतः कालभयात् नभः प्राणिनां स्थानं ददाति, अयं महान् कालः पृथिव्यादिसप्तावरणैरावृतं स्वदेहं ब्रह्माण्डे विस्तारयति ।।४३।। सत्त्वादिगुणप्रधाना ब्रह्मादयो देवा विश्वस्य सर्गादिषु प्रतिकल्पं यद्भयाद् वर्तन्ते, येषां देवानां वशे चराचरात्मकं जगद् वर्तते ।।४४।। स भगवान् कालःस्वयमनन्तोऽप्यन्येषामन्तकरः स्वयमनादिरन्येषामादिः=उत्पादकः, पित्रादिना पुत्रादिकं जनयन्, यममपि मृत्युना मारयन् स्वयमव्ययो भवति ।।४५।।

❀ इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्याम् एकोनत्रिंशोऽध्यायः ।।२९।। ❀

अथ त्रिंशोऽध्यायः।। ३०।।

कपिल उवाच - तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमम्। काल्यमानोऽपि बलिनो वायोरिव घनावलिः।।१।। यं यमर्थमुपादत्ते दुःखेन सुखहेतवे। तं तं धुनोति भगवान् पुमाञ्छोचति यत्कृते।।२।। यदध्रुवस्य देहस्य सानुबन्धस्य दुर्मतिः। ध्रुवाणि मन्यते मोहाद् गृहक्षेत्रवसूनि च।।३।। जन्तुर्वै भव एतस्मिन् यां यां योनिमनुव्रजेत्। तस्यां तस्यां स लभते निर्वृतिं न विरज्यते।।४।। नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति। नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः।।५।। आत्मजायासुतागारपशुद्रविणबन्धुषु। निरूढमूलहृदय आत्मानं बहु मन्यते।।६।। सन्दह्यमानसर्वाङ्ग एषामुद्वहनाधिना। करोत्यविरतं मूढो दुरितानि दुराशयः।।७।। आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनां च मायया। रहो रचितयाऽऽलापैः शिशूनां कलभाषिणाम्।।८।। गृहेषु कूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः। कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही।।९।।

।। सङ्ग्रहोक्तिः।।

अथ त्रिंशोऽध्यायः ।।३०।।

देहगेहासक्तपुरुषाणां पापदधोगतिः

श्रीकपिल उवाच - भगवदात्मकस्य तस्यैतस्य बलिनः कालस्य बहुपराक्रममयं जनस्तेन परिच्छिद्यमानोऽपि बलिनो वायोर्घनावलिरिव न वेद।।१।। पुमान् प्रयासेन यं यमर्थं संपादयति तं तमर्थं कालात्मकः परमेश्वरो नाशयति, तत्कृते नरः शोचति।।२।। यस्माद् दुर्मतिः नरः कलत्रादिसहितस्याऽस्थिरस्य देहस्य सम्बन्धीनि गृहक्षेत्रवसूनि मोहाद् ध्रुवाणि मन्यते।।३।। एतस्मिन् संसारेऽयं जीवः यां यां देवमनुष्यादियोनिं प्राप्नुयात् तस्यां तस्यां स सुखं न लभते, तथापि स वैराग्यभाग् न भवति।।४।। नरकस्थोऽपि पुमान् देवमायाविमोहितः सन् नारकीये सुखेऽपि तं देहं त्यक्तुं नेच्छति।।५।। देह-स्त्री-पुत्र-गृह-पशु-धन-बन्धुषु बद्धमनाः मादृशः कश्चित् सुखी नास्तीत्यात्मानं बहु मन्यते।।६।। एतेषां पोषणचिन्तया परितप्यमानसर्वाङ्गः स मूढो दुराशयः सन् निरन्तरं पापान्येव करोति।।७।। स्त्रीभी रहसि संभोगदिरूपरचितया मायया मधुरभाषिणां शिशुनामालापैराक्षिप्तमनाः गृहस्थाश्रमी कूटधर्मेषु दुःखबहुलेषु -

अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान्। पुष्णाति येषां पोषेण शेषभुग्यात्यधः पुमान्।।१०।। वार्तायां लुप्यमानायामारब्धायां पुनः पुनः। लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहाम्।।११।। कुटुम्बभरणाकल्पो मन्दभाग्यो वृथोद्यमः। क्रियाविहीनः कृपणो ध्यायञ्छ्वसिति मूढधीः।।१२।। एवं स्वभरणाकल्पं तत्कलत्रादयस्तथा। नाद्रियन्ते यथा पूर्वं कीनाशा इव गोजरम्।।१३।। तत्राप्यजातनिर्वेद भ्रियमाणः स्वयम्भृतैः। जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे।।१४।। आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन्। आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः।।१५।। वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः। कासश्वासकृतायासः कण्ठे घुरघुरायते।।१६।। शयानः परिशोचद्भिः परिवीतः स्वबन्धुभिः। वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः।।१७।। एवं कुटुम्बभरणे व्यापृतात्माजितेन्द्रियः। म्रियते रुदतां स्वानामुरुवेदनयास्तधीः ।।१८।।

।। सङ्ग्रहोक्तिः ।।

गृहेष्वतन्द्रितः सन् दुःखप्रतिकारं किंचित् कर्म कुर्वन् बहु सुखं मन्यते।।८-९।। इतस्त बहुलया हिंसयोत्पादितैर्वित्तादिभिस्तान् पुष्णाति, येषां पुत्रादीनां शेषभुक् स्वयं पुमान् नि पतति।।१०।। जीविकायां पुनः पुनः समारब्धायां सत्यामपि दैवेन निहतायां लोभेनाऽभिभूतो ऽशक्तः सन् परधने स्पृहां करोति।।११।। कुटुम्बस्य पोषणेऽशक्तो भाग्यहीनः अत एव वृथोद्यमः क्रियाहीनः कृपणो मूढबुद्धिर्जनो वृथा चिन्तयन् निःश्वासान् मुञ्चति।।१२।। एवं स्वानां भरणपोषणाक्षमं तं तत्कलत्रादयः पूर्ववत् नाद्रियन्ते स्म, यथा कृषीवला जरठं बलीवर्दं ।।१३।। तत्कृतात्यनादरे सत्यपि अजातनिर्वेदः पूर्वं स्वेन भृतैर्भ्रियमाण जरया वैरूप्यं प्राप्त स मरणाभिमुखः सन् गृह आस्ते।।१४।। अवमत्याऽग्र उपन्यस्तमन्नादिकं श्वान इव अदन् रोगी, मन्दाग्निरत एवाऽल्पाहारोऽल्पचेष्टितश्च भवति।।१५।। कफसंरुद्धनाडिको वायुना बहिर्निगतकनानीकः कासश्वासाभ्यामायासितः सन् कण्ठे घुर्घुरायते।।१६।। शयानः परिशोचद्भिः स्वबन्धुभिः परिवृतः सन् संबोध्य "तात" "तात" इति समाहूतोऽपि कालपाशवशंगतो न ब्रूते।।१७।। एवं कुटुम्बभरणे व्यापृतात्मा, अजितेन्द्रियः, बहुलया वेदनया नष्टमतिः, स्वानां

यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ। स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ।।१९।। यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात्। नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा।।२०।। तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः। पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन्।।२१।। क्षुत्तृट्परीतोऽर्कदवानलानिलैः सन्तप्यमानः पथि तप्तवालुके। कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रयोदके।।२२।। तत्र तत्र पतञ्छ्रान्तो मूर्च्छितः पुनरुत्थितः। पथा पापीयसा नीतस्तमसा यमसादनम् ।।२३।। योजनानां सहस्त्राणि नवतिं नव चाध्वनः त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः।।२४।। आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः। आत्ममांसादनं क्वापि स्वकृत्तं परतोऽपि वा।।२५।। जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने। सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम्।।२६।। कृन्तनं चावयवशो गजादिभ्यो भिदापनम्। पातनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्तयोः।।२७।।

।। सङ्ग्रहोक्तिः ।।

रुदतां सतां म्रियते ।।१८।। मरणसमये प्राप्तौ सक्रोधेक्षणौ भयंकरौ यमदूतौ दृष्ट्वा म्रियमाणः स त्रस्तः सन् शकृन् मूत्रं च विमुञ्चति ।।१९।। यमदूतौ नरकदुःखभोगाय क्लृप्ते देहे प्रावेश्य बलात् कण्ठे पाशैः बद्ध्वा दीर्घमध्वानं राजभटा दण्ड्यं यथा नयन्ति तथैनं नयतः।।२०।। यमदूताभ्यां कृतैस्तर्जनैर्निर्भिन्नहृदयोऽत एव जातवेपथुः पथि श्वानैर्भक्ष्यमाण आर्तः सन् पापमनुस्मरन् चलति ।। २१ ।। क्षुत्तृड्भ्यां व्याप्तः, निराश्रये निर्जले, सूर्यदवानलानिलैः सन्तप्ते, तप्तवालके पथि संतप्यमानः पृष्ठे कशया ताडितोऽशक्तः सन्नपि कृच्छ्रेण चलति ।।२२।। तत्र तत्र पथि श्रान्तोऽत एव पतन् मूर्छितः, पुनरुत्थित जीव पापीयसा तमःप्रचुरेण मार्गेण यमसंनिधिं नीतो भवति ।। २३ ।। मार्गस्य योजनानां नवनवतिसहस्राणि द्वाभ्यां त्रिभिर्वा मुहूर्तैर्नीतः सन् स यातनाः प्राप्नोति ।। २४।। उल्मुकादिभिर्वेष्टयित्वा स्वाङ्गानां प्रज्वालनं, स्वेन छिन्नं परेण वा छिन्नमात्मनो मांसं भोजनाय क्वचित् प्राप्नोति ।।२५।। यम भवने श्वगृध्रैर्जीवतः सत एव निजान्त्राणां बहिर्निष्कासनं, सर्पवृश्चिकदंशाद्यैर्दशद्भिरात्मपीडां च स प्राप्नोति ।।२६।। एकैकावयवानां छेदनं, गजादिभिर्विदारणं, गिरिशृङ्गेभ्यः पातनं जले गर्ते च रोधनमित्येवंरूपा

यास्तामिस्रान्धतामिस्रा रौरवाद्याश्च यातनाः। भुङ्क्ते नरो वा नारी वा मिथः सङ्गेन निर्मिताः।।२८।। अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते। या यातना वै नारक्यस्ता इहाप्युपलक्षिताः।।२९।। एवं कुटुम्बभरण उदरम्भर एव वा। विसृज्येहोभयं प्रेत्य भुङ्क्ते तत्फलमीदृशम्।।३०।। एकः प्रपद्यतेऽध्वानं हित्वेदं स्वकलेवरम्। कुशले-तरंपाथेयो भूतद्रोहेण यद् भृतम्।।३१।। दैवेनासादितं तस्य शमलं निरये पुमान्। भुङ्क्तेकुटुम्बपोषस्य हृत्तवित्त इवातुरः।।३२।। केवलेन ह्यधर्मेण कुटुम्ब-भरणोत्सुकः। याति जीवोऽन्धतामिस्रं चरमं तमसः पदम्।।३३।। अधस्तान्नरलोकस्य यावतीर्या-तनादयः। क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः।।३४।।

इति श्रीमद्भागवते महापुरणे तृतीयस्कन्धे त्रिंशोऽध्यायः।।३०।।

।। सङ्ग्रहोक्तिः ।।

यातना स प्राप्नोति।।२७।।तामिस्रा अन्धतामिस्रा रौरवाद्या या यातना मिथः सङ्गेन निर्मितास्ता नरो वा नारी भुङ्क्ते।।२८।। हे मातः! स्वर्गो नरकश्चेत्येतद्द्वयमत्रलोक एव वर्तते, इति प्रचक्षते, या नारक्यो यातनास्ता इहापि दृष्टाः।।२९।।एवं कुटुम्बपोषणमात्रपरः स्वदेहपोषण-मात्रपरो वा जन्तुः, कुटुम्बं देहं चोभयमत्र विसृज्य प्रेत्योक्तविधं फलं भुङ्क्ते।।३०।। भूतद्रोहेण यत् पोषितं स्वं कलेवरं, तदिहैव परित्यज्य पापं पाथेयं कृत्वा निरयमार्गे गत एक एव तत् प्रपद्यते।।३१।। दैवेन प्रापितं तत् कुटुम्ब पोषणस्य पापं हृतवित्त इवाऽऽतुरः सन् पुमान् निरये भुङ्क्ते।।३२।।केवलेनाऽधर्मेण कुटुम्बभरणोत्सुको जीवो नरकस्य चरमं स्थानमन्ध-तामिस्राख्यं नरकं याति।।३३।। मनुष्यदेह प्राप्त्यनन्तरं यावत्यो यातनादयः श्वशूकराद्या योनयश्च ताः सर्वाः क्रमशः सम्प्राप्य भोगेन शुद्धः सन्नत्र पुनर्नरत्वं प्राप्नोति।।३४।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां त्रिंशोऽध्यायः ।।३०।।

अथ एकत्रिंशोऽध्यायः।। ३१।।

श्रीभगवानुवाच - कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये। स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः।।१।। कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम्। दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्।।२।। मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः। नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः।।३।। चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः। षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिण।।४।। मातुर्जग्धान्नपानाद्यैरेधद्धातुरसम्मते। शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसम्भवे।।५।। कृमिभिः क्षतसर्वाङ्गः सौकुमार्यात्प्रतिक्षणम्। मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः।।६।। कटुतीक्ष्णोष्णलवणरुक्षाम्लादिभिरुल्बणैः। मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः।।७।। उल्बेन संवृतस्तस्मिन्नन्त्रैश्च बहिरावृतः। आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः।।८।।

।। सङ्ग्रहोक्तिः।।

अथ एकत्रिंशोऽध्यायः ।।३१।।

जीवस्य गर्भावस्था गर्भस्थजीवकृता भगवत्स्तुतिश्च

श्रीभगवानुवाच - परमात्मप्रेरितेन कर्मणा जीवो मनुष्यदेहप्राप्तये कस्यचित् पुंसो रेतःकणमाश्रितः सन् स्त्रिया गर्भं प्रविष्टो भवति।।१।।जीवेनाश्रितं रेत एकरात्रेण कललं=शुक्रशोणितमिश्रितं भवति, पञ्चरात्रेण बुद्बुदं, दशाहेन बदरीफलाकारं किंचत् कठिनं भवति, ततः परं पेशी वाऽण्डाकारं भवति।।२।।ततो मासेन शिरः, द्वाभ्यां मासाभ्यां बाह्वङ्घ्र्याद्यङ्गानां विभागो भवति, त्रिभिर्मासैर्नखलोमास्थिचर्माणि, लिङ्गं छिद्राणि च इत्येतेषामुद्भवो भवति।।३।। ततश्चतुर्भिर्मासैः सप्त धातवः, पञ्चभिः क्षुत्तृडुद्भवो भवति, षड्भिर्मासैः जरायुणा प्रावृतः सन् दक्षिणे कुक्षौ भ्राम्यति।।४।। मात्रा भुक्तैरन्नपानाद्यैरस्य सप्त धातवो वर्धन्ते, कीटपूर्णे विण्मूत्रयोर्गर्तेऽयं जन्तुः शेते।।५।।तत्रत्यैः क्षुधितैर्जन्तुभिः क्षतसर्वाङ्गो सौकुमार्याद् उरुक्लेशः सन् प्रतिक्षणं मूर्छां प्राप्नोति।।६।।दुःसहैर्मातृभुक्तैः कटुतीक्ष्णोष्णलवणाम्लादिभिरुपस्पृष्टः, अत एव सर्वांगसंजातवेदनः, मातुरुदरे जरायुणाऽऽवृतः बहिरन्त्रैरावृतः

अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे। तत्र लब्धस्मृतिर्दैवात्कर्म जन्म-
शतोद्भवम्। स्मरन्दीर्घमनुच्छ्वास शर्म किं नाम विन्दते।।९।। आरभ्य सप्तमा-
न्मासाल्लब्धबोधोऽतिवेपितः। नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः।।१०।।
नाथमानः ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः। स्तुवीत तं विक्लवया वाचा येनोदरे-
ऽर्पितः।।११।। *जन्तुरुवाच* - तस्योपसन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि
चलच्चरणारविन्दम्। सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतो-
ऽनुरूपा।।१२।। यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य
मायाम्। आस्ते विशुद्धमविकारमखण्डबोधमातप्यमानहृदयेऽवसितं नमामि।।१३।।
यः पञ्चभूतरचिते रहितः शरीरे छन्नो यथेन्द्रियगुणार्थचिदात्मकोऽहम्। तेनाविकुण्ठ-
महिमानमृषिं तमेनं वन्दे परं प्रकृतिपूरुषयोः पुमांसम्।।१४।। यन्माययोरुगुणकर्म-
निबन्धनेऽस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण। नष्टस्मृतिः पुनरयं प्रवृणीत
लोकं युक्त्या कया महदनुग्रहमन्तरेण।।१५।।

।। सङ्ग्रहोक्तिः ।।

भुग्नपृष्ठशिरोधरः कुक्षौ शिरः कृत्वाऽऽस्ते ।।७-८।। पञ्जरे शकुनिरिव स्वाङ्गचेष्टायामसमर्थो
वर्तते, तत्र दैववशात् लब्धस्मृतिः स जन्मशतोद्भवं कर्म स्मरन् दीर्घमनुश्वासं गृह्णन् किंचिदपि
सुखं विन्दते किम्? ।।९।। सप्तमात् मासाद् आरभ्य लब्धबोधः स सूतिवातैरतिवेपितः विष्ठाभूः
कृमिरिवैकत्र स्थिरो न भवति ।।१०।। याचमानः गर्भवासादितः भीतो जीवो येन उदरे क्षिप्त-
स्तं भगवन्तं कृताञ्जलिः सन् व्याकुलया वाचा तुष्टाव ।।११।। *जीव उवाच* - स्वेन सृष्टस्यास्य
जगतो रक्षार्थं स्वेच्छाधृतनानावतारस्य भगवतोऽकुतोभयं चरणारविन्दं शरणमहं व्रजामि
येनाऽसाधोर्ममेदृशी गतिः दर्शिताऽस्ति ।।१२।। मातुर्देहे भूतेन्द्रियाशयमयीं मायामवलम्ब्य
कर्मवश्यो जीवोऽहं भवामि, कर्मवश्येन मया सह स्वयमप्यशुचिदेहे वसन्नपि तद्गतदोषैर-
ऽसंस्पृष्टो यस्तमहं नमामि ।।१३।। पञ्चभूतरचिते शरीरेऽहं यथा छन्नः, तथाऽस्मिन् भौतिके
शरीरे यो छन्नः, तथापि नित्याऽसंकुचितज्ञानः सर्वेश्वरः सर्वज्ञः प्रकृतिपुरुषनियन्ता यः परमपुरुषः
तं वन्दे ।।१४।। अयं जीवः भगवदिच्छयोरुकर्मनिबन्धने सांसारिके मार्गे संचरन् संचारसंभूत-

ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः। तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम।।१६।। देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः। इच्छन्नितो विवसितुं गणयन् स्वमासान् निर्वास्यते कृपणधीर्भगवन् कदा नु।।१७।। येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन। स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात्।।१८।। पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे। यत्सृष्टया स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतम्।।१९।। सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरन्धकूपे। यत्रोपयातमुसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत्।।२०।। तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशुतमसः सुहृदाऽऽत्मनैव। भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादितविष्णुपादः।।२१।।

।। सङ्ग्रहोक्तिः ।।

क्लेशेन नष्टस्मृतिः भगवदनुग्रहं विना कया युक्त्या मुक्त्युपायं प्राप्नुयात्?।।१५।। अस्यां गर्भावस्थायां येन त्रैकालिकं ज्ञानं दत्तम्, स स्थावरजंगमेष्वन्तरात्मतयाऽवस्थितः परमात्मा एव स्यात्, अतो जीवान्तरात्मतयाऽवस्थितं ज्ञानद्वारा मुक्तिदं तं सर्वज्ञं भगवन्तं वयं भजेम।।१६।। हे भगवन्! मातुरुदरविवरे रुधिरविण्मूत्रकूपे पतितः जठराग्नितप्तदेहः, कृपणधीः निर्गन्तुमिच्छन् स्वमासान् गणयन्नसौ जीवः कदा निर्वास्यते।।१७।। हे ईश! निरुपमेन दयालुना त्वया दशमास्योऽसौ जीव ईदृशीं विवेकपूर्णां गतिं प्रापितः, अत एव दीननाथो भगवान् स्वकृतेनोपकारेण तुष्यतु।।१८।। स्वशरीरे वर्तमानोऽपि शरीराद्भिन्नः सप्तत्वग्वेष्टितदेहधारी जीवो ययेश्वरदत्तया धिया ब्रह्मपुरे स्थितं भगवन्तं पश्यति, तं शुद्धचित्तग्राह्यं परमात्मानं बहिर्हृदये च पश्यामि तथा विधेहि।।१९।। हे विभो! गर्भवासदुःखभागहं बहिर्निर्गन्तुं नेच्छामि, यतोऽन्धकूपे गृहिधर्मे पुनरपि माया मां मोहयित्वा संसारगर्ते पातयिष्यति, पुनरिदं संसारचक्रं प्रवृत्तं भविष्यति।।२०।। विगतधाष्टर्योऽहमत्रैव स्थित्वा यथा मे पुनर्गर्भवासदुःखं न स्यात्तथा भवतश्चरणौ सम्यगाश्रित्य संसृते र्मोक्ष्यामि।।२१।।

कपिल उवाच – एवं कृतमतिर्गर्भे दशमास्यः सपद्यृषिम्। सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः।।२२।। तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः। विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः।।२३।। पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते। रोरूयति गते ज्ञाने विपरीतां गतिं गतः।।२४।। परच्छन्दमविदुषा पुष्यमाणो जनेन सः। अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः।।२५।। शायितोऽशुचिपर्यङ्के जन्तुः स्वेदजदूषिते। नेशः कण्डूयनेऽङ्गानामासनोत्थानचेष्टने।।२६।। तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः। रुदन्तं विगतज्ञानं कृमयः कृमिकं यथा।।२७।। इत्येवं शैशवं भुक्त्वा दुःखं पौगण्डमेव च। अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः।।२८।। सह देहेन मानेन वर्धमानेन मन्युना। करोति विग्रहं कामी कामिष्वन्ताय चात्मनः।।२९।। भूतैः पञ्चभिरारब्धे देहे देह्यबुधोऽसकृत्। अहंममेत्यसद्ग्राहः करोति कुमतिर्मतिम्।।३०।। तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिम्। योऽनुयाति ददत्क्लेशमविद्याकर्मबन्धनः।।३१।।

।। सङ्ग्रहोक्तिः।।

कपिल उवाच – एवं कृतनिश्चयं दशमास्यं जीवं सद्योऽवाङ्मुखं यथा भवति तथा प्रसूत्यै प्रवृद्धः प्रसूतिवायुर्गर्भं प्रेरयति।।२२।। सूतिवायुना चालितः शिरोऽर्वाक्कृत्वा दुःखितः श्वासरहितो हतस्मृतिः सन्नतिकष्टेन निष्क्रामति।।२३।। रुधिरेण लिप्तः भूवि पतितः विष्ठाभूः कृमिरिव चेष्टते, गर्भज्ञाने नष्टे सति विपरीतां गतिं प्राप्तः सन् भृशं रोदिति।।२४।। अज्ञेन मात्रादिजनेन पुष्यमाणः, स्वाऽरोचकमापन्नोऽपि, प्रत्याख्यातुमनीश्वरः, जन्तुस्वेददूषितेऽशुचिपर्यङ्के शायितः अङ्गानामासनोत्थानचेष्टने कण्डूयने चाऽनीशःसन् स बालो भृशं रोदिति।।२५-२६।। विगत-गर्भावस्थाज्ञानमत एव रुदन्तं कोमलत्वचमेनं दंशा मशका मत्कुणादयस्तुदन्ति।।२७।। इत्थं शैशवं दुःखं भुक्त्वा, पौगण्डं वयः प्राप्नोति, तत्राऽभीप्सितमप्राप्य भृशं क्रुध्यति, तेन शुचा व्याप्तो भवति।।२८।। ततो यौवनं वयः प्राप्नोति, तत्र देहेन सह वर्द्धमानेनाऽभिमानेन क्रोधेन च स्वस्य विनाशाय कामयन् सन् कामिषु विग्रहं करोति।।२९।। पाञ्चभौतिकेऽस्मिन् देहेऽज्ञः शरीरी कुमतिः सन् "अहंमम" इत्यसदाग्रहवतीं मतिं करोति।।३०।। अविद्यया कर्मणा च

यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः। आस्थितो रमते जन्तुस्तमो विशति पूर्ववत्॥३२॥ सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा। शमो दमो भगश्चेति यत्सङ्गाद्याति सङ्क्षयम्॥३३॥ तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु। सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च॥३४॥ ***न तथास्य भवेन्मोहो बन्धश्चान्य-प्रसङ्गतः। योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः॥*****३५॥ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः। रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः॥३६॥** ***तत्सृष्टसृष्टसृष्टेषु कोन्वखण्डितधीः पुमान्। ऋषिं नारायणमृते योषिन्मय्येह मायया॥३७॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्। या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलम्॥३८॥ सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः। मत्सेवया प्रतिलब्धात्मबोधो वदन्ति या निरयद्वारमस्य॥३९॥*** **योपयाति शनैर्माया योषिद्देवविनिर्मिता।**

॥ सङ्ग्रहोक्तिः॥

बद्धो देहः क्लेशमेव ददत् देहिनमनुवर्त्तते, पुनस्तस्मिन् देहे बद्धो जीवः कर्मणा संसृतिं याति ॥३१॥ शिश्नोदरपोषणार्थं यतद्भिरसद्भिर्दारादिभिः संपृक्तः सन् पुनस्तेषां पथि यदि रमते तर्हि स जन्तुर्नरकान् प्राप्नोति॥३२॥ येषामसतां दारादीनां प्रसङ्गतः सत्यं, शौचं, दया, मौनं, बुद्धिः, ह्रीः, श्रीः, यशः, क्षमा, शमः, दमश्च इत्यादीनि विनाशं प्राप्नुवन्ति॥३३॥ अशान्तेषु मूढेष्वसाधुषु योषित्क्रीडामृगेषु शोच्येषु सङ्गं न कुर्यात्॥३४॥ योषितां सङ्गात् तथा परयोषित्सङ्गिसङ्गतेश्च यथा पुंसो मोहो बन्धश्च भवेत् तथाऽन्यप्रसङ्गतो न भवेत्॥३५॥ ब्रह्मा स्वदुहितुः सरस्वत्याः सौन्दर्येण मोहितः सन् मृगीरूपां तां स्वयं मृगो भूत्वा निस्त्रपः सन्नन्वधावत्॥३६॥ तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः, तैः सृष्टा देवमनुष्यादयः, तेषु कः पुमान् नारायणमृषिं विना योषिन्मय्या माययाऽनाकृष्टमना भवति? ॥३७॥ स्त्रीरूपाया मे मायाया बलं पश्य, या केवलं भ्रूविजृम्भेण दिशां जयिनोऽपि स्वाधीनान् करोति॥३८॥ भक्तियोगफलरूपमत्पदमारुरुक्षुर्योगी मत्सेवया प्रतिलब्धात्मबोधः प्रमदासु जातु प्रसङ्गं न कुर्यात्, याः प्रमदा मुमुक्षोर्निरद्वारं वदन्ति॥३९॥

तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतम् ।।४०।। यां मन्यते पतिं मोहान्मन्माया-
मृषभायतीम्। स्त्रीत्वं स्त्रीसङ्गतः प्राप्तो वित्तापत्यगृहप्रदम् ।।४१।। तामात्मनो
विजानीयाद्वित्तापत्यगृहात्मकम्। दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ।।४२।। देहेन
जीवभूतेन लोकाल्लोकमनुव्रजन्। भुञ्जान एव कर्माणि करोत्यविरतं पुमान् ।।४३।।
जीवो ह्यस्यानुगो देहो भूतेन्द्रियमनोमयः। तन्निरोधोऽस्य मरणमाविर्भावस्तु सम्भवः
।।४४।। द्रव्योपलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा। तत्पञ्चत्वमहंमानादुत्पत्ति-
र्द्रव्यदर्शनम् ।।४५।। यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा। तदैव चक्षुषो द्रष्टुर्द्रष्टृत्व-
योग्यताऽनयोः ।।४६।। तस्मान्न कार्यः सन्त्रासो न कार्पण्यं न सम्भ्रमः। बुद्ध्वा
जीवगतिं धीरो मुक्तसङ्गश्चरेदिह ।।४७।। सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया।
मायाविरचिते लोके चरेन्न्यस्य कलेवरम् ।।४८।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे एकत्रिंशोऽध्यायः ।।३१।।

।। सङ्ग्रहोक्तिः ।।

भगवता निर्मिता स्त्रीरूपा या माया सा शुश्रूषादिव्याजेन शनैः शनैः योगिनः समीप आयाति,
किन्तु तां तृणैरावृतं कूपमिवाऽऽत्मनो मृत्युमीक्षते ।।४०।। या स्त्री पुरुषवदाचरतीं मन्मायां
मोहात् पतिं मन्यते, तथापि पतित्वेन प्रतीयमानः स पुमान् न, किन्तु आत्मा स्त्रीसङ्गतः
वित्तापत्त्यगृहप्रदं स्त्रीत्वं प्राप्तः भवति, यथा मृगयोर्गायनं मृगस्य मृत्युकरं भवति तथा वित्तापत्य-
गृहात्मकं तं दैवप्रापितं आत्मनो मृत्युं जानीयात् ।।४१-४२।। जीवः स्वस्मादभिन्नत्वेन मतेन
देहेन = सूक्ष्मदेहेन देहान्तरं गच्छन् कर्मफलानि भुङ्क्ते, इतराणि नवाणि कर्माणि कुरुते च
।।४३।। भूतेन्द्रियमनोमयो देहो जीवानुगो वर्तते, स्थूलावस्थां परित्यज्य सूक्ष्मावस्थाप्राप्तिरेव
देहस्य जन्म कथ्यते ।।४४।। विषयभोगस्थानस्य देहस्य सर्वथा सर्वदा भोगानर्हता हि देहस्य
मृत्युः कथ्यते, तथैव भोक्तृत्वाभिमानेन सह देहस्य विषयभोगार्हता हि तस्योत्पत्तिः कथ्यते
।।४५।। यदा अक्ष्णोः दृश्यपदार्थस्याऽवयवग्रहण योग्यता न स्यात् तदा द्रष्टुरात्मनो द्रष्टुत्वं
न स्यात् ।।४६।। एवं देहस्याऽनात्मत्वात् संत्रासः कार्पण्यं संभ्रमः = जीवनार्थं प्रयत्नश्च न

अथ द्वात्रिंशोऽध्यायः ।। ३२।।

कपिल उवाच - अथ यो गृहमेधीयान्धर्मानेवावसन् गृहे। काममर्थं च धर्मांश्च दोग्धि भूयः पिपर्ति तान् ।।१।। स चापि भगवद्धर्मात्काममूढः पराङ्मुखः। यजते क्रतुभिर्देवान् पितृंश्च श्रद्धयान्वितः ।।२।। तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान्। गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ।।३।। यदा चाहीन्द्रशय्यायां शेतेऽनन्तासनो हरिः। तदा लोका लयं यान्ति त एते गृहमेधिनाम् ।।४।। ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे। निःसङ्गा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ।।५।। निवृत्तिधर्मनिरता निर्ममा निरहङ्कृताः। स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ।।६।। सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम्। परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ।।७।। द्विपरार्द्धावसाने यः प्रलयो ब्रह्मणस्तु ते।

।। सङ्ग्रहोक्तिः ।।

कार्यः, तस्माद् धीरः सन् प्रकृतिविलक्षणमात्मनो रूपं ज्ञात्वाऽनासक्तः सन् लोके संचरेत् ।।४७।। सम्यग्दर्शनरूपया भक्तियोगवैराग्याभ्यां युक्तया बुद्ध्या मायाविरचिते लोक आसक्तिं त्यक्त्वा विचरेत् ।।४८।।

इति श्रीमद्भागवते तृतीतस्कन्धे सङ्ग्रहोक्त्यामेकत्रिंशोऽध्यायः ।।३१।।

अथ द्वात्रिंशोऽध्यायः ।।३२।।

धूमार्चिराख्यमार्गद्वयगतानां विविधा गतिर्भक्तियोगस्योत्कर्षश्च

गृहस्थो गृहिधर्मान् आचरन् पुनस्तेभ्यो काममर्थं च लभते ।।१।। स च काममूढः सन् भगवद्धर्माद् विमुखो भूत्वा श्रद्धया क्रतुभिः पितॄन् देवांश्च यजते, तदा स पितृदेवव्रतः सोमपाः पुमान् चान्द्रमसं लोकं गत्वा पुनर्मर्त्यलोकमेष्यति ।।२-३।। यदा कल्पान्ते हरिः शेषशय्यायां शेते तदा गृहमेधिनां ते लोका नाशं यान्ति ।।४।। ये धीरा भगवदुपासकाः कामार्थहेतवे स्वधर्मान्न दुह्यन्ति, भगवत्समर्पितकर्माणः परिशुद्धेन चेतसा निर्मलाश्च भवन्ति, तेऽर्चिर्मार्गेण परमपुरुषं मां प्राप्नुवन्ति ।। ५-७ ।। परमात्मनः परिचिन्तका ये योगिनो ब्रह्मणो लोकं परिश्रिता

तावदद्ध्यासते लोकं परस्य परचिन्तकाः।।८।। क्ष्माम्भोऽनलानिलवियन्मन-
इन्द्रियार्थभूतादिभिः परिवृतं प्रतिसञ्जिहीर्षुः। अव्याकृतं विशति यर्हि गुणत्रयात्मा
कालं पराख्यमनुभूय परः स्वयम्भूः।।९।। एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो
जितमरुन्मनसो विरागाः। तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयान्त्यगता-
भिमानाः।।१०।। अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम्। श्रुतानुभावं शरणं व्रज
भावेन भामिनि।।११।। आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः। योगेश्वरैः कुमाराद्यैः
सिद्धैर्योगप्रवर्तकैः ।।१२।। भेददृष्ट्याभिमानेन निःसङ्गेनापि कर्मणा। कर्तृत्वात्सगुणं
ब्रह्म पुरुषं पुरुषर्षभम्।।१३।। स संसृत्य पुनः काले कालेनेश्वरमूर्तिना। जाते
गुणव्यतिकरे यथापूर्वं प्रजायते।।१४।। ऐश्वर्यं पारमेष्ठ्यं च तेऽपि धर्मविनिर्मि-
तम्। निषेव्य पुनरायान्ति गुणव्यतिकरे सति।।१५।। ये त्विहासक्तमनसः कर्मसु
श्रद्धयान्विताः। कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः।।१६।। रजसा कुण्ठ-
मनसः कामात्मानोऽजितेन्द्रियाः। पितॄन् यजन्त्यनुदिनं गृहेष्वभिरताशयाः।।१७।।
त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः। कथायां कथनीयोरुविक्रमस्य मधुद्विषः
।।१८।। नूनं दैवेन विहता ये चाच्युतकथासुधाम्। हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव
विड्भुजः।।१९।।

।। सङ्ग्रहोक्तिः ।।

भवन्ति, द्विपरार्द्धकालावसाने जायमाने प्रलये गुणत्रयात्मा भगवान् नामरूपविभागानर्ह-
निरतिशयसूक्ष्मचिदचिद्विशिष्टत्वावस्थां प्राप्नोति तदा ब्रह्मा तैर्योगिभिः सह परमानन्दरूपं
परमपुरुषमुपयाति।।८-१०।। हे भामिनि! तस्माद्धेतोः सर्वभूतानां हृत्कमलेषु कृतावासं तं
भगवन्तं प्रेम्णा शरणं व्रज।।११।। आद्यो वेदगर्भो ब्रह्मा अपि सनत्कुमारादिभिः सिद्धैः सह
भेददृष्ट्याऽभिमानपूर्वकं निःसङ्गं कर्मकर्तृत्वात् सूक्ष्मचिदचिद्विशिष्टब्रह्मात्मकं पुरुषर्षभं
प्राप्नोति।।१२-१३।। ऋष्यादिसहितो ब्रह्मा सूक्ष्मचिदचिद्विशिष्टे ब्रह्मणि संसर्गं प्राप्य भूयः
कालेन गुणवैषम्ये जाते सति पूर्ववत् पुनः स्वस्वाधिकारं प्राप्नुवन्ति।।१४।। एवं पारमेष्ठ्यमैश्वर्यं
प्राप्य निष्काम कर्माणोऽपि साभिमानिनो ब्रह्मादयो गुणवैषम्ये जाते सति पुनः संसरन्ति।।१५।।

दक्षिणेन पथार्यम्णः पितृलोकं व्रजन्ति ते। प्रजामनु प्रजायन्ते श्मशानान्तक्रियाकृतः ।।२०।। ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति। पतन्ति विवशा देवैः सद्यो विभ्रंशितोदयाः।।२१।। तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनम्। तद्गुणाश्रयया भक्त्या भजनीयपदाम्बुजम्।।२२।। वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनम्।।२३।। यदास्य चित्तमर्थेषु समेष्विन्द्रिय-वृत्तिभिः। न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत।।२४।। स तदैवात्मनाऽऽत्मानं निःसङ्गं समदर्शनम्। हेयोपादेयरहितमारूढं पदमीक्षते।।२५।। ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान्। दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते।।२६।। एतावानेव योगेन समग्रेणेह योगिनः। युज्यतेऽभिमतो ह्यर्थो यदसङ्गस्तु कृत्स्नशः।।२७।। ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम्। अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ।।२८।।

।। सङ्ग्रहोक्तिः।।

ये तु कर्मठाः कामात्मानोऽजितेन्द्रियाः काम्यानि नित्यानि च कार्मणि कुर्वन्ति, नित्यं पितॄन् यजन्ति च, ते धर्मार्थकामाभिलाषिणः सन्तो हरिकथाविमुखा भवन्ति।।१६-१८।। ये च हरिकथां हित्वा शूकरादयः पुरीषमिव कामिसेव्या गाथाः शृण्वन्ति, नूनं ते दुर्भाग्या भवन्ति।।१९।। ते धूमादिमार्गेण पितृलोकं व्रजन्ति, पुनः पितृलोकादिहाऽऽगच्छन्तः सन्तः स्वप्रजादिषु जायन्ते ।।२०।।हे सति! ततः क्षीणपुण्या देवविनाशितभोगोत्कर्षाः कर्मवश्याः सन्त इमं लोकं पतन्ति ।।२१।। सकामकर्मणां गतेरेवंविधत्वात् त्वं परमव्योमाधिपतिं भजनीयपदाम्बुजं सुखाराध्यं भगवन्तं भक्त्या भजस्व।।२२।। भगवति वासुदेवे प्रयोजितो भक्तियोगो ब्रह्मसाक्षात्कारोपायभूतं ज्ञानं जनयति, तज्ज्ञानमाशुवैराग्यं जनयति।।२३।।यदाऽस्योपासकस्य चित्तं सर्वेष्वपि शब्दादि-विषयेष्विन्द्रियवृत्तिभिः प्रियाप्रियरूपं वैषम्यं नोपाददाति, यदा च निःसङ्गं हेयोपादेयरहितं च सत् समदर्शनं स्यात् तदा स उक्तविधेन चित्तेन परमेश्वरं साक्षात्करोति।।२४-२५।। तदा ज्ञानमात्रं, परंब्रह्म, परमात्मा, इति शब्दैर्वाच्य एको भगवान् पृथिव्यादिभिः पृथग्भावैः प्रतीयते ।।२६।।साङ्गेन भक्तियोगेन योगिनोऽभिमत एतावानेव पुरुषार्थः प्राप्यते यत् निरतिशयसुख-

यथा महानहंरूपस्त्रिवृत्पञ्चविधः स्वराट्। एकादशविधस्तस्य वपुरण्डं जगद्यतः ।।२९।। एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः। समाहितात्मा निःसङ्गो विरक्त्या परिपश्यति ।।३०।। इत्येतत्कथितं गुर्वि ज्ञानं तद् ब्रह्मदर्शनम्। येनावबुद्ध्यते तत्त्वं प्रकृतेः पुरुषस्य च ।।३१।। ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः। द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ।।३२।। यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः। एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ।।३३।। क्रियया क्रतुभिर्दानैस्तपः स्वाध्यायमर्शनैः। आत्मेन्द्रियजयेनापि संन्यासेन च कर्मणाम् ।।३४।। योगेन विविधाङ्गेन भक्तियोगेन चैव हि। धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ।।३५।। आत्मतत्त्वावबोधेन वैराग्येण दृढेन च। ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ।।३६।। प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधम्। कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु ।।३७।।

।। सङ्ग्रहोक्तिः ।।

रूपोऽपहतपाप्मत्वादिगुणाष्टकविशिष्टस्वरूप आत्मा भवति, इति ।।२७।। सत्वादिगुणरहितो ज्ञानस्वरूपो जीवो बाह्येन्द्रियैर्देवादिशरीररूपेण भ्रान्त्याऽवभाति ।।२८।। महदहंकारभूतेन्द्रियात्मकमेतदण्डं, तदन्तर्गतो ब्रह्मा च, यत उत्पन्नं तत्सर्वं यस्य शरीरमस्ति स एव परमार्थरूपोऽस्ति ।।२९।। श्रद्धया भक्त्या योगाभ्यासेन वैराग्येण च वशीकृतचित्तो योगी निःसङ्गः सन् ब्रह्म साक्षात्कुर्यात् ।।३०।। हे गुर्वि! येन ज्ञानेन प्रकृतेः पुरुषस्य च याथात्म्यमवबुद्ध्यते तज्ज्ञानं मया तुभ्यं कथितम् ।।३१।। ज्ञानयोगो नैर्गुण्यो मन्निष्ठो भक्तियोगश्च मया कथितः द्वयोरपि भगवच्छब्दवाच्यः परमपुरुष एवोपास्य इत्येकोऽर्थोऽस्ति ।।३२।। यथा दुग्धादिरेक एव पदार्थश्चक्षुर्जीह्वादीन्द्रियैः शुक्लमधुरादिरूपेण नानाविधोऽनुभूयते तथा विविधशास्त्रमार्गैरेक एव हरिर्नानारूपो ज्ञायते ।।३३।। कर्म-यज्ञ-दान-तपः-स्वाध्याय-मनोनिग्रह-काम्यकर्मत्यागैः योगेन, सकामनिष्कामधर्मेण, भक्तियोगेन, आत्मज्ञानेन, वैराग्येण च, एभिः सर्वैः साधनैः सगुणः = मङ्गलगुणगणकः निर्गुणः = हेयगुणरहितश्च स्वप्रकाशो भगवान् प्राप्यते ।।३४-३६।। भक्तियोगस्य तामसादिभेदेन त्रिविधं निर्गुणं चेति चतुर्विधस्वरूपं ते प्रावोचम्, अव्यक्तगतेः कालस्य स्वरूपमपि प्रावोचम् ।।३७।।

जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः। यास्वम्ब प्रविशन्नात्मा न वेद गतिमात्मनः ॥३८॥ नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित्। न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च॥३९॥ न लोलुपायोपदिशेन्न गृहारूढचेतसे। नाभक्ताय च मे जातु न मद्भक्तद्विषामपि॥४०॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे। भूतेषु कृतमैत्राय शुश्रूषाभिरताय च॥४१॥ बहिर्जातविरागाय शान्तचित्ताय दीयताम्। निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः॥४२॥ य इदं शृणुतादम्ब श्रद्धया पुरुषः सकृत्। यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे॥४३॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे द्वात्रिंशोऽध्यायः॥३२॥

॥ सङ्ग्रहोक्तिः॥

हे अम्ब! जीवो यासु गतिषु प्रविशन्नात्मनो याथात्म्यं न वेद, ता अविद्याकर्मनिर्मिता बह्वीः संसृतीश्च ते कथिताः ॥३८॥ हे मातः! मदुपदिष्टमेतज्ज्ञानं खलाय, अविनीताय, मूर्खाय, दुराचाराय, दाम्भिकाय च नोपदिशेत्॥३९॥ तथैव लोलुपाय, भक्तिहीनाय, मद्भक्तद्वेषिणे च नोपदिशेत्॥४०॥ किन्तु श्रद्दधानाय, भक्ताय, विनीताय, अनसूयवे, सुहृदे, मत्सेवापरायणाय, विरक्ताय, शान्तचेतसे, निर्मत्सराय, पवित्राय चेदमुपदिशेत्॥४१-४२॥ हे अम्ब! यः पुरुषो मदुक्तमेतच्छास्त्रं सकृदपि शृणुयात् मच्चित्तः सन्नन्यस्मै कथयेत्, स च मत्पदवीं मुक्तिं प्राप्नोति॥४३॥

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां द्वात्रिंशोऽध्यायः॥३२॥

अथ त्रयस्त्रिंशोऽध्यायः ।। ३३।।

मैत्रेय उवच – एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः। विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयाङ्कितसिद्धभूमिम् ।।१।। *देवहूतिरुवाच* – अथाप्यजोऽन्तः सलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः।।२।। स एव विश्वस्य भवान् विधत्ते गुणप्रवाहेण विभक्तवीर्यः। सर्गाद्यनीहोऽवितथाभिसन्धिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः।।३।। स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत्। विश्वं युगान्ते वटपत्र एकः शेते स्म मायाशिशुरङ्घ्रिपानः।।४।। त्वं देहतन्त्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये। यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये।।५।। *यन्नामधेयश्रवणानुकीर्तनाद् यत्प्रह्वणाद्यत्स्मरणादपि क्वचित्। श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात्*।।६।।

।। सङ्ग्रहोक्तिः ।।

अथ त्रयस्त्रिंशोऽध्यायः।। ३३।।

देवहूतिकृता भगवत्स्तुतिः कपिलस्य प्रस्थानं देवहूतेर्मुक्तिश्च

मैत्रेय उवाच – कर्दमस्य भार्या कपिलस्य जननी देवहूतिः कपिलस्य वचः श्रुत्वा विध्वस्तमोहपटला सती तत्त्वज्ञयोगिश्रितं कपिलं प्रणम्य तुष्टाव।।१।। *देवहूतिरुवाच* – हे भगवन्! तव नाभिकमलाज्जातो ब्रह्माऽप्यन्तः सलिलेः शयानं भूतेन्द्रियात्ममयं सदशेषबीजं ते स्वरूपं केवलं दध्यौ।।२।। गुणप्रवाहेण विभक्तशक्तिः, त्वं निर्व्यापारः सन्नपि सत्य-सङ्कल्पोऽसि, अचिन्त्यानन्तशक्तिमान् भवान् अस्य जगतः सर्गस्थितिलयान् विधत्ते ।।३।। हे नाथ! कल्पान्त एतद् विश्वं यस्योदरे लीनमासीत्, यो भवान् वटपत्रे शिशुभावं प्राप्तः सन् पादाङ्गुष्ठं पिबति, स त्वं मया जठरेण कथं नु धृतः, तन्न जाने।।४।। हे विभो! त्वं दुष्टानां विनाशाय, साधूनां परित्राणाय च विविधदेहान् धारयसि, अयमवतारोऽपि साधूनामात्ममार्गज्ञापनाय वर्तते इति वेद्मि।।५।। हे भगवन्! तव नामधेयस्य श्रवणात् कीर्तनात् त्वत्प्रणामात् स्मरणाच्च श्वपचोऽपि यागाय योग्यो भवति, तर्हि त्वद्दर्शनादहं कृतार्था भवेयं तत्र किं वक्तव्यम्?।।६।।

अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम्। तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते।।७।। तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यम्। स्वतेजसा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भम्।।८।। *मैत्रेय उवाच* – ईडितो भगवानेवं कपिलाख्यः परः पुमान्। वाचाऽविक्लवयेत्याह मातरं मातृवत्सलः।।९।। *कपिल उवाच* – मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे। आस्थितेन परां काष्ठामचिरादवरोत्स्यसि।।१०।। श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः। येन मामभयं याया मृत्युमृच्छन्त्यतद्विदः।।११।। *मैत्रेय उवाच* – इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिम्। स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ।।१२।। सा चापि तनयोक्तेन योगादेशेन योगयुक्। तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता।।१३।। अभीक्ष्णावगाहकपिशान् जटिलान् कुटिलालकान्। आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशम्।।१४।। प्रजापतेः कर्दमस्य तपोयोगविजृम्भितम्। स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि।।१५।।

।। सङ्ग्रहोक्तिः ।।

तव नामोच्चारणेनाऽऽर्यास्तपोहोमतीर्थादीनां फलं लभन्ते, अत एवंभूतं तव नाम य उच्चारयति स चाण्डालोऽपि श्रेष्ठतमो भवति।।७।। स्वयंप्रकाशे जीवे चिन्तनीयं, स्वतेजसा ध्वस्तगुणप्रवाहं वेदगर्भं कपिलं परमपुरुषं त्वामहं वन्दे।।८।। *मैत्रेय उवाच* – एवं मात्रा स्तुतः परमपुरुषो भगवान् कपिलो मातृवत्सलः सन् गम्भीरया वाचा मातरमाह।।९।। *कपिल उवाच* – हे मातः! मत्कथितेन त्वयानुष्ठितेन सुखानुष्ठेयेनाऽनेन मार्गेण त्वमचिरान्मुक्तिं प्राप्स्यसि।।१०।। ब्रह्मवादिभिर्यन्मतं जुष्टं तन्मतं श्रद्धत्स्व, येन त्वमभयं यायाः, ये मन्मतस्याऽनभिज्ञास्ते संसारं प्राप्नुवन्ति।।११।। *मैत्रेय उवाच* – भगवान् कपिलः एवं कमनीयामात्मनः सद्गतिं मात्रे प्रदर्श्य, ब्रह्मवादिन्या तयाऽनुज्ञातः सन् ययौ।।१२।। देवहूतिरपि स्वतनयोक्तेन योगोपदेशेन तस्मिन्नेवाऽऽश्रमे समाहितैकाग्रचित्ताऽभवत्।।१३।। नित्यं त्रिषवणस्नानेन पिशङ्गान् जटिलानलकान्, वल्कलधारिणमात्मानं च बिभ्रती, कर्दमस्य तपोयोगाभ्यामुत्कृष्टं, विमानचरैर्देवैरपि प्रार्थ्यं गार्हस्थपदार्थभृतं गृहं हित्वा देवहूतिर्विमना बभूव।।१४-१५।।

पयः फेननिभाः शय्या दान्ता रुक्मपरिच्छदाः। आसनानि च हैमानि सुस्पर्शास्तरणानि
च।।१६।। स्वच्छस्फटिककुड्येषु महामारकतेषु च। रत्नप्रदीपा आभान्ति ललना-
रत्नसंयुताः।।१७।। गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः। कूजद्विहङ्गमिथुनं
गायन्मत्तमधुव्रतम्।।१८।। यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः। वाप्यामुत्पल-
गन्धिन्यां कर्दमेनोपलालितम्।।१९।। हित्वा तदीप्सिततममप्याखण्डलयोषिताम्।
किञ्चिच्चकार वदनं पुत्रविश्लेषणातुरा।।२०।। वनं प्रव्रजिते पत्यावपत्यविरहातुरा।
ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला।।२१।। तमेव ध्यायती देवमपत्यं कपिलं
हरिम्। बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे।।२२।। ध्यायती भगवद्रूपं यदाह
ध्यानगोचरम्। सुतः प्रसन्नवदनं समस्तव्यस्तचिन्तया ।।२३।। भक्तिप्रवाहयोगेन
वैराग्येण बलीयसा। युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना।।२४।। विशुद्धेन तदा-
ऽऽत्मानमात्मना विश्वतोमुखम्। स्वानुभूत्या तिरोभूतमायागुणविशेषणम्।।२५।।
ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये। निवृत्तजीवापत्तित्वाद्क्षीणक्लेशाऽऽप्तनिर्वृतिः
।।२६।। नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा।

।। सङ्ग्रहोक्तिः ।।

पयफेननिभाः रुक्मपरिच्छदाः शय्याः हैमान्यासनानि सुस्पर्शास्तरणानि च मनसा परित्यक्तानि, यत्र गृहेषु महामारकतेषु स्वच्छस्फटिककुड्येषु रत्नदीपा आभान्ति, कुसुमितैर्बहुकल्पद्रुमैर्गायन्मत्तमधुकरं रम्यं गृहोद्यानं मनसा परिहातम्, यत्र गृहोद्यान उत्पलगन्धिन्यां वाप्यां प्रविष्टं कर्दमेनोपलालितमात्मानं देवानुचरा गान्धर्वा जगुः।।१६-१९।।शय्यादिभिरपीप्सितं सर्वं हित्वा पुत्रवियोगातुरा देवहूतिर्वदनं किंचित् शोकव्याकुलमकरोत्।।२०।। कर्दमे वनं गते सति पुत्रविरहातुरा सा ज्ञाततत्त्वाऽपि वत्से नष्टे सति वत्सला गौरिवाऽभवत्।।२१।। भगवदवतारं देववत्सुरूपं स्वपुत्रं कपिलमेव ध्यायती सती देवहूतिः स्वल्पकालेन तादृशे गृहे निःस्पृहा बभूव।।२२।।कपिलोक्तरीत्या ध्यानगोचरं प्रसन्नवदनं भगवद्रूपं कार्त्स्न्येनाऽवयवशश्च ध्यायती सती साऽऽत्मानमपि न सस्मार।।२३।।बलीयसा वैराग्येण ब्रह्महेतुना ज्ञानेन भक्तिप्रवाहयोगेन च विशुद्धेन मनसा सा विश्वतोमुखं तिरोहितमायागुणं परमेश्वरं दध्यौ। ।।२४-२५।।

न सस्मार तदाऽऽत्मानं स्वप्ने दृष्टमिवोत्थितः ॥२७॥ तद्देहः परतः पोषोऽप्यकृशः-स्वाध्यसम्भवात् । बभौ मलैरवच्छन्नः सधूम इव पावकः ॥२८॥ स्वाङ्गं तपोयोगमयं मुक्तकेशं गताम्बरम् । दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥२९॥ एवं सा कपिलोक्तेन मार्गेणाचिरतः परम् । आत्मानं ब्रह्मनिर्वाणं भगवन्तमवाप ह ॥३०॥ तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् । नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥३१॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् । स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ॥३२॥ कपिलोऽपि महायोगी भगवान् पितुराश्रमात् । मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥३३॥ सिद्धचारणगन्धर्वैर्मुनिभिश्चाप्सरोगणैः । स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥३४॥ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः । त्रयाणामपि लोकानामुपशान्त्यै समाहितः ॥३५॥ एतन्निगदितं तात यत्पृष्टोऽहं तवानघ ।

॥ सङ्ग्रहोक्तिः ॥

जीवानामाश्रयभूते परब्रह्मणि मतिं स्थिरीकृत्य वीतक्लेशा, अत एव परमात्मानन्दसंभृता, नित्यं समाधिस्थितिं प्राप्ता, तस्याः प्रकृतिगुणकृता भ्रान्तिर्निवृत्ता, स्वप्नादुत्थितः पुमानिव सा स्वं शरीरं न सस्मार ॥ २६-२७ ॥ तस्या देहः परपोष्योऽपि मनःपीडाया अभावात् अकृशोऽभूत्, मलैरवच्छन्नोऽपि सधूमः पावक इव बभौ ॥ २८ ॥ तपोयोगमयं मुक्तकेशं गताम्बरमपि दैवरक्षितं स्वशरीरं वासुदेवप्रविष्टमतिः सा देवहूतिर्न बुबुधे ॥ २९ ॥ एवं कपिलोक्तमार्गेण देवहूतिः शीघ्रमेवाऽक्षरादपि परं निरतिशयानन्दरूपं स्वात्मन्यवस्थितं भगवन्तमवाप ॥ ३० ॥ हे विदुर! देवहूतिर्यत्र मुक्तिमवाप तत् पुण्यतमं क्षेत्रं नाम्ना सिद्धपदं त्रैलोक्यविश्रुतमासीत् ॥ ३१ ॥ हे सौम्य! योगविधूतदेहभावं तस्या देवहूत्याः शरीरं सिद्धिदा सिद्धसेविता नदीनां मध्ये प्रवरा नदी सममभूत्, नदीरूपेण प्रावहत् ॥ ३२ ॥ माहायोगी भगवान् कपिलोऽपि मातरं समनुज्ञाप्य पितुराश्रमादीशानदिशं प्रति जगाम ॥ ३३ ॥ सिद्धचारणगन्धर्वैरप्सरोगणैर्मुनिभिश्च स्तूयमानः समुद्रेण दत्तनिवासस्थानः, सांख्याचार्यैरभिष्टुतः त्रयाणामपि लोकानां क्षेमाय समाहितमनाः सन्नपि कपिलः स्वयं योगं समास्थायाऽध्यास्ते ॥ ३४-३५ ॥

कपिलस्य च संवादो देवहूत्याश्च पावनः।।३६।। य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यम्। भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविन्दम्।।३७।।

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः।।३३।।

।। इति तृतीयस्कन्धः समाप्तः।।

।। सङ्ग्रहोक्तिः ।।

हे अनघ! त्वया यदहं पृष्टः सोऽयं कपिलस्य देवहूत्याश्च पावनः सवांदस्तुभ्यं निगदितः।।३६।। यः पुरुष इदमात्मयोगगुह्यं कपिलमतं शृणोति अभिधत्ते च स गरुडध्वजे भगवति निष्पन्नभक्तियोगः सन् भगवत्पदारन्दिं लभते।।३७।।

इति श्रीमद्भागवते तृतीयस्कन्धे सङ्ग्रहोक्त्यां त्रयस्त्रिंशोऽध्यायः।।३३।।

❀ इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां तृतीयस्कन्धः समाप्तः ❀

ॐ

।। श्रीस्वामिनारायणो विजयतेतराम्।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम्।।

सङ्ग्रहोक्तिटीकासहितम्

चतुर्थ स्कन्धः

अथ प्रथमोऽध्यायः।।१।।

मैत्रेय उवाच – मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे। आकूतिर्देवहूतिश्च प्रसूतिरिति सुव्रत।।१।। आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः। पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः।।२।। प्रजापतिः स भगवान् रुचिस्तस्यामजीजनत्। मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना।।३।। यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक्। या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ।।४।। आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम्। स्वायम्भुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम्।।५।। तां कामयानां भगवानुवाह यजुषां पतिः। तुष्टायां तोषमापन्नोऽजनयद् द्वादशात्मजान्।।६।। तोषः प्रतोषः संतोषः शान्तिः शुचिरिडस्पतिः।

।। सङ्ग्रहोक्तिः।।

अथ चतुर्थस्कन्धे प्रथमोऽध्यायः ।।१।।

मनुकन्यानां वंशः यज्ञदत्तयोरवतारः नरनारायणावतारश्च

मैत्रेय उवाच – हे विदुर! मनोर्महिष्यां शतरूपायामाकूतिर्देवहूतिः प्रसूतिश्चेति तिस्रः कन्या जज्ञिरे।।१।। अथ स्वायंभुवो मनू रुचि प्रजापतये "अस्यां यो जायते पुत्रः स मे पुत्रो भवेत्" इति पुत्रिकाधर्मेण आकूतिमदात्।।२।। प्रजापती रुचिःब्रह्मतेजोयुक्तः सन् परमेण समाधिना पत्न्यामाकूत्यां पुत्रपुत्रीरूपं युग्ममुत्पादयामास।।३।। तयोर्मध्ये पुत्रो यज्ञनाम्ना प्रसिद्धो विष्ण्वतारः, कन्या च लक्ष्म्यंशभूता दक्षिणाख्या बभूव।।४।।स्वायम्भुवो मुदा स्वपुत्र्या आकूत्याः तेजस्विनं पुत्रं स्वगृहमानिन्ये, रुचिर्दक्षिणां पुत्रीं जग्राह।।५।। कालान्तरे पतिं कामयानां दक्षिणायां दक्षिणां भगवान् यज्ञ उवाह, संतुष्टायां यज्ञो द्वादश पुत्रानजनयत् ।।६।। ते च तोषः, प्रतोषः, सन्तोषः, इडस्पतिः, शान्तिः, शुचिः, इध्मः, कविः, विभुः, स्वह्नः, सुदेवः,

इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट्।।७।। तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे। मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः।।८।। प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ। तत्पुत्रपौत्रनप्तृणामनुवृत्तं तदन्तरम्।।९।। देवहूतिमदात्तात कर्दमायात्मजां मनुः। तत्सम्बन्धि श्रुतप्रायं भवता गदतो मम।।१०।। दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः। प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान्।।११।। याः कर्दमसुताः प्रोक्ता क्षत्तर्ब्रह्मर्षिपत्नयः। तासां प्रसूतिप्रसवं प्रोच्यमानं विबोध मे।।१२।।पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पूर्णिमानं च ययोरापूरितं जगत्।।१३।।पूर्णिमासूत विरजं विश्वगं च परंतप। देवकुल्यां हरेःपादशौचाद्याऽभूत् सरिद्दिवः।।१४।। अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान्। दत्तं दुर्वाससं सोममात्मेशब्रह्म सम्भवान्।।१५।। *विदुर उवाच* - अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः। किंस्विच्चिकीर्षवो जाता एतदाख्याहि मे गुरो।।१६।।

।। सङ्ग्रहोक्तिः ।।

रोचनश्च इति नामभिर्विख्याता देवा अभवन्।।७।। स्वायम्भुवमन्वन्तरे ते हविर्भोक्तारस्तुषिता देवा बभूवुः, तस्मिन् मन्वन्तरे मरीच्यादय ऋषयोऽभवन्, यज्ञावतार एव इन्द्रो बभूव।।८।। तत्र मनुपुत्रौ प्रियव्रतोत्तानपादौ बभूवतुः, तत्पुत्रपौत्रनप्तृणां वंशैस्तन्मन्वन्तरं रक्षितम्।।९।। मनुः स्वां कन्यां देवहूतिं कर्दमायादाद् एषा कथा मत्तस्त्वया श्रुतैव (तृतीयस्कन्धे) ।।१०।। स मनुः प्रसूतिनाम्नीं स्वकन्यां ब्रह्मपुत्राय दक्षाय प्रायच्छत्, तस्य दक्षस्य सन्ततिस्त्रैलोक्ये नितान्तं विस्तृता बभूव।।११।। हे विदुर! कर्दमस्य नव दुहितरो या ब्रह्मर्षिपत्न्यः प्रोक्ताः, तासां पुत्रपौत्रादिवंशविस्तारं शृणु।।१२।। कर्दमसुता या कला, सा मरीचेः पत्नी बभूव, सा कश्यपं पुर्णिमानं चेति पुत्रद्वयं सुषुवे, तयोर्वंशैः सर्वं जगदापूरितम्।।१३।। कश्यपवंशः षष्ठे वक्ष्यति, पूर्णिमा विरजं विश्वगं चेति पुत्रद्वयं देवकुल्यानाम्नीं कन्यां च जनयामास, सा देवकुल्या कालान्तरे सुरनदी गंगाऽभूत्।।१४।। कर्दमपुत्र्यनसूया याऽत्रेः पत्नी बभूव, सा सुयशसो, विष्णुरुद्रविध्यंशभूतान् दत्तदुर्वासः सोमसंज्ञांस्त्रीन् पुत्रान् जज्ञे।।१५।। *विदुर उवाच* - अत्रेर्गृहे स्थित्युत्पत्त्यन्तहेतवो विष्णुब्रह्ममहेश्वरा सुरश्रेष्ठाः किं कर्तुं समुत्पन्नाः? एतत्

मैत्रेय उवाच – ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदां वरः। सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः।।१७।। तस्मिन् प्रसूनस्तबकपलाशाशोककानने। वार्भिः स्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समन्ततः।।१८।। प्राणायामेन संयम्य ततो वर्षशतं मुनिः। अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः।।१९।। शरणं तं प्रपद्येऽहं य एव जगदीश्वरः। प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन्।।२०।। तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना। निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः।।२१।। अप्सरोमुनि-गन्धर्वसिद्धविद्याधरोरगैः। वितायमानयशसस्तदाश्रमपदं ययुः।।२२।। तत्प्रादुर्भाव-संयोगविद्योतितमना मुनिः। उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान्।।२३।। प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः। वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च लक्षितान् ।।२४।। कृपावलोकेन हसद्वदनेनोपलम्भितान्। तच्छोचिषा प्रतिहते निमील्य मुनिरक्षिणी।।२५।। चेतस्तत्प्रवणं युञ्जन्नस्तावीत्संहताञ्जलिः। श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः।।२६।। *अत्रिरुवाच* – विश्वोद्भवस्थितिलयेषु विभज्यमानै-र्मायागुणैरनुयुगं विगृहीतदेहाः।

।। सङ्ग्रहोक्तिः ।।

कथय।।१६।। *मैत्रेय उवाच* – विधात्रा सृष्टये प्रेरितो ब्रह्मविदां वरोऽत्रिः पत्न्या सह कुलपर्वतमृक्षं तपसे स्थित आसीत्।।१७।। तत्र निर्विन्ध्या नद्या जलैर्निनादिते प्रसूनस्तबकपूर्णाशोक-पलाशादिवने प्राणायामेन मनः संयम्याऽनिलभोजनः सन्नेकेन पदा तिष्ठन् वर्षशतं तपः कुर्वन्निदमाह।।१८-१९।। यः कश्चिद् जगदीश्वरोऽस्ति, स मे स्वतुल्यां सन्ततिं ददातु, अहं तस्य शरणं गतोऽस्मि।।२०।। अत्रेर्मस्तकान्निर्गतेन प्राणायामेध्मवह्निना तप्यमानं त्रैलोक्यं वीक्ष्य ब्रह्मविष्णुमहेश्वरास्तस्याश्रमं जग्मुः।।२१-२२।। तत्प्रादुर्भावविद्योतितमना अत्रिरेकपादेन तिष्ठन् सन् संमुखे विबुधर्षभान् ददृशे।।२३।। वृषहंससुपर्णस्थान् स्वैः स्वैः चिह्नैरुपलक्षितान् कृपावलोकेनेन हसद्वदनेनोपलम्भितान् तान् भूमौ दण्डवत् प्रणम्य कृताञ्जलिः सन्नुपतस्थे ।।२४।। तत्तेजसा प्रतिहते नेत्रे निमील्य, चेतस्तत् प्रवणं युञ्जन् संहताञ्जलिः सन् मधुरया वाचा तानस्तावीत्।।२५-२६।। *अत्रिरुवाच* – विश्वोत्पत्तिस्थितिलयार्थं मायागुणैरनुयुगं

ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव भगवान् य इहोपहूतः।।२७।।
एको मयेह भगवान् विबुधप्रधानश्चित्तीकृतः प्रजननाय कथं नु यूयम्। अत्रागता-
स्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयो मे।।२८।। *मैत्रेय उवाच*
– इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः। प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य
तमृषिं प्रभो।।२९।। *देवा ऊचुः* – यथा कृतस्ते सङ्कल्पो भाव्यं तेनैव नान्यथा।
सत्सङ्कल्पस्य ते ब्रह्मन् यद्वै ध्यायसि ते वयम्।।३०।। अथास्मदंशभूतास्ते
आत्मजा लोकविश्रुताः। भवितारोऽङ्ग भद्रं ते विस्रप्स्यन्ति च ते यशः।।३१।।
एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः। सभाजितास्तयोः सम्यग्दम्पत्योर्मि-
षतोस्ततः।।३२।। सोमोऽभूद् ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित्। दुर्वासाः
शंकरस्यांशो निबोधाङ्गिरसः प्रजाः।।३३।। श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत-
कन्यकाः। सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा।।३४।। तत्पुत्रावपरावास्तां
ख्यातौ स्वारोचिषेऽन्तरे। उतथ्यो भगवान् साक्षाद् ब्रह्मिष्ठश्च बृहस्पतिः।।३५।।

।। सङ्ग्रहोक्तिः।।

प्रगृहीतदेहान् अहं प्रणतोऽस्मि, मया तु य एक एव जगदीश्वर इहोपहूतः, युष्मासु मध्ये सः कः।।२७।। मया तु पुत्रप्राप्तये विविधोपचारैरेक एव ध्यातः, तदा तनुभृतां मनसोऽप्यगोचरा यूयं त्रयो देवाः कथं समायाताः? तद् ब्रूत, युष्मत्त्रिकागमने मे महान् विस्मयो वर्तते।।२८।। *देवा ऊचुः* – हे मुने! त्वया यथा संकल्पः कृतः तेन सत्येन संकल्पेन तथैव भाव्यम्, त्वं यत् जगदीश्वरं ध्यायसि तत् त्रिधा प्रतीयमानं तत्त्वमेकमेवास्ति।।३०।। हे मुने! वयमेकतत्त्वाल-कास्त्वया ध्याता अत एव तेऽस्मदंशभूतास्त्रयः पुत्रा भविष्यन्ति, ते लोकविश्रुता भवितारः, तव यशश्च विस्तारयिष्यन्ति।।३१।। एवं दम्पतिभ्यामभीष्टं वरं दत्वा, ताभ्यां सम्यक् पूजितास्ते सुरेश्वराः तयोः पश्यतोः सतोः ततः प्रतिजग्मुः।।३२।। तदनुसारेण ब्रह्मणोंऽशेन सोमः, विष्णोरंशेन दत्तः, शिवस्यांशेन दुर्वासाः, एते त्रयः पुत्रा अभवन्।।३३।। महर्षेरंगिरसः श्रद्धानाम्नी पत्नी, सिनीवाली, कुहूः, राका, अनुमतिश्चेति चतस्रः कन्याः जज्ञे।।३४।। तस्यैवांगिरस उतथ्यो बृहस्पतिश्चेति द्वौ पुत्रौ बभूवतुः।।३५।।

पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि। सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः।।३६।। तस्य यक्षपतिर्देवः कुबेरस्त्विलविलासुतः। रावणः कुम्भकर्णश्च तथान्यस्यां विभीषणः।।३७।। पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान्। कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते।।३८।। क्रतोरपि क्रिया भार्या वालखिल्यानसूयत। ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा।।३९।। ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप। चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः।।४०।। चित्रकेतुः सुरोचिश्च विरजा मित्र एव च। उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे।।४१।। चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतम्। दध्यञ्चमश्वशिरसं भृगोर्वंशं निबोध मे।।४२।। भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत्। धातारं च विधातारं श्रियं च भगवत्पराम् ।।४३।। आयतिं नियतिं चैव सुते मेरुस्तयोरदात्। ताभ्यां तयोरभवतां मृकण्डः प्राण एव च।।४४।। मार्कण्डेयो मृकण्डस्य प्राणाद्वेदशिरा मुनिः। कविश्च भार्गवो यस्य भगवानुशना सुतः।।४५।।

।। सङ्ग्रहोक्तिः ।।

पुलस्त्यो हविर्भुवि पत्न्यामगस्त्यं विश्रवसं च जनयामास, तत्राऽगस्त्योऽन्यजन्मनि जठराग्निरभूत्।।३६।। तस्य विश्रवसः पत्न्यामिलविलायां कुबेरो यक्षपतिर्जातः, केशिन्यां पत्न्यां रावणः, कुम्भकर्णः, विभीषणश्चेति त्रयः पुत्रा जाताः।। ३७।। पुलहः स्वपत्न्यां गत्यां कर्मश्रेष्ठं, वरीयांसं सहिष्णुं च जनयामास।। ३८।। क्रतुः क्रियानाम्न्यां स्वभार्यायां ब्रह्मतेजसा ज्वलतः षष्टिसहस्राणि ऋषीन् वालखिल्यानजनयत्।। ३९।। वसिष्ठ ऊर्जायां भार्यायां चित्रकेतुं, सुरोचिं, विरजसं, मित्रमुल्बणं वसुभृद्यानं द्युमन्तमिति सप्त ब्रह्मर्षीन् जनयामास, शक्त्यादयोऽपरेऽपि वसिष्ठपुत्रा आसन्।।४०-४१।। अथर्वणः पत्नी चितिर्धृतव्रतं दध्यञ्चमश्वशिरसं पुत्रं च लेभे, अथ भृगोर्वंशं शृणु।।४२।। भृगुः स्वपत्न्यां ख्यात्यां धातृविधातारौ पुत्रौ श्रीनाम्नीं कन्यकां चाऽजनयत्।।४३।। मेरुस्ताभ्यां धातृविधातृभ्याम् आयतिं नियतिं च द्वे कन्यके प्रादात्, तत्र धातुरायत्यां मृकण्डो जातः, मृकण्डश्च मार्कण्डेयं जनयामास, विधाता नियत्यां भार्यायां प्राणमजनयत्, प्राणो वेदशिरसमसूत, भृगोरन्यतमः पुत्रः कविरभूत्, तस्य कवेः पुत्रः शुक्रो जातः।।४४।।

नवैते मुनयः क्षत्तर्लोकान् सर्गैरभावयन्। एष कर्दमदौहित्रसंतानः कथितस्तव। शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः।।४६।। प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः। तस्यां ससर्ज दुहितॄः षोडशामललोचनाः।।४७।। त्रयोदशादाद्धर्माय तथैकामग्नये विभुः। पितृभ्यः एकां युक्तेभ्यो भवायैकां भवच्छिदे।।४८।। श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः। बुद्धिर्मेधा तितिक्षा च ह्रीर्मूर्तिर्धर्मपत्नयः ।।४९।। श्रद्धासूत शुभं मैत्री प्रसादमभयं दया। शान्तिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत।।५०।। योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत। मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम्।।५१।। मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी। ययोर्जन्मन्यदो विश्वमभ्यनन्दत्सुनिर्वृतम्।।५२।। मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः। दिव्यवाद्यन्त तूर्याणि पेतुः कुसुमवृष्टयः।।५३।। मुनयस्तुष्टुवुस्तुष्टा जगुर्गन्धर्व-किन्नराः। नृत्यन्ति स्म स्त्रियो देव्य आसीत् परममङ्गलम्। देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः।।५४।।

।। सङ्ग्रहोक्तिः।।

हे विदुर! इत्थमेते नव मुनयः स्ववंश्यैर्लोकानुत्पादयामासुः, शृण्वतां पापहर एष कर्दमकन्यावंशः तुभ्यं कथितः।।४६।। ब्रह्मसूनुर्दक्षो मनुपुत्रीं प्रसूतिमुपयेमे, तस्यां दक्षो विमलनयना षोडश कन्या जनयामास।।४७।। तत्र दक्षस्त्रयोदश कन्या धर्मायाऽदात्, एकामग्नयेऽदात्, एकां मिलितेभ्यः पितृभ्यः प्रादात्, एकां सतीं भवाय च।।४८।। श्रद्धा, मैत्री, दया, शान्तिः, तुष्टिः, पुष्टिः, क्रिया, उन्नतिः, बुद्धिः, मेधा, तितिक्षा, ह्रीः, मूर्तिश्चेति त्रयोदश धर्मस्य पत्न्यो जाताः ।।४९।। धर्मस्य पत्नी श्रद्धा शुभं पुत्रमजनयत्, एवं मैत्री प्रसादं, दया अभयं, शान्तिः सुखं, तुष्टिर्मुदं, पुष्टिः स्मयं, क्रिया योगं, उन्नतिर्दर्पं, बुद्धिरर्थं, मेधा स्मृतिं, तितिक्षा क्षेमं, ह्रीः प्रश्रयं, मूर्तिश्च नरनारायणावृषी जनयामास, ययोर्जन्मकाले एतद्विश्वं सुखितं सत् अभ्यनन्दत् ।।५०-५२।।नरनारायणयोर्जन्मसमये भगवज्जनचेतांसि, दिशः, वायवः, नद्यः, अग्निहोत्रिणां वह्नयश्च प्रसेदुः, दिवि तुर्याण्यवाद्यन्त, कुसुमवृष्टयः पेतुः।।५३।। तदा तुष्टा मुनयस्तुष्टुवुः, गन्धर्वाः किन्नराश्च जगुः, अप्सरसो नृत्यन्ति स्म, देवा ब्रह्मर्षयश्च सर्वे स्तोत्रैरस्तुवन्।।५४।।

देवा ऊचुः- यो मायया विरचितं निजयाऽऽत्मनीदं खेरूपभेदमिव तत्प्रतिचक्षणाय। एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै।।५५।। सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान् सत्त्वेन नः सुरगणाननुमेयतत्त्वः। दृश्याददभ्र-करुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविन्दम्।।५६।। एवं सुरगणैस्तात भगवन्तावभिष्टुतौ। लब्धावलोकैर्ययतुरर्चितौ गन्धमादनम्।।५७।। ताविमौ वै भगवतो हरेरंशाविहागतौ। भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ।।५८।। स्वाहाभि-मानिनश्चाग्नेरात्मजांस्त्रीनजीजनत्। पावकं पवमानं च शुचिं च हुतभोजनम्।।५९।। तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पञ्च च। त एवैकोनपञ्चाशत्साकं पितृपितामहैः।।६०।। वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः। आग्नेय्य इष्टयो यज्ञे निरूप्यन्ते-ऽग्नयस्तु ते।।६१।। अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः। साग्नयो-ऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा।।६२।। तेभ्यो दधार कन्ये द्वे मेधां वैतरणीं स्वधा।

।। सङ्ग्रहोक्तिः ।।

देवा ऊचुः - स्वसंकल्पेन सर्वाधारे स्वात्मनि, आकाशे सितनीलादिरूपभेदमिव इदं विश्वं रचितं भवति, तज्ज्ञापनाय धर्मगृहे य ऋषिरूपेण प्रादुर्बभूव तस्मै परमपुरुषाय नमः।।५५।। स्वसंकल्पविहितजगद्बन्धमोक्षः स भगवान् सत्त्वगुणेन सृष्टान् नः सुरान् रक्तोत्पलं तिरस्कुर्वता नितान्त कारुणिकेन स्वेन नयनेन पश्यतु।।५६।। हे विदुर! भगवत्कृपादृष्टिं प्राप्तैः सुरगणैरित्थं स्तुतावर्चितौ च नरनारायणौ हि भुवो भारावताराय यदुकुरूद्वहौ कृष्णार्जुनौ जातौ स्तः।।५८।। पत्नीमत्यन्तमनुकुलां मन्यमानाद् अग्नेः स्वाहा पावकं पावमानं शुचिं चेति त्रीन् पुत्रान् अजीजनत्।।५९।। तेभ्यः पावकादिभ्यस्त्रिभ्यः पञ्चचत्वारिंशदग्नयोऽभवन्, एते सर्वे पुत्रपौत्रादयो मिलित्वैकोनपञ्चाशदग्नयो जाताः।।६०।। ब्रह्मवादिभिर्वैतानिके यज्ञकर्मणि तेषां नामभिरग्निदेवतात्मका इष्टयो निरूप्यन्ते।।६१।। अग्निष्वात्ता बर्हिषदः, पितरः सोमपाः आज्यपाश्च भवन्ति, अन्ये साग्नयो निरग्नयश्च सन्ति, तेषामुभयविधानां पितॄणां पत्नी स्वधा आसीत्।।६२।। तेभ्यः पितृभ्यः स्वधा मेधां वैतरणीं चेति द्वे कन्ये प्रसूतवती, ते उभे अपि

उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ।।६३।। भवस्य पत्नी तु सती भवं देवमनुव्रता। आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः।।६४।। पितर्यप्रतिरूपे स्वे भवायानागसे रुषा। अप्रौढैवात्मनाऽऽत्मानमजहाद्योगसंयुता।।६५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः ।।२।।

विदुर उवाच– भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः। विद्वेषमकरोत् कस्मादनादृत्यात्मजां सतीम्।।१।। कस्तं चराचरगुरुं निर्वैरं शान्तविग्रहम्। आत्मारामं कथं द्वेष्टि जगतो दैवतं महत्।।२।। एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च। विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती।।३।। *मैत्रेय उवाच*– पुरा विश्वसृजां सत्रे समेताः परमर्षयः। तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः।।४।।

।। सङ्ग्रहोक्तिः ।।

ब्रह्मवादिन्यौ ज्ञानविज्ञानपारग आस्ताम्।।६३।। भवस्य सतीनाम्नी पत्नी गुणैः शिलेन च स्वस्याः सदृशं देवं शिवं सेवमाना सत्यपि पुत्रं न लेभे।।६४।। स्वे पितरि दक्षे निर्दोषे शिवे क्रोधेन प्रतिकूले जाते सति बाला सती स्वयमेव योगाग्नौ स्वदेहं तत्याज।।६५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः ।।२।।

भवदक्षयोर्वैरसूत्रपातः

विदुर उवाच– दुहितृवत्सलो दक्षो दहितरं सतीमनादृत्य शीलवतां श्रेष्ठे भवे विद्वेषं कस्मात् अकरोत्।।१।। जगतो महद्दैवतं चराचरगुरुं निर्वैरं शान्तमूर्तिं शिवं दक्षः कथं द्वेष्टि?।।२।। हे ब्रह्मन्! जामातुर्भवस्य श्वशुरस्य दक्षस्य च विद्वेषो यतोऽभवत्, यस्मात् सती दुस्त्यजान् प्राणान् तत्याज, एतत् सर्वं मह्यमाख्याहि।।३।। *मैत्रेय उवाच*– पुरा विश्वसृजां यागे परमर्षयः सानुगाः सर्वे देवगणाः मुनयोऽग्नयश्च समवेता अभवन्।।४।।

तत्र प्रविष्टमृषयो दृष्ट्वाऽर्कमिव रोचिषा। भ्राजमानं वितिमिरं कुर्वन्तं तन्महत्सदः ॥५॥ उदतिष्ठन् सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः। ऋते विरिञ्चं शर्वं च तद्भासाऽऽक्षिप्तचेतसः॥६॥ स सदस्पतिभिर्दक्षो भगवान् साधुसत्कृतः। अजं लोकगुरुं नत्वा निषसाद तदाज्ञया॥७॥ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः। उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव॥८॥ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः। साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात्॥९॥ अयं तु लोकपालानां यशोघ्नो निरपत्रपः। सद्भिराचरितः पन्था येन स्तब्धेन दूषितः॥१०॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत्। पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत्॥११॥ गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः। प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितम् ॥१२॥ लुप्तक्रियायाशुचये मानिने भिन्नसेतवे। अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरम्॥१३॥ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः। अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन् रुदन्॥१४॥

॥ सङ्ग्रहोक्तिः॥

तदा महत् सदःस्थानं वितिमिरं कुर्वन् स्वतेजसा भासमानं सूर्यमिव तत्र सदसि प्रविष्टं दक्षं दृष्ट्वा तत्तेजोऽभिभूततेजसः सर्वे देवा ऋषयश्च ब्रह्मणं शिवं च विहाय स्वासनेभ्य उत्थिता अभूवन्॥ ५-६॥ सदस्पतिभिः सम्यक् सत्कृतो दक्षो लोकगुरुं ब्रह्माणं नमस्कृत्य तदाज्ञया निषसाद॥७॥ पूर्वमेवोपविष्टं शिवं दृष्ट्वा, तेनाऽनादृतः दक्षो न सेहे, स चक्षुर्भ्यां वक्रमभिवीक्ष्य शिवं दहन्निवोवाच॥८॥ हे ब्रह्मर्षयः! साधूनां वृत्तं ब्रुवतो मे वचो देवैरग्निभिश्च सहितैः सर्वैः श्रूयताम्, तदेतद् अज्ञानान् मत्सराद्वा न ब्रवीमि॥९॥ अयं शिवो लोकपालानां यशोहन्ता, निर्लज्जश्चाऽस्ति. सत्पुरुषैराचरितो वैदिकः पन्था येन स्तब्धेन दूषितः॥१०॥ मर्कटलोचनोऽयं विप्राग्निसमक्षं मे मृगशिशुनयनायाः सुतायाः पाणिं जग्राह, अत एव मे शिष्यः, सोऽयं प्रत्युत्थानाभिवादार्हे मयि वचनेनाऽपि सत्कारं न चकार॥११-१२॥ लुप्तक्रियायाऽशुचये भिन्नमर्यादाय तस्मा अनिच्छन्नप्यहं बालां कन्यां शूद्राय वेदवाचमिवाऽदाम्॥१३॥ घोरेषु श्मशानेषु प्रेतगणैः सहैष नग्न उन्मत्तवद्धसन् रुदंश्च चरति॥१४॥

चिताभस्मकृतस्नानः प्रेतस्रक् न्रस्थिभूषणः। शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः।
पतिः प्रमथभूतानां तमोमात्रात्मकात्मनाम् ।।१५।। तस्मा उन्मादनाथाय नष्टशोचाय
दुर्हृदे। दत्ता बत मया साध्वी चोदितः परमेष्ठिना ।।१६।। *मैत्रेय उवाच* – विनिन्द्यैवं
स गिरिशमप्रतीपमवस्थितम्। दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ।।१७।।
अयं तु देवयजन इन्द्रोपेन्द्रादिभिर्भवः। सह भागं न लभतां देवैर्देवगणाधमः
।।१८।। निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापम्। तस्माद्वि-
निष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनम् ।।१९।। विज्ञाय शापं गिरिशा-
नुगाग्रणीर्नन्दीश्वरो रोषकषायदूषितः। दक्षाय शापं विससर्ज दारुणं ये चान्वमोदं-
स्तदवाच्यतां द्विजाः ।।२०।। य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि। द्रुह्यत्यज्ञः
पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ।।२१।। गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया।
कर्मतन्त्रं वितनुते वेदवादविपन्नधीः ।।२२।। बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः
पशुः। स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ।।२३।।

।। सङ्ग्रहोक्तिः ।।

चिताभस्मकृतस्नानः प्रेतस्रक् न्रस्थिभूषणोऽयं शिवः श्मशाने वसति, अतएव भूतप्रेतादीनां पतिरयं शिवोऽप्यशिव एव ।।१५।। उन्मादनाथाय नष्टशौचाय दुर्हृदे तस्मै ब्रह्मणा प्रेरितेन मया साध्वी कन्या दत्ता ।।१६।। स दक्षोऽप्रतीमं शिवमेवं विनिन्द्य अप उपस्पृश्य क्रुद्धः सन् तं शप्तुमुपचक्रमे ।।१७।। अयं शिवो देवगणाधमोऽस्ति, अत एव भव इन्द्रादिभिर्देवैः सह यज्ञे भागं न लभताम् ।।१८।। हे विदुर! सदस्यमुख्यैर्निषिद्ध्यमानोऽपि विवृद्धमनुः स दक्षः शिवाय शापं विसृज्य, ततो विनिष्क्रम्य, निजं निकेतनं जगाम ।।१९।। शिवपार्षदाग्रणीर्नन्दीश्वरो दक्षविसृष्टं शापं विज्ञाय रोषकषायदूषितः सन् दक्षाय दारुणं शापं विससर्ज, ये च द्विजाः शिवनिंदामन्वमोदन्त तेभ्योऽपि शापं विससर्ज ।।२०।। यो दक्षोऽज्ञः पृथग्दृष्टिः सन् अप्रतिद्रुहि शिवे मर्त्यमुदिश्य द्रुह्यति स तत्त्वज्ञानाद् विमुखो भवेत् ।।२१।। अयं ग्राम्यसुखेच्छया कूटधर्मेषु गृहेषु सक्तो भवेत्, वेदवादविमुग्धः सन् कर्मतन्त्रं वितनुताम् ।।२२।। देहात्मवादिन्या बुद्ध्या विस्मृतात्मगतिः पशुरयमतितरां स्त्रीकामः स्यात्, एवं चाऽचिराद् बस्तमुखो भवतु ।।२३।।

विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः। संसरन्त्विह ये चामुमनु शर्वावमानिनम् ।।२४।।गिरः श्रुतया पुष्पिण्या मधुगन्धेन भूरिणा। मथ्ना चोन्मथितात्मानः सम्मुह्यन्तु हरद्विषः।।२५।।सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः। वित्तदेहेन्द्रियारामा याचका विचरन्त्विह।।२६।। तस्यैवं ददतः शापं श्रुत्वा द्विजकुलाय वै। भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम्।।२७।। भवव्रतधरा ये च ये च तान् समनुव्रताः। पाषण्डिनो भवेयुस्ते सच्छास्त्रपरिपन्थिनः।।२८।। नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः। विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम्।।२९।। ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिन्दथ। सेतुं विधारणं पंसामतः पाखण्डमाश्रिताः।।३०।। एष एव हि लोकानां शिवः पन्थाः सनातनः। यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः।।३१।। तद् ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम्। विगर्ह्य यात पाषण्डं दैवं वो यत्र भूतराट्।।३२।। *मैत्रेय उवाच* - तस्यैवं वदतः शापं भृगोः स भगवान् भवः। निश्चक्राम ततः किञ्चिद्विमना इव सानुगः।।३३।।

।। सङ्ग्रहोक्तिः।।

अयमविद्यायां विद्याबुद्धिं कृत्वा जडो भवतु ये चैनमनुसरन्ति ते सर्वे जन्ममरणादिदुःखान्य-नुभवन्तु।।२४।।ये च शिवद्वेष्टारस्ते सर्वेऽर्थवादयुक्तस्य वेदवाक्यस्य माधुर्येण क्षोभितचित्ताः सन्तः कर्मपरायणा भवन्तु।।२५।। दक्षानुयायिनो विप्रा विद्यातपोयुक्ता अपि सर्वभक्षाः सन्त इह याचका भूत्वा विचरन्तु।।२६।।ब्रह्मकुलाय शापं वदतो नन्दीश्वरस्य वाचं श्रुत्वा भृगुर्दुरत्ययं ब्रह्मदण्डं शापं प्रत्यसृजत्।।२७।।ये भवव्रतधराः, ये च तान् समनुसृताः, ते सर्वे पाखण्डिनः सच्छास्त्राणां प्रतिकूला भवन्तु।।२८।।नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः शिवदीक्षायां विशन्तु, यत्र त्रिविधासुरा एकादशविधं मद्यं च देववदादरणीयं भवति।।२९।।पाखण्डमाश्रिता यूयं वेदान् ब्राह्मणांश्च विनिन्दथ, अतो विगर्ह्यं पाखण्डं यात।।३०।। यं पन्थानं पूर्वे मुनय आश्रितवन्तः यस्य पथो मूलं स्वयं विष्णुः, तं शुद्धं वैदिकं मार्गं त्यक्त्वा यूयं पाखण्डं मार्गं गच्छत, यस्य देवता भूतराट् शिवोऽस्ति।।३१-३२।। *मैत्रेय उवाच* - भृगोः शापं श्रुत्वा किंचित् खिन्न इव शिवोऽनुचरैः सह तत् स्थानान्निश्चक्राम।।३३।।

तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान्। संविधाय महेष्वास यत्रेज्य ऋषभो हरिः।।३४।। आप्लुत्यावभृथं यत्र गङ्गा यमुनयान्विता। विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः।।३५।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः ।। ३।।

मैत्रेय उवाच - सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः। जामातुः श्वशुरस्यापि सुमहानतिचक्रमे।।१।। यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना। प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभगवत्।।२।। इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च। बृहस्पतिसवं नाम समारेभे क्रतूत्तमम्।।३।। तस्मिन् ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः। आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः।।४।।

।। सङ्ग्रहोक्तिः ।।

हे विदुर! यस्मिन् सत्रे सर्वश्रेष्ठो हरिराराधनीयः, तत् विश्वसृजां सत्रं सहस्रपरिवत्सरान् संविधाय, विश्वसृजो यत्र यमुनयाऽन्विता गङ्गा वर्तेते तत्र प्रयागे अवभृथं स्नात्वा, शुद्धाशयाः सर्वे स्वं स्वं स्थानं ययुः।।३४-३५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः ।।३।।

पितुर्यज्ञोत्सवं द्रष्टुं गच्छन्तीं सतीं शिवो निवारितवान्

मैत्रेय उवाच – उक्तरीत्या सदा विद्विषतोर्जामातुः श्वशुरस्य च सुमहान् कालः व्यतिचक्रमे।।१।। यदा परमेष्ठिना सर्वेषां प्रजापतीनामाध्यक्षे दक्षोऽभिषिक्तस्तदा तस्य मदविशेषोऽभवत्।।२।। स दक्षः शिवमनादृत्य वाजपेयाख्ययागं कृत्वा बृहस्पतिसवं नाम क्रतूत्तमं समारेभे।।३।। तस्मिन् यज्ञे सर्वे ब्रह्मर्षयः, पितरः, देवताश्च कृतस्वस्त्ययनाः, सर्वालंकारभूषितास्तत्पत्न्यश्च सभर्तृकास्तत्राऽऽगता आसन्।।४।।

तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम्। सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ।।५।।व्रजन्तीः सर्वतो दिग्भ्य उपदेववरस्त्रियः। विमानयानाः सप्रेष्ठा निष्ककण्ठ्यः सुवाससः।।६।। दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुण्डलाः। पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत।।७।। *सत्युवाच* – प्रजापतेस्ते श्वशुरस्य साम्प्रतं निर्यापितो यज्ञमहोत्सवः किल। वयं च तत्राभिसराम वाम ते यद्यर्थिताऽमी विबुधा व्रजन्ति।।८।। तस्मिन् भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यन्ति सुहृद्दिदृक्षवः। अहं च तस्मिन् भवताभिकामये सहोपनीतं परिबर्हमर्हितुम्।।९।। तत्र स्वसॄर्मे ननु भर्तृसम्मिता मातृष्वसॄः क्लिन्नधियं च मातरम्। द्रक्ष्ये चिरोत्कण्ठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम्।।१०।। त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम्। अथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिम्।।११।। पश्य प्रयान्तीरभवान्ययोषितोऽप्यलंकृताः कान्तसखा वरूथशः। यासां व्रजद्भिः शितिकण्ठ मण्डितं नभो विमानैः कलहंसपाण्डुरैः।।१२।।

।। सङ्ग्रहोक्तिः ।।

तदाऽऽकाशे विमानान्यधिरुह्य दक्षयज्ञे व्रजतां प्रजल्पतां देवानां वचनानि श्रुत्वा दक्षपुत्री सती पितुर्यज्ञमहोत्सवं द्रष्टुमुत्सुका बभूव।।५।।सर्वतो दिग्भ्यो यान्तीर्विमानयाना निष्ककण्ठीः सुवाससः लोलाक्षीर्मृष्टकुण्डलाः गान्धर्वस्त्रियो वीक्ष्य सती देवं भूतपतिं भवमौत्सुक्यादाह ।।६-७।। *सत्युवाच* – हे शम्भो! तव श्वशुरस्य दक्षस्य यज्ञमहोत्सवः सांप्रतं प्रवर्त्तितः, इति श्रूयते, तत्रामी विबुधा व्रजन्ति, यदि भवदिच्छा स्यात् चेत् तर्हि वयमपि तत्र गच्छेम।।८।। तस्मिन् यज्ञोत्सवे मम भगिन्यः स्वपतिभिः सहाऽऽगमिष्यन्ति, अहमपि भवता साकं पित्रादि-समर्पितं पारिबर्हं ग्रहीतुमिच्छामि।।९।। हे मृड! तत्र यज्ञे भर्तृसहिताः मे स्वसॄः, मातृस्वसॄः खिन्नचित्तां मयि प्रेमार्द्रचित्तां मातरं च चिरोत्कण्ठमना अहं द्रक्ष्यामि, महर्षिभिरूर्ध्वीक्रियमाणम-ध्वरध्वजं च द्रक्ष्यामि।।१०।।परमात्मसंकल्पेन जातमिदं गुणत्रयात्मकं जगत् त्वय्याश्चर्यकरं भाति, तथाऽपि अतत्त्वविद् अत एव दीना योषिदहं मम जन्मभूमिं द्रष्टुमिच्छामि।।११।। हे अजन्मन्! अन्ययोषितः सभर्तृकाः स्वलंकृताः संघशो यान्तीः पश्य, हे शितिकण्ठ! यासां

कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेङ्गते। अनाहुता अप्यभियन्ति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनम् ।।१३।। तन्मे प्रसीदेदममर्त्य वाञ्छितं कर्तुं भवान्कारुणिको बतार्हति। त्वयाऽऽत्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता मानुगृहाण याचितः।।१४।। *मैत्रेय उवाच* - एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्त प्रहसन् सुहृत्प्रियः। संस्मारितो मर्मभिदः कुवागिषून् यानाह को विश्वसृजां समक्षतः।।१५।। *भव उवाच* - त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियन्ति बन्धुषु। ते यद्यनुत्पादितदोषदृष्टयो बलीयसानात्म्यमदेन मन्युना।।१६।। विद्यातपोवित्त वपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः। स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यन्ति हि धाम भूयसाम्।।१७।। नैतादृशानां स्वजनव्यपेक्षया गृहान् प्रतीयादनवस्थितात्मनाम्। येऽभ्यागतान् वक्रधियाभिचक्षते आरोपितभ्रुभिरमर्षणाक्षिभिः।।१८।।तथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता।

।। सङ्ग्रहोक्तिः।।

स्त्रीणां व्रजद्भिः कलहंसपाण्डुरैर्देवयानैर्नभो मण्डितमस्ति, तत् पश्य।।१२।। हे सुरवर्य! पितृगेह उत्सवं श्रुत्वा सुतायाः शरीरं कथं न प्रचलति, पत्युः गुरोः पितुश्च गेहमनाहुता अपि सुहृदो गच्छन्ति।।१३।। हे देव! मयि प्रसीद, कारुणिको भवान् मम वाञ्छितं कर्तुमर्हति. दयादृष्टिमता त्वया स्वदेहस्याऽर्द्धेंऽशेऽहं धृताऽस्मि, अतो याचितो मामनुगृहाण।।१४।। *मैत्रेय उवाच* - इत्थं प्रियया सत्याऽभिभाषितो भवो हसन् विश्वसृजां समक्षं दक्षो मर्मभिदो यान् वाग्बाणान् मुमोच, तान् स्मरन् तां प्रत्याह।।१५।। *भव उवाच* - हे शोभने! त्वया यदुक्तं तत् शोभनमेव, किन्तु ते बन्धवो बलवत्तरेण देहाभिमानेन क्रोधेन च यदि सुहृत्सु दोषदृष्ट्यो न भवेयुः, तदाऽनाहुता अपि सुहृदोऽभिगच्छन्ति।।१६।। विद्या, तपः, वित्तं, वपुः, वयः, कुलं, च इत्येते षड्गुणाः सत्पुरुषेषु शोभन्ते, तैरेव विद्यातपोवित्तादिभिर्ये गर्विष्ठा भवन्ति, ते महापुरुषाणां प्रतापं नैवावलोकयन्ति।।१७।। अव्यवस्थितचित्तानां पुरुषाणां मनसि स्वजनसमागमेच्छा न भवति, ये पुरतः स्वगृहागताभ्यागतजनानपि वक्रबुद्ध्या क्रोधपूर्णनयनैः पश्यन्ति।।१८।। वक्रबुद्धीनां स्वजनानां दुर्वचनैर्मर्मसु ताडितः पुमान् यथाऽहोरात्रं तप्यते

स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः।।१९।। व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु सम्मता। अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः।।२०।। पापच्यमानेन हृदाऽऽतुरेन्द्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम्। अकल्प एषामधिरोढुमञ्जसा पदं परं द्वेष्टि यथासुरा हरिम्।।२१।। प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे। प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने।।२२।। सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः। सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे नमसा विधीयते।।२३।। तत्ते निरीक्ष्यो न पितापि देहकृद् दक्षो मम द्विट् तदनुव्रताश्च ये। यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरोत्तिरः।।२४।। यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति। सम्भावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते।।२५।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे तृतीयोऽध्यायः।।३।।

।। सङ्ग्रहोक्तिः ।।

तथा शत्रुकृतबाणाघातैरपि न पीड्यते।।१९।। त्वं प्रजापतेर्दक्षस्य दुहितॄणां मध्ये प्रियाऽसि इति मे मताऽसि, तथापि त्वं पितुः सकाशं मानं न लप्स्यसे, यतो दक्षो मम सम्बन्धात् त्वयि सन्तप्यते।।२०।। निरहङ्काराणां महापुरुषाणां पुण्यकीर्त्यादिभिर्गुणैर्यत् स्थानं, तत् प्राप्तुमसमर्थाः मूढाः केवलं दुःखिताः सन्तः असुरा हरिमिव तान् भृशं द्विषन्ति।।२१।। हे शोभने! यन्मिथः प्रत्युत्थान-विनय-नमस्कारादि-शिष्टाचारो विधीयते तद् बुद्धिमद्भिरन्तर्यामिदृष्ट्या विष्णवे क्रियते, न तु देहाभिमानिने ।।२२।। शुद्धं चित्तं वसुदेवशब्देन कथ्यते, तस्मिन् शुद्धे चित्ते भगवान् वासुदेवः साक्षात् प्रकाशते, तं वासुदेवमहं मनसा नमस्करोमि।।२३।। तस्मात् ते जनकोऽपि दक्षो न निरीक्ष्यः, तथा तदनुसृत्य वर्तमाना अपि न निरीक्ष्याः, हे वरोरु! स दक्षो विश्वसृजां यज्ञे गतं निरपराधमपि दुरुक्त्या तिरस्कृतवान्।।२४।। यदि त्वं मद्वचोऽतिक्रम्य तद्गृहान् प्रति यास्यसि, तर्हि भवत्याः सन्मानं न भविष्यति, संभावितस्य स्वजनात् पराभवो

अथ चतुर्थोऽध्यायः ।।४।।

मैत्रेय उवाच – एतावदुक्त्वा विरराम शंकरः पत्न्यङ्गनाशं ह्युभयत्र चिन्तयन्। सुहृद्दिदृक्षुः परिशङ्किता भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा।।१।। सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला। भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः।।२।। ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा। पित्रोरगात्स्त्रैणविमूढधीर्गृहान् प्रेम्णाऽऽत्मनो योऽर्धमदात् सतां प्रियः ।।३।। तामन्वगच्छन् द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः। सपार्षदयक्षा मणिमन्मदादयः पुरो वृषेन्द्रास्तरसा गतव्यथाः।।४।। तां सारिकाकन्दुकदर्पणाम्बुजैः। श्वेतातपत्रव्यजनस्रगादिभिः। गीतायनैर्दुन्दुभिशङ्खवेणुभिर्वृषेन्द्रमारोप्य विटङ्किता ययुः।।५।। आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः।

।। सङ्ग्रहोक्तिः ।।

यदा जायते, स सद्यो मरणाय कल्पते ।।२५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

पतिं हित्वा गतायाः सत्या दक्षयज्ञे देहत्यागः

मैत्रेय उवाच – शिव एतावदुक्त्वा सत्या गमनेऽगमने उभयथा स्वाङ्गनाशरीरनाशं चिन्तयन् विरराम, सुहृद्दिदृक्षुः सती भवात् परिशङ्किता सती गृहान्निष्क्रामती गृहे निर्विशती चेति द्विधा बभूव।।१।। सुहृद्दिदृक्षाप्रतिघातदुर्मनाः सा स्नेहात् रुदन्ती भवानी प्रतिपक्षरहितं शिवं रुषा जातवेपथुः सती प्रधक्ष्यतीवाऽपश्यत्।।२।।ततः सती दीर्घं निःश्वस्य यो प्रेम्णा निजदेहस्याऽर्द्धं दत्तवान् तं शिवं विहाय स्त्रैणविमूढधीः सा शोकेन रोषेण दूयता च हृदा पित्रोर्गृहानगात् ।।३।। मणिमन्मदादयः शिवानुचराः नन्दिपुरोगाः सहस्रशः निर्भयाः सपार्षदयक्षास्तरसा शीघ्रं गच्छन्तीमेकां सतीं तामन्वगच्छन्।।४।। सतीं नन्दीश्वर उपाविश्य सारिकाकन्दुकदर्पणाम्बुजैः श्वेतातपत्रव्यजनस्रगादिभिर्दुन्दुभिशंखवेणुभिरलङ्कृताः शिवानुचरास्तां सतीमनुययुः।।५।।

मृद्दार्वय:काञ्चनदर्भचर्मभिर्निसृष्टभाण्डं यजनं समाविशत् ।।६।। तामागतां तत्र न कश्चनाद्रियद् विमानितां यज्ञकृतो भयाज्जनः। ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ।।७।। सौदर्य्यसम्प्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरम्। दत्तां सपर्यां वरमासनं च सा नादत्त पित्राऽप्रतिनन्दिता सती।।८।। अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ। अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यति रुषा।।९।। जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम्। स्वतेजसा भूतगणान् समुत्थितान् निगृह्य देवी जगतोऽभिशृण्वतः।।१०।। *श्रीदेव्युवाच* – न यस्य लोकेऽस्त्यतिशायनः प्रियस्तथाप्रियो देहभृतां प्रियात्मनः। तस्मिन् समस्तात्मनि मुक्तवैरके ऋते भवन्तं कतमः प्रतीपयेत्।।११।। दोषान् परेषां हि गुणेषु साधवो गृह्णन्ति केचिन्न भवादृशा द्विज। गुणांश्च फल्गून् बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघम्।।१२।। नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु।

।। सङ्ग्रहोक्तिः ।।

एतैः सर्वैः संयुता सती किंचित् कालानन्तरमेव वैदिकमन्त्रघोषोर्जितं ब्रह्मर्षिजुष्टं सर्वतो देवैः सेवितं यागीयसमृद्धिपूर्णं यज्ञस्थानं समाविशत्।।६।। तत्राऽऽगतां सतीं जननीं स्वसॄश्च विना कोऽपि जनो दक्षभयान् नाऽऽद्रियत्, दक्षेण कृतावमानामपि सतीं तज्जनन्यादयस्तु प्रेमाश्रुकण्ठ्यः सत्यो मुदा परिषस्वजुः।।७।। तत्र पित्राऽनादृता सती मात्रा तत्स्वसृभिश्च दत्तां सपर्यां वरमासनं च नाऽऽदत्त।।८।। अरुद्रभागं यज्ञं, पितृकृतं शिवावहेलनं चावेक्ष्य यज्ञसदस्यनादृताऽधीश्वरी सती रुषा लोकान् धक्ष्यतीव चुकोप।।९।। देवी सती दक्षं हन्तुमुद्यतान् मणिमदादीन् भूतगणान् स्वबलेन निवार्य कोपाव्यक्तया गिरा गर्विष्ठं शिवद्विषं दक्षं सर्वेषां शृण्वतां सतां जगर्ह।।१०।। अस्मिन् लोके यस्य शिवस्य देहभृतां मध्ये कोऽपि नाऽतिप्रियः नाऽप्रियश्च विद्यते, ब्रह्मस्वरूपे मुक्तवैरके तस्मिन् शिवे त्वां विना को विरोधमाचरेत् ।।११।। हे द्विज! भवादृशोऽसाधवः परेषां गुणेषु दोषान् एवारोपयन्ति, ये साधवस्ते तु परेषामत्यल्पानपि गुणान् बहुलीकरिष्णवः सन्ति, तेषु महापुरुषेषु भवान् पापं कल्पितवान्।।१२।।

सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजःसु तदेव शोभनम् ।।१३।। यद् द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत्। पवित्रकीर्त्तिं तमलङ्घ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः।।१४।।यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसा-सवार्थिभिः। लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान् द्रुह्यति विश्वबन्धवे ।।१५।। किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने। तन्माल्यभस्मनृकपाल्यवसत्पिशाचै र्ये मूर्धभिर्दधति तच्चरणावसृष्टम् ।।१६।। कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने। छिन्द्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत्स धर्मः।।१७।। अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकण्ठगर्हिणः। जग्धस्य मोहाद्धि विशुद्धिमन्धसो जुगुप्सि-तस्योद्धरणं प्रचक्षते।।१८।। न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः। यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः ।।१९।।

।। सङ्ग्रहोक्तिः ।।

देहात्माभिमानिषु भवादृशेष्वसत्सु सर्वदा सेर्ष्यं महद्विनिन्दनं, तदाश्चर्यं न हि, महापुरुषपाद-पांसुभिर्निरस्ततेजस्सु सेर्ष्यं महद्विनिन्दनमेव शोभनम् ।।१३।। यस्य द्व्यक्षरं "शिव" इति नाम वार्ताप्रसङ्गादपि सकृदुच्चारितं चेत्तर्हि तत् नृणामघमाशु हन्ति, तं पवित्रकीर्तिं शिवमशिवो भवान् द्वेष्टि ।।१४।।यस्य शिवस्य पादपद्मं ब्रह्मानन्दमकरन्दार्थिभिर्महतां मनोऽलिभिर्निषेवितं, यत् जनानां स्वाभीष्टानर्थान् वर्षति, तस्मै शिवाय भवान् द्रुह्यति ।।१५।। जटाः प्रसार्य श्मशाने क्रीडतस्तस्य पादतलादधः पतितं यन्निर्माल्यादिकं, तद् ब्रह्मादिदेवाः शिरसा धारयन्ति, तं सदाशिवं त्वं द्रुह्यसि ।।१६।। यस्यां सभायां महतां निन्दा भवेत् तदा तन्निवारणेऽक्षमः पुरुषः स्वकर्णौ पिधाय बहिर्निर्गच्छेत्, समर्थश्चेत् तदा निन्दकस्य जिह्वां छित्वा स्वस्यापि प्राणांस्त्यजेदेष धर्मः सनातनः ।।१७।। शिवद्वेषिणस्त्वत्तो जातमिदं कलेवरमहं न धारयिष्ये, मोहाद् जग्धस्य दुष्टस्याऽन्नस्य वमनमेव शुद्धिकरं प्रचक्षते ।।१८।। स्वान्तर्यामिणि परब्रह्मणि रममाणस्य शिवस्य मतिर्विधिनिषेधात्मकान् वेदवादान् नानुवर्तते, देवमनुष्ययोर्गतिर्भिन्नैव वर्तते, अतः स्वधर्मे स्थितो नरः परं न निन्देत् ।।१९।।

कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिङ्गमाश्रितम्। विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति।।२०।। मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः। तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिङ्गा अवधूतसेविताः।।२१।। नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना। व्रीडा ममाभूत्कुजनप्रसङ्गतस्तज्जन्म धिग् ये महतामवद्यकृत्।।२२।। गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः। व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत् कुणपं त्वदङ्गजम्।।२३।। *मैत्रेय उवाच* - इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शान्तवाक्। स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत्।।२४।। कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः। शनैर्हृदि स्थाप्य धियोरसि स्थितं कण्ठाद् भ्रुवोर्मध्यमनिन्दिताऽनयत्।।२५।। एवं स्वदेहं महतां महीयसा मुहुः समारोपितमङ्कमादरात्। जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम्।।२६।।

।। सङ्ग्रहोक्तिः।।

वेदेषु प्रवृत्तं निवृत्तं चोभयविधं कर्म प्रतिपाद्यते, तद् ब्रह्मात्मनि शिवे परस्परं विरोधि कर्म युगपत् साधनतां नोपपद्यते।।२०।। हे पितः! अस्मदास्थिता अणिमादिसिद्धिसमृद्धिरूपाः पदव्यो युष्माकं न सन्ति, या भवदीयाः स्वर्गादिपदव्यः सन्ति तास्तु कदन्नतृप्तैरसुहृद्भिस्त्वदीयैरेवाऽभिष्टुताः वर्तन्ते।।२१।।कृतागसस्त्वत्तो जातेन कुत्सितेनाऽनेन देहेन न प्रयोजनम्, कुत्सितजनस्य तव सम्बन्धात् मम व्रीडा भवति, अतस्तज्जन्मनो धिगस्तु।।२२।। किं च वृषभध्वजः शिवो मां दाक्षायणीति त्वदीयगोत्रनाम्ना यदा कथयिष्यति तदा व्यपेतनर्मस्मिताऽहमतिदुःखिता भविष्यामि, तस्मात् त्वदङ्गजातं कलेवरमिदं त्यक्ष्यामि।।२३।। हे विदुर! यज्ञे दक्षं प्रत्येवमुक्त्वा, उदङ्मुखासने स्थित्वा, पीतदुकूलसंवृता शान्तवाक् सती दृशौ निमील्य योगमार्गमनुसृतवती।।२४।।जितासना निर्दोषा सा प्राणापानौ समौ कृत्वा, नाभिचक्रत उदानवायुमुत्थाप्य, धिया सह हृदि संस्थाप्य, तं भ्रुवोर्मध्यमनयत्।।२५।।शिवेन मुहुरुत्सङ्गमारोपितं स्वदेहं दक्षरुषा जिहासती मनस्विनी सती गात्रेषु प्राणवायुप्रयुक्तस्य वह्नेः धारणां

स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम्। ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना।।२७।। तत्पश्यतां खे भुवि चाद्भुतं महद् हाहेति वादः सुमहानजायत। हन्त प्रिया दैवतमस्य देवी जहावसून् केन सती प्रकोपिता।।२८।। अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः। जहावसून् यद्विमताऽऽत्मजा सती मनस्विनी मानमभीक्ष्णमर्हति।।२९।। सोऽयं दुर्मर्षहृदयो ब्रह्मबन्धुर्लोकेऽपकीर्तिं महतीमवाप्स्यति। यदङ्गजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः।।३०।। वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतम्। दक्षं तत्पार्षदा हन्तुमुदतिष्ठन्नुदायुधाः।।३१।। तेषामापततां वेगं निशाम्य भगवान् भृगुः। यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह।।३२।। अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा। ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः।।३३।। तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः। हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा।।३४।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे चतुर्थोऽध्याय।।४।।

।। सङ्ग्रहोक्तिः।।

चकार।।२६।। ततो जगद्गुरोः शिवस्य चरणकमलध्यानानन्दमनुभवन्ती हतकल्मषा सती भर्तुरन्यन्न ददर्श, तदा तस्या देहः समाधिजेनाऽग्निना प्रजज्वाल।।२७।। तन्महदाश्चर्यं पश्यतां भुवि खे च महान् हाहाकारोऽजायत, देवश्रेष्ठस्य शिवस्य प्रिया सती दक्षेण कोपिता सती प्राणान् जहौ।।२८।। अहो!!! प्रजापतेर्दक्षस्य दौर्जन्यं पश्यत, विश्वसुहृदः शिवस्य भार्या दक्षस्य दुहिताऽपि मनस्विनी पितुरपमानिता सती प्राणान् जहौ।।२९।। दुर्हृदयो ब्रह्मधुग् भगवद्भागवत द्रोही दक्षो लोके महतीमपकीर्त्तिमवाप्स्यति, यः स्वां तनयां मरणायोद्यतामपि न न्यवारयत्।।३०।। सत्या आश्चर्यकरं प्राणत्यागं दृष्ट्वा लोक एवं वदति सति उद्यतायुधा रुद्रगणा दक्षं हन्तुमुदतिष्ठन् ।।३१।। समन्तत आपततां रुद्रगणानां वेगं दृष्ट्वा तन्निरोद्धुं यज्ञविघ्नविनाशकेन यजुषा दक्षिणाग्नौ जुहाव।।३२।। भृगुणा हूयमाने सति तीव्रं तपो विधाय सोमं प्राप्ता ऋभुनामानो देवाः सहस्रशः उत्थिताः।।३३।।

अथ पञ्चमोऽध्यायः।।५।।

मैत्रेय उवाच - भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात्। स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे।।१।। क्रुद्धः सुदष्टोष्ठ-पुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम्। उत्कृत्य रुद्रः सहसोत्थितो हसन् गम्भीरनादो विससर्ज तां भुवि।।२।। ततोऽतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहु-र्घनरुक् त्रिसूर्यदृक्। करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विविधोद्यतायुधः।।३।। तं किं करोमीति गृणान्तमाह बद्धाञ्जलिं भगवान् भूतनाथः। दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांशको मे।।४।। आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम्। मेने तदाऽऽत्मानमसङ्गरंहसा महीयसां तात सहः सहिष्णुम्।।५।।

।। सङ्ग्रहोक्तिः।।

ब्रह्मतेजसा दीप्यमानैरलातायुधैः ऋभुभिर्हन्यमाना सगुह्यका प्रमथगणा दिक्षु पलायितवन्तः।।३४।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः।।५।।

वीरभद्रेण यज्ञभङ्गो दक्षवधश्च कृतः

भवो दक्षेणाऽनादृतायाः सत्या निधनं यज्ञे ऋभुभिर्देवैर्विद्रावितं स्वपार्षदसैन्यं च नारदमुखादवगम्य भृशं क्रोधं कृतवान्।।१।। क्रुद्धः संदष्टोष्ठपुटो धूर्जटिस्तडिद्वह्निरोचिषं जटामुत्पाट्य सहसोत्थितोऽभवत्, गम्भीरनादो रुद्रोऽट्टहासं कुर्वन् तां जटां भूमावस्फालयत् ।।२।। ततो जटायाः सकाशात् विशालकायः सहस्रबाहुः सूर्यसमत्रिनयनो भयंकरदंष्ट्रो विविधायुधधारी कृष्णवर्णः स्वदेहेन दिवं स्पृशन्निव वीरभद्रनामा गणाधिपो जातः।।३।।जातमात्रं किं करोमीति कथयन्तं विरभद्रं शिवः प्राह, हे वीरभद्र! त्वं मेंऽशोऽसि, अत एव मत्पार्षदानामग्रणीर्भूत्वा दक्षं तस्य यज्ञं च विध्वंसय।।४।। भो तात! कुपितेन रुद्रेणैवमाज्ञप्तो वीरभद्रो देवदेवं शिवं -

अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम्। उद्यम्य शूलं जगदन्तका-
न्तकं स प्राद्रवद् घोषणभूषणाङ्घ्रिः।।६।। अथर्त्विजो यजमानः सदस्याः ककुब्भु-
दीच्यां प्रसमीक्ष्य रेणुम्। तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च
दध्युः।।७।। वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिर्जीवति होग्रदण्डः।
गावो न काल्यन्त इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते।।८।।प्रसूतिमिश्राः
स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैष तस्य। यत्पश्यन्तीनां दुहितॄणां प्रजेशः
सुतां सतीमवदध्यावनागसम्।।९।। यस्त्वन्तकाले व्युप्तजटाकलापः स्वशूल-
सूच्यर्पितदिग्गजेन्द्रः। वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नु-
भिन्नदिक्।।१०।। अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या।
करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः।।११।। बह्वेवमुद्वि-
ग्नदृशोच्यमाने जनेन दक्षस्य मुहुर्महात्मनः। उत्पेतुरुत्पाततमाः सहस्रशो भयावहा
दिवि भूमौ च पर्यक्।।१२।।

।। सङ्ग्रहोक्तिः ।।

परिचक्रमे, तदा स प्रतिघातरहितवेगेन बलिनामपि बलसहनसमर्थं स्वं मेने।।५।।स वीरभद्रो भृशं नदद्भी रुद्रपार्षदैः परिवेष्टितः सन् ननाद, ततः स जगदन्तकान्तकं त्रिशूलमुद्यम्य घोषणभूषणांघ्रिः सन् दक्षाध्वरं प्रत्यतिवेगमगात्।।६।। अथ ऋत्विजः, यजमानः, सदस्याः, द्विजाः, तत्पत्न्यश्च सर्व उत्तरस्यां दिशि रजःपुञ्जं समीक्ष्य, एतत् तमः किम्? इति वितर्क्य, एतत् कुतरिति चिन्तयामासुः।।७।। इदानीं वायव एते न सन्ति, दस्यवोऽपि न, उग्रदण्डो प्राचीनबर्ही राजा जीवति, गावो न नीयन्ते, किमिदानीं लोकः प्रलयाय कल्पते।।८।। दक्षपत्नी-प्रसूतिसहिताः स्त्रिय उद्विग्नचित्ताः सत्य ऊचुः– इदं दक्षसम्बन्धिनः पापस्य फलम्, यद् दक्षो दुहितॄणां पश्यन्तीनां सतीनां निरपराधां सुतां सतीमवज्ञातवान्।।९।। यो रुद्रः प्रलकाले स्वजटाकलापं प्रसार्य स्वशूलाग्रे दिग्गजान् प्रोत्य हर्षेण नृत्यति।।१०।। असह्यतेजसं क्रोधव्याप्तं भ्रुकुट्या दुर्निरीक्ष्यं रुद्रं कोपयतो विधातुरपि स्वस्ति स्यात् किम्?।।११।। दक्षयज्ञे जनेनैवं बहुधा जल्पति सति भयावहाः सहस्रश उत्पाता भुवि दिवि परितश्चोत्पेतुः।।१२।।

तावत्स रुद्रानुचरैर्मखो महान् नानायुधैर्वामनकैरुदायुधैः। पिङ्गैः पिशङ्गैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत ।।१३।। केचिद्बभञ्जुः प्राग्वंशं पत्नीशालां तथापरे। सद आग्नीध्रशालां च तद्विहारं महानसम् ।।१४।। रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन्। कुण्डेष्वमूत्रयन् केचिद् बिभिदुर्वेदिमेखलाः ।।१५।। अबाधन्त मुनीनन्य एके पत्नीरतर्जयन्। अपरे जगृहुर्देवान् प्रत्यासन्नान् पलायितान् ।।१६।। भृगुं बबन्ध मणिमान् वीरभद्रः प्रजापतिम्। चण्डीशः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत् ।।१७।। सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः। तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् ।।१८।। जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान् भवः। भृगोर्लुलुञ्चे सदसि योऽहसच्छ्मश्रु दर्शयन् ।।१९।। भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि। उज्जहार सदःस्थोऽक्ष्णा यः शपन्तमसूसुचत् ।।२०।। पूष्णश्चापातयद्दन्तान् कालिङ्गस्य यथा बलः। शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः ।।२१।। आक्रम्योरसि दक्षस्य शितधारेण हेतिना। छिन्दन्नपि तदुद्धर्तुं नाशक्नोत् त्र्यम्बकस्तदा ।।२२।।

।। सङ्ग्रहोक्तिः ।।

हे विदुर! तस्मिन् काले नानायुधैरुद्यतायुधैर्वामनकैः पिङ्गैः पिशङ्गैर्मकरसदृशैः परितो धावद्भी रुद्रानुचरैः स महान् मखोऽन्वरुध्यत ।।१३।। केचिद्रुद्रपार्षदा यज्ञशालां बभञ्जुरपरे पत्नीशालां बभञ्जुः, एके मण्डपमाग्नीध्रशालां यजमानगृहं च बभञ्जुः ।।१४।। केचिद् वेदि-मेखला बिभिदुः ।।१५।। अन्ये मुनीनबाधन्त, एके पत्नीरतर्जयन्, अपरे पलायितान् प्राप्तासन्नांश्च देवान् जगृहुः ।।१६।। मणिमान् भृगुं बबन्ध, वीरभद्रो दक्षं बबन्ध, चण्डीशः पूषणमग्रहीत्, नन्दीश्वरो भगमग्रहीत् ।।१७।। देवैः सहिता ऋत्विजस्तैरुद्रानुचरैर्ग्रावभिरर्द्यमानान् भृग्वादीन् दृष्ट्वा नैकधा दुद्रुवुः ।।१८।। स्रुवहस्तस्य जुह्वतो भृगोः श्मश्रूणि वीरभद्रो लुलञ्चे, यो भृगुः सदसि श्मश्रूणि दर्शयन् शिवमहसत् ।।१९।। वीरभद्रः क्रोधेन भुवि पातितस्य भगस्य नैत्र उज्जहार, यः सदस्थो भगः शपन्तं दक्षं नेत्रेण प्रेरितवान् ।।२०।। यथा बलभद्रः कलिङ्गराजस्य तथा वीरभद्रः पुष्णो दतोऽपातयत्, यः पुषा रुद्रे शप्यमाने सति दतो दर्शयन्नहसत् ।।२१।।

शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः। विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ।।२३।। दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे। यजमानपशोः कस्य कायात्तेनाहरच्छिरः।।२४।। साधुवादस्तदा तेषां कर्म तत्तस्य शंसताम्। भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः।।२५।। जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः। तद्देवयजनं दग्ध्वा प्रातिष्ठद् गुह्यकालयम्।।२६।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।।६।।

मैत्रेय उवाच - अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः। शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः।।१।। संछिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्या भयाकुलाः।

।। सङ्ग्रहोक्तिः ।।

यदा दक्षो बद्धस्तदा वीरभद्रो दक्षस्योरसि पादं विन्यस्य निशितेन खड्गेन छिन्दन्नपि तच्छिर उद्धर्तुं नाऽशक्नोत्।।२२।। वीरभद्रो मन्त्रसहितैः शस्त्रैरनिर्भिन्नत्वचं दक्षं दृष्ट्वा परं विस्मयमापन्नः सन् चिरं विचारितवान्।।२३।। वीरभद्रोऽध्वरे मारणसम्बन्धिनमुपायं दृष्ट्वा तेनैवोपायेन यजमानपशोर्दक्षस्य कायाच्छिरोऽहरत्।।२४।। वीरभद्रस्य तत्कर्म स्तुवतां भूतप्रेतपिशाचानां साधुवादोऽभवत्, ब्राह्मणादीनामसाधुवादोऽभवत्।।२५।। संक्रुद्धो वीरभद्र एतच्छिरस्तस्मिन् दक्षिणाग्नौ जुहाव, एवं तद्देवयजनस्थानं दग्ध्वा शिवगणः कैलासं प्रययौ।।२६।। *इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः।।५।।*

अथ षष्ठोऽध्यायः ।।६।।

ब्रह्मसहितदेवानां कैलासगमनं रुद्रस्य स्तवनं च

मैत्रेय उवाच - एवं रुद्रसैन्यैः पराजिताः, शूल-पट्टिश-निस्त्रिंश-गदा-परिघ-मुद्गरैः संछिन्नभिन्नसर्वाङ्गा भयाकुला ऋत्विक्सभ्यैः सहिता देवगणाः स्वयंभुवं प्राप्यैतद् वृत्तं कार्त्स्न्येन न्यवेदयन्।।१-२।।

स्वयम्भुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन्।।२।। उपलभ्य पुरैवैतद्भगवानब्ज-सम्भवः। नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः।।३।। तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि। क्षेमाय भूयसे भूयान्न प्रायेण बुभूषताम्।।४।। अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं परादुः। प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीताङ्घ्रिपद्मम्।।५।। आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन्। तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः।।६।। नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम्। विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतन्त्रस्य क उपायं विधित्सेत्।।७।। स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः। ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः।।८।। जन्मौषधितपोमन्त्रयोगसिद्धैर्नरेतरैः। जुष्टं किन्नरगन्धर्वैरप्सरोभिर्वृतं सदा।।९।। नानामणिमयैः शृङ्गैर्नानाधातुविचित्रितैः। नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः।।१०।। नानामलप्रस्रवणैर्नानाकन्दरसानुभिः।

।। सङ्ग्रहोक्तिः।।

स्वयं ब्रह्मा विश्वात्मा नारायणश्च प्रथमत एवैतद् वृत्तमुपलभ्य दक्षाध्वरं प्रति नेयतुः।।३।। ब्रह्मा तद् वृत्तमाकर्ण्य प्राह, तेजीयसि अपराधे कृते सति प्रायेण भूयसे क्षेमाय न स्यात्।।४।। तथापि ये शिवस्य यज्ञे भागं बहिष्कृतवन्तस्तेऽपराधिनः सर्वे यूयं परिशुद्धचेतसा रुद्रस्य पादावुपसंगृह्य क्षिप्रप्रसादं शिवं प्रसादयध्वम्।।५।। यस्मिन् शिवे कुपिते सति दिक्पालसहितो लोको नश्येत्, दुर्वचनैर्विद्धं, भार्यया विहीनं तं शिवं यज्ञस्य जीवितं पुनः प्रार्थयमाना यूयं शीघ्रं क्षमापयध्वम्।।६।। यस्य रुद्रस्य स्वरूपयाथात्म्यं बलवीर्ययोः प्रमाणं चाहं न जाने, इन्द्रः, यूयं देवाः, मुनयः, अन्ये देहिनोऽपि रुद्रं न विदुः, अत आत्मतन्त्रस्य तस्य क्षेमोपायं को विधित्सेत्।।७।। ब्रह्मा तान् सुरानित्थमादिश्य, तैः प्रजापतिभिः पितृभिः देवैश्च सहितो निजस्थानात् शिवस्य प्रियमद्रिप्रवरं कैलासं ययौ।।८।। यः कैलासो जन्म-औषधि-तपो-मन्त्र-योग-सिद्धैः- किन्नर-गन्धर्वैरप्सरोगणैः सदा सेवितो वर्तते।।९।। यो गिरिर्विविधमणिमयै-रनेकधातुचित्रितैः शिखरैः विराजितः, नानाद्रुमलताभिर्मृगगणैश्च व्याप्तः सुशोभते।।१०।।

रमणं विहरन्तीनां रमणैः सिद्धयोषिताम् ।।११।। मयूरकेकाभिरुतं मदान्धालि-
विमूर्च्छितम्। प्लाविते रक्तकण्ठानां कूजितैश्च पतत्त्रिणाम् ।।१२।। आह्वयन्त-
मिवोद्धस्तैर्द्विजान् कामदुघैर्द्रुमैः। व्रजन्तमिव मातङ्गैर्गृणन्तमिव निर्झरैः।।१३।।
मन्दारैः पारिजातैश्च सरलैश्चोपशोभितम्। तमालैः शालतालैश्च कोविदारासनार्जुनैः
।।१४।। चूतैः कदम्बैर्नीपैश्च नागपुन्नागचम्पकैः। पाटलाशोकबकुलैः कुन्दैः कुरबकै-
रपि ।।१५।। स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः। कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च
मण्डितम् ।।१६।। पनसोदुम्बराश्वत्थप्लक्षन्यग्रोधहिङ्गुभिः। भूर्जैरोषधिभिः पूगैः
राजपूगैश्च जम्बुभिः ।।१७।। खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेङ्गुदैः। द्रुमजातिभि-
रन्यैश्च राजितं वेणुकीचकैः ।।१८।। कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः। नलिनीषु
कलं कूजत्खगवृन्दोपशोभितम् ।।१९।। मृगैः शाखामृगैः क्रोडैर्मृगेन्द्रैर्ऋक्षशल्यकैः।
गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः ।।२०।। कदलीषण्डसंरुद्धनलिनीपुलिन-
श्रियम्। पर्यस्तं नन्दया सत्याः स्नानपुण्यकरोदया ।।२१।। विलोक्य भूतेशगिरिं
विबुधा विस्मयं ययुः। ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीम् ।।२२।।

।। सङ्ग्रहोक्तिः ।।

यो नानानिर्झरेषु नैक कन्दरसानुषु च रमणैः सह विहरन्तीनां सिद्धयोषितामानन्ददायको
वर्तते ।।११।। यः कैलासो मयूरकेकाभिः कूजितः, मत्तभ्रमरैर्मूर्च्छितः, कोकिलानां प्लुतशब्दै-
र्गुञ्जितश्च दृश्यते ।।१२।। यः कामदुघैर्वृक्षैरुन्नतशाखाभिः पक्षिण आह्वयन्निव, मातङ्गैः
व्रजन्निव, निर्झराणां ध्वनिभिर्भाषमाण इव प्रतीयते ।।१३।। यो मन्दार-पारिजात-सरल-
तमाल-शाल-ताल-कोविदारा-ऽर्जुन-चूत-कदम्ब-नीप-नाग-पुन्नाग-चम्पकादिभि-र्वृक्षैर्भव्यो
दृश्यते ।।१४-१५।। यो गिरिः मल्लिकाभिर्मालतीभिः पनसैरुदुम्बरैः पिप्पलैर्वटैः पूगैर्जम्बुभिः
खर्जूरादिभिर्जातिभिश्च समृद्धो शोभितश्च वर्तते ।।१६-१८।। स कैलासः कुमुदोत्पलकल्हारशत-
पत्रवनसमृद्धिभिर्विराजते, सरस्सु कूजत्खगवृन्दैरुपशोभते ।।१९।। मृग-कपि-क्रोड-मृगेन्द्रैः
ऋक्षशल्यकैः, गवय-कस्तूरिमृग-व्याघ्र-महिषादिभिर्नितरां सेवित आसीत् ।।२०।। कदलीसंरुद्ध
नलिनीशोभः सः स्नानपुण्यकरोदकया निर्मलया गङ्गया परिवेष्टितो भवति ।।२१।।

वनं सौगन्धिकं चापि यत्र तन्नाम पङ्कजम्। नन्दा चालकनन्दा च सरितौ बाह्यतः पुरः।।२३।। तीर्थपादपदाम्भोजरजसातीव पावने। ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः।।२४।। क्रीडन्ति पुंसः सिञ्चन्त्यो विगाह्य रतिकर्शिताः। ययोस्तत्स्नानविभ्रष्टनवकुङ्कुमपिञ्जरम्। वितृषोऽपि पिबन्त्यम्भः पाययन्तो गजा गजीः।।२५।। तारहेममहारत्नविमानशतसंकुलाम्। जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम्।।२६।। हित्वा यक्षेश्वरपुरीं वनं सौगन्धिकं च तत्। द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः।।२७।। रक्तकण्ठखगानीकस्वरमण्डितषट्पदम्। कलहंस-कुलप्रेष्ठं खरदण्डजलाशयम्।।२८।। वनकुञ्जरसंघृष्टहरिचन्दनवायुना। अधि पुण्यजनस्त्रीणां मुहुरुन्मदयन्मनः।।२९।। वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः। व्याप्ताः किम्पुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटम्।।३०।। स योजनशतोत्सेधः पादोन-विटपायतः। पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः।।३१।।

।। सङ्ग्रहोक्तिः।।

देवा रुद्रस्य कैलासगिरिं विलोक्य विस्मयं प्रापुः, ततस्ते शिवस्य अलकां नाम पुरीं ददृशुः।।२२।। तत्र ते सौगन्धिकं वनमपि ददृशुः, पुर्या बहिर्भागे नन्दा, अलकनन्दा चेति द्वे सरितौ प्रवहतः ।।२३।।ते सरितौ हरिपादपद्मरजसाऽत्यन्तपवित्रतापादिके भवतः, यत्र विहारश्रान्ता देवाङ्गनाः स्वविमानेभ्योऽवरुह्य, ययोः सरितोः प्रविश्य स्वप्रियान् सिञ्चन्त्यः सत्यो जलक्रीडां कुर्वन्ति, यत्राऽतृषिता अपि वनगजाः तत्स्नानधौतकुंकुमपिञ्जरं जलं पिबन्ति करिणीः पाययन्ति च ।।२४-२५।।स्वर्णरौप्यरत्नजटितविमानशतैराकुलां सतडिद्घनैर्व्याप्तं नभ इव पुण्यजनस्त्रीभिः संकुलामलकां च नगरीं वीक्ष्य ते सर्वे पुरतो विद्यमानं कामदुघैश्चित्रमाल्यफलैः कल्पवृक्षैः शोभितं सौगन्धिकं वनमपश्यन्।।२६-२७।।तद् वनं कोकिलसंघस्वरमण्डितषट्पदैः गुञ्जितं, कलहंससमूहप्रियं पद्मसमृद्धजलाशयं चाऽऽसीत्।।२८।। तस्मिन् वने कुञ्जरघृष्टानां हरिचन्दनानां सुगन्धिवायुना पुण्यजनस्त्रीणां मनो मदव्याप्तं भवति।।२९।।तत्र वैदुर्यकृतसोपाना उत्पलमालिन्यः किंपुरुषव्याप्ता वाप्य आसन्, ता दृष्ट्वा समीपस्थमेकं वटवृक्षं ब्रह्मादयो ददृशुः।।३०।।स वट उच्चै र्योजनशतपरिमितः पञ्चसप्ततियोजनविस्तृताभिः शाखाभिर्मनोहर-

तस्मिन्महायोगमये मुमुक्षुशरणे सुराः। ददृशुः शिवमासीनं त्यक्तामर्षमिवान्तकम् ।।३२।। सनन्दनाद्यैर्महासिद्धैः शान्तैः संशान्तविग्रहम्। उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम् ।।३३।। विद्यातपोयोगपथमास्थितं तमधीश्वरम्। चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम् ।।३४।। लिङ्गं च तापसाभीष्टं भस्मदण्डजटाजिनम्। अङ्गेन संध्याभ्ररुचा चन्द्रलेखां च बिभ्रतम् ।।३५।। उपविष्टं दर्भमय्यां वृष्यां ब्रह्म सनातनम्। नारदाय प्रवोचन्तं पृच्छते शृण्वतां सताम् ।।३६।। कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि। बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ।।३७।। तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षाम्। सलोकपाला मुनयो मनूनामाद्यं मुनिं प्राञ्जलयः प्रणेमुः ।।३८।। स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवन्दिताङ्घ्रिः। उत्थाय चक्रे शिरसाभिवन्दनं महत्तमः कस्य यथैव विष्णुः ।।३९।। तथापरे सिद्धगणा महर्षिभिर्ये वै समन्तादनु नीललोहितम्। नमस्कृतः प्राह शशाङ्कशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ।।४०।। *ब्रह्मोवाच* - जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः। शक्तेः शिवस्य च परं यत्तद् ब्रह्म निरन्तरम् ।।४१।।

।। सङ्ग्रहोक्तिः ।।

स्तापरहितो निर्नीडश्चाऽऽसीत् ।।३१।। महायोगमये मुमुक्षुशरणे वटाधःप्रदेशे आसीनं त्यक्तक्रोधं कालमिव शिवं सुरा ददृशुः ।।३२।। स शिवः महासिद्धैः सनन्दनाद्यैर्गुह्यककरक्षसां पत्या कुबेरेण च सेवित आसीत् ।।३३।। विद्यातपोयोगस्थितः, सर्वेषामधीश्वरो विश्वसुहृद् तापसजनप्रियं भस्म-दण्ड-जटा-जिनादिकं धारयन्, मस्तके चन्द्रलेखां च दधत्, दर्भमय्यां वृष्यामुपविष्टः सतां शृण्वतां पृच्छते नारदाय सनातनं ब्रह्म कथयन्नासीत् ।।३४-३६ ।। सव्यं चरणं दक्षिणोरौ निवेश्य, सव्ये जानुनि बाहुं कृत्वा, मणिबन्धेऽक्षमालां च धारयित्वा तर्कमुद्रयाऽऽसीन आसीत् ।।३७।। बह्मसमाधिमास्थितं योगकक्षां व्यपाश्रितं तं गिरिशं सलोकपाला मुनयो बद्धाञ्जलयः सन्तः प्रणेमुः ।।३८।। स शिवस्तु सुरासुरेशैरभिवन्दिताघ्रिं ब्रह्माणं पुरतः समुपस्थितं दृष्ट्वा समुत्थाय च शिरसा प्रणामं चकार ।।३९।। शिवानुयायिनो मुनयश्च ब्रह्मणे नमश्चक्रुः, तदा ब्रह्मा प्रहसन्निव स्वं प्रणमन्तं शशिशेखरं प्रोवाच ।।४०।। *ब्रह्मोवाच* - विश्वस्य जगतो योनिबीजयोः

त्वमेव भगवन्नेतच्छिवशक्त्योः सरूपयोः। विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा॥४२॥ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरम्। त्वयैव लोकेऽवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः॥४३॥ त्वं कर्मणां मङ्गल-मङ्गलानां कर्तुः स्म लोकं तनुषे स्वः परं वा। अमङ्गलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित्॥४४॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वपि पश्यतां तव। भूतानि चात्मन्यपृथग् दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम्॥४५॥ पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम्। परान् दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान्मा वधीद्दैववधान् भवद्विधः॥४६॥ यस्मिन् यदा पुष्कर-नाभमायया दुर्लङ्घ्यया स्पृष्टधियः पृथग्दृशः। कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात्कृते क्रमम्॥४७॥ भवांस्तु पुंसः परमस्य मायया। दुरन्तया-स्पृष्टमतिः समस्तदृक्। तया हतात्मस्वनुकर्मचेतस्स्वनुग्रहं कर्तुमिहार्हसि प्रभो॥४८॥ कुर्वध्वरस्योद्धरणं हतस्य भो त्वयाऽसमाप्तस्य मनो प्रजापतेः।

॥ सङ्ग्रहोक्तिः॥

शक्तेः शिवस्य च परं यत्, तद् निरन्तरं ब्रह्मात्मकत्वात् ब्रह्म जाने॥४१॥ हे भगवन्! ब्रह्मात्मकः कृत्स्नचिदचिदात्मकः प्रपञ्चशरीरकस्त्वमूर्णनाभिवत् क्रीडन्नेतद् जगत् सृजसि रक्षसि संहरसि च॥४२॥ धर्मादिपुरुषार्थसिद्धये त्वमेव क्रतुं ससर्जिथ, वर्णाश्रमधर्ममर्यादाऽपि त्वयैव निबद्धाऽस्ति॥४३॥ हे मंगल! शुभकर्मणां फलं मोक्षं च त्वं ददासि, अशुभकर्मप्रवृत्तानां च नरकं प्रयच्छसि॥४४॥ ये तु त्वच्चरणार्पितसर्वस्वाः साधवः सन्ति तेषां मनसि क्रोधो नैव जायते, तदा भवद्धृदये क्रोधः कुतो भवेत्॥४५॥ ये तु देहाभिमानेन भिन्नबुद्धयः, परोत्कर्षा-सहिष्णवः, दुराशयाः, दुरुक्तैः परमर्मान्तक पीडकाः, दुर्दैवहताः, तान् भवद्विधः कदापि न हन्ति॥४६॥ यस्मिन् देशे काले च दुर्लङ्घ्यया भगवन्मायया मोहितचिताः जना भेदबुद्धयो भवन्ति, तदा साधवः तदपराधमविगण्य तदुपरि कृपां कुर्वन्ति, न तु तेषामप्रियम्॥४७॥ हे प्रभो! भवांस्तु दुरन्तया तया भगवन्मायया सर्वथाऽस्पृष्टमतिरस्ति, तया मायया मोहितचित्तेषु सापराधेषु जनेषु त्वमनुग्रहं कर्तुमर्हसि॥४८॥ हे रुद्र! त्वया हतस्य, अत एवाऽसमाप्तस्य

न यत्र भागं तव भागिनो ददुः कुयज्विनो येन मखो निनीयते ।।४९।। जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः। भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत् ।।५०।। देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः। भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरम् ।।५१।। एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै। यज्ञस्ते रुद्रभागेन कल्पतामद्य यज्ञहन् ।।५२।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे षष्ठोऽध्यायः।। ६।।

अथ सप्तमोऽध्यायः ।। ७।।

मैत्रेय उवाच - इत्यजेनानुनीतेन भवेन परितुष्यता। अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ।।१।। *रुद्र उवाच* - नाघं परेश बालानां वर्णये नानुचिन्तये। देवमायाभिभूतानां दण्डस्तत्र धृतो मया ।।२।। प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः। मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ।।३।।

।। सङ्ग्रहोक्तिः ।।

प्रजापतेर्दक्षस्य यज्ञस्य पुनरुद्धारं कुरु, यस्मिन् कुयज्विनो भागार्हस्य तव भागं न ददुः ।।४९।। अयं यजमानो दक्ष जीवतात्, भगोऽक्षिणी प्राप्नुयात्, भृगोः श्मश्रूणि पूष्णो दन्ताश्च पूर्ववत् रोहन्तु ।।५०।। हे शिव! विविधायुधैः प्रस्तरैश्चाऽऽहतानां देवानामृत्विजां च शरीराणि भवदनुग्रहादनातुराणि भवन्तु, अधुना तव भागेन यज्ञः सम्पाद्यताम् ।।५२।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः ।।६।।

अथ सप्तमोऽध्यायः ।।७।।

विष्णोः प्राकट्यं दक्षयज्ञस्य प्रवर्तनं च

मैत्रेय उवाच - हे विदुर! ब्रह्मणा एवं प्रार्थितः, तेन परितुष्यंश्च भवः प्रहस्य सर्वे शृण्वन्तु इत्यामन्त्र्य बभाषे ।।१।। *रुद्र उवाच* - हे परेश! देवमायाभिभूतानामपराधमहं न वर्णये, न च स्मरामि, किंतु तत्र मया दण्डनमात्रं कृतम् ।।२।। दग्धशिरसः प्रजापतेर्दक्षस्य शिरोऽजमुखं

पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक्। देवाः प्रकृतसर्वाङ्गा ये म उच्छेषणं ददुः।।४।। बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः। भवन्त्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत्।।५।। *मैत्रेय उवाच* – तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम्। परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्।।६।। ततो मीढ्वांसमामन्त्र्य शुनासीराः सहर्षिभिः। भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः।।७।। विधाय कार्त्स्न्येन च तद्यदाह भगवान् भवः। संदधुः कस्य कायेन सवनीयपशोः शिरः।।८।। संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः। सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम्।।९।। तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः। शिवावलोकादभवच्छरद्ध्रद इवामलः।।१०।। भवस्तवाय कृतधीर्नाशक्नोदनुरागतः। औत्कण्ठ्याद्बाष्पकलया सम्परेतां सुतां स्मरन्।।११।। कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः।।१२।। *दक्ष उवाच* – भूयाननुग्रह अहो भवता कृतो मे दण्डस्त्वया मयि भृतो यदपि प्रलब्धः। न ब्रह्मबन्धुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु।।१३।।

।। सङ्ग्रहोक्तिः।।

भवतु, भगः स्वं यज्ञभागं मित्रचक्षुषा पश्यतु।।३।। पिष्टभुक् पूषा यजमानस्य दद्भिर्जक्षतु, ये देवा मह्यं यज्ञावशिष्टं ददुः ते सर्वे संपूर्णस्वस्थाङ्गा भवन्तु।।४।। येषां बाहवो नष्टास्ते ऋत्विजोऽश्विनो बाहुभ्यां पूष्णो भुजाभ्यां च कृतबाहवो भवन्तु, भृगुश्छागश्मश्रुर्भवेत्।।५।। *मैत्रेय उवाच* – एवं शिवकथितं श्रुत्वा तत्र स्थिताः सर्वे देवाः साधु साध्विति प्राहुः।।६। ततो रुद्रमामन्त्र्य सर्वे ऋषयो ब्रह्मशिवादयो देवाश्च पुनर्यज्ञस्थानं जग्मुः।।७।। तत्र गत्वा ते सर्वे यथा शिवः प्राह तथा सर्वं चक्रुः, ततो सवनीयपशोः छागस्य शिरो दक्षशरीरेण सह योजयामासुः।।८।।तदा रुद्राभिवीक्षितो दक्षः सुप्त इव सद्य उत्तस्थौ, उत्थितः सः पुरः शिवं ददर्श।।९ ।। पूर्वं शिवद्वेषेण कलुषितात्मा दक्षस्तदा शिवावलोकनाच्छरत्कालीनो ह्रद इव निर्मलोऽभवत्।।१०।। अथ शिवस्तवनाय प्रवृत्तो दक्षः स्वां सुतां सतीं स्मरन् प्रेमविह्वलो जातः, पश्चादतिप्रयासेन मनः स्थिरीकृत्य शुद्धहृदयेन शिवं तुष्टाव।।११-१२।। *दक्ष उवाच* – हे भगवन्!

विद्यातपोव्रतधरान् मुखतः स्म विप्रान् ब्रह्माऽऽत्मतत्त्वमवितुं प्रथमं त्वमस्राक्।
तद् ब्राह्मणान् परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदण्डः।।१४।।
योऽसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तविशिखैरगणय्य तन्माम्। अर्वाक्
पतन्तमर्हत्तमनिन्दयाऽपाद् दृष्ट्याऽऽर्द्रया स भगवान् स्वकृतेन तुष्येत्।।१५।।
मैत्रेय उवाच - क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमन्त्रितः। कर्म सन्तानयामास
सोपाध्यायर्त्विगग्निभिः।।१६।। वैष्णवं यज्ञसन्तत्यै त्रिकपालं द्विजोत्तमाः। पुरोडाशं
निरवपन् वीरसंसर्गशुद्धये।।१७।। अध्वर्युणाऽऽत्तहविषा यजमानो विशाम्पते। धिया
विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः।।१८।। तदा स्वप्रभया तेषां द्योतयन्त्या दिशो
दश। मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना।।१९।। श्यामो हिरण्यरशनोऽर्क-
किरीटजुष्टो नीलालकभ्रमरमण्डितकुण्डलास्यः। कम्ब्वब्जचक्रशरचापगदासिचर्म-
व्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः।।२०।। वक्षस्यधिश्रितवधूर्वनमाल्युदारहासाव-
लोककलया रमयंश्च विश्वम्।

।। सङ्ग्रहोक्तिः ।।

त्वया केवलं मयि शिक्षा कृता, न त्वहमुपेक्षितः, अहो! भवता मेऽतिमहाननुग्रहः कृतः, ब्रह्मबन्धुषु तव हरेश्चोपेक्षा नास्ति।।१३।। चतुर्मुखरूपी भवान् वेदं जीवपरयाथात्म्यं चाऽवितुं विद्यातपोव्रतधरान् विप्रान् मुखतः सृष्टवानसि, प्रगृहीतदण्डो गोपालः पशूनिव सर्वविपत्सु त्वं ब्राह्मणान् पासि।।१४।। तत्त्वज्ञानरहितेन मया सदसि दुर्वचनबाणैस्ताडितोऽपि भवान् मदपराधमविगणय्याऽर्हत्तमनिन्दयाऽधःपतन्तं मां कृपार्द्रया दृष्ट्याऽरक्षत्, अतः मयि स्वकृतेनोपकारेण भगवान् तुष्यतु।।१५।। *मैत्रेय उवाच* - स दक्षः शिवमेवं प्रसाद्य तदा रुद्राभिवीक्षितो दक्षः सुप्त इव सद्य उत्तस्थौ, उत्थितः सः पुरः ब्रह्मणा शिवेन चाऽनुज्ञातः सन् सोपाध्यायैः ऋत्विगग्निभिः यज्ञकर्म समापयामास।।१६।। ते ऋत्विजश्च वीरभद्रसंसर्गदोषनिवारणाय यज्ञसंतत्यै च वैष्णवं त्रिकपालं पुरोडाशं निरवपन्।।१७।। हे विदुर! ततः पुरोडाशाहुतिं गृहीत्वाऽध्वर्युणा साकं यजमानेन ध्यातो भगवान् विष्णुस्तत्र प्रादुरभूत्।।१८।। तदा दश दिशो द्योतयन्त्या स्वशरीरकान्त्या तेषां सदस्यानां तेजो मुष्णन् हरिस्तत्र गरुडेन प्रापितः।।१९।।

पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः।।२१।। तमुपागत-
मालक्ष्य सर्वे सुरगणादयः। प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः।।२२।। तत्तेजसा
हतरुचः सन्नजिह्वाः ससाध्वसाः। मूर्ध्ना धृताञ्जलिपुटा उपस्थुरधोक्षजम्।।२३।।
अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः। यथामति गृणन्ति स्म कृतानुग्रह-
विग्रहम्।।२४।। दक्षो गृहीतार्हणसाधनोत्तमं यज्ञेश्वरं विश्वसृजां पतिं गुरुम्। सुनन्द-
नन्दाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः कृताञ्जलिः।।२५।। *दक्ष उवाच* - शुद्धं
स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम्। तिष्ठंस्तयैव
पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवात्मतन्त्रः।।२६।। *ऋत्विज ऊचुः* -
तत्त्वं न ते वयमनञ्जन रुद्रशापात् कर्मण्यवग्रहधियो भगवन्विदामः। धर्मोप-
लक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदो व्यवस्थाः।।२७।। *सदस्या
ऊचुः* - उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्याधान्विष्टे विषयमृगतृष्णात्म-
गेहोरुभारः।

।। सङ्ग्रहोक्तिः ।।

घनश्यामः काञ्चनकटिमेखलः,सूर्यसदृशकिरीटेन नीलालकभ्रमरैः सुशोभितकुण्डलद्वयेन च युक्तेन मुखाम्बुजेन राजमानः, शंख-चक्र-गदा-पद्मा-ऽसि-चर्म-धनुर्-बाणधरः, वक्षसि श्रिया वनमालया छत्रचामरव्यजनैश्चालंकृतः, उदारहासावलोककलया विश्वं रमयन्।।२०-२१।। समीपमागतं तमालक्ष्य ब्रह्मरुद्रेन्द्रमुख्या सर्वे सुरगणाः सहसोत्थाय तं नमश्चक्रुः।।२२।। तत्तेजसा हतप्रभा गद्गदवाचः क्षुभितचित्ता मूर्द्धसु विधृताञ्जलिपुटाः सन्तः सर्वे तं तुष्टुवुः।।२३।। भगवतो महिमानं ज्ञातुमनर्हमनोवृत्तयः सन्तः शिवादयो भक्तानुग्रहार्थं प्रकटितं भगवन्तं यथामत्यस्तुवन्।।२४।। तत्र प्रथमं दक्ष उत्तमैः पूजासाधनैर्विश्वसृजां पतिं यज्ञेश्वरं सुनन्द-नन्दादिपार्षदैर्वृतं विष्णुं पूजयित्वा शरणागतो भूत्वा बद्धाञ्जलिः सन् तुष्टाव।।२५।। *दक्ष उवाच* - अकर्मवश्यः स्वस्वरूपे मायां निरस्य वर्तमानः शश्वन्निवृत्ताखिलमनोभावश्चिन्मात्र एवंविधस्वस्वरूपानुभवमत्यजन्नपि पुरुषाकारतामुपेत्य स्वतन्त्रो भवान् कर्मवश्यजीव इव आस्ते, एतन् महदाश्चर्यम्।।२६।। *ऋत्विज ऊचुः* - हे निरञ्जन! वयं सर्वे नन्दिकेश्वरशापात्

द्वन्द्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः ।।२८।। *रुद्र उवाच* - तव वरद वराङ्घ्रावाशिषेहाखिलार्च्ये ह्यपि मुनिभिरसक्तैरादरेणार्हणीये। यदि रचितधियं माविद्यलोकोऽपविद्धं जपति न गणये तत्त्वत्परानुग्रहेण।।२९।। *भृगुरुवाच* - यन्मायया गहनयापहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः। नात्मन् श्रितं तव विदन्त्यधुनापि तत्त्वं सोऽयं प्रसीदतु भवान् प्रणतात्मबन्धुः ।।३०।। *ब्रह्मोवाच* - नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत्। ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद् व्यतिरिक्तोऽसतस्त्वम्।।३१।। *इन्द्र उवाच* - इदमप्यच्युत विश्वभावनं वपुरानन्दकरं मनोदृशाम्। सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः।।३२।। *ऋत्विक्पत्न्य ऊचुः* - यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात्। तं नस्त्वं शवशयनाभशान्तमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि।।३३।।

।। सङ्ग्रहोक्तिः ।।

कर्मण्येव दुराग्रहचित्ताः सन्तस्ते तत्त्वं न विदामः, किंतु अस्माभिर्धर्मोपलक्षणमध्वरसंज्ञं तव रूपं ज्ञातमस्ति।।२७।। *सदस्या ऊचुः* - हे अशरणशरण! अस्मिन् संसारमार्गे वर्तमानोऽयमज्ञजनसमुदायः कामपीडितः सन् विश्रान्तिस्थानरूपं तव पादपद्मं कदा प्राप्स्यति।।२८।। *रुद्र उवाच* - हे वरद! इह लोके सकामैर्निष्कामैश्च जनैः पूजनीये तव चरणारविन्दे न्यस्तचित्तं मामज्ञलोक आचारहीनं जल्पति तथापि त्वत्पराणामनुग्रहेण तन्निन्दनमहं न गणये।।२९।। *भृगुरुवाच* - यस्य गहनया मायया गतात्मबोधा ब्रह्मादयोऽपि संसारे शयाना वर्तन्ते, ते तव तत्त्वं न विदन्ति, अतः प्रणतात्मबन्धुर्भवान् मयि प्रसीदतु।।३०।। *ब्रह्मोवाच* - अयं जीवः पदार्थभेदग्रहैश्चक्षुरादिभिरिन्द्रियैर्यत् पश्यति तत्तव स्वरूपं भवितुं नैवार्हति, यतस्त्वं मायापरिणामरूपात् देहादेः तत्संसृष्टाज्जीवाच्चाऽत्यन्तं विलक्षणोऽसि।।३१।। *इन्द्र उवाच* - हे अच्युत! इदं तव वपुर्विश्वं दर्शनादिना सुखितं करोति, तथा चासुरविनाशकैरुदायुधैरष्टभिर्भुजदण्डैर्युक्तमपि धर्मादिरक्षार्थमुपयुक्तं भवति।।३२।। *ऋत्विक् पत्न्य ऊचुः* - हे यज्ञात्मन्! अयं यज्ञो दक्षेण तवाराधनायाऽऽरब्धोऽपि रुद्रकोपाद् विध्वस्तः, इदानीं तं यज्ञं नलिनरुचा

ऋषय ऊचुः– अनन्वितं ते भगवन् विचेष्टितं यदात्मनाऽऽचरसि हि कर्म नाज्यसे। विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्त्तिनीं भवान्।।३४।। *सिद्धा ऊचुः* - अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः। तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसम्पन्नवन्नः।।३५।। *यजमान्युवाच* –स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कान्तया त्राहि नः। त्वामृतेऽधीश नाङ्गैर्मखः शोभते शीर्षहीनः कबन्धो यथा पूरुषः।।३६।। *लोकपाला ऊचुः* – दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टया दृश्यते येन दृश्यम्। माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पञ्चभिर्भासि भूतैः।।३७।। *योगेश्वरा ऊचुः* – प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः। अथापि भृत्येशतयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल।।३८।। जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयाऽऽत्ममायया। रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः।।३९।।

।। सङ्ग्रहोक्तिः।।

दृशा पुनीहि।।३३।। *ऋषय ऊचुः* – हे भगवन्! इदं ते चरित्रं विस्मयनीयं यत् त्वं स्वयं कर्म करोषि तथापि तत्र सुकृतदुष्कृतेन न सज्जसे, अन्यदपि यां लक्ष्मीं ब्रह्मादयो विभूतय उपसेदुः, त्वामनुवर्तिनीं तां त्वं न मन्यसे।।३४।। *सिद्धा ऊचुः*– आध्यात्मिकादिदुःखदावाग्निदग्धोऽस्माकं मनोवारणस्त्वत्कथामृतनद्यां प्रविष्टः सन् सांसारिकतापं नैवाऽनुभवति, अत एव ततो बहिर्नैव निःसरति।।३५।। *यजमान्युवाच* – हे ईश! तव स्वागतम्, हे श्रीनिवास! तुभ्यं नमः, यथा शिरोहीनः कबन्धो न शोभते तद्वत् त्वया हीनोऽयं मखो न शोभते, अतो लक्ष्म्या सह त्वं नः पाहि।।३६।। *लोकपाला ऊचुः* – हे भूमन्! किमस्माभिश्चर्मचक्षुर्भिर्भवान् दृष्टः? शुद्धमनसां त्वं शुद्धसत्त्वरूपतया दृश्यसे देहाद्यात्माभिमानिनामस्माकं तथा न दृश्यसे, अतोऽस्मान् धिक्।।३७।। *योगेश्वरा ऊचुः* – यः पुमान् स्वस्याऽब्रह्मात्मकत्वं न पश्येत्, अस्मात्तत्त्वदर्शिनः सकाशाद् अन्यस्ते प्रियो नास्ति, तथापि हे ईश! भक्तिपूर्वकं त्वां भजतोऽस्माननुगृहाण।।३८।। जगदुत्पत्त्यादिहेतवे भगवत्संकल्पात् विभिन्नसत्वादिगुणमय्या

शब्दब्रह्मोवाच - नमस्ते श्रितसत्त्वाय धर्मादीनां प्रसूतये। निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च।।४०।। *अग्निरुवाच* - यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम्। तं यज्ञियं पञ्चविधं च पञ्चभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम्।।४१।। *देवा ऊचुः* - पुरा कल्पापाये स्वकृतमुदीरकृत्य विकृतं त्वमेवाद्य-स्तस्मिन् सलिल उरगेन्द्राधिशयने। पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः।।४२।। *गन्धर्वा ऊचुः* - अंशांशास्ते देव मरीच्यादय एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः। क्रीडाभाण्डं विश्वमिदं यस्य विभूमन् तस्मै नित्यं नाथ नमस्ते करवाम।।४३।। *विद्याधरा ऊचुः* - त्वन्माययार्थ-मभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः। क्षिप्तोऽप्यसद्विषय-लालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत्।।४४।। *ब्राह्मणा ऊचुः* - त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मन्त्रः समिद्दर्भपात्राणि च। त्वं सदस्यर्त्विजो दम्पती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः।।४५।।

।। सङ्ग्रहोक्तिः ।।

साधनरूपया मायया जीवात्मन्यपि देवमनुष्यादिबुद्धिभेदजनकाय स्वतो नित्यनिर्दोषाय ते नमः।।३९।। *शब्दब्रह्मोवाच* - निरस्तनिखलदोषाय स्वीकृतशुद्धसत्त्वगुणाय धर्मादीनां जनकाय तुभ्यं नमः, अहं त्वत्स्वरूपस्थितिं न वेद, अपरेऽपि न विदुः।।४०।। *अग्निरुवाच* - यस्य भगवतस्तेजसा प्रदीप्ततेजा अहं यज्ञ आज्यसिक्तं हविर्वहामि, तं यज्ञियं पञ्चविधं सुष्ठु पूजितं यज्ञमूर्तिं भगवन्तं प्रणतोऽस्मि।।४१।। *देवा ऊचुः* - पुरा प्रलयकाले स्वसृष्टं विश्वमुदरी-कृत्य सलिले शेषशय्यायां त्वं शेषे, सिद्धैः स्वमनसि चिन्तितस्त्वमद्याऽस्माकं नयनपथि चरसि, भृत्यान् नोऽवसि च।।४२।। *गन्धर्वा ऊचुः* - हे विभूमन्! ब्रह्मा रुद्र इन्द्राद्या देवगणा देवमरीच्यादयः प्रजापतयः ऋषयश्च सर्वे यस्यांशा अंशांशाश्च सन्ति, इदं विश्वं यस्य क्रीडापरिकर-रूपं भवति, हे नाथ! तस्मै ते नमस्कुर्मः।।४३।। *विद्याधरा ऊचुः* - त्वत्संकल्पेन पुमर्थसाधनं कलेवरं प्राप्य तस्मिन् "अहं मम" इति बुद्धिं कृत्वा वर्तमानो विषयलालसः पुमान् यदि युष्मत्कथामृतनिषेवणपरः भवेत् तर्हि मोहमुत्तीर्य मुक्तो भवेत्।।४४।। *ब्राह्मणा ऊचुः* - हे

त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा। स्तूयमानो नुदल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः।।४६।। स प्रसीद त्वमस्माकमाकाङ्क्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम्। कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः।।४७।। इति दक्षः कविर्यज्ञं भद्र रुद्रावमर्शितम्। कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने।।४८।। भगवान् स्वेन भागेन सर्वात्मा सर्वभागभुक्। दक्षं बभाष आभाष्य प्रीयमाण इवानघ।।४९।। *श्रीभगवानुवाच* - अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्। आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः।।५०।। आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज। सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्।।५१।। तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि। ब्रह्मरुद्रौ च भूतानि भेदेनाऽज्ञोऽनुपश्यति।।५२।। यथा पुमान्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित्। पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः।।५३।।

।। सङ्ग्रहोक्तिः ।।

प्रभो! यज्ञो, हविरग्निः, मन्त्रः, समिधः, दर्भाः, पात्राणि, सदस्यर्विजादयः, दम्पती, देवता, अग्निहोत्रं, स्वधा, आज्यं च सर्वं त्वमेवाऽसि।।४५।। पुरा त्वं महासूकरो भूत्वा रसातलादिमां भूमिं वारणेन्द्रः पद्मिनीमिव स्वदंष्ट्रया योगिभिः स्तूयमानः सन् लीलया व्युज्जहर्थ।।४६।। परिभ्रष्टसत्कर्मणां ते दर्शनमाकांक्षतामस्माकमुपरि प्रसीद, हे यज्ञेश! नृभिर्भवन्नाम्नि कीर्त्यमाने सति यज्ञविघ्ना नश्यन्ति तस्मै ते नमः।।४७।। हे भद्र! एवं विश्वभावने हृषीकेशे कीर्त्यमाने सति दक्षः शिवेन विहतं यज्ञं प्रवर्त्तयामास।।४८।। हे अनघ! सर्वभागभुग् भगवान् स्वेन भागेन प्रीयमाण इव दक्षमुद्दिश्य बभाषे।।४९।। *श्रीभगवानुवाच* - अहं ब्रह्मा शिवश्च एते त्रयो जगतः परं कारणम्, सर्वान्तरात्मा, नियन्ता साक्षी नित्यासंकुचितज्ञानो हेयगुणरहितश्चाहं भवामि।।५०।। हे दक्ष! सूक्ष्मप्रकृतिपुरुषशरीरकोऽहं गुणमयीं प्रकृतिं संकल्पपूर्वकं जीवद्वाराऽनुप्रविश्य विश्वं सृजन् रक्षन् हरंश्च सन् क्रियोचितां तत्तत्संज्ञां बिभर्मि।।५१।। तस्मिन् परमात्मनि केवलेऽद्वितीये ब्रह्मणि मयि, इमौ ब्रह्मरुद्रौ, इमानि भूतानि, इति भेदेनाऽज्ञोऽनुपश्यति।।५२।। यथा देहात्मभ्रान्तिमान् पुरुषोऽपि स्वस्य पाण्याद्यवयवेषु पारक्यबुद्धिं न

त्रयाणामेकभावानां यो न पश्यति वै भिदाम्। सर्वभूतात्मनां ब्रह्मन् स शान्तिमधि-
गच्छति।।५४।। *मैत्रेय उवाच* – एवं भगवताऽऽदिष्टः प्रजापतिपतिर्हरिम्। अर्चित्वा
क्रतुना स्वेन देवानुभयतोऽयजत्।।५५।। रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः।
कर्मणोदवसानेन सोमपानितरानपि। उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः।।५६।।
तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे। धर्म एव मतिं दत्त्वा त्रिदशास्ते दिवं ययुः
।।५७।। एवं दाक्षायणी हित्वा सती पूर्वकलेवरम्। जज्ञे हिमवतः क्षेत्रे मेनायामिति
शुश्रुम।।५८।। तमेव दयितं भूय आवृङ्क्ते पतिमम्बिका। अनन्यभावैकगतिं शक्तिः
सुप्तमेव पूरुषम्।।५९।। एतद्भागवतः शम्भोः कर्म दक्षाध्वरद्रुहः। श्रुतं भागवता-
च्छिष्यादुद्धवान्मे बृहस्पतेः।।६०।। इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौ-
मर्षणम्। यो नित्यदाऽऽकर्ण्य नरोऽनुकीर्तयेद् धुनोत्यघं कौरव भक्तिभावतः।।६१।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे सप्तमोऽध्यायः।।७।।

।। सङ्ग्रहोक्तिः ।।

करोति तद्वत् मदात्मकत्वज्ञानसंपन्नो भूतेषु मत्पृथक्स्थित्यर्हबुद्धिं न करोति।।५३।। मयि एकस्मिन्नेव भावसंपन्नानां येषां ब्रह्मविष्णुरुद्ररूपाणां मध्ये भेदबुद्धिर्नास्ति, ते पुरुषाः शान्तिं प्राप्नुवन्ति।।५४।। एवं भगवताऽऽदिष्टो दक्षः स्वेन क्रतुना हरिमर्चित्वा भूदेवान् स्वर्देवांश्चा-ऽयजत्।।५५।। समाहितचित्तो दक्षः शिवं स्वेन भागेनाऽयजत्, समाप्तिकर्मणा सोमपानितरानपि देवानयजत् ऋत्विग्भिः सह उदवस्यं कर्म समाप्याऽवभृथस्नानं चकार।।५६।। स्वेन महिम्ना प्राप्तसिद्धये दक्षाय धर्ममयीं मतिं दत्वा देवा दिवं ययुः।। ५७।। एवं दक्षपुत्री सती पूर्वकलेवरं हित्वा हिमालयस्य पत्न्यां मेनायां जज्ञे, इति वयं शुश्रुम।।५८।। द्वितीये जन्मनि पार्वत्यनन्यभावा सती स्वामेवं चिन्तयन्तं दयितं रुद्रमेव, प्रलये सुप्ता शक्तिः सृष्टिकाले परमपुरुषमिव, भजति स्म।।५९।। दक्षयज्ञविध्वंसिनः शम्भोरेतच्चरितं मया बृहस्पतेः शिष्यादुद्धवात् श्रुतमस्ति।।६०।। हे विदुर! एवंप्रकारेण पवित्रं यशस्करमायुष्यवर्धकं पापनिवारकं भागवतश्रेष्ठस्य शम्भोश्चरितं तुभ्यं कथितम्, एतच्चरितं भगवद्भक्तिनिष्ठो यो नरः

अथाष्टमोऽध्यायः ।। ८ ।।

मैत्रेय उवाच – सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः। नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ।। १ ।। मृषाऽधर्मस्य भार्याऽऽसीद्दम्भं मायां च शत्रुहन्। असूत मिथुनं तच्च निर्ऋतिर्जगृहेऽप्रजः ।। २ ।। तयोः समभवल्लोभो निकृतिश्च महामते। ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ।। ३ ।। दुरुक्तौ कलिराधत्त भियं मृत्युं च सत्तम। तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ।। ४ ।। अधर्मान्वयसंभूता ह्येते संसृतिहेतवः। श्रेस्कामो न सेवेत नितरामाश्रयोत्तमः ।। ५ ।। संग्रहेण मयाऽऽ-ख्यातः प्रतिसर्गस्तवानघ। त्रिःश्रुत्वैतत्पुमान् पुण्यं विधुनोत्यात्मनो मलम् ।। ६ ।। अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह। स्वायम्भुवस्यापि मनोर्हरेरंशांशजन्मनः ।। ७ ।। प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ।

।। सङ्ग्रहोक्तिः ।।

स्वयमाकर्ण्येतरान् श्रावयेत्, स पापं नाशयति ।। ६१ ।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां सप्तमोऽध्यायः ।। ७ ।।

अथाऽष्टमोऽध्यायः ।। ८ ।।

विमातृदुरुक्त्या विद्धस्य ध्रुवस्य वने भगवदाराधनम्

मैत्रेय उवाच – सनकाद्याः, नारदः, ऋभुः, हंसः, यतिररुणिश्च, एते ब्रह्मणः पुत्रा नैष्ठिक-ब्रह्मचारिण आसन्, ते गृहाश्रमं न चक्रुः ।। १ ।। हे विदुर! अधर्मस्य भार्या मृषाऽऽसीत्, सा दम्भं मायां चेति युग्मं प्रसूतवती, तत् मिथुनमप्रजो निर्ऋतिर्जगृहे ।। २ ।। हे महामते! मायादम्भयोः संयोगात् लोभः शठता च जाता, लोभशठताभ्यां क्रोधो हिंसा च जाता, क्रोधहिंसाभ्यां निरयो यातना च जाता ।। ४ ।। अधर्मवंशोत्पन्ना एते संसृतिहेतवः सन्ति, अतः कल्याणार्थी चतुर्थाश्रम्येतान् नितरां न सेवेत ।। ५ ।। हे अनघ! इत्थं मयाऽधर्मवंशः कथितः, एनं वंशं त्रिवारं श्रुत्वा, एतेषां त्यागं च कृत्वा, पुरुषः पापं विहाय पुण्यं लभते ।। ६ ।। हे विदुर! अथ पुण्यकीर्तेर्हरेरंशांशजन्मनः स्वायंभुवस्य मनोर्वंशं कथयामि ।। ७ ।। शतरूपायाः मनोश्च सुतौ

वासुदेवस्य कलया रक्षायां जगतः स्थितौ।।८।। जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः। सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः।।९।। एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन्। उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्यनन्दत।।१०।। तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम्। सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता।।११।। न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति। न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ।।१२।। बालोऽपि बत नात्मानमन्यस्त्रीगर्भसम्भृतम्। नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः ।।१३।। तपसाऽऽराध्य पुरुषं तस्यैवानुग्रहेण मे। गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम्।।१४।। *मैत्रेय उवाच* – मातुः सपत्न्याः स दुरुक्तिविद्धः श्वसन् रुषा दण्डहतो यथाहिः। हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशम् ।।१५।। तं निःश्वसन्तं स्फुरिताधरोष्ठं सुनीतिरुत्सङ्गमुदुह्य बालम्। निशम्य तत्पौरमुखान्नितान्तं सा विव्यथे यद्गदितं सपत्न्या।।१६।।

।। सङ्ग्रहोक्तिः ।।

प्रियव्रतोत्तानपादौ जगद्रक्षायै वासुदेवांशेनाऽवतीर्णावास्ताम्।।८।। तत्रोत्तानपादस्य सुनीतिः सुरुचिश्चेति द्वे जाये स्तः, तत्र राज्ञः सुरुचिः प्रेयस्यासीत्, सुनीतिस्तु न, या ध्रुवस्य जननी बभूव।।९।।एकदा राजोत्तानपादः सुरुचेः सुतमुत्तममंकमारोप्य लालयन्नवर्त्तत:, तद् दृष्ट्वा पितुरुत्संगमारुरुक्षन्तं ध्रुवं स नाऽभ्यनन्दत।।१०।।उत्तमवदङ्कारोहणं चिकीर्षमाणं ध्रुवमवेक्ष्याऽतिगर्विता सुरुचिः राज्ञः शृण्वतः सेर्ष्यं ध्रुवमाह ।।११।। वत्स! त्वं राज्ञ आसनमारोढुं नाऽर्हसि, यतस्त्वं नृपात्मजः सन्नपि मया कुक्षौ न धृतः।।१२।।त्वं बालोऽसि, अत एवाऽन्यस्त्रीगर्भजातमात्मानं न वेत्सि, यस्य तव दुर्लभे नृपासनारोहणे मनोरथो जातः।।१३।। यदि त्वं नृपासनमिच्छसि, तर्हि तपसा हरिमाराध्य, तदनुग्रहेण मे गर्भे निजजन्मप्राप्त्यर्थं यत्नं कुरु।।१४।। *मैत्रेय उवाच* – एवं सपत्न्या मातुर्दुर्वचनबाणैर्विद्धो ध्रुवो दण्डहतः सर्प इव श्वसन्, पश्यन्तं मौनीभूतं पितरं परित्यज्य रुदन् सन् निजमातुः सकाशं जगाम।।१५।। तं निःश्वसन्तं कम्पिताधरोष्ठं बालं ध्रुवमुत्थाप्य स्वांकमारोप्य, सपत्नीवचनमन्यमुखाच्छ्रुत्वा नितान्तं

सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला। वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह।।१७।। दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बालकमाह बाला। माऽमङ्गलं तात परेषु मंस्था भुङ्क्ते जनो यत्परदुःखदस्तत् ।।१८।। सत्यं सुरुच्याभिहितं भवान्मे यद् दुर्भगाया उदरे गृहीतः। स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम्।।१९।। आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकम्। आराधयाऽधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ।।२०।। यस्याङ्घ्रीपद्मं परिचर्य्य विश्वविभावनायात्तगुणाभिपत्तेः। अजोऽध्यतिष्ठ-त्खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिन्द्यम्।।२१।। तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः। इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम् ।।२२।। तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम्। अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम्।।२३।। नान्यं ततः पद्मपलाश-लोचनाद् दुःखच्छिदं ते मृगयामि कंचन।

।। सङ्ग्रहोक्तिः ।।

विव्यथे।।१६।। सुनीतिर्धैर्यं परित्यज्य विललाप, शोकदवाग्निना दवदग्धलता इव स्थिता सा सपत्नी वचनं स्मरती नेत्रकमले बाष्पाणि दधार।।१७।। दीर्घं श्वसन्ती दुःखस्य पारमपश्यती सा बालकमाह – तात! तव विमातृकृतं दुर्वचनरूपमपराधं मनसि न धारय, यो मनुष्यः परेभ्यः कष्टं ददाति स कालान्तरे तद् दुःखं स्वयमेव भुङ्क्ते।।१८।। हे तात! तव पिता महाराजो मां भार्यां स्वीकर्तुमपि लज्जते, अतः सुरुच्या यदभिहितं "त्वं दुर्भगाया म उदरे धृतः" इति सत्यम्।।१९।। त्वं विमत्सरो भूत्वा त्वद्विमात्रा यदुक्तं तथा उत्तमवद् राजसिंहासनमा-कांक्षसे तर्हि तपसा परमात्मानमाराधय।।२०।। योगिभिर्वन्द्यं दिव्यमङ्लमूर्तेः परमात्मनः पादपद्मं समाराध्य ब्रह्मा पारमेष्ठ्यं पदमधिष्ठितवान्।।२१।। तव पितामहो भगवान् मनुरप्ये-कान्तभक्त्या भूरिदक्षिणैर्यज्ञैर्यमिष्ट्वा दिव्यं राज्यादिसुखं लब्धवान्, एवं च मोक्षसुखमपि लब्धवान्।।२२।। हे वत्स! भक्तवत्सलं स्वाश्रितजनमुक्तिप्रदं हरिमाश्रय, अनन्यभावेन स्वधर्मेण शोधिते स्वमनसि परमपुरुषं तं भजस्व।।२३।। पद्मपत्रनयनाद् हरेरन्यं तव दुःखनिवारकं न

यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरङ्ग विमृग्यमाणया ।।२४।। *मैत्रेय उवाच* - एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः। संनियम्यात्मनाऽऽत्मानं निश्चक्राम पितुः पुरात् ।।२५।। नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम्। स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः ।।२६।। अहो तेजः क्षत्रियाणां मानभङ्गममृष्यताम्। बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ।।२७।। नाधुनाप्यवमानं ते सम्मानं वापि पुत्रक। लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ।।२८।। विकल्पे विद्यमानेऽपि न ह्यसंतोषहेतवः। पुंसां मोहमृते भिन्ना यल्लोके निजकर्मभिः ।।२९।। परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः। दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः ।।३०।। अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि। यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ।।३१।। मुनयः पदवीं यस्य निःसङ्गेनोरुजन्मभिः। न विदुर्मृगयन्तोऽपि तीव्रयोगसमाधिना ।।३२।। अतो निवर्ततामेष निर्बन्धस्तव निष्फलः। यतिष्यति भवान् काले श्रेयसां समुपस्थिते ।।३३।।

।। सङ्ग्रहोक्तिः ।।

पश्यामि, यं हरिं ब्रह्मादिभिरन्विष्टा हस्तग्रहीतपद्मा पद्माऽपि मृगयति ।।२४।। ध्रुव एवमर्थगम्भीरं मातुर्वचः श्रुत्वा स्वयमेव स्वं मनः समाधाय पितुः पुरान्निश्चक्राम ।।२५।। नारदर्षिर्ध्रुवनिष्क्रमणमाश्रुत्य, तच्चिकीर्षितं च ज्ञात्वा, तत्समीपमागत्य, पापघ्नेन पाणिना तच्छिरसि स्पृष्ट्वा विस्मितः सन् तं प्राह ।।२६।। अहो! मानभङ्गममृष्यतां क्षत्रियाणां तेजः पश्यत, यद् बालकोऽप्ययं विमातुर्दुर्वचनानि मनसि धारयति ।।२७।। एवं विचार्य नारद आह - हे पुत्रक! क्रीडनादिषु सक्तस्य कुमारस्य तेऽधुनाऽवमानं सन्मानं वा न पश्यामि ।।२८।। मानावमानविवेके सत्यपि पुंसां मोहं विनाऽसंतोषहेतवः न सन्ति, लोके यत् सुखं दुःखं वा, तन्निजकर्मभिरेव भवति ।।२९।। बुधः पुरुष ईश्वरानुकूलतां विचार्य यद् दैवेन प्रापितं सुखं तावन्मात्रेणैवपरितुष्यन् नाधिकं लिप्सेत् ।।३०।। यदि त्वं मात्रुपदिष्टेन भक्तियोगेन भगवत्प्रसन्नतां वाञ्छसि, तदा स भगवानपि पुंसां दुराराध्य इति मया ज्ञातम् ।।३१।। निःसङ्गेन तीव्रयोगसमाधिना भगवन्मार्गं मृगयन्तो मुनयोऽपि बहुजन्मभिस्तन्मार्गं न विदुः, अतः स दुराराध्य इति मन्मतम् ।।३२।। अतो भवान् गृहं यातु, तवैष आग्रहो निष्फलः, श्रेयसामुचिते काले प्राप्ते भवान् यत्नं करिष्यति ।।३३।।

यस्य यद् दैवविहितं स तेन सुखदुःखयोः। आत्मानं तोषयन्देही तमसः पारमृच्छति ।।३४।। गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात्। मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते।।३५।। *ध्रुव उवाच* - सोऽयं शमो भगवता सुखदुःखहतात्मनाम्। दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः।।३६।। अथापि मेऽविनीतस्य क्षात्त्रं घोरमुपेयुषः। सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि।।३७।। पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे। ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम्।।३८।। नूनं भवान् भगवतो योऽङ्गजः परमेष्ठिनः। विरुदन्नटते वीणां हितार्थं जगतोऽर्कवत्।।३९।। *मैत्रेय उवाच* - इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा। प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकम्पया।।४०।। *नारद उवाच* - जनन्याभिहितः पन्थाः स वै निःश्रेयसस्य ते। भगवान् वासुदेवस्तं भज तत्प्रवणात्मना।।४१।। धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः। एकमेव हरेस्तत्र कारणं पादसेवनम् ।।४२।।

।। सङ्ग्रहोक्तिः।।

सुखदुःखयोर्मध्ये दैवविहितेन सुखेन दुःखेन वाऽऽत्मानं तोषयन् पुमान् अन्ते मोक्षं प्राप्नोति ।।३४।। बुधो गुणाधिकं वीक्ष्य प्रीतिं कुर्यान्नेर्ष्याम्, गुणहीनं वीक्ष्य कृपां कुर्यान्न तिरस्कारम् स्वतुल्यं गुणवन्तं दृष्ट्वा तेन सह मैत्रीं कुर्यान्न स्पर्धाम्, इत्थमाचरन् पुमान् कदापि संतापं नानुभवति।।३५।। *ध्रुव उवाच* - भवता कृपया दर्शितोऽयं शान्त्युपायः सुखदुःखपराभूतानां कृतेऽस्ति, स शमोपायो मादृशैस्तु द्रष्टुमप्यशक्योऽस्ति।।३६।। अथापि सुरुच्यार्दुर्वचनबाणैर्भिन्ने घोरं क्षात्रं स्वभावमुपेयुषोऽविनीतस्य मम मनसि भवदुक्तः शमोपायः स्थानं न लभते ।।३७।। अस्मत्पितृभिरन्यैर्वाऽसंपादितं त्रिभुवनोत्कृष्टं स्थानं जिगीषोर्मे साधु तद्वर्त्म ब्रूहि।।३८।। यो भवान् ब्रह्मणोऽङ्कजातो वीणां वादयन् जगतो हिताय सूर्यवत् अटति नूनम्।।३९।। ध्रुवकथितं वाक्यमिदं श्रुत्वा नितरां प्रीतः सन् स तं बालं कृपया हितकरं वचनमाह।।४०।। *नारद उवाच* - तव जनन्या सुनीत्याऽभिहितः पन्था एव ते निःश्रेसाय भवति, तत्प्रवणचेतसा भगवन्तं वासुदेवमेव भज।।४१।। यः पुमान् धर्मार्थकाममोक्षाख्यमात्मनः श्रेय इच्छेत्, तत्र हरेरेकं पादसेवनमेवोपायः।।४२।।

तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि। पुण्यं मधुवनं यत्र सांनिध्यं नित्यदा हरेः।।४३।। स्नात्वानुसवनं तस्मिन् कालिन्द्याः सलिले शिवे। कृत्वोचितानि निवसन्नात्मनः कल्पितासनः।।४४।। प्राणायामेन त्रिवृता प्राणेन्द्रियमनोमलम्। शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम्।।४५।। प्रसादाभिमुखं शश्वत्प्रसन्नवदनेक्षणम्। सुनासं सुभ्रुवं चारुकपोलं सुरसुन्दरम्।।४६।। तरुणं रमणीयाङ्गमधरोष्ठेक्षणारुणम्। प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम्।।४७।। श्रीवत्साङ्कं घनश्यामं पुरुषं वनमालिनम्। शङ्खचक्रगदापद्मैरभिव्यक्तचतुर्भुजम्।।४८।। किरीटिनं कुण्डलिनं केयूरवलयान्वितम्। कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ।।४९।। काञ्चीकलापपर्यस्तं लसत् काञ्चननूपुरम्। दर्शनीयतमं शान्तं मनोनयनवर्धनम्।।५०।। पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चताम्। हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम्।।५१।। स्मयमानमभिध्यायेत्सानुरागावलोकनम्। नियतेनैकभूतेन मनसा पुरुषोत्तमम्।।५२।। एवं भगवतो रूपं सुभद्रं ध्यायतो मनः। निर्वृत्या परया तूर्णं सम्पन्नं न निवर्तते।।५३।।

।। सङ्ग्रहोक्तिः ।।

हे तात! यत्र नित्यदा हरेः सांनिध्यं वर्तते, तच्छुचि मधुवनं नाम यमुनायास्तटं गच्छ, तव मङ्गलमस्तु।।४३।। तत्र यमुनाया मङ्गले जले त्रिकालं स्नात्वा स्वस्योचितानि देवनमस्कारादीनि विधाय, कुशाद्यासने ऋजुकायतयोपविश्य, त्रिविधप्राणायामेन प्राणेन्द्रियमनोमलं व्युदस्य, धीरेण मनसा श्रीहरिं ध्यायेः।।४४-४५।। कथंभूतं वासुदेवम्, तदाह - सदा प्रसादाभिमुखं प्रसन्नवदनेक्षणं, सुनासिकं, सुभ्रुवं, सुकपोलं, तरुणं, रमणीयाङ्गम् अरुणाधरोष्ठम्, अरुणेक्षणं, प्रणतजनाश्रयणं, शरण्यं, करुणार्णवं।।४६-४७।। श्रीवत्साङ्कं, घनश्यामं, वनमालयाऽलङ्कृतं, शङ्खचक्रगदापद्मधरं चतुर्भुजं, किरीट-कुण्डल-केयूर-वलयालङ्कृतं कौस्तुभमंडितकण्ठं, पीतकौशेयवाससं।।४८-४९।। काञ्चीकलापान्वितं, लसत्काञ्चननूपुरं दर्शनीयतमं मनोनयनाह्लादवर्द्धनम्।।५०।। नखमणिविलसद्भ्यां चरणाभ्यां भक्तहृत्कमले स्थितं स्मयमानं सानुरागावलोकनं वासुदेवं निश्चलेनैकाग्रेण मनसा ध्यायेत्।।५१-५२।।

जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज। यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान्॥५४॥ "ॐनमो भगवते वासुदेवाय" मन्त्रेणानेन देवस्य कुर्याद् द्रव्यमयीं बुधः। सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित्॥५५॥ सलिलैः शुचिभिर्माल्यै-र्वन्यैर्मूलफलादिभिः। शस्ताङ्कुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुम्॥५६॥ लब्ध्वा द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु चार्चयेत्। आदृतात्मा मुनिः शान्तो यतवाङ् मितवन्यभुक्॥५७॥ स्वेच्छावतारचरितैरचिन्त्यनिजमायया। करिष्यत्युत्तमश्लोकस्तद्ध्यायेद् हृदयङ्गमम्॥५८॥ परिचर्या भगवतो यावत्यः पूर्वसेविताः। ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्तये॥५९॥ एवं कायेन मनसा वचसा च मनोगतम्। परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया॥६०॥ पुंसाममायिनां सम्यग्भजतां भाववर्धनः। श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनाम्॥६१॥ विरक्तश्चेन्द्रियरतौ भक्तियोगेन भूयसा। तं निरन्तरभावेन भजेताद्धा विमुक्तये॥६२॥

॥ सङ्ग्रहोक्तिः॥

एवं ध्यायतः शान्तं मनस्तूर्णं यथा ध्यानान्न निवर्तते तथा भगवतः सुभद्ररूपं ध्यायेत्॥५३॥ हे नृपात्मज! सर्वोत्तमो गोपनीयो जप्यो मन्त्रो मत्तः श्रूयताम्, पुमान् यं मन्त्रं सप्तरात्रं जपन् खेचरान् देवान् पश्यति॥५४॥ "ॐनमो भगवते वासुदेवाय" देशकालविभागविदर्चको बुधोऽनेन मन्त्रेण विविधैरुपचारैर्द्रव्यप्रचुरां वासुदेवस्य पूजां कुर्यात्॥५५॥ शुद्धजलपुष्पैः वन्यमूलफला-दिभिः प्रशस्तांशुकांकुरादिभिः प्रियया तुलस्या च प्रभुं पूजयेत्॥५६॥ ततः परिमितकन्दमूलादि भक्षन्, मौन्येकाग्रचित्तश्च सन् शिलाकाष्ठधातुनिर्मितायां प्रतिमायां पृथिवीजलादिषु वा श्रीहरिं ध्यायन् पूजयेत्॥५७॥ भगवतो स्वेच्छागृहीतवराहाद्यवताराणां चरितानि स्वसंकल्पेन च कृतानि मनोहराण्यचिन्त्यानि चरितानि च ध्यायेत्॥५८॥ यावत्यः परिचर्याः पूर्वाचार्यैः सेविता स्ताः सर्वाः द्वादशाक्षरमन्त्रानुसंधानयुक्तेन मनसा मन्त्रमूर्तये हरये प्रकल्पयेत्॥५९॥ शुद्धमनसां सम्यग्भजतां पुंसां कायेन वचसा मनसा च प्रेमसहितया परिचर्यया परिचर्यमाणो भाववर्द्धनो भगवान् पुरुषार्थचतुष्टये यच्छ्रेयोऽभिमतं तद् ददाति॥६०-६१॥ ऐन्द्रियसुखे विरक्तो व्यवधानरहितेन प्रेम्णाऽनन्तेन भक्तियोगेन विमुक्तये तं भगवन्तं साक्षाद् भजेत्॥६२॥

इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः। ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ।।६३।। तपोवनं गते तस्मिन् प्रविष्टोऽन्तःपुरं मुनिः। अर्ध्यर्हितार्हणो राज्ञा सुखासीन उवाच ह।।६४।। *नारद उवाच* – राजन् किं ध्यायसे दीर्घं मुखेन परिशुष्यता। किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः।।६५।। *राजोवाच* – सुतो मे बालको ब्रह्मन् स्त्रैणेनाकरुणात्मना। निर्वासितः पञ्चवर्षः सह मात्रा महान्कविः।।६६।। अप्यनाथं वने ब्रह्मन् मा स्मादन्त्यर्भकं वृकाः। श्रान्तं शयानं क्षुधितं परिम्लानमुखाम्बुजम्।।६७।। अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय। योऽङ्कं प्रेम्णाऽऽरुरुक्षन्तं नाभ्यनन्दमसत्तमः।।६८।। *नारद उवाच* – मा मा शुचः स्वतनयं देवगुप्तं दिशां पते। तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत्।।६९।। सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः। एष्यत्यचिरतो राजन् यशो विपुलयंस्तव।।७०।। *मैत्रेय उवाच* – इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः। राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिन्तयत्।।७१।।

।। सङ्ग्रहोक्तिः ।।


एवं नारदेन प्रोक्तो ध्रुवो नारदं प्रदक्षिणीकृत्य प्रणम्य च हरेश्चरणचर्चितं पुण्यं मधुवनं ययौ ।।६३।। ध्रुवे तपोवनं गते सति मुनिर्नारद उत्तानपादस्य नृपतेरन्तःपुरं गतः, तत्र राज्ञा सत्कृतः सुखासीनः स नृपमुवाच।।६४।। *नारद उवाच* – परिशुष्यता मुखेन दीर्घं किं ध्यायसे, सार्थः कामो धर्मश्च तव नश्यति किम्?।।६५।। *राजोवाच* – हे ब्रह्मन्! स्त्रीवशीकृतेन निष्करुणेन मया विनयादिगुणसंपन्नः पञ्चहायनः सुतो मात्रा सह निर्वासितः।।६६।। हे ब्रह्मन्! वने क्षुधितं श्रान्तमत एव परिम्लानमुखाम्बुजं शयानं बालं रक्षकहीनं तं वृका मा खादन्तु।।६७।। अहो! स्त्रीपरतन्त्रस्य मे दौरात्म्यं निश्चिनु बत, योऽहमसत्तमः सन् प्रेम्णाऽङ्कमारुरुक्षन्तं सुतं नाऽभिनन्दितवान्।।६८।। एवमुक्तो नारदस्तमाश्वासयन्नाह – हे राजन्! दैवरक्षितं स्वतनयं तत्प्रभावमविज्ञाय मा शुचः, यस्य त्वत्पुत्रस्य यशो जगति व्याप्तं भविष्यति।।६९।। हे राजन्! जितेन्द्रियो ध्रुवो लोकपालैरपि सुदुष्करं कर्म कृत्वा तव यशो विस्तारयन्नचिरादेवाऽऽगमिष्यति।।७०।। इत्थं देवर्षिणा नारदेन प्रोक्तं विमृश्योत्तानपादो राज्यलक्ष्मीमनादृत्य पुत्र

સનકાદીક અને વૈકુંઠના દ્વારપાલ, જય-વિજય



દ્વારપાલોને શાપ આપતા સનકાદિક ઋષિઓ
ત્રીજો સ્કન્ધ અ.-૧૫

કપિલ અને દેવહૂતિ



કપિલ ભગવાન માતા દેવહૂતિને ઉપદેશ આપે છે.
ત્રીજો સ્કન્ધ અ.-૨૫

ધ્રુવ ઉપર કૃપા



ધ્યાનમાં લીન ધ્રુવની સામે ભગવાન પ્રગટ થયા છે.
ચોથો સ્કન્ધ અ.-૯

દક્ષને ભગવાને દર્શન આપ્યાં




દક્ષના યજ્ઞમાં ભગવાન તત્કાળ પ્રગટ થયા.
ચોથો સ્કન્ધ અ.-૭

વેન-વધ



મુનિઓના હુંકારથી વેનનું મુત્યુ થયું.
ચોથો સ્કન્ધ અ.-૧૪



રાજા પ્રાચીનબર્હિષ્ ને નારદજી ઉપદેશ આપે છે.
ચોથો સ્કન્ધ અ.–૨૫



પ્રિયવ્રત ની પાસે બ્રહ્માજી પધાર્યા.

પાંચમો સ્કન્ધ અ-૧

ભદ્રકાળીએ જડભરતની રક્ષા કરી



ભદ્રકાળીએ બધા પાપિયોંના મસ્તક કાપી નાખ્યાં.
પાંચમો સ્કન્ધ અ.–૯

तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम्। समाहितः पर्यचरदृष्ट्यादेशेन पूरुषम् ॥७२॥ त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः। आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन्हरिम् ॥७३॥ द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने। तृणपर्णादिभिर्जीर्णैः कृतान्नोऽभ्यर्चयन् हरिम् ॥७४॥ तृतीयं चानयन्मासं नवमे नवमेऽहनि। अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥७५॥ चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि। वायुभक्षो जितश्वासो ध्यायन् देवमधारयत् ॥७६॥ पञ्चमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः। ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥७७॥ सर्वतो मन आकृष्य हृदि भूतेन्द्रियाशयम्। ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरम् ॥७८॥ आधारं महदादीनां प्रधानपुरुषेश्वरम्। ब्रह्म धारयमाणस्य त्रयो लोकाश्चकम्पिरे ॥७९॥ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदङ्गुष्ठनिपीडिता मही। ननाम तत्रार्धमिभेन्द्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥८०॥

॥ सङ्ग्रहोक्तिः ॥

ध्रुवमेवाऽन्वचिन्तयत् ॥७१॥ तत्र मधुवने यमुनायां स्नातो ध्रुवो रात्रिमुपोष्य नियमतत्परः सन् नारदोपदिष्टेन मार्गेण परमपुरुषं परिपूजितवान् ॥७२॥ प्रतित्रिरात्रान्ते कपित्थबदरफलानि देहधारणोपयुक्तानि भुञ्जन् हरिमर्चन्नेकं मासं नीन्ये ॥७३॥ ततः बालो ध्रुवः प्रतिषष्ठे दिने जीर्णतृणपत्रादिभिः कृताहारः हरिं पूजयन् सन् द्वितीयं मासमपि नीन्ये ॥७४॥ ततः प्रतिनवमे दिने मात्रमप एव भक्षयन् ध्रुवः समाधिना भगवन्तमाराधयन् तृतीयं मासमनयत् ॥७५॥ ध्रुवश्चतुर्थमासमपि प्रतिद्वादशे दिने वायुमेव भक्षयन् जितप्राणः सन् देवं ध्यायन् धारणां कृतवान् ॥७६॥ पञ्चमे मासि प्राप्ते तु जितश्वासो नृपात्मजो ध्रुवो भगवन्तं ध्यायन्नेकेनैव पदा स्थाणुरिव निश्चलो भूत्वा तस्थौ ॥७७॥ अव्यापारितश्रोत्रादीन्द्रियवन्मनः सर्वतः समाकृष्य हृदि भगवन्तं ध्यायन्नपरं किंचिदपि नाद्राक्षीत् ॥७८॥ महदादीनामाधारं प्रधानपुरुषेश्वरं =स्थूलचिदचिच्छरीरकं सूक्ष्मचिदचिच्छरीरकं च ब्रह्म धारयमाणस्य सततस्तत्तेजः सोढुमशक्नुवन्तस्त्रयो लोकाश्चकम्पिरे ॥७९॥ यदा नृपात्मजो ध्रुवः एकपादेन तस्थौ तदा तस्याऽङ्गुष्ठेन निपीडिता मही यथा गजेन्द्रेण समाश्रिता नौः पदे पदे सव्यतो दक्षिणश्च -

तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया। लोका निरुच्छ्वास-निपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम्।।८१।। *देवा ऊचुः* – नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः। विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम्।।८२।। *श्रीभगवानुवाच* – मा भैष्ट बालं तपसो दुरत्यया-न्निवर्तयिष्ये प्रतियात स्वधाम। यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा।।८३।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धेऽष्टमोऽध्यायः।।८।।

अथ नवमोऽध्यायः।।९।।

मैत्रेय उवाच – त एवमुत्सन्नभया उरुक्रमे कृतप्रणामाः प्रययुस्त्रिविष्टपम्। सहस्त्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः।।१।।

।। सङ्ग्रहोक्तिः ।।

नमति तद्वदर्द्धं ननाम।। ८०।।तस्मिन् ध्रुवे स्वस्य सर्वाणीन्द्रियाणि प्राणं च निरुद्ध्याऽनन्यया धिया भगवन्तमभिध्यायति सति सलोकपाला लोका उश्वासाभावेन पीडिताः सन्तः श्रीहरिं शरणं ययुः।।८१।। *देवा ऊचुः* – हे भगवन्! एवंविधं प्राणनिरोधकारणं वयं न विद्मः, तस्माच्चिदचिच्छरीरकस्य तव सम्बन्धिनां नः प्राणनिरोधरूपाद् दुःखाद् विमोक्षं विधेहि, वयं शरण्यं त्वां शरणं प्राप्ताः स्मः।।८२।। *श्रीभगवानुवाच* – हे देवा! भयं मा कुरुत, तपसा दुरत्ययं बालं निवर्त्तयिष्ये, अतो यूयं स्वस्थानं प्रतियात, ध्रुवेण विश्वप्राणिप्राणनहेतुभूतस्य मम प्राणेन सह स्वप्राणैक्यं विधाय तन्निरोधात् सर्वप्राणनिरोधोऽभूत्।।८३।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः।।८।।

अथ नवमोऽध्यायः ।।९।।

ध्रुवस्य वरप्राप्तिः स्वनगरं प्रत्यागमनञ्च

मैत्रेय उवाच – भगद्वाक्यश्रवणेन निवृत्तभयास्ते देवा भगवन्तं प्रणम्य सुरलोकं प्रययुः, ततो

स वै धिया योगविपाकतीव्रया हृत्पद्मकोशेस्फुरितं तडित्प्रभम्। तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श।।२।। तद्दर्शनेनागतसाध्वसः क्षितावनन्दताङ्गं विनमय्य दण्डवत्। दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुम्बन्निवास्येन भुजैरिवाश्लिषन् ।।३।। स तं विवक्षन्तमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः। कृताञ्जलिं ब्रह्ममयेन कम्बुना पस्पर्श बालं कृपया कपोले।।४।। स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः। तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः।।५।। *ध्रुव उवाच – योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना। अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम्।।६।।* एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम्। सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ।।७।। त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः।

।। सङ्ग्रहोक्तिः ।।

भगवान् हरिरपि स्वभक्तदिदृक्षया गरुडेन सह मधुवनं जगाम।।१।। स ध्रुवो योगदार्ढ्येन तीव्रया धिया हृत्कमले तडित्प्रभं स्फुरितं हरिं प्रथमं ध्यायन्, सहसैव तं तिरोहितमुपलक्ष्य ध्यानाद् बहिर्निगतः, तदा बहिः स्थितं तमेव भगवन्तं ददर्श।।२।। भगवद्दर्शनेन संजात संभ्रमो ध्रुवः स्वशरीरं भूमौ दण्डवद् विनमय्य नमस्कृतवान्, तदा स दृग्भ्यां पिबन्निव, मुखेन चुम्बन्निव, भुजाभ्यामाश्लिषन्निव पश्यन् सन् तस्थौ।।३।। तद्गुणान् विवक्षन्तं किन्तु स्तोतुमजानन्तं कृताञ्जलिं बालं ज्ञात्वा सर्वान्तर्यामी हरिर्ब्रह्ममयेन शंखेन तं कपोले पस्पर्श।।४।। ध्रुवो दैवीं वाचं तदैव सम्प्राप्य परमात्मजीवात्मनोर्याथात्म्यं परिज्ञातवान्, विश्रुतभूरिकीर्तिं भगवन्तं भक्तिभावो ध्रुवोऽसत्त्वरः सन्नस्तौषीत्।।५।। *ध्रुव उवाच* – अखिलशक्तिधरो यो भगवानन्तः प्रविश्य मम प्रसुप्तां वाचं संजीवयति, स्वशरीरभूतानन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणानपि संजीवयति, तस्मै परमपुरुषाय भगवते नमोऽस्तु।।६।। हे भगवन्! इदं सकलं जगद् गुणात्मिकया स्वसम्बन्धिन्या शक्त्यपरपर्यायया प्रकृत्या सृष्ट्वा जीवशरीरकः सन् तदनुप्रविश्य त्वमेक एव काष्ठेष्वग्निवद् बहुविध इवाऽऽभासि ।।७।। हे नाथ! सुप्तोत्थितो

तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबन्धो।।८।। नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः। अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं नरकेऽपि नृणाम्।।९।। या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वन्तकासिलुलितात्पततां विमानात्।।१०।। भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त महताममलाशयानाम्। येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः।।११।। ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः। ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्य-लुब्धहृदयेषु कृतप्रसङ्गाः।।१२।। तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम्। रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः।।१३।। कल्पान्त एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृगनन्तसख-स्तदङ्के।

।। सङ्ग्रहोक्तिः ।।

ब्रह्मा भवद्दत्तेनैव ज्ञानेन सर्वं बुद्ध्वा विश्वमसृजत्, हे आर्तबन्धो! सुखसाधनरूपं त्वत्पादमूलं कृतज्ञः को विस्मरेत्?।।८।। कल्पतरुतुल्यं मुक्तिदं च भवन्तं ये जना त्रिवर्गकारणात् भजन्ति ते माययाऽपहृतज्ञानाः सन्ति, यतो नृणां स्पर्शजं सुखं तु नरकेऽपि भवति।।९।। हे नाथ! देहिनां तव पादपद्मध्यानाद् भवज्जनकथाश्रवणाच्च यत् सुखं भवति, तत् सुखं शुद्धात्मस्वरूपेऽनुभूयमानेऽपि नास्ति, तर्हि कालखड्गात् पततां स्वर्गिणां सुखं कुतः स्यात्।।१०।। हे अनन्त! नित्यनिर्दोष उदारगुणसागरे भवत्स्वरूपे भक्तिं कुर्वतां निर्मलान्तःकरणानां महतां सतां प्रसंगात् भवद्गुणकथामृतपानमत्तोऽहं निरतिशयदुःखं दुःसहं संसारसमुद्रं तरिष्यामि।।११।। हे पद्मनाभ! भवदीयचरणकमलसुगन्धलुब्धानां भक्तानां समागमं ये कुर्वन्ति तेऽतिप्रियमपि मरणशीलं शरीरं तथा सुत-सुहृद्-गृह-वित्त-दारान् न स्मरन्ति।।१२।। हे परम! हे अज! तिर्यङ्-नग-पक्षि-सरिसृप-देव-दैत्य-मनुष्यादिभिर्व्याप्तं महदादिपृथिव्यन्तं तव चिदचिदात्मकं स्थूलं रूपमहं जानामि, तथैव सूक्ष्मं रूपमपि त्वत्प्रसादान्न वेद्मि इति

यन्नाभिसिन्धुरुहकाञ्चनलोकपद्मगर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै ॥१४॥ त्वं नित्यमुक्तपरिबुद्धविशुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः। यद्बुद्ध्यवस्थितमखण्डितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥१५॥ यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्यात्। तद् ब्रह्म विश्वभवमेकमनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये ॥१६॥ सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः। अप्येवमार्य भगवान् परिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥१७॥ *मैत्रेय उवाच* - अथाभिष्टुत एवं वै सत्संकल्पेन धीमता। भृत्यानुरक्तो भगवान् प्रतिनन्द्येदमब्रवीत् ॥१८॥ *श्रीभगवानुवाच* - वेदाहं ते व्यवसितं हृदि राजन्यबालक। तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥१९॥ नान्यैरधिष्ठितं भद्र यद् भ्राजिष्णु ध्रुवक्षिति। यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम्। मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् ॥२०॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः।

॥ सङ्ग्रहोक्तिः ॥

न ॥१३॥ यः परमपुरुषः प्रलयकाले सर्वं स्वकुक्षौ निवेशयन् शेषपर्यङ्के शेते, यन्नाभिसिन्धुरुहकाञ्चनपद्मकोशे ब्रह्मा जातः, तस्मै भगवते नतोऽस्मि ॥१४॥ त्वं स्वधाम्नि नित्यमुक्तः नित्यासंकुचितज्ञानवान्, विशुद्धः कूटस्थः आदिपुरुषः त्र्यधीशोऽसि ॥१५॥ यस्मिन् त्वयि विरुद्धगतयो विद्यादयो विविधशक्तयोऽविरोधेनाऽनुक्रमेण सदोद्भवन्ति तद् विश्वैककारणमनन्तमेकमाद्यमानन्दमात्रमविकारं त्वां शरणमहं प्रपद्ये ॥१६॥ पुरुषार्थरूपस्याऽनुग्रहतरोस्तव पादपद्मं स्वैच्छानुरूपं भजमानान् दीनानस्मान् नवप्रसूता धेनुर्वत्सकमिव त्वं पासि ॥१७॥ *मैत्रेय उवाच* - दृढसंकल्पेन ध्रुवेणैवं संस्तुतो भक्तानुरक्तो भगवान् हरिस्तं प्रतिनन्द्येदमुवाच ॥१८॥ *श्रीभगवानुवाच* - हे सुव्रत! राजबाल! त्वया हृदि यन्निश्चितं तदहं वेद, अन्यैर्दुरापमपि तत्तुभ्यं प्रयच्छामि, तव भद्रं स्तात् ॥१९॥ हे भद्र! यत् शश्वन्निवासं, दीप्तिमत्, इतरैरनधिष्ठितं खे चक्रवत्परिभ्रमतां ग्रहनक्षत्रताराणां मध्ये खले बन्धनस्तम्भवत् स्थिरं लोकत्रयविनाशेऽप्यनश्वरं स्थानं त्वां ददामि ॥२०॥ धर्मः, अग्निः, कश्यपः, इन्द्रः, वानप्रस्थाश्रमिणः, सप्तर्षयश्च यत्

चरन्ति दक्षिणीकृत्य भ्रमन्तो यत्सतारकाः।।२१।। प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः। षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेन्द्रियः।।२२।। त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः। अन्वेषन्ती वनं माता दावाग्निं सा प्रवेक्ष्यति।।२३।। इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः। भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि ।।२४।। ततो गन्तासि मत्स्थानं सर्वलोकनमस्कृतम्। उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिः।।२५।। *मैत्रेय उवाच* - इत्यर्चितः स भगवानतिदिश्यात्मनः पदम्। बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः।।२६।। *विदुर उवाच* - सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितम्। लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित्।।२८।। *मैत्रेय उवाच* - मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान् स्मरन्। नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान्।।२९।। समाधिना नैकभवेन यत्पदं विदुः सनन्दादय ऊर्ध्वरेतसः। मासैरहं षड्भिरमुष्य पादयोश्छाया-मुपेत्यापगतः पृथङ्मतिः।।३०।।

।। सङ्ग्रहोक्तिः ।।

स्थानं प्रदक्षिणीकृत्य भ्रमन्तश्चरन्ति।।२१।। त्वां राज्यं दत्वा त्वत्पितरि वनं प्रस्थिते सति षट्त्रिंशद्वर्षसाहस्रं यावदव्याहतेन्द्रियो भवान् भूमिं रक्षिष्यति ।।२२।। त्वद्भ्रातर्युत्तमे मृगयायां मृते सति तन्मनाः सुरुचिरपि पुत्रमन्वेषन्ती वनं याता सती दावानलं प्रवेक्ष्यति।।२३।। त्वमपि भूरिदक्षिणैर्यज्ञैर्यज्ञमूर्तिं मामिष्ट्वा राज्ये वाञ्छितभोगान् भुक्त्वाऽन्ते मां संस्मरिष्यसि।।२४।। ततः सप्तर्षिमण्डलादप्युपरिष्टात् स्थितं सर्वलोकनमस्कृतं मत्स्थानं त्वमधिगन्तासि, यद्गत्वा प्रयत्नशीलो पुनर्नाऽऽवर्तते।।२५।। *मैत्रेय उवाच* - ध्रुवेणाऽऽराधितो गरुडध्वजः स भगवान् स्वस्य वैकुण्ठं धाम प्रत्यपद्यत।।२६।। ध्रुवोऽपि विष्णोश्चरणसेवया प्रापितं स्ववाञ्छितं प्राप्यापि नातिप्रीतः सन् स्वं पुरमभ्यगात्।।२७।। *विदुर उवाच* - ध्रुवो भगवता दत्तं सुदुर्लभमपि हरिचरणार्चनार्जितं पदमेकजन्मना लब्ध्वाऽपि स्वमप्राप्तमनोरथवदिव कथममन्यत।।२८।। *मैत्रेय उवाच* - विमातुर्वाग्बाणैर्हृदि विद्धः, अत एव तान् स्मरन् ध्रुवो मुक्तिप्रदादपि भगवतः सकाशात् मुक्तिं नैच्छत्, तस्माद्धेतोः स पश्चात्तापमुपेयिवान्।।२९।। ऊर्ध्वरेतसः सनकादयो

अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत। भवच्छिदःपादमूलं गत्वाऽयाचे यदन्तवत् ।।३१।। मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः। यो नारदवचस्तथ्यं नाग्रहिषमसत्तमः।।३२।। देवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक्। तप्ये द्वितीये-ऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा।।३३।। मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि। प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम्।।३४।। भवच्छिदमयाचेऽहं भवं भाग्य-विवर्जितः। स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत। ईश्वरात्क्षीणपुण्येन फलीकारानिवाऽधनः।।३५।। *मैत्रेय उवाच* - न वै मुकुन्दस्य पदारविन्दयो रजोजुषास्तात भवादृशा जनाः। वाञ्छन्ति तद्दास्यमृतेऽर्थमात्मनो यदृच्छया लब्धमनः समृद्धयः।।३६।। आकर्ण्यात्मजमायान्तं सम्परेत्य यथाऽऽगतम्। राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम।।३७।। श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः। वार्ताहर्तुरति-प्रीतो हारं प्रादान्महाधनम्।।३८।।

।। सङ्ग्रहोक्तिः ।।

मुनयो बहुजन्मभिः समाधिना भगवतो यत् स्वरूपं विदुः, अस्य भगवतश्चरणछायामहं षड्भिर्मासैः प्राप्यापि देहाभिमानग्रस्तमतिः सन् भगवच्चरणछायायाः सकाशाद् दूरं गतः।।३०।। अहो! भाग्यहीनस्य ममाऽज्ञत्त्वं पश्यत, यदहं संसारनिवर्तकस्य पादमूलं साक्षात्कृत्याऽप्यन्ते विनाशयुक्तं फलं याचितवान्।।३१।। पतनशीलैरसहिष्णुभिर्देवैर्मे मतिर्दूषिता, अथवाऽहमेव दुर्जनः, यो नारदवचनं तथ्यमपि नाऽग्रहीषम्।।३२।।दैवीमायामुपाश्रित्य प्रसुप्त इवाऽब्रह्मात्म-कान्यवस्त्वसद्भावेऽपि भेददृष्टिरहं शत्रुदृष्ट्या हृद्गतशोकेन तप्ये।।३३।। अन्यैस्तपसाऽपि दुराराध्यं परमात्मानं प्रसाद्य मरणासन्ने जने जीवनौषधप्रदानमिव मया यत् प्रार्थितं तद् व्यर्थमेव।।३४।।अहं भाग्यहीनः, येन मया मुक्तिदातारं प्रति सार्वभौमनृपतेरधनः सतुषतण्डुल-कणानिव केवलमभिमानमेव भिक्षितम्।।३५।। *मैत्रेय उवाच* – हे विदुर! भगवच्चरणसरोरुह-रजांसि सेवमाना भवादृशा जनास्तद्दास्यं विनाऽन्यमर्थं न वाञ्छन्ति, यतस्ते यदृच्छया लब्ध-संपदा सन्तुष्टाः भवन्ति।।३६।। राजोत्तानपादो ध्रुवमागच्छन्तमाकर्ण्याऽपि मृतमागतमिव न श्रद्दधे, यतो भागहीनस्य पुत्रागमनरूपं मङ्गलं कुतः स्यात्।।३७।। ततो देवर्षेर्नारदस्य

सदश्वं रथमारुह्य कार्तस्वरपरिच्छदम्। ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबन्धुभिः
।।३९।। शङ्खदुन्दुभिनादेन ब्रह्मघोषेण वेणुभिः। निश्चक्राम पुरात्तूर्णमात्मजाभी-
क्षणोत्सुकः।।४०।। सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते। आरुह्य शिबिकां
सार्धमुत्तमेनाभिजग्मतुः।।४१।। तं दृष्ट्वोपवनाभ्याश आयान्तं तरसा रथात्।
अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ।।४२।। परिरेभेऽङ्गजं दोर्भ्यां दीर्घोत्कण्ठमनाः
श्वसन्। विष्वक्सेनाङ्घ्रिसंस्पर्शहताशेषाघबन्धनम् ।।४३।। अथाजिघ्रन्मुहुर्मूर्ध्नि शीतै-
र्नयनवारिभिः। स्नापयामास तनयं जातोद्दाममनोरथः।।४४।।अभिवन्द्य पितुः
पादावाशीर्भिश्चाभिमन्त्रितः। ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः।।४५।।
सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम्। परिष्वज्याह जीवेति बाष्पगद्गदया गिरा
।।४६।। यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः। तस्मै नमन्ति भूतानि निम्नमाप
इव स्वयम्।।४७।। उत्तमश्च ध्रुवश्चोभावन्योन्यं प्रेमविह्वलौ। अङ्गसङ्गा-
दुत्पुलकावस्रौघं मुहुरूहतुः।।४८।।

।। सङ्ग्रहोक्तिः ।।

वाक्यं विश्वस्य, हर्षवेगेन विवशीकृतः स वार्ताहारिणे प्रीतः सन् बहुमूल्यं हारं प्रादात्।।३८।।
पुत्रदर्शनोत्सुको राजा सदश्वं कार्तस्वरपरिच्छदं रथमारुह्य ब्राह्मणैः कुलवृद्धैरमात्यबन्धुभिः
परिवृत्तः सन् वेदघोषेण भूयसा शंखदुन्दुभिनिनादेन च सह तूर्णं पुरान्निश्चक्राम।।३९-४०।।
राजमहिष्यौ सुनीतिः सुरुचिश्च शिबिकामारुह्योत्तमेन साकमभिजग्मतुः।।४१।। सुचिरमुत्कण्ठितः
प्रेमविह्वलमना राजा उपवनाभ्याश आयान्तं भगवच्चरणस्पर्शनष्टाशेषपापं ध्रुवं दृष्ट्वा, तरसा
रथादवरुह्य, सुतं प्राप्य श्वसन् सन् तं भुजाभ्यां परिरेभे।।४२-४३।। अथ महामनोरथो
नृपस्तनयं मूर्ध्नि मुहुराजिघ्रन् शीतैरश्रुभिस्तं स्नापयामास।।४४।। सज्जनाग्रणीर्ध्रुवः प्रथमं
पितुः पादावभिवन्द्याऽस्थात्, तदा पित्राऽऽशीर्भिरभिमन्त्रितः सत्कृतश्च सन् शीर्ष्णा मातरौ
ननाम।।४५।। सुरुचिः पादयोः पतितं बालं ध्रुवं समुत्थाप्य परिष्वज्य च बाष्पगद्गदया गिरा
"जीव" इत्याह।।४६।।मैत्र्यादिभिर्गुणैर्हरिर्यस्य प्रसन्नः, तस्मै भूतानि नमन्ति, आपः स्वयमेव
निम्नं प्रत्यवतरन्ति तद्वत्।।४७।। उत्तमो ध्रुवश्चोभावङ्गसङ्गं प्राप्योत्पुलकौ प्रेमविह्वलौ

सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम्। उपगुह्य जहावाधिं तदङ्गस्पर्शनिर्वृता ।।४९।। पयःस्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः। तदाभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः।।५०।। तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा। प्रतिलब्धश्चिरं नष्टो रक्षिता मण्डलं भुवः।।५१।। अभ्यर्चितस्त्वया नूनं भगवान् प्रणतार्तिहा। यदनुध्यायिनो धीरा मृत्युं जिग्युः सुदुर्जयम्।।५२।। लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः। आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम्।।५३।। तत्र तत्रोप-संक्लृप्तैर्लसन्मरकतोरणैः। सवृन्दैः कदलीस्तम्भैः पूगपोतैश्च तद्विधैः।।५४।। चूतपल्लववासःस्रङ्मुक्तादामविलम्बिभिः। उपस्कृतं प्रतिद्वारमपां कुम्भैः सदीपकैः ।।५५।। प्राकारैर्गोपुरागारैः शातकुम्भपरिच्छदैः। सर्वतोऽलंकृतं श्रीमद्विमान-शिखरद्युभिः।।५६।। मृष्टचत्वररथ्याट्टमार्गं चन्दनचर्चितम्। लाजाक्षतैः पुष्पफलै-स्तण्डुलैर्बलिभिर्युतम्।।५७।। ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः। सिद्धार्थाक्षतदध्यम्बुदूर्वापुष्पफलानि च।।५८।। उपजह्रुः प्रयुञ्जाना वात्सल्यादा-शिषः सतीः। शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः।।५९।।

।। सङ्ग्रहोक्तिः।।

सन्तावन्योन्यमश्रूणि मुहुर्मुमुचतुः।।४८।। ध्रुवस्य जननी सुनीतिः प्राणेभ्योऽपि प्रियं सुतमालिङ्ग्य तदङ्गस्पर्शेन सुखिता सती मनःपीडां जहौ।।४९।। हे विदुर! तदा वीरजनन्याः सुनीत्याः शीतैरश्रुभिरभिसिच्यमानाभ्यां स्तनाभ्यां पयः पुनः पुनः सुस्राव।।५०।। जनाः सुनीतिं प्रशशंसुः, हे राज्ञि! दुःखापहर्त्ता पुत्रः चिरं नष्ट, इदानीं भाग्येन त्वया प्रतिलब्धः, अयं भूमण्डलं रक्षिष्यति।।५१।। प्रणतार्तिहरो भगवान् त्वया नूनं जन्मान्तरे संपूजितो भवेत्, यस्य ध्यातारो वीराः सुदुर्जयं मृत्युं जिग्युः।।५२।। एवं जनैः लाल्यमानं ध्रुवं हस्तिनीमारोप्य प्रसन्नो जनै-स्तुयमानो नृपो पुरमविशत्।।५३।। तत्र तत्र स्थलेषु सम्यक् कृतैः मरकततोरणैः, कदलीस्तम्भैः सवृन्दैः पूगपोतैः सुशोभितम्।।५४।। चूतपल्लववासःस्रङ्मुक्तादामविलम्बिभिः, सदीपकैरपां कुम्भैः, प्रतिद्वारमलङ्कृतम्।।५५।। सुवर्णखचितैः श्रीमद्विमानद्युतिभिः प्राकारैर्गोपुरभवनैः सर्वतो-ऽलङ्कृतम्।।५६।। मृष्टचत्वररथ्याट्टमार्गं चन्दनचर्चितं, लाजाक्षतैः पुष्पफलैस्तण्डुलबलिभि-

महामणिव्रातमये स तस्मिन् भवनोत्तमे। लालितो नितरां पित्रा न्यवसद्दिवि देववत्
।।६०।। पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः। आसनानि महार्हाणि यत्र
रौक्मा उपस्कराः।।६१।। यत्र स्फटिककुड्येषु महामारकतेषु च। मणिप्रदीपा
आभान्ति ललनारत्नसंयुताः।।६२।। उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः। कूजद्वि-
हङ्गमिथुनैर्गायन्मत्तमधुव्रतैः।।६३।। वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः।
हंसकारण्डवकुलैर्जुष्टाश्चक्राह्वसारसैः।।६४।। उत्तानपादो राजर्षिः प्रभावं तनयस्य
तम्। श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परम्।।६५।। वीक्ष्योढवयसं पुत्रं प्रकृतीनां
च सम्मतम्। अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम्।।६६।। आत्मानं च प्रवयसमा-
कलय्य विशाम्पतिः। वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिम्।।६७।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे नवमोऽध्यायः।।९।।

।। सङ्ग्रहोक्तिः ।।

र्युतं पुरं ध्रुवः प्राविशत् ।।५७।। पथि दृष्टाय ध्रुवाय तत्र तत्र नगरस्त्रियः सर्षप-लाजा-ऽक्षत-दध्यम्बु-पुष्प-फलानि विकिरन्त्य आशिषो ददुः, तासां मधुराणि गीतानि शृण्वन् ध्रुवः पितुर्गेहं प्रविवेश।।५८-५९।। तस्मिन् महामणिमये भवनोत्तमे पित्रा भृशं लालितो ध्रुवः स्वर्गे देववन्न्यवसत्।।६०।। यस्मिन् भवने रुक्मपरिच्छदाः, फेननिभाः शय्याः, बहुमूल्यान्यासनानि, सुवर्णमयानि भाण्डान्यासन् ।।६१।। यत्र स्फटिकनिर्मितभित्तिषु ललनारत्नयुक्ता मणिमयाः प्रदीपा व्यराजन्त।।६२।। विविधैर्देवद्रुमैर्गायन्मत्तभ्रमरैश्च शोभमानान्युद्यानानि, वैदुर्यमणि-निर्मितसोपानविराजिता हंसकारण्डवगणैर्व्याप्ता वाप्यः शोभन्ते।।६३-६४।। राजर्षिरुत्तानपादो ध्रुवस्याऽद्भुततमं प्रभावं दृष्ट्वा श्रुत्वा च परं विस्मयं प्राप।।६५।। ततो राजा प्राप्तयौवनं प्रकृतीनां संमतं प्रजानां माननीयं च ध्रुवं पृथिवीपतिं चकार।।६६।। तत उत्तानपादः स्वं वृद्धं विचार्य, विरक्तो भूत्वाऽऽत्मनः पारलौकिकीं गतिं चिन्तयन् वनं जगाम।।६७।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः।।९।।

अथ दशमोऽध्यायः ।।१०।।

मैत्रेय उवाच – प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः। उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ।।१।। इडायामपि भार्यायां वायोः पुत्र्यां महाबलः। पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ।।२।। उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा। हतः पुण्यजनेनाद्रौ तन्मातास्य गतिं गता।।३।। ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः। जैत्रं स्यन्दनमास्थाय गतः पुण्यजनालयम्।।४।। गत्वोदीचीं दिशं राजा रुद्रानुचर-सेविताम्। ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलाम्।।५।। दध्मौ शङ्खं बृहद्बाहुः खं दिशश्चानुनादयन्। येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन्भृशम्।।६।। ततो निष्क्रम्य बलिन उपदेवमहाभटाः। असहन्तो निनादं तमभिपेतुरुदायुधाः।।७।। स तानापततो वीर उग्रधन्वा महारथः। एकैकं युगपत्सर्वानहन् बाणैस्त्रिभिस्त्रिभिः।।८।। ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि। मत्वा निरस्तमात्मानमाशंसन् कर्म तस्य तत्।।९।।

।। सङ्ग्रहोक्तिः ।।

अथदशमोऽध्यायः ।।१०।।

स्वभ्रातृघ्नानां यक्षाणां ध्रुवकृतो वधः

मैत्रय उवाच – विदुर! ध्रुवः प्रजापतेः शिशुमारस्य दुहितरं भ्रमिमुपयेमे, तस्य कल्प-वत्सर नामानौ द्वौ पुत्रौ बभूवतुः।।१।।महाबली ध्रुवो वायुपुत्र्यां द्वितीयभार्यायामिडायामुत्कलाभिधमति-मनोहरं पुत्रमजीजनत्।।२।। उत्तमस्तुत्वकृतविवाह एव हिमालये मृगयार्थं गतः, तत्र यक्षेण हतः, तस्य माता सुरुचिरपि तमन्वेषयन्ती दावाग्निदग्धा मृता च।।३।। ध्रुवो भ्रातृवधं श्रुत्वा क्रोधामर्षशुचाऽऽकुलः सन् जैत्रं रथमारुह्य कुबेरनगरीं जगाम।।४।। ध्रुव उदीचीं दिशं गतः, तत्र रुद्रानुचरसेवितां यक्षैर्व्याप्तामलकां हिमवद्द्रोण्यां ददर्श।।५।। तत्र महाबाहुर्ध्रुवः सर्वा दिश आकाशं च नादयन् शंखं दध्मौ, तेनोद्विग्नदृशो यक्षयोषितो भृशमत्रसन्।।६।। ततो बलिनो महाभटा उदायुधा यक्षा निनादमसहन्तः सन्तो ध्रुवमभिपेतुः।।७।। महारथ उग्रधन्वा ध्रुव आपततस्तान् वीक्ष्य सर्वांस्त्रिभिस्त्रिभिर्बाणैर्युगपदहन्।।८।। ललाटलग्नैस्तैस्त्रिभि-

तेऽपि चामुममृष्यन्तः पादस्पर्शमिवोरगाः। शरैरविध्यन् युगपद् द्विगुणं प्रचिकीर्षवः ।।१०।। अभ्यवर्षन् प्रकुपिताः सरथं सहसारथिम्। इच्छन्तस्तत्प्रतीकर्तुमयुतानां त्रयोदश।।१२।। औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा। न उपादृश्यत च्छन्न आसारेण यथा गिरिः।।१३।। हाहाकारस्तदैवासीत्सिद्धानां दिवि पश्यताम्। हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे।।१४।। नदत्सु यातुधानेषु जयकाशिष्वथो मृधे। उदतिष्ठद्रथात्तस्मान्नीहारादिव भास्करः।।१५।। धनुर्विस्फूर्जयन्दिव्यं द्विषतां खेदमुद्वहन्। अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः।।१६।। तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम्। कायानाविविशुस्तिग्मा गिरीनशनयो यथा।।१७।। भल्लैः संछिद्यमानानां शिरोभिश्चारुकुण्डलैः। ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ।।१८।। हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः। आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः।।१९।। हतावशिष्टा इतरे रणाजिराद् रक्षोगणाः क्षत्रियवर्यसायकैः। प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेन्द्रविक्रीडितयूथपा इव।।२०।।

।। सङ्ग्रहोक्तिः ।।

स्त्रिभिर्बाणैः स्वं पराजितं मत्वा ततस्ते तत्कर्म प्राशंसन्।।९।। यक्षा अपि सर्पाः पादाहतिमिव ध्रुवमसहमानाः प्रतिचिकीर्षवः सन्तस्तं द्विगुणं शरैरविध्यन्।।१०।। अयुतानां त्रयोदश कुपितास्ते यक्षाः परिघनिस्त्रिंशैः पाशशूलपरश्वधैश्च सरथं सहसारथिं च ध्रुवमभ्यवर्षन्।।११-१२।। भूयसा शस्त्रवर्षेणाच्छन्नो ध्रुव आसारेणच्छन्नो गिरिरिव नैवादृश्यत।।१३।। तदा दिवि पश्यतां सिद्धानां हाहाकारोऽभूत्, हन्त! मानवोऽयं सूर्य यक्षसागरे मग्नः ।।१४।। अथ युद्धे जयप्रकाशकेषु यक्षेषु नदत्सु सत्सु नीहाराद् भास्कर इव यक्षकृतशस्त्रवर्षात् सरथो ध्रुव उदतिष्ठत्।।१५।। ध्रुवो दिव्यं धनुर्विस्फूर्जयन् शत्रूणां खेदमुद्वहन् बाणैरनिलो मेघश्रेणिमिव तदस्त्रौघं चूर्णयामास।।१६।। ध्रुवस्य चापनिर्मुक्तास्तिग्मा बाणा यक्षाणां वर्माणि भित्त्वा शरीरेषु विविशुः।।१७।। तस्य भल्लैश्छिद्यमानानां यक्षाणां चारुकुण्डलैः शिरोभिर्हेमलतानिभैर्बाहुभिर्हार-केयूरमुकुटैरास्तृता रणभूमिर्विरेजे।।१८-१९।। ये हतावशिष्टा यक्षगणा आसन् ते ध्रुवबाणैर्भिन्नावयवा सिंहेन विक्रीडिता गजा इव रणभूमेर्विदद्रुवुः।।२०।।

अपश्यमानः स तदाऽऽततायिनं महामृधे कंचन मानवोत्तमः। पुरीं दिदृक्षन्नपि नाविशद् द्विषां न मायिनां वेद चिकीर्षितं जनः।।२१।। इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशङ्कितः। शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत।।२२।। क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः। विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना।।२३।। ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः। निपेतुर्गगनादस्य कबन्धान्यग्रतोऽनघ।।२४।। ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो दिशम्। गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः।।२५।। अहयोऽशनिनिःश्वासा वमन्तोऽग्निं रुषाक्षिभिः। अभ्यधावन् गजा मत्ताः सिंहव्याघ्राश्च यूथशः।।२६।। समुद्र ऊर्मिभिर्भीमः प्लावयन् सर्वतो भुवम्। आससाद महह्लादः कल्पान्त इव भीषणः।।२७।। एवंविधान्यनेकानि त्रासनान्यमनस्विनाम्। ससृजुस्तिग्मगतय आसुर्या मायया-ऽसुराः।।२८।। ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तराम्। निशाम्य तस्य मुनयः शमाशंसन् समागताः।।२९।।

।। सङ्ग्रहोक्तिः।।

तदा ध्रुवो युद्धभूमौ कंचनाऽऽततायिनमपश्यमानोऽलकां पुरीं द्रष्टुकामः सन्नपि पुर्यां न विवेश।।२१।। ध्रुवः "मायिनां शत्रूणां चिकीर्षितं न कोऽपि वेद" इति सारथिं प्रति ब्रुवन् सन् शत्रूणामाघाताच्छंकितोऽभवत्, तदैव प्रथमं समुद्रगर्जनमिव निनादमशृणोत्, ततो धूलिरुत्थिताऽदृश्यत।।२२।। क्षणेनैव कालेन सहसाऽऽकाशः सर्वतो मेघसमुदायेनाऽऽच्छादितोऽभवत्।।२३।। ते मेघा रुधिरपूयमलमूत्रमेदांसि वर्षन्तो मस्तकरहितानि कबन्धानि पातयामासुः।।२४।। ततः आकाशे गिरिरदृश्यत, तस्मात् गदा-परिघ-निस्त्रिंश-मुसल-प्रस्तरा निपेतुः।।२५।। ततो रुषाऽक्षिभिरग्निं वमन्तोऽशनिनिःश्वासाः सर्पाः, सर्वतो व्याघ्रगजसिंहादयश्चाभ्यधावन्।।२६।। सर्वत ऊर्मिभिर्भुवं प्लावयमान भीमः प्रलये महाह्लद इव समुद्रो ध्रुवं प्राप्तः।।२७।। एवं विधान्यनेकानि भयंकराणि मायाचेष्टितानि क्रूरप्रकृतयो यक्षा राक्षसाश्च मायया ससृजुः।।२८।। असुरैर्ध्रुवे प्रयुक्तां तां मायां दृष्ट्वा तत्र समायाता सर्वेऽपि ऋषयस्तस्य मङ्गलं प्रार्थितवन्तः।।२९।।

औत्तानपादे भगवांस्तव शाङ्‍र्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान्।
यन्नामधेयमभिधाय निशम्य चाद्धा लोकोऽञ्जसा तरति दुस्तरमङ्ग मृत्युम्।।३०।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे दशमोऽध्यायः।।१०।।

अथ एकादशोऽध्यायः।। ११।।

मैत्रेय उवाच - निशम्य गदतामेवमृषीणां धनुषि ध्रुवः। संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम्।।१।। संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः। क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा।।२।।तस्यार्षास्त्रं धनुषि प्रयुञ्जतः सुवर्णपुङ्खाः कलहंसवाससः।विनिःसृता आविविशुर्द्विषद्बलं वनं यथा भीमरवाः शिखण्डिनः।।३।। तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः। तमभ्यधावन् कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः।।४।।

।। सङ्ग्रहोक्तिः ।।

हे औत्तानपादे ध्रुव! भक्तदुःखहर्ता शाङ्‍र्गधन्वा भगवान् तव शत्रून् नाशयतु, यस्य नाममात्रं श्रुत्वा लोको दुस्तरमपि मृत्युं साक्षात् सुखेनैव तरति।।३०।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः।।१०।।

अथ एकादशोऽध्यायः ।।११।।

मनुना ध्रुवयक्षयुद्धं निवारितम्

मैत्रेय उवाच - हे विदुर! एवमृषीणां वचनं श्रुत्वा, ध्रुवो जलमाचम्य, धनुषि नारायणास्त्रं संदधे।।१।।हे विदुर! ध्रुवे तस्मिन्नारायणास्त्रे संधीयमाने सति गुह्यकनिर्मिता मायाः ज्ञानोदये सति क्लेशा इव क्षिप्रं विनेशुः।।२ ।। ध्रुव प्रयुक्तान् नारायणास्त्रान् निर्गताः सुवर्णपुंखाः कलहंसवाससो बाणाः शत्रुसैन्येषु वने मयुरा इव प्रविशन्ति स्म।।३ ।। तस्मिन् युद्धे नारायणास्त्रप्रेरितैर्बाणैरुपद्रुता यक्षाः कुपिता उदायुधाः सन्तः उन्नद्धफणा अहयः सुपर्णमिवेतस्ततो ध्रुवमभ्यधावन्।।४।।

स तान् पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान्। निनाय लोकं परमर्क-मण्डलं व्रजन्ति निर्भिद्य यमूर्ध्वरेतसः।।५।। तान् हन्यमानानभिवीक्ष्य गुह्यकान-नागसश्चित्ररथेन भूरिशः। औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः।।६।। *मनुरुवाच* - अलं वत्सातिरोषेण तमोद्वारेण पाप्मना। येन पुण्यजनाने-तानवधीस्त्वमनागसः।।७।। नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितम्। वधो यदुपदेवानामारब्धस्तेऽकृतैनसाम्।।८।। नन्वेकस्यापराधेन प्रसङ्गाद् बहवो हताः। भ्रातुर्वधाभितप्तेन त्वयाङ्ग भ्रातृवत्सल।।९।। नायं मार्गो हि साधूनां हृषीकेशानु-वर्तिनाम्। यदात्मानमसंगृह्य पशुवद्भूतवैशसम्।।१०।। सर्वभूतात्मभावेन भूतावासं हरिं भवान्। आराध्याप दुराराध्यं विष्णोस्तत्परमं पदम्।।११।। स त्वं हरेरनुध्यात-स्तत्पुंसामपि सम्मतः। कथं त्ववद्यं कृतवाननुशिक्षन् सतां व्रतम्।।१२।। तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु। समत्वेन च सर्वात्मा भगवान् सम्प्रसीदति ।।१३।। सुप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः। विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ।।१४।।

।। सङ्ग्रहोक्तिः ।।

ध्रुवो युद्धे संमुखं प्रधावतो बाणैश्छिन्नबाहूरुशिरोधरोदरान् पुण्यजनान् संन्यासिनः सूर्यमण्डलात् परं यं लोकं व्रजन्ति तं निनाय।।५।। निरपराधान् ध्रुवेण हन्यमानान् गुह्यकान् निरीक्ष्य ऋषिभिः सहागतो ध्रुवपितामहो मनुस्तं जगाद।।६।। *मनुरुवाच* - हे वत्स! येन निरपराधान् पुण्यजनान् त्वमवधीस्तेन पाप्मना तमोद्वारेण क्रोधेनाऽलम्।।७।। निर्दोषाणां यक्षाणां वधो यस्त्वयाऽऽरब्धस्तत् सत्पुरुषैर्गर्हितं कर्माऽस्मत्कुलोचितं न।।८।। हे भ्रातृवत्सल! ननु त्वया भ्रातृवधाभितप्तेनैकस्यैव हि दोषेण तत्सङ्गाद् बहूनां वधो कृतः।।९।। मनोनिग्रहमकृत्वा पशुवद्धिंसाचरणम्, एष भगवद्भक्तानां साधूनां मार्गो न।।१०।। भवान् सर्वभूतानामन्तरात्मानं दुराराध्यं भगवन्तमाराध्य सर्वोत्कृष्टं विष्णोः पदं प्राप।।११।। हरेर्भक्तस्त्वं हरिभजनाद्धरि-भक्तानामपि संमतो भवति, साधूनां व्रतं लोकस्याऽनुशिक्षयन्, इदमयोग्यं कथं कृतवान्?।।१२।। तितिक्षया करुणया सकलप्राणिषु मैत्र्या च समत्वेन सर्वान्तरात्मा भगवान् प्रसीदति।।१३।।

भूतैः पञ्चभिरारब्धैर्योषित्पुरुष एव हि। तयोर्व्यवायात् सम्भूतिर्योषित्पुरुषयोरिह ।।१५।। एवं प्रवर्तते सर्गः स्थितिः संयम एव च। गुणव्यतिकराद्राजन् मायया परमात्मनः।।१६।। निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः। व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत्।।१७।। स खल्विदं भगवान् कालशक्त्या गुणप्रवाहेण विभक्त-वीर्यः। करोत्यकर्त्तैव निहन्त्यहन्ता चेष्टा विभूम्नः खलु दुर्विभाव्या।।१८।। सोऽनन्तो-ऽन्तकरः कालोऽनादिरादिकृदव्ययः। जनं जनेन जनयन्मारयन्मृत्युनान्तकम् ।।१९।। न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः। तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसङ्घाः।।२०।। आयुषोऽपचयं जन्तोस्तथैवोपचयं विभूः। उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ।।२१।। केचित्कर्म वदन्त्येनं स्वभावमपरे नृप। एके कालं परे दैवं पुंसः काममुतापरे ।।२२।।

।। सङ्ग्रहोक्तिः ।।

भगवति प्रसन्ने सति जीवदशायामेव पुमान् कामक्रोधादिभिर्दोषै रहितः सन् परमेश्वरपदं प्राप्नोति।।१४।। पुरुषस्य वा योषितो देहः पञ्चभूतारब्धो भवति, स च योषित्पुरुषयोर्मैथुनात् जायते।।१५।। हे राजन्! परमात्मशरीरभूतायाः प्रकृतेर्गुणक्षोभादियं सृष्टिः संहारश्च प्रवर्तते।।१६।। अत्र सत्त्वादिगुणत्रयरहितः परमेश्वरो निमित्तमात्रमस्ति, अयस्कान्तसांनिध्याद् यथा लोहं भ्रमति तद्वत् व्यक्ताव्यक्तं विश्वं भ्रमति।।१७।। भगवान् स्वकालशक्त्या सत्त्वादिगुणप्रवाहरूपसर्गेण विभक्तशक्तिः स्वयमहन्ता सन्नपि हन्ति, अकर्ता सन्नपि सृष्टिं करोति, भगवतश्चेष्टा दुर्विभाव्या भवति।।१८।। कालशरीरकः स भगवान् जनेन जनं जनयन्, म्रियमाणं जनं मृत्युना मारयन् सन्नपि स्वयमनादिरनन्तोऽवस्थितो वर्तते।।१९।। मृत्योः परस्य सर्वान्तरात्मतया प्रजाः प्रविशतः परमात्मनः कश्चिदपि स्वकीयो परकीयो वा न भवति, रजांसि यथा धावन्तमनिलमनुधावन्ति तद्वदनीशाः प्रजास्तमनुधावन्ति।।२०।। सर्वान्तरात्मा परमेश्वरः कर्मवश्यस्य जीवस्याऽऽयुषोऽपचयमुपचयं वा स्वयं तु तद्रहितः सन् करोति।।२१।। एवं सकलप्राणिवर्गान्तरात्मानमेनं परमात्मानं केचित् कर्म वदन्ति,

अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च। न वै चिकीर्षितं तात को वेदाथ स्वसम्भवम् ।।२३।। न चैते पुत्रक भ्रातुर्हन्तारो धनदानुगाः। विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ।।२४।। स एव विश्वं सृजति स एवावति हन्त्यजः। तथापि निरहंकारान्नाज्यते गुणकर्मभिः।।२५।। एष भूतानि भूतात्मा भूतेशो भूतभावनः। स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च।।२६।। तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम्। यस्मै बलिं विश्वसृजो हरन्ति गावो यथा वै नसि दामयन्त्रिताः।।२७।। यः पञ्चवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा। वनं गतस्तपसा प्रत्यगक्षमाराध्यलेभे मूर्ध्नि पदं त्रिलोक्याः।।२८।। तमेवमङ्गात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम्। आत्मानमन्विच्छ विमुक्तमात्मदृग् यस्मिन्निदं भेदमसत् प्रतीयते ।।२९।। त्वं प्रत्यगात्मनि तदा भगवत्यनन्त आनन्दमात्र उपपन्नसमस्तशक्तौ। भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम् ।।३०।।

।। सङ्ग्रहोक्तिः।।

अपरे स्वभावं, परे दैवमेके कालमन्ये कामं = संकल्पं च वदन्ति।।२२।।एवमव्यक्तस्याऽप्रमेयस्य नानाशक्तीनामुदयकारकस्य परमात्मनश्चिकीर्षितं लोकसंभवं च कोऽपि न जानाति।।२३।।हे वत्स! तव भ्रातृहन्तार एते गुह्यका न, पुंस उत्पत्तिमरणयोः कारणं तु परमेश्वर एव वर्तते।।२४।। अजन्मा स परमात्मैव विश्वं सृजति रक्षति संहरति च, तथापि तस्य कर्तृत्वाभिमानरहितत्वात् स गुणकर्मभिर्न बध्यते।।२५।।सोऽसौ भूतानामात्मा भूतेशः भूतभावनः परमात्मा स्वशक्तिरूपया मायया भूतानि, सृजति, पाति, हन्ति च।।२६।। हे तात! अभजतां बन्धकं, भजतां मोचकं, स्वतेजसा द्योतमानं जगदाधारं भगवन्तं सर्वात्मना शरणमुपेहि, नसि दामभिर्बद्धा बलीवर्दा इव विधिमरीच्यादयो यस्मै पूजामर्पयन्ति।।२७।।यस्त्वं पुरा विमातुर्दुर्वचसा भिन्नमर्मा पञ्चवर्षे वयसि वनं गतवान्, तत्र च तपसा भगवन्तमाराध्य त्रिलोक्या मूर्ध्नि पदं लब्धवान्।।२८।। हे ध्रुव! आत्मदर्शी त्वं यस्मिन् जीवेऽन्तर्यामितयाऽवस्थितं निर्गुणमेकमक्षरं परमात्मानमनुवर्त्तस्व।।२९।।

संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परम्। श्रुतेन भूयसा राजन्नगदेन यथाऽऽमयम्
।।३१।। येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशम्। न बुधस्तद्वशं गच्छेदिच्छन्न-
भयमात्मनः।।३२।। हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम्। यज्जघ्निवान्
पुण्यजनान् भ्रातृघ्नानित्यमर्षितः।।३३।। तं प्रसादय वत्साशु सन्नत्या प्रश्रयोक्तिभिः।
न यावन्महतां तेजः कुलं नोऽभिभविष्यति।।३४।। एवं स्वायम्भुवः पौत्रमनुशास्य
मनुर्ध्रुवम्। तेनाभिनन्दितः साकमृषिभिः स्वपुरं ययौ।।३५।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे एकादशोऽध्यायः।।११।।

।। सङ्ग्रहोक्तिः ।।

त्वमन्तर्यामिणि परमानन्दमात्रे परमपुरुषे समाहितचित्तः सन् भक्तिं विधाय अहंममरूपामविद्याग्रन्थिं विभेत्स्यसि।।३०।।हे राजन्! श्रेयसां केवलं प्रतिकूलमेव क्रोधं भूयसा तत्त्वश्रवणेन यथौषधेनाऽऽमयमिव नियच्छ, ते शुभमस्तु।।३१।। यस्मात् क्रोधव्याप्तात् पुरुषाल्लोको भृशमुद्विजते, आत्मनोऽभयमिच्छन् बुधजनस्तं क्रोधं वंशो न गच्छेत्।।३२।। किं च शिवसखस्य कुबेरस्य त्वयाऽवमानं कृतं, यतस्त्वमेते मम भ्रातृहन्तारः इति मतिं कृत्वा यक्षान् जघ्निवान्।।३३।।हे वत्स! त्वं कुबेरं प्रणत्या विनयवचोभिश्च शीघ्रमेव प्रसादय, यावत् महतां तेजोऽस्माकं कुलं नाभिभवेत्।।३४।।स्वायंभुवो मनुरेवं स्वपौत्रं ध्रुवमनुशास्य, तेनाऽभिनन्दितः सन् ऋषिभिः साकं स्वपुरं ययौ।।३५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामेकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः।। १२।।

मैत्रेय उवाच - ध्रुवं निवृत्तं प्रतिबुद्ध्य वैशसादपेतमन्युं भगवान् धनेश्वरः। तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोऽभ्यवदत्कृताञ्जलिम्।।१।। *धनद उवाच* - भो भो क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ। यत्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः।।२।। न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव। काल एव हि भूतानां प्रभुरप्ययभावयोः।।३।। अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि। स्वाप्नीवाभात्यतद्ध्यानाद्यया बन्धविपर्ययौ।।४।। तद्गच्छ ध्रुव भद्रं ते भगवन्तमधोक्षजम्। सर्वभूतात्मभावेन सर्वभूतात्मविग्रहम्।।५।। भजस्व भजनीयाङ्घ्रिमभवाय भवच्छिदम्। युक्तं विरहितं शक्त्या गुणमय्याऽऽत्ममायया।।६।। वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशङ्कितः। परं परार्हाऽम्बुजनाभपादयोरनन्तरं त्वां वयमङ्ग शुश्रुम।।७।।

।। सङ्ग्रहोक्तिः।।

अथ द्वादशोऽध्यायः ।।१२।।

यज्ञैरिष्ट्वा ध्रुवस्य हरिस्थानस्य प्राप्तिः

मैत्रेय उवाच - अपगतक्रोधं ध्रुवं यक्षवधान्निवृत्तं विज्ञाय धनेश्वरः कुबेरश्चारणयक्षकिन्नरैः स्तूयमानः सन् तत्र ध्रुवसंनिधावागतः, तत्र कृताञ्जलिं ध्रुवमभ्यवदत्।।१।। *धनद उवाच* - भो क्षत्रियपुत्र! तुभ्यं परितुष्टोऽस्मि, यतस्त्वं दुस्त्यजं वैरं पितामहादेशादत्यजः।।२।। भवान् यक्षान् न हतवान्, यक्षास्तव भ्रातरं न हतवन्तः, यतो भूतानां मरणोत्पत्त्योः कारणं कालशरीरकः परमेश्वर एव प्रभुः।।३।। पुरुषस्य यथार्थज्ञानाभावादेव "अहं त्वम्" इति मिथ्या धीर्भवति, यया बन्धः, विपरीतस्वस्वरूपज्ञानं च भवति।।४।। तस्मात् सर्वभूतानां जीवानां चाऽन्तरात्मानमिन्द्रियागोचरं गुणमय्या शक्तिरूपया स्वकीयया प्रकृत्या युक्तं, तदधीनतया तद्विरहितं भजनीयपदं भवच्छिदं च भगवन्तं चिदचिच्छरीरकत्वेन कल्याणाय भजस्व, ते भद्रमस्तु, गृहान् प्रति गच्छ।।५-६।। त्वन्मनःस्थितमभिलषितमविशङ्कितः सन् त्वं मत्तो वृणीहि, हे ध्रुव! वयं त्वां पद्मनाभपादपद्मसक्तं शुश्रुम।।७।।

मैत्रेय उवाच – स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः। हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः।।८।। तस्य प्रीतेन मनसा तां दत्त्वैलविलस्ततः। पश्यतोऽन्तर्दधे सोऽपि स्वपुरं प्रत्यपद्यत।।९।। अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः। द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदम्।।१०।। सर्वात्मन्यच्युते सर्वे तीव्रौघां भक्तिमुद्वहन्। ददर्शात्मनि भूतेषु तमेवावस्थितं विभुम्।।११।। तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलम्। गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः।।१२।। षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमण्डलम्। भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम्।।१३।। एवं बहुसवं कालं महात्माऽविचलेन्द्रियः। त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनम् ।।१४।। मन्यमान इदं विश्वं मायारचितमात्मनि। अविद्यारचितस्वप्नगन्धर्वनगरोपमम्।।१५।। आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोशमन्तःपुरं परिविहारभुवश्च रम्याः। भूमण्डलं जलधिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालाम्।।१६।।

।। सङ्ग्रहोक्तिः।।

मैत्रेय उवाच – धनदेन वरवरणाय प्रेरितो बुद्धिमान् महाभागवतो ध्रुवो भगवत्स्वरूपेऽखण्डस्मृतिं वव्रे, यया पुमाननायासेन दुरत्ययं संसारात्मकं बन्धं व्यपोहति।।८।। कुबेरस्तुष्टेन मनसा ध्रुवं भगवच्चरणस्मृतिं दत्वा, ध्रुवस्य पश्यत एवाऽन्तर्दधे, ततो ध्रुवोऽपि स्वपुरं प्रत्यपद्यत।।९।। अथ ध्रुवो भूरिदक्षिणैर्यज्ञैः कर्मभिराराध्यं कर्मफलप्रदं च यज्ञेशं भगवन्तमयजत।।१०।। सर्वान्तरात्मन्यच्युते परमात्मनि तैलधारावदविच्छिन्नस्मृतिरूपां भक्तिं कुर्वन्, स्वस्मिन् भूतेषु चावस्थितं विभुं तं भगवन्तं ददर्श।।११।। प्रजाः शीलसम्पन्नं ब्रह्मण्यं दीनवत्सलं धर्ममर्यादानां रक्षकं तं ध्रुवमेव पितरमिव मेनिरे।।१२।। सुखानुभवैः पुण्यक्षयं दुःखानुभवैः पापक्षयं च कुर्वन् ध्रुवः षट्त्रिंशद्वर्षसाहस्रं यावत् क्षितिमण्डलं शशास।।१३।। एवं बहुवर्षं त्रिवर्गसाधनं कालं नीत्वाऽविकलेन्द्रियो ध्रुवो पुत्राय नृपासनमदात्।।१४।। इदं देवमनुष्याद्यात्मकं विश्वं जीवे प्रकृतिसंसर्गकृतं, प्रकृतिपरिणामरूपं, स्वप्नानुभूतगन्धर्वनगरोपमं मन्यमानः, देहस्त्रीपुत्रसुहृदः, सैन्यं, कोशं, रम्या विहारभुवः, समुद्रमेखलं भूमण्डलं च

तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वासनं जितमरुन्मनसाहृताक्षः। स्थूले दधार भगवत्प्रतिरूप एतद् ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ।।१७।। भक्तिं हरौ भगवति प्रवहन्नजस्रमानन्दबाष्पकलया मुहुरर्द्यमानः। विक्लिद्यमानहृदयः पुलकाचिताङ्गो नात्मानमस्मरदसाविति मुक्तलिङ्गः ।।१८।। स ददर्श विमानाग्र्यं नभसोऽवतरद् ध्रुवः। विभ्राजयद्दश दिशो राकापतिमिवोदितम् ।।१९।। तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणाम्बुजेक्षणौ। स्थिताववष्टभ्य गदां सुवाससौ किरीटहाराङ्गदचारुकुण्डलौ ।।२०।। विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतक्रमः। ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहताञ्जलिः ।।२१।। तं कृष्णपादाभिनिविष्टचेतसं बद्धाञ्जलिं प्रश्रयनम्रकन्धरम्। सुनन्दनन्दावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ ।।२२।। भो भो राजन् सुभद्रं ते वाचं नोऽवहितः शृणु। यः पञ्चवर्षस्तपसा भवान्देवमतीतृपत् ।।२३।।

।। सङ्ग्रहोक्तिः ।।

कालग्रस्तं विचार्य ध्रुवो बदरिकाश्रमं प्रययौ ।।१५-१६।। विशालायां निर्मले गङ्गाजले स्नात्वा विशुद्धेन्द्रियो बद्धासनः कृतेन्द्रियमनोनिग्रहो भगवद्दिव्यस्वरूपे मनो दधार, ततो ध्रुवो तद्दिव्यस्वरूपं ध्यायन् आनन्दातिशयात् पारवश्यं ययौ ।।१७।। नित्यं हरौ भक्तिं कुर्वन्, त्यक्तदेहाभिमानः शश्वदानन्दाश्रुप्रवाहेण मुहुरभिभूयमानः, द्रवद्धृदयः, पुलकाचिताङ्गो ध्रुवोऽसावहमित्यात्मानमपि नास्मरत् ।।१८।। ध्रुव आकाशादवतरद् उदितं चन्द्रमिव दश दिशो विभ्राजयच्छ्रेष्ठं विमानं चन्द्रमिव ददर्श ।।१९।। तत्र विमाने चतुर्भुजौ श्यामावरुणाम्बुजेक्षणौ सुवाससौ किरीटहाराङ्गदचारुकुण्डलौ द्वौ किशोरौ देवप्रवरौ गदामवष्टभ्य स्थितावास्ताम् ।।२०।। तौ भगवत्पार्षदौ विज्ञाय संभ्रमेण विस्मृतपूजाक्रमो ध्रुवः केवलं नामानि हे हरे! स्वामिन्! नारायण! कृष्ण! घनश्याम! इति सम्बुद्ध्योच्चारयन् बद्धाञ्जलिः सन् ननाम ।।२१।। श्रीकृष्णचरणारविन्दार्पितचेतसं विनयावनतमस्तकं ध्रुवं समीपमागत्य भगवतः पार्षदौ सुनन्दनन्दौ सस्मितमूचतुः ।।२२।। भो राजन्! तव सुभद्रमस्तु, त्वमेकाग्रमनाः सन् नो वाचं शृणु, भवान् पञ्चवर्षीय एव तपसा भगवन्तमतीतृपत् ।।२३।।

तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः। पार्षदाविह सम्प्राप्तौ नेतुं त्वां भगवत्पदम्
।।२४।। सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परम्। आतिष्ठ
तच्चन्द्रदिवाकरादयो ग्रर्हक्षतारा: परियन्ति दक्षिणम् ।।२५।। अनास्थितं ते पितृभिर-
न्यैरप्यङ्ग कर्हिचित्। आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम् ।।२६।एतद्विमान-
प्रवरमुत्तमश्लोकमौलिना। उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ।।२७।। *मैत्रेय
उवाच* - निशम्य वैकुण्ठनियोज्यमुख्ययोर्मधुच्युतं वाचमुरुक्रमप्रियः। कृताभिषेकः
कृतनित्यमङ्गलो मुनीन् प्रणम्याशिषमभ्यवादयत् ।।२८।। परीत्याभ्यर्च्य धिष्ण्याग्र्यं
पार्षदावभिवन्द्य च। इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम् ।।२९।। तदा दुन्दुभयो
नेदुर्मृदङ्गपणवादयः। गन्धर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ।।३०।। स च
स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः। अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपम्
।।३१।। इति व्यवसितं तस्य व्यवसीय सुरोत्तमौ। दर्शयामासतुर्देवीं पुरो यानेन
गच्छतीम् ।।३२।।

।। सङ्ग्रहोक्तिः ।।

अखिलजगदीशस्य शार्ङ्गिणो देवस्याऽऽवां पार्षदौ त्वां भगवद्धाम नेतुमिह सम्प्राप्तौ स्वः।।२४।।
सुदुर्जयं तद् विष्णुपदं त्वया सम्पादितमस्ति, सप्तर्षिप्रभृतयो यत्पदं केवलं विचक्षते तथा
चन्द्रदिवाकरनक्षत्रादयो यस्य प्रदक्षिणं भ्रमन्ति, तत्पदं त्वमधितिष्ठ।।२५।। हे ध्रुव! यत्
मन्वादिभिरन्यैरप्यनधिष्ठितं अत एव जगतां वन्द्यं विष्णुपदं त्वमातिष्ठ।।२६।।हे आयुष्मन्!
भगवतैतत् विमानं प्रेषितमस्ति', अत एतदारोढुं त्वमर्हसि ।।२७।। *मैत्रेय उवाच*- इति भगवत्
पार्षदयोः मधुरं वचो निशम्य भगवत्प्रियो ध्रुवः स्नानं विधाय, नैत्यकं कृत्वा, मुनीन् प्रणम्य
तेभ्य आशिषं जग्राह ।।२८।। आदौ विमानं संपूज्य, तत परिक्रम्य, पार्षदावभिवन्द्य हिरण्मयं
स्वस्वरूपं बिभ्रत् सन् विमानमधिष्ठातुमैच्छत् ।।२९।।(ध्रुव आगतं मृत्युं ददर्श, ततो मृत्योर्मूर्ध्नि
पदं धृत्वाऽद्भुतं विमानमारुरोह) तदा मृदङ्गपणवादयो दुन्दुभयश्च नेदुः, गन्धर्वा जगुः,
कुसुमवृष्टयः पेतुः ।।३०।। स ध्रुवः स्वर्लोकं ध्रुवपदमारोक्ष्यन् "अहं दीनां जननीं सुनीतिं
हित्वा दुर्गमं त्रिविष्टपं यास्ये" इति स्वमातरमन्वस्मरत् ।।३१।। एवंविधं ध्रुवस्याऽभिप्रायं

तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः। अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ।।३३।। त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि। परस्ताद्यद् ध्रुवगतिर्विष्णोः पदमथाध्यगात् ।।३४।। यद् भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनु विभ्राजन्त एते। यन्नाव्रजञ्जन्तुषु येऽननुग्रहा व्रजन्ति भद्राणि चरन्ति येऽनिशम् ।।३५।। शान्ताः समदृशः शुद्धाः सर्वभूतानुरञ्जनाः। यान्त्यञ्जसाच्युतपदमच्युतप्रिय-बान्धवाः।।३६।। इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः। अभूत्त्रयाणां लोकानां चूडामणिरिवामलः।।३७।। गम्भीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितम्। यस्मिन् भ्रमति कौरव्य मेढ्यामिव गवां गणः।।३८।। महिमानं विलोक्यास्य नारदो भगवानृषिः। आतोद्यं वितुदन् श्लोकान् सत्रेऽगायत्प्रचेतसाम्।।३९।। *नारद उवाच* - नूनं सुनीतेः पतिदेवतायास्तपः प्रभावस्य सुतस्य तां गतिम्। दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगन्तुं प्रभवन्ति किं नृपाः।।४०।। यः पञ्चवर्षो गुरुदारवाक्शरै-र्भिन्नेनं यातो हृदयेन दूयता। वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितम्।।४१।।

।। सङ्ग्रहोक्तिः।।

ज्ञात्वा नन्दसुनन्दौ विमानेन पुरो गच्छन्तीं सुनीतिं दर्शयामासतुः।।३२।। तत्र तत्र पथि सुरैः पुष्पैरवकीर्यमाणो ध्रुवो क्रमशो ग्रहान् ददर्श।।३३।। स देवयानेन त्रिलोकीं सप्तर्षीनप्यतिक्रम्य ततः परस्ताद्वर्तमानं विष्णोः पदं ध्रुवगतिः सन् प्राप्तवान्।।३४।। यद् विष्णुपदं स्वरुचा भ्राजमानं भवति, त्रयो लोका अपि यदनुसृत्य भ्राजन्ते, भूतेषु ये निष्कृपास्ते यन्नगतवन्तः, येऽनीश भद्राणि चरन्ति ते तद् व्रजन्ति।।३५।। ये च शान्ताः समदृशः सिद्धाः सर्वभूतानुरञ्जनाः प्रियभागवताश्च भवन्ति ते तदच्युतपदं गच्छन्ति।।३६।। इति कृष्णपरायणो ध्रुव त्रयाणां लोकानां चुडामणिरिवाऽमलोऽभूत्।।३७।। हे विदुर! मेढ्यां (खले निखातस्तम्भे) गम्भीरवेगो बलीवर्दसमूह इव ज्योतिषां चक्रं यस्मिन् ध्रुव अर्पितं सत् अनलसं भ्रमति।।३८।। अस्य ध्रुवस्य महिमानं विलोक्य देवर्षिर्नारदो वीणां नादयन् प्रचेतसां सत्रे त्रीन् श्लोकानगायत्।।३९।। ध्रुवस्य तपः फलभूतां गतिं तत्प्राप्तिसाधनरूपानुपायांश्च प्राप्तुमृषयोऽपि समर्था नैव भवन्ति, नृपा न

यः क्षत्रबन्धुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः। यः पञ्चवर्षो यदहोभिरल्पैः प्रसाद्य वैकुण्ठमवाप तत्पदम्।।४२।। *मैत्रेय उवाच* - एतत्तेऽभिहितं सर्वं यत्पृष्टोऽहमिह त्वया। ध्रुवस्योद्दामयशसश्चरितं सम्मतं सताम्।।४३।। धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्। स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम्।।४४।। श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितम्। भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः।।४५।। महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः। यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनाम्।।४६।। प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनाम्। सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत्।।४७।। पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणे तथा। दिनक्षये व्यतीपाते सङ्क्रमेऽर्कदिनेऽपि वा।।४८।। श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः। नेच्छंस्तत्रात्मनाऽऽत्मानं सन्तुष्ट इति सिध्यति।।४९।। ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतम्। कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते।।५०।।

।। सङ्ग्रहोक्तिः ।।

भवन्ति इति किमु वक्तव्यम्।।४०।। सुरुचिवाग्बाणभिन्नेन दूयता हृदयेन युक्तो यो ध्रुवो वनं गतः, तत्र मदादेशवर्ती स तत्भक्तगुणैर्वशंगतमजितमपि प्रभुं जिगाय।।४१।। ध्रुवेण प्राप्तं पदं भुवि यः क्षत्रबन्धुः स्यात् स वर्षसमूहैरप्यारुरुक्षेत् किं? पञ्चवर्षो योऽल्पैरेव दीनैर्भगवन्तं प्रसाद्य तत्पदमवाप।।४२।। *मैत्रेय उवाच* - हे विदुर! त्वया यत् पृष्टं तत्सर्वमिह मया कथितम्, पवित्रकीर्त्तेर्ध्रुवस्य हरिभक्तानां सम्मतं यच्चरितं तत् शृण्वतां श्रावयतां च धन्यं, यशस्करं, आयुष्करं, स्वस्त्ययनं, स्वर्ग्यं, ध्रौव्यं, सौमनस्यं, पापनिवारकं चास्ति।।४३-४४।। एतद् भगवत्प्रियस्य ध्रुवस्य चेष्टितं यो मुहुः शृणोति, तस्य भगवति भक्तिर्भवति, यया सर्वक्लेशक्षयः स्यात्।।४५।। ध्रुवचरित्रश्रवणेन श्रोतुर्महत्त्वं वर्द्धते, शीलादयो गुणाः तेजस्विनां तेजः, मनस्विनां मानश्चाऽभिवर्द्धते।।४६।। पुण्यकीर्त्तेर्ध्रुवस्य चरितं द्विजसभायां प्रातः सायं च कीर्त्तयेत्।।४७।। पूर्णिमायाममावास्यां श्रवणनक्षत्रे दिनक्षये सूर्यस्य राशिसंक्रमणे, भानुवासरे च कीर्त्तयेत्।।४८।। भगवद्भक्तो वक्ता श्रद्दधानान् श्रावयेत्, यदि श्रोता वक्ता च निष्कामो भवेत् तर्हि स भगवदनुग्रहेण सन्तुष्टो भवति।।४९।। भगवद्याथात्म्यज्ञानिने सत्पथे वर्तमानाय च

इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः। हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम।।५१।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे द्वादशोऽध्यायः।।१२।।

अथ त्रयोदशोऽध्यायः।।१३।।

सूत उवाच – निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुण्ठपदाधिरोहणम्। प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे।।१।। के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत। कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत।।२।। मन्ये महाभागवतं नारदं देवदर्शनम्। येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः।।३।। स्वधर्मशीलैः पुरुषैर्भगवान् यज्ञपूरुषः। इज्यमाने भक्तिमता नारदेनेरितः किल।।४।। यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः। मह्यं शुश्रूषवे ब्रह्मन् कार्त्स्न्येनाचष्टुमर्हसि।।५।।

।। सङ्ग्रहोक्तिः ।।

ज्ञानं दद्यात् तस्य कृपालोर्देवा अनुगृह्णते।।५०।। हे विदुर! इदं विख्यातं ध्रुवचरितं मया तुभ्यं कथितं, यो ध्रुवो मातुर्गृहं क्रीडनकानि च हित्वा विष्णुं शरणं जगाम।।५१।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः।।१२।।

अथ त्रयोदशोऽध्यायः।।१३।।

ध्रुववंशेऽङ्गस्य वैराग्यं गृहत्यागश्च

श्रीशुक उवाच – मैत्रेयेण कथितं ध्रुवस्य विष्णुपदारोहणं श्रुत्वा भगवति प्ररूढभावो विदुरः पुनः पृष्टुं प्रचक्रमे।।१।। हे मैत्रेय! भवता य उक्तास्ते प्रचेतसः के? कस्याऽपत्यानि, कस्य वंशे प्रख्याताः तथा तेषां सत्रं कुत्र बभूव?।।२।। देवदर्शनं नारदं महाभागवतं मन्ये, येन ध्रुवाय हरेः पूजाप्रकाररूपः क्रियायोगः प्रोक्तः।।३।। भक्तिमता नारदेन यो यज्ञपुरुषो भगवान् कथितः, स एव स्वधर्मशीलैः पुरुषैराराध्यमानः कथ्यते।।४।। हे ब्रह्मन्! प्रचेतसां सत्रे देवर्षिणा नारदेन याः भगवत्कथा वर्णिताः ताः शुश्रूषवे मह्यं कार्त्स्न्येन वक्तुमर्हसि।।५।।

मैत्रेय उवाच - ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम्। सार्वभौमश्रियं नैच्छदधिराजासनं पितुः।।६।। स जन्मनोपशान्तात्मा निःसङ्ग समदर्शनः। ददर्श लोके विततमात्मानं लोकमात्मनि।।७।। आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहम्। अवबोधरसैकात्म्यमानन्दमनुसन्ततम्।।८।। अव्यवच्छिन्नयोगाग्निदग्धकर्म-मलाशयः। स्वरूपमवरुन्धानो नात्मनोऽन्यं तदैक्षत।।९।। जडान्धबधिरोन्मत्तमूका-कृतिरतन्मतिः। लक्षितः पथि बालानां प्रशान्तार्चिरिवानलः।।१०।। मत्वा तं जडमु-न्मत्तं कुलवृद्धाः समन्त्रिणः। वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम्।।११।। स्वर्वीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान्। पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयम्।।१२।। पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः। प्रातर्मध्यन्दिनं सायमिति ह्यासन् प्रभासुताः।।१३।। प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः। व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे।।१४।। स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह। मनोरसूत महिषी विरजान्नड्वला सुतान्।।१५।।

।। सङ्ग्रहोक्तिः ।।

मैत्रेय उवाच - ध्रुवस्य पुत्र उत्कलः पितरि वनं प्रस्थिते सति सार्वभौमश्रियं पितृ राज्यासनं च नैच्छत्।।६ ।।स जन्मप्रभृत्युपशान्तमना निःसङ्गः समदर्शनो देहस्य जीवस्य च याथात्म्यवेत्ता बभूव।।७ ।।स्वस्वरूपसुखं देहभावविनिर्मुक्तं क्वचिदप्यंशे जाड्यभावरहितं धर्मभूतानन्दविशिष्टं निरन्तरेणाऽऽत्मयाथात्म्यज्ञानयोगाग्निना कर्माणि दग्ध्वा निर्मलान्तःकरणं प्रत्यगात्मानमनुभवन् स उत्कलस्तदितरन्नाऽपश्यत्।।८-९ ।। जडा-ऽन्ध-बधिर-उन्मत्त-मूका-ऽऽकृतिः, तथापि जाड्यादिरहितः स उत्कलः प्रशान्तार्चिरनल इवाऽभवत्।।१०।।समन्त्रिणः कुलवृद्धा उत्कलं जडमुन्मत्तं च मत्वा उत्कलात् कनिष्ठं भ्रमेः सुतं वत्सरं नृपं चक्रुः।।११।।वत्सरस्य स्वर्वीथि-नाम्नी भार्या पुष्पार्णः, तिग्मकेतुः इषः, ऊर्जः, वसुः, जयश्चेति नामानः षट् पुत्रानजीजनत्।।१२।। पुष्पार्णस्य प्रभा दोषा चेति द्वे भार्य आस्ताम्, तत्र प्रभायाः प्रातः मध्यंदिनं सायं नामानः त्रयः पुत्रा आसन्।।१३।। प्रदोषः, निशीथः, व्युष्टः, इति दोषायास्त्रयः पुत्रा जाताः, व्युष्टात् पुष्करिणीनाम्न्यां भार्यायां सर्वतेजानामकः पुत्रो बभूव।।१४ ।।सर्वतेजा आकूत्यां चक्षुःसंज्ञकं

पुरुं कुत्सं त्रितं द्युम्नं सत्यवन्तमृतं व्रतम्। अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम्
।।१६।। उल्मुकोऽजनयत्पुत्रान् पुष्पकरिण्यां षडुत्तमान्। अङ्गं सुमनसं ख्यातिं
क्रतुमङ्गिरसं गयम्।।१७।। सुनीथाङ्गस्य या पत्नी सुषुवे वेनमुल्बणम्।
यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात्।।१८।। यमङ्ग शेपुः कुपिता वाग्वज्रा
मुनयः किल। गतासोस्तस्य भूयस्ते ममन्थुर्दक्षिणं करम्।।१९।। अराजके तदा
लोके दस्युभिः पीडिता प्रजाः। जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः।।२०।।
विदुर उवाच – तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः। राज्ञः कथमभूद्दुष्टा
प्रजा यद्विमना ययौ।।२१।। किं चांहो वेनमुद्दिश्य ब्रह्मदण्डमयूयुजन्। दण्डव्रतधरे
राज्ञि मुनयो धर्मकोविदाः।।२२।। नावध्येयः प्रजापालः प्रजाभिरघवानपि। यदसौ
लोकपालानां बिभर्त्योजः स्वतेजसा।।२३।। एतदाख्याहि मे ब्रह्मन् सुनीथात्मज-
चेष्टितम्। श्रद्दधानाय भक्ताय त्वं परापरवित्तमः।।२४।।

।। सङ्ग्रहोक्तिः ।।

मनुमजीजनत्, स मनु नड्वलानाम्न्यां भार्यायामेकादश पुत्रानुत्पादयामास।।१५।। ते च पुरुः, कुत्सः, त्रितः, द्युम्नः, सत्यवान्, ऋतव्रतः, अग्निष्टोमः, अतिरात्रः, प्रद्युम्नः, शिबिः, उन्मुकः, इत्यभवन्।।१६।। तन्मध्य उन्मुकः पुष्करिण्यां भार्यायां अङ्गः, सुमनाः, ख्यातिः, क्रतुः, अङ्गिराः, गयश्चेति षट् पुत्रान् अजनयत्।।१७।। तत्राऽङ्गस्य सुनीथाख्या पत्नी, अतिक्रूरं वेनं सुतं सुषुवे, राजर्षिरङ्गो वेनस्य दौःशील्यान्निर्विण्णः सन् पुरान्निरगात्।।१८।। हे विदुर! यं वेनं वाग्वज्राः कुपिता मुनयः शेपुः, ततो गतप्राणस्य वेनस्य दक्षिणं करं भूयो ममन्थुः।।१९।।शापानन्तरमराजके लोके प्रजा दस्युभिः पीडिता बभूवुः, तदा पृथुनामा आद्यो राजा नारायणांशेन जातः।।२०।। *विदुर उवाच* – शीलनिधेः साधोर्महात्मनोऽङ्गस्य राज्ञः प्रजा दुष्टा कथमभूत्, यतो राजा दुःखितः सन् पुरान्निर्गतः।।२१।। किंच राजकर्मनिष्ठे वेने धर्मकोविदा मुनयः कमपराधमुपलक्ष्य वेनं ब्रह्मदण्डमयूयुजन्।।२२।। अपराध्यपि राजा प्रजाभिरवज्ञेयो न भवति, असौ प्रजापालो लोकपालानां सामर्थ्यं स्वतेजसा बिभर्ति।।२३।। हे ब्रह्मन्! सुनीथापुत्रस्य वेनस्य चेष्टितं श्रद्दधानाय भक्ताय मह्यं कथय, यतस्त्वं परापरविदां

मैत्रेय उवाच - अङ्गोऽश्वमेधं राजर्षिराजहार महाक्रतुम्। नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः।।२५।। तमूचुर्विस्मितास्तात यजमानमथर्त्विजः। हवींषि हूयमानानि न ते गृह्णन्ति देवताः।।२६।। राजन् हवींष्यदुष्टानि श्रद्धयाऽऽसादितानि ते। छन्दांस्ययातयामानि योजितानि धृतव्रतैः।।२७।। न विदामेह देवानां हेलनं वयमण्वपि। यन्न गृह्णन्ति भागान् स्वान् देवा ये कर्मसाक्षिणः।।२८।। *मैत्रेय उवाच* - अङ्गो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः। तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया।।२९।। नागच्छन्त्याहुता देवा न गृह्णन्ति ग्रहानिह। सदसस्पतयो ब्रूत किमवद्यं मया कृतम्।।३०।। *सदस्या ऊचुः* - नरदेवेह भवतो नाघं तावन्मनाक् स्थितम्। अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः।।३१।। तथा साधय भद्रं ते आत्मानं सप्रजं नृप। इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक्।।३२।। तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः। यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः।।३३।।

।। सङ्ग्रहोक्तिः ।।

श्रेष्ठतमोऽसि।।२४।। *मैत्रेय उवाच* - राजर्षिरङ्गः क्रतूत्तममश्वमेधमारब्धवान्, तस्मिन् यज्ञे ऋत्विग्भिराहूता अपि देवता नाऽऽजग्मुः।।२५।। हे तात! ऋत्विजो विस्मिताः सन्तो यजमानमङ्गनृपमूचुः - देवता हूयमानानि हवींषि न गृह्णन्ति।।२६।। हे राजन्! हवींषि शुद्धानि त्वया श्रद्धया संपादितानि सन्ति, एवं च मन्त्रा अप्यगतवीर्या, दृढव्रतैः प्रयुक्ता भवन्ति।।२७।। अस्मिन् महायज्ञेऽणुमात्रमपि देवानामपराधं वयं न विदाम, यतो देवहेलनात् कर्मसाक्षिणो देवाः स्वान् भागान् न गृह्णन्ति।।२८।। *मैत्रेय उवाच* - यजमानोऽङ्गः ऋत्विग्वचः श्रुत्वा सुदुर्मनाः सन् सदस्यान् प्रति तत्पृष्टुं मौनं त्यक्तवान्।।२९।। हे सदस्पतयः! इह कृतावाहूता देवा नाऽऽगच्छन्ति सोमपात्राणि न गृह्णन्ति च, मयाऽवद्यं किं कृतं, तद् यूयं ब्रूत।।३०।। *सदस्या ऊचुः* - हे नरदेव! इह जन्मनि भवतोऽघं मनागपि नास्ति, किन्त्वेकं प्राक्तनमघमस्ति, यत एवं गुणाधिकोऽपि भवान् प्रजारहितो बभूव।।३१।। अतो यथा देवा हवींषि गृह्णीयुः, तथा त्वमात्मानं सपुत्रं साधय, तव भद्रमस्तु, यज्ञभुग् भगवान् पुत्रकामेन त्वयेज्यमानः सन् पुत्रं दास्यति।।३२।। तथा सति देवाः स्वभागान् ग्रहीष्यन्ति, यतः साक्षाद् यज्ञपुरुषो हरिः पुत्रार्थं

तांस्तान् कामान् हरिर्दद्याद्यान् यान् कामयते जनः। आराधितो तथैवैष यथा पुंसां फलोदयः।।३४।। इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये। पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे।।३५।। तस्मात्पुरुष उत्तस्थौ हेममाल्यमलाम्बरः। हिरण्मयेन पात्रेण सिद्धमादाय पायसम्।।३६।। स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्। अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः।।३७।। सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युरादधे। गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजा।।३८।। स बाल एव पुरुषो मातामहमनुव्रतः। अधर्मांशोद्भवं मृत्युं तेनाऽभवदधार्मिकः।।३९।। स शरासनमुद्यम्य मृगयुर्वनगोचरः। हन्त्यसाधुर्मृगान् दीनान् वेनोऽसावित्यरौज्जनः।।४०।। आक्रीडे क्रीडतो बालान् वयस्यानतिदारुणः। प्रसह्य निरनुक्रोशः पशुमारममारयत्।।४१।। तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः। यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः।।४२।। प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः। कदपत्यकृतं दुःखं ये न विन्दन्ति दुर्भरम्।।४३।।

।। सङ्ग्रहोक्तिः ।।

वृतः स्यात्।।३३।। भगवदाराधको जनो यान् यान् कामान् प्रार्थयते हरिस्तस्मै तान् तान् कामान् दद्यात्, एष हरिर्येन प्रकारेणाऽऽराधितो भवेत् पुंसां तदनुसारेणैव फलावाप्तिर्भवति ।।३४।।एवं निश्चिन्वाना विप्रा राज्ञः प्रजोत्पत्त्यै विष्णवे पुरोडाशं निरवपन्।।३५।।हुताऽग्नेर्हेम-माली, विमलाम्बरः पुरुषः हिरण्मयेन पात्रेण सिद्धं पायसमादायोत्तस्थौ।।३६।। स राजा विप्रैरनुज्ञातः सन् पायसान्नमञ्जलिना गृहीत्वाऽवघ्राय च मुदा पत्न्यै प्रादात्।।३७।। राज्ञी सुनीथा पुंसवनं पायसं प्राश्य पत्युः सकाशाद् गर्भमादधे, गच्छति काले सा कुमारं सुषुवे।।३८।। स कुमारो बाल्यादेवाऽधर्मांशोद्भवं मातामहं मृत्युमनुसृतोऽभूत्, तेन सोऽधार्मिकोऽभवत् ।।३९।। धनुरुद्यम्य मृगयुर्वनगोचरोऽसाधुः स दीनान् मृगानवधीत्, असौ वेन आगच्छतीति श्रुत्वा सर्वो जनश्चक्रोश।।४०।। अतिक्रूरो निर्दयो वेन क्रीडास्थले क्रीडतो बालान् प्रसह्य पशुमारममारयत्।।४१।। नृपोऽङ्गः तं पुत्रं खलं वीक्ष्य विविधैरुपायैर्यदा शासितुं न शशाक, तदा भृशं दुःखित आसीत्।।४२।।ये गृहस्था अपुत्रास्ते कदपत्यजातं दुर्भरं दुःखं न विन्दन्ति,

यतः पापीयसी कीर्त्तिरधर्मश्च महान्नृणाम्। यतो विरोधः सर्वेषां यत आधिरनन्तकः
।।४४।। कस्तं प्रजापदेशं वै मोहबन्धनमात्मनः। पण्डितो बहु मन्येत यदर्थाः
क्लेशदा गृहाः।।४५।। कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात्। निर्विद्येत गृहान्मर्त्यो
यत्क्लेशनिवहा गृहाः।।४६।। एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय
महोदयोदयात्। अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्ताम्।।४७।।
विज्ञाय निर्विद्यगतं पतिं प्रजाः पुरोहितामात्यसुहृद्गुणादयः। विचिक्युरुर्व्यामतिशोक-
कातरा यथा निरूढं पुरुषं कुयोगिनः।।४८।। अलक्षयन्तः पदवीं प्रजापतेर्हतोद्यमाः
प्रत्युपसृत्य ते पुरीम्। ऋषीन् समेतानभिवन्द्य साश्रवो न्यवेदयन् पौरव भर्तृविप्लवम्
।।४९।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे त्रयोदशोऽध्यायः ।।१३।।

।। सङ्ग्रहोक्तिः ।।

तैर्देवः परमेश्वरः प्रायेणाऽभ्यर्चितः।।४३।। यत कुत्सितपुत्रात् नृणामपकीर्त्तिर्महान् अधर्मश्च भवेत्, यतः कदपत्यात् सर्वेषां विरोधः, यतोऽनन्ता मानसी पीडा च भवेत्।।४४।। तं प्रजानिमित्तमात्मनो मोहबन्धनं कः सुधीर्बहु मन्येत, यस्य पुत्रनिमित्ता गृहाः क्लेशदा भवन्ति ।।४५।। शोकानां स्थानात् सुपुत्रात् कुपुत्रं वरं मन्ये, यतो मर्त्यः गृहात् निर्विद्येत, कुत? कुपुत्रकारणात् गृहाः क्लेशनिवहा भवन्ति।।४६।। एवं निर्विण्णमना स नृपोऽङ्गः समृद्धात् गृहान्निशीथ उत्थाय परित्यक्तनिद्रः प्रसुप्तां सुनीथां हित्वा जनैरविदितः सन् निर्जगाम।।४७।। पुरोहिताऽमात्यसुहृद्गणादयः प्रजा राजानं निर्वेदं प्राप्य गतं विज्ञायाऽतिशोककातराः सत्य उर्व्यां विचिक्युः।।४८।। अङ्गनृपतेर्मार्गमजानन्तो हतोद्यमा पुरोहितामात्यादयः पुरीं प्रत्यागत्य हे विदुर! शोकाश्रुसहिताः सन्त समेतान् ऋषीन् प्रणम्य भर्तृनाशं न्यवेदयन्।।४९।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः ।।१४।।

मैत्रेय उवाच – भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः। गोप्तर्यसति वै नृणां पश्यन्तः पशुसाम्यताम् ।।१।। वीरमातरमाहूय सुनीथां ब्रह्मवादिनः। प्रकृत्यसम्मतं वेनमभ्यषिञ्चन् पतिं भुवः ।।२।। श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम्। निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ।।३।। स आरूढनृपस्थान उन्नद्धोऽष्ट-विभूतिभिः। अवमेने महाभागान् स्तब्धः सम्भावितः स्वतः ।।४।। एवं मदान्ध उत्सिक्तो निरङ्कुश इव द्विपः। पर्यटन् रथमास्थाय कम्पयन्निव रोदसी ।।५।। न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित्। इति न्यवारयद्धर्मं भेरीघोषेण सर्वतः ।।६।। वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम्। विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ।।७।। अहो उभयतः प्राप्तं लोकस्य व्यसनं महत्। दारुण्युभयतो दीप्त इव तस्करपालयोः ।।८ ।। अराजकभयादेष कृतो राजाऽतदर्हणः। ततोऽप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनाम् ।।९।।

।। सङ्ग्रहोक्तिः ।।

अथ चतुर्दशोऽध्यायः।।१४।।

विप्ररोषादुद्धतवेनस्य वधः

मैत्रेय उवाच – लोकानां क्षेमचिन्तका ब्रह्मवादिनो भृग्वादयो मुनयो नृणां रक्षकेऽविद्यमाने सति पशुसमानतां पश्यन्तो वीरमातरं सुनीथामाहूय अमात्यादीनामसम्मतमपि वेनं भूपपदेऽभ्यषिञ्चन् ।।१-२।। उग्रदण्डं वेनं नृपासने प्रतिष्ठितं श्रुत्वा दस्यवः सर्पत्रस्ता आखव इव लीना बभूवुः ।।३।। नृपासनारुढः प्राप्तैश्वर्य अत एव गर्वितोऽनम्रः सन् स महापुरुषानप्यवमेने ।।४।। मदान्धो निरंकुशो द्विप इव कुपथगः स रथमास्थाय द्यावापृथिव्यौ कम्पयन्निव पर्यटत् ।।५।। हे द्विजाः! कैश्चिदपि कदाचिदपि न दातव्यं, न च होतव्यम्, इत्थं भेरीघोषेण लोकान् दानहोमतो न्यवारयत् ।।६।। भृग्वादयो मुनयो दुराचरणरतस्य वेनस्य दुराचरणमवेक्ष्य, लोकानां दुःखं च विचार्य, मिलिताः सन्तः कृपया ऊचुः, अहो! लोकस्य उभयतः=तस्करपालकाभ्यां मूलतोऽग्रतश्चोभयतोज्वलिते काष्ठे स्थितानां पिपीलिकादीनामिव कष्टं प्राप्तम् ।।७-८।।

अहेरिव पयःपोषः पोषकस्याप्यनर्थकृत्। वेनः प्रकृत्यैव खलः सुनीथागर्भसम्भवः ।।१०।। निरूपितः प्रजापालः स जिघांसति वै प्रजाः। तथापि सान्त्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ।।११।। तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः। सान्त्वितो यदि नो याच्ञां न ग्रहीष्यत्यधर्मकृत् ।।१२।। लोकधिक्कारसन्दग्धं दहिष्यामः स्वतेजसा। एवमध्यवसायैनं मुनयो गूढमन्यवः। उपव्रज्याब्रुवन् वेनं सान्त्वयित्वा च सामभिः ।।१३।। नृपवर्य निबोधैतद्यत्ते विज्ञापयामः भोः। आयुःश्रीबलकीर्तीनां तव तात विवर्धनम् ।।१४।। धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः। लोकान् विशोकान् वितरत्यथानन्त्यमसङ्गिनाम् ।।१५।। स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः। यस्मिन् विनष्टे नृपतिरैश्वर्यादवरोहति ।।१६।। राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः। रक्षन् यथा बलिं गृह्णन्निह प्रेत्य च मोदते ।।१७।। यस्य राष्ट्रे पुरे चैव भगवान् यज्ञपूरुषः। इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमात्मकैः ।।१८।।

।। सङ्ग्रहोक्तिः ।।

नृपपदस्याऽयोग्योऽपि एष वेनोऽराजकताभयाद् राजा कृतः, अद्य तस्मान्नृपादपि भयमागतं, देहिनां सुखं कथं स्यात् ।।९।। सर्पस्य क्षीरेण पोषणं यथा पोषकस्याऽप्यनर्थकृत्, तथा सुनीथागर्भसंभवोऽयं वेनः स्वभावादेव खलोऽस्ति ।।१०।। एवं दोषयुक्तोऽपि वेनोऽस्माभिः प्रजापालो नियुक्तः, स एवेदानीं प्रजा जिघांसति चेत् वयं तं वेनं सान्त्वयेम, ततस्तत् पातकमस्मान् न स्पृशेत् ।।११।। तस्य दौरात्म्यं जानद्भिरप्यस्माभिर्दुराचारो वेनो नृपः कृतः, सान्त्वितोऽप्यधर्मकृदयमस्माकं याच्ञां न ग्रहीष्यति चेत् तर्हि लोकधिक्कारेण संदग्धं तं स्वतेजसा धक्ष्यामः ।।१२।।एवं निश्चित्य भृग्वादयो मुनय एनं वेनमुपगम्य, सामभिः सान्त्वयित्वाऽब्रुवन् ।।१३।। भो नृपवर्य! वयं यद् विज्ञापयामस्तदवधारय. हे तात! अस्मदुक्तं त्वदायुःश्रीबलकीर्त्तिविवर्द्धकं भवति ।।१४।।पुंसां वाङ्मनःकायबुद्धिभिराचरितो धर्मो लोकान् निर्दुःखान् करोति, विरक्तानां मोक्षं वितरति ।।१५।। हे वीर! तव प्रजानां च सुखरूपो धर्मो मा नश्येत्, धर्मे नष्टे सति पार्थिव ऐश्वर्याद् भ्रश्यति ।।१६।।हे राजन्! असदमात्यचौरादिभ्यः प्रजा रक्षन्, ताभ्यः करं गृह्णन् नृपो लोके परलोके च सुखी भवति ।।१७।।

तस्य राज्ञो महाभाग भगवान् भूतभावनः। परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥१९॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे। लोकाः सपाला ह्येतस्मै हरन्ति बलिमादृताः॥२०॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयम्। यज्ञैर्विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि॥२१॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः। स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेलनं नार्हसि वीर चेष्टितुम्॥२२॥ *वेन उवाच* – बालिशा बत यूयं वा अधर्मे धर्ममानिनः। ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते॥२३॥ अवजानन्त्यमी मूढा नृपरूपिणमीश्वरम्। नानुविन्दन्ति ते भद्रमिह लोके परत्र च॥२४॥ को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी। भर्तृस्नेहविघातानां यथा जारे कुयोषिताम्॥२५॥ विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः। पर्जन्यो धनदः सोमः क्षितिरग्निरपाम्पतिः॥२६॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः। देहे वसन्ति नृपतेः सर्वदेवमयो नृपः॥२७॥

॥ सङ्ग्रहोक्तिः॥

यस्य राज्ञो देशे पुरे च वर्णाश्रमिभिर्जनैर्यज्ञपुरुष इज्यते, हे महाभाग! स्वाज्ञायां स्थितस्य तस्य राज्ञः सर्वात्मा भूतभावनो भगवान् परितुष्यति॥१८-१९॥ तस्मिन् जगदीश्वरे तुष्टे सत्यप्राप्यं किमस्ति, लोकपालकैः सह लोका एतस्मै सादरं पूजामर्पयन्ति॥२०॥ हे राजन्! त्वं सर्वलोक-देव-यज्ञ-मयं त्रयीमयं तपोमयं च भगवन्तं विविधैः यज्ञैस्तव समृद्धये मुक्तये च यजतो लोकाननुकूलीकर्तुमर्हसि॥२१॥ यस्य राज्ञो देशवासिभिर्भगवान् तदंशरूपा देवाश्च यज्ञेनेज्यमानाः, अत एव सुतुष्टाः सन्त तद्वाञ्छितं प्रयच्छन्ति, हे वीर! तेषां देवानामवज्ञां कर्तुं भवान्नार्हति॥२२॥ *वेन उवाच* - अधर्मे धर्ममानिनो यूयमज्ञाः स्थ, यथा ललना वृत्तिदं पतिं हित्वा जारपुरुषं सेवते, तद्वद् यूयं वृत्तिदं प्रभुं मां हित्वाऽन्यं प्रभुं सेवध्वे॥२३॥ मूढा जना नृपरूपिणमीश्वरमवजानन्ति, त इहामुत्र च भद्रं नानुविन्दन्ति, किंतु दुःखिनो भवन्ति॥२४॥ भर्तृस्नेहविहीनानां कुयोषितां यथा जारे भक्तिर्भवति तथा भवतामीदृशी भक्तिर्यस्मिन् भवति स यज्ञपुरुषः को नाम?॥२५॥ विष्णुः, ब्रह्मा, शिव, इन्द्रो वायुर्यमादय

तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः। बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान्।।२८।। इत्थं विपर्ययमतिः पापीयानुत्पथं गतः। अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमङ्गलः।।२९।। इति तेऽसत्कृतास्तेन द्विजाः पण्डितमानिना। भग्नायां भव्ययाच्ञायां तस्मै विदुर चुक्रुधुः।।३०।। हन्यतां हन्यतामेष पापः प्रकृतिदारुणः। जीवञ्जगदसावाशु कुरुते भस्मसाद् ध्रुवम्।।३१।। नायमर्हत्यसद्वृत्तो नरदेव-वरासनम्। योऽधियज्ञपतिं विष्णुं विनिन्दत्यनपत्रपः।।३२।। को वैनं परिचक्षीत वेनमेकमृतेऽशुभम्। प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः।।३३।। इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः। निजघ्नुर्हुङ्कृतैर्वेनं हतमच्युतनिन्दया।।३४।। ऋषिभिश्चा-श्रमपदं गते पुत्रकलेवरम्। सुनीथा पालयामास विद्यायोगेन शोचती।।३५।। एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः। हुत्वाग्नीन् सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ।।३६।। वीक्ष्योत्थितान्महोत्पातानाहुस्तज्जभयातुराः। अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः।।३७।।

।। सङ्ग्रहोक्तिः ।।

एते चान्ये च वरशापयोः समर्थाः सर्वे देवा नृपदेहे निवसन्ति, यतो नृपः सर्वदेवमयः प्रोक्तः।।२६-२७।। हे मुनयः! निर्मत्सरा यूयं कर्मभिर्मां यजत, मह्यं बलिमर्पयत, मदन्यः कः पुमान् पूज्योऽस्ति।।२८।। विपरीतबुद्धिः पापीयान् कुमार्गगो भ्रष्टमङ्गलो वेनो मुनिभिरनुनीयमानोऽपि तदयाच्ञां न स्वीकृतवान्।।२९।। इत्थं पण्डितमानिना वेनेनाऽवज्ञातास्ते मुनयो लोकशुभावह-याच्ञायां भग्नायां सत्यां तस्मै चुक्रुधुः।।३०।। स्वभावत एव क्रूरः पापीयान् एष वेनो हन्यतां हन्यताम्, यो जीवन्नसावाशु जगद् भस्मसात् कुरुते।।३१।। दुराचारोऽयं नृपासनं नार्हति, यो निर्लज्जः सन् यज्ञपतिं विष्णुं निन्दति।।३२।। अशुभाचारमेनं विना कोऽन्यः पुरुषो यत्कृपामाश्रित्येदृशमैश्वर्यं प्राप्यैनं विष्णुं निन्देत्।।३३।। इत्थं कृतनिश्चया रूढमन्यवस्ते मुनयोऽच्युतनिन्दया हतप्रायमपि वेनं हुंकारैर्निजघ्नुः।।३४।। इत्थं कृत्वा मुनिषु स्वाश्रमं गतेषु शोकातुरा सुनीथा विद्यायोगेन पुत्रशरीरं ररक्ष।।३५।। एकदा ते मुनयः सरस्वतीजले कृतस्नानाः सन्तः सरित्तट उपविष्टाः, तत्र ते होमं कृत्वा सत्कथाश्चक्रुः।।३६।। तदोत्थितान् महोत्पातान् वीक्ष्य

एवं ब्रुवत्सु ऋषिषु धावतां सर्वतो दिशम्। पांसुः समुत्थितो भूरिश्चोराणामभिलुम्पताम्
॥३८॥ तदुपद्रवमाज्ञाय लोकस्य वसु लुम्पताम्। भर्तर्युपरते तस्मिन्नन्योन्यं च
जिघांसताम् ॥३९॥ चोरप्रायं जनपदं हीनसत्त्वमराजकम्। लोकान्नावारयञ्छक्ता
अपि तद्दोषदर्शिनः ॥४०॥ ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः। स्रवते
ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा ॥४१॥ नाङ्गस्य वंशो राजर्षेरेष संस्थातुमर्हति।
अमोघवीर्या हि नृपा वंशेऽस्मिन् केशवाश्रयाः ॥४२॥ विनिश्चित्यैवमृषयो विपन्नस्य
महीपतेः। ममन्थुरूरुं तरसा तत्रासीद्बाहुको नरः ॥४३॥ काककृष्णोऽतिह्रस्वाङ्गो
ह्रस्वबाहुर्महाहनुः। ह्रस्वपाङ् निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ॥४४॥ तं तु तेऽवनतं
दीनं किं करोमीति वादिनम्। निषीदेत्यब्रूवंस्तात स निषादस्ततोऽभवत् ॥४५॥
तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः। येनाहरज्जायमानो वेनकल्मषमुल्बणम्
॥४६॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे चतुर्दशोऽध्यायः ॥१४॥

॥ सङ्ग्रहोक्तिः ॥

तज्जभयातुरास्ते आहुः – अराजके देशे प्रजायाश्चौरादिभिः पीडा नाभवत् कच्चित्? ॥३७॥
एवं मुनिषु ब्रुवत्सु सत्सु तदैव सर्वदिक्षु धावतामभिलुण्ठतां चौराणां पादघातैर्धूलिः समुत्थिता
॥३८॥ राज्ञि नष्टे सति लोकस्य वसु लुण्ठतां चौराणां तथा परस्परं जिघांसतां लोकानामुपद्रवं
विदित्वा, राष्ट्रं चौरप्रायमराजकं सत्त्वहीनं च ज्ञात्वा वेनमिव हुंकारेण चौरादीन्निहन्तुं समर्था
ऋषयस्तद्दोषदर्शिन अत एव लोकान् न निवारितवन्तः ॥३९-४०॥ समदर्शी शान्तो ब्राह्मणो
यदि दीनानां समुपेक्षको भवेत्तर्हि तस्य तपः, भिन्नभाण्डाज्जलमिव स्रवते ॥४१॥ राजर्षेरङ्गस्य
वंशो नाशं यातुं नाऽर्हति, यतोऽस्मिन् वंशे केशवाश्रया अमोघवीर्या नृपा आसन् ॥४२॥ ऋषय
एवं निश्चित्य मृतस्य वेनस्य वामोरुं बलेन ममन्थुः, तत्र बाहुकनामा नर आसीत् ॥४३॥ स
काकवत् कृष्णोऽतिह्रस्वाङ्गो ह्रस्वबाहुर्महाहनुर्निम्ननासाग्रो रक्ताक्षस्ताम्रकेशश्चाऽसीत् ॥४४॥
किं करोमीति वादिनमवनतं तं बाहुकं ते मुनयः "निषीद" इत्यब्रुवन्, तेन स निषादोऽभवत्,

अथ पञ्चदशोऽध्यायः ।।१५।।

मैत्रेय उवाच - अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत।।१।। तद् दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः। ऊचुः परमसन्तुष्टा विदित्वा भगवत्कलाम्।।२।। *ऋषय ऊचुः* - एष विष्णोर्भगवतः कला भुवनपालिनी। इयं च लक्ष्म्याः सम्भूतिः पुरुषस्यानपायिनी।।३।। अत्र तु प्रथमो राज्ञां पुमान् प्रथयिता यशः। पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः।।४।। इयं च सुदती देवी गुणभूषणभूषणा। अर्चिर्नाम वरारोहा पृथुमेवावरुन्धती।।५।। एष साक्षाद्धरेरंशो जातो लोकरिरक्षया। इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ।।६।। प्रशंसन्ति स्म तं विप्रा गन्धर्वप्रवरा जगुः। मुमुचुः सुमनोधारा सिद्धा नृत्यन्ति स्वःस्त्रियः।।७।।

।। सङ्ग्रहोक्तिः ।।

असौ निषादो वेनपापमहरत्, तेन तस्य ये वंश्यास्ते गिरिकाननवासिन नैषादा अभवन्।।४५-४६ ।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां चतुर्दशोऽध्यायः।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

वेनबाहुतः पृथोः प्रादुर्भावस्तस्य राज्याभिषेकश्च

मैत्रेय उवाच - अथाऽपुत्रस्य वेनस्य पुनः मथ्यमानाभ्यां बाहुभ्यां स्त्रीपुंसात्मकं युगलमुद्भूव ।।१।।जातं तद्युगलं भगवदंशभूतं विदित्वा परमसन्तुष्टा ऋषयो भृग्वादय ऊचुः।।२।। *ऋषय ऊचुः* - एष पुमान् विष्णोर्भुवनपालकः कलांवतारो भवति, पुरुषस्य सहचारिणीयं स्त्री लक्ष्म्याः कलारूपाऽस्ति।।३।। अयं पुमान् प्रथमो राजा सर्वत्र कीर्त्तिं प्रथयिता, अतः पृथुश्रवाः पृथुनामा भविष्यति।।४।। इयं देवी सुदती गुणभूषणा पृथुमेव पतित्वेन स्वीकुर्वाणा 'अर्चिः' इति नामधेया भविष्यति।।५।। लोकरिरक्षया जातः पृथुः साक्षाद्धरेरंशो भवति, इयमर्चिः तदनन्यार्हा लक्ष्म्यंशभूता जाताऽस्ति।।६।। तदानीं तं पृथुं विप्राः प्रशंसन्ति स्म, गन्धर्वा जगुः सिद्धाः पुष्पवृष्टीः मुमुचुः, अप्सरसो नृत्यन्ति स्म।।७।।

शङ्खतूर्यमृदङ्गाद्या नेदुर्दुन्दुभयो दिवि। तत्र सर्व उपाजग्मुर्देवर्षिपितृणां गणाः॥८॥ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः। वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥९॥ पादयोररविन्दं च तं वै मेने हरेः कलाम्। यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः॥१०॥ तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः। आभिषेचनिकान्यस्मै आजह्रुः सर्वतो जनाः॥११॥ सरित्समुद्रा गिरयो नागा गावः खगा मृगाः। द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनम्॥१२॥ सोऽभिषिक्तो महाराजः सुवासाः साध्वलङ्कृतः। पत्न्यर्चिषालङ्कृतया विरेजेऽग्निरिवापरः॥१३॥ तस्मै जहार धनदो हैमं वीर वरासनम्। वरुणः सलिलस्रावमातपत्रं शशिप्रभम्॥१४॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजम्। इन्द्रः किरीटमुत्कृष्टं दण्डं संयमनं यमः॥१५॥ ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमम्। हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम्॥१६॥ दशचन्द्रमसिं रुद्रः शतचन्द्रं तथाम्बिका। सोमोऽमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथम्॥१७॥ अग्निराजगवं चापं सूर्यो रश्मिमयानिषून्।

॥ सङ्ग्रहोक्तिः॥

दिवि शंखमृदंगतूर्याद्या दुन्दुभयश्च नेदुः, तत्र सर्वे देवर्षिपितृणां गणा उपाजग्मुः॥८॥ जगत्पिता ब्रह्मा वेदैः सुरेश्वरैश्च सह तत्रागतः, पृथोर्दक्षिणे करे भगवतश्चक्रादिरेखात्मकं लक्ष्म, पादयोः कमलचिह्नं च निरीक्ष्य, तं पृथुं हरेरंशं मेने, यतो यस्य चक्रं रेखान्तरैरप्रतिहतं, स परमपुरुषस्यांशो बोध्यः॥९-१०॥ ब्राह्मणैः पृथोरभिषेक आरब्धः, जना अभिषेकसाधनानि सर्वाभ्यो दिग्भ्य आजह्रुः॥११॥ ससरित्समुद्राः, गिरयः, नागाः, गावः, खगाः, मृगाः, द्यौः, क्षितिः, सर्वभूतान्युपायनान्याजह्रुः॥१२॥ विप्रैरभिषिक्तो महाराज पृथुः सुवासाः साध्वलंकृतः स्वलंकृतया पत्न्याऽर्चिषा सहाऽपरोऽग्निरिव विरेजे॥१३॥ हे वीर! पृथवे कुबेरो हैमं सिंहासनमर्पयामास, वरुणः सलिलस्रावं छत्रं॥१४॥ वायुर्वालव्यजने, धर्मः कीर्त्तिमयीं स्रजं, इन्द्र उत्कृष्टं किरीटं, यमो दण्डं॥१५॥ ब्रह्मा वेदमयं कवचं, सरस्वती श्रेष्ठं हारं, हरिः सुदर्शनं चक्रं, लक्ष्मीरनश्वरां सम्पत्तिं॥१६॥ रुद्रो दशचन्द्रकमसिं, अम्बिका शतचन्द्रकं वर्म, चन्द्रोऽमृतमयान् अश्वान्, त्वष्टाऽतिसुन्दरं रथम्॥१७॥ अग्निराजगवं धनुः, सूर्यो रश्मिमयान् बाणान्, पृथिवी -

भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् ।।१८।। नाट्यं सुगीतं वादित्रमन्तर्धानं च खेचराः। ऋषयश्चाशिषः सत्याः समुद्रः शङ्खमात्मजम् ।।१९।। सिन्धवः पर्वता नद्यो रथवीथीर्महात्मनः। सूतोऽथ मागधो बन्दी तं स्तोतुमुपतस्थिरे।।२०।। स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान्। मेघनिर्ह्लादया वाचा प्रहसन्निदमब्रवीत् ।।२१।। *पृथुरुवाच* – भोः सूत हे मागध सौम्य बन्दिँल्लोकेऽधुनास्पष्टगुणस्य मे स्यात्। किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन् वितथा गिरो वः।।२२।। तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः। सत्युत्तमश्लोक-गुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः।।२३।। महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि। तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद।।२४।। प्रभवो ह्यात्मनः स्तोत्रं जुगुप्सन्त्यपि विश्रुताः। ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितम् ।।२५।। वयं त्वविदिता लोके सूताद्या विवरीमभिः। कर्मभिः कथमात्मानं गापयिष्याम बालवत् ।।२६।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पञ्चदशोऽध्यायः।।१५।।

।। सङ्ग्रहोक्तिः ।।

योगमय्यौ पादुके, द्यौरन्वहं पुष्पावलिं ।।१८।। सिद्धगन्धर्वादय नाट्यं, सुगीतं, वादित्रं, अन्तर्द्धानं च ऋषयः सत्या आशिषः, समुद्रः शंखं च अर्पयामास ।।१९।। नदाः, नद्यः, पर्वताः, महात्मनः पृथोः रथमार्गान् ददुः, ततः सूतः, मागधः, बन्दी च पृथुं स्तोतुमुपतस्थिरे ।।२०।। महाप्रतापवान् पृथुः सूतादीन् स्तावकानभिज्ञाय मेघगम्भीरया वाचा हसन् सन् प्रोवाच ।।२१।। हे सौम्य सूत! मागध! बन्दिन् लोकेऽधुनाऽस्पष्टगुणस्य मम भवद्भिः क्रियमाणा स्तुतिः किं विषया स्यात्, इदानीमुच्चारिता भवतां वाणी मिथ्या न स्यात् ।।२२।। मधुरवचो भवन्तोऽतोऽनन्तरमस्मद्गुणेषु स्पष्टतां यातेषु सत्सु, प्रसिद्धिं गतानामस्मद् यशसां गानं यथेष्टं कुरुत, भगवद्गुणानुवादे क्रियमाणे सत्यपरगुणानुवादं सज्जना बहु मन्यन्ते नहि ।।२३।। सांप्रतमसतोऽपि महापुरुषाणां गुणान् आत्मनि संपादयितुं शक्तः सन्नपि को जनस्तान् आदावेव स्तावकैस्तावयते? न -

अथ षोडशोऽध्यायः ।।१६।।

मैत्रेय उवाच – इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः। तुष्टुवुस्तुष्ट-मनसस्तद्वागमृतसेवया ।।१।। नालं वयं ते महिमानुवर्णने यो देवदेवोऽवततार मायया। वेनाङ्गजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः।।२।। अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः। यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि।।३।। एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन्। गोप्ता च धर्मसेतूनां शास्ता तत्परिपन्थिनाम् ।।४।। एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः। काले काले यथाभागं लोकयोरुभयोर्हितम् ।।५।। वसु काल उपादत्ते काले चायं विमुञ्चति। समः सर्वेषु भूतेषु प्रतपन् सूर्यवद्विभुः।।६।।

।। सङ्ग्रहोक्तिः ।।

कोऽपि, यदि स्तावयते तर्हि जनेषूपहास्पदो भवति ।।२४।। परमोदारा विश्रुता ह्रीमन्तः प्रभवो विगर्हितं पौरुषमिवोचितामपि स्तुतिं समक्षं न सहन्ते ।।२५।। हे सूताद्याः! वयं लोकेऽप्रख्याताः, अतोऽत्यन्तश्रेष्ठैः कर्मभिरात्मानं बालवत् कथं गापयिष्यामः।।२६।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः।।१५।।

अथ षोडशोऽध्यायः ।।१६।।

सूतादिभिः कृता पृथोः स्तुतिः

मैत्रेय उवाच – गायकाः सूतादयः पृथुना वारिता अपि मुनिभिर्नोदितास्तस्य पृथोर्वागमृतसेवया तुष्टमनसः सन्तो नृपतिं पृथुं तुष्टुवुः।।१।। हे देववर्य! वयं ते महिमानुवर्णने समर्था न, यतस्तव गुणगाने बृहस्पत्यादीनामपि बुद्धयो भ्रममापुः।।२।। तथापि विपुलकीर्तेः हरेरंशावतारस्य कथामृतादरा वयं योगबलेन मुनिभिः प्रेरिताः सन्तः पृथोस्तव श्लाघ्यानि कर्माणि विस्तारयामः ।।३।। एष पृथुर्धर्मभृतां मध्ये श्रेष्ठः, अत एव लोकं धर्मेऽनुवर्तयन्, धर्मसेतूनां गोप्ता, धर्मविरोधिनां शास्ता च भविष्यति ।।४।। एष एक एव लोकपालानां तेजो यथोभयोर्लोकयोर्हितं स्यात् तथा स्वतनौ धारयिष्यति ।।५।। यथा प्रतपन् सूर्योऽष्टौ मासान् भूमेर्जलं शोषयति

तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि। भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान् ।।७।। देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः। कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यञ्जसेन्द्रवत् ।।८।। आप्याययत्यसौ लोकं वदनामृतमूर्तिना। सानुरागावलोकेन विशदस्मितचारुणा।।९।। अव्यक्तवर्त्मैष निगूढकार्यो गम्भीरवेदी उपगुप्तवित्तः। अनन्तमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा।।१०।। दुरासदो दुर्विषह आसन्नोऽपि विदूरवत्। नैवाभिभवितुं शक्यो वेनारण्युत्थितोऽनलः।।११।। नादण्ड्यं दण्डयत्येष सुतमात्मद्विषामपि। दण्डयत्यात्मजमपि दण्ड्यं धर्मपथे स्थितः।।१३।। अस्याप्रतिहतं चक्रं पृथोरामानसाचलात्। वर्तते भगवानर्को यावत्तपति गोगणैः।।१४।। रञ्जयिष्यति यल्लोकमयमात्मविचेष्टितैः। अथामुमाहू राजानं मनोरञ्जनकैः प्रजाः।।१५।। दृढव्रतः सत्यसन्धो ब्रह्मण्यो वृद्धसेवकः। शरण्यः सर्वभूतानां मानदो दीनवत्सलः।।१६।। मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः।

।। सङ्ग्रहोक्तिः ।।

वर्षासु मुञ्चति च तथैवायं काले काले करं गृह्णाति दुर्भिक्षसमये विमुञ्चयिष्यति च।।६।। करुणः क्षितिसमः पृथुर्मस्तक आक्रमतामप्यार्तानां भूतानामपराधं सहिष्यते।।७।। नृपरूपो हरिरेष सर्वहितेच्छुः पृथुः पर्जन्येऽवर्षति सति दुःखिताः प्रजा इन्द्रवत् सत्वरं रक्षिष्यति।।८।। असौ पृथुः सप्रेमावलोकनेन विशदस्मितसुन्दरेण मुखचन्द्रेण लोकं वर्द्धिष्यति।।९।। अविज्ञातमार्गो गुप्तकार्यो गम्भीरवेदी सुगुप्तवित्तो गुणैकधाम पृथुर्वरुण इव संवृतात्मा भविष्यति।।१०।। शत्रुभिर्दुरासदो दुर्विषहश्चैष सन्निहितः सन्नप्यभिभवितुमशक्यो वह्निवद् भविष्यति।।११।। देहिनामध्यक्षो वायुरिव गुप्तचरैर्भूतानां कर्माण्यन्तर्बहिश्च पश्यन्नप्युदासीन इव वर्त्तिष्यते ।।१२।। एष पृथुरदण्ड्यं शत्रुपुत्रमपि न दण्डयिष्यति, दण्ड्यं स्वपुत्रमपि दण्डयिष्यति, यत स धर्मपथे स्थितोऽस्ति।।१३।। अस्याऽऽज्ञाचक्रं मानसपर्वताद् आरभ्य सूर्यः स्वकिरणैर्यावद्भूमण्डलं तपति तावत्पर्यन्तं प्रवर्तते।।१४।। अयं पृथुरात्मविचेष्टितैर्लोकं रञ्जयिष्यति, अतः प्रजामनोरञ्जनविधानेनैनं प्रजा राजानमाहुः।।१५।। एष दृढव्रतः सत्यप्रतिज्ञः, ब्राह्मणभक्तः, वृद्धसेवकः, सर्वभूतानां शरण्यः, दीनवत्सलश्च भविष्यति।।१६।।

प्रजासु पितृवत् स्निग्धः किङ्करो ब्रह्मवादिनाम् ।।१७।। देहिनामात्मवत्प्रेष्ठः सुहृदां नन्दिवर्धनः। मुक्तसङ्गप्रसङ्गोऽयं दण्डपाणिरसाधुषु ।।१८।। ओजसैष महावीरो दोग्धा गामोषधीर्गतिम्। इमां च स्वधनुष्कोट्या समां परि करिष्यति ।।१९।। अयं तु साक्षाद् भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः। यस्मिन्नविद्यारचितं निरर्थकं पश्यन्ति नानात्वमपि प्रतीतम् ।।२०।। अयं भुवो मण्डलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः। आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः।।२१।। अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यन्ति सलोकपालाः। मंस्यन्त एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उच्चरन्त्यः।।२२।। अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानाम्। यो लीलयाऽद्रीन् स्वशराग्र्यकोट्या भिन्दन् समां गामकरोद्यथेन्द्रः।।२३।। विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत् क्ष्मामविषह्यमाजौ। तदा निलिल्युर्दिशि दिश्यसन्तो लाङ्गूलमुद्यम्य यथा मृगेन्द्रः।।२४।।

।। सङ्ग्रहोक्तिः ।।

अयं परदारेषु मातृभावनः, पत्न्यां स्वशरीरार्द्धे इव प्रीतिमान्, प्रजासु पितृवत् स्निग्धः, ब्रह्मविदां दास इव भविष्यति ।।१७।। प्राणिनामात्मवत् प्रेष्ठः, सुहृदामानन्दवर्द्धनः, साधूनां सङ्गी, असाधुषु दण्डपाणिरिव भविता ।।१८।। महावीर एष आत्मबलेन भूमिमौषधीर्दोग्धा, किंच भूमिमपि स्वधनुष्कोट्या समां करिष्यति ।।१९।। अयं तु साक्षाद् भगवान्, अत एव कूटस्थः, त्रिलोकेशः, स्वांशेनावतीर्णः परमात्मैव प्रादुर्बभूव, यस्मिन् मायारचितवद् प्रतीतं मनुष्यवद्भासमानतारूपं भेदं तत्त्वदर्शिनो निरर्थकं पश्यन्ति ।।२०।। एकवीरो नरलोकनाथोऽयं पृथुरुदयाचलपर्यन्तं भूमेर्गोप्ता, अर्कवत् मेरोः परितो भूगोलं प्रदक्षिणीकरिष्यति ।।२१।। तदा लोकपालैः सह नृपाला अस्मा उपायनं समर्पयिष्यन्ति, एषां स्त्रियोऽपि पृथोः कीर्त्ति-मुच्चरन्त्यः सत्य एनं चक्राऽयुधं मंस्यन्ते ।।२२।। अधिराजो योऽयं प्रजानां वृत्तिकरः पृथुः, गोरूपधरां महीं दुदुहे, य इन्द्रवत् स्वधनुष्कोट्या लीलयाऽद्रीन् भिन्दन् भूमिं समामकरोत् ।।२३।। पुच्छमुन्नमय्य चरन् सिंह इव अविषह्यमाजगवं धनुः संग्रामे विस्फूर्जयन्नयं यदा भूमिमचरत् तदाऽस्य धर्मविरोधिनः दिशि दिशि निलिल्युः ।।२४।।

एषोऽश्वमेधान् शतमाजहार सरस्वती प्रादुरभावि यत्र। अहारषीद्यस्य हयं पुरन्दरः शतक्रतुश्चरमे वर्तमाने ।।२५।। एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवन्तमेकम्। आराध्य भक्त्याऽलभतामलं तज्ज्ञानं यतो ब्रह्म परं विदन्ति ।।२६।। तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः। श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः।।२७।। दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः। सुरासुरेन्द्रैरुपगीयमान-महानुभावो भविता पतिर्भुवः।।२८।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे षोडशोऽध्यायः।।१६।।

अथ सप्तदशोऽध्यायः।।१७।।

मैत्रेय उवाच - एवं स भगवान् वैन्यः ख्यापितो गुणकर्मभिः। छन्दयामास तान् कामैः प्रतिपूज्याभिनन्द्य च।।१।।

।। सङ्ग्रहोक्तिः ।।

एष पृथुर्यत्रसरस्वती नदी प्रादुरभूत् तत्र ब्रह्मावर्ते शतमश्वमेधानाजहार, शतक्रतोरस्य चरमे यज्ञे प्रवर्तमाने सति पुरन्दरो हयमहार्षीत् ।।२५।। एष स्वसद्मनो निकटे वनं समेत्य, तत्रैकं सनत्कुमारं समाराध्य, यतो ज्ञानात् परंब्रह्म विदन्ति तज्ज्ञानमलभत ।।२६।। विश्रुतविस्तृत-पराक्रमशाली पृथुः यत्र यत्र गमिष्यति तत्र तत्र स्वयशोगाथाः श्रोष्यति ।।२७।। स्वतेजसा शल्यसदृशान् दुरात्मन उत्पाट्याऽप्रतिहताज्ञो दिशो विजित्य वर्तमानोऽयं सुरासुरेन्द्रैरनुगीयमान-महानुभाव भुवः पतिर्भविता ।।२८।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां षोडशोऽध्यायः।।१६।।

अथ सप्तदशोऽध्यायः ।।१७।।

ग्रस्तबीजां भूमिं हन्तुमुद्यतस्य पृथोर्भूमिकृता स्तुतिः

मैत्रेय उवाच - वैन्यः पृथुरित्थं गुणैः कर्मभिश्च ख्यापितः सन् सूतमागधादीन् तत्तत् कामैर्वस्त्रादिभिश्च प्रतिपूज्याऽभिनन्द्य च तान् सर्वान् सन्तोषयामास ।।१।।

ब्राह्मणप्रमुखान् वर्णान् भृत्यामात्यपुरोधसः। पौराञ्जानपदान् श्रेणीः प्रकृतीः समपूजयत्।।२।। *विदुर उवाच* - कस्माद्दधार गोरूपं धरित्री बहुरूपिणी। यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम्।।३।। प्रकृत्या विषमा देवी कृता तेन समा कथम्। तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत्।।४।। सनत्कुमाराद्भगवतो ब्रह्मन् ब्रह्मविदुत्तमात्। लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः।।५।। यच्चान्यदपि कृष्णस्य भवान् भगवतः प्रभोः। श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम्।।६।। भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च। वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमाम्।।७।। *श्रीशुक उवाच* - चोदितो विदुरेणैवं वासुदेवकथां प्रति। प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत।।८।। *मैत्रेय उवाच* - यदाभिषिक्तः पृथुरङ्ग विप्रैरामन्त्रितो जनतायाश्च पालः। प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन्।।९।। वयं राजन् जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः। त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः।।१०।।

।। सङ्ग्रहोक्तिः।।

ब्राह्मणप्रमुखान् वर्णानमात्यपुरोधसो भृत्यान् पौरान् जानपदांश्च सर्वान् समपूजयत्।।२।। *विदुर उवाच* - हे मैत्रेय! बहुरूपिणी धरित्री कस्माद्धेतो र्गोरूपं दधार? यां पृथुर्दुदोह, तदवसरे वत्सः कः दोहनं च किमासीत्?।।३।। स्वभावेन विषमा मही पृथुना समा केन प्रकारेण कृता, पृथोर्मेध्यमश्वं देवेन्द्रः कस्य हेतोरहरत्?।।४।। हे भगवन्! ब्रह्मविदुत्तमात् सनत्कुमारात् ब्रह्मविषयकं सविज्ञानं ज्ञानं लब्ध्वा पृथुः कां गतिं प्राप।।५।। हे ब्रह्मन्! शोभनकीर्तेर्भगवतः कृष्णस्य प्रथमावतारसम्बन्धि पुण्यं चरित्रं, अन्यच्च श्रवणार्हं तत् सर्वमधोक्षजस्य भक्ताय मे वक्तुमर्हसि, योऽधोक्षजः पृथुरूपेणावतीर्णः सन् पृथ्वीं दुग्धवान्।।६-७।। *श्रीशुक उवाच* - विदुरेणैवं वासुदेवकथासंश्रावणं प्रति संप्रेरितः मैत्रेयः प्रीतः सन् तं प्रशस्य प्रत्यभाषत।।८।। *मैत्रेय उवाच* - हे विदुर! विप्रैर्यदा पृथुरभिषिक्तः, जनताया रक्षकश्च नियुक्तः तदा भूतले निरन्ने सति क्षुत्क्षामदेहाः प्रजाः समीपमागत्य पृथुमब्रुवन्।।९।। हे राजन्! यथा कोटरस्थेन वह्निना वृक्षा अभितप्ता भवन्ति तथा वयं जाठरेणाऽग्निनाऽभितप्ताः सन्तः साधितं वृत्तिकरं

तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव। यावन्न नङ्क्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः।।११।। *मैत्रेय उवाच* - पृथुः प्रजानां करुणं निशम्य परिदेवितम्। दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत।।१२।। इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः। सन्दधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा।।१३।। प्रवेपमाना धरणी निशाम्योदायुधं च तम्। गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ।।१४।। तामेवान्वद्रवद्वैन्यः कुपितोऽत्यरुणेक्षणः। शरं धनुषि संधाय यत्र यत्र पलायते।।१५।। सा दिशो विदशो देवी रोदसी चान्तरं तयोः। धावन्ती तत्र तत्रैनं ददर्शानूद्यतायुधम्।।१६।। लोके नाविन्दत त्राणं वैन्यान्मृत्योरिव प्रजाः। त्रस्ता तदा निववृते हृदयेन विदूयता।।१७।। उवाच च महाभागं धर्मज्ञापन्नवत्सल। त्राहि मामपि भूतानां पालनेऽवस्थितो भवान्।।१८।। स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषाम्। अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः।।१९।। प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जन्तवः।

।। सङ्ग्रहोक्तिः ।।

त्वां पतिं भवन्तं शरण्यं शरणं प्राप्ताः स्मः।।१०।। हे राजराज! वयं त्यक्तान्नाशना यावन्न नङ्क्ष्यामहे तावत् क्षुधार्दितानामस्माकमन्नं दातुं भवान् प्रयत्नं करोतु, यतस्त्वमस्मज्जीविकाया रक्षिता भवसि।।११।। हे विदुर! पृथुः प्रजानां विलपनं श्रुत्वा चिरं चिन्तितवान्, ततश्च तत्कारणं ज्ञातवान्।।१२।। पृथुः बुद्ध्या निश्चित्य पृथिव्यै क्रुद्धोऽत एव त्रिपुरहा इव, धनुषि बाणं संदधे।।१३।। धरणी पृथुं दृष्ट्वा भीता प्रवेपमाना गौः सती मृगयुनाऽनुद्रुता मृगीवाऽपाद्रवत् ।।१४।। अत्यरुणेक्षणः कुपितः पृथुर्धनुषि शरं संधाय, सा गोरूपधरा धरणी यत्र यत्र गता तत्र तत्र स तामनुसृत्य गतः।।१५।। देवी सा धरा दिक्षु विदिक्षु, द्यावापृथिव्योरन्तरिक्षं च यत्र गता तत्रोद्यतायुधं पृथुमनुयातमेव ददर्श।।१६।। मृत्युभीताः प्रजा इव पृथोस्त्रस्ता सती भूमिर्लोके कमपि स्वत्रातारं नाऽविन्दत, तदा दूयता हृदयेन सा निववृते।।१७।। उवाच च हे महाभाग! धर्मज्ञ! आपन्नवत्सल! भूतानां पालने स्थितो भवान् मामपि रक्षतु।।१८।। यो धर्मज्ञ इति मतः, स त्वं निरपराधां दीनां मां किमर्थं जिघांससे? एवं च योषां मां कथं

किमुत त्वद्विधा राजन् करुणा दीनवत्सलाः।।२०।। मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितम्। आत्मानं च प्रजाश्चेमाः कथमम्भसि धास्यसि।।२१।। *पृथुरुवाच* - वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम्। भागं बर्हिषि या वृङ्क्ते न तनोषि च नो वसु।।२२।। यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः। तस्यामेवं हि दुष्टायां दण्डोऽन्यत्र न शस्यते।।२३।। त्वं खल्वोषधिबीजानि प्राक् सृष्टानि स्यम्भुवा। न मुञ्चस्यात्मरुद्धानि मामवज्ञाय मन्दधीः।।२४।। अमूषां क्षुत्परीतानामार्तानां परिदेवितम्। शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा।।२५।। पुमान् योषिदुत क्लीब आत्मसम्भावितोऽधमः। भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः।।२६।। त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः। आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ।।२७।। एवं मन्युमयीं मूर्तिं कृतान्तमिव बिभ्रतम्। प्रणता प्राञ्जलिः प्राह मही सञ्जातवेपथुः।।२८।।

।। सङ्ग्रहोक्तिः।।

हनिष्यसि?।।१९।।जना विहितापराधासु स्त्रीषु न प्रहरन्ति, तदा भवद्विधाः करुणा दीनवत्सला किमुत?।।२०।। किंच यत्र मयि विश्वं प्रतिष्ठितं तां दृढां नावं मां विपाट्य स्वमात्मानं इमाः प्रजाश्च गर्भोदके कथं धारयिष्यसि?।।२१।। *पृथुरुवाच* - हे वसुधे! मदाज्ञापराङ्मुखीं त्वां हनिष्यामि, किंच या त्वं यज्ञे भागं भजते, अस्माकं धान्यादिकं न ददासि।।२२।। गोरूपा या भवती नित्यं तृणादिकमत्ति, उधसि संभृतं दुग्धं तु नैव प्रपूरयति, एवं दुष्टायां भवत्यां गवि दण्डो हि योग्यः, अतो मया यदिदं विधीयते स धर्म एव।।२३।। मन्दधीस्त्वमसि, ब्रह्मणा प्राक् सृष्टान्यौषधिबीजानि त्वया ग्रस्तानि सन्ति, मदाज्ञामवज्ञाय त्वं तानि न मुञ्चसि चेत् तर्हि क्षुत्पीडितानामार्तानां प्रजानामाक्रन्दनं मद्बाणभिन्नायास्तव मांसेन शमयिष्यामि।।२४-२५।।पुमान् योषित् क्लीबो वा य आत्मनैव संभावितो जातो न तु परैः, सोऽधमो निर्दयश्चेत् तस्य वधो नृपाणां कृतेऽवध एव।।२६।। गोरूपधारां स्तब्धां दुर्मदां त्वामहं तिलशो नीत्वाऽऽत्मयोगबलेनेमाः प्रजा धारयिष्यामि।।२७।।एवं क्रोधप्रचुरं देहं बिभ्रत एव कृतान्तमिव स्थितं पृथुं मही प्रणता सञ्जातवेपथुः प्राञ्जलिः सती प्राह।।२८।।

धरोवाच – नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने। नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये।।२९।। येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसङ्ग्रहः। स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये।।३०।। य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययावितर्क्यया। तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति।।३१।। नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाकृतात्मभिः। न लक्ष्यते यस्त्वकरोदकारयद् योऽनेक एकः परतश्च ईश्वरः।।३२।। सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः। तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे।।३३।। स वै भवानात्मविनिर्मितं जगद् भूतेन्द्रियान्तःकरणात्मकं विभो। संस्थाप्ययिष्यन्नज मां रसातलादभ्युज्जहाराम्भस आदिसूकरः।।३४।। अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल।

।। सङ्ग्रहोक्तिः ।।

धरोवाच – स्वापृथक्सिद्धविशेषणभूतया प्रकृत्या निष्पादितदेवमनुष्यादिव्यष्टिक्षेत्रज्ञशरीराय, प्रकृतिद्वारा सत्त्वादिगुणस्वभावाय, स्वस्वरूपानुभूत्या निर्धूतषडूर्मिविभ्रमाय, परमपुरुषाय तुभ्यं नमः।।२९।। येन जगद्धात्रा त्वया व्यष्टिजीवानामाश्रयभूताऽहं निर्मिता, यस्यां मयि सर्वोऽयं प्रपञ्चो वर्तते, तां मां धाता भवानेवोद्यतायुधः सन् हतुमुपस्थितः, तदाऽहमन्यं कं शरणं गच्छामि।।३०।। यो भवान् आदौ चराचरात्मकमेतज्जगत् त्वदेकाश्रययाऽवितर्क्यया स्वापृथक्सिद्धविशेषणभूतया स्वप्रकृत्याऽसृजत्, तयैव स्वसंकल्परूपया मायया त्वं चराचरात्मकं जगद् रक्षितुमुद्यतोऽसि, अतो धर्मपरो भवान् प्रजानामाधाररूपां धरां मां कथं जिघांसते।।३१।। त्वामप्रपन्नैर्दुर्जयया त्वन्मायया मोहतचित्तैर्मादृशर्जनैरीशस्य तव समीहितं न लक्ष्यते, य एकः सन् महदादिपृथिवीपर्यंतां सृष्टिं कृतवान्, ब्रह्मादिस्वरूपभेदैरनेकः सन् व्यष्टिसृष्टिमपि कृतवान्।।३२।।यो द्रव्यक्रियाकारकचेतनाभिः स्वशक्तिभिर्जगतः सृष्ट्यादिकं करोति, तस्मै परमपुरुषाय वेधसे नमः।।३३।। स एव हि आदिसूकरो भवान् स्वनिर्मितं भूतेन्द्रियान्तःकरणात्मकं जगत् संस्थापयिष्यन् जलात् रसातलान्मामुज्जहार।।३४।।

स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि ।।३५।। नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया। न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ।।३६।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे सप्तदशोऽध्यायः ।।१७।।

अथाष्टादशोऽध्यायः ।।१८।।

मैत्रेय उवाच – इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम्। पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ।।१।। *पृथिव्युवाच* – संनियच्छाभि भो मन्युं निबोध श्रावितं च मे। सर्वतः सारमादत्ते यथा मधुकरो बुधः ।।२।। अस्मिँल्लोकेऽथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः। दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये ।।३।। तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान्। अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्जसा ।।४।।

।। सङ्ग्रहोक्तिः ।।

धराधर आदिवराहो भवानपामुपरि नावि मयि सांप्रतमवस्थिताः प्रजा रिरक्षिषुः सन् समभूत्, सोऽद्य वीरमूर्तिरुग्रशरो भवान् गोरूपधरां मां जिघांसति ।।३५।। येषामीश्वराणामीहितं त्वन्मायामोहितचित्तैरस्मद्विधैर्न विज्ञायते तेभ्यो वीरयशस्करेभ्यो नमः ।।३६ ।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां सप्तदशोऽध्यायः ।।१७।।

अथ अष्टादशोऽध्यायः ।।१८।।

पृथक् पृथक् दोग्धृ-वत्स-पात्रादिकल्पनया पृथिवीदोहनम्

मैत्रेय उवाच – रोषेण प्रस्फूरिताधरं पृथुमित्थमभिष्टूय धरा भीता सत्यपि बुद्ध्या स्वं संस्तभ्य पुनराह ।।१।। *पृथिव्युवाच* – हे देव! क्रोधमुपसंहर, मम विज्ञापितमवधारय, बुधो मधुकर इव सर्वतः सारमादत्ते ।।२।। श्रेयोर्थिनां पुंसामिहामुत्र च श्रेयः सिद्धये तत्त्वदर्शिभिर्मुनिभिरुपाया दर्शिता भवन्ति ।।३।। मुनिदर्शितान् तानुपायान् तदर्वाचीनो जनः सम्यगातिष्ठति

तानानादृत्य योऽविद्वानर्थानारभते स्वयम्। तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः।।५।। पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम्पते। भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः। चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः।।७।। नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा। तत्र योगेन दृष्टेन भवानादातुमर्हति।।८।। वत्सं कल्पय मे वीर येनाहं वत्सला तव। धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनम्।।९।। दोग्धारं च महाबाहो भूतानां भूतभावन। अन्नमीप्सितमूर्जस्वद् भगवान् वाञ्छते यदि।।१०।। समां च कुरु मां राजन्देववृष्टं यथा पयः। अपर्तावपि भद्रं ते उपावर्तेत मे विभो।।११।। इति प्रियं हितं वाक्यं भुव आदाय भूपतिः। वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः।।१२।। तथाऽपरे च सर्वत्र सारमाददते बुधाः। ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम्।।१३।। ऋषयो दुदुहुर्देवीमिन्द्रियेष्वथ सत्तम। वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचिः।।१४।।

।। सङ्ग्रहोक्तिः ।।

चेत्, तदा स सुखेन प्राप्यानर्थान् विन्दते।।४।।यो जनः पूर्वैर्दर्शितानुपायाननादृत्य स्वबद्ध्यैवाऽर्थान् आरभते, तस्य तेऽर्थाः पुनः पुनरारब्धा अपि फलजनका न भवन्ति।।५।।हे विशांपते! पुरा ब्रह्मणा या ओषधयः सृष्टाः ता असद्भिर्भुज्यमाना मया दृष्टाः।।६।। अहं च भवादृशैर्लोकपालैरपालिताऽनादृता च सती निखिले जने चोरप्राये जाते सति यज्ञनिमित्तं ता ओषधीरग्रसम् ।।७।।मया गीर्णाः भूयसा कालेन जीर्णाश्च ता ओषधयो नूनं भवान् निश्चितेनोपायेन संग्रहीतुमर्हति ।।८।। हे वीर! यदि भवान् भूतानां बलप्रदं वाञ्छितमन्नं वाञ्छति तर्हि गोरूपाया ममानुरूपं वत्सं दोहनपात्रं दोग्धारं च संपादय।।९-१०।। हे राजन्! पर्जन्येन वृष्टं जलं वर्षर्त्वपगमेऽपि यथा मत्पृष्ठे सर्वतो वर्तेत तथा निम्नोन्नतां मां समां कुरु, एवं तव मम च भद्रं भूयात् ।।११।। इति प्रियं हितं च भूमिप्रोक्तं वाक्यमादाय, मनुं वत्सं कृत्वा पाणौ दोहनपात्रे दोग्धा स्वयं पृथुः सकलौषधीरदुहत्।।१२।। यथा पृथुरदुहत् तथाऽपरे च बुधाः सर्वत्र सारमाददते, ततः पृथोः सकाशाद् अन्ये ऋषिप्रभृतयश्च पृथुवशीकृतां भूमिं यथाकामं दुदुहुः।।१३।। हे विदुर! ऋषयो बृहस्पतिं वत्सं कृत्वेन्द्रियरूपे पात्रे छन्दोमयं दुग्धं दुदुहुः।।१४।। देवा इन्द्रं

कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन्। हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥१५॥ दैतेया दानवा वत्सं प्राह्लादिमसुरर्षभम्। विधायादूदुहन् क्षीरमयःपात्रे सुरासवम्॥१६॥ गन्धर्वाप्सरसोऽधुक्षन् पात्रे पद्ममये पयः। वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम्॥१७॥ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत। आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः॥१८॥ प्रकल्प्य वत्सं कपिलं सिद्धाः सङ्कल्पनामयीम्। सिद्धिं नभसि विद्यां च ये च विद्याधरादयः॥१९॥ अन्ये च मायिनो मायामन्तर्धानाद्भुतात्मिकाम्। मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम्॥२०॥ यक्षराक्षांसि भूतानि पिशाचाः पिशिताशनाः। भूतेशवत्सा दुदुहुः कपाले क्षतजासवम्॥२१॥ तथाहयो दन्दशुकाः सर्पा नागाश्च तक्षकम्। विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः॥२२॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम्। अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः॥२३॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वकलेवरे। सुपर्णवत्सा विहगाश्चरं चाचरमेव च॥२४॥

॥ सङ्ग्रहोक्तिः ॥

वत्सं कृत्वा हिरण्मये पात्र ओजोवीर्यबलसंपादकं सोममदूदुहन् ॥१५॥ दैत्या दानवाश्च विरोचनं वत्सं कृत्वाऽयःपात्रे सुरासवं दुदुहुः॥१६॥ गन्धर्वाप्सरसो विश्वावसुं वत्सं कृत्वा पद्ममये पात्रे वाङ्माधुर्यं सौन्दर्यं च पयोऽधुक्षन्॥१७॥ हे विदुर! पितृगणा अर्यम्णं वत्सं प्रकल्प्याऽपक्वे मृन्मये पात्रे कव्यं पयो दुदुहुः॥१८॥ सिद्धा विद्याधरादयश्च कपिलं वत्सं विधाय नभोरूपे पात्रेऽणिमादिकाः सिद्धीः खेचरत्वादिरूपां विद्यां चाऽदूदुहन्॥१९॥ अन्ये च मायिनः किंपुरुषादय मयासुरं वत्सं कृत्वा धारणामयीमन्तर्धानाद्भुतात्मिकां मायां शक्तिं बुद्धौ दुदुहुः॥२०॥ मांसभक्षका यक्षरक्षांसि भूतानि पिशाचाश्च भूतेशं रुद्रं वत्सं विधाय कपाले रुधिरासवं पयो दुदुहुः॥२१॥ तथाऽहयः, दंदशूकाः सर्पाः नागाश्च तक्षकं वत्सं विधाय बिलरूपे पात्रे विषरूपं पयो दुदुहुः॥२२॥ पशवो वृषभश्रेष्ठं वत्सं विधायाऽरण्यपात्रे तृणात्मकं पयोऽधुक्षन्, मांसाशिन व्याघ्रादय सिंहं वत्सं कृत्वा स्वकलेवरे पात्रे मांसं दुदुहुः. विहगाः गरुडं वत्सं प्रकल्प्य स्वकलेवरे कीटादिकं फलादिकं वा पयो दुदुहुः॥२३-२४॥

वटवत्सा वनस्पतयः पृथग्रसमयं पयः। गिरयो हिमवद्वत्सा नानाधातून् स्वसानुषु
॥२५॥ सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः। सर्वकादुघां पृथ्वीं दुदुहुः
पृथुभाविताम् ॥२६॥ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन
क्षीरभेदं कुरूद्वह ॥२७॥ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां
प्रेम्णा दुहितृवत्सलः ॥२८॥ चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट्।
भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥२९॥ अथास्मिन् भगवान् वैन्यः प्रजानां
वृत्तिदः पिता। निवासान् कल्पयाञ्चक्रे तत्र तत्र यथार्हतः ॥३०॥ ग्रामान् पुरः
पत्तनानि दुर्गाणि विविधानि च। घोषान् व्रजान् सशिबिरानाकरान् खेटखर्वटान् ॥३१॥
प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना। यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः
॥३२॥

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे अष्टादशोऽध्यायः ॥१८॥

॥ सङ्ग्रहोक्तिः ॥

वनस्पतयो वटवृक्षं वत्सं प्रकल्प्याऽनेकविधं रसं स्वशरीरे दुदुहुः, पर्वता हिमालयं वत्सं कृत्वा स्वशिखरेषु स्वर्णगैरिकादिधातून् पयोरूपेण दुदुहुः ॥२५॥ सर्वेऽपि स्वजातौ यो मुख्यः स्यात् तं वत्सं कृत्वा स्वे स्वे पात्रे सर्वकामदुघां पृथुना दोहनायाऽभ्यनुज्ञातां पृथिवीं पृथक् स्वस्वयोग्यं पयः दुदुहुः ॥२६॥ हे विदुर! इत्थं स्वस्वान्नाभिकांक्षिणः पृथ्वादयः स्वान्नं भिन्नभिन्नक्षीरं पात्रवत्सादिभेदेन पृथिवीं दुदुहुः ॥२७॥ ततः प्रीतः पृथुः सर्वकामदुघामिमां पृथ्वीं प्रेम्णा दुहितरममन्यत ॥२८॥ राजराजः समर्थः पृथुः स्वधनुष्कोट्या पर्वतशृङ्गाणि चूर्णयन् समग्रभूमण्डलं प्रायः समं चक्रे ॥२९॥ अथ प्रजानां वृत्तिदः पिता पृथुरस्मिन् भूमण्डले यथायोग्यं प्रजानां निवासान् कल्पयाञ्चक्रे ॥३०॥ ग्रामान्, पुराणि, महानगराणि, दुर्गाणि, आभीरगृहाणि, सेनाशिबिराणि, कर्षकाणामर्थे ग्रामाणि च निर्ममे ॥३१॥ पृथोः पूर्वं भूमौ पुरग्रामादीनां कल्पनाऽपि नाऽऽसीत्, इत्थं नगरादीनां निर्माणे जाते तत्र तत्राऽकुतोभयाः प्रजा यथासुखं न्यवसन् ॥३२॥

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामष्टादशोऽध्याय ॥१८॥

अथैकोनविंशोऽध्यायः ।।१९।।

मैत्रेय उवाच – अथादीक्षत राजा तु हयमेधशतेन सः। ब्रह्मावर्ते मनोः क्षेत्रे यत्र
प्राची सरस्वती ।।१।। तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः। शतक्रतुर्न ममृषे
पृथोर्यज्ञमहोत्सवम् ।।२।। यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः। अन्वभूयत
सर्वात्मा सर्वलोकगुरुः प्रभुः ।।३।। अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः।
उपगीयमानो गन्धर्वैर्मुनिभिश्चाप्सरोगणैः ।।४।। सिद्धा विद्याधरा दैत्या दानवा
गुह्यकादयः। सुनन्दनन्दप्रमुखाः पार्षदप्रवरा हरेः ।।५।। कपिलो नारदो दत्तो योगेशाः
सनकादयः। तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ।।६।। यत्र धर्मदुघा भूमिः
सर्वकादुघा सती। दोग्धि स्माभिप्सितानर्थान् यजमानस्य भारत ।।७।। ऊहुः
सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान्। तरवो भूरिवर्ष्माणः प्रासूयन्त मधुच्युतः ।।८।।
सिन्धवो रत्ननिकरान् गिरयोऽन्नं चतुर्विधम्। उपायनमुपाजह्रुः सर्वे लोकाः
सपालकाः ।।९।।

।। सङ्ग्रहोक्तिः ।।

अथ एकोनर्शिोऽध्यायः ।।१९।।

यज्ञविघ्नकरमिन्द्रं हन्तुं प्रवृत्तः पृथुर्ब्रह्मणा निवारितः

मैत्रेय उवाच – यत्र सरस्वती नदी प्राङ्मुखी प्रवहते तत्र स्वायंभुवस्य मनोःक्षेत्रे ब्रह्मावर्ते राजर्षिः पृथुः शताश्वमेधविधानाय संकल्पमकरोत् ।।१।। पृथोर्यज्ञमहोत्सवरूपं कर्म स्वकर्मातिशयं मत्वा मघवा न ममृषे ।।२।। यस्मिन् पृथुयज्ञोत्सवे सर्वलोकगुरुः सर्वात्मा यज्ञपतिर्भगवान् हरिः साक्षादन्वभूयत ।।३।। स यज्ञो ब्रह्मशर्वाभ्यां सहानुगैर्लोकपालैरन्वितोऽप्सरोगणैरुपगीयमानोऽभूत् ।।४।। यत्र सिद्धविद्याधराः दैत्याः, दानवाः, गुह्यकादयः, हरेः पार्षदप्रवराः सुनन्दनन्दादयोऽप्यासन् ।।५।। कपिलः, नारदः, दत्तः, सनकादयः, अन्ये भागवताश्च तं भगवन्तमन्वीयुः ।।६।। यत्र ब्रह्मावर्ते कामदुघा भूमिः सर्वकामदुघा सती यजमानस्य पृथोरभीष्टानर्थान् दुदुहे ।।७।। नद्यः क्षीरदध्यन्नगोरसादीन् सर्वरसान् वहन्ति स्म, मधुच्युतो विविधास्तरवः फलपुष्पादिकं प्रासूयन्त ।।८।। सागरा रत्ननिकरान् गिरयश्चतुर्विधमन्नं ददुः, सपालका लोका

इति चाधोक्षजेशस्य पृथोस्तु परमोदयम्। असूयन् भगवानिन्द्रः प्रतिघातमचीकरत्
।।१०।। चरमेणाश्वमेधेन यजमाने यजुष्पतिम्। वैन्ये यज्ञपशुं स्पर्धन्नपोवाह
तिरोहितः।।११।। तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा। आमुक्तमिव पाखण्डं योऽधर्मे
धर्मविभ्रमः।।१२।। अत्रिणा सूचितो हन्तुं पृथुपुत्रो महारथः। अन्वधावत संक्रुद्धस्तिष्ठ
तिष्ठेति चाब्रवीत्।।१३।। तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम्। जटिलं
भस्मनाच्छन्नं तस्मै बाणं न मुञ्चति।।१४।। वधान्निवृत्तं तं भूयो हन्तवेऽत्रि-
रचोदयत्। जहि यज्ञहनं तात महेन्द्रं विबुधाधमम्।।१५।। एवं वैन्यसुतः प्रोक्तस्त्व-
रमाणं विहायसा। अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव।।१६।। सोऽश्वं रूपं च
तद्धित्वा तस्मा अन्तर्हितः स्वराट्। वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान्।।१७।।
तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः। नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो
।।१८।। उपसृत्य तमस्तीव्रं जहाराश्वं पुनर्हरिः। चषालयूपतश्छन्नो हिरण्यरशनं
विभुः।।१९।।

।। सङ्ग्रहोक्तिः ।।

उपायनमुपाजह्रुः।।९।। पृथोरित्थं परमोदयं कर्माऽसह्यमान इन्द्रो विघ्नमचीकरत्।।१०।। यज्ञपतिं भगवन्तं शततमेनाऽश्वमेधेन यजमाने पृथावाराधयति सति स्पर्धमान इन्द्रस्तिरोहितः सन् यज्ञाश्वमपोवाह।।११।। आकाशमार्गेणाऽश्वं गृहीत्वा पाखण्डवेषं धावन्तमिन्द्रमत्रिर्मुनिरैक्षत ।।१२।। अत्रिणा सूचितः पृथुपुत्रः संक्रुद्धः सन् तं हन्तुमन्वधावत्, तिष्ठ तिष्ठेति चाऽब्रवीत् ।।१३।। पाषण्डाकृतिं तमिन्द्रं जटिलं भस्मनाछन्नं वीक्ष्य पृथुपुत्रस्तं मूर्तं धर्मं मेने, अतस्तं हन्तुं बाणं नाऽमुञ्चत्।।१४।। अश्वहर्त्तुर्वधान् निवृत्तं पृथुपुत्रमत्रिः पुनः प्रेरयामास, हे तात! यज्ञविघ्नकर्तारं विबुधाधमं महेन्द्रं जहि।।१५।। अत्रिणा एवं समभिहितः पृथोः पुत्र आकाशमार्गेण धावन्तमिन्द्रमतिक्रुद्धः सिंहः करिणमिव क्रुद्धः सन्नन्वद्रवत्।।१६।। तदा स्वर्गपतिरिन्द्र तत्पाखण्डरूपमश्वं च हित्वाऽन्तर्हितस्तस्थौ, पृथुपुत्रोऽश्वमादाय पृथोर्यज्ञमुपेयिवान्।।१७।। हे विदुर! पृथुपुत्रस्य महेन्द्रादश्वानयनरूपमद्भुतं कर्म निरीक्ष्याऽत्र्यादयः सर्वे मुनयस्तस्मै विजिताश्व इति सार्थकं नाम ददुः।।१८।। इन्द्रः पुनरपि निबिडं तमः सृष्ट्वा छन्नविग्रहः सन् यूपाद

अत्रिः संदर्शयामास त्वरमाणं विहायसा। कपालखट्वाङ्गधरं वीरो नैनमबाधत ।।२०।। अत्रिणा चोदितस्तस्मै सन्दधे विशिखं रुषा। सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट्।।२१।। वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत्। तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः।।२२।। यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया। तानि पापस्य षण्डानि लिङ्गं षण्डमिहोच्यते।।२३।। एवमिन्द्रे हरत्यश्वं वैन्ययज्ञजिघांसया। तद्गृहीतविसृष्टेषु पाषण्डेषु मतिर्नृणाम्।।२४।। धर्म इत्यपधर्मेषु नग्नरक्तपटादिषु। प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु।।२५।। तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः। इन्द्राय कुपितो बाणमादत्तोद्यतकार्मुकः।।२६।। तमृत्विजः शक्रवधाभिसन्धितं विचक्ष्य दुष्प्रेक्ष्यमसह्यरंहसम्। निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात्।।२७।। वयं मरुत्वन्तमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम्। अयातयामोपहवैस्तमग्नये प्रसह्य राजन् जुहवाम तेऽहितम्।।२८।।

।। सङ्ग्रहोक्तिः ।।

हिरण्यरशनमश्वं जहार।।१९।। अत्रिस्तदा विहायसा धावन्तमिन्द्रं दर्शयामास, विजिताश्वस्तत्पश्चाद् गतोऽपि तं कपालखट्वाङ्गधरं योगिनं बुद्ध्वा न प्राहरत्।।२०।। अत्रिणा प्रेरितो विजिताश्व इन्द्राय हन्तुं विशिखं बाणं सन्दधे, इन्द्रोऽश्वं तद्रूपं च हित्वाऽन्तर्हितस्तस्थौ।।२१।। अनन्तरं विजिताश्वोऽपि अश्वमुपादाय पितृयज्ञमव्रजत्, इन्द्रस्य तदतिनिन्द्यं रूपं ये ज्ञानहीनजना आसन् ते तन्मोक्षहेतुं मत्वोपाददुः।।२२।। इन्द्रो हयजिहीर्षया यानि रूपाणि जगृहे तानि पापस्य खण्डानि, पापचिह्नानि जातानि।।२३।। एवं पृथोर्यज्ञे विघ्नं कर्तुमश्वमिन्द्रे हरति सति तद्ग्रहीतविसृष्टेषु पाषण्डेषु नृणामयं धर्म इति मतिरभवत्।।२४।। धर्माभासेषु मृदुमितभाषिषु नग्नरक्तपटादिषु भ्रान्तिवशादेष धर्म एवेति मानवानां मतिः सज्जते।।२५।। एतद् वृत्तं श्रुत्वा पृथुपराक्रमः भगवान् पृथुः कुपित उद्यतकार्मुकः सन्निन्द्रं हन्तुं शरं गृहीतवान्।।२६ ।। तदा महेन्द्रवधे कृतनिश्चयमसह्यवेगं पृथुं वीक्ष्यात्र्यादय ऋत्विजस्तं निवारयामासुः, अश्वमेधेऽभिहिताश्वालम्भनादन्यस्य वधो नोचितः।।२७।। इह त्वत्कीर्त्यैव हतप्रभं देवेन्द्रं वयमगतवीर्यैरावाहनमन्त्रैराह्वयामहे, हे राजन्! तव शत्रुमिन्द्रं मन्त्रबलेन पशुपुरोडाशमिव वह्नौ होष्यामः।।२८।।

स्रुग्घस्ताञ्जुह्वतोऽभ्येत्य स्वयम्भूः प्रत्यषेधत ।।२९।। न वध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः। यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ।।३०।। तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः। इन्द्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ।।३१।। पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः। अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ।।३२।। नैवात्मना महेन्द्राय रोषमाहर्तुमर्हसि। उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ।।३३।। मास्मिन्महाभाग कृथाः स्म चिन्तां निशामयास्मद्वच आदृतात्मा। यद्ध्यायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोऽन्धम् ।।३४।। क्रतुर्विरमतामेष देवेषु दुरवग्रहः। धर्मव्यतिकरो यत्र पाखण्डैरिन्द्रनिर्मितैः ।।३५।। एभिरिन्द्रोपसंसृष्टैः पाखण्डैर्हारिभिर्जनम्। ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ।।३६।। भवान् परित्रातुमिहावतीर्णो धर्मं च नानासमयानुरूपम्। वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य ।।३७।। स त्त्वं विमृश्यास्य भवं प्रजापते सङ्कल्पनं विश्वसृजां पिपीपृहि। ऐन्द्रीं च मायामुपधर्ममातरं प्रचण्डपाखण्डपथं प्रभो जहि ।।३८।।

।। सङ्ग्रहोक्तिः ।।

हे विदुर! इत्थं पृथुं विज्ञाप्य स्रुग्घस्तान् रुषा जुह्वतः ऋत्विजो मुनीन् ब्रह्माऽभ्येत्य निवारयामास ।।२९।। यूयं यमिन्द्रं जिघांसथ स भवतां वध्यो न, यज्ञनामाऽयमिन्द्रो भगवदवतारोऽस्ति ।।३०।। हे द्विजाः! यज्ञविघातेच्छयेन्द्रेणाचरितां पाखण्डरूपामनीतिं पश्यत ।।३१।। अत एव पृथुरकोनशतक्रतुः स्यात्, तत पृथुमाह - हे राजन्! भवत्कृतैर्यज्ञैरलम्, भवान् धर्मविदस्ति, नेन्द्रपदलिप्सुः ।।३२।। अत इन्द्रं प्रति रोषं कर्तुं नार्हसि, यतस्त्वमिन्द्रश्चोभौ हरेरंशावतारौ स्तः ।।३३।। हे महाभाग! अवहितमनसा मद्वचनं शृणु, यज्ञविघ्ने चिन्तां मा स्म कृथाः, यतश्चिन्तातुरस्य मनस्तमोव्याप्तं भवति ।।३४।। दुराग्रहपूर्णोऽयं यज्ञो विरमताम्, यतोऽनेन धर्मनाशकः पाखण्डः प्रवर्तते ।।३५।। यज्ञनाशकेनाश्वापहारकेणेन्द्रेण कृतैः पाखण्डैः स्ववशीक्रियमाणं जनं पश्य ।।३६।। वेनकृताऽन्यायादवप्लुतं धर्मं त्रातुमधुना वेनस्यैव शरीरादिहाऽवतीर्णस्त्वं विष्णोरंशोऽसि ।।३७।। स त्वमस्य जगत उत्पत्तिं विचार्य विश्वसृजां संकल्पं पूरय, हे प्रभो! उपधर्ममातरमैद्रीं मायां पाखण्डमार्गं च जहि ।।३८।।

मैत्रय उवाच - इत्थं स लोकगुरुणा समादिष्टो विशाम्पतिः। तथा च कृतवान् सख्यं मघोनापि च संदधे।।३९।। कृतावभृथस्नानाय पृथवे भूरिकर्मणे। वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः।।४०।। विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः। आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ।।४१।। त्वयाऽऽदृता महाबाहो सर्व एव समागताः। पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः।।४२।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे एकोनविंशोऽध्यायः।।१९।।

अथ विंशोऽध्यायः।।२०।।

मैत्रेय उवाच - भगवानपि वैकुण्ठः साकं मघवता विभुः। यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत।।१।। *श्रीभगवानुच* - एष तेऽकारषीद्भङ्गं हयमेधशतस्य ह। क्षमापयत आत्मानममुष्य क्षन्तुमर्हसि।।२ ।।सुधियः साधवो लोके नरदेव नरोत्तमाः।

।। सङ्ग्रहोक्तिः।।

मैत्रेय उवाच - इत्थं ब्रह्मणाऽऽदिष्टः स पृथुर्मघोना सह सख्यं संधिं चाऽपि कृतवान्।।३९।। पृथोर्यज्ञे ये देवास्तर्पिताः ते देवाः कृतावभृथस्नानाय पृथवे वरान् ददुः।।४०।। हे विदुर! सत्याशिषो विप्राः श्रद्धया लब्धदक्षिणाः सत्कृता अत एव तुष्टाः सन्त आदिराजाय पृथवे आशिषो युयुजुः।।४१।। हे महाबाहो! पृथो! यज्ञे ये पितृदेवर्षिमानवाः समागता ते सर्वेऽपि वयमादृता दानमानाभ्यां पूजिताश्च स्मः।।४२।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहक्त्यामेकोनविंशोऽध्यायः।।१९।।

अथ विंशोऽध्यायः ।।२०।।

पृथोर्यज्ञे विष्णोरनुशासनं वरदानञ्च

मैत्रेय उवाच - षाड्गुण्यपूर्णः सर्वान्तरात्मा यज्ञपतिः परमपुरुषोऽपि यज्ञैराराधितोऽत एव मघवता साकं पृथुमभाषत।।१।। *श्रीभगवानुवाच* - हे पृथो! एष इन्द्र तव हयमेघयज्ञभङ्गं कृतवान्, तत्क्षन्तुमर्हसि।।२।।

नाभिद्रुह्यन्ति भूतेभ्यो यर्ह्यनात्मा कलेवरम् ।।३।। पुरुषा यदि मुह्यन्ति त्वादृशा देवमायया। श्रम एव परं जातो दीर्घया वृद्धसेवया ।।४।। अतः कायमिमं विद्वानविद्या-कामकर्मभिः। आरब्ध इति नैवास्मिन् प्रतिबुद्धोऽनुषज्जते ।।५।। असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे। अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः।।६।। एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः। सर्वगोऽनावृतः साक्षी निरात्माऽऽत्माऽऽत्मनः परः।।७।। य एवं सन्तमात्मानमात्मस्थं वेद पूरुषः। नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः।।८।। यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः। भजते शनकैस्तस्य मनो राजन् प्रसीदति ।।९ ।। परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः। शान्तं मे समवस्थानं ब्रह्म कैवल्यमश्नुते ।।१०।। उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम्। कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम् ।।११।।

।। सङ्ग्रहोक्तिः ।।

हे नरदेव! यदि शरीरमात्मा न भवति तर्हि लोके सुधियः स्वापराधकर्तृभ्योऽपि नाऽभिदुह्यन्ति, ।।३।। यदि त्वादृशा अपि पुरुषा देवमायया मुह्यन्ति तर्हि दीर्घकालं तावज्ज्ञानवृद्धानां कृता सेवा निष्फला भविष्यति ।।४।। अत इमं देहमविद्याकामकर्मभि प्राप्तं जानन् चिदचिदीशयाथात्म्यज्ञो जनोऽस्मिन् देह आसक्तो नैव भवति ।।५।। यद्यस्मिन् देहे पुरुष आसक्तिरहितः स्यात् तर्हि तेन देहेनैव संपादिते गृहे सन्ताने द्रविणे च ममतां कृत्वा कथं स बद्धो भवति ।।६।। असौ जीवात्मा देहाद् भिन्नः, एकसमानस्वरूपः शुद्धः, रागद्वेषादिरहितः, ज्ञानानन्दादिगुणाश्रयः, धर्मभूतज्ञानेन सर्वव्यापी, गृहादिभिरनावृतः, साक्षी स्वयंप्रकाशश्च वर्तते ।।७।।य एवं स्थितं जीवं तदन्तर्यामिणं परमात्मानं च वेद स पुरुषो देहस्थोऽपि प्रकृतिगुणैर्न बद्धयते, स तु सर्वान्तर्यामिणि मयि स्थितः।।८।। यो निष्कामेण स्वधर्मेण श्रद्धया नित्यं निराशीः सन् भजते तस्य मनः शनकैः प्रसीदति ।।९।। परित्यक्तरागादिगुणो विशदाशयो जीवात्मपरमात्मस्वरूपसम्यग्द्रष्टा मे शान्तं समवस्थानं ब्रह्मशब्दवाच्यं कैवल्यं प्राप्नोति ।।१०।। देहेन्द्रियादीनामध्यक्षं स्वरूपतो निर्विकारमिममात्मानमुदासीनमिव स्थितं यो वेद स जीवद्दशायामेव सुखमनुभवति ।।११।।

भिन्नस्य लिङ्गस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः। दृष्टासु सम्पत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः।।१२।। समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेन्द्रियाशयः। मयोपक्लृप्ताखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणम्।।१३।। श्रेयः प्रजापालनमेव राज्ञो यत्साम्पराये सुकृतात् षष्ठमंशम्। हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति।।१४।। एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः। ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धाननुरक्तलोकः ।।१५।। वरं च मत् कञ्चन मानवेन्द्र वृणीष्व तेऽहं गुणशीलयन्त्रितः। नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती।।१६।। *मैत्रेय उवाच* – स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित्। अनुशासित आदेशं शिरसा जगृहे हरेः।।१७।। स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा। शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह।।१८।। भगवानथ विश्वात्मा पृथुनोपहृतार्हणः। समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः।।१९।। प्रस्थानाभिमुखोऽप्येनमनुग्रह-विलम्बितः। पश्यन् पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम्।।२०।।

।। सङ्ग्रहोक्तिः।।

भूतेन्द्रियान्तःकरणरूपस्य आत्मनो भिन्नस्य देहस्यैव संसारो भवति नत्वात्मनः, एवं विदः मयि बद्धसौहृदाः सुज्ञाः प्राप्तासु सपत्सु विपत्सु च न विक्रियन्ते।।१२।। राज्ञः श्रेयःसाधनं प्रजापालनमेव, यतः प्रजापालनात् परलोके प्रजाकृतधर्मात् षष्ठं भागं राजा प्राप्नोति, अन्यथा करहर्ता प्रजानामरक्षिता च राजा पापमेव प्राप्नोति।।१४।।एवमनभिसंहितफलं स्ववर्णाश्रमोचितं धर्मं पालयन् प्रजानां मध्ये वर्तमानः पृथिव्याः पालकस्त्वमल्पेनैव कालेन प्राप्तान् सनकादीन् सिद्धान् द्रक्ष्यसि।।१५।।हे मानवेन्द्र! अहं त्वद्गुणशीलाभ्यां वशीभूतोऽस्मि, यज्ञैस्तपोभिर्योगेन चाऽहं सुलभो न, अतो मत्तः कंचन वरं वृणीष्व।।१६।। *मैत्रेय उवाच* – इत्थं भगवताऽनुशासितः स पृथुर्हरेराज्ञां शिरसा जगृहे।।१७।। ततः पादयोः प्रेम्णा स्पृशन्तं स्वकर्मणा व्रीडितं शतक्रतुं परिष्वज्य पृथुर्विद्वेषं तत्याज।।१८।। पृथुरपि विश्वात्मानं भगवन्तं सम्पूज्याऽनन्यया भक्त्या भगवच्चरणाम्बुजे जग्राह।।१९।।प्रस्थानाभिमुखोऽपि भक्तानुग्रहविलम्बितः

स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः। न किञ्चनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः।।२१।। अथापमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषम्। पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः।।२२।। *पृथुरुवाच* - वरान् विभो त्वद्वरदेश्वराद् बुधः कथं वृणीते गुणविक्रियात्मनाम्। ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपते वृणे न च।।२३।। *न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः। महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः*।।२४।। स उत्तमश्लोक महन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः। स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः।।२५।। यशः शिवं सुश्रव आर्यसङ्गमे यदृच्छया चोपश्रृणोति ते सकृत्। कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया।।२६।। अथाऽऽभजे त्वाखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः।

।। सङ्ग्रहोक्तिः ।।

सतां सुहृत् पद्मपलाशाक्षः स भगवान् पृथुं पश्यन् न प्रतस्थे ।।२०।। आदिराजः पृथुर्बद्धाञ्जलिरानन्दाश्रुलोचनोऽत एव हरिं दृष्टुं न शशाक, गद्गदकण्ठः सन् किंचन नोवाच, अमुं हरिं हृदाऽऽलिङ्ग्याऽवस्थितः सन्नधात् ।।२१।। अथाऽश्रूणि प्रमृज्याऽतृप्तो दृग्गोचरं भुवि स्थितं गरुडस्कन्धधृतहस्तं परमपुरुषं विलोकयन् पृथुराह ।।२२।। हे विभो! वरदेश्वरात् त्वत्तः लौकिकविषयसुखपरान् वृणान्नहं न वृणे, ये विषया नारकिणामपि विद्यन्ते ।।२३।। हे नाथ! भागवतहृदयादुत्पद्य मुखाद् विर्गतं युष्मच्चरणाम्बुजासवरूपं भवद्यशःश्रवणादिसुखं यत्र न भवेत्तादृशं कैवल्यमप्यहं न कामये, मां तु भवदनन्तकल्याणगुणश्रवणाय दशसहस्रपरिमितान् कर्णान् देहि, एष एव हि मेऽभीष्टो वरः ।।२४।। हे उत्तमश्लोक! भगवद्भक्तमुखान्निर्गतो युष्मच्चरणाम्भोजसुधायुतो वायुरपि विस्मृततत्त्ववर्त्मनामस्माकं कुयोगिनां भवद्विषयां स्मृतिं ददाति ।।२५।। हे शोभनकीर्ते! त्वदेकान्तिकसाधूनां समागमे जाते सति मङ्गलकरं तव यशो यः सकृदपि शृणोति, गुणज्ञः स भगवद्गुणश्रवणात् को विरमेत, यतो भवद्गुणस्मरणेच्छया लक्ष्मीरपि त्वां प्रवव्रे ।।२६।। हे भगवन्! अखिलपुरुषोत्तममनन्तकल्याणगुणगणाश्रयं त्वामहं लक्ष्मीवल्लालसः

अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः।।२७।। जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितम्। करोषि फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया।।२८।। भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम्। भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे।।२९।। मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजन्तमात्थ यत्। वाचा नु तन्त्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः।।३०।। त्वन्माययाद्धा जन ईश खण्डितो यदन्यदाशास्त ऋतात्मनोऽबुधः। यथा चरेद् बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम्।।३१।। *मैत्रेय उवाच* - इत्यादिराजेन नुतः स विश्वदृक् तमाह राजन् मयि भक्तिरस्तु ते। दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम्।।३२।। तत् त्वं कुरु मयोद्दिष्टमप्रमत्तः प्रजापते। मदादेशकरो लोकः सर्वत्राप्नोति शोभनम्।।३३।।

।। सङ्ग्रहोक्तिः ।।

सन् भजेयम्, एकपतिस्पर्धमानयोरिव त्वच्चरणैकतानयोर्लक्ष्म्या मम च कलहो न स्यात्।।२७।। हे जगदीश! जगज्जनन्या लक्ष्म्या सह विरोधः स्यादेव, यतः त्वच्चरणसेवायामस्माकमपीच्छा भवेदेव, तथापि तत्रेन्द्रविरोध इव मत्पक्षपातः स्यात्, तुच्छमपि भवान् बहु करोषि, यतो भवान् दीनवत्सलः, स्वस्वरूपेऽभिरतस्य तव लक्ष्म्या किं प्रयोजनम्? ।।२८।। हे भगवन्! निष्कामाः साधवस्त्वामेव भजन्ति, भवच्चरणानुचिन्तनं विना तेषामन्यन्निमित्तं न विद्यते।।२९।। हे भगवन्! त्वां भजन्तं मां "वरं वृणीष्व" इति यदात्थ, तां ते गिरं जगन्मोहिनीं मन्ये, अक्षय्य-सुखदकर्म कथयन्ती वेदवाणी अपि बन्धनकारिण्येव, तद्वत् बद्धस्य वरप्रलोभनं प्रचुरबन्धन-करमेव भवति।।३०।। अज्ञो जनस्त्वां भजन्नपि त्वत्स्वरूपं विनाऽन्यदर्थकामादिकं यद्याशास्ते तर्हि स त्वत्तो दूरीकृत एव भवति, अतः पिता यथाऽप्रेरितोऽपि पुत्रहितं कुरुते तथाऽस्माकं समीचीनमेव हितं कर्तुमर्हसि।।३१।। *मैत्रेय उवाच* - इति पृथुना स्तुतो भगवान् तमाह - हे राजन्! तव मयि भक्तिर्वर्द्धताम्, यया धिया भवान् मदीयां सुदुस्तरां मायामतरत् तदतीव भद्रम्।।३२।। हे प्रजापते! त्वं प्रजाः धर्मे स्थापयितुं मदादिष्टं सावहितः सन् कुरु, मदाज्ञायां

इति वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद्वचः। पूजितोऽनुगृहीत्वैनं गन्तुं चक्रेऽच्युतो मतिम्।।३४।। देवर्षिपितृगन्धर्वसिद्धचारणपन्नगाः। किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः।।३५।। यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः। सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः।।३६।। भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः।हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत।।३७।। अदृष्टाय नमस्कृत्य नृपः सन्दर्शितात्मने। वासुदेवाय देवानां देवाय स्वपुरं ययौ।।३८।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे विंशोऽध्यायः।।२०।।

।। सङ्ग्रहोक्तिः ।।

वर्तमानो जनः सर्वत्र सुखातिशयं प्राप्नोति।।३३।। इत्थं पृथोरर्थवद्वचनं प्रतिनन्द्य तत्पूजितो भगवान् तमनुगृह्य स्वधाम गन्तुं मतिं चक्रे।।३४।। तदा देवाः, ऋषयः, पितरः, गन्धर्वाः, सिद्धाः, चारणाद्याः, पन्नगाः, खगाः मर्त्याश्च भूतानि।।३५।। सर्वेऽपि राज्ञा पृथुना, भगवद्बुद्ध्या वागवित्ताञ्जलिभिः भक्त्या च यथायोग्यं सभाजिताः सन्तस्ततो युयुः, भगवन्तमनुसृत्याऽऽगताः ये पार्षदास्तेऽपि ययुः।।३६।। सोपाध्यायस्य पृथोः पश्यतः, तस्य मनो हरन्निव प्रभुरच्युतः स्वधाम ययौ।।३७।। नृपोऽप्यदृष्टाय संदर्शितात्मने भगवते वासुदेवाय नमस्कृत्य स्वपुरं ययौ।।३८।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां विंशोऽध्यायः।।२०।।

अथैकविंशोऽध्यायः ।।२१।।

मैत्रेय उवाच – मौक्तिकैः कुसुमस्रग्भिर्दुकुलैः स्वर्णतोरणैः। महासुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै।।१।। चन्दनागरुतोयार्द्ररथ्याचत्वरमार्गवत्। पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिर्भिरर्चितम् ।।२।। सवृन्दैः कदलीस्तम्भैः पूगपोतैः परिष्कृतम्। तरुपल्लवमालाभिः सर्वतः समलंकृतम्।।३।। प्रजास्तं दीपावलिभिः सम्भृताशेषमङ्गलैः। अभीयुर्मृष्टकन्याश्च मृष्टकुण्डलमण्डिताः ।।४।। शङ्खदुन्दुभिघोषेण ब्रह्मघोषेण चर्त्विजाम्। विवेश भवनं वीरः स्तूयमानो गतस्मयः।।५।। पूजितः पूजयामास तत्र तत्र महायशाः। पौराञ्जानपदांस्तांस्तान् प्रीतः प्रियवरप्रदः।।६।। स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः। कुर्वन् शशासावनिमण्डलं यशः स्फीतं निधायारुरुहे परं पदम्।।७।। *सूत उवाच* – तदादिराजस्य यशो विजृम्भितं गुणैरशेषैर्गुणवत्सभाजितम्।

।। सङ्ग्रहोक्तिः ।।

अथ एकविंशोऽध्यायः ।।२१।।

स्वकीयप्रजापरिषदि पृथुकृतः भगवद्धर्मोपदेशः

मैत्रेय उवाच – मुक्तादामभिः कुसुमसृग्भिर्दुकूलैः स्वर्णतोरणैर्महासुरभिभिर्धूपैर्देवालयादिषु तत्र तत्र मण्डितं तद् भवनमासीत्।।१।। अगरुचन्दनेन तोयेन चाऽऽर्द्रिकृतरथ्या-चत्वरमार्गवत्, पुष्पैरक्षतैः फलैर्हरितयवाङ्कुरैर्लाजैरर्चिर्भिश्च संशोभितं रम्यं तन्नगरमासीत्।।२।। तत् सफलैः कदलीस्तम्भैः पूगपोतैश्च परिष्कृतं तरुपल्लवमालाभिश्च समलंकृतमभूत्।।३।। सम्भृताशेषमङ्गलैः प्रदीपावलिभिश्च सहिताः प्रजाः वस्त्रभूषणालङ्कृताः कन्याश्च तमभिजग्मुः ।।४।। शंखदुन्दुभिघोषेण ऋत्विजां वेदमन्त्रघोषेण च सहितः सूतादिभिः स्तूयमानो गतस्मयः स वीरः पृथुः स्वभवनं प्रविष्टः।।५।। तत्र तत्र पौरैः पूजितः, सत्कृतः महायशाः प्रीतः अत एव प्रियवरप्रदः स पृथुः पौरानपि यथायोग्यं पूजयामास।।६।। गुणैर्महान्, पूज्यतमः, निर्दोषव्यापारः स पृथुरेवमाद्यानि भूयांसि कर्माणि कुर्वन् सन् भूमण्डलं शशास, लोके विपुलं यशश्च निधाय परं वैकुण्ठलोकमारुरुहे।।७।। *सूत उवाच* – हे शौनक! गुणिजनसत्कृतं पृथोर्यशः श्रुत्वा

क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणन्तमर्चयन् ।।८।। *विदुर उवाच* - सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः। बिभ्रत् स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम् ।।९।। को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः। लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ।।१०।। *मैत्रेय उवाच* - गङ्गायमुनयोर्नद्योरन्तराक्षेत्रमावसन्। आरब्धानेव बुभुजे भोगान् पुण्यजिहासया ।।११।। सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डभृत्। अन्यत्र ब्राह्मणकुलादन्यत्राच्युत-गोत्रतः ।।१२।। एकदाऽऽसीन्महासत्रदीक्षा तत्र दिवौकसाम्। समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ।।१३।। तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः। उत्थितः सदसो मध्ये ताराणामुडुराडिव ।।१४।। प्रांशु पीनायतभुजो गौरः कञ्जारुणेक्षणः। सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ।।१५।। व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गु-दलोदरः। आवर्तनाभिरोजस्वी काञ्चनोरुरुदग्रपात् ।।१६।। सूक्ष्मवक्रासितस्निग्ध-मूर्धजः कम्बुकन्धरः। महाधने दुकूलाग्र्ये परिधायोपवीय च ।।१७।।

।। सङ्ग्रहोक्तिः ।।

परमभागवतो विदुरः भगवत्कथां कथयन्तं मैत्रेयं सम्मानयन् प्राह ।।८।। *विदुर उवाच* - ब्रह्मर्षिभी राज्यासने स्थापितः, सर्वसुरादिभिः पूजितः, बाह्वोर्वैष्णवं तेजो बिभ्रत् स स्वबाहुभ्यां भूमिरूपां गां दुदोह ।।९।। अस्य पृथोः कीर्त्तिं सुज्ञः को न शृणोति, लोकपाला अशेषाभूपाश्च यद्विक्रमोच्छिष्टतुल्यं काममुपजीवन्ति, तस्य पृथोः शुद्धं चरितं मह्यं वद ।।१०।। *मैत्रेय उवाच* - पृथुः संचितपुण्यक्षयाय गङ्गायमुनयोर्मध्येऽन्तर्वेद्यां वसन् भूयांसो भोगान् बुभुजे ।।११।। सप्तसु द्वीपेष्वेकमात्रशासकः स ब्राह्मणकुलं विष्णुभक्तांश्च विहाय सर्वत्राऽस्खलिताज्ञ आसीत् ।।१२।। एकदा कस्यचिन्महायज्ञस्य दीक्षाऽऽसीत्, तत्र दिवौकसां देवर्षीणां ब्रह्मर्षिणां च समाजोऽभवत् ।।१३।। तत्र यथायोग्यं पूज्येषु सर्वेषु पूजितेषु सत्सु नक्षत्राणां मध्ये चन्द्र इव सदसो मध्ये पृथुरुत्थितः सन् समन्ततः समैक्षत ।।१४।। कथम्भूतः सः, समुन्नतः पुष्टायतभुजः, गौरवर्णः, कञ्जारुणलोचनः, सुनासः, सुमुखः, पीनांसः, सौम्यः, सुद्विजस्मितः ।।१५।। विशालवक्षाः, त्रिवलियुतोदरः, निम्ननाभिः, उदग्रपाद, ओजस्वी च ।।१६।।

व्यञ्जिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः। कृष्णाजिनधरः श्रीमान् कुशपाणिः कृतोचितः।।१८।। शिशिरस्निग्धताराक्षः समैक्षत समन्ततः। उक्तवानिदमुर्वीशः सदः संहर्षयन्निव। चारु चित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम्।।१९।। *राजोवाच* - सभ्याः शृणुत भद्रं वः साधवो य इहागताः। सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितम् ।।२०।। अहं दण्डधरो राजा प्रजानामिह योजितः। रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक्।।२१।। तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः। लोकाः स्युः कामसन्दोहा यस्य तुष्यति दिष्टदृक्।।२२।। य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन्। प्रजानां शमलं भुङ्क्ते भगं स्वं च जहाति सः।।२३।। तत् प्रजा भर्तृपिण्डार्थं स्वार्थमेवानसूयवः। कुरुताधोक्षजधियस्तर्हि मेऽनुग्रहः कृतः।।२४।। यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः। कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम्।।२५।। अस्ति यज्ञपतिर्नाम केषाञ्चिदर्हसत्तमाः।

।। सङ्ग्रहोक्तिः ।।

सूक्ष्म-वक्रा-ऽसित-स्निग्धमूर्धजः, कम्बुकन्धरः, महाधने दुकूले परिधायोपवीय च वर्तमानः ।।१७।। नियमे सति त्यक्ताभरणः, प्रकटावयवशोभनः, कृष्णाजिनधरः, कुशपाणिः, विहितोचितकर्मा ।।१८।। स्निग्धसस्नेहनयनः स नृपः समन्तत ऐक्षत, अनन्तरं सदःस्थान् सर्वान् संहर्षयन्निव चित्रपदं प्रशस्तं शुद्धं वचनं प्राह ।।१९।। हे सभ्याः! वो भद्रं भवतु, इह ये साधवः समागतास्ते यूयं संशृणुत ।।२०।। भगवता प्रजानां दण्डधरोऽहं नियुक्तः, एवं च अहं प्रजानां रक्षकः, वृत्तिदः, धर्ममर्यादासु स्थापकश्चापि नियुक्तोऽस्मि ।।२१।। यस्मै कर्मसाक्षी परमात्मा तुष्यति स प्रजारक्षणादिस्वकर्त्तव्यानुष्ठानपरायणाय मह्यं ब्रह्मवादिभिः प्रोक्तान् कर्मनिष्ठैः प्राप्यान् लोकान् दास्यति ।।२२।। यो राजा धर्मेष्वरक्षयन् करं गृह्णाति, स प्रजाकृतं पापं भुङ्क्ते, स्वीयमैश्वर्यं च जहाति ।।२३।। हे प्रजाः! पालकत्वेन पितृस्थानीयस्य मम परलोकहितार्थमनसूयवोऽधोक्षजधियश्च यूयं स्वधर्ममेव पालयन्तु, स धर्मपालनरूपः पिण्डः राज्ञे मह्यं देयः ।।२४।। निर्मलाः पितृदेवर्षयो यूयं धर्मानुशासनरूपं मत्कार्यमनुमोदध्वं, यतः कर्तुः शासकस्याऽनुमोदकस्य च मरणानन्तरं तुल्यं फलं स्यात् ।।२५।। हे आदरार्हाः! कश्चिद्

इहामुत्र च दृश्यन्ते ज्योत्स्नावत्यः क्वचिद्भुवः ।।२६।। मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः। प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्पितुः पितुः।।२७।। ईदृशानामथान्येषामजस्य च भवस्य च। प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता।।२८।। दौहित्रादीनृते मृत्योः शोच्यान् धर्मविमोहितान्। वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना।।२९।। यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः। सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित्।।३०।। विनिर्धुताशेषमनोमलः पुमानसङ्गविज्ञानविशेषवीर्यवान्। यदङ्घ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते।।३१।। तमेव यूयं भजतात्मवृत्तिभिर्मनोवचः कायगुणैः स्वकर्मभिः। अमायिनः कामदुघाङ्घ्रिपङ्कजं यथाधिकारावसितार्थसिद्धयः।।३२।। असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः। सम्पद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनः स्वरूपतः।।३३।। प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम्।

।। सङ्ग्रहोक्तिः ।।

यज्ञैराराध्य ईश्वरो वर्तते, यस्य इहामुत्र च क्वचित् प्रकाशबहुला भोगभूमयः सन्ति।।२६।। स्वायंभुवस्य मनोः, उत्तानपादस्य, ध्रुवस्य, मत्पितामहस्याङ्गस्य, राजर्षेः प्रियव्रतस्य च, ब्रह्मणः, शिवस्य, प्रह्लादस्य, बलेश्चान्येषां राज्ञामपि कर्मफलप्रदातृत्वेन केनचिदीश्वरेण भवितव्यमेव।।२७-२८।। त्रिवर्गस्वर्गापवर्गरूपस्य फलस्य दातृत्वेन ईश्वरेण केनाप्येकेनाऽवश्यमेव भाव्यम्, धर्मस्वरूपविमोहितान् शोच्यान् वेनसदृशान् ऋते सर्वेषां मते परमेश्वरोऽस्त्येव।।२९।। तपस्विनामपि प्राक्तनानेकजन्मजं मनसो मलं यस्य चरणसेवारूपा भक्तिः यत्पादाङ्गुष्ठ-विनिःसृता गंगा इव सद्यो विनाशयति तं परमात्मानं यूयं भजत।।३०।। विनष्टाखिलमनोमलः ज्ञानवैराग्यपरिपुष्टभक्तिमान् पुमान् यस्य परमात्मनोऽङ्घ्रिमूलं सेवते, स भक्तः क्लेशपूर्णां संसृतिं कदाचिदपि न प्राप्नोति।।३१।। अतो यूयं स्वनित्यनैमित्तिककर्मभिः, शमदमादिगुणैः, मनोवाक्कायगुणैः निष्कपटा यथाधिकारं निश्चितबुद्धयः सन्त कामदुघाङ्घ्रिकमलं परमात्मानं भजत।।३२।। स्वरूपतो विशुद्धविज्ञानघनो, निरस्तहेयगुणः, अनन्तकल्याणगुणगणः य एष परमात्मा स इह यज्ञे पृथग्विधद्रव्यादिभिः, अर्थाशयादिभिरध्वरनामा सम्पद्यते।।३३।।

क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मकः।।३४।। अहो ममामी वितरन्त्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम्। स्वधर्मयोगेन यजन्ति मामका निरन्तरं क्षोणितले दृढव्रताः।।३५।। मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च। देदीप्यमानेऽजितदेवतानां कुले स्वयं राजकुलाद् द्विजानाम्।।३६।। ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात्। अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः।।३७।। यत्सेवयाशेषगुहाशयः स्वराड् विप्रप्रियस्तुष्यति काममीश्वरः। तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम्।।३८।। पुमाँल्लभेतानतिवेलमात्मनः प्रसीदतोऽत्यन्तशमं स्वतः स्वयम्। यन्नित्यसम्बन्धनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम्।।३९।। अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः। न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यपर्यगुः।।४०।। यद् ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमङ्गलमौनसंयमैः। समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते।।४१।।

।। सङ्ग्रहोक्तिः ।।

प्रकृतिकालाशयकर्मादिभिर्जनिते शरीरे चेतनां प्रपद्य दारुणि वह्निरिव तद्गुणात्मकः कर्मफलत्वेन निश्चीयते।।३४।। अहो! भूतले मद्देशवासिनो दृढव्रता जनाः स्ववर्णाश्रमधर्मयोगेन देवेश्वरं हितोपदेष्टारं हरिं निरंतरं भजन्ति, तेऽभिजना मदुपर्युनुग्रहं कुर्वन्ति।।३५।। महत्समृद्धिभिर्युक्तं यद् राजकुलस्य तेजस्तत् तितिक्षया, तपसा, अतिथिसत्क्रियया च देदीप्यमाने ब्राह्मणकुले, तथा वैष्णवकुले च स्वप्रभावं न प्रदर्शयतु।।३६।। ब्रह्मण्यदेवः पुराणपुरुषो हरिर्विप्रचरणाभिवन्दनात् नित्य समृद्धां लक्ष्मीं जगत्पवित्रं च यशोऽऽवाप, महतामग्रणीश्च जातः।।३७।। ब्राह्मणानां परिचर्यया सर्वान्तरात्मा स्वतन्त्रो विप्राधीनो भगवान् नितान्तं प्रसीदति, भागवतधर्मनिष्ठैर्ब्राह्मणकुलं सर्वथा सेव्यम्।।३८।। ब्राह्मणकुलस्य सततसेवया पुमानयत्नेन शीघ्रं प्रसीदतो मनसः शान्तिं लभेत, इह ब्राह्मणकुलादन्यत् परं हविर्भुजां देवानां मुखमस्ति किम्?।।३९।। तत्त्वकोविदैराराध्यदेवनामभिः ब्राह्मणमुखे श्रद्धया दत्तं हविर्भगवाननन्तो यथा गृह्णाति तथाऽचेतने हुताशने हुतं नाऽश्नाति।।४०।। ब्राह्मणा विरजं सनातनं विश्वप्रकाशकं वेदं श्रद्धा-तपो-

तेषामहं पादसरोजरेणुमार्या वहेयाधिकिरीटमायुः। यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजन्ति।।४२।। गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणतेऽनु सम्पदः। प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम्।।४३।। *मैत्रेय उवाच* - इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः। तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः।।४४।। पुत्रेण जयते लोकानिति सत्यवती श्रुतिः। ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः।।४५।। हिरण्यकशिपुश्चापि भगवन्निन्दया तमः। विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः।।४६।। वीरवर्य पितः पृथ्व्याः समाः सञ्जीव शाश्वतीः। यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि।।४७।। अहो वयं स्माद्य पवित्रकीर्त्ते त्वयैव नाथेन मुकुन्दनाथाः। य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति।।४८।। नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनम्। प्रजानुरागो महतां प्रकृतिः करुणात्मनाम्।।४९।।

।। सङ्ग्रहोक्तिः ।।

मङ्गल-मौन-संयम-समाधिभिश्च तत्त्वसाक्षात्काराय नित्यं बिभ्रति।।४१।। हे आर्या! अहं तेषां ब्राह्मणानां पादसरोजरेणुं यावज्जीवं मुकुटोपरि वहेय, यद् रेणुं बिभ्रतः पुरुषस्य पापं शीघ्रं नश्यति, एवं च तद्रेणुधारिणं पुरुषं सर्वे कल्याणगुणगणा भजन्ति।।४२।। शुभगुणालयं शीलधनं कृतज्ञं वृद्धाश्रयं पुरुषं सर्वसम्पदो मुहुर्मुहुः सम्यक् भजन्ते, तद् ब्रह्मकुलं गवां कुलं भक्तसहितो भगवांश्च मह्यं प्रसीदताम्।।४३।। *मैत्रेय उवाच* - इत्थं ब्रुवाणं पृथुं पितृदेवद्विजातयः साधवश्च प्रहृष्टाः सन्तः साधुवादेन तुष्टुवुः।।४४।। "पुत्रेण लोकान् जयते" इति जनश्रुतिः सत्यवती भवति, यस्मात् पृथोः विप्रशापमृतः पापो वेनोऽपि नरकमतरत्।।४५।। हिरण्यकशिपुरपि भगवन्निन्दया नरकं विविक्षुः सन्नपि प्रह्लादस्य प्रभावात् भगवन्तमवाप।।४६।। हे वीरवर्य! त्वं शाश्वतीः समाः संजीव, यस्य तव सर्वलोकैकपोषणकारके परमेश्वर ईदृशी भक्तिरस्ति।।४७।। हे पवित्रकीर्त्ते! अद्य वयं नाथेन त्वया मुकुन्दनाथाः स्मः, यो भवान् ब्रह्मण्यदेवस्योत्तमश्लोकस्य विष्णोः कथां विशदयति।।४८।। हे नाथ! स्वसेवकानां कृते यत् सच्छिक्षणं तत्तवाऽद्भुतं न प्रतीयते, यत दयालूनां सज्जनानां प्रजानुरागः स्वभाव एव भवति।।४९।।

अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो। भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः
।।५०।। नमो विवृद्धसत्त्वाय पुरुषाय महीयसे। यो ब्रह्म क्षत्रमाविश्य बिभर्तीदं
स्वतेजसा।।५१।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे एकविंशोऽध्यायः।।२१।।

अथ द्वाविंशोऽध्यायः।।२२।।

मैत्रेय उवाच - जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम्। तत्रोपजग्मुर्मुनयश्चत्वारः
सूर्यवर्चसः।।१।। तांस्तु सिद्धेश्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा। लोकानपापान्
कुर्वन्त्या सानुगोऽचष्ट लक्षितान्।।२।। तद्दर्शनोद्गतप्राणान् प्रत्यादित्सुरिवोत्थितः।
ससदस्यानुगो वैन्य इन्द्रियेशो गुणानिव।।३।। गौरवाद्यन्त्रितः सभ्यः प्रश्रयानत-
कन्धरः। विधिवत्पूजयाञ्चक्रे गृहीताध्यर्हणासनान्।।४।।

।। सङ्ग्रहोक्तिः।।

हे प्रभो! दैवसंज्ञकैः कर्मभिर्भ्रमतां नष्टदृष्टीनामस्माकमद्य त्वया नरकादुद्धारः कृतः।।५०।।
सत्त्वप्रचुराय महीयसे परमपुरुषविभूतिरूपाय तुभ्यं नमः, यः स्वतेजसा परस्परं ब्रह्मक्षत्र-
रूपामुभयीं जातिमाविश्य विश्वमिदं बिभर्ति।।५१।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामेकविंशोऽध्यायः।।२१।।

अथ द्वाविंशोऽध्यायः ।।२२।।

पृथवे सनत्कुमारकृतो ज्ञानोपदेशः

मैत्रेय उवाच - पृथुलपराक्रमं पृथुमुक्तप्रकारेण जनेषु कथयत्सु सत्सु सूर्यतेजसश्चत्वारो
मुनयस्तत्रोपजग्मुः।।१।। लोकानपापान् कुर्वतो तेजसा "इमे सनकादयः" इति लक्षितान्,
आकाशादवतरतस्तान् सभृत्यो राजाऽज्ञासीत्।।२।। तद्दर्शनात् प्रयातान् प्राणान् प्रत्यादित्सुरिव
वैन्यः ससदस्यानुगः सद्य उत्थितः।।३।। तेषां गौरवाद् वशीकृतः प्रश्रयानतकन्धरः
सोऽनर्घ्यासनोप-विष्टान् मुनीन् विधिवत् पूजयाञ्चक्रे।।४।।

तत्पादशौचसलिलैर्मार्जितालकबन्धनः। तत्र शीलवतां वृत्तमाचरन्मानयन्निव।।५।।
हाटकासन आसीनान् स्वधिष्ण्येष्विव पावकान्। श्रद्धासंयमसंयुक्तः प्रीतः प्राह
भवाग्रजान्।।६।। *पृथुरुवाच* - अहो आचरितं किं मे मङ्गलं मङ्गलायनाः।
यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः।।७।। किं तस्य दुर्लभतरमिह लोके
परत्र च। यस्य विप्राः प्रसीदन्ति शिवो विष्णुश्च सानुगः।।८।। नैव लक्षयते लोको
लोकान् पर्यटतोऽपि यान्। यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः।।९।। अधना
अपि ते धन्याः साधवो गृहमेधिनः। यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः।।१०।।
व्यालालयद्रुमा वै तेऽप्यरिक्ताखिलसम्पदः। यद्गृहास्तीर्थपादीयपादशौचविवर्जिताः
।।११।। स्वागतं वो द्विजश्रेष्ठा यद् व्रतानि मुमुक्षवः। चरन्ति श्रद्धया धीरा बाला
एव बृहन्ति वै।।१२।। कच्चिन्नः कुशलं नाथा इन्द्रियार्थार्थवेदिनाम्। व्यसनावाप
एतस्मिन् पतितानां स्वकर्मभिः।।१३।। भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते।
कुशलाकुशला यत्र न सन्ति मतिवृत्तयः।।१४।।

।। सङ्ग्रहोक्तिः ।।

शीलवतां सदाचारं मानयन् स तत्पादधौतसलिलं शिरसि दधार।।५।। वेदिकासूपविष्टान्
पावकान् इव सुवर्णासन आसीनान् तान् सनकादीन् श्रद्धासंयमसंयुतः स प्रीतः सन् प्राह।।६।।
पृथुरुवाच - हे मङ्गलायतनाः! अहो!!! मया किं पुण्यं कृतं स्यात्? यस्य मे योगिभिरपि
दुर्दर्शनानां वो दर्शनं जातम्।।७।। यस्योपरि सानुगो विष्णुः शिवो ब्राह्मणाश्च प्रसीदन्ति तस्येह
परत्र च दुर्लभतरं किम्?।।८।। यथा विश्वस्य हेतुभूता ब्रह्मादयः सर्वज्ञमात्मानं न लक्षयन्ति
तथा लोकान् पर्यटतोऽपि युष्मान् लोको नैव पश्यन्ति।।९।। येषां गृहमेधिसाधूनां भवनानि
सलिलतृणासनानि च त्यागिसाधुभिः स्वीकृतानि, ते निर्धनाऽपि गृहिणो धन्याः सन्ति।।१०।।
येषा गृहिणां गृहाः भगवद्भागवतपादतीर्थाम्बुवर्जिताः, ते पूर्णाखिलसम्पदोऽपि व्यालालयतुल्या
भवन्ति।।११।। हे द्विजश्रेष्ठाः! भवतां स्वागतम्, ये मुमुक्षवो बाला एव भवन्तो धीराः सन्तो
बृहद्व्रतानि चरन्ति।।१२।। पञ्चविषयरूपपुरुषार्थमानिनां स्वकर्मभिर्दुःखालये संसारे पतिताना-
मस्माकं कुशलं किं स्यात्?।।१३।। आत्मारामेषु भवत्सु कुशल प्रश्नो नेष्यते, येषु भवत्सु

तदहं कृतविश्रम्भः सुहृदो वस्तपस्विनाम्। संपृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत्॥१५॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः। स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः॥१६॥ *मैत्रेय उवाच* – पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु। स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह॥१७॥ *सनत्कुमार उवाच* – साधु पृष्टं महाराज सर्वभूतहितात्मना भवता विदुषा चापि साधूनां गतिरीदृशी॥१८॥ सङ्गमः खलु साधूनामुभयेषां च सम्मतः। यत्सम्भाषणसम्प्रश्नः सर्वेषां वितनोति शम्॥१९॥ अस्त्येव राजन् भवतो मधुद्विषः पादारविन्दस्य गुणानुवादने। रतिः सदा या विधुनोति नैष्ठिकी कामं कषायं मलमन्तरात्मनः॥२०॥ शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः। असङ्ग आत्मव्यतिरिक्त आत्मनि साक्षाद् दृढा ब्रह्मणि निर्गुणे रतिः॥२१॥ सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोग-निष्ठया। योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च॥२२॥

॥ सङ्ग्रहोक्तिः॥

कुशलरूपा अकुशलरूपाश्च मनोवृत्तयो न सन्ति॥१४॥ तस्माद् अहं विश्वस्तः सन् तापत्रयातुराणां सुहृदो वः संपृच्छे यत् संसारे वर्तमानस्य मम मोक्षोऽञ्जसा केन भवेत्॥१५॥ ज्ञानिनां निरतिशयप्रीतिविषय आत्मभावनो भगवान् भक्तानामनुग्रहाय भवादृक्साधुस्वरूपेण धरातले नित्यं विचरति॥१६॥ *मैत्रेय उवाच* – पृथोस्तत् सारं सुष्ठु मितं मधुरं च सुवचनं श्रुत्वा प्रीत्या स्मयमान इव सनत्कुमारः प्रत्युवाच॥१७॥ *सनत्कुमार उवाच* – सर्वहितचिन्तकेन विदुषा भवता साधु पृष्टम्, सर्वभूतहितचिन्तनमेव साधूनां स्वभावोऽस्ति॥१८॥ साधूनां समागमः खलुः बुभुक्षूणां मुमुक्षूणां च उभयेषां संमतोऽस्ति, यतः संभाषण-संप्रश्नः सर्वेषां सुखं तनोति॥१९॥ हे राजन्! भवतो भगवत्पादारविन्दगुणानुवादे श्रवणे च रतिरस्ति हि, सा रतिर्यदि नैष्ठिकी स्यात् तदा कामक्रोधादिकान् सर्वदोषान् नाशयति॥२०॥ शास्त्रेषु नृणां मोक्षाय समीचीन उपाय एतावानेव निश्चितः, यत् सत्त्वादिमायागुणरहिते स्वरूपगुणादिभि-रत्यन्तमहति परमात्मनि दृढा परमभक्तिरितरत्र विरक्तिश्च॥२१॥ सा परमभक्तिः श्रद्धया, भगवत्प्रसन्नताहेतुधर्मानुष्ठानेन, जिज्ञासया, आध्यात्मिकयोगनिष्ठया, नित्यं योगेश्वरोपासनया,

अर्थेन्द्रियारामसगोष्ठ्यतृष्णया तत्सम्मतानामपरिग्रहेण च। विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात् ।।२३।। अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दचरिताग्र्यसीधुना। यमैरकामैर्नियमैश्चाप्यनिन्दया निरीहया द्वन्द्वतितिक्षया च ।।२४।। हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृम्भमाणया। भक्त्या ह्यसङ्गः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ।।२५।। यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा। दहत्यवीर्यं हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ।।२६।। दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे। परात्मनोर्यद् व्यवधानं पुरस्तात् स्वप्ने यथा पुरुषस्तद्विनाशे ।।२७।। आत्मानमिन्द्रियार्थं च परं यदुभयोरपि। सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा ।।२८।। निमित्ते सति सर्वत्र जलादावपि पूरुषः। आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ।।२९।। इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः। चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदात् ।।३०।। भ्रश्यत्यनु स्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये।

।। सङ्ग्रहोक्तिः ।।

भगवतः पुण्यकथया च स्यात् ।।२२।। विषयेन्द्रियारामैः सह गोष्ठीत्यागेन, विषयेन्द्रियारामाभीष्टानां भोगानां त्यागेन, भगवदमृतायमानगुणानुवादश्रवणस्मरणं विना विविक्तरुचिर्न कार्या ।।२३।। अहिंसया, पारमहंस्यचर्यया, भगवच्चरित्ररूपामृतपानसुखेन, यमनियमादिभिः, कस्याप्यनिन्दया च भक्तिर्दृढा भवति ।।२४।। भगवद्भागवतगुणाभिधानेन विवृद्धया भक्त्या प्राकृतहेयगुणरहिते परमात्मनि प्रीतिः स्यात्, अनात्मनि च निःसङ्गता स्यात् ।।२५।। परमात्मनि प्रीतौ सत्यां पुमान् ज्ञानवैराग्यवेगेन जीवावरकं पञ्चभूतात्मकं जीवकोशमुत्थितोऽग्निररणिमिवाऽज्ञानमूलं दहति ।।२६।। एवं देहसम्बन्धनिमित्तं पुण्यपापात्मकं कर्म निःशेषं दहन्त्या भक्त्या युक्तस्य पुंसः पुनः पञ्चात्मकजीवकोश सम्बन्धो न भवति ।।२७।। देहं, शब्दादिविषयं, भोगोपकरणभोगस्थानादिकं च वासनाख्ये उपाधौ सति पुमान् पश्यति, अन्यथा न ।।२८।। सर्वत्र जडप्रकृतिशरीराद्युपाधौ विद्यमाने सति स्वस्य परमात्मनश्च सम्बन्धविरहं पश्यति नान्यदा ।।२९।। विषयचिन्तनं कुर्वतां जनानां विषयाकृष्टैरिन्द्रियैः मन आकृष्टं भवति, तच्च मनो बुद्धेश्चेतनां स्तम्बो जलमिव हरति ।।३०।। चेतनापहारानन्तरं स्मृतिर्नश्यति, स्मृत्या नाशे

तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ।।३१।। नातः परतरो लोके पुंसः स्वार्थव्यति-क्रमः। यदस्त्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ।।३२।। अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम्। भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यताम् ।।३३ ।। न कुर्यात्कर्हिचित्सङ्गं तमस्तीव्रं तितीरिषुः। धर्मार्थकाममोक्षाणां यदत्यन्तविघातकम् ।।३४।। तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते। त्रैवर्ग्योऽर्थो यतो नित्यं कृतान्त-भयसंयुतः ।।३५।। परेऽवरे च ये भावा गुणव्यतिकरादनु। न तेषां विद्यते क्षेममीश-विध्वंसिताशिषाम् ।।३६।। तत्त्वं नरेन्द्र जगतामथ तस्थुषां च देहेन्द्रियासुधिषणात्म-भिरावृतानाम्। यः क्षेत्रवित्तपतया हृदि विष्वगाविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ।।३७।। यस्मिन्निदं सदसदात्मतया विभाति मायाविवेकविधुति स्रजि वाऽहिबुद्धिः। तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ।।३८।। यत्पादपङ्कजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः।

।। सङ्ग्रहोक्तिः ।।

ज्ञानभ्रंशो भवति, तत् ज्ञानभ्रंशं सूरय आत्मनस्तिरोधानं प्राहुः ।।३१।। आत्मनः स्वस्वरूपं विहाय शब्दादिविषयाणां यत् प्रेयस्त्वं भवति, अतः परतरः स्वपुरुषार्थविरहो नास्ति ।।३२।। अर्थेन्द्रियाणामभिध्यानात् नृणां सर्वपुरुषार्थनाशो भवति, येन नाशेन ज्ञानविज्ञानतो भ्रंशितः पुमान् स्थावरतां प्राप्नोति ।।३३।। तीव्रमज्ञानं तितीर्षुः पुमान् धर्मार्थकाममोक्षाणां विघातकस्य सङ्गं कदापि न कुर्यात् ।।३४।। तत्र पुरुषार्थचतुष्टये मोक्षरूपः पुरुषार्थ एव परमार्थः सत्यतयेष्यते, धर्मार्थकामरूपस्त्रिवर्गपुरुषार्थो नित्यं कालभयग्रस्तो भवति ।।३५।। आब्रह्मस्तम्ब-पर्यन्तानि वस्तूनि सृष्टेः पश्चाद् भवन्ति, अतः कालविध्वंसितानां भावानां स्थिरत्वं न विद्यते ।।३६।। हे नरेन्द्र! तस्माद् देहेन्द्रियासुधिषणामनोभिरावृतानां स्थावराणां जङ्गमानां च जीवजातान्तरात्मतया हृदि स्थितः सर्वतः प्रकाशमानो यो भगवान् कर्मफलं नियच्छन्नवभासते तत् भगवदात्मकोऽहमस्मीति बुद्ध्यस्व ।।३७।। यस्मिन् क्षेत्रज्ञस्वरूपे विवेकज्ञानविरोधि कार्य-कारणरूपेण वर्तमानं देवमनुष्यादिविविधरूपं मालायां सर्पबुद्धिरिव तादात्म्येन विभाति, तं नित्य-मुक्त-परिशुद्ध-विशुद्ध-तत्त्वमनादिकर्ममिश्रप्रकृतिकमात्मानं भगवच्छरीरतया विभावय ।।३८।। बाह्येन्द्रियाणि विषयेभ्य प्रत्याहृत्य साधवो यच्चरणकमलसेवयाऽनादि-

तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ।।३९।। कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीरषन्ति। तत् त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ।।४०।। *मैत्रेय उवाच* - स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा। दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृपः ।।४१।। *राजोवाच* - कृतो मेऽनुग्रहः पूर्वं हरिणाऽऽर्तानुकम्पिना। तमापादयितुं ब्रह्मन् भगवन् यूयमागताः ।।४२।। निष्पादितश्च कात्स्न्र्येन भगवद्भिः कृपालुभिः। साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ।।४३।। प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरिच्छदाः। राज्यं बलं मही कोश इति सर्वं निवेदितम् ।।४४।। सैनापत्यं च राज्यं च दण्ड-नेतृत्वमेव च। सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ।।४५।। स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च। तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः ।।४६।। यैरीदृशी भगवतो गतिरात्मवादे एकान्ततो निगमिभिः प्रतिपादिता नः।

।। सङ्ग्रहोक्तिः ।।

कर्मवासनाजन्यामहंग्रन्थिं मोचयन्ति, त्वमपि तद्वत् स्वात्मप्रापकं श्रीवासुदेवं भज ।।३९।। भगवदाश्रयप्लवरहिताः षड्वर्गनक्रपीडिता वासनापीडिताः जनाः संसारार्णवे भृशं क्लेशं प्राप्नुवन्ति, त्वं तु हरेः सुखमाराध्यं पादोडुपमाश्रित्य दुस्तरार्णं भवार्णवमुत्तर ।।४०।। *मैत्रेय उवाच* - ब्रह्मविदा सनत्कुमारेण एवं दर्शितात्मगतिः पृथुः सम्यक् प्रशस्य सनत्कुमारमुवाच ।।४१ ।। *राजोवाच* - दीनदयालुना हरिणा पूर्वं मेऽनुग्रहः कृतः, हे भगवन्! तमनुग्रहमापादयितुं यूयमत्र समागताः स्थ ।।४२।। सोऽनुग्रहः कृपालुभिर्भवद्भिः संपूर्णः कृतः, देहेन सह मम सर्वं साधुभिर्दत्तमस्ति, अत्र मम किमपि नास्ति, अतो गुरुदक्षिणारूपं किं दद्याम्? ।।४३।। हे ब्रह्मन्! प्राणा, दाराः, सुताः, सपरिच्छदा गृहाः, राज्यं, बलं, मही, कोशः इति सर्वं मदर्पितमङ्गीक्रियताम् ।।४४।। सेनापत्यं, राज्यं, दण्डनायकत्वं, सर्वलोकाधिपत्यं च यो वेदशास्त्रार्थविद् भवेत् स एवार्हति ।।४५।। ब्राह्मणः स्वीयम् अन्नं भुङ्क्ते, वस्त्रादिकं स्वीयमेव परिधत्ते ददाति च, क्षत्रियादयस्तु तस्यैवानुग्रहेण भुञ्जते, परिदधते, ददति च ।।४६।। अध्यात्मविचारे युष्माभिरीदृशी भगवत्प्राप्तिः प्रतिपादिता, तेन हेतुना अत्यंत कृपालवो भवन्तः

तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रम् ।।४७।। त आत्मयोगपतय आदिराजेन पूजिताः। शीलं तदीयं शंसन्तः खेऽभूवन्मिषतां नृणाम् ।।४८।। वैन्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया। आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः।।४९।। कर्माणि च यथाकालं यथादेशं यथाबलम्। यथोचितं यथावित्तमकरोद् ब्रह्मसात्कृतम् ।।५०।। फलं ब्रह्मणि विन्यस्य निर्विषङ्गः समाहितः। कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम् ।।५१।। गृहेषु वर्तमानोऽपि स साम्राज्यश्रियान्वितः। नासज्जतेन्द्रियार्थेषु निरहंमतिरर्कवत् ।।५२।। एवमध्यात्मयोगेन कर्माण्यनुसमाचरन्। पुत्रानुत्पादयामास पञ्चार्चिष्यात्मसंमितान् ।।५३।। विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम्। सर्वेषां लोकपालानां दधारैकः पृथग्गुणान् ।।५४।। गोपीथाय जगत्सृष्टेः काले स्वे स्वेऽच्युतात्मकः। मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरञ्जयन् प्रजाः।।५५।। राजेत्यधान्नामधेयं सोमराज इवापरः। सूर्यवद्विसृजन् गृह्णन् प्रतपंश्च भुवो वसु।।५६।।

।। सङ्ग्रहोक्तिः।।

स्वकृतेनाऽऽर्त्तोद्धरणकर्मणा तुष्यन्तु, विनोदपात्रमहं तत्प्रतिकर्तुं को नाम?।।४७।। अध्यात्म-योगस्य स्वामिनस्ते सनकादयः पृथुना पूजिताः, पृथुसंबंधि शीलादिकं प्रशंसन्त सन्तश्च नृणां मिषतां सतामाकाशमार्गेणोद्गता अभवन् ।।४८।। पृथुस्तु सनकादिशिक्षानुसारेणाऽऽत्मनिष्ठः सन् स्वं पूर्णकामं मेने ।।४९।। स सर्वाणि कर्माणि देशकालबलवित्तानुसारेण यथा ब्रह्मण्यर्पितं स्यात् तथाऽकरोत् ।।५०।। कर्मफलं परमात्मनं समर्प्य, निर्विषङ्गः समाहितः सन् कर्माध्यक्षं प्रत्यगात्मानं प्रकृतेः परं मन्वानः स कर्माण्यकरोत् ।।५१।। स पृथुः गृहेषु वर्तमानो राज्यश्रिया-ऽन्वितोपि देहात्मभ्रमरहितोऽत एव इन्द्रियार्थेष्वर्कवत् नाऽसज्जत ।।५२।। एवं भगवद्भक्तियोगेन कर्माणि देशकालानुसारेण कुर्वन्नर्चिषि भार्यायामात्मातुल्यान् पञ्चपुत्रानुत्पादयामास ।।५३।। ते च विजिताश्वः, धूम्रकेशः, हर्यक्षः, द्रविणः, वृकश्चेति नामान आसन्, भगवन्मनाः स एकः पृथुर्जगत्सृष्टेः रक्षणार्थं यथाकालं सर्वेषां लोकपालानां गुणान् पृथक् पृथक् दधार ।।५४।। मनोवाक्कायैः सौम्यैर्गुणैः प्रजा रञ्जयन्नपरः सोमराज इव नामधेयमधात् ।।५५।।

दुर्धर्षस्तेजसेवाग्निर्महेन्द्र इव दुर्जयः। तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणाम्।।५७।। वर्षति स्म यथाकामं पर्जन्य इव तर्पयन्। समुद्र इव दुर्बोधः सत्त्वेनाचलराडिव।।५८।। धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव। कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा।।५९।। मातरिश्वेव सर्वात्मा बलेन सहसौजसा। अविषह्यतया देवो भगवान् भूतराडिव।।६०।। कन्दर्प इव सौन्दर्ये मनस्वी मृगराडिव। वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः।।६१।। बृहस्पतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः। भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु। ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे।।६२।। कीर्त्योर्ध्वगीतया पुम्भिस्त्रैलोक्ये तत्र तत्र ह। प्रविष्टः कर्णरन्ध्रेषु स्त्रीणां रामः सतामिव।।६३।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे द्वाविंशोऽध्यायः।।२२।।

।। सङ्ग्रहोक्तिः।।

भुवो वसु गृह्णन् विसृजंश्च पृथुः सूर्यवत् प्रतपन्, तेजसा वह्निरिव दुर्धर्षो, महेन्द्रवत् दुर्जयश्चाऽभवत्।।५६।। स तितिक्षया महीतुल्यः, स्वर्ग इव नृणामभीष्टदः, पर्जन्य इव यथाकामं वर्षति स्म।।५७।। समुद्र इवाऽपरिच्छेद्यः, गुणेन मेरुरिव, शिक्षायां यम इव, ऐश्वर्ये हिमालय इवाऽभवत्।।५८।। स कुबेर इव धनाढ्यः, वरुण इव गुप्तधनः, वायुरिव सर्वत्र संचरणशीलः, शरीरेन्द्रियमनोबलेनाऽपि वायुना सम आसीत्।।५९।। रुद्र इवाऽविषह्यः, सौन्दर्ये काम इव, सिंह इव मनस्वी चाऽभवत्।।६०।। नृणां वात्सल्ये मनुरिव, प्रभुत्वे चतुर्मुख इव, वेदवादे बृहस्पतिरिव, स्वाधीनत्वे जितेन्द्रियत्वे च स्वयं हरिरिवाऽभवत्।।६१।। गोगुरुविप्रेषु भगवद्भक्तेषु च भक्त्या ह्रिया च विनम्रताशीलाभ्यां परोद्यमार्थे च स आत्मतुल्यः= निरुपम आसीत्।।६२।। त्रिलोक्यां तत्र तत्र पुम्भिरुच्चस्वरेण गीयमानया कीर्त्या स्त्रीणां कर्णरन्ध्रेषु प्रविष्टः, अतः सतां कर्णरन्ध्रेषु प्रविष्टः सीतापतिरिवाऽभवत्।।६३।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां द्वाविंशोऽध्यायः।।२२।।

अथ त्रयोविंशोऽध्यायः ।।२३।।

मैत्रेय उवाच – दृष्ट्वाऽऽत्मानं प्रवयसमेकदा वैन्य आत्मवान्। आत्मना वर्धिताशेष-स्वानुसर्गः प्रजापतिः।।१।। जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सताम्। निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान्।।२।। आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिव। प्रजासु विमनस्स्वेकः सदारोऽगात्तपोवनम्।।३।। तत्राप्यात्तात्मनियमो वैखानस-सुसम्मते। आरब्ध उग्रतपसि यथा स्वविजये पुरा।।४।। कन्दमूलफलाहारः तृणपर्णाशनः क्वचित्। अब्भक्षः कतिचित्पक्षान् वायुभक्षस्ततः परम्।।५।। ग्रीष्मे पञ्चतपा वीरो वर्षास्वासारषाण्मुनिः। आकण्ठमग्नः शिशिर उदके स्थण्डिलेशयः।।६।। तितिक्षुर्यतवाग्दान्त ऊर्ध्वरेता जितानिलः। आरिराधयिषुः कृष्णमचरत्तप उत्तमम् ।।७।। तेन क्रमानुरुद्धेन ध्वस्तकर्मामलाशयः। प्राणायामैः संनिरुद्धषड्वर्गो भिन्नबन्धनः।।८।। सनत्कुमारो भगवान् यदाहाध्यात्मिकं परम्।

।। सङ्ग्रहोक्तिः ।।

अथत्रयविंशोऽध्यायः ।।२३।।

पृथोर्विमानेन वैकुण्ठगमनम्

मैत्रेय उवाच – यथार्थज्ञानवान् वर्द्धिताशेषस्वानुसर्गः, प्रजापतिः, पृथुः स्थावरजङ्गमानां वृत्तिदः सतां धर्मभृत् आसीत् यदर्थं भुवि जातो निष्पादितेश्वरादेशः स वैन्य एकदा स्वं वृद्धं दृष्ट्वा विरहाद् रुदतीविम पुत्रीकृतां भूमिं पुत्रेषु न्यस्य, प्रजासु चिन्तातुरासु सभार्य एकस्तपोवनमगात्।।१-३।। तत्र तपोवने शमदमादिसम्पन्नः स वानप्रस्थसंमते कठिने तपसि प्रवृत्तः, यथा पुरा स्वराज्यविजये प्रवृत्तस्तद्वत्।।४।। स कन्द-मूल-फलाहारः, क्वचित्तृण-पर्णाशनः, कतिचित् पक्षानब्भक्ष आसीत्, ततः परं वायुभक्षोऽभवत्।।५।। ग्रीष्मर्त्तौ पञ्चतपाः, वर्षास्वासारषाट्, शशीर उदक आकण्ठमग्नः, स सर्वदा स्थण्डिलेशय आसीत्।।६।। तितिक्षुः, मौनी, दान्त, ऊर्ध्वरेता, जितप्राणः, एवंभूतः स कृष्णमारिराधिषुः सन्नुत्तमं तपस्तेपे।।७।। क्रमवर्द्धितेन तेन तपसा ध्वस्तकर्मा, प्राणायामैर्निर्मलान्तःकरणः संनिरुद्धषडिन्द्रियवर्गः स छिन्नबन्धन आसीत्।।८।।

योगं तेनैव पुरुषमभजत्पुरुषर्षभः ।।९।। भगवद्धर्मिणः साधोः श्रद्धया यततः सदा। भक्तिर्भगवति ब्रह्मण्यनन्यविषयाभवत् ।।१०।। तस्यानया भगवतः परिकर्मशुद्ध-सत्त्वात्मनस्तदनु संस्मरणानुपूर्त्या। ज्ञानं विरक्तिमदभून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशम् ।।११।। छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन। तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं नु कुर्यात् ।।१२।। एवं स वीरप्रवरः संयोज्यात्मानमात्मनि। ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरम् ।।१३।। सम्पीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयञ्छनैः। नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकण्ठशीर्षणि ।।१४।। उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निःस्पृहः। वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत् ।।१५।। खान्याकाशे द्रवं तोये यथास्थानं विभागशः। क्षितिमम्भसि तत्तेजस्यदो वायौ नभस्यमुम् ।।१६।। इन्द्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवम्। भूतादिनामून्युत्क्षिप्य महत्यात्मनि सन्दधे ।।१७।। तं सर्वगुणविन्यासे जीवे मायामये न्यधात्।

।। सङ्ग्रहोक्तिः ।।

सनत्कुमारो यमाध्यात्मिकं योगं दर्शितवान्, तेनैव परमपुरुषमभजत् ।।९।। भगवत्परायणस्य श्रद्धया स्वहिताय यततः साधोस्तस्य परमपुरुषेऽव्यभिचारिणी भक्तिरभवत् ।।१०।। भक्ति-परिशुद्धान्तरात्मा स मुहुर्भगवतोनुस्मृत्या निशितेन विरागपूर्णज्ञानेन च संशयपदं निजजीवकोशं चिच्छेद ।।११।। छिन्नदेहात्मधीरधिगतात्मस्वरूप अत एव निरीहः स येन ज्ञानेन संशयपदं चिच्छेद तज्ज्ञानमपि तत्याज, यतिर्यावत् भगवत्कथासु रतिं न कुर्यात्, तावत् स प्रमादरहितो न स्यात् ।।१२।। वीरश्रेष्ठः पृथुरात्मनं परमात्मनि दृढं संयोज्य ब्रह्मभूतः स काले कलेवरं तत्याज ।।१३।। गुदं पार्ष्णिभ्यां संपीड्य, ततः वायुं शनैरुत्सारयन् नाभ्यामवस्थाप्य, तत हृदुरुकण्ठशीर्षणि अवस्थाप्य, तं च ब्रह्मरन्ध्रे नेष्यन् निःस्पृहः पृथुः स्वदेहस्थं वायुं भूतात्मके वायौ, कायं क्षितौ, तेजस्तेजस्ययूयुजत् ।।१४-१५।। देहविवराण्याकाशे, देहस्थं जलं जले, विभागशो यथास्थानमयूयुजत्, ततः क्षतिमम्भसि, तत् तेजसि, तद् वायौ, तं नभसि महाभूत अयूयुजत् ।।१६।। उत्पत्त्यनुसारेण इन्द्रियेषु मनोऽयूयुजत्, इन्द्रियाणि तन्मात्रेषु,

तं चानुशयमात्मस्थमसावनुशयी पुमान्। ज्ञानवैराग्यवीर्येण स्वरूपस्थोऽजहात्प्रभुः ॥१८॥ अर्चिर्नाम वरारोहा तत्पत्न्यनुगता वनम्। सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः॥१९॥ अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चारषदेहयात्रया। नाविन्दतार्तिं परिकर्शितापि सा प्रेयस्करस्पर्शनमाननिर्वृता॥२०॥ देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः। आलक्ष्य किञ्चिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि॥२१॥ विधाय कृत्यं ह्रदिनीजलाप्लुता दत्त्वोदकं भर्तुरुदारकर्मणः। नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादम् ॥२२॥ विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिम्। तुष्टुवुर्वरदा देवैर्देववध्वः सहस्रशः॥२३॥ कुर्वत्यः कुसुमासारं तस्मिन्मन्दरसानुनि। नदत्स्वमरतूर्येषु गृणन्ति स्म परस्परम्॥२४॥ *देव्य ऊचुः* – अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम्। सर्वात्मना पतिं भेजे यज्ञेशं श्रीवधूरिव॥२५॥

॥ सङ्ग्रहोक्तिः॥

भूतादिनाहंकारेण नभः सहितानि तन्मात्राणि महत्तत्त्वे सन्दधे॥१७॥ महत्तत्त्वं प्रधाने, तत्प्रधानं मायामये जीवे, न्यधात्, अनुशयी जीव आत्मसंस्थं भुक्तशिष्टं कर्मापि ज्ञानवैराग्येण युक्तः स्वरूपस्थः सन्नजहात्, एवमाविर्भूतगुणाष्टकः शुद्धस्वरूपेणाऽवस्थितो मुक्तोऽभूत्॥१८॥ महाराज्ञी सुकुमारी आर्चिर्नाम तदङ्गना पद्भ्यां भुवः स्पर्शनाऽनर्हापि वनमनुगता॥१९॥ भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया, कन्दमूलाद्याहारेण च कृशीकृताङ्गा सत्यपि तत्करस्पर्शजनितानन्देन तृप्ता भूशयनकन्दफलाद्यशनजनितमपि क्लेशं न मेने॥२०॥ स्वस्याः पृथिव्याश्च पत्युः पृथोर्देहं विपन्नाखिलचेतनं दृष्ट्वा साऽर्चिः किञ्चिद् विलप्य गिरिसानुनि चितां प्रत्यारोपयत् ॥२१॥ ततस्तत्कालोचितं कर्म विधाय, विहितस्नाना सा भर्तुरुदकं दत्वा, त्रिदशान् नत्वा, भर्तृपादौ ध्यायती सती प्रदक्षिणीकृत्य वह्निना प्रज्वलितां चितां विवेश॥२२॥ वीरवरं पतिमनुगतां साध्वीमर्चिषं विलोक्य सहस्रशो देववध्वस्तां तुष्टुवुः॥२३॥ तस्मिन् मन्दराचलशिखरे पुष्पवर्षां कुर्वन्त्यस्ता देवदुन्दुभ्यादिषु नदत्सु सत्सु परस्परमभाषन्त॥२४॥ *देव्य ऊचुः* – इयमर्चिः धन्या, या राजराजं पतिं यज्ञेशं भगवन्तं श्रीरिव सर्वात्मना भेजे॥२५॥

सैषा नूनं व्रजत्यूर्ध्वमनु वैन्यं पतिं सती। पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा
।।२६।। तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदम्। भुवि लोलायुषो ये वै नैष्कर्म्यं
साधयन्त्युत।।२७।। स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि। लब्ध्वापवर्ग्यं
मानुष्यं विषयेषु विषज्जते।।२८।। *मैत्रेय उवाच* – स्तुवतीष्वमरस्त्रीषु पतिलोकं
गता वधूः। यं वा आत्मविदां धुर्यो वैन्यः प्रापाच्युताश्रयम्।।२९।। इत्थंभूता-
नुभावोऽसौ पृथुः स भगवत्तमः। कीर्तितं तस्य चरितमुद्दामचरितस्य ते।।३०।। य
इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत्। श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात्
।।३१।। ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः। विट्पतिस्तु भवेद्वैश्यः शूद्र
उत्तमतां लभेत्।।३२।। त्रिःकृत्व इदमाकर्ण्य नरो नार्यथवाऽऽदृता। अप्रजः
सुप्रजतमो निर्धनो धनवत्तमः। अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः।।३३।।
इदं स्वस्त्ययनं पुंसाममङ्गल्यनिवारणम्। धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहम्
।।३४।। धर्मार्थकाममोक्षाणां सम्यक् सिद्धिमभीप्सुभिः।

।। सङ्ग्रहोक्तिः ।।

एषाऽर्चिः नभस्थानस्मानतीत्य दुर्विभाव्येन पातिवृत्येन कर्मणा पतिं पृथुमनुसृत्योर्ध्वं व्रजति,
नूनं पश्यत।।२६।। भगवत्प्राप्तिसाधनं नैष्कर्म्यं ते चञ्चलायुषोऽपि भुवि साधयन्ति, तेषां
भक्तजनानां दुरापं किमुत? न किञ्चित्।।२७।। मोक्षसाधनरूपं मनुष्यजन्म कृच्छ्रेण भुवि
लब्ध्वाऽपि यो मायिकविषयेषु विषज्जते स आत्मद्रोही कथ्यते।।२८।। मैत्रेय उवाच – इत्थं
सुरस्त्रीषु स्तुवतीषु सतीषु पृथुर्भगवतो निवासस्थानं यं वैकुण्ठं प्राप तं पतिलोकं साऽर्चिरपि
प्राप्ता।।२९।। भागवतोत्तमः पृथुरुक्तविधपराक्रमोऽभूत्, अत्युत्तमचरित्रस्य तस्य पृथोश्चरित्रं
ते मया कथितम्।।३०।। यः पुमान् सुमहत्पुण्यं पृथुचरितं समाहितचित्तः सन् श्रद्धया पठेत्
शृणुयात् श्रावयेद्वा स पृथोः गतिं प्राप्नुयात्।।३१।। एतच्छृण्वन् ब्राह्मण ब्रह्मतेजोयुक्तो भवेत्,
क्षत्रियो जगतीपतिः स्यात्, वैश्यः सर्ववैश्यानां पतिः स्यात्, शूद्रो स्वसजातीयेषु मुख्यतां
लभेत्।।३२।। सादरो नरः सादरा नारी च त्रिवारं पृथुचरित्रमाकर्ण्य योऽप्रजः स सुप्रजो
भवेत्, निर्धनो धनवत्तमः, अस्पष्टकीर्त्तिर्विपुलकीर्त्तिः, मूर्खो पण्डितश्च भवति।।३३।।इदं

श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परम् ।।३५।। विजयाभिमुखो राजा श्रुत्वैतदभियाति यान्। बलिं तस्मै हरन्त्यन्ये राजानः पृथवे यथा ।।३६ ।। मुक्तान्यसङ्गो भगवत्यमलां भक्तिमुद्वहन्। वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत्पठेत् ।।३७।। वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकम्। अस्मिन् कृतमतिर्मर्त्यः पार्थवीं गतिमाप्नुयात् ।।३८।। अनुदिनमिदमादरेण शृण्वन् पृथुचरितं प्रथयन् विमुक्तसङ्गः। भगवति भवसिन्धु-पोतपादे स च निपुणां लभते रतिं मनुष्यः।।३९।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे त्रयोविंशोऽध्यायः।।२३।।

।। सङ्ग्रहोक्तिः।।

पृथ्वाख्यानं श्रुतं सत् पुंसां स्वस्त्ययनम्, अमङ्गलतानिवारकं, धन्यं, यशस्करम्, आयुष्यं, स्वर्ग्यं, कलिमलापहं च भवति।।३४।। धर्मार्थकाममोक्षाणां सम्यक् सिद्धिमभीप्सुभिः पुंभिर्धर्मादिचतुर्णां कारणमेतत् पृथुचरित्रं श्रद्धयाऽनुश्राव्यम्।।३५।। एतच्चरित्रं श्रुत्वा राजा विजयाभिमुखः सन् यान् अभियाति तेऽन्ये च राजानः पृथवे यथा तथा बलिं हरति।।३६।। अन्यफलासक्तिं विहाय निष्कामः पुमान् यदि वैन्यस्य चरितं शृणयात् श्रावयेत् पठेद्वा स भगवत्यचलां भक्तिं प्राप्नोति।।३७।। हे विदुर! भगवन्माहात्म्यसूचकमेतत् पृथुचरित्रं तुभ्यं कथितम्, अस्मिन् चरित्रे स्थापितचित्तः पुमान् पृथुना लब्धां गतिमाप्नुयात्।।३८।। यः पुमान् आदरेणाऽनुदिनं पृथुचरितं शृण्वन्, प्रकथयन्, कीर्त्तयन् सन्नपि स यदि त्यक्तान्यफलाशः स्यात्तर्हि भवसागरनौकारूपे भगवच्चरणकमले नितरां प्रीतिं लभते।।३९।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां त्रयोविंशोऽध्यायः।।२३।।

अथ चतुर्विंशोऽध्यायः ।।२४।।

मैत्रेय उवाच - विजिताश्वोऽधिराजाऽऽसीत्पृथुपुत्रः पृथुश्रवाः। यवीयोभ्योऽददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः।।१।। हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणाम्। प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः।।२।। अन्तर्धानगतिं शक्राल्लब्ध्वान्तर्धानसंज्ञितः। अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम्।।३।। पावकः पवमानश्च शुचिरित्यग्नयः पुरा। वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः।।४।। अन्तर्धानो नभस्वत्यां हविर्धानमविन्दत। य इन्द्रमश्वहर्तारं विद्वानपि न जघ्निवान्।।५।। राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणाम्। मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह।।६।। तत्रापि हंसं पुरुषं परमात्मानमात्मदृक्। यजंस्तल्लोकतामाप कुशलेन समाधिना।।७।। हविर्धानाद्धविर्धानी विदुरासूत षट् सुतान्। बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ चतुर्विंशोऽध्यायः ।।२४।।

प्रचेतसां जन्म रुद्रगीतं च

मैत्रेय उवाच - विपुलकीर्त्तिः पृथुपुत्रो विजिताश्वः पृथिव्याः पतिरासीत्, भ्रातुवत्सलः स स्वकनिष्ठेभ्यो भ्रातृभ्यो दिश अदात्।।१।। हर्यक्षाय प्राचीं,धूम्रकेशाय दक्षिणां, वृकसंज्ञाय पश्चिमां, द्रविणसंज्ञाय चोत्तरां दिशमादिशत्।।२।। विजिताश्वः शक्राद् अन्तर्धानगतिं लब्ध्वा अन्तर्धानसंज्ञोऽभूत्; सोऽन्तर्धानः पत्न्यां शिखण्डिन्यां स्वसंमतानि त्रीण्यपत्यान्युत्पादयामास ।।३।। पुरा वसिष्ठशापात् त्रयोऽग्नयः पावकः, पवमानः, शुचिः, इति नामभिः जातास्ते पुनरग्नित्वं प्राप्ताः।।४।। अन्तर्धानः स्वपन्त्यां नभस्वत्यां हविर्धानं पुत्रं लेभे, यः स्वपितुः यज्ञीयाश्वहर्तारमिन्द्रं जानन्नपि तं न जघ्निवान्।।५।। राज्ञां वृत्तिं करादान-दण्ड-शुल्कादिभिर्दारुणां मन्यमानो हविर्धानस्तां वृत्तिं दीर्घसत्रव्याजेन विससर्ज।।६।।तत्र दीर्घसत्रेऽपि परमपुरुषं परमात्मानं यजन् स तत्सुकृतेन चित्तैकाग्र्येण च भगवल्लोकं प्रापः।।७।। हे विदुर! हविर्धानात् तद्भार्या हविर्धानी बर्हिषदं, गयं, शुक्लं, कृष्णं, सत्यं, जितव्रतं, एतान् -

बर्हिषत् सुमहाभागो हाविर्धानिः प्रजापतिः। क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह ॥९॥ यस्येदं देवयजनमनु यज्ञं वितन्वतः। प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम् ॥१०॥ सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम्। यां वीक्ष्य चारुसर्वाङ्गीं किशोरीं सुष्ठ्वलङ्कृताम्। परिक्रमन्तीमुद्वाहे चकमेऽग्निः शुकीमिव ॥११॥ विबुधासुरगन्धर्वमुनिसिद्धनरोरगाः। विजिताः सूर्यया दिक्षु क्वणयन्त्यैव नूपुरैः ॥१२॥ प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन्। तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः ॥१३॥ पित्राऽदिष्टाः प्रजासर्गे तपसे वनमाविशमन्। दशवर्षसहस्राणि तपसाऽऽर्चंस्तपस्पतिम् ॥१४॥ यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता। तद्ध्यायन्तो जपन्तश्च पूजयन्तश्च संयताः ॥१५॥ *विदुर उवाच* - प्रचेतसां गिरित्रेण यथाऽऽसीत्पथि सङ्गमः। यदुताह हरः प्रीतस्तन्नो ब्रह्मन् वदार्थवत् ॥१६॥ सङ्गमः खलु विप्रर्षे शिवेनेह शरीरिणाम्। दुर्लभो मुनयो दध्युरसङ्गाद्यमभीप्सितम् ॥१७॥

॥ सङ्ग्रहोक्तिः ॥

षट् सूतान् असूत ॥८॥ महाभागः हविर्धान्याः पुत्रो बर्हिषद् प्रजापतिः सन्नपि क्रियाकाण्डेषु योगेषु च निष्णातोऽभूत् ॥९॥ देवयजनं लक्ष्यीकृत्य यज्ञं वितन्वतः, यत्रैको यज्ञः कृतः तत्समीपदेशे पुनर्यज्ञान्तरं कुर्वतः, यस्य प्राचीनाग्रैः कुशैः इदं सकलं भूतलमास्तृतमासीत्, अत एवाऽयं प्राचीनबर्हिष् इत्युच्यते ॥१०॥ प्राचीनबर्हिष् ब्रह्मणाऽऽदिष्टां समुद्रपुत्रीं शतद्रुतिमुपयेमे, किशोरीं चारुसर्वाङ्गीं समलङ्कृतामुद्वाहेऽग्निं परिक्रमन्तीं यां वीक्ष्याऽग्निः शुकीमिव चकमे ॥११॥ नवोढया नूपुरैर्दिक्षु क्वणन्त्या यया विबुधासुरगन्धर्वा मुनिसिद्धनरोरगाश्च संमोहिता आसन् ॥१२॥ प्राचीनबर्हिषः सकाशात् शतद्रुत्यां दश पुत्रा अभवन्, तुल्यनामव्रता धर्मपरायणाः सर्वेऽपि ते प्रचेतस आसन् ॥१३॥ प्रजासर्गनिमित्तं तपश्चर्तुं पित्राऽऽदिष्टाः सन्तो वनमाविशन्, दशवर्षसाहस्रपर्यन्तं तपसा भगवन्तमर्चयामासुः ॥१४॥ मार्गे दृष्टेन प्रसीदता शिवेन यदुक्तं तद्ध्यायन्तः संयताः जपन्तः पूजयन्तश्च तपस्तेपुः ॥१५॥ *विदुर उवाच* - हे ब्रह्मन्! प्रचेतसां शिवेन सह पथि समागमः यथाऽभवत्, किंच शिवः प्रीतः सन् यत् प्राह, तदपि नो यथार्थं वद ॥१६॥ हे विप्रर्षे! इह संसारे शरीरिणां शिवेन सह संगमो दुर्लभः खलु,

आत्मारामोऽपि यस्त्वस्य दीनलोकस्य राधसे। शक्त्या युक्तो विचरति घोरया भगवान् भवः।।१८।। *मैत्रेय उवाच* – प्रचेतसः पितुर्वाक्यं शिरसाऽऽदाय साधवः। दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः।।१९।। समुद्रमुप विस्तीर्णमपश्यन् सुमहत्सरः। महन्मन इव स्वच्छं प्रसन्नसलिलाशयम्।।२०।। नीलरक्तोत्पलाम्भोजकह्लारेन्दीवराकरम्। हंससारसचक्राह्वकारण्डवनिकूजितम्।।२१।। मत्तभ्रमरसौस्वर्यहृष्टरोमलताङ्घ्रिपम्। पद्मकोशरजो दिक्षु विक्षिपत् पवनोत्सवम्।।२२।। तत्र गान्धर्वमाकर्ण्य दिव्यमार्गमनोहरम्। विसिस्म्यू राजपुत्रास्ते मृदङ्गपणवान्वितम्।।२३।। तर्ह्येव सरसस्तस्मान्निष्क्रामन्तं सहानुगम्। उपगीयमानममरप्रवरं विबुधानुगैः।।२४।। तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम्। प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः।।२५।। स तान् प्रपन्नार्तिहरो भगवान् भक्तवत्सलः। धर्मज्ञान् शीलसन्पन्नान् प्रीतः प्रीतानुवाच ह।।२६।। *श्रीरुद्र उवाच* – यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम्। अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम्।।२७।।

।। सङ्ग्रहोक्तिः।।

अभीप्सितं यं पातुं मुनयो विषयान्तरसङ्गं त्यक्त्वा केवलं दध्युरेव, न तु साक्षात् प्रापुः।।१७।। यः शिवः आत्मारामोऽपि दीनाननुग्रहीतुं स्त्रिया सह घोरया मूर्त्या विचरति।।१८।। *मैत्रेय उवाच* – साधुतोपेताः प्रचेतसः पितुर्वचनं शिरस्याधाय तपस्यादृतचेतसः सन्तः प्रतीचीं दिशं ययुः।।१९।। समुद्रसमीपे विस्तीर्णं ज्ञानिनामन्तःकरणमिव स्वच्छं प्रसन्नसलिलाशयं सुमहत् सरोऽपश्यन्।।२०।। तत् सरो नीलोत्पल-रक्तोत्पला-ऽम्भोजप्रचुरं, हंस-सारस-चक्रवाक-करण्डवादिपक्षिभिर्निकूजितमासीत्।।२१।। तत्र मत्तभृङ्गगुञ्जितेन लतास्तरवश्च हृष्टा रोमाञ्चिताश्चाऽभवन्, तत्र पणवान्वितं, स्वरतालमनोहरं गानमाकर्ण्य ते राजपुत्रा विस्मयं प्राप्ताः।।२३।। तदैव तस्मात् सरसो निष्क्रामन्तं सहानुगं, गन्धर्वकिन्नराद्यैरुपगीयमानं, देवश्रेष्ठं, तप्तहेमसमकान्तिं, नीलकण्ठं प्रसादसुमुखं, त्रिलोचनं, शिवं विलोक्य संजातहर्षास्ते प्रचेतसः प्रणेमुः।।२४-२५।। प्रणतार्तिहरो भक्तवत्सलो भगवान् शिवो धर्मज्ञान् शीलसम्पन्नान् प्रीतान् प्रचेतसः प्रति प्राह।।२६।। *रुद्र उवाच* – हे प्रचेतसः! यूयं प्राचीनबर्हिषः

यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात्। भगवन्तं वासुदेवं प्रपन्नः स प्रियो हि मे॥२८॥ स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततः परं हि माम्। अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये॥२९॥ अथ भागवता यूयं प्रियाः स्थ भगवान् यथा। न मद्भागवतानां च प्रेयानन्योऽस्ति कश्चन॥३०॥ इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम्। निःश्रेसकरं चापि श्रूयतां तद्वदामि वः॥३१॥ *मैत्रेय उवाच* - इत्यनुक्रोशहृदयो भगवानाह तान् शिवः। बद्धाञ्जलीन् राजपुत्रान् नारायणपरो वचः॥३२॥ *श्रीरुद्र उवाच* - जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे। भवता राधसा राद्धं सर्वस्मा आत्मने नमः॥३३॥ नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने। वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे॥३४॥ सङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च। नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने॥३५॥ नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने।

॥ सङ्ग्रहोक्तिः॥

पुत्राः स्थ, युष्माकं चिकीर्षितं तत् मया विदितम्, युष्माकमनुग्रहाय मयैवं दर्शनं कारितम्, भवतां भद्रं स्तात्॥२७॥ यः प्रधानात् क्षेत्रज्ञाच्च परं भगवन्तं वासुदेवं प्रपन्नः स मे प्रियो भवति॥२८॥ स्वधर्मनिष्ठः पुमान् शतजन्मभिर्विरिञ्चितामेति, ततः परं स मामेति, भागवतस्तु देहान्तेऽतीन्द्रियं वैष्णवं पदमेति, देवा अहं च स्वस्वाधिकारान्ते वैष्णवं पदं यामः॥२९॥ हे प्रचेतसः! यूयं भगवद्भक्ताः स्थ, अतो यथा भगवान् मम प्रियस्तथा यूयमपि प्रियाः, मम भागवतेभ्योऽन्यः कश्चिदपि प्रेयान्नास्ति॥३०॥ इदं परमात्मस्वरूपविवेककरमत एव पवित्रं मङ्गलं निःश्रेयसकरं परं यज्जप्तव्यं, तद् वो वदामि, श्रूयताम्॥३१॥ *मैत्रेय उवाच* - एवं कृपायुक्तमानसो नारायणपरः स शिवो बद्धाञ्जलीन् तान् राजपुत्रान् प्रति वचः प्राह॥३२॥ *रुद्र उवाच* - हे आत्मविद्धुर्य! तव जितमात्मविदां सुखायाऽस्ति, परमान्दरूपेण चिदचिदन्तरात्मतया स्थिताय सर्वरूपाय परमेश्वराय तुभ्यं नमः॥३३॥ कमलनाभाय भूतसूक्ष्मेन्द्रियाणामाश्रयाय, निर्विकाराय शान्ताय स्वयंप्रकाशाय वासुदेवाय तुभ्यं नमः॥३४॥ संकर्षणाय, सूक्ष्मायाऽन्तरहिताय, लोकविनाशकाय, विश्वप्रबोधाय, प्रद्युम्नाय, अन्तरात्मने तुभ्यं नमः॥३५॥

नमः परमहंसाय पूर्णाय निर्वृतात्मने ।।३६।। स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः। नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे ।।३७।। नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे। वृत्तिदाय च जीवानां नमः सर्वरसात्मने ।।३८।। सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे। नमस्त्रैलोक्यपालाय सह ओजोबलाय च ।।३९।। अर्थलिङ्गाय नभसे नमोऽन्तर्बहिरात्मने। नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ।।४०।। प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे। नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च ।।४१।। नमस्त आशिषामीश मनवे कारणात्मने। नमो धर्माय बृहते कृष्णायाकुण्ठमेधसे। पुरुषाय पुराणाय सांख्ययोगेश्वराय च ।।४२।। शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने। चेत आकूतिरूपाय नमो वाचोविभूतये ।।४३।। दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम्। रूपं प्रियतमं स्वानां सर्वेन्द्रियगुणाञ्जनम् ।।४४।। स्निग्धप्रावृड्घनश्यामं सर्वसौन्दर्य-संग्रहम्। चार्वायतचतुर्बाहुं सुजातरुचिराननम् ।।४५।। पद्मकोशपलाशाक्षं सुन्दरभ्रु सुनासिकम्। सुद्विजं सुकपोलास्यं समकर्णविभूषणम् ।।४६।।

।। सङ्ग्रहोक्तिः ।।

हृषीकेशायाऽनिरुद्धाय, परमहंसाय, पूर्णाय, शोकरहिताय तुभ्यं नमः ।।३६।। स्वर्गापवर्गद्वाराय, शुचिषदे, हिरण्यवीर्याय, चातुर्होत्रे, यज्ञाय, तुभ्यं नमः ।।३७।। पितृणां देवानां चान्नरूपाय, सोमाय, जीवानां वृत्तिदाय, सर्वरसरूपाय तुभ्यं नमः ।।३८।। सर्वेषां प्राणिनां देहाय, धरणीरूपाय विराड्रूपाय. त्रैलोक्यपालाय सहओजोबलाय च तुभ्यं नमः ।।३९।। अर्थलिङ्गाय, अन्तर्बहिरात्मने, पुण्यलोकाय, ज्ञानप्रचुरजीवरूपाय तुभ्यं नमः ।।४०।। प्रवृत्ताय, निवृत्ताय, पितृदेवशरीराय, धर्मविपाकाय, दुःखदाय मृत्यवे, तुभ्यं नमः ।।४१।। धर्मादीनां कारणाय, सर्वज्ञाय, धर्मरूपाय ब्रह्मणे कृष्णाय, अप्रतिहतज्ञानाय तुभ्यं नमः ।।४२।। पुराणपुरुषाय, सांख्ययोगेश्वराय, शक्तित्रयसमेताय, पर्जन्यरूपाय, अहं-तत्त्वात्मने, चेत आकृतिरूपाय, वाचो विभूतये च तुभ्यं नमः ।।४३।। भागवतैरर्चितं रूपं दिदृक्षूणां नो दर्शनं देहि, यत् स्वभक्तानां प्रियतमं सर्वेन्द्रियगुणाभिव्यञ्जकं च स्यात् ।।४४।। सुन्दरप्रावृड्घनश्यामं सर्वसौन्दर्यसंग्रहं, रम्यदीर्घचतुर्भुजं सुकुमाररुचिराननं पद्मकोशपलाशाक्षं सुन्दरभ्रु, सुनासिकं सुकपोलं सुद्विजं

प्रीतिप्रहसितापाङ्गमलकैरुपशोभितम्। लसत्पङ्कजकिञ्जल्कदुकूलं मृष्ट-
कुण्डलम्।।४७।। स्फुरत्किरीटवलयहारनूपुरमेखलम्। शङ्खचक्रगदापद्ममाला-
मण्युत्तमर्द्धिमत्।।४८।। सिंहस्कन्धत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम्। श्रियानपायिन्या
क्षिप्तनिकषाश्मोरसोल्लसत्।।४९।। पूररेचकसंविग्नवलिवल्गुदलोदरम्। प्रति-
संक्रामयद्विश्वं नाभ्याऽवर्तगभीरया।।५०।। श्यामश्रोण्याधिरोचिष्णुदुकूलस्वर्ण-
मेखलम्। समचार्वङ्घ्रिजङ्घोरुनिम्नजानुसुदर्शनम्।।५१।। पदा शरत्पद्मपलाश-
रोचिषा नखद्युभिर्नोऽऽन्तरघं विधुन्वता। प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो
मार्गगुरुस्तमोजुषाम्।।५२।। एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सताम्। यद्भक्तियोगो-
ऽभयदः स्वधर्ममनुतिष्ठताम्।।५३।। भवान् भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम्।
स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः।।५४।। तं दुराराध्यमाराध्य सतामपि
दुरापया। एकान्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः।।५५।। यत्र निर्विष्टमरणं
कृतान्तो नाभिमन्यते। विश्वं विध्वंसयन् वीर्यशौर्यविस्फूर्जितभ्रुवा।।५६।।

।। सङ्ग्रहोक्तिः।।

समकर्णविभूषणं।।४५-४६।। प्रसन्नहास्यापाङ्गं रम्यालकैरुपशोभितं, लसत्पङ्कज-
किञ्जल्कदुकूलं, मृष्टकुण्डलं ।।४७।। स्फुरत्किरीटवलयहारनूपुरमेखलं, शंख-चक्र-गदा-
पद्म-माला-मणिविमण्डितम् ।।४८।। सिंहस्कन्धं, सुभगग्रीवकौस्तुभं, श्रिया विराजमानवक्षसं
।।४९।। रेचकपूरकचपलवलिवल्गुदलोदरम् आवर्तगम्भीरया नाभ्या विश्वं प्रतिसंक्रामयदिव
।।५०।। श्यामश्रोणिधृतपीताम्बरोपरि स्वर्णमेखलाधारिणम् समानसुन्दरोरुजानुजघनचरणम्
।।५१।। नखमणिद्युतिभिर्नोऽन्तरघमपनयता शरत्पद्मपलाशरोचिषा चरणेन निरस्तभयं स्वीयं
स्वरूपं नो दर्शय, हे गुरो! त्वमज्ञानिनां मार्गप्रदर्शको गुरुरसि।।५२।। आत्मशुद्धिं कामयमानानां
कृते भवत एतद्रूपं नित्यं ध्येयमस्ति, स्वधर्मे स्थितानां नृणां भक्तियोगो निर्भयताप्रदायकोऽस्ति
।।५३।। सर्वदेहिनां दुर्लभो भवान् भक्तियोगमता लभ्योऽस्ति, भक्तियोगनिष्ठानां प्राप्यस्त्वं
स्वाराज्यादपि स्पृहणीयोऽसि।।५४।। दुराराध्यं भवन्तं सतां दुरापयैकान्तभक्त्या समाराध्य
त्वत्पादमूलं विना स्वर्गादिसुखं को वाञ्छेत?।।५५।।

क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम्। भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः।।५७।। अथानघाङ्घ्रेस्तव कीर्तितीर्थयोरन्तर्बहिःस्नानविधूतपाप्मनाम्। भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्सङ्गमोऽनुग्रह एष नस्तव।।५८।। न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत्। यद्भक्तियोगानुगृहीतमञ्जसा मुनिर्विचष्टे ननु तत्र ते गतिम्।।५९।। यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत्। तत् त्वं ब्रह्म परंज्योतिराकाशमिव विस्तृतम् ।।६०।। यो माययेदं पुरुरूपयासृजद् बिभर्ति भूयः क्षपयत्यविक्रियः। यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतन्त्रं भगवन् प्रतीमहि।।६१।। क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये। भूतेन्द्रियान्तः करणोपलक्षणं वेदे च तन्त्रे च त एव कोविदाः।।६२।। त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्त्वतमो विभिद्यते। महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः।।६३।।

।। सङ्ग्रहोक्तिः ।।

भवत्पादमूलशरणं प्राप्तं जनं वीर्यशौर्यविस्फूर्जिभ्रुवा विश्वं विध्वंसयन् कालोऽपि "मयाऽयं वशीकृतः" इति नाभिमन्यते।।५६।। भगवद्भक्तानां समागमः क्षणार्धमपि जातश्चेत् तर्हि तत् समागमक्षणार्धेन स्वर्गं कैवल्यं वा न तुलये, तदा मर्त्यानामाशीर्विषयपुत्रपश्वादीनि किमु?।।५७।। निर्मलचरणस्य तव संकीर्त्तनादिना बाह्याभ्यन्तरशुद्धानां दयासौशील्यादिसंपन्नानां त्वद्भक्तानां समागम एव अस्मदुपरि ते महाननुग्रहोऽस्ति।।५८।। त्वद्भक्तियोगानुगृहीतं यस्य चित्तं बाह्यविषयेषु भ्रान्तिमन्न भवति, एवं च तमोगुहायां नाविशेत् तदा स मुनिस्त्वत्स्वरूपं सुखेन जानाति।।५९।। इदं दृश्यमानं चिदचिदात्मकं विश्वं यस्मिन्नाधारभूते त्वयि दृश्यते, एवं च त्वमपि कृत्स्नेऽस्मिन् जगति नियामकतयाऽवभाससे, तदेव स्वप्रकाशं परं तत्त्वं आकाशमिव निर्लेपं वर्तते।।६०।। यो भगवान् इदं विश्वं बहुरूपया स्वशक्त्यात्मिकया प्रकृत्या सृजन्, बिभर्त्ति पुनः क्षपयति तथाऽपि अविक्रियो वर्तते, तमात्त्मतत्त्वं परमेश्वरं वयं प्रपद्यामहे।।६१।। कर्मयोगिनः श्रद्धान्विताः सन्तोऽनभिसंहितफलैः क्रियासमूहै भूतेन्द्रियान्तःकरणोपलक्षणं भगवत्स्वरूपं सिद्धये यजन्ति, ते वेदे तन्त्रशास्त्रे च कुशला सन्ति।।६२।।

सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन। अथो विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते हृषीकैर्मधु सारघं यः।।६४।। स एष लोकानतिचण्डवेगो विकर्षसि त्वं खलु कालयानः। भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविषह्यः ।।६५।। प्रमत्तमुच्चैरितिकृत्यचिन्तया प्रकृष्टलोभं विषयेषु लालसम्। त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः।।६६।। कस्त्वत्पदाब्जं विजहाति पण्डितो यस्तेऽवमानव्ययमानकेतनः। विशङ्कयास्मद्गुरुरर्चति स्म यद् विनोपपत्तिं मनवश्चतुर्दश।।६७।। अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चिताम्। विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः।।६८।। इदं जपत भद्रं वो विस्रब्धा नृपनन्दनाः। स्वधर्ममनुष्ठिन्तो भगवत्यर्पिताशयाः।।६९।। तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम्। पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद्धरिम् ।।७०।।

।। सङ्ग्रहोक्तिः।।

सृष्टेः पूर्वं स्वस्मिन्नुपहृत-चिदचिदेवैकः कारणतया वर्तमानः जीवद्वारा मायामनुप्रविश्य तच्छरीरकं स्वात्मानं संकल्पमात्रेण महदादिपृथिव्यन्तसमष्टिरूपेण देवादिव्यष्टिरूपेण च परिणमय्य तन्नामरूपभागासीत्।।६३।। यो भगवान् स्वशक्त्या सृष्टमिदं चतुर्विधं शरीरं स्वांशभूतजीवद्वाराऽनुप्रविष्टः, तमनुप्रविष्टं पुरुषं कथयन्ति, तत्र यो जीवः स इन्द्रियैः मधुवत्क्षुल्लकं विषयसुखं भुङ्क्ते।।६४।। एष भगवान् कालशरीरकोऽतिचण्डवेगोऽलक्ष्य-स्वरूपोऽविषह्यो वायुर्घनावलीरिव भूतैर्भूतानि पीडयन् लोकान् संहरति।।६५।।इति कृत्यचिन्तया प्रमत्तं प्रकृष्टलोभं विषयलालसं जनमप्रमत्तः कालरूपो भवान् क्षुल्लेलिहानो-ऽहिराखुमिव सहसा प्राप्नोति।।६६।। यस्त्वत्परिचर्यां विना स्वशरीरमपि वृथा मन्यते स बुद्धिमान् भवति, अतः त्वत्पदाब्जं को बुद्धिमान् जहाति? न कोऽपि, अतोऽस्मद्गुरुर्ब्रह्मा निःशङ्कतयाऽऽकल्पं त्वत्पादपद्ममर्चति ।।६७।। हे परमात्मन्! निखिलं जगद् त्वदात्मकरुद्रस्य भयात् नष्टप्रायमेवाऽस्ति, अतो विपश्चितां नोऽकुतोभयं त्वमेव शरणमसि।।६८।। एवं प्रचेतोभ्य-स्तोत्रमुपदिश्य, तदर्थे तान् रोचयन् रुद्र आह – हे नृपनन्दनाः! विस्रब्धाः स्वधर्ममनुतिष्ठन्तो भगवत्यर्पितान्तःकरणाः यूयमिदं स्तोत्रं जपत, तेन वो भद्रं भविता।।६९।।

योगादेशमुपासाद्य धारयन्तो मुनिव्रताः। समाहितधियः सर्व एतदभ्यसतादृताः।।७१।।
इदमाह पुरास्माकं भगवान् विश्वसृक्पतिः। भृग्वादीनामात्मजानां सिसृक्षुः
संसिसृक्षताम्।।७२।। ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः। अनेन ध्वस्ततमसः
सिसृक्ष्मो विविधाः प्रजाः।।७३।। अथेदं नित्यदा युक्तो जपन्नवहितः पुमान्।
अचिराच्छ्रेय आप्नोति वासुदेवपरायणः।।७४।। श्रेसामिह सर्वेषां ज्ञानं निःश्रेयसं
परम्। सुखं तरति दुष्पारं ज्ञानिनो व्यसनार्णवम् ।।७५।। य इमं श्रद्धया युक्तो
मद्गीतं भगवत्स्तवम्। अधीयानो दुराराध्यं हरिमाराधयत्यसौ।।७६।। विन्दते
पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरम्। मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात्।।७७।।
इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः। शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते
कर्मबन्धनैः।।७८।। गीतं मयेदं नरदेवनन्दनाः परस्य पुंसः परमात्मनः स्तवम्।
जपन्त एकाग्रधियस्तपो महच्चरध्वमन्ते तत आप्स्यथेप्सितम्।।७९।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे चतुर्विंशोऽध्यायः।।२४।।

।। सङ्ग्रहोक्तिः ।।

असकृद्धरिं ध्यायन्तः स्तुवन्तः सन्तः सर्वभूतेष्ववस्थितमात्मस्थमेव हरिं पूजयध्वम्।।७०।।
यूयं सर्वे योगादेशसंज्ञमेतत्स्तोत्रं पाठतः प्राप्य मनसा धारयन्तः समाहितचित्ता मुनिव्रता
आदृताः सन्तस्तमभ्यसत।।७१।।पुरा सिसृक्षुः प्रजापतिर्ब्रह्मा सिसृक्षतां भृग्वादीनामस्माकमिदं
स्तोत्रमाह।।७२।। ते वयं सर्वे प्रजासर्गे प्रेरिताः सन्तोऽनेन स्तोत्रेण प्राप्तज्ञानाः विविधाः
प्रजाः सृष्टवन्तः।।७३।। अतो हेतोः समाहितचित्तः पुमान् वासुदेवपरायणं एकाग्रचित्त इदं
जपन् सन्नचिरात् स्वसमीहितमाप्नोति।।७४।। सर्वेषां श्रेयसां मध्ये भगवद्भक्त्यात्मकं ज्ञानं
नितरां श्रेयोरूपं स्मृतम्, यतो ज्ञानिनो दुष्पारं व्यसनार्णवं सुखेन तरन्ति।।७५।। यः पुमान्
मद्गीतमिमं स्तोत्रं श्रद्धयाऽधियानः सन् दुराराध्यं हरिमाराधयति स भक्तिं लभते।।७६।।
पुरुषो मदुक्तस्तोत्रगानेन सुप्रीतात् परमपुरुषाद् यद् यद् श्रेय इच्छति स स्थिरः सन् तत्सर्वं
विन्दते।।७७।। यः पुमान् प्रातरुत्थाय प्राञ्जलिः श्रद्धयाऽन्वितः सन्निमं स्तोत्रं शृणुयात्

अथ पञ्चविंशोऽध्यायः ।।२५।।

मैत्रेय उवाच – इति सन्दिश्य भगवान् बार्हिषदैरभिपूजितः। पश्यतां राजपुत्राणां तत्रैवान्तर्दधे हरः।।१।। रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः जपन्तस्ते तपस्तेपुर्वर्षाणामयुतं जले ।।२।। प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम्। नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ।।३।। *नारद उवाच* – श्रेयस्त्वं कतमद्राजन् कर्मणात्मन ईहसे। दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते।।४।।*राजोवाच* – न जानामि महाभाग परं कर्मापविद्धधीः। ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः।।५।। गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः। न परं विन्दते मूढो भ्राम्यन् संसारवर्त्मसु।।६ ।।

।। सङ्ग्रहोक्तिः ।।

श्रावयेद् वा स सकलैः कर्मबन्धनैः विमुच्यते ।।७८ ।। हे नृपनन्दनाः! मया कथितं सर्वान्तरात्मनः श्रीहरेः परमिमं स्तवमेकाग्रबुद्ध्या जपन्तः सन्तः महत् तपश्चरध्वं, तपसोऽन्ते-ऽभीप्सितं प्राप्स्यथ।।७९।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां चतुर्विंशोऽध्यायः।।२४।।

अथ पञ्चविंशोऽध्यायः ।।२५।।

प्राचीनबर्हिषे नारदोपदेशः पुरञ्जनकथा च

मैत्रेय उवाच – इति योगादेशसंज्ञं स्तोत्रमुपदिश्य भगवान् रुद्रः प्रचेतोभिः पूजितः सन् राजपुत्राणां पश्यतां सतां तत्रैवाऽन्तर्दधे ।।१।। ततः सर्वे प्रचेतसो दशसहस्रवर्षपर्यन्तं रुद्रगीतं भगवत्स्तोत्रं जपन्तः सन्तः जले तपस्तेपुः।।२।। हे विदुर! ततोऽध्यात्मतत्त्वज्ञो दयालुर्नारद आगत्य कर्मस्वासक्तमानसं प्राचीनबर्हिषं प्रत्यबोधयत् ।।३ ।। *नारद उवाच* – हे राजन्! त्वं यज्ञादिकर्मणा स्वस्मै कतमत् श्रेय इच्छसि, दुःखहानिः सुखावाप्तिश्च श्रेयश्चेत्, तर्हि तदुभयं केवलकर्मणा न साध्यते ।।४।। *राजोवाच* – हे महाभाग! कर्मभिर्विक्षिप्तबुद्धिरहं परं श्रेयो न जानामि, ततस्त्वं मे विमलं ज्ञानमुपदिश, येनाहं कर्मभिर्मुच्येय ।।५ ।।

नारद उवाच – भोः भोः प्रजापते राजन् पशून् पश्य त्वयाध्वरे। संज्ञापिताञ्जीवसङ्घान्निर्घृणेन सहस्रशः।।७।। एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव। सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः।।८।। अत्र ते कथयिष्येऽमुमितिहासं पुरातनम्। पुरञ्जनस्य चरितं निबोध गदतो मम।।९।। आसीत्पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः। तस्याविज्ञातनामाऽऽसीत्सखाऽविज्ञातचेष्टितः।।१०।। सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः। नानुरूपं यदाविन्ददभूत्स विमना इव।।११।। कामान् कामयमानोऽसौ तस्य तस्योपपत्तये। न साधु मेने ताः सर्वा यावत्यो भूतले पुरः।।१२।। स एकदा हिमवतो दक्षिणेष्वथ सानुषु। ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणाम्।।१३।। प्राकारोपवनाट्टालपरिखैरक्षतोरणैः। स्वर्णरौप्यायसैः शृङ्गैःसंकुलां सर्वतो गृहैः।।१४।। नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः।

।। सङ्ग्रहोक्तिः।।

कूटधर्मेषु संसारवर्त्मसु गृहेषु भ्राम्यन् पुत्र-दार-धनेषु पुरुषार्थं मन्यमानो मादृशो मूढः परं श्रेयो न विन्दते।।६।। *नारद उवाच* – हे प्रजापते! राजन्! निष्करुणेन त्वयाऽध्वरे मारितान् सहस्रशः पशून् जीवसंघान् पश्य।।७।। हे नृप! एते त्वत्कृतां पीडां स्मरन्तः सन्तः सम्परेतं त्वां संप्रतीक्षन्ते, यदा त्वं मरिष्यसि तदैते पशवः संजातक्रोधाः सन्तोऽयःकूटैः शृङ्गैस्त्वां छेत्स्यन्ति।।८।। अत्र विषये पुरातनं पुरञ्जनस्य चरितमितिहासं ते कथयिष्यामि, तं मत्तोऽवहितमनाः शृणु।।९।। हे राजन्! पुरञ्जननामा (जीवः) कश्चिद् सर्वतः प्रसृतकीर्तिर्नृपो बभूव, तस्याऽविज्ञातनामा (ईश्वरः) सखाऽऽसीत्।।१०।। प्रभुः स पुरञ्जनः पुरं (शरीरं) गवेषयन् भूतले (ब्रह्माण्डे) बभ्राम, यदा स्वानुरूपं पुरं नाऽविन्दत् तदा स उदासीन इवाऽभवत्।।११।। भोगान् भोक्तुकामोऽसौ तस्य भोगस्योपलब्धये भूतले यानि यानि पुराणि (शरीराणि) स ददर्श, तानि सर्वाणि साधु न मेने।।१२।। एवं भ्रमन् स एकदा हिमालयस्य दक्षिणेषु सानुषु (भरतखण्डे) नवभिर्द्वारैः (कर्णौ नेत्रे नासिके मुखं शिश्नं गुदं चेति नव द्वाराणि तैः) समन्वितमेकं पुरं (मनुष्यशरीरम्) ददर्श।।१३।। तत् पुरं प्राकारोपवनाट्टालतोरणैरक्षतोरणैः स्वर्णरूप्यायसैः शृङ्गैः गृहैश्च सर्वतो व्याप्तमासीत्।।१४।।

क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ।।१५।। सभाचत्वररथ्याभिराक्रीडा-
यतनापणैः। चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः।।१६।। पुर्यास्तु बाह्योपवने
दिव्यद्रुमलताकुले। नदद्विहङ्गालिकुलकोलाहलजलाशये।।१७।। हिमनिर्झर-
विप्रुष्मत् कुसुमाकरवायुना। चलत्प्रवालविटपनलिनीतटसम्पदि।।१८।। नानारण्य-
मृगव्रातैरनाबाधे मुनिव्रतैः। आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः।।१९।।
यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम्। भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः
।।२०।। पञ्चशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः। अन्वेषमाणामृषभमप्रौढां काम-
रूपिणीम्।।२१।। सुनासां सुदतीं बालां सुकपोलां वराननाम्। समविन्यस्तकर्णाभ्यां
बिभ्रतीं कुण्डलश्रियम्।।२२।। पिशङ्गनीवीं सुश्रोणीं श्यामां कनकमेखलाम्। पद्भ्यां
क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव।।२३।। स्तनौ व्यञ्जितकैशोरौ समवृत्तौ निरन्तरौ।
वस्त्रान्तेन निगूहन्तीं व्रीडया गजगामिनीम्।।२४।।

।। सङ्ग्रहोक्तिः ।।

नील-स्फटिक-वैदूर्य-मुक्ता-मरकताऽरुणैः क्लृप्तहर्म्यस्थलं भोगवतीमिव श्रिया दीप्तमासीत्
।।१५।। सभा-चत्वर-मार्गैः, क्रीडाङ्गणैरापणैरन्वितं चैत्य-ध्वजा-पताकादिभिरन्वितम्।।१६।।
तत्र पुराद् बहिर्भागे दिव्य-द्रुम-लताभिः संकुलमुपवनं (शब्दादिपञ्चविषयात्मकं) आसीत्,
कूजत्पक्षिगणं भ्रमरकुलगुञ्जितं च पूर्णजलाशयमासीत्।।१७।। हिमनिर्झरपृषतैःशीतेन,
नैकविधकुसुमैः सुगन्धिना वायुना प्रकम्पितवृक्षैः रमणीयमुपवनमभवत्।।१८।। मुनिव्रतैः
नानारण्यमृगव्रातैरबाधिते यत्र कोकिलकूजितैः पान्थः स्वं आहूत इति मन्यते।।१९।। स
तत्रोपवने यदृच्छयाऽऽगतां प्रमदोत्तमां (बुद्धिं) ददर्श, या एकैकशतनायकैर्दशभिः भृत्यैः
(ज्ञान-कर्मेन्द्रियैः) सह समागताऽभवत्।।२०।। सा पञ्चशीर्षाहिना रक्षकेण (पञ्चप्राणैः)
रक्षिता, पतिं (जीवं) कामयमाना तरुणी बभूव।।२१।। सा सुनासा सुदती सुकपोला वरानना
बालाऽभवत्, समविन्यस्तकर्णाभ्यां कुण्डलश्रियं बिभ्राणाऽऽसीत्।।२२।। पिशङ्गनीवी, सुश्रोणी
श्यामा कनकमेखला नूपुरैर्देवता इव क्वणद्भ्यां पद्भ्यां चलन्ती बभौ।।२३।। गजगामिनी सा
व्यञ्जितकैशोरौ समवृत्तौ निरन्तरौ स्तनौ व्रीडया वस्त्रान्तेन निगूहन्ती रेजे।।२४।।

तामाह ललितं वीरः सव्रीडस्मितशोभनाम्। स्निग्धेनापाङ्गपुङ्खेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा।।२५।। *पुरञ्जन उवाच* – का त्वं कञ्जपलाशाक्षि कस्यासीह कुतः सति। इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे।।२६।। क एतेऽनुपथा ये त एकादश महाभटाः। एता वा ललनाः सुभ्रु कोऽयं तेऽहिः पुरःसरः।।२७।। त्वं ह्रीर्भवान्यस्यथ वाग्रमा पतिं विचिन्वती किं मुनिवद्रहो वने। त्वदङ्घ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात्।।२८।। नासां वरोर्वन्यतमा भुवः स्पृक् पुरीमिमां वीरवरेण साकम्। अर्हस्यलङ्कर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यत्र पुंसा।।२९।। यदेष माऽपाङ्गविखण्डितेन्द्रियं सवीडभावास्मितविभ्रमद्भ्रुवा। त्वयोपसृष्टो भगवान्मनोभवः प्रबाधतेऽथानुगृहाण शोभने।।३०।। स्वमाननं सुभ्रु सुतारलोचनं व्यालम्बिनीलालकवृन्दसंवृतम्। उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते।।३१।। *नारद उवाच* – इत्थं पुरञ्जनं नारी याचमानमधीरवत्। अभ्यनन्दत तं वीरं हसन्ती वीरमोहिता।।३२।।

।। सङ्ग्रहोक्तिः ।।

तत्कटाक्षरूपबाणेन विद्धः सन् वीरः पुरञ्जनः (जीवः) सव्रीडस्मतशोभनां तां तरुणीं (बुद्धिं) दृष्ट्वा ललितं वचनमाह।।२५।। *पुरञ्जन उवाच* – हे पद्मपलाशाक्षि! त्वं काऽसि? हे सति! कस्याऽसि? कुत आगताऽसि? अस्य नगरस्य समीपे किं चिकीर्षसि? तत् सर्वं कथय।।२६।। त्वामनुवर्तिन इमे एकादश (मनः सहितानि दशेन्द्रियाणि) महाभटाः के? एता ललनाः (इन्द्रियवृत्तयः) काः? तव पुरःसरोऽयमहिः कः?।।२७।। हे अङ्गने वने रहो मुनिवत् स्वपतिं विचिन्वती ह्रीरसि? किं पार्वती, लक्ष्मीः वा सरस्वती भवसि?।।२८।। हे वरोरु! ह्रीप्रभृतीनां मध्ये त्वं कतमाऽपि नासि, यतस्त्वं भुवः स्पर्शं करोषि, देवा भुवं नैव स्पृशन्ति इति प्रसिद्धिरस्ति, अतस्त्वं वीरवरेण मया सहाऽस्मिन् नगरे नवद्वारे निवसितुमर्हसि?।।२९।। हे शोभने! सव्रीडभाव-स्मित-विभ्रमद्भ्रुवा त्वया प्रेरितः एष मनोभवस्तत्कटाक्षपराहतमनसं मां प्रबाधते, अतस्त्वं मां पतित्वेन स्वीकृत्यानुगृहाण।।३०।। हे सुभ्रु! स्वच्छकनीनिकायुक्तलोचनान्वितं व्यालम्बिनीलालकवृन्दसंवृतं शुचिस्मितं मधुरवचनं निजमुखमुन्नीय मां दर्शय।।३१।।

पुरञ्जन्युवाच - न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ। आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम्॥३३॥ इहाद्य सन्तमात्मानं विदाम न ततः परम्। येनेयं निर्मिता वीर पुरी शरणमात्मनः॥३४॥ एते सखायः सख्यो मे नरा नार्यश्च मानद। सुप्तायां मयि जागर्ति नागोऽयं पालयन् पुरीम्॥३५॥ दिष्ट्याऽऽगतोऽसि भद्रं ते ग्राम्यान् कामानवाप्स्यसि। उद्वहिष्यामि तांस्तेऽहं स्वबन्धुभिररिन्दम॥३६॥ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो। मयोपनीतान् गृह्णानः कामान् भोगान् शतं समाः॥३७॥ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम्। असम्परायाभिमुखमश्वस्तनविदं पशुम्॥३८॥ धर्मो ह्यत्रार्थकामौ च प्रजानन्दोऽमृतं यशः। लोका विशोका विरजा यान् न केवलिनो विदुः॥३९॥ पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह। क्षेमं वदन्ति शरणं भवेऽस्मिन् यद् गृहाश्रमः॥४०॥ का नाम वीर विख्यातं वदान्यं प्रियदर्शनम्। न वृणीत पतिं प्राप्तं मादृशी त्वादृशं स्वयम्॥४१॥

॥ सङ्ग्रहोक्तिः॥

नारद उवाच - तदा वीरमोहिता हसन्ती सा ललनैवमधीरवद् याचमानं पुरञ्जनं पतित्वेनाऽभ्यनन्दत॥३२॥ *पुरञ्जन्युवाच* - हे पुरुषर्षभ! अहं तव मम चोत्पादनकर्तारं न जाने, इत्थमावयोर्नामगोत्रं च न जाने॥३३॥ हे वीर! इह पुर्यामधुना सन्तमात्मानं ततः परं त्वां न विदाम = आत्मनः शरणमेतद् पुरं केन निर्मितं तदपि न जानामि॥३४॥ हे मानद! इमे पुरुषाः स्त्रियश्च मे सखायः सख्यश्च सन्ति, यदाऽहं स्वपिमि तदाऽयं सर्पः पुरं रक्षन् जागर्ति॥३५॥ हे अरिंदम! त्वं "दिष्ट्या" आगतोऽसि, तव भद्रमस्तु, त्वं यानपि विषयानभीप्स्यसि तान् सर्वानपि स्वसेवकैरहं सम्पादयिष्यामि॥३६॥ हे विभो! तिष्ठ, मयोपनीतान् कामान् भोगान् भुञ्जानस्त्वं शतं समाः यावत् नवद्वारवतीमिमां पुरीमधितिष्ठस्व॥३७॥ विषयविरक्तमनिपुणं परलोकचिन्ताशून्यं पशुतुल्यं त्वत्तोऽन्यं कं पुरुषमहं रमये॥३८॥ अस्मत्प्रवृत्तिमार्गे धर्मः, अर्थकामौ, पुत्रसुखं, मोक्षः, यशः, निर्मला निर्दुःखा लोकाश्च सिद्ध्यन्ति, तान् विरक्ता न जानन्ति॥३९॥ अस्मिन् संसारे गृहस्थाश्रमं पितृ-देव-ऋषि-मर्त्यानां, भूतानामात्मनश्चाश्रयं मुनयो वदन्ति॥४०॥ हे वीर! त्वादृशं विख्यातं प्रियदर्शनं वदान्यं प्राप्तं पतिं पुरुषं मादृशी -

कस्या मनस्ते भुजगेन्द्रभोगयोः। स्त्रिया न सज्जेद्भुजयोर्महाभुज। योऽनाथवर्गाधि-
मलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम्।।४२।। *नारद उवाच* - इति तौ
दम्पती तत्र समुद्य समयं मिथः। तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः।।४३।।
उपगीयमानो ललितं तत्र तत्र च गायकैः। क्रीडन् परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ
।।४४।। सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः। पृथग्विषयगत्यर्थं तस्यां यः
कश्चनेश्वरः।।४५।। पञ्च द्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा। पश्चिमे द्वे अमूषां
ते नामानि नृप वर्णये।।४६।। खद्योताऽऽविर्मुखी च प्राग्द्वारावेकत्र निर्मिते। विभ्राजितं
जनपदं याति ताभ्यां द्युमत्सखः।।४७।। नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते।
अवधूतसखस्ताभ्यां विषयं याति सौरभम्।।४८।। मुख्या नाम पुरस्ताद् द्वास्तया-
ऽऽपणबहूदनौ। विषयौ याति पुरराड्रसज्ञविपणान्वितः।।४९।। पितृहूर्नाम पुर्या
द्वार्दक्षिणेन पुरञ्जनः। राष्ट्रं दक्षिणपञ्चालं याति श्रुतिधरान्वितः।।५०।।

।। सङ्ग्रहोक्तिः ।।

का तरुणी न वृणीत?।।४१।। हे महाभुज! भोगिभोगयोरिव रुचिरयोस्ते भुजयोः कस्याः स्त्रिया मनो न सज्जेत।।४२।। *नारद उवाच* - हे प्राचीनबर्हिः! तौ दम्पती (बुद्धिजीवौ) तत्रोपवनेऽन्योन्यं संकेतं समुदीर्य, तां पुरीं प्रविश्य, शतं समा मुमुदाते।।४३।। जाग्रदवस्थायां सामागतैर्गायकैः ललितं गीयमानः स्त्रिभिः सह विहरन् पुरञ्जनो ग्रीष्मर्तौ जलविहारार्थं सरस्याविशत्।।४४।। पृथग् विषयगमनार्थं तस्याः पुर्याः सप्तद्वाराणि (कर्ण-नेत्र-नासिका-मुखच्छिद्राणि) उपरि, द्वे द्वारे (शिश्नगुदच्छिद्रे) अधश्च स्तः।।४५।। तत्र च पञ्च द्वाराणि पूर्वस्यां दिशि, द्वे दक्षिणोत्तरे (दक्षिणवामकर्णच्छिद्रे) द्वे द्वारे (शिश्नगुदे) पश्चिम आस्ताम्।।४६।। स पुरञ्जनः खद्योत-आविर्मुखी नाम्ना (चक्षुर्भ्याम्) द्वारद्वयेन विभ्राजितं नाम (रूपविषयम्) देशं याति।।४७।। स नलिनी नालिनीति नामकेन द्वारद्वयेन (नासिकाभ्याम्) सौरभं (गन्धविषयम्) देशं गच्छति।।४८।। मुख्यानामकेन द्वारेण (मुखेन) आपणबहूदनौ (भाषण भोजने) देशौ प्रयाति।।४९।। पुरञ्जनः पितृहूर्नाम यद्दक्षिणद्वारं विद्यते, तेन द्वारेण स दक्षिणपाञ्चालदेशं (शब्दम्) श्रुतिधरेण द्वारपेन सह याति।।५०।।

देवहूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः। राष्ट्रमुत्तरपञ्चालं याति श्रुतिधरान्वितः॥५१॥ आसुरी नाम पश्चाद् द्वास्तया याति पुरुञ्जनः। ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥५२॥ निर्ऋतिर्नाम पश्चाद् द्वास्तया याति पुरञ्जनः। वैशसं नाम विषयं लुब्धकेन समन्वितः॥५३॥ अन्धावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ। अक्षण्वतामधिपति-स्ताभ्यां याति करोति च॥५४॥ स यर्ह्यन्तःपुरगतो विषूचीनसमन्वितः। मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम्॥५५॥ एवं कर्मसु संसक्तः कामात्मा वञ्चितोऽबुधः। महिषी यद्यदीहेत तत्तदेवान्ववर्तत॥५६॥ क्वचित्पिबन्त्यां पिबति मदिरां मदह्विलः। अश्नन्त्यां क्वचिदश्नाति जक्षत्यां सह जक्षति॥५७॥ क्वचिद्गायति गायन्त्यां रुदत्यां रुदति क्वचित्। क्वचिद्धसन्त्यां हसति जल्पन्त्यामनु जल्पति ॥५८॥ क्वचिद्धावति धावन्त्यां तिष्ठन्त्यामनु तिष्ठति। अनु शेते शयानायामन्वास्ते क्वचिदासतीम्॥५९॥

॥ सङ्ग्रहोक्तिः॥

स देवहूर्नामकमुत्तरद्वारेण उत्तरपाञ्चालदेशं (शब्दं) प्रयाति॥५१॥ आसुरीनामकमेकं द्वारमस्ति, तेन द्वारेण पुरञ्जनो ग्राम्यकं (स्त्रीसम्भोगम्) देशं दुर्मदेन सह याति॥५२॥ स निर्ऋतिनामकेन पश्चाद् द्वारेण वैशसं (मलत्यागं) देशं लुब्धकेन सह याति॥५३॥ अस्यां पुर्यां चक्षुष्मतां पौराणामधिपौ द्वावन्धौ निर्वाकपेशस्कृन्नामकौ (करचरणौ) आस्ताम्, स तयोरेकेन (चरणेन) चलति, अपरेण (करेण) कर्माणि करोति च॥५४॥ स यदा विशूची नामकेन (मनसा) प्रधानेन सहाऽन्तःपुरं याति, तदा भार्यासुतै (बुद्धिपरिणामैः) र्जनितं मोहं सुखं हर्षं चाप्नोति॥५५॥ एवं कर्मसु सक्तोऽबुधो दैवेन वञ्चितः पुरञ्जनः तस्य महिषी (बुद्धिः) यद् यत् समीहते तत्तदेवाऽन्ववर्तत॥५६॥ क्वचित् स्त्रियां मदिरापाने व्याप्रियमाणायां सत्यां मदविह्वलः सन् पुरञ्जनो मदिरां पिबति, क्वचिद् अश्नन्त्यां सत्यामश्नाति, जक्षन्त्यां सत्यां तया सह जक्षति चर्वति॥५७॥ क्वचित्तस्यां गायन्त्यां सत्यां गायति, रुदन्त्यां सत्यां रुदति, क्वचिद्धसन्त्यां जल्पयन्त्यां च सत्यां हसति जल्पति च॥५८॥ क्वचिद्धावन्त्यां तिष्ठन्त्यां च सत्यां धावति तिष्ठति च, क्वचित्तां शयानामनुशेते, आसीनामन्वासते च॥५९॥

क्वचिच्छृणोति शृण्वन्त्यां पश्यन्त्यामनु पश्यति। क्वचिज्जिघ्रति जिघ्रन्त्यां स्पृशन्त्यां स्पृशति क्वचित् ।।६०।। क्वचिच्च शोचतीं जायामनुशोचति दीनवत्। अनु हृष्यति हृष्यन्त्यां मुदितामनु मोदते।।६१।। विप्रलब्धो महिष्यैवं सर्वप्रकृतिवञ्चितः। नैच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा।।६२।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पञ्चविंशोऽध्यायः।।२५।।

अथ षड्विंशोऽध्यायः।।२६।।

नारद उवाच - स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम्। द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम्।।१।। एकरश्म्येकदमनमेकनीडं द्विकूबरम्। पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम्।।२।।

।। सङ्ग्रहोक्तिः।।

तस्यां क्वचित् श्रवणाऽवलोकन-घ्राणन-स्पर्शनादिकं कुर्वन्त्यां सत्यां स तदनु श्रवणाऽवलोकन-घ्राणन-स्पर्शनादिकं करोति स्म।।६०।। क्वचित् तस्याः शोक-हर्ष-मोदादिकमनुसृत्य दीनवत् शोक-हर्ष-मोदादीननुसरति स्म।।६१।। एवं महीष्या (बुद्ध्या) विमोहितः परित्यक्तस्वभावोऽनिच्छन्नपि पारवश्यात् क्रीडामृगः सन् तामनुकरोति स्म।।६२।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां पञ्चविंशोऽध्यायः।।२५।।

अथ षड्विंशोऽध्यायः ।।२६।।

स्वप्नजागरोक्त्यनुसारं मृगयाव्याजेन पुरञ्जनस्य संसृतिप्रपञ्चः

नारद उवाच - हे राजन्! एकदा पुरञ्जन एकादशसेनानायक (एकादश मनोरूपः सेनानायको यस्य सः) धनुर्बाणान् प्रगृह्य पञ्चाश्वं (पञ्चज्ञानेन्द्रियाणि अश्वा यस्य तम्) द्विचक्रं (द्वे पुण्यपापरूपे चक्रे यस्य तम्) एकाक्षं (एकं प्रधानमक्षो यस्य तम्) त्रिध्वजं (त्रयो गुणा ध्वजा यस्य तम्) पञ्चबन्धुरं (पञ्चप्राणा बन्धनानि यस्य तम्)।।१।। एकरश्मिं (एकं मनो रश्मिः प्रग्रहः यस्य तम्) एकसूतं (एका बुद्धिः सारथिर्यस्य तम्) पञ्चप्रहरणं (पञ्चा प्रहरणानि

हैमोपस्करमारुह्य स्वर्णवर्माक्षयेषुधिः। एकादशचमूनाथः पञ्चप्रस्थमगाद्वनम् ॥३॥ चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः। विहाय जायामतदर्हां मृगव्यसनलालसः॥४॥ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः। न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥५॥ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने। यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥६॥ य एवं कर्म नियतं विद्वान् कुर्वीत वा न वा। कर्मणा तेन राजेन्द्र ज्ञानेन न स लिप्यते॥७॥ अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते। गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः॥८॥ तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः। विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनाम्॥९॥ शशान् वराहान् महिषान् गवयान् रुरुशल्यकान्। मेध्यानन्यांश्च विविधान् विनिघ्नन् श्रममध्यगात्॥१०॥ ततः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान्। कृतस्नानोचिताहारः संविवेश गतक्लमः॥११॥

॥ सङ्ग्रहोक्तिः॥

आयुधानि यस्य तम्) पञ्चगतिप्रकारं (पञ्चकर्मेन्द्रियाणि गतिप्रकारा यस्य तम्)॥२॥ सुवर्णोपस्करं रथमारुह्य स्वर्णवर्माऽक्षयेषुधिरेकादशचमूनाथः पञ्चप्रस्थं (पञ्च शब्दादयः प्रस्थाः सानवो यस्य तत्) वनमगात्॥३॥ तत्र भोगस्थाने वने दृप्तः (स्वाप्नदेह-परवशः) गृहीतेषुकार्मको मृगव्यसनलालसः, त्यागानर्हामपि जायां (बुद्धिम्) त्यक्त्वा मृगयां चकार॥४॥ तत आसुरीं वृत्तिमाश्रित्य घोरात्मा निर्दयः सन् स स्वनिशितैर्बाणैर्वनगोचरान् (भजनीयविषयान्) पशून् जघान (आत्मसात्कृतवान्)॥५॥ राजा प्रख्यातेषु वार्षिकश्राद्धादिष्ववसरेष्वेव वने मेध्यान् पशून् हन्यादेवं नियमोऽस्ति॥६॥ एवं जानन् राजा नियतं कर्म कुर्वीत न वा कुर्वीत, हे राजेन्द्र! अनेन प्रकारेण जातेन कर्मणा, ज्ञानेन स न लिप्यते॥७॥ उक्तं नियममुल्लंघ्य कर्म कुर्वाणो मानारूढः स कृतेन कर्मणाऽनुबध्यते, ततो नष्टप्रज्ञः सोऽधःपतति॥८॥ तत्र मृगयायां पुरञ्जनबाणहतानां मृगाणां नाशोऽभूत्, तेन दुःखितानां वनचराणां मध्ये दुःसहो विप्लवो जातः॥९॥ स मृगयायां शशान् वराहान् महिषान् गवयादीनन्यांश्च पशून् विहिंसन् श्रममध्यगात्॥१०॥ एवं क्षुत्तृट्परिश्रान्तः स राजा वनान्निवृत्य (जागृतो भूत्वा) गृहं प्राप्य स्नानं भोजनं च विधाय शय्यायां संविवेश॥११॥

आत्मानमर्हयाञ्चक्रे धूपालेपस्रगादिभिः। साध्वलंकृतसर्वाङ्गो महिष्यामादधे मनः।।१२।। तृप्तो हृष्टः सुदृप्तश्च कन्दर्पाकृष्टमानसः। न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम्। अन्तःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत्।।१३।। *पुरञ्जन उवाच* - अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा। न तथैतर्हि रोचन्ते गृहेषु गृहसम्पदः ।।१४।। यदि न स्याद् गृहे माता पत्नी वा पतिदेवता। व्यङ्गे रथ इव प्राज्ञः को नामासीत दीनवत्।।१५।। क्व वर्तते सा ललना मज्जन्तं व्यसनार्णवे। या मामुद्धरते प्रज्ञां दीपयन्ती पदे पदे।।१६।। *रामा ऊचुः* - नरनाथ न जानीमस्त्वत्प्रिया यद्व्यवस्यति। भूतले निरवस्तारे शयानां पश्य शत्रुहन्।।१७।। *नारद उवाच* - पुरञ्जनः स्वमहिषीं निरीक्ष्यावधूतां भुवि। तत्सङ्गोन्मथितज्ञानो वैक्लव्यं परमं ययौ।।१८।। सान्त्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता। प्रेयस्याः प्रेमसंरम्भलिङ्गमात्मनि नाभ्यगात्।।१९।। अनुनिन्येऽथ शनकैर्वीरोऽनुनयकोविदः। पस्पर्श पादयुगलमाह चोत्सङ्गलालिताम्।।२०।।

।। सङ्ग्रहोक्तिः ।।

तदनन्तरं स्रक्चन्दनादिभिरात्मानमलंकृत्य कामातुरः सन् स भार्यां सस्मार।।१२।। तृप्तो हृष्टः स दृप्तश्च कन्दर्पेणाकृष्टमानसः गवेषयन्नपि गृहिणीं न प्राप, ततो विमना इवाऽन्तःपुरस्त्रियोऽपृच्छत्।।१३।। *पुरञ्जन उवाच* - हे दास्यः! सेश्वरीणां वः पूर्ववत् कुशलमस्ति किम्? एतर्हि गृहेषु गृहसम्पदो यथापूर्वं न शोभन्ते।।१४।। गृहे यदि माता वा गृहिणी न स्यात् तर्हि चक्रादिहीने रथे इव गृह दीनवत् कस्तिष्ठेत्।।१५।।या दुःखार्णवे निमज्जन्तं मामुद्धरन्ती, पदे पदे प्रज्ञां च दीपयन्ती सा ललना क्व वर्तते।।१६।। *रामा ऊचुः* - हे नृपते! त्वत्प्रिया यन्निश्चिनोति तद् वयं न जानीमः, हे शत्रुहन्! अधुनाऽऽस्तरणरहिते भूतले शयानां तां पश्य।।१७।। *नारद उवाच* - पुरञ्जनः स्वमहिषीं भूवि पतितां त्यक्तदेहादरां निरीक्ष्य परमं वैक्लव्यं ययौ।।१८।।ततो दूयता हृदयेन मधुरया वाचा च तां सान्त्वयन्, प्रेयस्याः प्रणयकोपस्य कारणं मनसि न निश्चितवान्।।१९।। सान्त्वनकुशलः पुरञ्जनः शनैः तां सान्त्वयामास, तस्याः पादस्पर्शं कृत्वा, तामुत्संगे निधाय च प्राह।।२०।।

पुरञ्जन उवाच – नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे। कृतागःस्वात्मसात्कृत्वा शिक्षादण्डं न युञ्जते।।२१।। परमोऽनुग्रहो दण्डो भृत्येषु प्रभुणार्पितः। बालो न वेद तत्तन्वि बन्धुकृत्यममर्षणः।।२२।। सा त्वं मुखं सुदति सुभ्र्वनुरागभारव्रीडाविलम्बविलसद्धसितावलोकम्। नीलालकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यम्।।२३।। तस्मिन्दधे दममहं तव वीरपत्नि योऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्ते। पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात्।।२४।। वक्त्रं न ते वितिलकं मलिनं विहर्षं संरम्भभीममविमृष्टमपेतरागम्। पश्ये स्तनावपि शुचोपहतौ सुजातौ बिम्बाधरं विगतकुङ्कुमपङ्करागम्।।२५।। तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगया व्यसनातुरस्य। का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्त्वमुशती न भजेत कृत्ये।।२६।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे षड्विंशोऽध्यायः।।२६।।

।। सङ्ग्रहोक्तिः ।।

पुरञ्जन उवाच – हे शुभे! ते भृत्या मन्दभाग्याः सन्ति, येषु कृतापराधेषु सत्सु स्वामिनो दण्डं न योजयन्ति।।२१।। हे तन्वि! सापराधेषु भृत्येषु प्रभुणा कृतो दण्डः परमोऽनुग्रह एव मन्तव्यः, स्वामिना दण्डितो यो भृत्यो विषीदति स मूर्खो भवति।।२२।। हे मनस्विनि! अनुरागभारविलसद्धसितावलोकं मधुरभाषया युक्तं स्वमुखं मां दर्शय।।२३।। हे वीरपत्नि! ये तवाऽपराधिनस्ते ब्राह्मणानां हरेश्च भक्तिरहिताः स्युश्चेत् तेषु दण्डं योजयामि, त्वदपराधकर्तारमहं मोदसहितं निर्भयं कुत्राऽपि न पश्यामि।।२४।। इतः पूर्वं कदाचिदपि ते मुखं कुङ्कुमचन्द्रकरहितं नाऽपश्यम्, इदानीं तु मलिनं, विगतहर्षमनुज्ज्वलं स्नेहशून्यं चाऽपश्यम्।।२५।। अत एव कृतापराधस्य त्वामपृष्ट्वा मृगयार्थं गतस्य ममोपरि प्रसीद, स्ववशवर्तिनं कामातुरं पुमांसं कामुकी का स्त्री करणीये कृत्ये न सेवेत।।२६।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां षड्विंशोऽध्यायः।।२६।।

अथ सप्तविंशोऽध्यायः ।।२७।।

नारद उवाच – इत्थं पुरञ्जनं सम्यग्वशमानीय विभ्रमैः। पुरजनी महाराज रेमे रमयती पतिम् ।।१।। स राजा महिषीं राजन् सुस्नातां रुचिराननाम्। कृतस्वस्त्ययनां तृप्तामभ्यनन्ददुपागताम् ।।२।। तयोपगूढः परिरब्धकन्धरो रहोऽनुमन्त्रैरपकृष्टचेतनः। न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः।।३।। शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः। तामेव वीरो मनुते परं यतस्तमोऽभिभूतो न निजं परं च यत् ।।४।। तयैवं रममाणस्य कामकश्मलचेतसः। क्षणार्धमिव राजेन्द्र व्यतिक्रान्तं नवं वयः।।५।। तस्यामजनयत्पुत्रान् पुरञ्जन्यां पुरञ्जनः। शतान्येकादश विराडायुषोऽर्द्धमथात्यगात् ।।६।। दुहितृर्दशोत्तरशतं पितृमातृयशस्करीः। शीलौदार्यगुणोपेताः पौरञ्जन्यः प्रजापते ।।७।। स पाञ्चालपतिः पुत्रान् पितृवंशविवर्धनान्। दारैः संयोजयामास दहितृः सदृशैर्वरैः।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तविंशोऽध्यायः ।।२७।।

चण्डकोपस्य कालकन्यायाश्चोपाख्यानम्

नारद उवाच – हे महाराज! इत्थं सा पुरञ्जनी पुरञ्जनं स्वविलासैर्वशीकृत्य तं रमयन्ती सती स्वयं रेमे ।।१।। स राजा सुस्नातां रुचिराननां कृतस्वस्त्ययनां तृप्तां स्वयमागतां दृष्ट्वा तामभ्यनन्दत् ।।२।। एकान्ते तयाऽऽलिङ्गितः, गुह्यभाषणैर्गतविवेकः प्रमदापरिग्रहः सन् दिवारात्रिक्रमेण विगतमायुष्यमपि न ज्ञानवान् ।।३।। उन्नद्धमदो, महामना महामूल्यशय्यायां महिषीभुजमेवोपधानं कृत्वा शयानः स महिषीमेव केवलं मनुते, आत्मानं परमात्मानं न मनुते ।।४।। तया सहैवं रममाणस्य काममलिनचेतसः पुरञ्जनस्य यौवनं क्षणार्धमिव व्यतिक्रान्तम् ।।५।। पुरञ्जनः तस्यां पुरञ्जन्यां एकादशशतानि पुत्रान् इन्द्रियपरिणामान् अजनयत्, आयुषोऽर्द्धमत्यगात् ।।६।। हे प्रजापते! तदनन्तरं तस्य मातृपितृ यशस्कर्यः शीलौदार्यगुणोपेता दशोत्तरशतं कन्याः (बुद्धिवृत्तयः) समुत्पन्नाः।।७।। ततः स तेषां पुत्राणां स्नुषाभिः (हिताहितचिन्ताभिः) तासां कन्यानां च योग्यैः पतिभिः (विषयभोगैः) सह विवाहान् कृतवान् ।।८।।

पुत्राणां चाभवन् पुत्रा एकैकस्य शतं शतम्। यैर्वै पौरञ्जनो वंशः पञ्चालेषु समेधितः।।९।। तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु। निरूढेन ममत्वेन विषयेष्वन्वबध्यत।।१०।। ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः। देवान् पितॄन् भूतपतीन्नानाकामो यथा भवान्।।११।। युक्तेष्वेवं प्रमत्तस्य कुटुम्बासक्तचेतसः। आससाद स वै कालो योऽप्रियः प्रिययोषिताम्।।१२।। चण्डवेग इति ख्यातो गन्धर्वाधिपतिर्नृप। गन्धर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम्।।१३।। गन्धर्व्य-स्तादृशीरस्य मैथुन्यश्च सितासिताः। परिवृत्त्या विलुम्पन्ति सर्वकामविनिर्मिताम् ।।१४।। ते चण्डवेगानुचराः पुरंजनपुरं यदा। हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ।।१५।।स सप्तभिः शतैरेको विंशत्या च शतं समाः। पुरञ्जनपुराध्यक्षो गन्धर्वैर्युयुधे बली।।१६।। क्षीयमाणे स्वसम्बन्धिन्येकस्मिन् बहुभिर्युधा। चिन्तां परां जगामाथ सराष्ट्रपुरबान्धवः।।१७।।

।। सङ्ग्रहोक्तिः।।

तेषां पुत्राणामेकैकस्य शतं शतं पुत्राः (कर्माणि) बभूवुः, तैः पुरञ्जनस्य वंशः पञ्चालदेशेषु (शब्दादिविषयेषु) वृद्धिं गतः।।९।। इत्थं स पुत्रपौत्रादिषु गृहकोशाऽनुजीविषु च वृद्धिं प्राप्तेन ममत्वेन बद्धो बभूव, किन्तु स्वात्मपरमात्मस्वरूपे न विदितवान् ।।१०।। विविधवाञ्छासमन्वितः स पुरञ्जनो भवान् प्राचीनबर्हिरिव दीक्षां गृहीत्वा पशुमारकैरनेकैर्यज्ञैर्देवान् पितॄन् भूतपतींश्चेजे।।११।। सकलकर्मसु संसक्तस्य कुटुम्बवासनाबद्धस्य पुरञ्जनस्य कामिनामप्रिया जरावस्था प्राप्ता।।१२।। हे नृप! चण्डवेगनामा (संवत्सरात्मकः) एको गन्धर्वाधिपतिरासीत्, यस्य षष्ट्युत्तरशतत्रयं गन्धर्वा (दिवसाः) सेवका आसन्।।१३।। तावत्संख्यकाः श्वेताः कृष्णाश्च (रात्रयः) गन्धर्व्यस्तस्य सेविका आसन्, सर्वे मिलित्वा सर्वकामविनिर्मितां तां पुरञ्जनपुरीं (शरीरम्) परिवृत्य विलुम्पन्ति स्म।।१४।। ते चण्डवेगानुचराः पुरञ्जनपुरीं यदा हर्तुमारेभिरे तदा तत्र प्रजागरः प्रत्यषेधत्।।१५।। पञ्चशीर्षा बल्येकः प्रजागरो (प्राणः) विंशत्यधिकसप्तशत-संख्यैर्गन्धर्वैः सह शतं समाः पुरञ्जनपुराध्यक्षः सन् युयुधे।।१६।। एकस्मिन् प्रजागरे बहुभिः सह युद्ध्यमाने सति प्रजागरस्य बले क्षीयमाणे सति पुरञ्जनः परां चिन्तामवाप।।१७।।

स एव पुर्यां मधुभुक्पञ्चालेषु स्वपार्षदैः। उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भयम् ।।१८।। कालस्य दुहिता काचित्त्रिलोक्यां वरमिच्छती। पर्यटन्ती न बर्हिष्मन् प्रत्यनन्दत्त कश्चन ।।१९।। दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा। या तुष्टा राजर्षये वै वृतादात्पूरवे वरम् ।।२०।। कदाचिदटमाना सा ब्रह्मलोकान्महीं गतम्। वव्रे बृहद्व्रतं मां तु जानती काममोहिता ।।२१।। मयि संरभ्य विपुलमदाच्छापं सुदुःसहम्। स्थातुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने ।।२२।। ततो विहतसङ्कल्पा कन्यका यवनेश्वरम्। मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ।।२३।। *कन्योवाच* – ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम्। सङ्कल्पस्त्वयि भूतानां कृतः किल न रिष्यति ।।२४।। द्वाविमावनुशोचन्ति बालावसदवग्रहौ। यल्लोकशास्त्रोपनतं न राति न तदिच्छति ।।२५।। अथो भजस्व मां भद्र भजन्तीं मे दयां कुरु। एतावान् पौरुषो धर्मो यदार्तननुकम्पते ।।२६।।

।। सङ्ग्रहोक्तिः ।।

पुरञ्जनस्तस्यां पुर्यां स्वसेवकैरानीतमन्नं भुञ्जन् स्त्रीजितःसन् संप्राप्तं भयं नाऽविदत् ।।१८।। हे. राजन्! तदानीमेव काचित् कालकन्या (वृद्धावस्था) पतिमन्वेषयन्ती निखिलां त्रिलोकीं बभ्राम, किन्तु तां कश्चिन्नैच्छत् ।।१९।। आत्मनो दौर्भाग्येन सा लोके "दुर्भगा" इति नाम्ना विख्याता बभूव, या राजर्षये पूरवे तुष्टा सती तं राज्यासनरूपं वरमदात् ।।२०।। एवं भ्रमती कामोहिता कदाचित् ब्रह्मलोकान्महीं गतं मां नैष्ठिकं जानती सत्यपि मां वव्रे ।।२१।। ततो मयि प्रत्याख्याते सति क्रोधं कृत्वा मह्यं दुःसहं शापमदात्, हे मुने! मद्याच्ञाविमुखस्त्वं क्वचिदेकत्र स्थातुं नार्हसि ।।२२।। ततो विहतसंकल्पा सा मत्प्रेरणया यवनानां (आधिव्याधि-रूपाणाम्) स्वामिनं भयं (मृत्युं) पतित्वेन वव्रे ।।२३।। ततो भयं प्रति सा प्राह , *कन्योवाच*- हे वीर! यवनानां स्वामिनं त्वामीप्सितं पतिं वृणे, यत्पराभवाय त्वं संकल्पं करिष्यसि स ते मद्वराद् सफल एव भविष्यति ।।२४।। यो लोकशास्त्रप्राप्तं न ददाति न चेच्छति, तौ द्वावपि बालौस्तः ।।२५।। अतो हे भद्र! भजन्तीं मां भजस्व, मयि दयां कुरु, यत आर्तानुकम्पत एतावानेव पौरूषो धर्मोऽस्ति ।।२६।।

नारदो उवाच - कालकन्योदितवचो निशम्य यवनेश्वरः। चिकीर्षु-र्देवगुह्यं स सस्मितं तामभाषत ।।२७।। *यवनेश्वर उवाच* - मयानिरूपितस्तुभ्यं पतिरात्मसमाधिना। नाभिनन्दति लोकोऽयं त्वामभद्रामसंमताम् ।।२८।। त्वमव्यक्त-गतिर्भुङ्क्ष्व लोकं कर्मविनिर्मितम् । याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि ।।२९।। प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव। चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः ।।३०।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे सप्तविंशोऽध्यायः ।।२७।।

।। सङ्ग्रहोक्तिः ।।

नारद उवाच - कालकन्याया वचनं श्रुत्वा स भयनामा यवनेश्वरो देवगुह्यं (मरणम्) चिकीर्षुः सन् सस्मितं तां जगाद ।।२७।। *यवनेश्वर उवाच* - कालकन्ये! मया ज्ञानदृष्ट्याऽवलोक्य तुभ्यं मया लोकः पतित्वेन निश्चितः, किन्तु त्वामभद्रां मत्वा कोऽपि नाऽङ्गीकरोति ।।२८।। अत एव त्वं सेनया (रोगादिसमूहेन) युक्ता प्रच्छन्नगतिः सती कर्मनिर्मितं लोकं भुङ्क्ष्व, लोकानां नाशं विधास्यसि ।।२९।। अयं प्रज्वारो (मारको वैष्णवो ज्वरः) मे भ्राताऽस्ति, त्वं च मे भगिनी भव, एवं प्रज्वारकालकन्याभ्यां युवाभ्यां सहऽहं (मृत्युः) लोके प्रच्छन्नरूपेण विचरिष्यामि ।।३०।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां सप्तविंशोऽध्यायः ।।२७।।

अथाष्टाविंशोऽध्यायः ।।२८।।

नारद उवाच – सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः। प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ।।१।। त एकदा तु रभसा पुरञ्जनपुरीं नृप। रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालिताम् ।।२।। कालकन्यापि बुभुजे पुरञ्जनपुरं बलात्। यथाभिभूतः पुरुषः सद्यो निःसारतामियात् ।।३।। तयोपभुज्यमानां वै यवनाः सर्वतोदिशम्। द्वार्भिः प्रविश्य सुभृशं प्रादर्यन् सकलां पुरीम् ।।४।। तस्यां प्रपीड्यमानायामभिमानी पुरञ्जनः। अवापोरुविधांस्तापान् कुटुम्बी ममताकुलः ।।५।। कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः। नष्टप्रज्ञो हृतैश्वर्यो गन्धर्वयवनैर्बलात् ।।६।। विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान्। पुत्रान् पौत्रानुगामात्याञ्जायां च गतसौहृदाम् ।।७।। आत्मानं कन्यया ग्रस्तं पाञ्चालांश्चारिदूषितान्। दुरन्तचिन्तामापन्नो न लेभे तत्प्रतिक्रियाम् ।।८।। कामानभिलषन्दीनो यातयामांश्च कन्यया। विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ।।९।।

।। सङ्ग्रहोक्तिः ।।

अथ अष्टाविंशोऽध्यायः ।।२८।।

स्त्रीचिन्तया स्त्रीत्वं प्राप्तस्य जीवस्य वैदर्भ्याख्यानतो मुक्तिः

नारद उवाच – हे बर्हिष्मन्! भयनाम्नः (मृत्योः) यवनेश्वरस्य सैनिकाः (आधिव्याधिरूपाः) आदेशकारिणः सन्तः प्रज्वारकालकन्याभ्यां सहेमां भूमिं विचेरुः ।।१।। एकदा ते जरत्पन्नग पालिता (प्राणरक्षितां) पुरञ्जनपुरीं (शरीरं) सर्वतो रुरुधुः ।।२।। तदा कालकन्याऽपि बलात् पुरञ्जनपुरीं बुभुजे, यतस्तयाऽभिभूतः पुरुषः सद्यो निःसारतां प्राप्नोति ।।३।। कालकन्यया भुक्तां तां पुरीं यवनाः सर्वतोदिशं पुरद्वारैः प्रविश्य पीडयासुः ।।४।। तस्यां पूर्यां प्रपीड्यमानायाम-भिमानी ममताकुलः कुटुम्बी पुरञ्जनो बहून् तापान् लेभे ।।५।। स पुरञ्जनः कालकन्याऽऽ-लिङ्गितो नष्टश्रीर्गन्धर्वयवनैर्हृतैश्वर्यः सन् नष्टप्रज्ञोऽभवत् ।।६।। एवं यवनैर्विध्वंसितां स्वपुरीम्, अनादरं कुर्वाणान् पुत्रपौत्रामात्यान् प्रीतिरहितां पत्नीं च विलोक्य आत्मानं च कालकन्यया ग्रस्तं वीक्ष्य, दुरन्तां चिन्तां प्राप्तः स तत्प्रतिकारोपायं (जरानिवृत्तियुक्तिं) न प्राप ।।७-८।।

गन्धर्वयवनाक्रान्तां कालकन्योपमर्दिताम्। हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥१०॥ भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः। ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥११॥ तस्यां सन्दह्यमानायां सपौरः सपरिच्छदः। कौटुम्बिकः कुटुम्बिन्या उपातप्यत सान्वयः ॥१२॥ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया। पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥१३॥ न शशाकोषितुं तत्र पुरुकृच्छ्रोरुवेपथुः। गन्तुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥१४॥ शिथिलावयवो यर्हि गन्धर्वैर्हृतपौरुषः। यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥१५॥ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान्। स्वत्वावशिष्टं यत्किञ्चिद् गृहकोशपरिच्छदम् ॥१६॥ अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही। दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥१७॥ *पुरञ्जन उवाच* – लोकान्तरं गतवति मय्यनाथा कुटुम्बिनी। वर्तिष्यते कथं त्वेषा बालकाननुशोचती ॥१८॥

॥ सङ्ग्रहोक्तिः॥

ततः दीनो, विगतात्मगतिस्नेहः, पुत्रान् दारांश्च लालयन् स पुरञ्जनः कालकन्यया निःसारतां प्राप्तान् विषयान् अभिलाषान्, गन्धर्वयवनैः स्वरुद्धां कालकन्यावमर्दितां तां पुरीमनिच्छन्नपि हातुं प्रचक्रमे ॥९-१०॥ ततो भयस्याऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः सन् भ्रातुः प्रियचिकीर्षया कृत्स्नां पुरीं ददाह ॥११॥ पुर्यां दह्यमानायां सत्यां सपौरः सकौटुम्बिकः सान्वयः पुरञ्जनः परं दुःखमवाप ॥१२॥ कालकन्यया पुर्यां ग्रस्तायां यवनोपरुद्धायतनः प्रज्वारसंसृष्टः पुररक्षकोऽपि (प्राणोऽपि) त्रासं प्राप ॥१३॥ भूरि दुःखेनाऽतिवेपथुः, पुरपालसहितः पुरञ्जनस्तत्रपुर्यामवस्थातुं न शशाक. किन्तु तस्याः सकाशान् सानलाद् वृक्षकोटरात् सर्प इव गन्तुमैच्छत् ॥१४॥ हे राजन्! यदा गन्धर्वैः शिथिलावयवो हतपौरुषः पुरञ्जनो जातस्तदा यवनैरुपरुद्धः स रुरोद ॥१५॥ कुमतिः पुरञ्जनः प्रमदया सह वियोगे प्राप्ते सति दुहितॄः, पुत्रपौत्रान्, जामिजामातृपार्षदान्, स्वत्वमात्रेणावशिष्टं गृहकोशपरिच्छदं, "अहंमम" इति भावनया यत् संगृहीतं तत् सर्वं दध्यौ ॥१६-१७॥ *पुरञ्जन उवाच* – अहो! मयि मृते सति बालकानां विषये चिन्तयन्त्येकाऽनाथा मम स्त्री कथं जीविष्यति? ॥१८॥

न मय्यनाशिते भुङ्क्ते नास्नाते स्नाति मत्परा। मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात् ।।१९।। प्रबोधयति माऽविज्ञं व्युषिते शोककर्शिता। वर्त्मैतद् गृहमेधीयं वीरसूरपि नेष्यति ।।२०।। कथं नु दारका दीना दारिका वाऽपरायणाः। वर्तिष्यन्ते मयि गते भिन्ननाव इवोदधौ ।।२१।। *नारद उवाच* – एवं कृपणया बुद्ध्या शोचन्तमतदर्हणम्। ग्रहीतुं कृतधीरेनं भयनामाभ्यपद्यत ।।२२।। पशुवद्यवनैरेष नीयमानः स्वकं क्षयम्। अन्वद्रवन्ननुपथाः शोचन्तो भृशमातुराः ।।२३।। पुरीं विहायापगत उपरुद्धो भुजङ्गमः। यदा तमेवानु पुरी विशीर्णा प्रकृतिं गता ।।२४।। विकृष्यमाणः प्रसभं यवनेन बलीयसा। नाविन्दत्तमसाऽऽविष्टः सखायं सुहृदं पुरः ।।२५।। तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना। कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवमस्य तत् ।।२६।। अनन्तपारे तमसि मग्नो नष्टस्मृतिः समाः। शाश्वतीरनुभूयार्तिं प्रमदासङ्गदूषितः ।।२७।। तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा। अनन्तरं विदर्भस्य राजसिंहस्य वेश्मनि ।।२८।।

।। सङ्ग्रहोक्तिः ।।

एषा मम पत्नी मय्यभुक्ते न भुङ्क्ते, मय्यस्नाते न स्नाति, मयि रुष्टे तु संत्रस्ता, भर्त्सने कृते सति मौनं बिभ्रती ।।१९।। अविज्ञं मां प्रबोधयति, मयि देशान्तरं गते सा शोकेन कर्शिता भवति, मयि मृते सति गार्हस्थ्यं पालयिष्यति वा विरहातुरा मरिष्यति, इति न जाने ।।२०।। मयि मृतेऽर्णवे भिन्ननाव इव दीना एते मम निराश्रयाः पुत्राः दुहितरश्च कथं जीविष्यन्ति ।।२१।। *नारदउवाच* – एवं कृपणया बुद्ध्या शोचन्तं पुरञ्जनं गृहीतुं निश्चितबुद्धिर्भयनामा मृत्युरभ्यपद्यत ।।२२।। एष पुरञ्जनः पशुवत् स्वकीयं कर्मानुगुणं स्थानं यवनैर्नीयमानोऽभवत्, तदा तस्य सेवका भृशं शोचन्त आतुराः सन्तोऽन्वद्रवन् ।।२३।। भुजङ्गमो यदा यवनैरुपरुद्धस्तदा पुरीं विहाय ततोऽपगतः, तदा तमनु पुरी विशीर्णा, दारापत्यादयश्च सर्वे विनष्टा अभवन् ।।२४।। बलीयसा यवनेन पुर्याः सकाशात् प्रसभं विकृष्यमाणः तदाऽज्ञानेनाऽऽविष्टः पुरञ्जनः पुरः सन्तमपि सखायं नाऽविदत् ।।२५।। अदयालुनाऽनेन पुरञ्जनेन यज्ञे ये पशवो हिंसितास्तेऽस्य पापं स्मरन्तं अत एव क्रुद्धाः सन्तस्तं कुठारैश्चिच्छिदुः ।।२६।।

उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः। युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः
।।२९।। तस्यां स जनयाञ्चक्र आत्मजामसितेक्षणाम्। यवीयसः सप्त सुतान्
सप्त द्रविडभूभृतः।।३०।। एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम्। भोक्ष्यते
यद्वंशधरैर्मही मन्वन्तरं परम्।।३१।। अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम्। यस्यां
दृढच्युतो जात इध्मवाहात्मजो मुनिः।।३२।। विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलय-
ध्वजः। आरिराधयिषुः कृष्णं स जगाम कुलाचलम्।।३३।। हित्वा गृहान् सुतान्
भोगान् वैदर्भी मदिरेक्षणा। अन्धावत पाण्ड्येशं ज्योत्स्नेव रजनीकरम्।।३४।।
तत्र चन्द्रमसा नाम ताम्रपर्णी वटोदका। तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन्
।।३५।। कन्दाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः। वर्तमानः शनैर्गात्रकर्षणं तप
आस्थितः।।३६।। शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये। सुखदुःखे इति
द्वन्द्वान्यजयत्समदर्शनः।।३७।।

।। सङ्ग्रहोक्तिः।।

अनन्ते नरके मग्न अत एव नष्टस्मृतिः पुरञ्जनो बहुवर्षपर्यन्तं दुःखमनुभूय, प्रमदासङ्गदूषित-
स्तामेवाऽन्तकाले संस्मरन् सः कर्मठस्य धार्मिकस्य विदर्भनृपस्य वेश्मनि प्रमदोत्तमा बभूव
।।२७-२८।। वीर्यशुल्कां वैदर्भीं परपुरञ्जयः पाण्ड्यो राजा मलयध्वजो युधि राजन्यान्
निर्जित्योपयेमे।।२९।। स मलयध्वजो वैदर्भ्यामसितेक्षणां दुहतरं, तथा यवीयसः सप्त पुत्रान्
सप्तद्रविडभूभृतो जनयाञ्चक्रे।।३०।। हे राजन्! तेषां पुत्राणां मध्य एकैकस्याऽर्बुमर्बुदं पुत्रा
अभवन्, येषां वंशधरैरतःपरं मन्वन्तरं मही भोक्ष्यते।।३१।। धृतव्रतां प्रथमजातां तद्दुहितरं
अगस्त्यो मुनिरुपयेमे, तयोः संसर्गाद् दृढव्रतो मुनिर्बभूव, तस्मादिध्मवाहो जातः।।३२।।
राजर्षिर्मलयध्वजो भूमिं तनयेभ्यो विभज्य कृष्णमारिराधयिषुः सन् कुलाचलं मलयगिरिं
जगाम।।३३।। मदिरेक्षणा वैदर्भी भोगान् सुखप्रदान् गृहान् हित्वा चन्द्रं ज्योत्स्ना इव मलयध्वज-
मन्वधावत।।३४।। तत्र कुलाचले चन्द्रमसा, ताम्रपर्णी वटोदका च इति नामधेया तिस्रो नद्यः
सन्ति, मलयध्वजस्तासां पुण्यजलस्नानपानादिभिः आन्तरबाह्यं मलं क्षालयन् तपस्तेपे।।३५।।
कन्द-बीज-मूल-पुष्प-पर्णैस्तृणोदकैश्च वर्तमानः शनैः गात्रकर्षणं तपश्चकार।।३६।। समदर्शनः

तपसा विद्यया पक्वकषायो नियमैर्यमैः। युयुजे ब्रह्मणात्मानं विजिताक्षानिलाशयः ।।३८।। आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः। वासुदेवे भगवति नान्यद्वेदोद्वहन् रतिम् ।।३९।। स व्यापकतयाऽऽत्मानं व्यतिरिक्ततयाऽऽत्मनि। विद्वान् स्वप्न इवामृश्य साक्षिणं विरराम ह ।।४०।। साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप। विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखम् ।।४१।। परे ब्रह्मणि चात्मानं परं ब्रह्म तथाऽऽत्मनि। वीक्षमाणो विहायेक्षामस्मादुपरराम ह ।।४२।। पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम्। प्रेम्णा पर्यचरद्धित्वा भोगान् सा पतिदेवता ।।४३।। चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा। बभावुपपतिं शान्ता शिखा शान्तमिवानलम् ।।४४।। अजानती प्रियतमं यदोपरतमङ्गना। सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ।।४५।। यदा नोपलभैताङ्घ्रावूष्माणं पत्युरर्चती। आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ।।४६।।

।। सङ्ग्रहोक्तिः ।।

स शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये सुखदुःखे च इत्येवंविधानि द्वन्द्वान्यजयत् ।।३७।। तपसा विद्यया नियमैर्यमैश्च पक्वकषायो जितप्राणेन्द्रियः सन् ब्रह्मात्मकमात्मानमनुसंहितवान् ।।३८।। स्थाणुरिवैकस्मिन् देशे देवानां वर्षशतपर्यन्तं निश्चल आस्ते स्म, भगवति वासुदेवे भक्तिं कुर्वन् सन् शरीरादिकं न सस्मार ।।३९।। स मलयध्वज सर्वान्तर्यामितया स्थितत्वेऽपि वस्तुतः स्वधाम्नि व्यतिरेकभावेन स्थितं साक्षिणं परमात्मानं स्वक्षेत्रज्ञे स्थितं जानन् देहादिवृत्तान्तं स्वप्नवद् विचार्य केवलपरमात्मध्यानपरोऽभूत् ।।४०।। हे नृप! साक्षाद् भगवता हरिणा गुरुणा प्रोक्तेन विशुद्धज्ञानदीपेन प्रत्यगात्मानं परे ब्रह्मणि तथा परं ब्रह्म प्रत्यगात्मन्युपासनातिशयेन साक्षात्कुर्वन् भेदसमीक्षणं विहायाऽस्माद् विचारादपि विरेमे ।।४१-४२।। पतिदेवता वैदर्भी भोगान् हित्वा परमधर्मज्ञं पतिं मलयध्वजं प्रेम्णा सिषेवे ।।४३।। चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा सा वैदर्भी पत्युः समीपेऽङ्गारावस्थमनलमिव निर्धूमत्वाच्छुद्धा ज्वाला इव बभौ ।।४४।। उपरतमपि सुस्थिरासनं पतिं प्राप्य मृतमपि तमजानती वैदर्भी पूर्ववदेव पत्युरङ्घ्री यदा पर्यचरत् ।।४५।। यदा च पादसंवाहनं कुर्वती सती पत्युरङ्घ्रावूष्माणं नोपलेभे तदा यूथभ्रष्टा मृगीव सा दुःखितचित्ताऽभवत् ।।४६।।

आत्मानं शोचती दीनमबन्धुं विक्लवाश्रुभिः। स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा॥४७॥ उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलाम्। दस्युभिः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि॥४८॥ एवं विलपती बाला विपिनेऽनुगता पतिम्। पतिता पादयोर्भर्तू रुदत्यश्रूण्यवर्तयत् ॥४९॥ चितिं दारुमयीं कृत्वा तस्यां पत्युः कलेवरम्। आदीप्य चानुमरणे विलपन्ती मनो दधे॥५०॥ तत्र पूर्वतरः कश्चित्सखा ब्राह्मण आत्मवान्। सान्त्वयन् वल्गुना साम्ना तामाह रुदतीं प्रभो॥५१॥ *ब्राह्मण उवाच* - का त्वं कस्यासि को वाऽयं शयानो यस्य शोचसि। जानासि किं सखायं मां येनाग्रे विचचर्थ ह॥५२॥ अपि स्मरसि चात्मानमविज्ञातसखं सखे। हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः॥५३॥ हंसावहं च त्वं चार्य सखायौ मानसायनौ। अभूतामन्तरा वौकः सहस्रपरिवत्सरान्॥५४॥ स त्वं विहाय मां बन्धो गतो ग्राम्यमतिर्महीम्। विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया॥५५॥

॥ सङ्ग्रहोक्तिः॥

पतिरहितमत एवं दीनमात्मानं शोचती वैदर्भी शोकाश्रुभिः स्तनावासिच्य विपिने स्फुटं रुरोद ॥४७॥ हे राजर्षे! उत्तिष्ठ उत्तिष्ठ, अधार्मिकक्षत्रियेभ्यो दस्युभ्यश्च बिभ्यन्तीमिमामुदधि-मेखलां भूमिं पातुमर्हसि॥४८॥ विपिने पतिमनुवर्तमाना वैदर्भीत्थं विलपती सती भर्तुः पादयोः पतिता सती च बाष्पाण्यवर्त्तयत्॥४९॥ ततो दारुमयीं चितां विरचय्य तस्यां पत्युः शरीरं निधायाऽऽदीप्य च विलपन्ती सह गमने मनो दधे॥५०॥ तस्मिन्नवसरे पुरातनः कश्चित् सखा आत्मवान् ब्राह्मणः समागत्य मधुरेण सामवाक्येन सान्त्वयन्, रुदतीं तां वैदर्भीं प्रभो! इति सम्बोध्य प्राह॥५१॥ त्वं काऽसि? कस्याऽसि? कं पुरुषमाश्रित्य तिष्ठसि, यस्य त्वं शोचसि, शयानश्चाऽयं को वा? येन मया सह पूर्वं विचचर्थ तं मां सखायं जानासि किम्?॥५२॥ तथापि हे सखे! अविज्ञातसंज्ञः कश्चिन्मे सखा आसीदिति स्वात्मानं स्मृतिपथं नयसि किम्? हे सखे! अन्तरात्मभूतं मां हित्वा त्वं लौकिकविषयासक्तः सन् भोगस्थानमन्विच्छन् गतः॥५३॥ हे आर्य! त्वं चाऽहं च मानसनिवासिनौ हंसौ, अनन्तकालं मानससरोवरमध्ये गृहं प्राप्तावभूताम् ॥५४॥ हे बन्धो! स हंसस्त्वं सखायं हित्वा विषयमतिः सन् महीं गतः, तत्राऽपि निवासस्थानं

पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम्। षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम्
।।५६।। पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो। तेजोऽबन्नानि कोष्ठानि
कुलमिन्द्रियसंग्रहः।।५७।। विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया। शक्त्यधीशः
पुमानत्र प्रविष्टो नावबुध्यते।।५८।। तस्मिंस्त्वं रामया स्पृष्टो रममाणो गतस्मृतिः।
तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं विभो।।५९।। न त्वं विदर्भदुहिता नायं
वीरः सुहृत्तव। न पतिस्त्वं पुरञ्जन्या रुद्धो नवमुखे यया।।६०।। माया ह्येषा मया
सृष्टा यत्पुमांसं स्त्रियं सतीम्। मन्यसे नोभयं यद्वै हंसौ पश्य हि नौ गतिम्
।।६१।। अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः। न नौ पश्यन्ति कवयश्छिद्रं
जातु मनागपि।।६२।। यथा पुरुष आत्मानमेकमादर्शचक्षुषोः। द्विधाभूतमवेक्षेत
तथैवान्तरमावयोः।।६३।। एवं स मानसो हंसो हंसेन प्रतिबोधितः।

।। सङ्ग्रहोक्तिः ।।

विचिन्वन् कयाचित् स्त्रिया निर्मितं स्थानमद्राक्षीः।।५५।।यत् पञ्चोपवनं, नवद्वारम्, एकरक्षकं, त्रि प्राकारं, षड्वणिजं, पञ्चहट्टं, स्त्रीस्वामिनं, पञ्चशब्दाद्यारामं, नवप्राणायनं, तेजोबन्नत्रय-कोष्ठं, समनोज्ञानेन्द्रियषट्ककुलं, पञ्चकर्मेन्द्रियविपणं, भूतप्रकृतिकमन्वयं, बुद्ध्यधीशं स्थानमभूत्, अत्र स्थाने प्रविष्टो भवान् स्वात्मानं मां च नाऽज्ञासीत्।।५६-५८।। तस्मिन् स्थाने (देहे) स्त्रिया (बुद्ध्या) ऽभिभूतः, तया रममाणोऽत एव गतस्मृतिस्त्वं देहानुबन्धिस्त्रीसङ्गादीदृशीं पापीयसीं दशां हे विभो! प्राप्तोऽसि।।५९।। त्वं विदर्भदुहिता न, अयं मलध्वजस्तव पतिर्न, नवद्वारे पुरे (देहे) यया बुद्धिरूपया पुरञ्जन्या रुद्धस्तस्या, पतिस्त्वं न।।६०।। त्वं पूर्वजन्मनि यत् स्वं पुमासमन्यथाः, इदानीं सतीं स्त्रियं यत् मन्यसे, एषा मया सृष्टा माया हि, यदुभयमपि वस्तुत आत्मनि नास्ति, आवां शुद्धौ हंसौ भवावः, अत आवयोः स्वरूपं पश्य।।६१।। अहं भवान्=भवच्छरीरकः, त्वमेवाऽहम्, कदाचिदपि त्वं मच्छरीरत्वरहितो न, अहं सदा त्वदात्मा, त्वं सदा मम शरीरभूतः, न च त्वमन्यः, भो हंस! इत्थं विचारय, कवयो मनागप्यावयोः सबन्धविधुरत्वं जातु न पश्यन्ति।।६२।।जना आवयोर्मध्ये द्विधाभूतं स्वरूपभेदमादर्शचक्षुषोरिव पश्यति, परमात्माऽनादिकालतः शुद्धः, जीवः स्वस्वरूपतः

स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ।।६४।। बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम्। यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ।।६५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे अष्टाविंशोऽध्यायः ।।२८।।

अथैकोनत्रिंशोऽध्यायः ।।२९।।

प्राचीनबर्हिरुवाच - भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते। कवयस्तद्विजानन्ति न वयं कर्ममोहिताः ।।१।। *नारद उवाच* - पुरुषं पुरञ्जनं विद्याद्यद् व्यनक्त्यात्मनः पुरम्। एकद्वित्रिचतुष्पादं बहुपादमपादकम् ।।२।। योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः। यन्न विज्ञायते पुम्भिर्नामभिर्वा क्रियागुणैः ।।३।। यदा जिघृक्षन् पुरुषः कात्स्न्येन प्रकृतेर्गुणान्। नवद्वारं द्विहस्ताङ्घ्रि तत्रामनुत साध्विति ।।४।।

।। सङ्ग्रहोक्तिः ।।

शुद्धः तथापि प्रकृत्यावृत्तज्ञानधर्मतया मलिनः, एव भेदः ।।६३ ।। एवं हंसेन = परमात्मना प्रतिबोधितः स मानसो हंसो जीवः स्वपरयाथात्म्यज्ञानाभावेन तस्य स्मृतिं स्वस्थः सन् पुनरवाप ।।६४।। हे बर्हिष्मन्! एतदाध्यात्मवृत्तं यत्, तत् पारोक्ष्येण प्रदर्शितम्, यतो हि विश्वकारणभूतो देवो भगवान् परोक्षप्रियोऽस्ति ।।६५।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामष्टाविंशोऽध्यायः ।।२८।।

अथ एकोनत्रिंशोऽध्यायः ।।२९।।

स्त्रीसंगतः संसारः परमात्मसंगतो मुक्तिश्च

प्राचीनबर्हिरुवाच - हे भगवन्! आध्यात्मिकत्वेनोक्तं त्वद्वचनमस्माभिर्नाऽवगम्यते, तद्वचो विद्वांसो जानन्ति, कर्मविमोहिता वयं न ।।१।। *नारद उवाच* - क्षेत्रज्ञं जीवं पुरञ्जनं जानीहि, स मनसा सहैक-द्वि-त्रि-चतुष्पादं बहुपादमपादकं वा शरीरमुत्पादयति ।।२।। पुरुषैर्नामभिः क्रिया-गुणैर्वा यो न ज्ञायते, तमविज्ञातनामकं सखायं परमात्मानं जानीहि ।।३।। यदा पुरुषः प्रकृतेर्गुणान् कात्स्न्येन ग्रहीतुमैच्छत् तदा नवद्वारं द्विहस्ताङ्घ्रि मनुष्यशरीरं समीचीनममन्यत ।।४।।

बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम्। यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षभिर्गुणान्।।५।। सखाय इन्द्रियगणो ज्ञानं कर्म च यत्कृतम्। सख्यस्तद्-वृत्तयः प्राणः पञ्चवृत्तिर्यथोरगः।।६।। बृहद्बलं मनो विद्यादुभयेन्द्रियनायकम्। पाञ्चालाः पञ्च विषया यन्मध्ये नवखं पुरम्।।७।। अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति। द्वे द्वे द्वारौ बहिर्याति यस्तदिन्द्रियसंयुतः।।८।। अक्षिणी नासिके आस्यमिति पञ्च पुरः कृताः। दक्षिणा दक्षिणः कर्णश्चोत्तरा चोत्तरः स्मृतः।।९।। पश्चिमे इत्यधोद्वारौ गुदशिश्नाविहोदितौ। खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते ।।१०।। रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः। नलिनी नालिनी नासे गन्धः सौरभ उच्यते।।११।। घ्राणोऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः। आपणो व्यवहारोऽत्र चित्रमन्धो बहूदनम्।।१२।। पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः। संवत्सरश्चण्डवेगः कालो येनोपलक्षितः।।१३।।

।। सङ्ग्रहोक्तिः।।

बुद्धिं प्रमदां विद्धि, यामाधिष्ठाय जीव इन्द्रियैः शब्दादीन् विषयानस्मिन् देहे भुङ्क्ते।।५।। ज्ञानेन्द्रियकर्मेन्द्रियगणो जीवस्य भृत्याः, इन्द्रियवृत्तयो जीवस्य सख्यः, पञ्चविधः प्राणो रक्षकः सर्पः।।६।। बृहद्बलमुभयेन्द्रियनायकं मनो विद्यात्, शब्दादिपञ्चविषयाः पाञ्चालदेशः तन्मध्यं नवद्वारं पुरं शरीरं जानीयात्।।७।। अक्षिणी, नासिके, कर्णौ, मुखं, शिश्नं, गुदं चेति नवभिर्द्वारैः तत्तदिन्द्रियसंयुतो जीवो बहिर्निर्गच्छति, शब्दादिविषयाननुभवति च।।८।। अक्षिणी, नासिके, मुखं, चेति पञ्च द्वाराणि पूर्वभागे कृताः, दक्षिणो वामश्चेति द्वौ कर्णौ, दक्षिणोत्तरे द्वे द्वारे स्तः।।९।। गुदं शिश्नं चेति द्वेऽधोद्वारे स्तः, एकत्र संलग्ने नेत्रे खद्योता-विर्मुखीनामके स्तः, ताभ्यामेव पुरञ्जनोऽलोकयति, नलिनी नालिनी चेति द्वे नासिक उच्येते, सौरभो देशो गन्ध उच्यते।।१०-११।। अवधूतो घ्राणो ज्ञेयः, मुख्याद्वारमास्यं ज्ञेयं, विपणो = वाग्व्यवहारः वागेन्द्रियं ज्ञेयम्, रसज्ञः रसनेन्द्रियं ज्ञेयम्, बहूदनो देशो नानाविधमन्नं ज्ञेयम्।।१२।। पितृहूर्दक्षिणः कर्णः, देवहूरुत्तरः कर्णः, स्मृतः, चण्डवेगः संवत्सरो ज्ञेयः, कालो येन संवत्सरेण परिच्छिन्नो भवति।।१३।।

तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः। हरन्त्यायुः परिक्रान्त्या षष्ट्युत्तरशतत्रयम्।।१४।। कालकन्या जरा साक्षाल्लोकस्तां नाभिनन्दति। स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः।।१५।। आधयो व्याधयस्तस्य सैनिका यवनाः खलाः। भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः।।१६।। प्रवृत्तं च निवृत्तं च शास्त्रं पाञ्चालसंज्ञितम्। पितृयानं देवयानं श्रोत्राच्छ्रुतधराद् व्रजेत्।।१७।। आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः। उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते।।१८।। वैशसं नारकं पायुर्लुब्धकोऽन्धौ तु मे शृणु। पाणिपादौ पुमांस्ताभ्यां युक्तो याति करोति च।।१९।। अन्तःपुरं तु हृदयं विषूचिर्मन उच्यते। तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः।।२०।। यदा यदा विक्रियते गुणाक्तो विकरोति च। तदा तदोपद्रष्टात्मा तद्वृत्तीरनुकार्यते।।२१।। देहो रथस्त्विन्द्रियाश्वः संवत्सररयो गतिः। द्विकर्मचक्रस्त्रिगुणध्वजः पञ्चासुबन्धुरः।।२२।।

।। सङ्ग्रहोक्तिः ।।

इह चण्डवेगस्य गन्धर्वा अहानि, गन्धर्व्यो रात्रयः स्मृताः, यतः षष्ट्युत्तरशतत्रयपरिमितान्यहोरात्रणि परिक्रान्त्या पुरुषस्याऽऽयुर्हरन्ति।।१४।। कालकन्या साक्षाज्जरोच्यते, लोकस्तां नाऽभिनन्दति, ततो यवनेश्वरो लोकनाशाय तां स्वसारं जगृहे।।१५।। आधयो व्याधयस्तस्य भयनाम्नः सैनिकाः सन्ति, ते यवनसंज्ञका उच्यन्ते, भूतानां संबन्धे सति तीव्रवेगः प्रज्वारः शीतोष्णप्रकारेण द्विविधो ज्वरः स्मृतः।।१६।। प्रवृत्तं निवृत्तं चेति शास्त्रद्वयं पाञ्चालशब्देन कथितम्, पितृयानं दक्षिणमार्गं, देवयानमुत्तरमार्गं च श्रुतधरसंज्ञितात् श्रोत्राद् व्रजेत्।।१७।। आसुरी संज्ञकमधोद्वारं मेढ्रं ज्ञेयम्, ग्राम्यसुखं व्यवायः प्रोक्तः, दुर्मद उपस्थः प्रोक्तः, निर्ऋतिशब्देन गुदमुच्यते।।१८।। नारकं दुंखं पायुशब्देनोक्तम्, अन्धौ तु पाणिपादौ स्तः, ताभ्यां पुमान् करोति याति च।।१९।। हृदयमन्तःपुरशब्देन मनो विषूचिशब्देन च उच्यते, जीवस्तत्र तद्गुणैर्मोहं प्रसादं हर्षं च प्राप्नोति।।२०।। यथा बुद्धिः स्वप्ने विकारं याति, जाग्रति चेन्द्रियाणि परिणमयति तथा तस्या एव गुणैर्लिप्तो जीवो वस्तुत उपद्रष्टाऽपि दर्शनस्पर्शनाद्यास्तस्या वृत्तीरनुकार्यते।।२१।। यो रथ उक्तः स देहः, तस्मिन्निन्द्रियाण्यश्वाः प्रोक्ताः, गतिः संवत्सरः प्रोक्तः, पुण्यपापे

मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः। पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः
।।२३।। आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति। एकादशेन्द्रियचमूः पञ्चसूना-
विनोदकृत् ।।२४।। एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः। क्लिश्यमानः शतं वर्षं देहे
देही तमोवृतः।।२५।। प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः। शेते कामलवान्
ध्यायन्ममाहमिति कर्मकृत् ।।२६।। यदात्मानमविज्ञाय भगवन्तं परं गुरुम्। पुरुषस्तु
विषज्जेत गुणेषु प्रकृतेः स्वदृक् ।।२७।। गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः।
शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते ।।२८।। शुक्लात् प्रकाशभूयिष्ठाँल्लोका-
नाप्नोति कर्हिचित्। दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान् क्वचित् ।।२९।।
क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः। देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं
भवः।।३०।। यथा दीनः क्षुत्परीतः सारमेयो गृहं गृहम्।

।। सङ्ग्रहोक्तिः ।।

द्वे चक्रे स्तः, सत्त्वादयस्त्रयोगुणा तत्र ध्वजा उक्ताः, पञ्चप्राणा अस्य बन्धनानि सन्ति ।।२२।। मनः रथरश्मिरुक्तः, बुद्धिः सारथिरुउक्तः, हृदयं सारथेरुपवेशनस्थानं उक्तम्, शोकमोहादिकं कूबरं=युगबन्धनस्थानं कथितम्, पञ्चविषयाः प्रहरणानि सन्ति, सप्तधातवः आवरणानि सन्ति ।।२३।। आकूतिः (कर्मेन्द्रियगतिप्रकारः) बाह्यविक्रमः कथितः, एकादशेन्द्रियचमूः पञ्चेन्द्रियैर्विषयसेवां कुर्वन् जीवो मृगतृष्णां = सुखाभासं प्रधावति ।।२४।। एवं आधिदैविकादिभिर्बहुविधैर्दुःखैः शतवर्षं यावत् क्लिश्यमानो जीवोऽज्ञानेनावृतो भवति, स्वयं निर्गुणोऽपि प्राणेन्द्रियमनसां धर्मान् आत्मन्यध्यस्य सुखलेशान् चिन्तयन् अहंत्वममत्वाभ्यां कर्माणि कुर्वन् स शरीरे वसति ।।२५-२६।। विषयपरवशः स सात्विकादित्रिगुणात्मकानि कर्माणि करोति, तथा च यथाकामं जन्मान्तरं च प्राप्नोति ।।२७-२८।। क्वचित् सात्विकात् कर्मणः प्रकाशभूयिष्ठान् लोकान् देहांश्च प्राप्नोति, राजसात् कर्मणः श्रमसाध्यान् दुःखपूर्णान् लोकान्, तामसात् कर्मणः शोकाज्ञानपूर्णान् लोकान् प्राप्नोति ।।२९।। अज्ञानवशः स क्वचित् पुमान्, क्वचित् स्त्री, क्वचिच्च नपुंसकश्च भवति, क्वचित् देवः, क्वचित् मनुष्यः, क्वचिच्च पश्वादिदेहं कर्मानुरूपं प्राप्नोति ।।३०।।

चरन्विन्दति यद्दिष्टं दण्डमोदनमेव वा ।।३१।। यथा कामाशयो जीव उच्चावचपथा भ्रमन्। उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ।।३२।। दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु। जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ।।३३।। यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन्। तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ।।३४।। नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम्। द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ।।३५।। अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते। मनसा लिङ्गरूपेण स्वप्ने विचरतो यथा ।।३६।। अथात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा। संसृतिस्तद्-व्यवच्छेदो भक्त्या परमया गुरौ ।।३७।। वासुदेवे भगवति भक्तियोगः समाहितः। सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ।।३८।।

।। सङ्ग्रहोक्तिः ।।

प्रकृतिविलक्षणमात्मानं गुरुवदुपदेष्टारं परमात्मनं चाऽविज्ञाय जीवः स्वभावतो प्रकृतेर्गुणेषु शब्दादिषु यदा विषज्जेत, तदा गुणाभिमानी यथा क्षुधा व्याप्तो दीनः श्वा प्रतिगृहमटन् यद्दैवं तथा दण्डप्रहारमोदनं वा विन्दति ।।३१।। तथा वासनापूर्णो जीवः उत्कृष्टापकृष्टमार्गेण उपर्यधोमध्यलोकेषु भ्रमन् दैवायत्तं प्रियमप्रियं वा प्राप्नोति ।।३२।।आध्यात्मिकादिषु त्रिविधदुःखेषु जीवस्यैकतरेणाऽपि दुःखेन परिहारो न भवति, तत्प्रतिकारोऽपि दुःखरूप एव ।।३३।। यथा कश्चित् पुरुषो गुरुं भारं शिरसा वहन्, तं भारं शिरसोऽवतार्य स्कन्ध आरोपयेत्, तदाऽपि स भारः दुःखरूप एव, एवं सर्वेऽपि दुःखप्रतिकाराः सन्ति ।।३४।। हे अनघ! ज्ञानविधुरं केवलं कर्म कर्मणां निःशेषतः प्रतिकारो न भवति, यतो निवर्त्त्यं निवर्तकं चेति द्वयमपि कर्माऽविद्यामूल-मस्ति एकस्मिन् स्वप्नेऽनिवृत्ते स्वप्नान्तरापत्तिवत् द्वयं ज्ञेयम् ।।३५।। देवमनुष्याकाराणामभावे-ऽपि जीवस्य संसृतिर्न निवर्तते, लिङ्गरूपेण मनसोऽनादिकालतः साहित्यात्, अतः संसृते-र्निवृतिर्न भवति ।।३६।। पुरुषार्थस्वरूपस्य जीवस्य यतो मनसोऽनर्थपरंपरारूपा संसृतिर्भवति, तस्याः निवृत्तिस्तु गुरौ श्रीवासुदेवे च भक्त्यैव भवति ।।३७।। सम्यग् रूपेण वासुदेवे भगवति कृतो भक्तियोगो वैराग्यं ज्ञानं च जनयिष्यति ।।३८।। हे राजर्षे! श्रीमद्भगवत्कथामाश्रित्य स्थितो भक्तियोगः श्रद्दधानस्य कथाश्रवणं तच्चिन्तनं च नित्यदा कुर्वतो –

सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः। शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः
।।३९।। यत्र भागवता राजन् साधवो विशदाशयाः। भगवद्गुणानुकथनश्रवण-
व्यग्रचेतसः।।४०।। तस्मिन् महन् मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः
स्रवन्ति। ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्तान्न स्पृशन्त्यशनतृड्भयशोकमोहाः
।।४१।। एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः। न करोति हरेर्नूनं कथामृतनिधौ
रतिम्।।४२।। प्रजापतिपतिः साक्षाद्भगवान् गिरिशो मनुः। दक्षादयः प्रजाध्यक्षा
नैष्ठिकाः सनकादयः।।४३।। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठ
इत्येते मदन्ता ब्रह्मवादिनः।।४४।। शब्दब्रह्मणि दुष्पारे चरन्त उरविस्तरे। मन्त्र-
लिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुःपरम्।।४६।। यदा यस्यानुगृह्णाति भगवानात्म-
भावितः। स जहाति मतिं लोके वेदे च परिनिष्ठिताम्।।४७।। तस्मात् कर्मसु
बर्हिष्मन्नज्ञानादर्थकाशिषु। मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ।।४८।।

।। सङ्ग्रहोक्तिः ।।

हृदयेऽचिरादेवोदेष्यति।।३९।। हे राजन्! विमलान्तःकरणाः भगवत्कथाश्रवणे व्यस्तमानसा भागवताः साधवो यत्र वसन्ति।।४०।। तत्र महद्भिः सद्भिः कीर्त्तिता भगवच्चरित्रामृतपूर्णाः कथासरितः परितः प्रवर्त्तन्ते, हे नृप! ताः सरिद्रूपा भगवत्कथा ये जना अतृप्तैः सावधानैः कर्णैः पिबन्ति तान् क्षुत्तृट्भयशोकमोहा न बाधन्ते।।४१।। देहस्वभावजैरेतैः क्षुत्तृषादिभिः नित्यमुपद्रुतो जीवलोको हरिकथामृतसिन्धौ रतिं न करोति।।४२।। प्रजापतिर्ब्रह्मा, भगवान् गिरिशः, स्वायंभुवो मनुः, दक्षादयः प्रजापतयः, सनकादय नैष्ठिकब्रह्मचारिणः।।४३।। मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, भृगुः, वसिष्ठः, मत्प्रमुखाः, ये सर्वे ब्रह्मवादिनः, बृहस्पतिव्यासादयः, सर्वेऽद्यापि तपोविद्यासमाधिभिरुपासीनाः सन्तोऽपि सर्वसाक्षिणं परमेश्वरं न पश्यन्ति।।४४-४५।। अतिविस्तृते दुष्पारे वेद ऐहिकामुष्मिकफलेच्छवो मन्त्रलिङ्गैर्विभक्तं देववर्गं भजन्तः कर्मजडास्ते परं परमात्मानं न विदुः।।४६।। यदा कायवाङ्मनोभिरुपासितो भगवान् यमनुगृह्णाति स भक्तो लोके वेदे च परिनिष्ठितां मतिं जहाति।।४७।। हे बर्हिष्मन्! भगवदनुग्रहस्यैव मुक्त्युपायत्वात् प्रकाशमानेषु श्रोत्रप्रियेषु नश्वराल्पफलेषु कर्मसु त्वं

स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः। आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ।।४९।। आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमण्डलम्। स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम्।।५०।। तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया। हरिर्देह-भृतामात्मा स्वयं प्रकृतिरीश्वरः। तत्पादमूलं शरणं यतः क्षेमो नृणामिह।।५१।। स वै प्रेष्ठतमश्चात्मा यतो न भयमण्वपि। इति स वेद वै विद्वान्यो विद्वान् स गुरुर्हरिः।।५२।। प्रश्नं एवं हि संछिन्नो भवतः पुरुषर्षभ। अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ।।५३।। क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम्। अग्रे वृकानसुतृपोऽविगणय्य यान्तं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नम्।।५४।। सुमनः समधर्माणां स्त्रीणां शरण आश्रमे पुष्पमधुगन्धवत् क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्व्योपस्थादि विचिन्वन्तं मिथुनीभूय तदभिनिवेशितमनसं षडङ्घ्रि-गणसामगीतवद् अतिमनोहरवनिताजनालापेष्वतितरां प्रलोभितकर्णमग्रे वृकयूथव-दात्मन आयुर्हरतोऽहोरात्रादिकालविशेषानविगणय्य गृहेषु विहरन्तं पृष्ठतः परोक्षम-नुप्रवृत्तो लुब्धकः कृतान्तोऽन्तःशरेण यमिह पराविध्यति तमिममात्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसि।।५५।।

।। सङ्ग्रहोक्तिः।।

पुरुषार्थबुद्धिं मा कृथाः।।४८।। ते रजस्तमःप्रचुरमतयो वेदं कर्मपरमाहुः, अतद्विदस्ते यत्र जनार्दनोऽस्ति तमात्मतत्त्वं न विदुः।।४९।। त्वं तु प्राचानाग्रैर्दर्भैः समग्रं भूमण्डलमास्तीर्य विहिताद् बहुपशुवधादहंकारी स्तब्धश्च सन् भगवदाराधनरूपमुत्तमं कर्म न जानासि।।५०।। भगवत्प्रसन्नाहेतु यत् तदेव कर्म, येन ज्ञानेन हरिभक्तिः स्यात् सैव विद्या, सर्वकारणरूपो हरिर्देहभृतामात्मा ईश्वरश्च भवति, तत्पादमूलमेव शरणमस्ति यतो नृणामात्यन्तिकं सुखं स्यात् ।।५१।।यतो हरिः प्रेष्ठतमोऽन्तर्यामी च भवति, अतस्तत्समाश्रयणे कृते सति कालादेर्भयमणु-मात्रमपि नास्ति, इत्थं यो वेद, स एव विद्वान्, य एवंभूतो गुरुः स हरिरेव।।५२।। हे पुरुषर्षभ! भवतः प्रश्न एवं दत्तोत्तरो जातः, एतद्विषये गुह्यं वदतो मे सुनिश्चितं वचः शृणु।।५३।। क्षुद्रफलभोक्तारं मनः संकल्पाधीनानां स्त्रीणां गृहे परस्परं स्त्रिया सह मिलित्वा

सत्वं विचक्ष्य मृगचेष्टितात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते।
जह्यङ्गनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण।।५६।। *राजोवाच*
- श्रुतमन्वीक्षकं ब्रह्मन् भगवान् यदभाषत। नैतज्जानन्त्युपाध्यायाः किं न
ब्रूयुर्विदुर्यदि।।५७।। संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान्। ऋषयोऽपि
हि मुह्यन्ति यत्र नेन्द्रियवृत्तयः।।५८।। कर्माण्यारभते येन पुमानिह विहाय तम्।
अमुत्रान्येन देहेन जुष्टान्यसकृदश्नुते।।५९।। इति वेदविदां वाचः श्रूयते तत्र तत्र
ह। कर्म यत् क्रियते प्रोक्तं परोक्षं न प्रकाशते।।६०।।

।। सङ्ग्रहोक्तिः ।।

भृङ्गसदृशवनितादिगायकगीतेषु लुब्धकर्णं स्वपुरतो निर्दयान् वृकानविगणय्य पृष्ठे लुब्धकबाणभिन्नं ,मृगसदृशमात्मानं मृगय = पर्यालोचय ।।५४।। मूलव्याख्यासारः - पुष्पसमानधर्माणां स्त्रीणां गृहस्थाश्रमे पुष्पगतमकरन्दलेशवत् अत्यल्पं काम्यकर्मणां विपाकजं रसनोपस्थेन्द्रियोपभोग्यादि विषयसुखलेशं विचिन्वन्तं, स्त्रीभिः सह मिलित्वा तासु समवेशित-मानसं भ्रमरगणसम्बन्धिसामगीतसदृशेषु मधुरध्वनियुतमानसमोषकेषु इच्छाविषयकस्त्री-जनोदितसंभाषणेषु, अत्यन्तं प्रलोभितकर्णं पुरतो वृकयूथवत् स्वस्याऽऽयुर्हरतोऽहोरात्रादीन-विगणय्य गृहिणीभिर्वैषयिकसुखं समनुभवन्तं पृष्ठतः मारयितुं प्रवृत्तो लुब्धकः कृतान्तोऽन्तःशरेण लोके यं दूरादेव पराविध्यति, अत एव भिन्नहृदयं तं देहिनं त्वदात्मानम् अहो! राजन्! द्रष्टुमर्हसि ।।५५।। त्वमात्मनो मृगविचेष्टितं विचक्ष्य, हृदि चित्तं नियच्छ, नदीमिव वर्तमानां बहिर्वृत्तिं नियच्छ, अतिकामुकयूथगाथं गृहाश्रमं जहि, शरणागतपालकभगवच्छरणं गच्छ, एवं क्रमेण विरम।।५६।। *राजोवाच* - हे ब्रह्मन्! भवान् यदभाषत, तदात्मोपयोगि श्रोतव्यं मया श्रुतम्. एतद् उपाध्याया न जानन्ति, यदि विदुः मह्यं किमर्थं न ब्रूयुः।।५७।। हे नारद! अत्र तत्त्वविषये मे यो महान् संशयः, स त्वया छिन्नः, अतीन्द्रियविषये तु ऋषयोऽपि मुह्यन्ति ।।५८।। पुमान् येन देहेन कर्माणि इह आरभते, तं देहं इहैव विहाय परलोकेऽन्येन देहेन पूर्वदेहोपार्जितानि फलानि निरन्तरं भुङ्क्ते, ।।५९।। एवंविधा वेदविदां वाचः श्रूयते तथा च जनैर्यत् कर्म क्रियते तच्च परोक्षं सत् न प्रकाशते।।६०।।

नारद उवाच - येनैवारभते कर्म तेनैवामुत्र तत्पुमान्। भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वकम्।।६१।। शयानमिममुत्सृज्य श्वसन्तं पुरुषो यथा। कर्मात्मन्याहितं भुङ्क्ते तादृशेनेतरेण वा।।६२।। ममैते मनसा यद्यदसावहमिति ब्रुवन्। गृह्णीयात्तत्पुमान् राद्धं कर्म येन पुनर्भवः।।६३।। यथानुमीयते चित्तमुभयै-रिन्द्रियेहितैः। एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः।।६४।। नानुभूतं क्वचानेन देहेनादृष्टमश्रुतम्। कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि।।६५।। तेनास्य तादृशं राजन् लिङ्गिनो देहसंभवम्। श्रद्धस्वाननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति ।।६६।। मन एव मनुष्स्य पूर्वरूपाणि शंसति। भविष्यतश्च भद्रं ते तथैव न भविष्यतः।।६७।। अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते। यथा तथानुमन्तव्यं देशकालक्रियाश्रयम् ।।६८।। सर्वे क्रियानुरोधेन मनसीन्द्रियगोचराः। आयान्ति वर्गशो यान्ति सर्वे समनसो जनाः।।६९।।

।। सङ्ग्रहोक्तिः।।

नारद उवाच - पुमान् येन निमित्तभूतेन मनसा कर्म आरभते, विश्लेषरहितेन तेनैव मनसा लिङ्गशरीरेण स्वकं सुखदुःखादि फलं परलोके भुङ्क्ते।।६१।। यथा शयानं जीवन्तं देहे पुमानिह परित्यज्य मनसि संस्काररूपेण स्थितं कर्म स्वप्नेऽन्येन देहेन भुङ्क्ते, लिङ्गात्मनो-रनुवृत्तेर्लोकान्तरेऽपि तथैव भुंक्ते।।६२।। "एते पुत्रादयो मम" "असावहं ब्राह्मणः" इति ब्रुवन् मनसा यं यं देहं गृह्णीयात् तत्ततो देहात् सिद्धं कर्म पुमान् गृह्णीयात्, येनाऽहंकारगृहीतेन कर्मणा पुनर्जन्म भवति।।६३।। यथा ज्ञानकर्मरूपैरिन्द्रियैर्मनोऽनुमीयते, एवं चित्तवृत्तिभिः प्राग्देहजं कर्म लक्ष्यते ।।६४।।इह जन्मन्यनेन देहेन नाऽनुभूतमदृष्टमश्रुतं वा क्वचित् यद्रूपं यत्प्रकारं बुद्धिस्थमुपलभ्यते,।।६५।।हे राजन्! तेन हेतुनाऽस्य वासनाश्रयस्य जीवस्य तादृशं पूर्वदेहसंभवं श्रद्धस्व, यतोऽननुभूतोऽर्थः मनसि स्फूर्तिं प्राप्तुं नाऽर्हति।।६६।। हे राजन्! ते भद्रमस्तु, उच्चत्वं प्राप्स्यतः तथैव नीचत्वं प्राप्स्यतः मनुष्यस्य पूर्वरूपाणि भाव्यरूपाणि च मन एव शंसति।।६७।। अत्र जन्मनि क्वचिदप्यदृष्टमश्रुतं च मनसि यथा दृश्यते तथा देशकालक्रियाश्रयमनुमन्तव्यम्।।६८।।सर्व इन्द्रियविषयभूतार्था मनसि क्रियानुरोधेन आयान्ति,

सत्त्वैकनिष्ठे मनसि भगवत्पार्श्ववर्त्तिनि। तमश्चन्द्रमसीवेदमुपरज्यावभासते।।७०।।
नाहं ममेति भावो यः पुरुषे व्यवधीयते। यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान्
।।७१।। सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः। नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि
।।७२।। गर्भे बाल्येऽप्यपौष्कल्यादेकादशविधं तदा। लिङ्गं न दृश्यते यूनः कुह्वां
चन्द्रमसो यथा।।७३।। अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते। ध्यायतो विषयानस्य
स्वप्नेऽनर्थागमो यथा।।७४।। एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम्। एष
चेतनया युक्तो जीव इत्याभिधीयते।।७५।। अनेन पुरुषो देहानुपादत्ते विमुञ्चति।
हर्षं शोकं भयं दुखं सुखं चानेन विन्दति।।७६।। यथा तृणजलूकेयं नापयात्यपयाति
च। न त्यजेन्म्रियमाणोऽपि प्राग्देहाभिमतिं जनः।।७७।। यावदन्यं न विन्देत
व्यवधानेन कर्मणाम्।

।। सङ्ग्रहोक्तिः ।।

भोग्यत्वेन प्रविशन्ति यान्ति च, मनस इत्थंभूतस्वभावत्वात् सर्वे जनाः समनस एव भवन्ति।।६९।।
तत्त्वैकनिष्ठे भगवद्ध्यानपरे मनसि वासनात्मानाऽवस्थितमिदं सर्वं संयोगं प्राप्याऽभासते,
यथा चन्द्रमसि उपरज्य=संयोगं प्राप्य तमः राहुरिव भासते तद्वत्।।७०।। हे राजन्
बुद्धिमनइन्द्रियगुणानां संघो, योऽनादिर्वर्तते, स यावद्वर्तते तावत् "अहं मम" इति स्थूलदेह-
संबन्धो विच्छिन्नो न भवति।।७१।। इन्द्रियैरहंकारास्पदवस्तुग्रहण एव ह्यहंकारः स्फुरति
सुषुप्तिमूर्च्छोपतापापमृत्युप्रज्वारादिषु "अहं" इति ज्ञानं न प्रकाशते।।७२।। पुंसः तारुण्ये
यथा एकादशेन्द्रियाणां प्रवृत्तिबाहुल्यादहंकरणात्मकं लिङ्गं दृश्यते तथा बाल्ये गर्भावस्थादौ
लिङ्गं न दृश्यते, अमावास्यायां चन्द्रमसो रूपमिव।।७३।। विषये विद्यमानेऽपि संसारो न
निवर्तते, विषयान् ध्यायतः पुंसः स्वप्ने यथाऽनर्थागमः जायते तद्वत्।।७४।। पञ्च तन्मात्राणि,
त्रयो गुणाः, मनःकर्मज्ञानेन्द्रियप्राणाः एतत्संघात्मकलिङ्गशरीरविशिष्टः ज्ञानाश्रयो हि जीव
इत्यभिधीयते।।७५।। लिङ्गशरीरेण हि जीवः स्थूलशरीराणि गृह्णाति, हर्ष-शोक-भय-सुख-
दुःखानि चानुभवति।।७६।। यथा तृणजलौका परं तृणान्तरं गृहीत्वैव पूर्वं तृणं त्यजति तद्वत्
म्रियमाणो जनोऽपि परदेहप्राप्तिपर्यन्तं पूर्वदेहाभिमानं न त्यजति।।७७।। यावत् देहारम्भककर्मणां

मन एव मनुष्येन्द्र भूतानां भवभावनम् ।।७८।। यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेऽसकृत् । सति कर्मण्यविद्यायां बन्धः कर्मण्यनात्मनः ।।७९।। अतस्तदपवादार्थं भज सर्वात्मना हरिम् । पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ।।८०।। *मैत्रेय उवाच* – भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् । प्रदर्श्य नृपमामन्त्र्य सिद्धलोकं ततोऽगमत् ।।८१।। प्राचीनबर्ही राजर्षिः प्रजासर्गाभिरक्षणे । आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ।।८२।। तत्रैकाग्रमना धीरो गोविन्दचरणाम्बुजम् । विमुक्तसङ्गोऽनुभजन् भक्त्या तत्साम्यतामियात् ।।८३।। एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ । यः श्रावयेद्यः शृणुयात्स लिङ्गेन विमुच्यते ।।८४।। एतद् मुकुन्दयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशोचम् । यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन् भवे भ्रमति मुक्तसमस्तबन्धः ।।८५।। अध्यात्मपरोक्षमिदं मयाभिहितमद्भुतम् । एवं स्त्रियाऽऽश्रमं पुंसश्छिन्नोऽमुत्र च संशयः ।।८६।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे ऐनत्रिंशोऽध्यायः ।।२९ ।।

।। सङ्ग्रहोक्तिः ।।

परिपाकाभावेनाऽन्यदेहं न विन्देत तावत् पर्यन्तं पूर्वदेहस्याऽभिमानं न त्यजति, हे राजन्! प्राणिनां मन एव संसारहेतुर्भवति ।।७८।। इन्द्रियैर्भुक्तान् विषयान् ध्यायन् यदा कर्माणि वारंवारं करोति तदा मनः संसारहेतुर्भवति, एवमविद्यया कर्म, कर्मणा चाविद्या, इत्यनादिः प्रवाहः ।।७९।। अतश्चिदचिदात्मकं सर्वं जगद् भगवदात्मकं पश्यन् यतो हरेर्विश्वस्योत्पत्तिस्थितिलया भवन्ति, संसारनिवृत्त्यर्थं सर्वात्मना तं हरिं भज ।।८०।। *मैत्रेय उवाच* – भगवद्भक्ताग्रगण्यो भगवान् नारदो जीवपरमात्मनोः स्वरूपमुपदिश्य प्राचीनबर्हिषमामन्त्र्य ततो ब्रह्मलोकमगमत् ।।८१।। ततः प्राचीनबर्हिः प्रजानां पालनाय पुत्रानादिश्य तपश्चरणार्थं कपिलाश्रममगमत् ।।८२।। तत्र वशीकृतेन्द्रिय एकाग्रमना गोविन्दचरणाम्बुजं भजन् विमुक्तसङ्गः सन् तत्साधर्म्यतां प्राप्तवान् ।।८३।। हे अनघ! देवर्षिनारदेन कथितमेतदध्यात्मज्ञानं यो पुरुषः श्रावयेत् शृणुयाच्च स लिङ्गदेहाद् विमुच्यते ।।८४।। मुकुन्दयशसा युक्तमेतदध्यात्मज्ञानं पवित्रतापादकं

अथ त्रिंशोऽध्यायः ।।३०।।

विदुर उवाच – ये त्वयाभिहिता ब्रह्मन् सुताः प्राचीनबर्हिषः। ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ।।१।। किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः। आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ।।२।। *मैत्रेय उवाच* – प्रचेतसोऽन्तरुदधौ पितुरादेशकारिणः। जपयज्ञेन तपसा निरञ्जनमतोषयन् ।।३।। दशवर्षसहस्रान्ते पुरुषस्तु सनातनः। तेषामाविरभूत् कृच्छ्रं शान्तेन शमयन् रुचा ।।४।। सुपर्णस्कन्धमारूढो मेरुशृङ्गमिवाम्बुदः। पीतवासा मणिग्रीवः कुर्वन् वितिमिरा दिशः ।।५।। काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः।

।। सङ्ग्रहोक्तिः ।।

नारदमुखाद्विनिःसृतं, मनःशोधकं, सर्वोत्कृष्टफलप्रदं चास्ति, एतद् ज्ञानं कीर्त्तयन् पुमान् समस्तबन्धनमुक्तः सन्नस्मिन् संसारे न भ्रमति ।।८५।। अध्यात्मपरोक्षवादात्मकमिदमद्भुतं पुरञ्जनव्याख्यानं मया तुभ्यं कथितम्, एतच्छृण्वत बुद्ध्या संगतस्य क्षेत्रज्ञस्य संसारो निवर्तते, परलोकविषयकः संशयोऽपि ते छिन्नः ।।८६।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामेकोनत्रिंशोऽध्यायः ।।२९।।

अथ त्रिंशोऽध्यायः ।।३०।।

शिवाद् वरं लब्ध्वा प्रचेतसां राज्यपालनम्

विदुर उवाच – हे ब्रह्मन्! प्राचीनबर्हिषः सुताः प्रचेतसो ये त्वया प्रोक्तास्ते रुद्रगीतेन हरिं स्तुत्वा किं फलमापुः ।।१।। हे मैत्रेय! प्रचेतसो यदृच्छया गिरिशं प्रसाद्य, तदनुग्रहभाजनास्ते परममोक्षं प्रापुः, ततः पूर्वं त इहलोके किं प्रापुः ।।२।। *मैत्रेय उवाच* – पितुरादेशकारिणः प्रचेतसः समुद्रजले तपसा जपयज्ञेन च परमपुरुषं हरिमेवाऽतोषयन् ।।३।। सनातनः परमपुरुषो हरिर्दशवर्षसहस्रान्ते प्रचेतसां तपःक्लेशं स्वकान्त्या शमयन् सत्त्वमयेन वपुषाऽऽविरंभूत् ।।४।। मेरुशृङ्गं मेघ इव गरुडस्कन्धमारुढः पीताम्बरधरः, कौस्तुभग्रीवः, दिशःप्रकाशयन् ।।५।।

अष्टायुधैरनुचरैर्मुनिभिः सुरेन्द्रैरासेवितो गरुडकिन्नरगीतकीर्तिः।।६।। पीनायताष्ट-भुजमण्डलमध्यलक्ष्म्या स्पर्धच्छ्रिया परिवृतो वनमालयाऽऽद्यः। बर्हिष्मतः पुरुष आह सुतान् प्रपन्नान् पर्जन्यनादरुतया सघृणावलोकः।।७।। *श्रीभगवानुवाच* - वरं वृणीध्वं भद्रं वो यूयं मे नृपनन्दनाः। सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः।।८।। योऽनुस्मरति सन्ध्यायां युष्माननुदिनं नरः। तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम्।।९।। ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः। स्तुवन्त्यहं काम-वरान्दास्ये प्रज्ञां च शोभनाम्।।१०।। यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः। अथो व उशती कीर्तिर्लोकाननु भविष्यति।।११।। भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः। य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति।।१२।। कण्डोः प्रम्लोचया लब्धा कन्या कमललोचना। तां चापविद्धां जगृहुर्भूरुहा नृपनन्दनाः।।१३।। क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम्। देशिनीं रोदमानाया निदधे स दयान्वितः।।१४।।

।। सङ्ग्रहोक्तिः।।

शोभमानेन कनकविभूषणेन भ्राजत्कपोलवदनः, विलसत्किरीटः, अष्टायुधैर्युक्तः, मुनिभिः सुरेन्द्रैः सेवितः, गरुडकिन्नरगीतकीर्त्तिः अष्टभुजमध्ये हृदये लक्ष्म्याः स्पर्द्धच्छ्रिया वनमालया परिवृतः स भगवान् श्रीहरिः सकरुणः सन् प्रपन्नान् प्रचेतसः मेघगम्भीरया वाचा प्राह।।६-७।। *श्रीभगवानुवाच* - हे नृपनन्दना! यूयं मत्तो वरं वृणीष्व, युष्माकं मङ्गलमस्तु, यूयं सुहृद्भावेन तुल्यधर्माणः स्थ, युष्माकं सौहार्देन तुष्टोऽस्मि।।८।। यो नरः सायमनुदिनं युष्मान् अनुसरति तस्य भ्रातृष्वात्म्यसाम्यं भूतेषु सौहृदं च भविष्यति।।९।। ये नराः सायं प्रात एकाग्रमनसा रुद्रगीतेन मां स्तुवन्ति, तेभ्योऽप्यहं वाञ्छितवरान् शोभनां प्रज्ञां च दास्ये।।१०।। यूयं पितुराज्ञां मुदा गृहीतवन्तोऽतो युष्माकं यशो लोके विस्तारं प्राप्स्यति।।११।। गुणैर्ब्रह्मणा तुल्यो विश्रुतो दक्षो वः पुत्रो भविता, य आत्मवीर्येण त्रिलोकीं पूरयिष्यति।।१२।। हे नृपनन्दना! कण्डोर्मुनेः सकाशात् प्रम्लोचनया कमललोचना कन्या लब्धा, उभाभ्यां त्यक्तां तां कन्यां वृक्षा जगृहुः।।१३।। क्षुत्क्षामायास्तस्या मुखे दयान्वितः सोमो राजा "अमृतवर्षिणीं स्वदेशिनीमङ्गुलीं निदधे।।१४।।

प्रजाविसर्ग आदिष्टः पित्रा मामनुवर्तता। तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् ।।१५।। अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा। अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया।।१६।। दिव्यवर्षसहस्राणां सहस्रममितौजसः। भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम।।१७।। अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः। उपयास्यथ मद्धाम निर्विद्य निरयादतः।।१८।। गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम्। मद्वार्तायातयामानां न बन्धाय गृहा मताः।।१९।। नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः। न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः।।२०।। *मैत्रेय उवाच* - एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्राञ्जलयः प्रचेतसः। तद्दर्शनध्वस्ततमोरजोमला गिरा गृणन् गद्गदया सुहृत्तमम्।।२१।। *प्रचेतसः ऊचुः* - नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय। मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः।।२२।। शुद्धाय शान्ताय नमः स्वनिष्ठे मनस्यपार्थे विलसद्द्वयाय। नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय।।२३।।

।। सङ्ग्रहोक्तिः ।।

मामनुवर्त्तमानेन पित्रा प्रजासर्ग आदिष्टा यूयं वरारोहां तां कन्यामुद्वहत, मा चिरम्।।१५।। अपृथग्धर्मशीलानां वः सर्वेषामर्पिताशयाऽपृथग्धर्मशीला सुमध्यमा सा पत्नी भूयात्।।१६।। अमितवर्षसहस्रपर्यन्तम् अप्रतिहतबला यूयं ममानुग्रहात् दिव्यान् भौमांश्च भोगान् भोक्ष्यथ ।।१७।। अथाऽनपायिन्या मद्भक्त्या पक्वगुणाशया यूयं संसारान् निर्विद्य मद्धाम प्राप्स्यथ ।।१८।। गृहस्थाश्रमे स्थितानामनभिसंहितफलकर्मणां मद्वार्तया यातयामानां गृहाश्रमो बन्धाय न भवति।।१९।। मत्कथाश्रवणात् श्रोतृणां हृदये ब्रह्मसाक्षात्कारो भवति, शास्त्रेषु यद् ब्रह्माभिहितं तद् अहमेवाऽस्मि, अतो मां प्राप्ता न मुह्यन्ति न शोचन्ति न हृष्यन्ति च ।।२०।। *मैत्रेय उवाच* - एवं ब्रुवाणं जनार्दनं तद्दर्शनध्वस्ततमोरजोमला प्रचेतसः प्राञ्जलयः सन्तः सुहृत्तमं तं गद्गदया गिरा तुष्टुवुः।।२१।। *प्रचेतस ऊचुः* - प्रणतक्लेशनाशाय, निरूपितोदारगुणाभिधानाय, मनोवचोधिकजवायाऽतीन्द्रियाय, ते नमोनमः।।२२।। शुद्धाय शान्ताय, विश्वोत्पत्तिस्थितिलयाय, गृहीतमायागुणविग्रहाय ।।२३।।

नमो विशुद्धसत्त्वाय हरये हरिमेधसे। वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ।।२४।। नमः कमलनाभाय नमः कमलमालिने। नमः कमलपादाय नमस्ते कमलेक्षण ।।२५।। नमः कमलकिञ्जल्कपिशङ्गामलवाससे। सर्वभूतनिवासाय नमो युङ्क्ष्महि साक्षिणे ।।२६।। रूपं भगवता त्वेतदशेषक्लेशसंक्षयम्। आविष्कृतं नः क्लिष्टानां किमन्यदनुकम्पितम् ।।२७।। एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः। यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररन्धन ।।२८।। येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम्। अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः ।।२९।। असावेव वरोऽस्माकमीप्सितो जगतः पते। प्रसन्नो भगवान् येषामपवर्गगुरुर्गतिः ।।३०।। वरं वृणीमहेऽथापि नाथ त्वत्परतः परात्। न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे ।।३१।। पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यन्न सेवते। त्वदङ्घ्रिमूलमासाद्य साक्षात्किं किं वृणीमहे ।।३२।। यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः। तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ।।३३।।

।। सङ्ग्रहोक्तिः ।।

विशुद्धसत्त्वाय संसारहरमनीषाय, वासुदेवाय, कृष्णाय, सर्वसात्त्वतां प्रभवे नमः ।।२४।। कमलनाभाय, कमलमालिने, कमलपादाय, कमलेक्षणाय च नमोनमः ।।२५।। कमलकिञ्जल्कपीतामलाम्बराय, सर्वभूतनिवासाय, सर्वसाक्षिणे नमस्कुर्महे ।।२६।। अशेषक्लेशक्षयकरं रूपं भगवता क्लिष्टानां नो दर्शितम्, अतः परं भवदनुकम्पितं किम्? ।।२७।। हे अमङ्गलनिवारक! दीनेषु वत्सलैः प्रभुभिरेतावदेव कर्त्तव्यम्, "एतेऽस्मदीयाः सन्ति" इति योग्यसमये स्वबुद्ध्या यदनुस्मर्यते ।।२८।। येन भवत्कृतानुस्मरणेन क्षुद्राणां भूतानामुपशान्तिः स्यात्, सर्वान्तर्यामी भवानस्माकं कामान् जानात्येव ।।२९।। हे जगत्पते! यो भगवान् अस्माकं प्रसन्नः, एष एवेप्सितो वरोऽस्ति, यतस्त्वमस्माकमपवर्गगुरुर्गतिरसि ।।३०।। तथापि हे नाथ! परतः परात् त्वत्तो वरं वृणीमहे, त्वद्विभूतीनामन्तो नास्ति, अतो वेदैरनन्त इति गीयसे ।।३१।। अनायासेन कल्पवृक्षे प्राप्ते सति भ्रमरोऽन्यं वृक्षं न सेवते, एवं साक्षात् त्वच्चरणारविंदं प्राप्य वयं किमपि न वृणीमहे ।।३२ ।। हे हरे! तव मायया मोहिता वयं यावत् संसारे भ्रमामस्तावत् भागवतानां

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्। भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः
।।३४।। यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः। निर्वैरं यत्र भूतेषु नोद्वेगो
यत्र कश्चन।।३५।। यत्र नारायणः साक्षान्न्यासिनां परमा गतिः। प्रस्तूयते सत्कथासु
मुक्तसङ्गैः पुनः पुनः।।३६।। तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया। भीतस्य
किं न रोचेत तावकानां समागमः।।३७।। वयं तु साक्षाद्भगवन् भवस्य प्रियस्य
सख्युः क्षणसङ्गमेन। सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गता
स्मः।।३८।। यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या। आर्या
नताः सुहृदो भ्रातरश्च भूतानि सर्वाण्यनसूययैव।।३९।। यन्नः सुतप्तं तप एतदीश
निरन्धसां कालमदभ्रमप्सु। सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय
।।४०।। मनुः स्वयम्भूर्भगवान् भवश्च येऽन्ये तपोज्ञानविशुद्धसत्त्वाः। अदृष्टपारा
अपि यन्महिम्नः स्तुवन्त्यथोत्वामसमं गृणीमः।।४१।।

।। सङ्ग्रहोक्तिः ।।

साधूनां समागमो नो भवे भवे स्यात्।।३३।। भगवत्सम्बन्धिनां साधूनां सङ्गस्य लेशेनाऽपि स्वर्गमपवर्गं वा न तुलयामः।।३४।। येषु भागवतेषु पापशोधिका भगवच्चरित्रसम्बन्धवत्यः कथाः प्रस्तूयन्ते, याभ्यः तृष्णायाः क्षयो भवति, यत्र निर्वैरभावादुद्वेगो भयं वा नास्ति।।३५।। यासु कथासु मुक्तसङ्गैः साधुभिः पुनः पुनः परमगतिर्नारायणः प्रस्तूयते।।३६।। तीर्थानां पावनेच्छया पद्भ्यां विचरतां भवत्साधूनां समागमः संसाराद् भीतस्य किं न रोचते?।।३७।। हे भगवन्! वयं तु त्वत्प्रियस्य सख्युः, दुश्चिकित्सस्य संसाररूपमृत्योर्वैद्यवद्वर्तमानस्य शिवस्य, क्षणसंगमेन संसाररोगनिवारकं त्वां शरणं प्राप्ताः स्मः।।३८।। हे भगवन्! अस्माकं स्वधीतं, सदाऽनुवृत्त्या प्रसन्नतां प्राप्ता गुरवः, विप्राः, वृद्धाः, सदा नमस्कृताः, सुहृदः भ्रातरः, अनसूयया प्रसादितानि सर्वाणि भूतानि, अस्माभिः समुद्रे बहुकालं कृतं निरन्नं तपश्च, सर्वमेतत् सर्वेश्वरस्य परमपुरुषस्य तोषाय भवतु।।३९-४०।। स्वायंभुवो मनुः, ब्रह्मा, शिवः, येऽन्ये तपोज्ञान-विशुद्धात्मानः, ते सर्वे भवन्महिम्नः पारमप्राप्यं स्वमत्यनुरूपं त्वां स्तुवन्ति, एवं वयमपि स्वमत्यनुसारं स्तुमः।।४१।।

नमः समाय शुद्धाय पुरुषाय पराय च। वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः।।४२।। *मैत्रेय उवाच* - इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः। अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः।।४३।। अथ निर्याय सलिलात्प्रचेतस उदन्वतः। वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः।।४४।। ततोऽग्निमारुतौ राजन्नमुञ्चन्मुखतो रुषा। महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये।।४५।। भस्मसात्क्रियमाणांस्तान्द्रुमान् वीक्ष्य पितामहः। आगतः शमयामास पुत्रान् बर्हिष्मतो नयैः।।४६।। तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा। उपाजह्रुः प्रचेतोभ्य उपदिष्टाः स्वयम्भुवा।।४७।। ते च ब्रह्मण आदेशान् मारिषामुपयेमिरे। यस्यां महदवज्ञानादजन्यजनयोनिजः।।४८।। चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते। यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः।।४९।। यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा। स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन्।।५०।।

।। सङ्ग्रहोक्तिः ।।

अतः सर्वभूतसमाय विशुद्धाय, परमपुरुषाय, वासुदेवाय शुद्धसत्त्वमूर्तये तुभ्यं नमो नमः।।४२।। *मैत्रेय उवाच* - इति प्रचेतोभिः स्तुतः शरण्यवत्सलो भगवान् हरिः प्रीतः सन् "तथा भवतु" इत्याह, अतृप्तचक्षुषामनिच्छतामपि प्रचेतसां पश्यतां सतामपारपराक्रमो भगवान् स्वधाम ययौ।।४३।। अथ प्रचेतसः समुद्रस्य सलिलान्निर्गत्य स्वर्गं रोद्धुमिव उन्नततां प्राप्तैर्द्रुमैर्महीं छन्नां वीक्ष्य, तेभ्योऽकुप्यन्।।४४।। हे विदुर! ततो वीरुद्रहितां महीं कर्तुं प्रलयकाले संवर्तको रुद्र इव प्रचेतसः मुखतोऽग्निमारुतावमुञ्चन्।।४५।। पितामहो ब्रह्मा भस्मसात् क्रियमाणान् द्रुमान् वीक्ष्य तत्र समागतः सन् नीतिवाक्यैः प्रचेतसः शमयामास।।४६।। तदाऽवशिष्टा ये द्रुमा आसन् ते ब्रह्मणोपदिष्टा भीताश्च सन्तो दुहितरं प्रचेतोभ्यः समर्पयामासुः।।४७।। ते प्रचेतसोऽपि ब्रह्मण आदेशात् मारिषाख्यां स्त्रियमुपयेमे, यस्यां ब्रह्मात्मजो दक्षो शिवस्याऽवहेलनादजनि।।४८।। चाक्षुषे मन्वन्तरे प्राप्ते, पूर्वमन्वन्तरसर्गे कालेन नष्टे सति भगवता प्रेरितः सन् यः प्रजाः ससर्ज, स मारिषायां जातः।।४९।। यो दक्षो जायमानः सन् स्वीयरुचा सर्वतेजस्विनां तेज आच्छादितवान्, एवंभूतं तं "कर्मणि दक्षत्वात्" जना नाम्ना "दक्ष"

तं प्रजासर्गरक्षायामनादिर्भरतर्षभ। युयोज युयुजेऽन्यांश्च स वै सर्वप्रजापतीन्
।।५१।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे त्रिंशोऽध्यायः ।।३०।।

अथैकत्रिंशोऽध्यायः ।।३१।।

मैत्रेय उवाच – तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम्। स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात् ।।१।। दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा। प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ।।२।। तान्निर्जितप्राणमनोवचोदृशो जितासनान् शान्तसमानविग्रहान्। परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ।।३।। तमागतं त उत्थाय प्रणिपत्याभिनन्द्य च। पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ।।४।। *प्रचेतस ऊचुः* – स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः।

।। सङ्ग्रहोक्तिः ।।

इत्यब्रुवन् ।।५०।। हे भरतर्षभ! अनादिर्ब्रह्मा तं दक्षं प्रजासर्गरक्षायां युयोज, स दक्षश्चाप्यन्यान् सर्वप्रजापतीन् प्रजसर्गव्यापारे युयोज ।।५१ ।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यां त्रिंशोऽध्यायः ।।३०।।

अथ एकत्रिंशोऽध्यायः ।।३१।।

गृहात् प्रव्रजितानां प्रचेतसां नारदोपेशान्मुक्तिः

मैत्रेय उवाच – तत उत्पन्नविज्ञानास्ते प्रचेतसो भगवद्वचनं स्मरन्तः सन्तो. भार्यापोषणमात्मजाधीनं कृत्वा सद्य एव गृहात् प्राव्रजन् ।।१।। सर्वभूतात्मज्ञानवता ज्ञानयज्ञेन दीक्षिता बभूवुः, प्रतीच्यां दिशि समुद्रतटे यत्र जाजलिर्नाम ऋषिः सिद्धोऽभूत् ।।२।। निर्जितप्राणमनोवचोदृशो जितासनान् शान्तसमानविग्रहान् परब्रह्मणि योजितमनसः प्रचेतसः सुरासुरेड्यो नारदो ददर्श ।।३।। ते प्रचेतसः समायातं नारदं प्रत्युत्थाय प्रणिपत्याऽभिनन्द्य च यथाविधि पूजयित्वा सुखासीनं मुनिं तमब्रुवन् ।।४।। हे सुरर्षे! ते स्वागतम्, दिष्ट्या नो दर्शनं गतः, -

तव चङ्क्रमणं ब्रह्मन्नभयाय यथा रवेः ।।५।। यदादिष्टं भगवता शिवेनाधोक्षजेन च। तद् गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ।।६ ।। तन्नः प्रद्योतयाध्यात्मं ज्ञानं तत्त्वार्थदर्शनम्। येनाञ्जसा तरिष्यामो दुस्तरं भवसागरम् ।।७।। *मैत्रेय उवाच* – इति प्रचेतसा पृष्टो भगवन्नारदो मुनिः। भगवत्युत्तमश्लोक आविष्टात्माऽब्रवीन्नृपान् ।।८।। *नारद उवाच* – तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः। नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ।।९।। किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः। कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ।।१०।। श्रुतेन तपसा वा किं वचोभिश्चित्त-वृत्तिभिः। बुद्ध्या वा किं निपुणया बलेनेन्द्रियराधसा ।।११।। किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि। किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ।।१२।। श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः। सर्वेषामपि भूतानां हरिरात्माऽत्मदः प्रियः ।।१३।। यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः।

।। सङ्ग्रहोक्तिः ।।

हे ब्रह्मन्! लोकेषु तव संचरणं रवेरिव लोकानामभयाय भवति ।।५।। हे प्रभो! भगवता शिवेना-ऽधोक्षजेन च यदात्मतत्त्वमुपदिष्टं तद् गृहासक्तानां नः प्रायशो विस्मृतम् ।।६।। तत्त्वार्थदर्शनं तदध्यात्मं ज्ञानं नः प्रकाशाय, येन दुस्तरं संसारं सुखेन तरिष्यामः ।।७।। *मैत्रेय उवाच* – प्रचेतोभिरित्थं पृष्टो नारदो मुनिर्भगवत्युत्तमश्लोके निवेशितमनाः सन् तान् प्रत्यब्रवीत् ।।८।। *नारद उवाच* – येन जन्मादिना विश्वात्मा परमेश्वरो हरिः सेव्यते, नृणां जन्म, कर्माणि, आयुः, मनः, वचांसि, इत्येतानि सर्वाणि सार्थकानि भवन्ति, तानि भगवत्सेवाविधुराणि चेद् व्यर्थान्येव। ।९।। शौक्ल-सावित्र-याज्ञिकैः त्रिभिर्जन्मभिः, त्रयीप्रोक्तैः कर्मभिः, विबुधायुषा जीवनेन च किं फलं, यदि भगवत्सेवाविधुराणि स्युः ।।१०।।सत्कुले जन्मना, तपसा, वचोभिः, चित्तवृत्तिभिः, निपुणया बुद्ध्या, बलेन, इन्द्रियपाटवेन च यदि स्वस्वरूपप्रदो हरिर्नाऽऽराधितस्तर्हि तैः जन्मादिना किं फलम्? ।।११।। सांख्ययोगाभ्यां संन्यासस्वाध्यायाभ्यामन्यैः श्रेयःसाधनैश्च यद्यात्मप्रदो हरिर्नाराधितस्तर्हि साधितैरपि तैः किं प्रयोजन्? ।।१२।। सर्वेषां श्रेयःसाधनानां पराकाष्ठा भगवान् श्रीहरिरेवाऽस्ति, यतः सर्वेषामपि भूतानामन्तर्यामी प्रियः स्वात्मप्रदश्च

37

प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ।।१४।। यथैव सूर्यात्प्रभवन्ति वारः पुनश्च तस्मिन् प्रविशन्ति काले। भूतानि भूमौ स्थिरजङ्गमानि तथा हरावेव गुणप्रवाहः।।१५।। एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा। यथाऽसवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्यये ।।१६।। यथा नभस्यभ्रतमः प्रकाशा भवन्ति भूपा न भवन्त्यनुक्रमात्। एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमः सत्त्वमिति प्रवाहः।।१७।। तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम्। स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा।।१८।। निरस्त-संकल्पविकल्पमद्वयं द्वयापवादोपरमोपलम्भनम्। संज्ञप्तिमात्रं भजतामुया दृशा ह्यनादिमध्यान्तमजस्रनिर्वृतम् ।।१९।। दयया सर्वभूतेषु सन्तुष्ट्या येन केन वा। सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः।।२०।।

।। सङ्ग्रहोक्तिः ।।

सोऽस्ति।।१३।। यथा तरुमूले जलसेकेन तस्य तरोः स्कन्धभूजोपशाखाः तृप्यन्ति, यथा वाऽन्नभोजनादिन्द्रियाणां तृप्तिर्भवति तथाऽच्युतपूजनेन सर्वदेवपूजनं भवति।।१४।।यथाऽपो वर्षासमये सूर्यात् प्रभवन्ति पुनश्च तस्मिन्नेव प्रविशन्ति, यथा वा स्थावरजङ्गमानि भूतानि भूमेः प्रभवन्ति, पुनस्तस्यामेव प्रविशन्ति, तथा गुणप्रवाहरूपो प्रपञ्चो हरेरेवोद्भवति पुनस्त-स्मिन्नेव लीनो भवति।।१५।। एतद् जगत् परमात्मनः परं निवासस्थानम्, यथा सूर्यप्रभा तदपृथग्भूता सती तस्य शरीरमुच्यते, ततः कृत्स्नं जगदपि परमात्मनोऽपृथक्सिद्धविशेषणतया शरीरमेव, यथा चक्षुरादीन्द्रियाणि जाग्रति व्याप्रीयन्ते, स्वापादौ सुप्तशक्तयो भवन्ति, तथैव द्रव्यक्रियाज्ञानभिदाभ्रमात्यये ज्ञेयम्।।१६।। यथा नभसि मेघस्य प्रकाशोऽप्रकाशश्च भवति तद्वदेव परब्रह्मणि सर्वशक्तयः प्रकाशा अप्रकाशाश्च भवन्ति।।१७।। अशेषदेहिनामेनमात्मानं कालशरीरकं, प्रकृतिशरीरकं, जीवशरीरकं स्वतेजसा ध्वस्तगुणप्रवाहं, परमेश्वरमेकं भजध्वम् ।।१८।।निरस्तसंकल्पविकल्पं, सजातीयद्विजातीयवस्त्वभावाददद्वितीयं, देहात्मभ्रमनिवृत्तौ प्राप्यं, आदिमध्यान्तवर्जितं अजडस्वरूपं निरवधिकसुखात्मकं, परमात्मानं वक्ष्यमाणप्रकारेण भजत ।।१९।। सर्वभूतेषु दयया, यथोपलब्धेन संतुष्ट्या, अन्तर्बाह्येन्द्रिय निग्रहेण परमात्मा शीघ्रं

अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः।। निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि।।२१।। न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः। श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु।।२२।। श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यत्स्वपूर्णः। न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत् पुमान् रसज्ञः।।२३।। *मैत्रेय उवाच* - इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः। श्रावयित्वा ब्रह्मलोकं ययौ स्वायम्भुवो मुनिः।।२४।। तेऽपि तन्मुखनिर्यातं यशो लोकमलापहम्। हरेर्निशम्य तत्पादं ध्यायन्तस्तद्गतिं ययुः।।२५।। एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान्। प्रचेतसां नारदस्य संवादं हरिकीर्तनम्।।२६।। *श्रीशुक उवाच* - य एष उत्तानपदो मानवस्यानुवर्णितः। वंशः प्रियव्रतस्यापि निबोध नृपसंमतम्।।२७।। यो नारदादात्मविद्यामधिगम्य पुनर्महीम्। भुक्त्वा विसृज्य पुत्रेभ्य ऐश्वरं समगात्पदम्।।२८।।

।। सङ्ग्रहोक्तिः ।।

तुष्यति।।२०।। सकलैषणापारंगतो विमलस्वरूपो निरन्तरभक्तिभावोपहूतो निजजनवशगो हरिः सतां हृदयतो नभस इव न निःसरति।।२१।। निर्धनभगवद्भक्तप्रियो रसज्ञो हरिः कुसङ्गिजनैः कृतां पूजां न गृह्णाति, ये कुसङ्गिजनाः श्रुत-धन-कुल-कर्मणां मदैर्निष्किञ्चनानां साधूनां तिरस्कारं कुर्वन्ति।।२२।। अवाप्तसमस्तकामः स्वभक्तप्रियः भगवान् सदानुवर्तमानां लक्ष्मीं, लक्ष्मीकृपाकांक्षिणो नरेन्द्रांश्च नानुवर्तते, एतादृशं भगवन्तं भगवद्वत्सलताभिज्ञः कः पुमान् परित्यजेत्।।२३।। *मैत्रेय उवाच* - हे राजन्! ब्रह्मपुत्रो नारदः प्रचेतसः प्रति भगवद्भागवतकथाः श्रावयित्वा ब्रह्मलोकं ययौ।।२४।। ते प्रचेतसोऽपि नारदकथितं लोकमलापहं हरेर्यशो निशम्य भगवच्चरणारविन्दं ध्यायन्तो भगवल्लोकं ययुः।।२५।। हे विदुर! त्वं मां प्रति यत् पृष्टवान् तत् प्रचेतसां नारदस्य च संवादरूपं श्रीहरेर्कथामृतरूपमेतदाख्यानं मया तुभ्यं कथितम्।।२६।। *श्रीशुक उवाच* - य एष मनुपुत्रस्योत्तनपादस्य वंशोऽनुवर्णितः, अथ राज्ञां संमतं प्रियव्रतस्यापि वंशं शृणु।।२७।। यः प्रियव्रतो वैराग्येण प्रथमं वनं गतः, तत्र नारदादात्मविद्यां प्राप्य, पुनर्महीं भुक्त्वा पुत्रेभ्यो राज्यं दत्त्वा भगवद्धाम प्राप्तवान्।।२८।।

इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथाम्। प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः।।२९।। *विदुर उवाच* – सोऽयमद्य महायोगिन् भवता करुणात्मना। दर्शितस्तमसः पारो यत्राकिञ्चनगो हरिः।।३०।। *श्रीशुक उवाच* - इत्यानम्य तमामन्त्र्य विदुरो गजसाह्वयम्। स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः। ।।३१।। एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्मनाम्। आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ।।३२।।

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे एकत्रिंशोऽध्यायः।।३१।।

।। इति चतुर्थस्कन्धः समाप्तः।।

।। सङ्ग्रहोक्तिः।।

इत्थं मैत्रेयेण कथितां हरिगुणानुवादसत्कथां श्रुत्वाऽश्रुपूर्णनयनो विदुरो विवृद्धस्नेहः सन् मैत्रेयचरणं मूर्ध्ना हरेश्चरणं हृदयेन च दधार।।२९।। *विदुर उवाच* – हे महायोगिन्! दयालुना भवता यत्र तमसः पारे हरिर्लभ्यते सोऽयं संसारपारहेतुरुपायो दर्शितः।।३०।। विदुर इति वदन् मैत्रेयमनुज्ञाप्य प्रसन्नमनाः स्वानां ज्ञातीनां दिदृक्षुः सन् हस्तिनापुरं प्रययौ।।३१।। हे राजन् हरिसमर्पितमनसां मन्वादिराज्ञामेतच्चरित्रं शृणुयात् स आयुः, धनं, यशो, मङ्गलं, मुक्तिम्, ऐश्वर्यं च प्राप्नुयात्।।३२।।

इति श्रीमद्भागवते चतुर्थस्कन्धे सङ्ग्रहोक्त्यामेकत्रिंशोऽध्यायः।।३१।।

❀ इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां चतुर्थस्कन्धः समाप्तः ❀

ॐ

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम्।।

सङ्ग्रहोक्तिटीकासहितम्

पञ्चम स्कन्धः

अथ प्रथमोऽध्यायः ।।१।।

राजोवाच – प्रियव्रतो भागवत आत्मारामः कथं मुने। गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः।।१।। न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ । गृहेष्वभिवेशोऽयं पुंसां भवितुमर्हति ।।२।। महतां खलु विप्रर्षे उत्तमश्लोकपादयोः। छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः।।३।। संशयोऽयं महान् ब्रह्मन् दारागारसुतादिषु। सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता।।४।। *श्रीशुक उवाच* – बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरन्द आवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदन्तरायविहताः स्वां शिवतमां पदवीं न प्रायेण हिन्वन्ति ।।५।।

।। सङ्ग्रहोक्तिः ।।

अथ प्रथमोऽध्यायः ॥१॥

ज्ञानिनो राज्यसौख्यं ज्ञाननिष्ठा प्रियव्रतचरितञ्च

राजोवाच – हे मुने! भगवद्भक्त आत्मारामः प्रियव्रतो गृहे कथमरमत, यतो गृहासक्तिमूलः कर्मबन्धरूपः पराभवो भवति।।१।। हे द्विजश्रेष्ठ! गृहासक्तिमुक्तानामात्मारामाणां पुंसां गृहेष्वभिनिवेशो भवितुं नाऽर्हति ।।२।। हे विप्रर्षे! भगवच्चरणानुभूत्या शान्तचित्तानां महापुरुषाणां कुटुम्बे स्पृहारूपाऽज्ञानं खलु न विद्यते ।।३।। हे ब्रह्मन्! दारागारसुतादिष्वासक्तिं प्राप्तस्य श्रीकृष्णेऽस्खलिता मतिः, तथा तया मुक्तिश्च कथं घटेत्? यदयं महान् संशयः।।४।। *श्रीशुक उवाच* – त्वया सत्यमुक्तम् पवित्रकीर्त्तेर्भगवतः श्रीमच्चरणारविन्दरसे संस्थापितमनसो भक्ता केनचिद्विघ्नेन विघ्निताः सन्तोऽपि भगवदेकान्तिकानां परमहंसानां प्रियां कथारूपामतिमंगलमयीं पदवीं प्रायेण न परित्यजन्ति ।।५।। हे राजन्! परमभागवतो राजपुत्रः प्रियव्रतो (मन्दर पर्वते) नारदस्य चरणसेवया, सुखेनैवाऽवगतपरमार्थसत्तत्वः ज्ञानयज्ञेन दीक्षिष्यमाणः स्वपित्रा मनुनाऽवनितलपरिपालनायाऽऽमन्त्रितः, भगवति –

यर्हि वा व ह राजन्स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोप-सेवया-ञ्जसावगतपरमार्थसत्तत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालना-याम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्य-वधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः।।६।।
अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकल-जगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार।।७।।
स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीयमानां गन्धमादन-द्रोणीमवभासयन्नुपससर्प।।८।। तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलि-रुपतस्थे।।९।। भगवानपि भारत तदुपनीतार्हणः सूक्तवाक्येन नितरामुदितगुणगणा-वतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच।।१०।। *ब्रह्मोवाच* - निबोध तातेदमृतं ब्रवीमि माऽसूयितुं देवमर्हस्यप्रमेयम्।

।। सङ्ग्रहोक्तिः ।।

वासुदेवेऽविच्छिन्नध्यानयोगेन संलग्नचित्तत्वाद्धेतोः मिथ्याभूतादेव राज्यप्रपञ्चादात्मनः पराभवं चिन्तयन्, राज्यं नैवाऽभ्यनन्दत् ।।६।। अथ भगवान् आदिदेवो ब्रह्मा, सत्त्वादिगुणात्मक-सृष्टिवृद्धिचिन्तनपरः, तेन च निश्चितसकलजगदभिप्रायः, मूर्त्तिमद्वेदमरीच्यादिपरिवेष्टितः सत्यलोकाद् यदाऽवततार तदा नभोमण्डले चन्द्र इव तत्र तत्र मध्यमार्गे विमानावलिभि-र्देवेन्द्रादिभिः पूज्यमानः, संघीभूतैः सिद्धगन्धर्वसाध्यचारणमुनिगणैश्चाऽभिष्टूयमानः स गन्धमादनकन्दरां प्रकाशयन् तत्राऽऽजगाम, तं हंसयानेन तत्रागतं भगवन्तं हिरण्यगर्भं पितरमवलोक्य, देवर्षिर्नारदो पितृपुत्रौ मनुप्रियव्रतौ चैते सर्व उत्थाय कृताञ्जलयः सन्तः तमुपससृपुः।।७-९।। नारदादिभिः सूक्तवाक्यादिभिः कृतार्हणः नितरां कथितगुणगणोत्कर्षः आदिपुरुषो ब्रह्माऽपि सदयहासं प्रियव्रतमवलोक्य प्रोवाच।।१०।। *ब्रह्मोवाच* - हे तात!

वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम्।।११।। न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा। नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात्।।१२।। भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाऽभयाय। सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग धत्ते।।१३।। यद्वाचितन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः। सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः।।१४।। ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात्। आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः।।१५।। मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः। यथानुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृङ्क्ते।।१६।। भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः। जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम्।।१७।।

।। सङ्ग्रहोक्तिः ।।

प्रियव्रत! इदं सत्यं वचो ब्रवीमि, तत् शृणु, त्वं निरस्तसमस्तदोषं भगवन्तं दोषदृष्ट्या निरीक्षितुं नैवार्हसि, यस्याऽऽदिष्टं शासनं विवशाः, तवैष तातो मनुः, त्वद्गुरुर्नारदः, शिवः, वयं मरीच्यादयः सर्वे वहामः।।११।।यः कश्चिदपि तपसा, विद्यया, योगैश्वर्येण, बुद्ध्या, धनैः, यज्ञादिभिश्च साधनैः तस्य भगवतो निर्मितं स्वतः परतो वा विहन्तुं समर्थो न भवेत्।।१२।। सर्वोऽपि जनसमूहो भगवदादिष्टं देहसम्बन्धं जन्मने, मृत्यवे, कर्मकरणाय, सुखाय, दुःखाय, मोहाय, मोक्षाय च प्राप्नोति।।१३।। हे वत्स! प्रियव्रत! यद्वेदरूपायां दामन्यां दृढैर्गुणकर्मनामभिर्बद्धा सर्वे वयं नसि प्रोता बलीवर्द्दा इव तस्मै परमेश्वराय पूजोपहारं वहामः।।१४।।हे प्रियव्रत! नाथ ईश्वरो गुणकर्मानुरूपं यद् यद् योजितवान् तद् तद् वर्णाश्रमादिकं स्वीकृत्य चक्षुष्मता नीयमाना अन्धा इव वयं तद्दत्तं सुखं दुःखं वा प्राप्नुमः।।१५।। मुक्तभावं प्राप्तोऽपि जनो यावत् प्रारब्धं कर्म, तावद् गतनिद्रः स्वप्नानुभूतमिव अभिमानशून्यः सन् स्वदेहं बिभर्त्ति, किन्तु स देहान्तरारम्भकाणि कर्माणि न कुरुते।।१६।।संगभयाद् वनाद् वनान्तरं व्रजतोऽजितेन्द्रियस्य भयं न निवर्तते, मनःसहितानि ज्ञानेन्द्रियाणि एव षट् सपत्नास्तु सहैवाऽऽसते, तथा च जितेन्द्रियस्याऽऽत्मारामस्य बुधस्य

यः षट्सपत्नान् विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम्। अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित्।।१८।। त्वं त्वब्जनाभाङ्घ्रिसरोजकोश-दुर्गाश्रितो निर्जितषट्सपत्नः। भुङ्क्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसङ्गः प्रकृतिं भजस्व।।१९।। *श्रीशुक उवाच* – इति समभिहितो महाभागवतो भगवतस्त्रिभुवन-गुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह।।२०।। भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाण-योरात्मसमवस्थानमवाङ्मनसक्षयमव्यवहृतं प्रवर्त्तयन्नगमत्।।२१।। मनुरपि परेणैव प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तये आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम।।२२।। इति ह वा व स जगती-पतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि

।। सङ्ग्रहोक्तिः ।।

गृहस्थाश्रमः कमप्यनर्थं न करोति।।१७।।यो विपश्चित् शत्रुतुल्यानि षडिन्द्रियाणि विजेतुमिच्छेत् स प्रथमं गृहाश्रमे स्थित्वैवेन्द्रियजयार्थं यतेत, यथा लोके शत्रून् विजिगीषमाणो भवेत् स प्रथमं दुर्गाश्रितः सन्नेव बलिष्ठशत्रून् जयति, तेषु क्षीणेषु सत्सु दुर्गेऽन्यत्र वा यथेष्टं विचरेत्।।१८।। हे प्रियव्रत! त्वं वासुदेवचरणारविन्दरूपं दुर्गमाश्रित्य मनआदीन् षट् शत्रून् जित्वा भोगान् भुङ्क्ष्व, ततो मुक्तसंगः सन्नत्यात्मनिष्ठो भव।।१९।। *श्रीशुक उवाच* – एवं सम्यग् अभिहितो परमभागवतः प्रियव्रतोऽवनतशिराः सन् त्रिभुवनगुरोर्भगवतो ब्रह्मण आज्ञामात्मनो लघुतया सबहुमानं बाढमित्युवाह।।२०।। अथ ब्रह्माऽपि यथाविधि मनुना विहितपूजनः सन् नारदप्रियव्रतयोर्निर्दोषमभिसमीक्षमाणयोः सतोः वाङ्मनसोः परं व्यवहारातीतं परमात्मस्वरूपं संस्मरन् सत्यलोकमगमत् ।।२१।। ततो मनुरपि ब्रह्मणा सिद्धमनोरथः सन् देवर्षिनारदाज्ञयाऽखिलधरामण्डलाभिरक्षणाय प्रियव्रतमास्थाप्याऽतिविषम विषविषयभोगेच्छाया उपरराम ।।२२।। अथ जगतीपतिः परमेश्वरेच्छया प्राप्तकर्माधिकारोऽखिलजगद्बंधन-विध्वंसकरप्रतापस्य भगवतश्चरणकमलानवरतध्यानेन दग्धरागादिमलोऽत –

मानवर्द्धनो महतां महीतलमनुशशास ।।२३।। अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम। तस्यामु ह वा व आत्मजानात्मसमानशीलगुणकर्मरूप-वीर्योदारान् दश भावयांबभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ।।२४।। आग्नीध्रेध्म-जिह्वयज्ञबाहुहिरण्यरेतोमहावीरघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः एतेषां कविर्महावीरः सवन इति त्रय आसनूर्द्ध्वरेतसः। आत्मविद्या-यामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ।।२५।। तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दावितरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मन-स्तादात्म्यमविशेषेण समीयुः ।।२६।। अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तम-स्तामसो रैवत इति मन्वन्तराधिपतयः ।।२७।। एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसार-संभृतदोर्दण्डयुगलापीडित

।। सङ्ग्रहोक्तिः ।।

एव निर्मलः प्रियव्रतो महीतलमनुशशास ।।२३।। कियत्कालानन्तरं स विश्वकर्मणः प्रजापतेर्दुहितरं बर्हिष्मतीमुपयेमे, तस्यां स्वस्मानशील-गुण-कर्म-रूप-वीर्योदारान् दश पुत्रान् यवीयसीमूर्जस्वतीं कन्यां च जनयामास ।।२४।। ते पुत्राः आग्नीध्रः, इध्मजीह्वः, यज्ञबाहुः, हिरण्यरेताः, महावीरः, घृतपृष्ठः, सवनः, मेघातिथिः, वीतिहोत्रः, कविश्चेति सर्वेऽग्निनामान एव, एतेषां मध्ये कविः, महावीरः सवनश्चेति त्रय ऊर्ध्वरेतस आसन्, ते बाल्यादारभ्य परविद्यायां कृताभ्यासाः, परमहंसानामाश्रममभजन् ।।२५।। पारमहंस्याश्रमे वर्तमानास्ते त्रयोऽपि उपशमशीलाः सर्वजीवशरीरिणः संसृतिभीतानां शरणभूतस्य भगवतो वासुदेवस्य श्रीमच्चरणारविन्दा-खण्डस्मरणेन प्रवृद्धभक्तियोगप्रभावेण च शुद्धान्तःकरणाधिष्ठिते सर्वान्तर्यामिणि परमात्मनि तादात्म्यमवापुः ।।२६।। प्रियव्रतस्याऽन्यस्यां भार्यायां "उत्तमः तामसः रैवत" श्चेति नामानस्त्रयः पुत्रा मन्वन्तराधिपतयोऽभवन् ।।२७।।

मौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरण-यौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुद्ध्यमान इव महामना बुभुजे ।।२८।। यावदभासयति सुरगिरिमनुभ्राम्यन् भगवानादित्यो वसुधातलमर्द्धेनैव प्रतपत्यर्द्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन्समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतङ्ग ।।२९।। ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्तसिन्धव आसन्यत एव कृताः सप्त भुवो द्वीपाः ।।३०।। जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञाः तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो यथासंख्यं द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः।।३१।। क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना

।। सङ्ग्रहोक्तिः ।।

एवं स्वतनयेषु सद्गुणाश्रयेषु सत्सु पृथिवीपतिः प्रियव्रत एकादशार्बुदवर्षपर्यन्तं जगतीं बुभुजे, तत्राऽव्याहतपौरुषः बलवद्दोर्दण्डाकृष्टमौर्वीटङ्कारेणैव निरस्तधर्मप्रतिपक्षः, बर्हिष्मत्याः प्रतिदिनमेधमानप्रमोद-व्रीडाप्रमुषित-हासावलोक-रुचिर-क्ष्वेलयादिभिर्गतविवेक इव महामनाः स भोगान् बुभुजे ।।२८।। सुमेरुपर्वतं प्रदक्षिणी कुर्वन् भगवान् भास्करो लोकालोकगिरिं यावदर्धं भूतलं प्रकाशति, अर्धं चाऽवच्छादयति एवं स दिवारात्रिविभागं करोति, तदनुपयुक्तं मन्वानो भगवदुपासनोपचितातिपुरुषप्रभावः प्रियव्रतः "रात्रिमपि दिवसं करिष्यामि" इति निश्चित्य सूर्यसमजवेन ज्योतिर्मयेन रथेन सप्तवारं द्वितीयः सूर्य इव तरणिमनुपर्यक्रामत् ।।२९।। ये तद्रथचक्रनेमिकृताः परिखाः सप्त सिन्धवो जाताः, तेषां मध्ये स्थिताया भुवः सप्त द्वीपा अभवन् ।।३०।। ते च द्वीपाः - जम्बू-प्लक्ष-शाल्मलि-कुश-क्रौञ्च-शाक-पुष्कर-संज्ञा आसन्, एते द्वीपाः सर्वे पूर्वपूर्वद्विपात् उत्तरोत्तरं यथासंख्यं द्विगुणपरिमाणेन समन्ततः कल्पिताः सन्ति ।।३१।। क्षारोद-इक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शूद्धोदा एते सप्त सिन्धवः प्रतिद्वीपं द्वीपपरिमाणस्तेषां द्वीपानां परिखा इव दृश्यन्ते तेषु स्वानुवर्तिनः, आग्निध्र-इध्मजीह्व-

एकैकशो यथापूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पितास्तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथि-वीतिहोत्रसंज्ञान् यथासंख्येनैकेकस्मिन्नेकमेवाधिपतिं विदधे, दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद् यस्यामासीद्देवयानी नाम काव्यसुता ।।३२।। नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् । चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ।।३३।। स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ।।३४।। अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्यारचित-विषमविषयान्धकूपेतदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयांचकार ।।३५।। परदेवतायाः प्रसादाधिगतात्मप्रत्यवमर्शेन परिनिर्वृतोऽनुगतेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं विहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवा-नुससार ।।३६।। तस्य ह वा एते श्लोकाः ।।३७।।

।। सङ्ग्रहोक्तिः ।।

यज्ञबाहु-हिरण्यरेतो-घृतपृष्ठ-मेधातिथि-वीतिहोत्राः इत्यभिधान् पुत्रान् ज्येष्ठादिक्रमेण एकैकस्मिन् द्वीपे एकमेकमधिपतिं चक्रे, ऊर्जवतीं नाम दुरितरं शुक्राय प्रायच्छत्, यस्यां देवयानी नाम्ना प्रसिद्धा शुक्रस्य कन्या उत्पन्नाऽभूत् ।।३२।। भगवच्चरणरजोभिर्जित-षडिन्द्रियाणां षडूर्मिणां वा भगवद्भक्तानां पुरुषव्यापारे चित्रं न हि, सत्पथभ्रष्टोऽन्त्यजोऽपि जनो भगवन्नामधेयं सकृदप्युच्चारयन् संसारबन्धं जहाति ।।३३।। एवमपरिमितबलपराक्रमः प्रियव्रत एकदा देवर्षिचरणसेवाप्राप्तराज्यसंबन्धेनाऽऽत्मानमसुखितमिव मन्यमानोऽत एवं संप्राप्तनिर्वेदः सन्निदमाह ।।३४।। अहो! मयाऽसमीचीनमाचरितम्, निवृत्तिधर्मपरोऽहमिन्द्रियैर-विद्यारचितविषमविषयान्धकूपे पातितः, अलमलमतः परम्, अमुष्या बर्हिष्मत्याः क्रीडामृगं मां धिक् धिक् ।।३५।। श्रीहरेः कृपया प्राप्तस्वात्मविमर्शोऽत एव सुखितः स स्वानुवर्तिभ्यः पुत्रेभ्यो यथायोग्यं सप्तद्वीपात्मिकां भूमिं ददौ, स भार्यामपि शववन्मन्यमानः साम्राज्यसंपदं -

प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् । यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्तवारिधीन् ।।३८।। भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः। सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः।।३९।। भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम्। यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः।।४०।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे प्रियव्रतचरित्रं नाम प्रथमोऽध्यायः ।।१।।

अथ द्वितीयोऽध्यायः।।२।।

श्रीशुक उवाच – एवं पितरि संनिवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्मापेक्षमाणः पर्यगोपायत् ।।१।। स कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण

।। सङ्ग्रहोक्तिः ।।

परित्यज्यस्वयमेव निर्वेदं प्राप्य हृदि हरिचरित्रसामर्थ्यं गृहीत्वा देवर्षिनारदस्य मार्गं पुनरनुससार ।।३६।। प्रियव्रत विषये इमाः श्लोका पठ्यन्ते ।।३७।। प्रियव्रतकृतं चरितम् ईश्वरं विना को नाम कुर्यात्, यः प्रियव्रतस्तमो निवारयन् रथनेमिनिम्नैरेव सप्त समुद्रानकरोत् ।।३८।। येन प्रियव्रतेन द्वीपैर्भुवोऽवयवविन्यासः कृतः, द्वीपे द्वीपे भूतानां सुखाय सरिद्गिरिवनादिभिः सीमाविभागः कृतः ।।३९।। यो भगवदेकान्तिकजनप्रियः प्रियव्रतः भौमं दिव्यं मानुषं च कर्मजं वैभवं मोक्षधर्मोक्तनिरयसमानं चक्रे ।।४० ।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः।।२।।

आग्नीध्रचरितम्

श्रीशुक उवाच – ज्ञानपूर्वकपितरि मुक्तभावे प्राप्ते सति तदाज्ञानुसारं वर्तमान आग्नीध्रो धर्ममपेक्षमाणः सन् जम्बूद्वीपौकसः प्रजाः स्वपुत्रवत् पालयामास ।।१।। स कदाचित् पुत्रकामः

आत्मैकाग्र्येण तपस्वी आराधयांबभूव ।।२।। तदुपलभ्य भगवान् आदिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ।।३।। सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गमिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्र-मुपकूजितामलजलाशयकमलाकरमुपबभ्राम ।।४।। तस्याः सुललितगमनपद-विन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ।।५।। तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनोनयनाह्लाददुघैर्गति-व्रीडाविलासावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरम्। निजमुखविगलितामृतासवसहासभाषणामोदमदान्धमधुकरनिकरोपरोधेन द्रुतपद-विन्यासेन वल्गुस्पन्दनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विधृताव-सरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ।।६।। *आग्नीध्र उवाच* - का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायासि कापि

।। सङ्ग्रहोक्तिः ।।

सन् सुरवनिताक्रीडाचलस्य मन्दराचलस्य द्रोण्यां विश्वसृजां पतिं ब्रह्माणं चित्तैकाग्र्येणा-ऽऽराधयामास ।।२।। तत्कृतं स्वाराधनं ज्ञात्वाऽऽदिपुरुषो ब्रह्मा स्वसभायां गायन्तीं पूर्वचित्तिं नामाप्सरसं संभोगार्थं प्रस्थापितवान् ।।३।। सा च विविधनिबिडविटपिविटपेषु आरूढानां स्थलविहंगममिथूनानां कलरवैः, प्रतिबोध्यमानजलकुक्कुट-कारण्डव-कलहंसपक्षिभिश्चोप-कूजितामलजलाशयकमलाकरं विचित्रमतिरमणीयं तदाश्रमोपवनं बभ्राम ।।४।। तस्याः सुललितपदविन्यासगतिविलासाया अनुपदं खणखणायमानरुचिरचरणाभरणस्वनमाकर्ण्य समाधियोगेनाऽऽमिलितनयननलिनयुगलमीषद् विकचय्य नरदेवकुमार आग्नीध्रो व्यचष्ट ।।५।। मधुकरीमिव पुष्पाण्युपजिघ्रन्तीं देवमनुष्यमनोनयनाह्लादकरैः गति-व्रीडा-विलासा-ऽवलोका-ऽवयवैर्नृणां मनसि कुसुमायुधस्य प्रवेशद्वारं विदधतीं द्योतमानां तामप्सरसं समीपे दृष्ट्वैव प्राप्तावसरस्य मकरध्वजस्य वशं गतोऽत एव जडीभूत अग्नीध्र उवाच ।।६।।

भगवत्परदेवतायाः। विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान्मृगयसे विपिने प्रमत्तान् ।।७।। बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ। कस्मै युयुङ्क्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ।।८।। शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीश। युष्मच्छिखाविलुलिताः सुमनोभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ।।९।। वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम्। लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते ।।१०।। किं संभूतं रुचिरयोर्द्विज शृङ्गयोस्ते मध्येकृशो वहसि यत्र दृशिः श्रिता मे। पङ्कोऽरुणः सुरभिरात्मविषाण ईदृक् येनाश्रमं सुभग मे सुरभीकरोषि ।।११।। लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ। अस्मद्विधस्य मनउन्नयनौ बिभर्ति बह्वद्भुतं सरससराससुधादि वक्त्रे ।।१२।। का वात्मवृत्तिरदनाद्धविरङ्ग भाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ। -

---

।। सङ्ग्रहोक्तिः ।।

हे मुनिवर्य! त्वं कोऽसि? अस्मिन् शैले त्वं किं कर्तुमिच्छसि? किं त्वं भगवत्परदेवतायाः काऽपि मायाऽसि? मत्सदृशान् प्रमत्तान् मृगान् वने वशीकर्त्तुं मौर्विरहिते द्वे भ्रुकटीरूपे धनुषी धारयसि किम्? ।।७।। अत्र वने विचरन् त्वमिमौ कटाक्षबाणौ कस्योपरि प्रयोक्तुं समीहसे? तवायं पराक्रमो जडधियामस्माकं क्षेमाय भवतु, हे ईश! पूज्यस्य तवेमे शिष्याः परितो दृश्यन्ते, इमे ते शिष्याः (भ्रमराः) साममन्त्रानजस्रं पठन्ति (गुञ्जन्ति) त्वच्छिखाच्युतानि कुसुमानि सेवन्ते ।।८-९।। हे ब्रह्मन्! तव चरणपञ्जरस्थितानां तित्तिरीणा (नूपुराणां) मरूपमुखरां केवलं वाच (ध्वनि) मेव शृण्वाम, अयि मित्र! त्वया स्वनितम्बमण्डले कदम्बपुष्पकान्तिः (पीतवसनपरिधानम्) कुतः प्राप्ता? ।।१०।। हे द्विज! तव रुचिरयोः शृङ्गयो (स्तनयोः) किं संभृतमस्ति? यत्र मे दृष्टिः संलग्नाऽस्ति, तव शृङ्गयोरुपर्यरुणः पङ्कः (केसरकर्दमः) कुतः प्राप्तः, यो ममाश्रमं सुरभी करोति ।।११।। हे सुहृत्तम! त्वं मां तं निजं लोकं दर्शय, यत्रत्या जना उरसा मनःक्षोभजनकावेवंभूतावपूर्वाववयवौ धारयन्ति ।।१२।।

उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचिरासन्नभृङ्गनिकरं सरवन्मुखं ते।।१३।। योऽसौ त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे। मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीवीम्।।१४।। रूपं तपोधन तपश्चरतां तपोघ्नमेतत्तु केन तपसा भवतोपलब्धम्। चर्त्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे।।१५।। न त्वां त्यजामि दयितं द्विज देवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम्। मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः।।१६।। *श्रीशुक उवाच* - इति ललनाऽनुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरति-सभाजयामास।।१७।। सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बुद्वीपपतिना भौमस्वर्गभोगान् बुभुजे।।१८।।

।। सङ्ग्रहोक्तिः।।

हे सखे! तवैतस्य शरीरस्याऽऽहारो वा कोऽस्ति? यस्य चर्वणात् सुरभिः समायाति, त्वं किं विष्णोः कलाऽसि? तव कर्णौ निमेषशून्यमकरतुल्यौस्तः, चञ्चलमीनयुगलवत् नयनद्वयमस्ति, द्विजपङ्क्तिशोभमानमासन्नभृङ्गनिकरं त्वन्मुखं सरोवरतुल्यं प्रतीयते।।१३।। तव करकमलताडितः कन्दुको दिक्षु भ्रमन् मे नयनयोश्चञ्चलतां जनयति, तव मुक्तं कुटिलकुन्तलपाशं नीवीं च लम्पटो वायुर्हरति, एतन्न जानासि किम्?।।१४।। तपस्विनां तपोविघातकं रूपमिदं त्वया केन तपसा प्राप्तम्? हे मित्र! त्वं मया सह तपश्चरितुमर्हसि ।।१५।। हे द्विज! देवेन दत्तं त्वामहं कदापि न त्यजामि, यतस्त्वयि संलग्नं मे मनश्चक्षुश्च नाऽपयाति, हे चारुशृङ्गि! यत्र ते मनः स्यात् तत्र मां नेतुमर्हसि।।१६।। *श्रीशुक उवाच* - इति ललनाऽनुनयातिविशारदोऽतिनिपुणमतिराग्नीध्रः भाषणचातुर्येण तां पूर्वचित्तिमप्सरसं बहुमानेनाऽनुकूलामकरोत्।।१७।।साऽप्सरास्तस्याऽऽग्नीध्रस्य बुद्धिशीलरूपवयःश्रियौदार्येण च मोहिता सती तेन जम्बूद्वीपपतिना साकं बहुकालपर्यन्तं भौमान् स्वर्गीयांश्च भोगान् बुभुजे।।१८।। आग्नीध्रस्तस्यां नाभि-किंपुरुष-हरिवर्ष-इलावृत-रम्यक-हिरण्मय-कुरु-भद्राश्व-

तस्यामु ह वा आत्मजान्स राजपुत्र आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ।।१९।। सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ।।२०।। आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः। पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ।।२१।। आग्नीध्रो राजाऽतृप्तकामस्तामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवरुन्धे यत्र पितरो मादयन्ते ।।२२।। संपरेते पितरि नव भ्रातरो मेरुदहितृर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमितिसंज्ञां नवोदवहन् ।।२३।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वितीयोऽध्यायः ।। २ ।।

।। सङ्ग्रहोक्तिः ।।

केतुमालसंज्ञान् नव पुत्रान् अजनयत् ।।१९।। अथ सा पूर्वचित्तिः प्रतिवत्सरमेकैकमिति नव सूतान् प्रसूय, गृह एवाऽपहाय भूयो ब्रह्माणमुपतस्थे ।।२०।। त आग्नीध्रसुता मातुरनुग्रहात् सहजभावेनैव सुदृढत्वसुबलत्वोपेता पित्रा प्रदत्तखण्डादिविभागाः सन्त आत्मतुल्यनामानि जम्बूद्वीपवर्षाणि यथाभागं बुभुजुः ।।२१।। नवखण्डाधीप आग्नीध्रोऽतृप्तकामोऽत एव तामप्सरसमेवाऽनुदिनं कामयमानः सन् वेदोक्तैः कर्मभिस्तस्या अप्सरसः समानलोकतां प्राप ।।२२।। पितरि मृते सति नाभिप्रभृतयो नव भ्रतारो मरुदेवीं, प्रतिरूपां, उग्रदंष्ट्रीं, लतां, रम्यां, श्यामां, नारीं, भद्रां, देववीतिं चेति संज्ञाः नव मेरुदुहितृरुदवहन् ।।२३।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः ।।२।।

अथ तृतीयोऽध्यायः ।।३।।

श्रीशुक उवाच – नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत् ।।१।। तस्य ह वा श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानन्दनावयाभिराममाविश्चकार ।।२।। अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिः स्फुटकिरणप्रवरमणिमयमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ।।३।। *ऋत्विज ऊचुः* – अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितम् ।।४ ।।

।। सङ्ग्रहोक्तिः ।।

अथ तृतीयोऽध्यायः ।।३।।

नाभेश्चरितं यस्य गृहे साक्षाद्धरि ऋषभरूपेणावततार

श्रीशुक उवाच – सन्तानार्थी ज्येष्ठो नाभिरप्रजया मेरुदेव्या भार्यया सह समाहितचित्तः सन् भगवन्तं यज्ञपुरुषमयजत् ।।१।। श्रद्धया शुद्धभावेन च यजतो नाभेर्यागे द्रव्य-देश-काल-मन्त्र-ऋत्विज्-दक्षिणा-विधानानां सप्तानां योगसम्पत्या भक्तवत्सलो भगवान् स्वयं दुरधिगमोऽपि निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयः सन् मनोनयनानन्दनावयवाभिरामं हृदयंगमं दिव्यविग्रहमाविश्चकार ।।२।। चतुर्भुजं, हिरण्मयं, पीताम्बरधारिणं, वक्षसि श्रीवत्सचिह्नं धारयन्तं, शंखचक्रगदापद्म-वनमालाकौस्तुभमणिर्विराजितं प्रवरमणिमय-मुकुट-कुण्डल-कटक-कटिसूत्र-हार-केयूर-नूपुराद्यङ्गभूषण-भूषितं श्रीहरिं दृष्ट्वा निर्धना उत्तमधनं प्राप्य इव ऋत्विक्सदस्यगृहपतयः सबहुमानमर्घ्यादिपूजोपहारेण नतमस्तकाः सन्तः तुष्टुवुः ।।३।। *ऋत्विज ऊचुः* – हे अर्हत्तम! परिपूर्णोऽपि त्वं भृत्यानामस्माकमर्हणं स्वीकर्तुमर्हसि, तुभ्यं नमो

कोऽर्हति पुमान्प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभिः स्वरूपनिरूपणम्। सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ।।५।। परिजनानुरागविरचितशबलसंशब्दसलिलशिलकिसलयतुलसीदूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ।।६।। अथानयापि न भगवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे आत्मन एवानुसवनमञ्जसाऽव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किं तु नाथाशिष आशासानानामेतदभिसंसाधनमात्रं भवितुमर्हति ।।७।। तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परम परमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन्स्वयं नापचित एवेतरवदिहोपलक्षितः ।।८।। अथायमेव वरो ह्यर्हत्तम यर्हि वा बर्हिषि राजर्षेर्वरदर्षभो भगवान्निजपुरुषेक्षणविषय आसीत्। असङ्गनिशितज्ञानाऽनलविधूताशेषमनोमलानां भगवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणः परममङ्गलायनगुणगणकथनोऽसि ।।९।।

।। सङ्ग्रहोक्तिः ।।

नमः, इत्येतावदेव सद्भिरुपशिक्षितम् ।।४।। प्राकृदेहेन्द्रियमतिमान् कर्मवशोऽस्मादृशो जनः प्रकृतिपुरुषविलक्षणस्य परमेश्वरस्य वाऽर्वाक्तनाभिर्नामरूपाकृतिभिः स्वरूपनिरूपणकर्तुं कः शक्नुयात्, सकलजनसमूहानां दोषनिवारका ये भवतोऽनन्तगुणाः सन्ति तदेकदेशं कथयितुमपि न पारयति ।।५।। हे परमपुरुष! स्वभक्तैः सबाष्पपुलकैरर्पितैः पुष्प-फल-जल-पल्लव-तुलसी-दूर्वांकुरादिभिः कृतया सपर्यया त्वं प्रीतो भवसि ।।६।। अनेकाङ्गसमृद्धयाऽनया इज्ययाऽनुसवनं अविच्छिन्नबोभूयमानाशेषपुरुषार्थस्वरूपस्य ते समुचितं न, एतद्यजनं तु सकामानामस्माकं त्वदनुग्रहलक्षणसिद्ध्यर्थमेव भवितुमर्हति ।।७।। हे परमपुरुष! आराधनसमयेऽनुरूपमनाराधित एव प्रकृष्टदयया स्वमहिमानं निर्वर्तयिष्यन् स्वयं त्वं, स्वस्य परंश्रेयोऽविदुषां बालिशानामिह यागे दृष्टोऽसि ।।८।। हे अर्हत्तम! यद्यपि त्वं राज्ञोऽभिमतं वरं प्रदातुमाविर्भूतोऽसि, तथापि राजर्षेर्यज्ञे वरदर्षभो भवान् निजभक्तानां नयनगोचरो जातः, अयमेव वरः संजातः, विरागज्ञानानलध्वस्ताशेषमलानां भगवत्स्वभावानामात्मारामाणां मुनीनां कृते तु

अथ कथंचित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः श्रीमतस्तव चरणारविन्दस्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥१०॥ किं चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भगवन्तमुपधावति। प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणं को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्यावृतमतिर्विषयविषरयाऽनावृतप्रकृतिरनुपासितमहच्चरणः ॥११॥ यदु ह वा तव पुनरदभ्रकर्त्तरिह समाहृतस्तदर्थधियां मन्दानां नस्तद्य-द्देवहेलनं देववेवार्हसि साम्येन सर्वात्मन्प्रतिवोढुमविदुषाम् ॥१२॥ *श्रीशुक उवाच*- इति निगदेनाभिष्टूयमानो भगवानऽनिमिषर्षभो वर्षधराऽभिवादितर्त्विगभिवन्दित-चरणः सदयमिदमाह ॥१३॥ *श्रीभगवानुवाच* - अहो बताऽहमृषयो भवद्भिरवितथगीर्भिर्वरम-सुलभमभियाचितो यदमुष्य आत्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हतिममैव हि मुखं यद्द्विजदेवकुलम् ॥ तत आग्नीध्रीयेंऽशकलयाऽवतरिष्याम्यात्मतुल्यमनुपलभमानः ॥१४॥

॥ सङ्ग्रहोक्तिः ॥

परममङ्गलायतनं तव गुणगणगणनमेव भवति न तु दर्शनम् ॥९॥ हे हरे! स्खलन-क्षुत्पतन--जृम्भण-ज्वर-मरण-दुरवस्थादिषु परतन्त्राणां त्वां स्मर्तुमशक्तानां नः समस्तक्लेशशमनानि गुणकृतनामधेयान्यस्मद्वचनगोचराणि भवन्तु ॥१०॥ किंचाऽयं राजर्षिर्नाभिः पुत्रं कामयानो भवादृशीं प्रजामाशासानः सन् आशिषां स्वर्गापवर्गयोरपि दातारं भगवन्तं त्वां प्रजार्थं दरिद्रो यथा कुबेरमुपधावति तद्वदुपधावति, इह संसारेऽनुपासितमहच्चरणः को जनोऽपराजितया-ऽलक्षितमार्गया तव मायया पराभवं न प्राप्तः ॥११॥ हे बहुकार्यनिष्पादक! हे देवदेव! अल्पीयसे कार्याय त्वमिह समाहूतः, तस्मात् मन्दैरज्ञानैः स्वार्थबुद्धिभिरस्माभिः कृतमाह्वान-रूपमज्ञानं प्रतिक्षंतुमर्हसि ॥१२॥ इत्येवं विविधसूक्तेनाऽभिष्टूयमानः षाड्गुण्यपूर्णो देवोत्तमः श्रीहरिः नाभिना ऋत्विग्भिश्चाभिवन्दितचरणः सन् सदयमिदमाह ॥१३॥ *श्रीभगवानुवाच* - हे ऋषयः! सत्यवाग्भिर्भवद्भिर्दुर्लभो वरो याचितः, अमुष्य नृपस्य पुत्रो मत्सदृशः स्यादिति,

श्रीशुक उवाच – इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्दधे भगवान् ।।१५।।
बर्हिषि तस्मिन्नेवं विष्णुरात भगवान्परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तनुवाऽवततार ।।१६।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे तृतीयोऽध्यायः ।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

श्रीशुक उवाच – अथ तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं निशाम्य प्रकृतयः प्रजाः ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ।।१।। तस्य ह वा इत्थं वर्ष्मणा वरीयसा

।। सङ्ग्रहोक्तिः ।।

मत्सदृशस्त्वहमेक एव, तथापि मन्मुखभूतस्य ब्रह्मकुलस्य वचो मिथ्या भवितुं नार्हति, अत आत्मतुल्यमनुपलभमानोऽहं मेरुदेव्यामंशकलयाऽवतरिष्यामि ।।१४।। *श्रीशुक उवाच* – इत्येवं मेरुदेव्याः शृण्वत्याः सत्यास्तत्पतिं नाभिमभिधाय भगवान् यज्ञपुरुषोऽन्तर्दधे ।।१५।। हे विष्णुरात! तस्मिन् यज्ञे परमर्षिभिरेवं प्रसादितो भगवान् नाभेः प्रियचिकिर्षया नाभेर्भार्यायां मेरुदेव्यां दिगम्बराणां तपस्विनां ऋषिणां नैष्ठिकब्रह्मचारिणां च धर्मान् दर्शयितुं सत्त्वात्मकेन शरीरेणावततार ।।१६।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः ।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

शतपुत्रस्य ऋषभस्य राज्ञो राज्यवर्णनम्

श्रीशुक उवाच – अथ श्रीहर्यवतारानन्तरमुत्पत्त्यैव तस्य पादतलादिषु वज्रांकुशादीनि भगवल्लक्षणानि आसन्, एवं च साम्यमुपशमः, वैराग्यं, ऐश्वर्यं, सर्वसम्पत्तिः, इत्यादिभिः सह तस्य प्रभावोऽतिशयेन वर्द्धमान आसीत्, तं प्रभावं दृष्ट्वा प्रकृतयः प्रजा ब्राह्मणा देवाश्च सर्वे भूमण्डलपालनाय तं नाभिसूनुमैच्छन् ।।१।। तस्य श्रेष्ठं वपुः, विपुलगुणप्रसिद्धिः, -

बृहत्श्लोकेनौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार।।२।। यस्य हीन्द्रः स्पर्द्धमानो वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाऽभ्यवर्षत्।।३।। नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुराग-मुपलालयन्परां निर्वृतिमुपगतो विदितानुरागमापौरप्रकृतिजनपदं राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिर्व्रणेन समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ।।४।। यस्य हि पाण्डवेय श्लोकावुदाहरन्ति। को नु तत्कर्म राजर्षेर्नाभेरन्वाचरे-त्पुमान्। अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा।।५।। ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः। यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा।।६।। अथ ह भगवानृषभ-देवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलावासो लब्धवरै-

---

।। सङ्ग्रहोक्तिः।।

ओजः, बलम्, श्रीः, यशः, वीर्यं, शौर्यं, एवंप्रभृतीन् स्थिरान् गुणान् वीक्ष्य पिता तस्य "ऋषभ" इति नाम चकार।।२।। ऋषभस्याऽजनाभवर्षे तेन स्पर्द्धमान इन्द्रो न ववर्ष, तदवधार्य योगेश्वरो भगवान् ऋषभोऽजनाभे खण्डे निजयोगशक्त्याऽभ्यवर्षत्।।३।। नाभिस्तु स्वेच्छानुरूपं सुपुत्रं प्राप्य, प्रमोदातिशयविह्वलो जातः, स्वेच्छागृहीतनरवपुषं पुराणपुरुषं भगवन्तं स्वकीयं पुत्रं मत्वा, हे वत्स! तात! इति सानुरागं लालयन् सर्वोत्तमं सुखं प्राप्तः, ततः पौर-प्रकृति-जनपदानामनुरागं विदित्वा, नाभिर्वर्णाश्रमधर्ममर्यादारक्षणाय पुत्रमृषभं राज्याभिषिक्तं कृत्वा, तं ब्राह्मणानामुत्सङ्गे निधाय, बदरिकाश्रमे मेरुदेव्या सह प्रसन्नः निर्विघ्नः, समाधियोगेन परमेश्वरं नरनारायणाख्यं वासुदेवमुपासीनः सन् कालेन मुक्तिमवाप ।।४।। तस्य नाभेः श्लोकावार्या उदाहरन्ति - यथा- राजर्षेर्नाभेः कर्म कोऽनुकुर्यात्, यस्य शुद्धेन कर्मणा स्वयं हरिः पुत्रत्वं प्राप्तः।।५।। नाभेरन्यो ब्रह्मण्यः कः, यस्य यज्ञे पूजिता विप्रा मन्त्रबलेन यज्ञेशं भगवन्तं दर्शयामासुः।।६।। अथ भगवान् ऋषभदेवः स्वमजनाभं वर्षं कर्मक्षेत्रममन्यत,

र्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास। येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ।।७।। तमनु कुशावर्त्त इलावर्त्तो ब्रह्मावर्त्तो मलयः केतुर्भद्रसेन इन्द्रस्पृक् विदर्भः कीकट इति नव नवतिप्रधानाः। कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः। आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजन इति भागवतधर्मदर्शका नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवाद उपरिष्ठाद्वर्णयिष्यामः।।८।। यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः।।९।। भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केवलानन्दानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणे-

---

।। सङ्ग्रहोक्तिः ।।

लोकसंग्रहाय गुरुकुलवासं कृत्वा, तत्र च लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्मानन्वशिक्षत, स इन्द्रदत्तां तत्कन्यां जयन्तीमुपयेमे, वेदनिर्दिष्टं प्रवृत्तिनिवृत्तिरूपमुभयविधं कर्म समाचरन्, स आत्मसमान् शतं पुत्रान् जयन्त्यां जनयामास, तेषु जेष्ठो गुणैः श्रेष्ठो महायोगी भरत आसीत्, यस्य नाम्ना इममजनाभं वर्षं "भारत" इति जना व्यपदिशन्ति।।७।। भरतमनु कुशावर्त्तः, इलावर्त्तः, ब्रह्मावर्त्तः, मलयः, केतुः, भद्रसेनः, इन्द्रस्पृक्, विदर्भः, किकटः इति नामानो नव नाभिसुताः नवतेः श्रेष्ठाः, नवतिपुत्राणां मध्ये कविः, हरिः, अन्तरिक्षः, प्रबुद्धः, पिप्पलायनः, आविर्होत्रः, द्रुमिलः, चमसः, करभाजनः, इत्यभिधाना नव भागवतधर्मदर्शका महाभागवता अभवन्, तेषां भगवन्महिमोपेतं चरितं वसुदेवनारदसंवाद उपरिष्ठादेकादशस्कन्धे वर्णयिष्यामः।।८।। कनीयांस एकाशितिसंख्याका जयन्तीपुत्राः पितुरादेशकरा महाशीला महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः।।९।। षाड्गुण्यपूर्ण ऋषभः स्वतन्त्रः अनर्थपरंपराया निवृत्तः, केवलमानन्दमनुभवन्, स्वयमीश्वरः सन्नपि प्राकृतजनवत् कर्माण्यरभमाणः, कालेन क्षीणं धर्मम् अज्ञजनान् स्वयमाचर्यैव शिक्षयन्, समबुद्धिरुपशमपरो मैत्रः, कारुणिको भूत्वा धर्मार्थयशःसुखमोक्षसाधनेष्वविरोधेन

नोपशिक्षयन्नतद्विदां सम उपशान्तो मैत्रः कारुणिको धर्मार्थयशःप्रजानन्दामृताविरोधेन गृहेषु लोकं न्ययमयत्।।१०।। यद्यच्छीर्षण्याचरितं तत्तदनुवर्त्तते लोकः। यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ।द्रव्यदेशकालवयःश्रद्धार्त्विग्भिर्विविधोद्देशोपचितैः सर्वैः क्रतुभिर्यथोपदेशं शतकृत्व इयाज।।११।। भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिदपेक्षते भर्त्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण।।१२।। स कदाचिदटमानो भगवानृषभो ब्रह्मावर्त्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युपशिक्षयन्निति होवाच ।।१३।।

इति श्रीमद्भागवते पञ्चमस्कन्धे चतुर्थोऽध्यायः।।४।।

।। सङ्ग्रहोक्तिः।।

लोकान् नियमितवान्।।१०।। यद्यपि श्रेष्ठः पुरुषो यद् यद् आचरति, जनसाधारणस्तदाचरणमेवाऽनुवर्तते, तथापि सकलधर्मं वेदसम्बन्धिगुह्यं रहस्यं स्वविदितमपि स्वयं ब्राह्मणान् पृष्ट्वैव सामादिभिरुपायैर्जनतां शशास, देश-काल-वयः-श्रद्धाऋत्विग्भिरुपचितैर्यज्ञैर्यथाविधि शतकृत्व इयाज।।११।। भगवता ऋषभेणाऽभिरक्षितेऽस्मिन् खण्डे कोऽपि पुरुषो भर्त्तरि ऋषभे स्नेहातिशयं विनाऽन्यत् स्वस्याऽविद्यामानमिव पुरुषान्तरात् कदाचित् केनचित् किमपि वस्तु न वाञ्छति।।१२।। स भगवान् ऋषभः कदाचित् अटमानः सन् ब्रह्मावर्त्तं गतः, तत्र ब्रह्मर्षिणां सदसि प्रजानां शृण्वन्तीनां सतीनां समाहितचित्तान् प्रश्रयप्रणयातिशयेन वशीकृतान् स्वपुत्रान् उपशिक्षयन्नुवाच।।१३।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः ।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

ऋषभ उवाच – नायं देहो देहभाजां नृलोके कष्टान् कामानर्हते विड्भुजां ये। तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद् ब्रह्मसौख्यं त्वनन्तम् ।।१।। महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् । महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ।।२।। ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्त्तिकेषु । गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके।।३।। नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति। न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः।।४।। पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम्। यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः।।५।। एवं मनः कर्म वशं प्रयुङ्क्ते अविद्ययात्मन्युपधीयमाने। *प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ।।६।।*

।। सङ्ग्रहोक्तिः ।।

अथ पञ्चमोऽध्यायः ।।५।।

ऋषभस्य मोक्षधर्मोपदेशैः पुत्रानुशासनं पारमहंस्यधर्मव्याख्या च

ऋषभ उवाच – मनुष्यलोके देहधारिणां मध्येऽयं मनुष्यदेहः कष्टसाध्यविषयभोगार्थं नास्ति, ये विषयास्ते तु विड्भुजामपि सन्ति, अयं देहस्तु भगवदाराधनरूपदिव्यतपश्चरणार्होऽस्ति, यस्मात्तपसः सत्वं शुद्ध्येत, येन तपसा चाऽनन्तं भगवत्सेवासंप्राप्तिलक्षणं सुखं भवेत् ।।१।। महत्सेवां मोक्षद्वारमाहुः, स्त्रीणां स्त्रैणानां च सङ्गं संसारद्वारमाहुः, ते महापुरुषास्तु समचित्ताः प्रशान्ता मन्युरहिताः सर्वभूतहितैषिणः परोपकारनिरताश्च भवन्ति।।२।। ये मयि परमेश्वरे कृतसौहार्दाः, देहपोषणपरवार्तासु स्त्रीपुत्रमित्रधनादिषु गृहेषु च प्रीतियुक्ता न भवन्ति, लोके ये देहनिर्वाहाधिकेष्वर्थेषु स्पृहाशून्या भवन्ति, ते महान्तः सन्ति ।।३।। जन इन्द्रियतृप्त्यर्थं पापं कर्म करोति, यतः पापकर्मपरिणामरूपोऽयं देहोऽस्थिरः सन्नपि पुरुदुःखदो जातः, तेन पापमयं कर्म, पुनर्देहः इत्यनवस्थामहं साधु न मन्ये ।।४।। यावत् आत्मयाथात्म्याभावस्तावद् अज्ञानकृतः पराभवः, यावच्च पराभवस्तावदिन्द्रियतृप्तये पापक्रियाः,

यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् । गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ।।७।। पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रन्थिमाहुः। यतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ।।८।। यदा मनो हृदयग्रन्थिरस्य कर्मानुबद्धो दृढ आश्लथेत। तदा जनः संपरिवर्त्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ।।९।। हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च। सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ।।१०।। मत्कर्मभिर्मत्कथया च नित्यं मद्देवसङ्गाद् गुणकीर्त्तनान्मे। निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ।।११।। आध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सध्र्यक्। सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचाम् ।।१२।। सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन।

।। सङ्ग्रहोक्तिः ।।

तावत्तत्कर्मकमनसा शरीरसंबन्धो भवति ।।५।। देहाभिमानरूपाज्ञानेन ज्ञानस्वरूप आत्मन्याच्छाद्यमाने सति पूर्वकृतं कर्म पुरुषस्य मनो वशं करोति, अतो यावत् वासुदेवे मयि भक्तिर्न स्यात् तावत् दुःखदेहसंबन्धाद्विमुक्तो न भवति ।।६।। स्वार्थे प्रमत्तः पुमान् यावद्विषयासक्तिं मिथ्या न पश्यति, तावत् स स्वस्वरूपस्मृतिरहितः सन् मैथुनसुखात्मकं गृहं प्राप्य विविधान् तापान् लभते ।।७।। गृहे स्त्रीपुंसयोर्मिथुनीभावमेव तयोर्मिथो हृदयग्रन्थिमाहुः, यतो जनस्य गृह-क्षेत्र-सुत-वित्ता-ऽऽप्तैः "अहंमम" इति मोहो जायते ।।८।। यदाऽस्य पुंसः कर्मभिर्बद्धा मनोरूपा हृदयग्रन्थिः शिथिला भवति, तदाऽयं संसारान्निवृत्त्याऽहंकारं परित्यज्य मुक्तसंगः सन् परं पदं प्राप्नोति ।।९।। इदानीं हृदयग्रन्थिशैथिल्यापादकानि पञ्चविंशतिसाधनानि कथयति - निर्दोषे गुरौ मयि भक्त्या, अनुवृत्तिरूपसेवया, तृष्णाभावेन, द्वन्द्वतितिक्षया, सर्वत्र दुःखानुसंधानेन, जिज्ञासया, कष्टसहनरूपतपसा, काम्यकर्मत्यागेन, मदाराधनरूपैः कर्मभिः, मत्कथया, भागवतानां संगेन, मद्गुणकीर्त्तनेन, निर्वैरेण, सुखदुःखयोः साम्येन, इन्द्रियविक्षेपराहित्येन, देहगेहादावात्मबुद्धिजिहासया ।।१०-११।। अध्यात्मशास्त्राभ्यासेन, विशुद्धाहारेण, प्राणेन्द्रियमनोऽभिजयेन, सदुपायश्रद्धया, ब्रह्मचर्येण, प्रमादत्यागेन, वाचां यमेन, नियमेन,

योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम् ।।१३।। कर्माशयं हृदयग्रन्थिबन्धमविद्ययासादितमप्रमत्तः। अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ।।१४।। पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः। इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ।।१५।। लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः। अन्योन्यवैरं सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ।।१६।। कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्त्तमानम्। दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ।।१७।। *गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात्। दैवं न तत्स्याच्च पतिर्न स स्यान्न मोचयेद्यः समुपेतमृत्युम् ।।१८।।* इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः। पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः ।।१९।। तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् ।

।। सङ्ग्रहोक्तिः ।।

सर्वत्रमद्भावावलोकनेन, शास्त्रशुद्धज्ञानेन, समाधियोगेन, एवमुक्तसाधनैः धैर्य-प्रयत्न-विवेकैर्युक्तः अत एव कुशलः देहेऽहमाख्यं लिङ्गदेहं त्यजेत ।।१२-१३।। कर्मवासनारूपम-विद्यया प्रापितं हृदयग्रन्थिबन्धं प्रमादरहितः सन् योगेन सम्यग् व्यपोह्य उपारमेत ।।१४।। मल्लोकं मदनुग्रहं च कामयमानः पिता पुत्रान् अनुशिष्यात्, गुरुः शिष्यान् अनुशिष्यात्, नृपः प्रजा अनुशिष्यात्, कर्ममूढान् पुरुषान् कर्मसु न योजयेत् ।।१५।। आत्मकल्याणमजानन् लोकोऽत्यन्तं वासनायुक्तः सन् परद्रोहेण परद्रव्याणि प्राप्तुमिच्छति, किन्तु सुखलेशहेतोरनन्तदुःखहेतुमन्योन्यवैरं न जानाति ।।१६।। अविद्यायां वर्तमानं तादृशं कुबुद्धिं पुरुषं तदभिज्ञो दयालुः कः पुमान् पुनः तस्मिन्नेव द्रोहादिमार्गे प्रवर्तयेत् ।।१७।। यो योगोपदेशेन मृत्युरूपात् संसारात् विमुक्तं न कुर्यात् स गुरुर्न स्यात्, स स्वजनः पिता माता देवता पतिश्च न भवेत् ।।१८।। शुद्धसत्त्वात्मकमिदं मे शरीरं दुर्विभाव्यमस्ति, यतः शुद्धसत्त्वप्रचुरं मे हृदयमस्ति, यत्र धर्मः तिष्ठेत्, मयाऽधर्मः परित्यक्तः, अत आर्या मां ऋषभं वदन्ति ।।१९।। भवन्तः सर्वे मम हृदयाज्जाताः, तस्मात् भवतां सोदरं महीयांसं भरतं निष्कपटभावेन भजध्वम्, -

अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ।।२०।। भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः। ततो मनुष्याः प्रमथास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये।।२१।। देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम्। भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहंद्विजदेवदेवः।।२२।। न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं च। यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाऽग्निहोत्रे।।२३।। धृता तनूरुशती मे पुराणी येनेह सत्त्वं परमं पवित्रम्। शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ।।२४।। मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित् । येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजाम्।।२५।। सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि। संभावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदु हार्हणं मे।।२६।। मनोवचोदृक्करणे-हितस्य साक्षात्कृतं मे परिबर्हणं हि।

।। सङ्ग्रहोक्तिः ।।

भरतभजनमेव प्रजानां भरणं मम शुश्रूषणं च कृतं स्यात्।।२०।। चेतनाचेतनभूतेषु स्थावराः श्रेष्ठाः, तेभ्यो जङ्गमा श्रेष्ठाः, तेष्वपि सज्ञाननिष्ठाः श्रेष्ठाः, ततो मनुष्याः श्रेष्ठाः, तेभ्यः प्रमथाः, तेभ्यः गन्धर्वाः श्रेष्ठाः, तेभ्यः किन्नरादायः श्रेष्ठाः।।२१।। तेभ्योऽसुराः श्रेष्ठाः, तेभ्य इन्द्रादयो देवा श्रेष्ठाः, तेभ्यो दक्षादयो ब्रह्मपुत्राः श्रेष्ठाः, तेषां मध्ये रुद्रः श्रेष्ठः, ततो विरिञ्चिः, ततोऽहं श्रेष्ठः, मत्तोऽपि ब्राह्मणाः श्रेष्ठाः।।२२।। हे विप्राः! ब्राह्मणैरन्यत् भूतं न तुलये, अतो ब्राह्मणात् परं किमपि भूतं न पश्यामि, ब्राह्मणाग्नौ नृभिः श्रद्धया दत्तमन्नादिकं यथेच्छं यथाऽहमश्नामि तथाऽग्निहोत्रे न।।२३।। मम शुद्धा चिरन्तना वेदमूर्तिर्येन ब्राह्मणेन धृता, यत्र ब्राह्मणे परमं पवित्रं सत्त्वं प्रतिष्ठितम्, तथा यत्र शमो दमः सत्यम् अनुग्रहः तपः तितिक्षा अनुभव श्चेति अष्टौ गुणाः स्थिताः सन्ति।।२४।। येषां मद्भक्तानां ब्राह्मणानां मत्तोऽनन्तात् परतः परस्मादपि किंचित् प्राप्तव्यं नास्ति, तेषां मयि भक्तिभाजामितरेण पदार्थेन किं स्यात्, न किमपि।।२५।। हे सुताः! प्रकृतिपुरुषेश्वराणां परस्परवैलक्षण्यबुद्धिभिः भवद्भिः क्षणे क्षणे स्थावरजङ्गमानि भूतानि मच्छरीरतया संमाननीयानि, तद्भूतसंभावनमेव मदाराधनमस्ति।।२६।।

विना पुमान्येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत् ।।२७।। *श्रीशुक उवाच* – एवमनुशास्याऽऽत्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद् भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यं धर्ममुपशिक्षयमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणीतलपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्त्तात्प्रवव्राज ।।२८।। जडान्धबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रत- स्तूष्णीं बभूव ।।२९।। तत्र तत्र पुरग्रामाकरखेटखर्वटवाटीशिबिरव्रजघोषसार्थगिरि- वनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जन- ताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन् देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेना- समारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथ्वीमेकचरः परिबभ्राम ।।३०।।

।। सङ्ग्रहोक्तिः ।।

मनोवचोदृक्करणादिभिः कृतं मदाराधनं हि सर्वक्रियाणां फलं, तद्विना पुमान् कृतान्तपाशाद् विमोक्तुं समर्थो न स्यात् ।।२७।। *श्रीशुक उवाच* – स्वयमनुशिष्टानपि पुत्रानेवमनुशास्य महानुभावः परमसुहृद् भगवान् ऋषभ उपशमशीलानां मुनीनां भक्ति-ज्ञान-वैराग्य-लक्षणं पारमहंस्यं धर्ममुपशिक्षयन्, ज्येष्ठं तनयं महाभागवतं भगवज्जनपारायणं भरतं धरणीतलपालनाय राज्येऽभिषिच्य, स्वयं गृह एवाऽवशिष्टशरीरमात्रपरिग्रह उन्मत्त इव दिगम्बरः प्रकीर्णकेश आत्मन्यग्निं समारोप्य, इत्थंभूतः सन् ब्रह्मावर्तात् प्रवव्राज ।।२८।। अभिभाष्यमाणः सन्नपि जनानां मध्ये जडा-ऽन्ध-बधिर-पिशाच-उन्मादकवद् वर्तमानः, अवधूतवेषः, गृहीतमौनव्रतस्तूष्णीं बभूव ।।२९।। तत्र तत्र पुर-ग्रामा-ऽऽकर-खेट-खर्वट- वाटी-शिबिर-व्रज-घोष-सार्थ-गिरि-वना-ऽऽश्रमादिषु दुर्जनैः तर्जन-ताडन-मूत्रण-ष्ठीवन- ग्राव-शकृद्रजःप्रक्षेपण-पूतिवात-दुरुक्तैर्मक्षिकाभिर्भृशमर्द्यमानो वनगज इव तत् तदविगणयन् एतस्मिन् देहे स्वात्मपरमात्मस्वरूपानुभवस्वरूपेण अनारोपिताहंममाभिमानत्वादेकरूपमना

अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनावयवविन्यासः प्रकृतिसुन्दरः स्वभावहाससुमुखो नवनलिनदलायमानशिशिरताराारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकण्ठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः परागवलम्बमानकुटिलकपिशकेशभूरिभारोऽवमतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ।।३१।। यर्हि वा व स भगवान् लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकरणं बीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः। तस्य ह यः पुरिषसुरभिसौगन्ध्यवायुस्तं देशं दशयोजनं समंतात्सुरभीचकार ।।३२।। एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्मेति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानन्दानुभवः आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेवे आत्मनोऽव्यवधानानन्तरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवान्तर्द्धानपरकायप्रवेश-

---

॥ सङ्ग्रहोक्तिः ॥

एकाकी एव पृथिवीं बभ्राम ।।३०।। अतिसुकुमारकरचरणः प्रकृतिसुन्दरः स्वभावहाससुमुखो नवीननलिनदलायतनयनः सदृशसुभगकपोलकण्ठनासः स्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः कुटिलकपिश केशभूरिभारोऽवमतमलिननिजशरीरेण ग्रहगृहीत इव ऋषभोऽदृश्यत ।।३१।। स भगवान् इमं लोकं प्रतीपमिव पश्यन्, आजगरीवृत्तिमाश्रितः सन् शयान एव अश्नाति, जलं पिबति, अवमेहति, पुरीषमुत्सृजति स्म, पुरीषे लुण्ठन् एव आस्ते, तस्य ऋषभस्य पुरीषजनितसुगन्धो वायुर्दशयोजनं यावद् देशं सुरभीचकार ।।३२।। एवं गो-मृग-काक-चर्यया व्रजन्, तिष्ठन्, आसीनः, शयानः, काकमृगगो चरितः सन् पिबति, खादति, अवमेहति स्म, नानायोगचर्याचरणोऽविरतपरमानन्दानुभवः कैवल्यपतिर्भगवान् ऋषभदेवः सर्वेषां भूतानामन्तरात्मनि भगवति वासुदेवेऽव्यवधानान्तरभावेन सिद्धसमस्तार्थपरिपूर्णः सन् यदृच्छया प्राप्तान्यपि गगनसंचार-

दूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा नृप हृदयेनाभ्यनन्दत् ।।३३।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।।६।।

राजोवाच – न नूनं भगवन् आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानां योगैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ।।१।। *ऋषिरुवाच* – सत्यमुक्तं किं त्विह वा एके न मनसोऽद्धा विस्रम्भमनवस्थानस्य शठः किरात इव संगच्छन्ते ।।२।। तथा चोक्तं – न *कुर्यात्कर्हिचित्सङ्गं मनसि ह्यनवस्थिते। यद्विश्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ।।३।।* नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः। *योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ।।४।।*

।। सङ्ग्रहोक्तिः ।।

मनोवेगा-ऽन्तर्धान-परकायप्रवेश-दूरदर्शन-ग्रहण-श्रवणादीनि योगैश्वर्याणि न परिगृहीतवान्, हे नृप! मुक्तिविरोधित्वात् तानि मनसाऽपि नाऽभ्यनन्दत् ।।३३।।

इति श्रीद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः ।।५।।

अथ षष्ठोऽध्यायः ।।६।।

ऋषभस्य देहत्यागक्रमः

राजोवाच – हे भगवन्! योगसमिद्धज्ञानाग्निना भर्जितकर्मबीजानामात्मारामाणां योगिनां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नार्हन्ति ।।१।। *ऋषिरुवाच* – भवता समचीनमुक्तम्, किन्तु योगमार्गे केचन योगिनोऽतिचञ्चलस्य मनसो विश्वासं न कुर्वन्ति ।।२।। तथा चोक्तम् – अस्थिरे मनसि कर्हिचिद् अपि सङ्गं = मैत्रीं न कुर्यात्, तस्योपरि विश्वासे कृते सति शिवस्य चिरात् संचितं तपः चस्कन्द ।।३।। कृतमनोविश्वासस्य योगिनो मनः कृतविश्वासस्य स्वामिनः पुंश्चली जाया जाराणामिव कामस्य प्रवेशावकाशं ददाति, तमनु क्रोधादीनामपि छिद्रं ददाति ।।४।।

कामो मन्युर्मदो लोभः शोकमोहभयादयः। कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः॥५॥ अथैवमखिललोकपालललामो विलक्षणैर्जडवदवधूतवेषभाषाचरितैरलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम॥६॥ तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन चङ्क्रममाणः एकदा कोङ्कवेङ्ककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्माद इव मुक्तमूर्द्धजोऽसंवीत एव विचचार॥७॥ अथ समीरवेगविधूतवेणुविघर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददाह॥८॥ यस्य किलानुचरितमाश्रमातीतमुपाकर्ण्य कोङ्कवेङ्ककुटकानां राजार्हन्नामा स्वयमुपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः संप्रवर्त्तयिष्यते॥९॥

॥ सङ्ग्रहोक्तिः ॥

काम-क्रोध-लोभ-मद-शोक-मोह-मदादयो विकारा मनस एव समुद्भवन्ति, कर्मबन्धोऽपि तेन मनसैव जायते, को बुध तन्मनो विश्वसेत्॥५॥ अथाखिललोकपालानामलंकारभूतः विलक्षणैरवधूतवेषभाषाचरितैरलक्षितभगवत्प्रभावो योगिनां देहत्यागरीतिं दर्शयन् स्वकलेवरं जिहासुः ऋषभः, प्रत्यगात्मानं परमात्माऽपृथक्सिद्धत्वेन साक्षात् कुर्वाणो निवृत्तप्रारब्धकर्मानुवृत्तिः सन्नुपरराम॥६॥ एवं मनसा त्यक्तशरीराभिमानस्य तस्य ऋषभस्य देहो योगमायावासनया इमां जगतीं चङ्क्रममाणः एकदा कोङ्कवेङ्ककुटकान् दक्षिणकर्णाटकान् यदृच्छयोपगतः, तत्र कुटकाचलोपवन आस्यकृताश्मकवल = उन्मत्त इव दिगम्बर एव विचचार॥७॥ अथ वायुवेगेन कम्पित वेणूनां संघर्षणाज्जातः प्रचण्डो दावानलः सर्वतस्तद् वनं दहन् तं ऋषभमपि ददाह॥८॥ यस्य ऋषभस्याऽनुचरितमाश्रमातीतं श्रुत्वा कोङ्कवेङ्ककुकटानां राजा अर्हन् अकुतोभयं स्वधर्मपथं विहाय भवितव्येन विमोहितो मन्दः स्वबुद्ध्या कुपथपाखण्डात्मकं धर्मं कलौ प्रवर्त्तयिष्यते॥९॥

येन ह वा व कलौ मनुजापसदा देवमायाविमोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजेच्छया गृह्णाना अस्नानाऽनाचमनाऽशौचकेशोपलुञ्चनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ।।१०।। ते च ह्यर्वाक्तनया निजलोकत्रयान्धपरंपरयाऽऽश्वस्तास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ।।११।। अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ।।१२।। तस्यानुगुणान् श्लोकान् गायन्ति। अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत्। गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ।।१३।। अहो नु वंशो यशसावदातः प्रैयव्रतो यत्र पुमान्पुराणः। कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ।।१४।। को न्वस्य काष्ठामपरोऽनुगच्छेन् मनोरथेनाप्यभवस्य योगी। यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ।।१५।। इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत -

---

।। सङ्ग्रहोक्तिः ।।

तेन पाखण्डधर्मेण देवमायया मोहिताः मानवाधमाः स्वविधिनिषेधस्नानशौचाचारहीनाः सन्तः स्वेच्छया देवावज्ञारूपाण्यस्नानाऽनाचमनाऽशौचकेशोपलुञ्चनादीनि कुत्सितव्रतानि गृह्णन्तो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ।।१०।। तेऽवेदमूलया स्वेच्छाविहितप्रवृत्त्याऽन्धपरंपरयाऽऽश्वस्ताः सन्तोऽन्धतमोनाम्नि नरके स्वयमेव प्रपतिष्यन्ति ।।११।। ऋषभस्याऽयमवतारो रजोगुणभृतक्षत्रियाणां मोक्षोपदेशार्थं जातः ।।१२।। आर्षभप्रभावप्रतिपादकान् श्लोकानार्या गायन्ति, यथा - अहो! सप्तसमुद्रावेष्टिताया ताया भूमेः सप्तद्वीपेषु मध्येऽयं जम्बूद्वीपो धन्योऽस्ति, तत्राऽपि एतद् भारतवर्षमधिकं पुण्यवदस्ति, यत्रत्या जना विष्णोः भद्राण्यवतारचरित्राणि गायन्ति ।।१३।। अहो! प्रियव्रतस्य वंशो यशसा विशुद्धः, यतस्तत्र परमपुरुषः ऋषभोऽवतीर्य मोक्षकारकं धर्मं चचार ।।१४।। अजन्मनः ऋषभस्य चरित्रदिशं मनसाऽपि को योगी गच्छेत्, यः ऋषभेण यदृच्छया प्राप्ता अपि त्यक्ता योगसिद्धीः स्पृहयति ।।१५।। इत्थं सकल वेद-लोक-देव-ब्राह्मण-गवां परमगुरोर्भगवतः ऋषभस्य चरित्रं पुंसा समस्तदुष्कृतविनाशकं परममङ्गलायतनं च वर्तते, तद् यः पुमान् परया श्रद्धया सर्वदा -

ऋषभाख्यस्य विशुद्धाचरितेरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामङ्गलाय-
नमिदमनुश्रद्धयोपचितयानुशृणोत्याश्रावयति वा अनुसवनं भगवति तस्मिन् वासुदेव
एकान्ततो भक्तिरनयोरपि समनुवर्त्तते।।१६।। यस्यामेव कवय आत्मानमविरतं
विविधवृजिनसंसारपरितापोपतप्यमानमनुसवं स्नापयन्तस्तस्यैव परया निर्वृत्या
ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव
परिसमाप्तसर्वार्थाः।।१७।। *राजन्पतिर्गुरुरयं भवतां यदूनां दैवं प्रियः कुलपतिः
क्व च किंकरो वः। अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म
न भक्तियोगम्* ।।१८।। नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया
चिरसुप्तबुद्धेः। लोकस्य यः करुणयाऽभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय
तस्मै।।१९।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे ऋषभचरितं नाम षष्ठोऽध्यायः ।। ६ ।।

।। सङ्ग्रहोक्तिः ।।

शृणोति श्रावयति च तस्य पुंसः सर्वात्मनि भगवति वासुदेव एकान्तिकी भक्तिर्भवति।।१६।।ये भक्तिमन्तो मुनयो विविधदुःखपूर्णं संसारसंतापसंतप्तमात्मानं निरन्तरं यस्यां कथासुधा-रसवत्यां भक्तौ स्नापयन्तः परां शांतिं प्राप्नुवन्ति तथा स्वयंमासादितमपवर्गमपि नैवाद्रियन्ते ।।१७।। हे राजन्! मुक्तिदो भगवान् कृष्ण पाण्डवानां यदूनां च पालकः, गुरुः, प्रियः, दैवं, कुलपतिः, पाण्डवानां तु क्वचित् किंकरोऽपि जातः, एवं भजतां भगवान् मुक्तिं ददाति, किन्तु कर्हिचिद् भक्तियोगं न ददाति।।१८।। स्वस्वरूपेऽचलस्थितत्वात् यो निवृत्ततृष्णः ऋषभः दुष्कर्मप्रवृत्त्या श्रेयसि चिरसुप्तबुद्धेर्लोकस्य निर्भयमात्मस्वरूपमाख्यातवान् तस्मै भगवते ऋषभाय नमः।।१९।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः।।६ ।।

अथ सप्तमोऽध्यायः ।।७।।

श्रीशुक उवाच – भरतस्तु महाभागवतो यदा भगवतावनितलपरिपालनाय संचिन्तितस्तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ।।१।। तस्यामु ह वा आत्मजान्कार्त्स्न्येनानुरूपानात्मनः पञ्च जनयामास, भूतादिरिव भूतसूक्ष्माणि। सुमतिं राष्ट्रभूतं सुदर्शनमावरणं धूम्रकेतुमिति ।।२।। अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति ।।३।। स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्त्तमानाः प्रजाः स्वयं स्वधर्ममनुवर्त्तमानः पर्यपालयत् ।।४।। ईजे च भगवन्तं यज्ञक्रतुरूपं यज्ञपुरुषं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिः अनुसवनं चातुर्होत्रविधिना ।।५।। संप्रचरत्सु नानायागेषु विरचिताङ्गक्रियेष्वपूर्वं यत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्त्तरि परदेवतायां भगवति वासुदेव एव भावयमानः। आत्मनैपुण्यमृदितकषायो हविष्ष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत् ।।६।।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तमोऽध्यायः ।।७।।

भरतोपाख्याने भरतस्य पुलहाश्रमगमनं तत्र तपश्चरणं च

श्रीशुक उवाच – महाभागवतो भरतः यदा ऋषभदेवेन पृथिवीपालनाय राज्येऽभिषिक्तः तदा भूमिशासनतत्परः सन् विश्वरूपस्य दुहितरं पञ्चजनीमुपयेमे ।।१।। स च तस्यामात्मसदृशान् पञ्च पुत्रान्, भूतादिः पञ्च शब्दादिविषयान् इव जनयामास, ते च सुमतिः, राष्ट्रभृत्, सुदर्शनः, आवरणः धूम्रकेतुश्चेति नामान आसन् ।।२।। एतद् अजनाभं नाम वर्षं भरताधिपत्यादारभ्य भारतवर्षमिति व्यपदिशन्ति ।।३।। पितृपितामहवदुरुवत्सलो भरतः स्वधर्मं पालयन् सन् स्वस्वकर्मनिष्ठाः प्रजाः पालयामास ।।४।। भरतउच्चावचैः प्रकृतिविकृतिभिः क्रतुभिः यज्ञपुरुषं भगवन्तं श्रद्धयाऽनुसवनमीजे ।।५।। विरचिताङ्गक्रियेषु नानायागेषु प्रर्वतमानेषु तत्फलमपूर्वाख्यं सर्वदेवताप्रतिपाद्यतां मन्त्राणां नियामके परब्रह्मणि यज्ञपुरुषे वासुदेवे समर्पयन्

एवं कर्मविशुद्धया विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालाऽरिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत ।।७।। एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात् स्वनिकेतात्पुलहाश्रमं प्रवव्राज । यत्र ह वा व भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यते इच्छारूपेण ।।८।। यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ।।९।। तस्मिन्वा व किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ।।१०।। तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः

।। सङ्ग्रहोक्तिः ।।

भरतः, यज्ञभागभागिनो देवान् वासुदेवस्याऽवयवेषु धारयन्, तमभ्यध्यायत् ।।६।। एवं कर्मविशुद्ध्या विशुद्धहृदयस्य भरतस्य हृदयाकाशविराजमाने महापुरुषलक्षणे श्रीवत्स-कौस्तुभ-वनमाला-शंख-चक्र-गदा-पद्मादिभिः सुशोभिते परब्रह्मणि भगवति वासुदेवे नितरां विवर्धमाना भक्तिरजायत ।।७।। इत्थं वर्षायुतसहस्रपर्यवसाने समाप्तप्रारब्धो भरतो भुज्यमानं पितृपैतामहं धनं यथाविभागं पुत्रेभ्यो विभज्य प्रदाय च सकलसंपन्निकेतनात् स्वनिकेतात् पुलहाश्रमं जगाम, यत्र भगवान् हरिरद्यापि तत्रत्यानां भक्तानां वात्सल्येन वशः सन् यथेच्छं संनिहितो भवति ।।८।। यत्र प्रवहमाणा सरित्प्रवरा चक्रनदी (गण्डकी) उभयतोनाभिभिर्दृषच्चक्रैर्विराजमाना सती सर्वत्राऽऽश्रमपदानि पवित्री करोति ।।९।। तस्मिन् पुलहाश्रम एकलः स भरतः विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च भगवत आराधनं कुर्वाणो विशुद्धाहारः समृद्धबाह्यान्तःकरणनिग्रहः भगवति परां भक्तिमवाप ।।१०।। एवं सततं परमपुरुषस्य सेवया प्रवर्द्धमानप्रेमातिशयद्रवितहृदयः, प्रहर्षवेगोद्भिद्यमानरोमपुलकः,

प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगम्भीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ।।११।। इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवन्तं हिरण्मयं पुरुषमुज्जिहाने सूर्यमण्डलेऽभ्युपतिष्ठन्निति होवाच ।।१२।। परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान। स्वरेतसादः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिमः ।।१३।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे सप्तमोऽध्यायः ।। ७ ।।

।। सङ्ग्रहोक्तिः ।।

प्रणयबाष्पावरुद्धनयनः, निजेष्टस्याऽरुणचरणारविन्दध्यानप्रवृद्धभक्तियोगेन प्रसन्नगम्भीरमानसः स क्रियमाणां भगवत्सपर्यामपि न सस्मार ।।११।। एवं धृतभगवद्व्रतोऽजिनवासा अभिषेकार्द्रकपिशकुटिलजटाकलापेन विरोचमानः स भरतः सूर्योदये जाते सति भगवन्तं हिरण्मयं सूर्यर्चा ध्यायन् सन् उवाच ।।१३।। यो मनसा चिदचिदात्मकमिदं जगत् ससर्ज, यः स्वसृष्टं जगत् स्वतेजसा पुनः प्रविश्य शब्दादिविषयान् कांक्षमाणं जीवं पश्यति, तस्य सवितुर्विष्णोः प्रकृतिमण्डलात् परं तेजोमयं रूपं शरणं गच्छेम ।।१३।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां सप्तमोऽध्यायः ।।७।।

अथ अष्टमोऽध्यायः ।।८।।

श्रीशुक उवाच - एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्त्तत्रयमुदकान्त उपविवेश।।१।। तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम। तया पेपीयमाने उदके तावदेवाविदूरे नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत्।।२।। तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम।।३।। तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात।।४।। तत्प्रसवोत्सर्पण-भयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपात अथ च ममार।।५।। तं त्वेणकुणकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बन्धुभिरिवानुकम्पया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत्।।६।।

।। सङ्ग्रहोक्तिः ।।

अथाऽष्टमोऽध्यायः।।८।।

विष्णुमाराधयतो भरतस्य मृगशावकासक्त्या मृगशरीरप्राप्तिः

श्रीशुक उवाच - एकदा स भरतश्चक्रनद्यां स्नात्वा, तत्रैव नित्यनैमित्तिकमावश्यकं कर्म विधाय प्रणवं जपन् सन् नदीतीरे मुहूर्तत्रयमुपविवेश।।१।। हे राजन्! तदा नदीतीर एका हरिणी पिपासया जलसमीपप्रदेशमुपजगाम, तया नदीजले पेपीयमाने सति तत्क्षणमेव समीपप्रदेशे नदतो मृगपतेर्लोकभयङ्करो महान् नाद उदपतत्।।२।। तमुन्नादमाकर्ण्य प्रकृत्या व्याकुला हरिणी सुतरां सिंहभयाद् विह्वला जाता, चकितनिरीक्षणाऽगतपिपासा सा सहसा भयात् नदीमुल्लङ्घितवती।।३।। उत्पतन्त्या गर्भिण्यास्तस्या गर्भोऽवगलित अत एव योनिनिर्गतः सन् नदीप्रवाहे निपपात।।४।। प्रसवोत्सर्पणभयैः खिन्ना, पीडिता, स्वगणवियुक्ता च सा हरिणी कस्यांचित् गिरिगुहायां पपात ममार च।।५।। जलप्रवाहेण प्रवहमाणं दीनं तं हरिणबालं वीक्ष्य राजर्षिर्भरतो मृतमातरं बन्धुविरहितमिव विचार्य दयया तं हस्ताभ्यामादाय स्वस्थानमनयत्।।६।।

तस्य ह वा एणकुणक उच्चैरेतस्मिन् कृतनिजाभिमानस्याहरहस्तत्पोषणपालन-
प्रीणनलालनाऽनुध्यानेनाऽऽत्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिप-
येनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ।।७।। अहो बतायमेणकुणकः
कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च
मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद
मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयु-
नानुष्ठेयं शरण्योपेक्षादोषविदुषा ।।८।। नूनं ह्यार्या साधव उपशमशीलाः कृपणसुहृद
एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्त इति कृतानुषङ्ग आसनशयनाटनस्थाना-
शनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ।।९।। कुशकुसुमसमित्पलाशफल-
मूलोदकान्याहरिष्यमाणो वृकशालावृकादिभ्यो भयमाशङ्कमानो यदा सह हरिण-
कुणकेन वनं समाविशति। पथि पथि मुग्धभावेन तत्र तत्र विषक्तमतिः प्रणयभरहृदयः
कार्पण्यात्स्कन्धेनोद्वहति एवमुत्सङ्ग उरसि चाधायोपलालयन्मुदं परमामवाप
।।१०।। क्रियायां निर्वर्त्यमानायामन्तरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत -

---

।। सङ्ग्रहोक्तिः ।।

तस्मिन् हरिणशिशौ स्वकीयत्वाभिमानेन तत्पोषण-पालन-प्रीणन-लालना-ऽनुध्याना-
दिकमतिशयेन कुर्वाणस्य तस्य भरतस्य नियमैर्यमैः सह भगवत्परिचर्यादयः सर्व एकैकशः
कतिपयैर्दिवसैर्वियुज्यमानाः सन्त उत्सन्ना बभूवुः ।।७।। अयं हरिणबालकः कालचक्रवेगेन
स्वगणसुहृद्बन्धुभ्यो वर्जितः, अत एव दीनः, मां शरणं प्राप्तः, मामेव मातापितरौ, भ्रातृज्ञातीन्
संघातिनश्च मत्वा प्राप्तो मयि विश्वस्तः, शरणागतोपेक्षादोषं विजानताऽनसूयुना मया तत्पोषण-
पालनप्रीणनलालनादिकमवश्यं कर्त्तव्यम् ।।८।। नूनमुपशमशीलाः कृपणसुहृदः साधव एवं-
विधार्थे महत्तमानपि स्वार्थान् समुपेक्षन्ते, एवं विहितप्रसङ्गो भरतः आसन-शयना-ऽटन-
स्थाना-ऽशनादिषु सर्वास्वपि क्रियासु मृगशिशुना सह स्नेहानुबद्धहृदय आसीत् ।।९।। कुश-
कुसुम-समित्-पलाश-फल-मूल-उदकादीन्याहरिष्यमाणो वृकादिभ्यो भयमाशङ्कमानः स
हरिणशिशुना सहैव वनं गच्छति स्म, पथि मुग्धभावेन यदा स न चलति तदा कार्पण्यात्

तर्हि वा व स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिषः आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति ।।११।। अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन् किल कश्मलं महदभिरम्भित इति होवाच ।।१२।। अपि बत स वै कृपण एणबालको मृतहरिणीसुत अहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति ।।१३।। अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं दैवगुप्तं द्रक्षामि ।।१४।। अपि च न वृकः शालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ।।१५।। निम्लोचति हि भगवान् सकलजगत्क्षेमोदयस्त्रय्या-त्माद्यापि मम न मृगवधून्यास आगच्छति ।।१६।। अपि स्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन् ।।१७।। पृषदपरुषविषाणाग्रेण लुण्ठति ।।१८।। आसादितहविषि बर्हिषि दूषिते मयोपालब्धो -

---

।। सङ्ग्रहोक्तिः ।।

प्रेमासक्तहृदयो भरतस्तं शिशुं स्कन्धेनोद्वहति स्म, एवमुत्सङ्गे उरसि चाऽऽधाय लालयन् स परमां मुदमवाप ।।१०।। नित्यनैमित्तिकक्रियायां क्रियमाणायां सत्यां मध्य उत्थाय यदा मृगशिशुं पश्येत्, तदा स भारताधिपतिः स्वस्थेन मनसा मृगाय आशिष आशास्ते ।।११।। मृगस्याऽदर्शने भृशमुद्विग्नमना नष्टद्रविण इव तमेव चिन्तयन् भरता विरहविह्वलहृदयो-ऽतिशयितं मोहं प्राप्तः सन् इति होवाच ।।१२।। स वै कृपणो मृतहरिणीसुतः, अनार्यस्याऽ-कृतसुकृतस्य मम शाठ्यादिकमविगणय्य विश्वस्तः सन् स्वयमागमिष्यति किम्? ।।१३।। अस्मिन्नाश्रमोपवने दैवरक्षितं तं शष्पाणि चरन्तमहं दृक्ष्यामि किम्? ।।१४।। किंच यूथचरः सूकरादिः, एकचरो व्याघ्रादिरन्यतमो वा एनं भक्षयति किम्? ।।१५।। सकलजगत्क्षेमकरोदयो भगवान् भास्करोऽस्तं याति तथापि मम मृगवधून्यासो न आगच्छति ।।१६।। विविधरुचिर-दर्शनीयैः मृगदारकविनोदैः स्वानामसंतोषमपनुदन् हरिराजकुमार आगत्याऽकृतसुकृतं मां सुखयिष्यति किम् ।।१७।। क्रीडावसरे मिथ्यासमाधिनाऽऽमिलितदृशं मां स चकितमागत्य

भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरणकलाप आस्ते।।१९।। किं वा अरे आचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपातपङ्क्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ।।२०।। अपि स्विदसौ भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकम्पया कृपणजनवत्सलः परिपाति।।२१।। किं वात्मजविश्लेषज्वरदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशान्तानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च।।२२।। एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः सयोगात्तपसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यन्तर एणकुणक आसङ्गः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक् परित्यक्तदुस्त्यजहृदयाभिजातस्य –

।। सङ्ग्रहोक्तिः ।।

कोमलशृङ्गाग्रेण घर्षयति स्म।।१८।। बर्हिषि दूषिते मयाधिक्षिप्त अत एव भीतः सपदि निवृत्तक्रीडः निश्चलीकृतकरणकलापः स ऋषिकुमारवदास्ते।।१९।। इति बहुधा विलप्य पर्णशालाया बहिरागत्य च मृगशिशुखुराङ्कितां धरणीमवलोक्याऽऽह – अहो! तपस्विन्याऽनया धरण्या किं पुण्यमाचरितम्? या धरणी मृगशिशुसुभगशिवखुरपातपङ्क्तिभिरधनस्य कृपणस्य मम द्रविणपदवीं सूचयन्ती सती स्वात्मानमपि स्वर्गापवर्गकामानां द्विजानां यज्ञभूमिं करोति।।२०।। तावच्चन्द्रोदये जाते मृगाङ्कं तं दृष्ट्वा कथयति – किमयं चन्द्रमाः स्वाश्रमपरिभ्रष्टं मृतमातरं मृगशिशुं करुणया सिंहभयात् परिपाति?।।२१।। चन्द्ररश्मिस्पर्शसुखं प्राप्य आह– मृगशिशुविरहाग्नेर्ज्वालादग्धं मद्धृदयकमलं चन्द्रः शिशिरशान्ताभिः सलिलामृतमयचन्द्रिकादिभिः शांतिं गमयति किम्?।।२२।। एवं निरर्थकमनोरथाकुलहृदयो भरतो मृगपुत्रव्याजेन स्वारब्धकर्मणा ज्ञानयोगात् भगवदाराधनरूपात्तपसश्च विभ्रंशितोऽभवत्, अन्यथा पूर्वं मोक्षमार्गे विघ्नरूपान् मत्वा औरसपुत्रानपि परित्यजतो भरतस्य पशुजातीये मृगशिशावासक्तिः कथं स्यात्? एवं मृगार्भकपालनपोषणप्रीणनलालनादिषु प्रसक्तस्य –

तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ।।२३।। तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्तमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु नमृतजन्मानुस्मृतिरितरन्मृगशरीरमवाप ।।२४।। तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ।।२५।। अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्त्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनुपरिसुस्राव ।।२६।। इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवतक्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालञ्जरात्प्रत्याजगाम ।।२७।। तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्ण-

---

।। सङ्ग्रहोक्तिः ।।

स्वात्मचिन्तामप्यकुर्वतो राजर्षेर्भरतस्य, आखुबिलमहिरिव तीव्रवेगो दुरतिक्रमो मृत्युसमयः संप्राप्तः ।।२३।। स भरतस्तदानीमेव अनुशोचमानं पुत्रमिव स्वपार्श्ववर्तिनं मृगमभिवीक्षमाणः सन् मृगासक्तमनाः स इमं लोकं मृगेण सह मृतं देहं च विसृज्य, अविस्मृतपूर्वजन्मानुस्मृतिः स प्राकृतजनवत् मृगशरीरमवाप ।।२४।। मृगजन्मन्यप्यात्मनो मृगत्वकारणं भगवदाराधनप्रभावेणाऽनुस्मृत्य भृशमनुतप्यमानः सन्नाह ।।२५।। अहो कष्टम्! अहं धीराणां मार्गात् पतितः, यतः विमुक्तसर्वसङ्गस्य विविक्तपुण्यारण्यशरणस्य जितेन्द्रियस्य सतोऽप्यबुधस्य मम मनो भगवति वासुदेवे श्रवण-मनन-कीर्तन-स्मरणादिभि रात्रिंदिवं स्थापितमप्यधुना मृगशिशुयोगाद्विभ्रंशितमभूत् ।।२६।। इत्येवं निगूढवैराग्यो मृगशरीरस्थो भरतात्मा मातरं मृगीं विहाय पुनरपि मुनिगणानां प्रियं शालग्रामाख्यं भगवत्क्षेत्रं पुलस्त्यपुलहाश्रमं कालञ्जरपर्वतात् प्रत्याजगाम ।।२७।। तस्मिन् हरिक्षेत्रेऽपि स सङ्गाद् भृशमुद्विग्न एकाकी -

तृणवीरुधा वर्त्तमानो मृगत्वनिमित्तावसानमेव गणयन् मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज्ज ।।२८।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे अष्टमोऽध्यायः ।।८।।

अथ नवमोऽध्यायः ।।९।।

श्रीशुक उवाच – अथ कस्यचिद् द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अङ्गजा बभूवुः। मिथुनं च यवीयस्यां भार्यायाम् ।।१।। यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ।।२।। तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणं भगवच्चरणारविन्दयुगलं –

।। सङ्ग्रहोक्तिः ।।

शुष्कतृणपर्णादिभिर्वर्त्तमानः, मृगत्वसमाप्तिकालं गणयन् तीर्थोदकक्लिन्नं मृगशरीरमुत्ससर्ज ।।२८।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः ।।८।।

अथ नवमोऽध्यायः ।।९।।

भरतस्य विप्रदेहे जडत्वधारणम्

श्रीशुक उवाच – अथ कस्यचिदाङ्गिरसगोत्रस्य शम-दम-तपः-स्वाध्याय-त्याग-संतोषाद्यनैकगुणसंपन्नविप्रवरस्य स्वसदृशशीलाचारयुक्ता नव पुत्रा ज्येष्ठायां पत्न्यां बभूवुः, यवीयस्यां भार्यायां युगलं जातम् ।।१।। तत्र यः पुमांस्तं परमभागवतं राजर्षिप्रवरं त्यक्तमृगशरीरं विप्रत्वं गतं भरतं तत्त्वविदः प्राहुः ।।२।। विप्रजन्मन्यपि स स्वजनसङ्गाद् भृशमुद्विजमानोऽभवत्, भगवदनुग्रहेणाऽनुस्मृतपूर्वजन्मावलिः, स कर्मबन्धविध्वंसनानि भगवच्चरित्रनामश्रवणकीर्त्तनस्मरणानि कुर्वन्, भगवच्चरणारन्दियुगलं मनसा ध्यायन् सन् लोके स्वमुन्मत्तजडान्धबधिरमिव

मनसा विदधदात्मनः प्रतिघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य।।३।। तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्त्तनात्संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन् कर्मनियमाननभिप्रेतानपि समशिक्षयत् अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति।।४।। स चापि तदु ह पितृसंनिधावेवासध्रीचीनमिव स्म करोति छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिकान् मासानधीयानमप्यसमवेतरूपं ग्राहयामास।।५।। एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः।।६।। अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात्। पितर्य्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्य्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बन्धान्न्यवृत्सन्त।।७।। स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि-

---

।। सङ्ग्रहोक्तिः।।

दर्शयामास।।३।। आङ्गिरसगोत्रीय स विप्रः पिता पुत्रस्नेहानुबद्धमनाः सन् तस्यात्मजस्य समावर्तनपर्यन्तान् संस्कारान् विदधे, उपनीतस्य तस्याऽनभिप्रेतानपि शौचाचमनादीन् कर्मनियमान् स शिक्षयामास।।४।। स जडपुत्रोऽपि पितुः समीपे यच्छिक्षितं तदसमीचीनमिव करोति स्म, तत्पिता छन्दांसि अध्यापयिष्यन् आदौ व्याहृतिभिः सह, सप्रणवशिरस्त्रिपदीं गायत्रीं ग्रैष्मवासन्तिकान् मासांश्चाऽधियानमपि समवेतं ग्राहयामास।।५।। एवं पुत्रप्रेमाविष्टचित्तः पिता "पुत्रेण समनुशिष्टेन भाव्यम्" इत्यसदाग्रहः सन् शौचा-ऽध्ययन-व्रत-नियम-गुरु-अग्नि-शुश्रूषणादिकर्माणि पुत्रमनुशास्य, स्वयं तत्रानधिगतमनोरथः कालेन स्वगृहे प्रमत्तः सन् मृत्युं प्राप्तः।।६।। यवीयसी पतिलोकं प्राप्तवती, पितर्युपरते सति भ्रातरस्तु अतत्प्रभावज्ञास्त्रय्यध्ययनपराः "अयं जडमतिः" इति बुद्ध्या तच्छिक्षणं नाऽकुर्वन्।।७।।

प्रतिभाषते कर्माणि स च कार्य्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याञ्चया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम् ।।८।। नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसंभावितदेहाभिमानः ।।९।। शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः स्थण्डिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्च्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार ।।१०।। यदा तु परत आहारं कर्म वेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किं तु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ।।११।। अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ।।१२।। तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो

।। सङ्ग्रहोक्तिः ।।

यदा स जडविप्रः पशुतुल्यैः प्राकृतजनैः हे उन्मत्त! हे जड! हे बधिर! इत्येवमभिभाष्यमाणोऽभूत्, तदा सोऽपि तदनुरूपाणि वचांसि प्रतिभाषते, स्वयमनिच्छापरः सन्नपि परेच्छया कर्म कार्यमाणो विष्टितो वेतनतो वा करोति स्म, याच्ञ्या यदृच्छया वा प्राप्तं, तदप्यल्पं बहु वा, मिष्टं कदन्नं वा भक्षयति, इन्द्रियप्रीतिनिमित्तं तु न ।।८।। स्वतःसिद्धविशुद्धानुभवानन्दमग्नः, शीतोष्णादिद्वन्द्वनिमित्तयोः सुखदुःखयोरप्यकृतदेहाभिमानः ।।९।। शीतोष्णवातवर्षेषु बलीवर्द इव सदाऽनावृताङ्गः, पीनः, कठिनाङ्गः, स्थण्डिलसंवेशनाऽनुन्मर्दनाऽमज्जनरजसा महामणिरिवाऽनभिव्यक्तब्रह्मवर्च्चसः कुपटावृत्तकटिः, मलिनेनोपवीतेन द्विजातिः ब्रह्मबन्धुरिति अतज्ज्ञजनैरवमानितो स विचचार ।।१०।। यदा स वेतनतः परत आहारक्रियामीहमानो दृष्टः, तदाऽऽहारप्रलोभनेन स्वभ्रातृभिः केदारकर्मणि नियुक्तः, तर्हि तदपि करोति, किंतु स समं विषमं न्यूनाधिकं वा न वेद, कणान् पिण्याकं तुषान् वा कोऽपि दद्यात् तदमृतसमानं मत्वाऽश्नाति ।।११।। अथ कदाचित् कश्चिद् वृषलपतिः (चौरराजः) पुत्रकामः सन् पुरुषपशुमालब्धुं प्रवृत्तः ।।१२।। तस्य बन्धनतो मुक्तस्य पुरुषपशोरन्वेषणाय परिधावन्तस्तदनुचरा निशीथे

निशि निशीथसमये तमसावृतायामनधिगतपशवः आकस्मिकेन विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ।।१३।। अथ त एनमनवद्यलक्षणमवमृश्य भर्त्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः।।१४।। अथ पणयस्तं स्वविधिनाभिषिच्याहतवाससाच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरतः उपवेशयामासुः।।१५।। अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालं निशितमुपाददे।।१६।। इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत् कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालम्भनं तदुपलभ्य ब्रह्मतेजसातिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाल-

---

।। सङ्ग्रहोक्तिः।।

पुरुषपशुं बलिमप्राप्य ते तत्र आकस्मिकं वीरासनेनोपविश्य मृगवराहादिभ्यः केदारान् संरक्षमाणं जडविप्रं (भरतं) दृष्टवन्तः।।१३।। अथ ते वृषलनृपानुचराः एनमङ्गिरःसुतमनवद्यलक्षणं ज्ञात्वा स्वकार्यसिद्धिं मन्यमानाः सन्तो मुदा तं रज्ज्वा बध्वा प्रसन्नाः सन्तश्चण्डिका (भद्रकालिका) मन्दिरमुपनिन्युः।।१४।। अथ चौरास्तमङ्गिरस्सुतं स्वविधिनाऽभिषिच्य वस्त्राणि परिधाप्य भूषणालेपस्रक्तिलकाद्युपेतं भुक्तवन्तं तं धूपदीपद्युपेतेन गीतवादित्रघोषेण सह भद्रकाल्याः पुरत उपवेषयामासुः।।१५।। अथ वृषलराजपणिः (चौरः) पुरुषपशो रुधिररूपमद्येन भद्रकालीं देवीं यक्ष्यमाणस्तमभिमन्त्रितमतिकरालं निशितमसिमुपाददे।।१६।। इति तेषां रजस्तमःप्रकृतीनां धनमदोद्धतानां हिंसाविहारिणां ब्राह्मणकुलं तुच्छीकृत्य स्वैरं विहरतां वृषलानां दारुणं कर्म, यत् ब्रह्मभूतस्य ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः तस्य विप्रस्याऽऽलम्भनरूपमतिदारुणं कर्म, तद् विज्ञाय भद्रकाली देवी दुर्विषहेण ब्रह्मतेजसा

सैव देवी भद्रकाली ।।१७।। भृशममर्षरोषावेशरभसविलसितभृकुटिविटप-कुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं महाऽट्टहासमतिसंरम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात् स्रवन्तम-सृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त्त च विजहार च शिरःकन्दुकलीलया ।।१८।। एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ।।१९।। न वा एतद्विष्णुदत्त महदद्भुतं यदसंभ्रमः स्वशिर-श्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवतानिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम् ।।२०।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे नवमोऽध्यायः ।।९।।

।। सङ्ग्रहोक्तिः ।।

दह्यमानेन वपुषा सहसा प्रतिमां त्यक्त्वा बहिर्निर्गताऽभूत् ।।१७।। भृशममर्षरोषावेशविलसित-भृकुटिविटपा, कुटिलदंष्ट्रारुणेक्षणा, आटोपभयंकरेक्षणा, इदं जगत् हंतुकामा इव, अतिक्रोधेन महाट्टहासं विमुञ्चती सा भद्रकाली तेनैवाऽसिना पापीयसां दुष्टानां शिरांसि निकृत्य, तेषां गलात् स्रवन्तमत्युष्णमसृगासवं गणेन सह निपीय, अतिपानविह्वला सा स्वपार्षदैः सहोच्चैस्तरां जगौ, ननर्त्त, शिरःकन्दुकलीलया विजहार च ।।१८।। एवमेष महदभिचारापराध आभिचारिकाणामेव विपरीतफलदो भवति ।।१९।। हे विष्णुदत्त! भागवतपरमहंसा अकुतश्चिद्भया वर्तन्ते, साक्षाद् भगवान् तेषां चक्राद्यायुधैः परिरक्षणं करोति, ते सर्वभूतसुहृदो निर्वैरा विमुक्तदेहात्मभावा वर्तन्ते, अतस्तेषां स्वशिरः छेदने प्राप्तेऽपि यन्निर्भयत्वं तद् अत्याश्चर्यं नहि ।।२०।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः ।।९।।

अथ दशमोऽध्यायः ॥१०॥

श्रीशुक उवाच – अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः॥१॥ यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह । हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति॥२॥ अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीयाच्छङ्कितमनसस्तं विज्ञापयांबभूवुः॥३॥ न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुं ह वयं पारयाम इति॥४॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां संसर्गिणां भवितुमर्हतीति निश्चत्य निशम्य कृपणवचो राजा रहूगण उपासित-वृद्धोऽपि निसर्गेण बलात् कृत

॥ सङ्ग्रहोक्तिः॥

अथ दशमोऽध्यायः ॥१०॥

भरतेन रहूगणस्य शिबिकावहनम्

श्रीशुक उवाच – अथ सिन्धुसौवीरदेशयोर्नृपो रहूगणस्तत्त्वजिज्ञासया कपिलाश्रमं गतुं निर्गतः, तदा मध्य इक्षुमतीनदीतटे तदधिकारिणा वृषभखरवद् भारं वोढुं क्षमः इति मत्वा पूर्वं विष्टितो गृहीतैरन्यभारवाहकैः सह गृहीतः, ततः स महानुभावोऽपि शिबिकामुवाह॥१॥ यदेषुमात्रप्रदेश-समीक्षणस्य द्विजवरस्य गत्या सह वाहकान्यपुरुषगतिरेकरूपा न जाता, तदा रहूगणः स्वशिबिकां विषमगतामवधार्य वाहकान् पुरुषानाह, हे वोढारः! सम्यग् गच्छत, शिबिकां विषमं किमर्थमूह्यते॥२॥ अथ ते वोढारः सोपालम्भं नृपवचनं श्रुत्वा दण्डभयाच्छङ्कितमनसः सन्तस्तं विज्ञापयामासुः॥३॥ भो नरदेव! वयं सावधाना भवदाज्ञानुवर्तिनः, सम्यगेव शिबिकां वहामः, अयमधुना नियुक्तो नवीनः पुरुषः सम्यग् द्रुतं न व्रजति, वयमनेन सह वोढुं न पारयामः॥४॥ इत्येवं तेषां दीनवचः "एकस्य सांसर्गिको दोषः, स संसर्गिणां सर्वेषामपि स्पृशेत्" इति निश्चित्य, –

ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह।।५।। *रहूगण उवाच* – अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान् सखे नो एवापर एते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशये स्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह।।६।। अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः किमिदमरे त्वं जीवन् मृतो मां कदर्थीकृत्य भर्त्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति।।७।। एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह।।८।। *ब्राह्मण उवाच* – त्वयोदितं व्यक्तमविप्रलब्धः भर्त्तुः स मे स्याद्यदि वीर भारः।

।। सङ्ग्रहोक्तिः ।।

उपासितवृद्धोऽपि रहूगणः निसर्गवशात् रजोगुणव्याप्तमतिः सन् संकुपितोऽभवत्, अनन्तरं चाऽस्पष्टब्रह्मतेजसं भस्मना छन्नं जातवेदसमिव स्थितं भरतमाह।।५।। *रहूगण उवाच* – अहो कष्टम्, भ्रातः! अवश्यमेव त्वं परिश्रान्तोऽसि, यतस्त्वमेकाकी दीर्घमध्वानं शिबिकामूहितवान्, त्वं नातिपीवा, न कठिनशरीरो वा, वार्द्धक्येन चोपद्रुतोऽसि, त्वत्तोऽन्ये सहचरा एते त्वद्विधा न भवन्ति, इत्थं वक्रोक्त्या बहु विप्रलब्धोऽपि अविद्यात्मकद्रव्यगुणकर्माशये संस्थानविशेषे स्वशरीरवदहं ममेत्यभिमानहीनः स तूष्णीं पूर्ववच्छिबिकामुवाह।।६।। अथ पुनः शिबिकायां विषमगतायां प्रकुपितो रहूगणः प्राह – अरे! किमिदम्? जीवन् मृतस्त्वं, मां तुच्छीकृत्य चलसि, भर्तृशासनमतिक्राम्यसि? यमराज इव ते चिकित्सां करोमि, तदा त्वं सावधानो भविष्यसि।।७।। एवं बह्वसंबद्धभाषमाणं नरदेवाभिमानिनं रजस्तमोऽभिवृद्धेन मदेन भागवततिरस्कारिणं पण्डितमानिनं योगचर्यानभिज्ञं तं रहूगणं सर्वभूतसुहृदात्मा ब्रह्मभूतो भगवान् स जडविप्रो विगतस्मयः स्मयन्निव प्राह।।८।।

गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः।।९।। स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च। निद्रा रतिर्मन्युरहं मदः शुचो देहे न जातस्य हि मे न सन्ति।।१०।। जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम्। स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ।।११।। विशेषबुद्धेर्विवरं मनाक् च पश्यामि यन्न व्यवहारतोऽन्यत्। क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् करवाम किं ते।।१२।। उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन। अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः।।१३।। *श्रीशुक उवाच* – एतावदनुवादपरिभाषया प्रत्युदीर्य स मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन् राजयानमपि तथोवाह।।१४।। स चापि पाण्डवेय सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक् श्रद्धयाधिकृताधिकारस्तद्धृदयग्रन्थिविमोचनं द्विजवच –

।। सङ्ग्रहोक्तिः।।

ब्राह्मण उवाच – हे नृप! यत् त्वयोक्तं श्रमादि नास्तीति, तत्सत्यम्, हे वीर! यदि भारो नाम कश्चित् पदार्थः स्यात्, तर्हि स वाहकदेहस्यैव स्यान्न मम, यदि गमनकर्तुरधिगम्यं किंचित् स्यात्तर्हि कश्चिदध्वा स्यात्, "पीवा" इति प्रवादस्तु न आत्मनि स तु देहधर्मेऽस्ति।।९।। स्थौल्यं, कार्श्यं, व्याधयः, आधयः, क्षुद्, तृट्, कलहः, इच्छा, जरा, निद्रा, विषयेच्छा, क्रोधः, अहंकारः, शोकश्चेति सर्वे धर्मा देहस्यैव भवन्ति, उत्पत्त्यादिरहितस्य मम न।।१०।। यत्वयोक्तं "जीवन्मृतोऽसि", हे राजन्! तज्जीवन्मृतत्वं तु न केवलं ममाऽस्ति, किन्तूत्पत्तिविनाशवतः सर्वस्याऽपि जन्तोस्तद् दृश्यते, यत्त्वयोक्तं भर्तुराज्ञामुल्लंघयसीति, तत्तु स्वामिसेवकभावः सत्यः स्यात्तदैव तव शासनं सत्यम्, कदाचित्तव राज्यभ्रंशो, मम च राज्यं स्यात्तर्हि सर्वमेतद् विपरीतमेव भवेत्।।११।। केवलं व्यवहारं विनाऽहं राजभृत्यादिभेदबुद्धेरवकाशं नाऽवलोकयामि, तथापि हे राजन्! परमार्थतस्त्वं नेश्वरः, न चाऽहमीशितव्यः, अथापि चेत्तव "राजा" इत्यभिमानः, तर्ह्याज्ञापय, किं करोमि?।।१२।। उन्मत्त-मत्त-जडवद्वर्तमानस्य स्वस्वरूपं गतस्य मम शासनं पिष्टपेषणवद् व्यर्थमेव।।१३।। अनुवादपरिभाषया एतावत् प्रत्युदीर्योपशमशीलः निरस्त-

आश्रुत्य बहुयोगग्रन्थसंमतं त्वरयावरुह्य शिरसा पादमूलमुपसृतः क्षमापयन् विगतनृपदेवस्मय उवाच ।।१५।। कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः। कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः ।।१६।। *नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात्। नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ।।१७।।* तद्ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः। वचांसि योगग्रथितानि साधो न नः क्षमन्ते मनसापि भेत्तुम् ।।१८।। अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै ।प्रष्टुं प्रवृत्तः किमिहारणं तत् साक्षाद्धरिं ज्ञानकलावतीर्णम् ।।१९।। स वै भवाँल्लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपि स्वित्। योगेश्वराणां गतिमन्धबुद्धिः कथं विचक्षीत गृहानुबन्धः ।।२०।। दृष्टः श्रमः कर्मत आत्मनो वै भर्त्तुर्गन्तुर्भवत-श्चानुमन्ये। यथाऽसतोदानयनाद्यभावात्समूलदृष्टो व्यवहारमार्गः ।।२१।।

।। सङ्ग्रहोक्तिः ।।

देहान्तरधारणनिमित्त उपभोगेन प्रारब्धं कर्म व्यपनयन् मुनिवरः स पूर्ववद् राजयानमुवाह ।।१४।। हे पाण्डवेय! राजन्! रहूगणोऽपि गुरूपदिष्टज्ञानग्रहणयोग्यः बहुयोगग्रन्थसंमतं, हृदयग्रन्थिविमोचनं जडद्विजवच आश्रुत्य विगतराजाधिराजगर्वः सन् सत्त्वरं शिबिकाया अवरुह्य द्विजपादमूलं प्राप्तः शिरसा प्रणम्य तं क्षमापयन्नुवाच ।।१५।। द्विजानां मध्ये निगूढस्त्वं कश्चरसि, यज्ञोपवीतं बिभर्षि, कतमोऽवधूतोऽसि, कस्य पुत्रः? शिष्यो वा? कुत्र वससि? कस्माद्धेतोः प्राप्तः, यदि दयालुत्वात्? तर्हि नः क्षेमाय स्याः, त्वं कपिलो मुनिर्नासि? ।।१६।। अहं सुरेन्द्रस्य वज्रान्न बिभेमि, रुद्रस्य शूलात्, यमस्य दण्डात्, अग्नि-सूर्य-चन्द्र-वायु-कुबेरादीनामस्त्रशस्त्राच्च न बिभेमि, किन्त्वहं ब्रह्मकुलावमानाद् बिभेमि ।।१७।। निष्परिग्रहो निगूढज्ञानवीर्योऽपारः सन् त्वं जडवद् विचरसि, हे साधो! तव वचांसि योगग्रथितानि भवन्ति, तानि मनसाऽप्यवगन्तुं क्षमाणि न ।।१८।। अस्पष्टदेहः स कपिल एव भवान् लोकवृत्तं द्रष्टुं विचरति किम्? गृहासक्तो मादृशो मन्दबुद्धिर्योगेश्वराणां गतिं कथं विद्यात् ।।२०।। वस्तुतो देहादन्यत्वेऽपि आत्मनो मम क्रियाश्रयतः श्रमो दृष्टः तथा भारस्य वोढुः, अध्वनि प्रयातुश्च भवतोऽपि श्रममनुमन्ये, असद्रूपेण

स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः। देहेन्द्रियास्वाशयसंनिकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ।।२२।। शास्ताभिगोप्ता नृपतिः प्रजानां यः किंकरो वै न पिनष्टि पिष्टम् । स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ।।२३।। तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य। कृषीष्ट मैत्रीदृशमार्त्तबन्धो यया तरे सदवध्यानमंहः।।२४।। न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि। महद्विमानात्स्वकृताद्धि मादृक् नङ्क्ष्यत्यदूरादपि शूलपाणिः।।२५।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे दशमोऽध्यायः ।।१०।।

।। सङ्ग्रहोक्तिः ।।

घटादिनोदकाहरणादेरभावदर्शनात्, सता तेनानुदर्शनाच्च व्यवहारमार्गः प्रमाणमूलक एव दृष्टः।।२१।। स्थाल्यादिगताद् अग्नितापात् शिशिरस्यापि दुग्धस्याऽभितापः, तत्तापतः तण्डुलगर्भपाकः, न चाऽत्र किंचित् मिथ्या, एवंविधदृष्टान्तसद्भावात् देह-इन्द्रिय-मन-प्राणाऽन्तःकरणानां सम्बन्धं प्राप्य वर्तमानस्य पुरुषस्य तन्निमित्ता संसृतिर्भवति।।२२।। राजा प्रजानां कुमार्गगामिनीनां शास्ता, सुपथचारिणीनां रक्षकोऽस्मि, यदुक्तं - "स्तब्धस्य शिक्षणमात्रम्" तत्र हे भगवन्! यो भगवद्भक्तः स पिष्टपेषणवन्निष्फलं कर्म न करोति, यतः स्वधर्मरूपस्य भगवदाराधनस्य करणात् पापक्षयो जायते।।२३।। अत एव हे ब्रह्मन्! "राजाऽहम्" इत्यभिमानेनाऽनादृतसज्जनस्य ममोपरि भवान् स्नेहयुक्तां दृष्टिं करोतु, यया दृशा सदवज्ञारूपं पापमहं तरिष्यामि।।२४।। यद्यपि परमात्मसखस्य निरस्ताभिमानस्य तव विकारो नास्ति तथापि स्वकृतात् महदपमानात् मादृक् जन्तुस्तु शिवसमानोऽतिसमर्थः सन्नपि क्षिप्रमेव विनङ्क्ष्यति।।२५।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः।।१०।।

अथैकादशोऽध्यायः ।।११।।

ब्राह्मण उवाच – अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः। न सूरयो हि व्यवहारमेतं तत्त्वावमर्शेन सहामनन्ति ।।१।। तथैव राजन्नुरुगार्हमेध-वितानविद्योरुविजृम्भितेषु। न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ।।२।। न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्। स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ।।३।। यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानुरुद्धम्। चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा ।।४।। स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा। बिभ्रत्पृथङ्नामभि रूपभेदमन्तर्बहिष्ट्वं च पुरैस्तनोति ।।५।। दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति। आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ।।६।।

।। सङ्ग्रहोक्तिः ।।

अथैकादशोऽध्यायः ।।११।।

भरतरहूगणसंवादे ज्ञानोपदेशे संसारस्वरूपविवेचनम्

ब्राह्मण उवाच – विशुद्धात्मपरमात्मज्ञानरहितोऽपि त्वं प्रतिवादितुल्यान् वादान् वदसि, अतो विदुषां मध्ये श्रेष्ठो नाऽसि, यतो विद्वांस एतं व्यवहारं परमार्थत्वेन न गृह्णन्ति ।।१।। तथैव हे राजन्! वेदपूर्वभागोत्तमत्त्ववादिषु वेदवादेषु वेदान्तवादः साधुः प्रायेण शुद्धः सन्नपि सम्यक् न प्रकाशते ।।२।। यस्य पुंसो गृहस्थाश्रमसुखं स्वप्नसुखवत् हेयमेव इत्यनुमानेन निर्णीतं न स्यात्, तस्य कर्मजडस्य पुंसस्तत्वबोधकान्यपि वेदान्तवाक्यानि तत्त्वज्ञानमुत्पादयितुं समर्थानि न भवन्ति ।।३।। पुंसो मनो यावद्रजआदिभिर्गुणैर्वशीकृतं भवेत्तावत् तत् दशभिरिन्द्रियैर्निरङ्कुशं सत् पुरुषस्य धर्ममधर्मं वा विस्तारयति ।।४।। वासनासक्तमनाः विषयपूर्णः गुणानुरूपप्रवृत्तिमान् पञ्चभूतैकादशेन्द्रियप्रधानो जीवो पृथङ्नामरूपाणि शरीराणि धारयति ।।५।। जीवोपाधिभूतं मनो दुःखं सुखं मोहं दुर्निवारं कालप्राप्तं फलं चाऽभिमुखतया सृजति, ततो जीवमालिङ्ग्य संसारचक्रे छलयति ।।६।।

तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः। तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्य॥७॥ गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् । यथा प्रदीपो घृतवर्त्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम्॥८॥ पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम्। एकादशासन् मनसो हि वृत्तयः आकूतयः पञ्च धियोऽभिमानः॥९॥ मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमीः। गन्धाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्त्यभिजल्पशिल्पाः॥१०॥ एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः। द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः। सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः॥११॥ क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः। आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्त्तुः॥१२॥

॥ सङ्ग्रहोक्तिः॥

मनोमयो जाग्रत्स्वप्नरूपः संसारः प्रकाशमानः सन् जीवस्य दृश्यो भवति, तस्मात् कारणात् तत्त्वविदोऽदो मनः परावरतारूपस्य संसारस्य मोक्षस्य च कारणं वदन्ति॥७॥ त्रिगुणानुरक्तं मनो जीवस्य दुःखरूपसंसाराय भवति, कात्स्न्र्येन त्रिगुणवियुक्तं मनः क्षेमाय मुक्तये च भवति, घृतवर्तिकामश्नन् प्रदीपो वर्तते तदा तस्य शिखाः सधूमा भवन्ति, घृतवर्त्त्याः क्षयो स्वं शुक्लरूपं वा भूतात्मकत्वं रूपं प्राप्नोति तद्वत्॥८॥ मनस एकादशवृत्तयो गण्यन्ते, तत्र पञ्चज्ञानेन्द्रियरूपाः, पञ्च कर्मेन्द्रियरूपाः, एकोऽभिमानश्चेति॥९॥ शब्द-स्पर्श-रूप-रस-गन्धाः, इति पञ्च ज्ञानेन्द्रियाणां विषयाः, वचना-ऽऽदान-विहरण-संभोग-पुरीषोत्सर्गाः इति पञ्च ज्ञानेन्द्रियाणां विषयाः सन्ति, तेषां सर्वेषां विषयाणामाश्रयो मनः॥१०॥ एकादशं पुरं ममेति स्वीकरणं, शरीरं भोगायतनत्वेन स्वीकार्यतया द्वादशं केचिद्विद्वांस वृत्त्यन्तरमाहुः, तथा द्रव्य-स्वभाव-संस्कारादिभिर्मनसो विकारा सहस्रशो विकल्पन्ते, एते सर्वे क्षेत्रज्ञसत्तयैव सत्तां लभन्ते॥११॥ मायारचितस्य मनसोऽसंख्यरूपा या वृत्तयस्ता तदात्मकतया अविशुद्धकर्तुर्जीवस्य जाग्रदादिषु प्रकटतया, सुषुप्तावप्रकटतया च वर्त्तन्ते, ताः सर्वाः

क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः। नारायणो भगवान्वासुदेवः
स्वमाययात्मन्यवधीयमानः।।१३।। यथाऽनिलः स्थावरजङ्गमानामात्मस्वरूपेण
निविष्ट ईशेत्। एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः।।१४।। न
यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन। विमुक्तसङ्गो जितषट्सपत्नो
वेदात्मतत्त्वं भ्रमतीह तावत्।।१५।। न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं
जनस्य। यच्छोकमोहामयरागलोभवैरानुबन्धं ममतां विधत्ते।।१६।। भ्रातृव्यमेनं
तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः। गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं
स्वयमात्ममोषम्।।१७।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे एकादशोऽध्यायः।।११।।

।। सङ्ग्रहोक्तिः ।।

शुद्धः परमात्मा साक्षाद् विलोकयति।।१२।। क्षेत्रज्ञः सर्वेषां धारकः स्वयंप्रकाशः नित्यः
पुराणपुरुषः षाड्गुण्यपूर्णो नारायणो वासुदेवः स्वकीयया योगशक्त्या नियन्तृतया जीवात्मनि
वर्तते।।१३।। यथाऽनिलः स्थावरजङ्गमानामन्तः प्रविश्य सर्वान् नियमयति तथा परमात्मा
भगवान् वासुदेवोऽस्मिन् जगत्यनुप्रविष्टः सन् ईशेत।।१४।। हे राजन्! देही ज्ञानोदयेन
अहंममाभिमानरूपां मायां निरस्य विमुक्तसङ्गः जितषट्सपत्नः सन् यावत्परमात्मानं न वेद
तावत् स संसारे भ्रमति।।१५।। बन्धनमुक्त्योः कारणं समस्त दुःखानां क्षेत्रं जनस्य मनः
शोक-मोह-रोग-राग-लोभ-वैरादिभिर्यावत् सबद्धं वर्तते "अहं मम भावं" करोति, तावज्जीवो
संसारे भ्रमति।।१६।। महावीर्यमुपेक्षया वर्द्धमानमात्मापहारिणं मनोरूपं शत्रुं त्वं गुरोर्हरेश्च
चरणोपासनरूपेण शस्त्रेण जहि।।१७।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यामेकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः ।।१२।।

रहूगण उवाच- नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय। नमोऽवधूत-द्विजबन्धुलिङ्गनिगूढनित्यानुभवाय तुभ्यम् ।।१।। ज्वरामयार्त्तस्य यथागदं सन्नि-दाघदग्धस्य यथा हिमाम्भः। कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधं मे ।।२।। तस्माद्भवन्तं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम्। अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ।।३।। यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलम्। न ह्यञ्जसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे ।।४।। *ब्राह्मण उवाच* - अयं जनो नाम चलन्पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः। तस्यापि चाङ्घ्र्योरधि गुल्फजङ्घाजानूरुमध्योरशिरोधरांसाः ।।५।। अंसेऽधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते।

।। सङ्ग्रहोक्तिः ।।

अथ द्वादशोऽध्यायः ।।१२।।

रहूगणकृतप्रश्नानां भरतकृतं समाधानम्

रहूगण उवाच - परमात्मशरीरभूताय स्वरूपानुसंधानेन तुच्छीकृतविरोधाय, अवधूत-द्विजबन्धुवेषेण निगूढपरमात्मानुभवाय तुभ्यं नमोऽस्तु ।।१।। हे ब्रह्मन्! ज्वररोगार्त्तस्य यथाऽगदं, निदाघतप्तस्य यथा शीताम्भः, सुखरूपं भवति तथा देहाभिमानसर्पदंशदृष्टेः मम भवद्वचन-ममृतामानं भवति ।।२।। मम संशयार्थं पश्चात् प्रक्ष्यामि, अधुना तु त्वद्वचोऽध्यात्मयोगपूर्णमतः दुर्बोधं प्रतीयते, तद्यथा सुबोधं भवति तथा कौतुहलचेतसो मे कथय ।।३।। हे योगेश्वर! भवत्प्रोक्तं भारवहनादि कर्म, तत्फलं श्रमादि च प्रत्यक्षमवलोक्यमानमतिसत्यं नैव, तत्तु केवलं व्यवहारमात्रम्, तदञ्जसा विमर्शाय क्षमं न भवति इति, अस्मिन् भवद्वचने मे मनः भ्रमति ।।४।। *ब्राह्मण उवाच* – हे पार्थिव! पृथिवीविकार एकः पिण्डः जीवसम्बन्धात् चलन् सन् "जन" नाम्ना प्रसिद्धिं प्राप्तः, अपरः पाषणरूपः पार्थिवः पिण्डः निर्जीवत्वान्न चलति, एकःपिण्डश्चलति, अपरः न चलति, एतावानेव तयोर्भेदः, शरीररूपे पिण्डे चरण-गुल्फ-जङ्घा-जानु-उरु-मध्य-उरस्-अंस-शिरोधरा- इति विभागा उपर्युपरि व्यवहृताः ।।५।।

यस्मिन् भवान् रूढनिजाभिमानो राजास्मि सिन्धुष्विति दुर्मदान्धः।।६।। शौच्यानिमांस्त्व-
मधिकष्टदीनान्विष्ट्या निगृह्णन्निरनुग्रहोऽसि। जनस्य गोप्तास्मि विकत्थमानो न
शोभसे वृद्धसभासु धृष्टः।।७।। यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च
नित्यम्। तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययानुमेयम्।।८।। एवं निरुक्तं
क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये। अविद्यया मनसा कल्पितास्ते येषां समूहेन
कृतो विशेषः।।९।। एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत्। द्रव्यस्वभावा-
शयकालकर्म्मनाम्नाऽजयावेहि कृतं द्वितीयम्।।१०।। ज्ञानं विशुद्धं परमार्थमेकमनन्तरं
त्वबहिर्ब्रह्म सत्यम्। प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति।।११।।
रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद् गृहाद्वा। न छन्दसा नैव जलाग्निसूर्यैर्विना
महत्पादरजोऽभिषेकम्।।१२।।

।। सङ्ग्रहोक्तिः ।।

तस्य एकस्मिन् पार्थिवी दार्वी शिबिका, यस्यां "सौवीरराजः" इति व्यपदेशभाक् पृथिवीपिण्डः,
यस्मिन् दुर्मदान्धो "राजाऽस्मि" इति रूढनिजाभिमान आस्ते।।६।। इमान् शोच्यान् दीनजनान्
विष्ट्या निगृह्णंस्त्वं निर्दयो "जनस्य गोप्ताऽस्मि" इति विकत्थमानः, धृष्टश्चाऽसि, अतस्त्वं
ज्ञानवृद्धानां सभासु न शोभसि।।७।। चराचरस्य देहजातस्य जन्म विनाशं च क्षितावेव
विदामः, तन्नामतोऽन्यत् अबाधितव्यवहारेण सत्त्वेनाऽनुमेयं स्यात् तत्तथा निरूप्यताम्।।८।।
देहादीनां क्षितिपरिणामरूपत्वाद् अनित्यत्वं, क्षितिरपि परमाणुसंघातरूपत्वादनित्या,
परमाणवोऽपि मनोऽधिष्ठातुरीश्वरसंकल्पेन कल्पिता भवन्ति, एवं सत्यपि सत्यताभाक्त्व-
स्वीकारश्चेत्तर्हि स न योग्यः।।९।। कृशं, स्थूलं, अणुः, बृहत्, सत्, असत्, सजीवं, निर्जीवं,
अन्यच्च सर्वं द्रव्य-स्वभावा-ऽऽशय-काल-कर्मादिनामभिः प्रकृत्यैव कृतमस्ति।।१०।। ज्ञानगुणं
ज्ञानस्वरूपं च, कर्मबन्धरहितं, पुरुषार्थभूतं, बहिरन्तःप्रदेशरहितं, नित्यं, स्वयंप्रकाशं, प्रशान्तं,
भगवच्छब्दवाच्यं यत् कवयो वासुदेवेति कथयन्ति।।११।। हे रहूगण! एतदात्मपरमात्म-
याथात्म्यज्ञानं भागवतां पादरजोभिषेकं विना केवलेन तपसा, यागादिना, दानात्, गृहस्थधर्मेण,
वेदाभ्यासेन, जलाग्निसूर्योपासनया च न प्राप्यते।।१२।।

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः। निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे।।१३।। अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः। आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः।।१४।। सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्च्चनप्रभवा नो जहाति। अहो अहं जनसङ्गादसङ्गो विशङ्कमानोऽविवृतश्चरामि।।१५।। तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनेहैव विवृक्णमोहः। हरिं तदीहाकथन-स्मृतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः।। १६।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

ब्राह्मण उवाच – दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक्। स एष सार्थोऽर्थपरः परिभ्रमन् भवाटवीं याति न शर्म्म विन्दति।। १।।

।। सङ्ग्रहोक्तिः ।।

विषयवार्ता निवारको भगवद्गुणानुवादो हि सततं निषेव्यमाणः सन् मुमुक्षोर्मतिं भगवतिवासुदेवे नियच्छति।।१३।। पूराऽहं भरतनामा राजाऽभवम्, तत्रैहिकामुष्मिकसुखवासनां विहाय भगवदाराधनमकरवम्, तत्राऽपि मृगस्नेहबन्धेन पतितः सन्नहं मृगोऽभवम्।।१४।। मृगदेहेऽपि भगवदाराधनप्रभवा भगवत्स्मृतिः मां नाऽत्याक्षीत्, अतोऽहं जनसङ्गाद् विशङ्कमानोऽप्रकटो विचरामि।।१५।। अतो मुमुक्षुः सत्सङ्गजातेन ज्ञानासिना मोहं छित्वा, संसारमार्गस्य पारभूतं हरिं भगवच्चरित्रकथाकीर्तनश्रवणाभ्यां लब्धस्मृतिः सन् प्राप्नोति।।१६।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः।।१२।।

।। सङ्ग्रहोक्तिः ।।

अथ त्रयोदशोऽध्यायः।।१३।।

वैराग्यदार्ढ्याय भवाटवीवर्णनम्

ब्राह्मण उवाच – हे राजन्! दुस्तरे प्रवृत्तिमार्गे प्रकृत्या निवेशितः त्रिगुणात्मककर्मसु लुब्धः,

यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुम्पन्ति कुनायकं बलात्। गोमायवो यत्र हरन्ति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः।।२।। प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः। क्वचित्तु गन्धर्वपुरं प्रपश्यति क्वचित् क्वचिच्चाशुरयोल्मुकग्रहम्।।३।। निवासतोयद्रविणात्मबुद्धिरितस्ततो धावति भो अटव्याम्। क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः।।४।। अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा। अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित्।।५।। क्वचिद्वितोयाः सरितोऽभियाति परस्परं चालषते निरन्नः। आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः।।६।। शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलम्। क्वचिच्च गन्धर्वपुरं प्रविष्टं प्रमोदते निर्वृतवन्मुहूर्त्तम्।।७।। चलन्क्वचित्कण्टकशर्क्कराङ्घ्रिर्नगारुरुक्षुर्विमना

।। सङ्ग्रहोक्तिः ।।

स जीवसमूहः सुखार्थी सन् संसारवनं याति, किंतु तत्र सुखं न विन्दति, यथा वणिक् अर्थार्जनाय गच्छन्नटवीं याति, तत्र सुखं न विन्दति तद्वत्।।१।। हे नरदेव! यत्र भवाटव्यामिन्द्रियनामानः षट् चौराः कुबुद्धिपरं सार्थं (जीवसमूहं) भगवदाराधनरूपं धनं विलुम्पन्ति, यत्र शृगालतुल्याः स्त्रीपुत्रादयः प्रमत्तं सार्थिकं प्रविश्य मेषं वृका इव हरन्ति।।२।। अयं सार्थः (जीवसमूहः) पुष्कलतृणलतागुल्मगह्वरसदृशे गृहस्थाश्रमे कठोरदंशमशकसदृशैर्दुर्जनैरुपद्रुतः सन् गन्धर्वनगरनिभं सुरूपं देहं क्वचिच्च पिशाचोल्मुकतुल्यं सुवर्णं च पश्यति।।३।। सः सार्थः क्वचित् गृहतोयधनादिप्राप्तीच्छया इतस्ततोऽटव्यां धावति, क्वचिद् वातोद्धूतधूलिनिभेन स्त्रीसंसर्गेण रजो याप्तनयनः स दिशो न जानाति।।४।। अदृश्य झिल्लीस्वनतुल्यान् निंदापूर्णशब्दान् शृणोति, क्वचित् उलूकवाक्तुल्यान् प्रत्यक्षतिरस्कारान् शृणोति, क्वचित् क्षुधार्दितः सन् अपुण्यवृक्षनिभान् अनुपकारकानुपधावति क्वचित् मृगतृष्णासदृशान् सुखाभासान् जनान् उपसर्पति।।५।। भवाटव्यां गच्छन् सार्थः क्वचित् जलहीननदीवन्निर्धनान् प्रतिगच्छति, परस्परं चाऽन्नधनादिकमभिलषति, तदलाभाद् दुःखमाप्नोति, क्वचिद् अभिमतविषयशून्यं दावाग्नितुल्यं गृहं संप्राप्य अग्नितप्तवच्छोकातुरो भवति, क्व च यक्षतुल्यै राजभिरपहृतप्राण-

इवास्ते। पदे पदेऽभ्यन्तरवह्निनार्दितः कौटुम्बिकः क्रुद्ध्यति वै जनाय।।८।।
क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः। दष्टः स्म शेते
क्व च दन्दशूकैरन्धोऽन्धकूपे पतितस्तमिस्रे।।९।। कर्हिस्मचित्क्षुद्ररसान्विचिन्वं-
स्तन्मक्षिकाभिर्व्यथितो विमानः। तत्रातिकृच्छ्रं प्रतिलब्धमानो बलाद्विलुम्पन्त्यथ
तांस्ततोऽन्ये।।१०।। क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्त्तुमनीश आस्ते।
क्वचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृच्छत्युत वित्तशाठ्यात्।।११।। क्वचित्क्वचित्
क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः। यावत् परादप्रतिलब्धकामः-
पारक्यदृष्टिर्लभतेऽवमानम्।।१२।। अन्योन्यवित्तव्यतिषङ्गवृद्धवैरानुबन्धो विवदन्
मिथश्च। अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः।।१३।।
तांस्तांन्विपन्नान् स हि तत्र तत्र विहाय जातं परिगृह्य सार्थम्। आवर्त्ततेऽद्यापि

।। सङ्ग्रहोक्तिः ।।

समधनो निर्विण्ण इव खिद्यते।।६।। क्वचित् शूरैः (विरोधिभिः) हृतसर्वस्वः शोचन् मूर्छति,
क्वचित् गन्धर्वनगरनिभमस्थिरं पितृपुत्रादिबन्धुसमाजं प्रविष्टः सन् मुहूर्तमात्रं प्रमोदते।।७।।
क्वचित् पर्वतारोहणतुल्यान् यज्ञादीन् कुर्वाणस्तत्र कण्टकशर्करादिसदृशान् विघ्नान् प्राप्य
विमनायते, प्रतिपदं हार्दाग्निना दह्यमानः स जनेभ्यः क्रुध्यति।।८।। क्व चाऽजगरतुल्यनिद्राग्रस्तो
वनत्यक्तशववन्न किञ्चिज्जानाति, दंशनस्वभावसर्पसदृशजनैः पीडितोऽन्धवल्लुप्तविवेको-
ऽन्धकूपसमे मोहे पतितः शेते।।९।। क्वचित् मधुसदृशपरस्त्रीं गवेषयन् मक्षिकातुल्यतत्पत्यादि-
भिस्ताडितः सन् व्यथितो भवति, यदाऽतिकृच्छ्रेण परदारादीन् लभते तदा तं वञ्चयित्वाऽन्ये
बलादपहरन्ति।।१०।। क्वचित् शीता-ऽऽतप-वात-वर्षादीनां प्रतिकारं कर्तुमशक्तो भवति
तदा स दुःखितो भवति, कदाचिदल्पमपि क्रयविक्रयादिभिर्व्यवहरन् वित्तशाठ्यात् द्वेषं प्राप्नोति
।।११।। क्वचित् क्षीणधनः स शय्या-ऽऽसन-स्थान-विहारहीनः, अन्यस्मादलब्धकामः
परधनाभिलाषः सन्नपमानं प्राप्नोति।।१२।। अन्योन्यं द्रव्यस्याऽऽदान-प्रदानेनाऽसंतोषाद्विवृद्ध-
वैरः, मिथो विवदमानः बहुश्रमप्राप्तधननाशाद्विद्वेषाच्च मुमूर्षुर्भवति।।१३।। एवमनिशं भवाध्वनि
भ्रममाणो जनस्तांस्तान् विपन्नान् स्वस्वपित्रादीन् विहाय जातं जातं पुत्रादिं सार्धं परिगृह्याऽद्यापि

न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ।।१४।। मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः। मृधे शयीरन्न तु तद्व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति।। १५।। प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः। क्वचित् कदाचिद्धरिचक्रतस्त्रसन् सख्यं विधत्ते बककङ्कगृध्रैः।।१६।। तैर्वञ्चितो हंसकुलं समाविशन्न रोचयन् शीलमुपैति वानरान्। तज्जातिरासेन सुनिर्वृतेन्द्रियः परस्परोद्वीक्षणविस्मृतावधिः।।१७।। द्रुमेषु रंस्यन् सुतदारवत्सलो व्यवायदीनो विवशः स्वबन्धने। क्वचित् प्रमादाद्गिरिकन्दरे पतन् वल्लीं गृहीत्वा गजभीत आस्थितः।।१८।। अतः कथंचित् स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिंदम। अध्वन्यमुष्मिन्नऽजया निवेशितो भ्रमन् जनोऽद्यापि न वेद कश्चन।।१९।। रहूगण त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः कृतभूतमैत्रः।

।। सङ्ग्रहोक्तिः ।।

भवाटव्यां भ्रमति, हेवीर! कश्चिदप्यध्वनः पारपारकं श्रीहरिं नोपैति ।।१४।। शूरा दिग्गजेन्द्राः "ममेयं भूः" इति बद्धवैरा युधि शेरते, गतवैरो न्यस्तदण्डो योगी तद्विष्णोः पदं याति, न तु ते शूराः।।१५।। क्वचिदयं सार्थः लतासममृदुला उपधानीभूताः स्त्रीभुजा आश्रयति, क्वचित् पक्षिशावकसदृशेषु मधुरभाषिशिशिषु स्पृहां करोति, क्वचित् सिंहसमकालचक्रतः संत्रस्तः सन् बक-कंक-गृध्रतुल्यैः पाखण्डिभिः सख्यं करोति।।१६।। तत्र तैर्वञ्चितः स हंससदृशं ब्राह्मणकुलं प्राप्य सदाचाररूपं शीलमप्रियं पश्यन् वानरतुल्यान् सदाचारभ्रष्टानुपयाति, तज्जातीयरतिसुखेन तृप्तेन्द्रियः परस्परमुखनिरीक्षणेन जीवनं व्यर्थयति।।१७।। क्वचित् द्रुमतुल्यगृहेषु क्रीडिष्यन्, मैथुनेच्छया दीनः, सुतदारावत्सलः, क्वचित् प्रमादाद् गिरिकन्दरवद्भयानकरोगादिदुःखे पतन् गजसममृत्युभीतः सन् वल्लीतुल्यं प्राचीनं कर्माऽवलम्ब्याऽऽस्थितो भवति।।१८।। अथाऽस्या आपदो विमुक्तो भवेत्, तदा स पुनः सार्थे प्रविष्टो भवति, अस्यां भवाटव्यां भगवन्मायया निवेशितो जनः परिभ्रमन् सन् भवाटवीपारं न जानाति।।१९।। हे रहूगण! त्वमप्यस्मिन्नेवाध्वनि निवेशितोऽसि, कृतभूतमैत्रः विषयेभ्यो मनः प्रत्यावर्त्य हरिसेवया तीक्ष्णीकृतेन ज्ञानासिना प्रकृतितरुच्छेदनं कृत्वा संसाराध्वनो पारं याहि।।२०।।

असज्जितात्मा हरिसेवया शितज्ञानासिमादाय तराऽतिपारम् ।।२०।। *राजोवाच* - अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् । न यद्धृषीकेश-यशःकृतात्मनां महात्मनां वः प्रचुरः समागम ।।२१।। न ह्यद्भुतं त्वच्चरणाब्जरेणुभि-र्हतांहसो भक्तिरधोक्षजेऽमला । मौहूर्त्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ।।२२।। नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आबटुभ्यः । ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ।।२३।। श्रीशुक उवाच - इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिन्धुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणीमिमां विचचार ।।२४।। सौवीरपतिरपि सुजनसमवगत-परमात्मसतत्त्व आत्मन्यविद्याध्यारोपितां देहात्ममतिं विससर्ज्ज । एवं हि नृप भगवदाश्रिताश्रितानुभावः ।। २५।। *राजोवाच* - यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः पारोक्ष्येण वचसा

।। सङ्ग्रहोक्तिः ।।

राजोवाच - अहो! इह लोके मनुष्यजन्म निखिलजन्मभ्योऽतिशोभनमेव, परलोके देवादिजन्मभिः किं प्रयोजनम्? यतः परलोके परमात्मयशोगानेन पवित्रात्मनां महापुरुषाणां भवादृशां समागमो न प्राप्यते ।।२१।। भवच्चरणाब्जरजोभिर्निवृत्तपापस्य जनस्य भगवति शुद्धा भक्तिर्भवति, तदेतद् महदाश्चर्यं न भवति, यस्य मुहूर्तमात्रजातात् त्वत्समागमात् दुस्तर्कमूलो ममाऽविवेको नष्टः ।।२२।। वृद्धेभ्यो बालेभ्यो बटुभ्यस्तरुणेभ्यश्च नमोस्तु, ये भवादृशा अवधूतवेषधारिणो ब्रह्मज्ञाः पृथिव्यां संचरन्ति, तेभ्यः सर्वेभ्योऽपि नमोऽस्तु, तेषां पुण्याद् राज्ञां कल्याणमस्तु ।।२३।। *श्रीशुक उवाच* - हे परीक्षित्! अपमानकर्तर्यपि परमकारुणिको महानुभावो ब्रह्मर्षिसुतः सिन्धुपतये परमात्मनो निर्दोषस्वरूपमेवमुपदिश्य रहूगणाभिवन्दितचरणः स भरत इमां धरणीं विचचार ।।२४।। सौवीरपती रहूगणोऽपि ब्रह्मर्षिसुतात् प्राप्तात्मपरमात्मयाथात्म्यः सन् देहात्माभिमतिं जहौ, एवंविधो हि भगवद्दासानुदासानां प्रभावोऽस्ति ।।२५।।

जीवलोकभवाध्वा स ह्यार्य्यमनीषया कल्पितविषयो नाञ्जसाऽव्युत्पन्नलोकसमधिगम्यः। अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्द्दिश्यतामिति ।।२६।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे त्रयोदशोऽध्यायः ।।१३।।

अथ चर्तुदशोऽध्यायः ।।१४।।

स होवाच - य एष देहात्ममानिनां सत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारकर्म्मविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन् दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्त्तिन्या मायया जीवलोकोऽयं यथा वणिक् सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविन्दमधुकरानुपदवीमवरुन्धे यस्यामु ह वा एते षडिन्द्रियनामानः कर्म्मणा दस्यव एव ते।।१।।

।। सङ्ग्रहोक्तिः ।।

राजोवाच - हे शुक! भवता योऽयं भवाटवीमार्गः परोक्षरूपेण वचसा कथितः, स हि विवेकिनां बुद्धिकल्पितोऽस्ति, अतो दुर्बोधोऽस्ति, स यथा सर्वेषां बोध्यः स्यात् तथा कथ्यताम्।।२६।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः।।१४।।

भवाटावीरूपकस्य व्याख्या

स होवाच - अयं जीवलोकः त्रिगुणात्मककर्मणां परिणामरूपाणि चतुरशितिलक्षाधिकानि शरीराणि धारयति, तेषु तेषु शरीरेषु सुखाभासानि दुःसहानि दुःखानि अनुभवति, पुण्यपापमयकर्मफलोपभोगरूपस्य अस्य संसारस्य द्वारभूतः षडिन्द्रियवर्गो वर्तते, तेन वर्गेण संसाराध्वाऽत्यंतं दुर्गमो वर्तते, भगवतो विष्णोर्मायया निर्मिते लोके स्वदेहनिष्पादितकर्मानुभवः प्रबलविघ्नविहतोद्यमः सन् श्मशानवद् अशिवायां संसाराटव्यां भ्रमितो वर्तते, तत्र भ्रमन्

तद्यथा पुरुषस्य धनं यत्किंचित् साक्षाद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परम-पुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु सांपरायिकमुदाहरन्ति तद्धर्म्यं धनं दर्शन-स्पर्शनश्रवणस्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्या-जितात्मनो यथा सार्थस्य तथाऽजितात्मनो विलुम्पन्ति।।२।। अथ च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकशृगाला एवानिच्छतोऽपि कदर्यस्य कुटुम्बिन उरणकवत् संरक्ष्यमाणं मिषतोऽपि हरन्ति।।३।। यथा ह्यनुवत्सरं कृष्यमाण-मप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवति एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन् न हि कर्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः ।।४।। तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादिभि-रुपरुद्ध्यमानबहिःप्राणः क्वचित्परिवर्त्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुप-रक्तमनसानुपपन्नार्थं नरलोकं गन्धर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति।।५।।

।। सङ्ग्रहोक्तिः।।

स जीवलोकः संसारतापोपशमनीं हरिगुरुचरणसरोजाश्रयवर्तीं भक्तिं न प्राप्नोति, यस्यां भवाटव्यां "पञ्चज्ञानेन्द्रियाणि एकं मनश्चेति" षड् इन्द्रियनामान दस्यवो भ्रान्तं जीवलोकं लुण्ठन्ति।।१।। ते दस्यवोऽजितेन्द्रियस्य सार्थवर्तिपुरुषस्य बहुदुःखोपार्जितं धर्मौपयिकं किंचिद्धनमपहरन्ति, साक्षात्परमपुरुषाराधनरूपो यो धर्मः सः जीवस्य परलोकिहितं षडिन्द्रियचौरा अपहरन्ति।।२।। तस्मिन् भवाटवीमार्गे नाम्ना दारापत्यादयः कौटुम्बिका कर्मणा वृकाः शृगालाश्च भवन्ति, ते कायरस्य कुटुम्बिनो धर्म्यं धनं तस्याऽनिच्छतः पश्यतः सतोऽपि हरन्ति।।३।। यथा प्रतिवर्षं कृष्यमाणमप्यदग्धबीजं क्षेत्रं कृष्यादिवेलायां गुल्म-तृण-विरुद्भिरगम्यमिव भवति, एवमेव गृहस्थाश्रमोऽपि कर्मक्षेत्रमस्ति, तत्र वासनानाम-क्षीणत्वात् कर्मक्षयो न भवति, यतोऽयं गृहाश्रमः कामकरण्डो वर्तते।।४।। गृहाश्रमे गतो जनो दंशमशकसमैरतिनीचैर्मनुजैः शलभ-शकुन्त-तस्कर-मूषक-सदृशैर्मनुष्यैश्च पीड्यमानः, संसारमार्गे भ्राम्यन्, अविद्याकामकर्मोपरक्तमनसाऽघटमानमपि नरलोकं गन्धर्वनगरवत् सत्यं मत्वा, अनित्ये नित्यमतिर्भवति।।५।।

तत्र च क्वचिदातपोदकनिभान् विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ।।६।। क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ।।७।। अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति।।८।। क्वचिच्च वात्यौपम्यया प्रमदयारोहमारोपितस्तत्कालरजसा रजनीभूत इवासाधुमर्यादो रजस्वलाक्षो दिग्देवता अतिरजस्वलमतिर्न विजानाति।।९।। क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति।। १०।। क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं वा परोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः।।११।। स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान् जीवन्मृतान् स्वयं जीवन्म्रियमाण उपधावति।।१२।।

।। सङ्ग्रहोक्तिः ।।

धनं कथ्यते, तद्धर्म्यं धनं दर्शन-स्पर्शन-श्रवण-भक्षणा-ऽऽघ्राणैः संकल्पविकल्पाभ्यां चैते तत्र गन्धर्वनगरे मृगतृष्णासदृशान् विषयान् पान-भोजन-व्यवाय-व्यसनलोलुपः सन्नन्वेषयति।।६।। क्वचित् समग्रदोषाणां स्थानं पुरीषतुल्यं हेयं सुवर्णं प्राप्तुमीहते, यथा कश्चिच्छितातुरः पुमान् वने प्रकाशमानं पिशाचाग्निं सत्यमग्निं मत्वा धावति, किन्तु तं न प्राप्नोति, तथैवाहर्निशं स धावमानोऽपि स सुवर्णं न लभते।।७।। कदाचिदयं जीवनोपयोगिषु गृह-जल-द्रव्यादिषु समासक्तः सन्नेतस्यां भवाटव्यामितस्ततो धावति।।८।। क्वचिच्च चक्रवाततुल्यया प्रमदया स्वाङ्के समारोपित स्तद्वशीभूय रजन्यामिव रजश्छन्नमतिः, रजस्वलाक्षोऽसाधुमर्यादः साक्षिस्वरूपा दिग्देवता अपि न पश्यति।।९।। कदाचित् सकृदवगतविषयवैतथ्यः सन्नपि देहचिन्तया विभ्रंशितस्मृतिः स मृगजलनिभान् विषयान् प्रत्यभिधावति ।।१०।। क्वचित् स उलूकझिल्लीशब्दवदति कर्णकटुं शत्रूणां राजकुलस्य च प्रत्यक्षं परोक्षं वा भर्त्सनं श्रुत्वा व्यथितहृदयो भवति।।११।। कदाचिदयं पूर्वपुण्यक्षये कारस्करादिवृक्षतुल्यान् विषकूपसदृशान् दानभोगशून्यधनानत एव जीवन् मृतान् पुरुषान् संसेवते।।१२।।

एकदाऽसत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोतः स्खलनवदुभयतोऽपि दुःखदं पाषण्डमभियाति ।।१३।। यदा तु परबाधयाऽन्ध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतः पितृपुत्रान्वा खलु भक्षयति ।।१४।। क्वचिदासाद्य गृहं दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ।।१५।। क्वचित्कालविषमितराजकुलरक्षसापहृतप्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ।।१६।। कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृत्तिं क्षणमनुभवति ।।१७।। क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्शितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ।।१८।। क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुम्बाय क्रुध्यति ।।१९।। स एव पुनर्निद्राजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किंचन वेद शव इवापविद्धः ।।२०।। कदाचिद् भग्नमानदंष्ट्रो दुर्ज्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पतति ।।२१।।

।। सङ्ग्रहोक्तिः ।।

कदाचिदसत्प्रसङ्गात् मतिहीनोऽयं निरुदकनदीगर्तवदुभयतो दुःखदं पाखण्डाचारं प्राप्नोति ।।१३।। यदा तु स्वोदरपूरणाय पर्याप्तमन्नं न लभते तदा तृणादिकं तुच्छं वस्तु भक्षयति, पितृपुत्रानपि बाधते च ।।१४।। क्वचिदयं दावानलतुल्यमसुखोदर्कं गृहं प्राप्य शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ।।१५।। एवं च प्रतिकूलराजकुले हृतधनप्राणोऽयं विगतजीवनलक्षणः सन् मृतक इवाऽऽस्ते ।।१६।। क्वचिद् मनोरथगतं पितृपितामहादीक्षणं स्वाप्नं सुखं क्षणमनुभवति ।।१७।। कदाचिद् गृहस्थाश्रमे गुरुतरकार्यभाररूपं शैलमारोढुं कामयन् कंटकशर्कराव्याप्तं क्षेत्रं प्रविशन्निव दुःखितो भवति ।।१८।। क्वचिच्च स दुःसहेन जठराग्निना दह्यमानः क्षीणबलः सन् स्वकुटुम्बिभ्यः कुप्यति ।।१९।। स एव निद्रारूपेणाऽजगरेण ग्रस्तोऽन्धे तमसि मग्नः सन् निर्जने वने त्यक्तः शव इव शेते ।।२०।। क्व च दूर्जनदन्दशूकैर्भग्नमानदंष्ट्रः सोऽलब्धनिद्राक्षणः दुःखितहृदयेन ज्ञानशून्यः सन् महति दुःखे पतति ।।२१।।

कर्हि स्म चित् काममधुलवान्विचिन्वन् यदा परदारपरद्रव्याण्यवरुन्धमानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये।।२२।। अथ च तस्मादुभयथापि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति।।२३।। मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः।।२४।। क्वचिच्च शीतवातातपाद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणाकल्पो दुरन्तचिन्तया विषण्ण आस्ते।।२५।। क्वचिन्मिथो व्यवहरन्यत्किंचिद्धनमन्येभ्यो वा काकिणिकामात्रमप्यपहरन् किंचिद्वा विद्वेषमेति वित्तशाठ्येन।।२६।। क्वचित्क्षीणधनः शय्यासनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथस्तस्यादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते।।२७।। एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहत उद्वहति।।२८।। एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गवितत आपन्नविपन्नो यस्तमु ह वा वेतरस्तत्र विसृज्य जातं जातमुपादाय शोचन्मुह्यन् खिद्यन्प्ररुदन्संहृष्यन् बिभ्यन्मुह्यमानः

।। सङ्ग्रहोक्तिः ।।

कदाचित् कामविषयसुखलेशानन्वेषयन् परदारपरधनानि स्वीकर्तुमारभते राज्ञा तत्स्वामिभिश्च प्रताडितः सन् नरकप्राये कारागारे पतति।।२२।। अत एव विज्ञाः प्रवृत्तिमार्गे जीवस्येहामुत्र च जन्मकारणं कर्म एवास्तीति कथयन्ति।।२३।। यदि स बन्धात् कथंचिदपि मुक्तो भवति तदा ततो देवदत्त उपाच्छिनत्ति, तस्माद् विष्णुमित्र गृह्णाति, इत्यनवस्थितिः।।२४।। कदाचित् अयं शीतवातातपवर्षादीनां आध्यात्मिकादीनां दुःखानां निवारणेऽशक्तो भवति तदा स दुरन्तचिन्तया विषण्णो भवति।।२५।। कदाचित् परस्परं क्रयविक्रयादिकं व्यवहारं कुर्वन् वित्तशाठ्यात् किंचित् काकणिकामात्रमपि धनमपहरन् विद्वेषमाप्नोति।।२६।। क्वचित् क्षीणधनः शय्यासनाद्युपभोगहीनोऽप्रतिलब्धमनोरथः अत एवाऽन्यदीयधनग्रहणे जातमतिः, ततः परधनाहरणोद्योगाज्जनेभ्योऽवमानादीनि प्राप्नोति ।।२७।। एवं वित्तलोभाद्विवृद्धवैरः पूर्ववासनया मोहितो विवाहादिसम्बन्धं करोति।।२८।। एतस्मिन् संसारे नानाक्लेशैः सुखदुःखरागद्वेषादिभिश्च यो विपन्नः, तं विपन्नं तत्र विसृज्य, जातं पुत्रादिकं सह गृहीत्वा वर्तमानः,

साधुवर्जितो नैवावर्त्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थो यमध्वनः पारमुपदिशन्ति ।।२९।। यदिदं योगानुशासनं न वा एतदनुरुन्धते यच्छन्तमं न्यस्तदण्डा मुनय उपशमशीला उपरतात्मानः समवगच्छन्ति यदपि दिगिभजयिनो मनस्विनो वै राजर्षयः किं तु परं मृधे शयीरन् अस्यामेव ममेयमिति कृतवैरानुबन्धाः यां विसृज्य स्वयमुपसंहृताः ।।३०।। अध्वन्यमुष्मिन्निम उपसर्गाः सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ।।३१।। क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदयस्तदाश्रमावसक्तसुतदुहितृकलत्राभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धे तमसि प्रहिणोति ।।३२।। कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्द्धापवर्गकालो-

---

।। सङ्ग्रहोक्तिः ।।

जातस्य विपन्नत्वे शोचन्, मुह्यन्, खिद्यन्, प्ररुदन्, संहृष्यन्, बिभ्यत् मुह्यमानः, बध्यमानः, साधुना कर्मणा रहितः, एष नरलोकसार्थः यतः सकाशात् प्रवृत्तः तस्याऽध्वनः पाररूपं ऋषय उपदिशन्ति, किन्तु कोऽप्यद्यापि न प्रत्यावर्त्तते ।।२९।। न्यस्तदण्डाः,उपशमशीलाः, उपरतात्मानः, अविक्षिप्तचित्ताः मुनय आत्यन्तिकसुखसम्पादकमिदं कर्मयोगज्ञानयोगानुगृहीतभक्तियोगशिक्षां सम्यगवगच्छन्ति, नाऽन्ये निर्जितदिग्गजेन्द्रा अजितान्तःकरणा राजर्षयोऽपि नावगच्छन्ति, किन्तु तेऽस्या भूमौ "इयं भूमिः" ममेत्यभिमानेन कृतवैरानुबन्धास्ते युद्धे शयीरन्, तां विसृज्य स्वयंगता-स्तत्पुत्रा अपि तथैव ।।३०।। अमुष्मिन् संसाराध्वनि इमाः सुख-दुःख-राग-द्वेष-भया-ऽभिमान-प्रमाद-उन्माद-शोक-मोह-मात्सर्य-ईर्ष्या-ऽवमान-क्षुत्-पिपासा-ऽऽधि-व्याधि-जन्म-जरा-मरणादयोऽनेका विपदः सन्ति ।।३१।। क्वापि देवमायया स्त्रिया भुजलताभ्यामा-लिङ्गितः, विगतविवेकविज्ञानः, स्त्रिया विहारगृहारम्भे विह्वलहृदयः, गृहाश्रमसंलग्नानां सुतदुहितृकलत्रादीनामाभाषणावलोकनविचेष्टनैरपहृतहृदयः, अजितान्तःकरणो सार्थो जन आत्मनमपारे नरके प्रहिणोति ।।३२।।

पलक्षणात्परिवर्त्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद् भगवन्तं यज्ञपुरुषम् अनादृत्य पाषण्डदेवताः कङ्कगृध्रबकवटप्राया आर्यसमयपरिहृताः सांकेत्येनाभिधत्ते ।।३३।। यदा तु पाषण्डिभिरात्मवञ्चितैरुरुवञ्चितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्त्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुम्बभरणं यथा वानरजातेः ।।३४।। तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः ।।३५।। क्वचित् द्रुमवदैहिकार्थेषु गृहेषु रंस्यन्यथा वानरः सुतदारवत्सलो व्यवायक्षणः ।।३६।। एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये पतन्कर्मवल्लीमवलम्ब्य तत आपदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्त्तमानो नरलोकसार्थमुपयाति एवमुपरि गतोऽपि ।।३७।।

।। सङ्ग्रहोक्तिः ।।

कदाचित् परमाण्वादिद्विपरार्धान्तस्वरूपात् तीव्रवेगवतः ब्रह्मादिस्तम्बपर्यन्तानां सर्वेषामायुर्हरतः परमेश्वरस्य भगवतो हरेः कालचक्राद् त्रस्तहृदयोऽयं कालचक्रनिजायुधं साक्षात् भगवन्तं परमेश्वरं यज्ञपुरुषमनादृत्य कङ्कगृध्रबकवटप्राया वैदिकसिद्धान्तबहिष्कृताः पाखण्डदेवताः पाखण्डागमेन कल्याणाय स्वीकरोति ।।३३।। यदा तु लोकवञ्चनपरैः पाखण्डिभिर्बहुवञ्चितः, तदाऽयं ब्राह्मणकुले प्रविष्टो भवति, तत्राऽपि ब्रह्मणानां शीलशौचाचारं, श्रौतस्मार्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्याऽऽराधनं चाऽनभिमन्यमानः शूद्रकुलं भजते, यत्राऽऽचारशुद्ध्यभावात् वानरजातेरिव मिथुनीभावः कुटुम्बभरणं च वर्तते ।।३४।। तत्र यथेच्छं विहरन्नतिव्याकुलमतिः परस्परमुखनिरीक्षणादिना ग्राम्यकर्मणा च कालावधिमपि विस्मरति ।।३५।। क्वचिदयमैहिक-सुखप्रयोजनेषु रंस्यन् वानर इव सुतदारवत्सलः सन् व्यवायोत्सवो भवति। ।।३६।। एवं संसाराटव्यां सुखदुःखादिकमनुभवन्, मृत्युगजभयात् गिरिकन्दरतुल्ये रोगाद्यापदि पतन् जीवनहेतुभूतां कर्मवल्लीमवलम्ब्य तत आपदो नरकात् कथंचिदपि विमुक्तश्चेत् तर्हि पुनरपि पूर्वोक्तप्रकारेणैव भवाटव्यां नरलोकसार्थं जीवसमूहमुपयाति, एवमुपरि गतोऽपि -

तस्येदमुपगायन्ति। आर्षभस्येह राजर्षेर्मनसापि महात्मनः। नानु वर्त्मार्हति नृपो मक्षिकेव गरुत्मतः।।३८।। यो दुस्त्यजान्दारसुतान्सुहृद्राज्यं हृदिस्पृशः। जहौ युवैव मलवदुत्तमश्लोकलालसः।।३९।। यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारा-न्प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् । नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानु-रक्तमनसामभवोऽपि फल्गुः।।४०।। यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय। नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार।।४१।। य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्या-नुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यमापवर्ग्यं चानुशृणोत्याख्यास्यत्यभि-नन्दति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति।।४२।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्दशोऽध्यायः।।१४।।

।। सङ्ग्रहोक्तिः।।

भवाटव्यामटत्येव।।३७।।ऋषभपुत्रस्य महात्मनो राजर्षेर्भरतस्य मार्गं गरुडस्य गतिं मक्षिकावदेव मनसाऽप्यनुसर्तुमिहाऽन्यो नृपतिर्नाऽर्हति।।३८।। यो भरतो भगवत्स्वरूपा-सक्तचित्तः सन् दुस्त्यजान् मनोज्ञान् दारसूतान् सुहृद्राज्यं च युवा सन्नेव मलवज्जहौ।।३९।। य आर्षभो नृपतिर्दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् तथा सदयावलोकां सुरैरपि प्रार्थ्यां राज्यलक्ष्मीं चापि नैच्छत्, महतामेतच्चित्रं न, यतस्तेषां भगवत्सेवासक्तमनसां तु मोक्षोऽप्यल्प एव।।४०।। यो भरतो मृगशरीरं हातुमिच्छन् सन्नपि यज्ञाय, धर्मपतये, विधिनैपुणाय, यागाय, सांख्यशिरसे प्रकृतीश्वराय नारायणाय हरये नमः इत्युदारं वचः समुदाजहार।।४१।। भगवद्भक्तसंस्तुत-शुद्धगुणकर्मणः, राजर्षेर्भरतस्य चरितं मङ्गलावहमायुष्यं, धन्यं, यशस्यं, स्वर्ग्यं, मुक्तिसाधनं चाऽस्ति, तद् यः कथयति, शृणोति, अनुमोदते च स स्वस्य सकला एवाऽऽशाः सफलाः प्राप्नोति, का अपि परस्तान्नावशिष्यते ।।४२।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां चतुर्दशोऽध्यायः।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

श्रीशुक उवाच – भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पाषण्डिन ऋषभपदवीमनुवर्त्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यन्ति।।१।। तस्माद् वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवदथासूर्यायां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः। य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार।।२।। प्रतीहात्सुवर्चलायां प्रतिहर्त्रादय आसन्निज्याकोविदाः सूनवः प्रतिहर्त्तुः स्तुत्यामजभूमानावजनिषातां भूम्न ऋषिकुल्यायामुद्गीथः सुतः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुः। विभो रत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्तात् द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवाः अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीसत्त्वस्य कलात्मवत्वादिलक्षणेन महापुरुषत्वं प्राप्तः।।३।।

।। सङ्ग्रहोक्तिः ।।

अथ पञ्चदशोऽध्यायः ।।१५।।

भरतवंश्यानां राज्ञां चरितम्

श्रीशुक उवाच – भरतस्य पुत्रः सुमतिर्नाम बभूव, ऋषभदेवमार्ग (जीवन्मुक्ततां) मनुवर्तमानं यमवलोक्य केचित् पाखण्डिनः कलौ पापीयस्या स्वमनीषया वेदेऽनुक्तां बुद्धदेवतां कल्पयिष्यन्ति ।।१।। तस्मात् सुमतेर्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभूत्, देवताजित आसूर्यायां देवद्युम्नो जातः, तस्माद् धेनुमत्यां परमेष्ठी, तस्मात् सुवर्चलायां प्रतीहो बभूव, यो बहुभ्य आत्मविद्यां समुपदिश्य स्वयं संशुद्धः सन् परमपुरुषं परमेश्वरं समुपासितवान् ।।२।। प्रतीहात् सुवर्चलायां प्रतिहर्ता, प्रस्तोता उद्गाता चेति त्रयः पुत्रा यज्ञनिपुणा अभवन्, तस्य प्रतिहर्तुः स्तुत्यां भार्यायाम् "अजः भूमा" चेति द्वौ पुत्रौ जातौ, भूम्नः ऋषिकूल्यायां पत्न्यामुद्गीथः, तस्माद् देवकुल्यायां प्रस्तावः, प्रस्तावान्नियुत्सायां विभुः, तस्माद् रत्यां पृथुषेणः, तस्माद् आकूत्यां नक्तः , नक्ताद् द्रुत्यां साक्षाद् भगवतः जगद्रिरक्षया गृहीतसत्मूर्तेर्विष्णोरंशभूतो महापुरुषभावं प्राप्तो गयो नाम राजा बभूव ।।३।।

स वै स्वधर्मेण प्रजापालनपोषणप्रीणनलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितविशुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत्।।४।। तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति।गयं नृपं कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता। समागतश्रीः सदसः पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते।।५।। यमभ्यषिञ्चन् परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः। यस्य प्रजानां दुदुहे धराशिषो निराशिषस्तद्गुणवत् सस्नुतोधाः।।६।। छन्दांस्यकामस्य च यस्य कामान् दुदुहुराजह्रुरथो बलिं नृपाः । प्रत्यञ्चिता युधि धर्मेण विप्रा यदाशिषा षष्ठमंशं परेत्य।।७।। यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे। श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार।।८।। यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिञ्च्यात्। प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद् गयस्य।।९।।

।। सङ्ग्रहोक्तिः।।

स गयः स्वधर्मस्थः प्रजापालन-पोषण-लालना-ऽनुशासन-तत्परः पञ्चमहायज्ञपरः, सर्वात्मनाऽर्पितपरमार्थलक्षणेन ब्रह्मविच्चरणसेवाप्राप्तेन महापुरुषे परावरे भगवति परब्रह्मणि भक्तियोगेन शुद्धमतिः, निवृत्तदेहात्मभ्रमो निरभिमानः सन् पृथिवीं गोपायाञ्चकार।।४।। हे परीक्षित्! पुराविदः तस्य गयस्य माहात्म्यसूचिकामिमां गाथां गायन्ति, यो गयो यज्ञानुष्ठाता, सर्वमानास्पदः, बहुज्ञः, धर्मगोप्ता, संप्राप्तश्रीः, सदस्पतिः, साधुसत्सेवकोऽभूत्, तं गयं भगवदंशावतारं विना स्वकर्मभिः कोऽनु करोति।।५।। सत्यः श्रद्धामैत्री दयादयो दक्षकन्या नदीजलैर्यं गयं परया मुदाऽभ्यषिञ्चन्, निष्कामस्य यस्य गयस्य प्रजानां कामान् कामदुघा धरा दुदुहे।।६।। अकामस्य यस्य संकल्पान् वेदा दुदुहुः, नृपा युद्धे बाणैः प्रतिपूजिताः सन्तो यस्य करमर्पयामासुः, विप्रा धर्मपालनेन तस्मै धर्मफलानां षष्ठांशं ददुः।।७।। यस्य गयस्य बहुसोमपाने यज्ञ इन्द्र माद्यति सति अध्वरात्मा भगवान् भक्तियोगापादितं प्रीतिरूपमिज्याफलमर्हणं साक्षात् स्वीकृतवान्।।८।। यज्ञे यस्य भगवतः प्रीणनात् ब्रह्मण आरभ्य देवतिर्यङ्मनुष्यतृणपर्यंतं सर्वं जगत् प्रीयेत्, स सर्वान्तर्यामी भगवान्

गयाद् गयन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुः चित्ररथादूर्णायां सम्राडजनिष्ट ततं उत्कलायां मरीचिर्मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत तस्मात् सुषेणायां मधुनामाऽभवन्मधोः सुमनसि वीरव्रतः ततो भोजायां मन्थुप्रमन्थू जज्ञाते मन्थोः सत्यायां भौवनः ततो दूषणायां त्वष्टाऽजनिष्ट त्वष्टुर्विरोचनायां विरजोऽजायत विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्या किल जातम् ।।१०।। तत्रायं श्लोकः प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः। अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ।।११।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चदशोऽध्यायः।।१५।।

।। सङ्ग्रहोक्तिः ।।

गयस्य यज्ञे स्वयमेव तृप्तोऽस्मीति प्रीतिमगात्।।९।। गयात् गयन्त्यां पत्न्यां "चित्ररथः, सुगतिः, अवरोधनः" इति त्रयः पुत्रा बभूवुः, जेष्ठाच्चित्ररथात् ऊर्णायां सम्राट् संज्ञः पुत्रो जातः, सम्राजः उत्कलायां मरीचिरजनिष्ट, मरीचेः बिन्दुमत्यां बिन्दुमान्, बिन्दुमतः सुषेणायां मधुनामा पुत्रो जातः, मधोः सुमनसि वीरव्रतः वीरव्रतात् भोज्यायां मन्थुः प्रमन्थुश्चेति द्वौ पुत्रावुत्पनौ मन्थोः सत्यायां भौवनो जज्ञे, भौवनाद् दूषणायां त्वष्टा जातः, त्वष्टुः विरोचनायां विरजनामा पुत्रो जातः, विरजस्य विषूच्यां पत्न्यां शतजिन्मुख्यं पुत्रशतं कन्या च जाता।।१०।। अत्राऽयं श्लोकः - विरजः त्रिविक्रमः सुरगणमिव प्रियव्रतवंशं निष्कलंकेन यशसाऽलंचकार।।११।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः।।१५।।

अथ षोडशोऽध्यायः ।।१६।।

राजोवाच – उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा सह दृश्यते।।१।। तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धवः उपक्लृप्ताः यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचितः। एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ।।२।। भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति।।३।। *ऋषिरुवाच* – न वै महाराज भगवतो मायागुणविभूतेः स्थानविशेषाणां नामरूपतः काष्ठां मनसा वचसा वाधिगन्तुमलं विबुधायुषापि पुरुषस्तस्मात् प्राधान्येनैव भूगोलविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः।।४।। यो वाऽयं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्त्तुलो यथा

।। सङ्ग्रहोक्तिः ।।

अथ षोडषोऽध्यायः।।१६।।

परीक्षितो द्वीपाब्धिसम्बन्धिनः प्रश्ना भूगोलवर्णनं च

राजोवाच – हे मुने! त्वया भूमण्डलऽऽयामविशेषो यावत् सूर्यस्तपति तथा नक्षत्रगणैः सह चन्द्रमा दृश्यते, तावत् कथितः।।१।। तत्र भूमण्डले सप्तभिः प्रियव्रतरथचक्रपरिखातैः सप्त समुद्रा उपकल्पिताः, येभ्य एतस्या भुवः सप्त द्वीपविशेषाः संक्षेपेण भवतोक्ताः, एतदखिलं भूमण्डलं लक्षणतः प्रमाणतश्च ज्ञातुमिच्छामि।।२।। सत्वादिगुणपरिणामरूपे भगवतः स्थूलरूप आवेशितं मनः, तस्य सत्वादिगुणरहिते सूक्ष्मतमे स्वयंप्रकाशे परब्रह्मणि भगवति वासुदेवाख्ये स्वरूपे स्थापितुं क्षमं भवेत्, तस्माद् हे गुरो! त्वमेतद् वर्णयितुमर्हसि ।।३।। *ऋषिरुवाच* – हे महाराज! भगवतो ब्रह्माण्डसर्जनरूपलीलाविभूतेः स्थानविशेषाणामन्तं मनसा वचसा वाऽधिगन्तुं विबुधायुषाऽपि पुरुषः समर्थो न स्यात्, तस्मात् प्राधान्येनैव भूगोलविशेषं नामतः, रूपतः, प्रमाणतः लक्षणतश्च व्याख्यास्यामः।।४।। भूमण्डलस्य सप्तद्वीपाभ्यन्तरोऽयं जम्बूद्वीपो लक्षयोजनविस्तृतः कमलपलाशवत् समो वर्तुलश्च भवति ।।५।।

पुष्करपत्रम् ।।५।। यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ।।६।। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य ।।७।। मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ।।८।। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् ।।९।। तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः ।।१०।। केतुमालभद्राश्वयोः सीमानं विदधाते ।।११।।

।। सङ्ग्रहोक्तिः ।।

यस्मिन् जम्बूद्वीपे नव सहस्रयोजनविस्तृतान्यष्टभिर्मर्यादापर्वतैर्विभक्तानि नव खण्डानि सन्ति ।।६ ।। एषां नवखण्डानां मध्ये "इलावृतं" नाम खण्डमस्ति, तस्य मध्ये सौवर्णः, कुलगिरिराजो मेरुर्लक्षयोजनोच्छ्रयो भूमण्डलस्य कर्णिकाभूतो वर्तते ।।७ ।। स मेरुर्मूर्द्धिन द्वात्रिंशत्सहस्रयोजनविततः, मूले षोडशसहस्रयोजनविस्तृतोऽन्तर्भूम्यां च षोडशसहस्रयोजनानि प्रविष्टोऽस्ति, तस्य इलावृतस्योत्तरेणोत्तरतो, नीलः, श्वेतः, शृङ्गवान्, एते त्रयः पर्वता पूर्वपश्चिमायताः, ते रम्यक-हिरण्मय-कुरुनामकानां खण्डानां मर्यादापर्वताः कथिताः, ते च पूर्वपश्चिमयोः क्षारोदधिपर्यन्ताः दशसहस्रयोजनोच्छ्रिता द्विसहस्रयोजन-विस्तीर्णाश्च सन्ति ।।८ ।। इलावृतस्य दक्षिणतो निषधः हेमकूटः हिमालयश्चेति त्रयः पर्वता पूर्वपश्चिमयोः क्षारोदधिपर्यन्ताः विस्तृताः, एते हरिवर्ष-किंपुरुष-भरतखण्डानां मर्यादापर्वताः, दशसहस्रयोजनोच्छ्रिताः द्विसहस्रयोजनविस्तृताश्च सन्ति ।।९ ।।इलावृतस्य पूर्वे गन्धमादनपर्वतो भद्राश्वखण्डस्य मर्यादापर्वतोऽस्ति, पश्चिमे केतुमालखण्डस्य सीमापर्वतो माल्यवानस्ति, नील निषध पयन्तोत्तरदक्षिणाग्रा एतौ द्वावपि दशसहस्रयोजनोच्छ्रायौ द्विसहस्रयोजनायामौ च स्तः ।।१०-११ ।।

मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशम-
वष्टम्भगिरय उपक्लृप्ताः।।१२।। चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः
पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः।।१३।।
शतयोजनपरिणाहाः ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा
योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ धारयन्ति।।१४।। देवोद्यानानि च भवन्ति
चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति।।१५।। येष्वमरपरिवृढाः सहसुर-
ललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ।।१६।।
मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि
फलान्यमृतकल्पानि पतन्ति।।१७।। तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धि-
बहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निष्पतन्ती पूर्वेणेलावृतमुप-
प्लावयति।।१८।। यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्श-
सुगन्धिवातो दशयोजनं समन्तादनुवासयति।।१९।।

।। सङ्ग्रहोक्तिः।।

सुमेरुपर्वतस्य चतुर्दिक्षु मन्दरः, मेरुमन्दरः, सुपार्श्वः, कुमुदश्चेति चत्वारो गिरयो विस्तीर्णमूर्द्ध्नः
मेरोराधारधारभूता दशसहस्रयोजनविस्तारास्तावदेवोन्नहाश्च वर्तन्ते।।१२।। तेषु चतुर्ष्वमपि
पर्वतेषु आम्र-जम्बू-कदम्ब-वटाश्चेति चत्वारो वृक्षा एकादशशतयोजनोत्सेधाः शतयोजनविस्तृताः
पर्वतानां ध्वजा इव सन्ति।।१३।। हे भरतर्षभ! तेषु चतुर्षु पर्वतेषु दुग्ध-मधु-इक्षुरस-
स्वच्छजलाश्चत्वारो ह्रदाः सन्ति, तान् ह्रदान् सेवमाना यक्षकिन्नरादय उपदेवाः स्वाभाविकानि
योगैश्वर्याणि धारयन्ति।।१४।। तेषु चतुर्षु पर्वतेषु नन्दनं, चैत्ररथं, वैभ्राजकं, सर्वतोभद्रं चेति
चत्वारि देवोद्यानानि विद्यन्ते।।१५।। येषु सुरललनाललामवृन्दैः सह देवश्रेष्ठाः उपदेवैर्गीयमान-
यशसः सन्तो विहरन्ति।।१६।। मन्दरस्य उत्संगे एकादशशतयोजनोच्चैः विद्यमानस्य आम्रवृक्षस्य
शिरसः पर्वतशृङ्गवत्स्थूलान्यमृततुल्यान्याम्रफलानि पतन्ति।।१७।। अधःपातेन भिद्यमानानां
तेषां फलानामतिमधुरसुगन्धिघनेन अरुणरसेनाऽरुणोदा नाम प्रसिद्धा नदी मन्दरगिरेः शिखरात्
निपतन्त्यधः स्यन्दमाना सती इलावृतवर्षस्य पूर्वप्रदेशं सिंचति।।१८।। यज्जलोपसेवनाद्
भवान्या दासीनां पुण्यजनवधूनामवयवसुगन्धिवातो समन्ताद् दशयोजन यावत् सुरभी

एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनष्टिप्रायाणामिभकायनिभानां रसेन जम्बू नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ।।२०।। तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ।।२१।। यदु ह वा व विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति ।।२२।। यस्तु महाकदम्बः सुपार्श्वनिरूढस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्यो परेणात्मानमिलावृतमनुमोदयन्ति ।।२३।। या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति ।।२४।। एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति ।।२५।। यानुपजुषाणानां न कदाचिदपि प्रजाना

।। सङ्ग्रहोक्तिः ।।

करोति ।।१९।। एवमत्युच्चतोपेतमेरुमन्दरगिरिशिखरात् निपातेन विशीर्णानामतिसूक्ष्मबीजानां गजशरीरसदृशानां जम्बूफलानां रसेन जम्बूनाम नदी अयुतयोजनोच्छ्रायात् मेरुमन्दरशिखरात् भूतले निपतन्ती सती इलावृतस्य दक्षिणे भागे वहति ।।२०।। यावदिलावृतमुपस्यन्दयति तावत्पर्यन्तमुभयोस्तटयोर्या मृत्तिका सा तद्रसेन संयुज्यमाना सती वाय्वर्कसंयोगविपाकेन निरन्तरं देवलोकानामाभरणोपयोगि जाम्बूनदनाम्ना प्रसिद्धं सुवर्णं भवति ।।२१।। यत् सुवर्णं विबुधादयो युवतिभिः सह मुकुटकटककटिसूत्राद्याभरणरूपेण धारयन्ति ।।२२।। सुपार्श्वपर्वतेऽवस्थितो यः कदम्बस्तस्य कोटरेभ्यो विनिःसृताः पञ्चवामपरिणाहाः, पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्यः सत्यः पश्चिमभागे इलावृतं सुरभीकुर्वन्ति ।।२३।। यदुपभुज्यमानानां मुखेन सुरभीकृतो वायुः परितः शतयोजनं सुरभीकरोति ।।२४।। एवं कुमुदपर्वतमधिरूढः शतवल्शो नाम वटः, तस्य स्कन्धेभ्यो विनिर्गता अधोमुखा नदाः पयोदधि-मधु-घृत-गुडाऽन्नादीनि अम्बर-शय्या-ऽऽसनादीनि च वहन्तः कामदुघास्ते कुमुदाग्रात् पतन्तः सन्त -

वलिपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव ॥२६॥ कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूट-शिशिरपतङ्गरुचकनिषधशितिवासकपिलशङ्खवैदूर्यजारुधिहंसर्षभनाग-कालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥२७॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवत एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतावेवमुत्तरतस्त्रिशृङ्गमकरावष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥२८॥ मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥२९॥ तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयभागेन पुरोऽष्टावुपक्लृप्ताः ॥३०॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षोडशोऽध्यायः ॥१६॥

॥ सङ्ग्रहोक्तिः ॥

इलावृतस्योत्तरभागवासिजानान् सुखयन्ति ॥२५॥ यान् नदान् सेवमाना जना कदाचिदपि वलि-पलित-क्लम-स्वेद-दौर्गन्ध्य-जरा-ऽऽमय-मरण-शीत-औष्ण्य-वैवर्ण्यादिभिर्जनितदुःखैः न पीड्यन्ते, यावज्जीवं निरतिशयं सुखमेवानुभवन्ति ॥२६॥ मेरोर्मूलदेशे परितो विन्यस्ताः कुरङ्ग-कुरर-कुसुम्भ-वैकङ्क-त्रिकूट-शिशिर-पतङ्ग-रुचक-निषध-शितिवास-कपिल-शङ्ख-वैदूर्य-जारुधि-हंस-ऋषभ-नाग-कालञ्जर-नारद-प्रभृतयो विंशतिर्गिरयः कमलकर्णिकायाः केसरा इवोपक्लृप्ताः सन्ति ॥२७॥ मेरोः पूर्वस्यां दिशि जठरदेवकूटौ, अष्टादशसहस्रमुदगायतौ, दक्षिणतः कैलासकरवीरौ, पश्चिमस्यां दिशि पवन-पारियात्रौ, उत्तरस्यां त्रिशृङ्गमकरौ च विद्येते, अष्टाभिरेतैः परितोऽलङ्कृतः काञ्चन-गिरिर्मेरुर्दर्भैः परिस्तृतो वह्निरिव चकास्ति ॥२८॥ मेरोर्मध्यभागे निर्मितां दशसहस्रयोजनविस्तृतां समचतुरस्रां शातकौम्भीसंज्ञां भगवतो ब्रह्मणः पुरीं वदन्ति ॥२९॥ तस्याः पुर्याः समन्ताद् अष्टानामिन्द्रादीनां लोकपालानामष्टौ पुर्यः सार्धद्विसहस्रयोजनपरिणाहा यथादिशं यथारूपं निर्मिताः सन्ति ॥३०॥ ❀ *इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां षोडशोऽध्यायः ॥१६॥* ❀

अथ सप्तदशोऽध्यायः ।।१७।।

श्रीशुक उवाच – तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिंजल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार।।१।। यत्तद्विष्णुपदमाहुः। यत्र ह वा व वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनम् उत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्त्ति ।।२।। ततः सप्तर्षयस्तत्प्रभावाभिज्ञा इयं ननु तपस आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभे-

---

।। सङ्ग्रहोक्तिः ।।

अथ सप्तदशोऽध्यायः ।।१७।।

इलावृते गङ्गावतरणम्

श्रीशुक उवाच – बलेर्यज्ञे साक्षाद् यज्ञमूर्त्तेर्भगवतो वामनरूपस्य त्रिलोकीक्रममाणस्य विष्णोर्वामपादाङ्गुष्ठनखेनाऽण्डकटास्योपरितनो भागो भिन्नः, तद्विराट्बाह्यजलधाराऽन्तःप्रविष्टा, सा जलधारा भगवच्चरणकमलक्षालनेन अरुणकिञ्जल्कोपरञ्जिता सती अखिलजगदघौघापहा अमला साक्षाद् (भगवत्पदी) विष्णुपदी इत्यभिधीयमाना सती युगसहस्रोपलक्षितेनातिमहता कालेन दिवो मूर्द्धन्यवततार।।१।।यो दिवि मूर्द्धा, तद् विष्णुपदमाहुः, यत्र विष्णुपदे दृढसंकल्पः परमभागवत उत्तानपादपुत्रो ध्रुवो वसति, यां भगवत्पदीं विष्णुपदीं ध्रुवोऽस्मत्कुलदेवताचरणारविन्दोदकमिदमिति हृद्यवधार्य उत्कृष्टभगवद्भक्तियोगेन द्रवितहृदयः सन् त्रिकालं सेवते, औत्कण्ठ्यामिलितबाष्पपूर्णनयनः रोमाञ्चिततनुः स विष्णुपदीमधुनाऽपि शिरसा परमादरेण दधाति।।२।। विष्णुपदीगङ्गाया प्रभावज्ञाः सप्तऋषयः सर्वोत्कृष्टा तपःसिद्धिरियमेवेति निश्चित्य, स्वात्मनि भगवति वासुदेवेऽनवरभक्तियोगलाभेन यक्तान्यपुरुषार्थाः सन्तः-

नैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ।।३।। ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ।।४।। तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्द्दिशमभिस्यन्दती नदनदीपतिमेवाभिनिविशति ।।५।। सीतालकनन्दा चक्षुर्भद्रेति सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वाऽन्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ।।६।। एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ।।७।। भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमानोत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ।।८।। तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटहिमकूटा-

---

।। सङ्ग्रहोक्तिः ।।

साक्षान्मुक्तिमिव प्रत्यक्षं प्राप्तां गंगामद्यापिपर्यंतं स्वजटाजूटे धारयन्ति ।।३।। ततोऽनेकसहस्रकोटिविमानसमूहैर्व्याप्तेनाऽऽकाशमार्गेणऽधोऽवतरन्तीन्दुमण्डलं व्याप्य सा गंगा ब्रह्मसदने निपतति ।।४ ।। तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिरभिधीयमाना सती चतुर्दिक्षु नदनदीपतिं समुद्रमभिनिविशति ।।५ ।। सीता, अलकनन्दा, चक्षुः, भद्रा, इति चतुर्भिर्नामभिः ख्याताऽभूत्, तत्र सीतासंज्ञा या प्राचीना धारा सा ब्रह्मसदनात् केसराचलादिगिरिशिखेभ्योऽधोऽधःप्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वाऽन्तरेण भद्राश्वस्य मध्ये स्यन्दमाना सती प्राच्यां दिशि क्षारसमुद्रं प्रविशति ।।६ ।। एवं चक्षुसंज्ञा प्रतीचीना धारा माल्यवच्छिखरे निपतिता, ततोऽधःप्रस्रवन्त्यप्रतिहतवेगा सती केतुमालमभिव्याप्य प्रतीच्यां दिशि समुद्रं प्रविशति ।।७ ।। भद्रासंज्ञा धारा मेरोरुत्तरदिशि शिखरात् निपतिता, गिरिशिखरात् गिरिशिखरमतिहाय ततोऽधःस्रवन्ती सती उत्तरान् कुरूनभितो व्याप्योदीच्यां दिशि लवणार्णवं प्रविशति ।।८ ।। तथैवाऽलकनन्दा ब्रह्मसदनात् मेरौ दक्षिणस्यां दिशि स्रवन्ती सती बहूनि गिरिकूटान्यतिक्रम्य हेमकूटहिमवच्छृङ्गाणि अस्खलिततीव्रतरवेगेन भिन्दन्ती सती भारतवर्षमभिव्याप्य –

न्यतिरभसतररंहसा लुठयन्ती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ।।९।। अन्ये च नदाश्च नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरिदुहितरः शतशः ।।१०।। तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ।।११।। एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननाङ्गबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्त्तते ।।१२।। किसलयश्रिया नंनम्यमानविटपलताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ।।१३।।

।। सङ्ग्रहोक्तिः ।।

दक्षिणस्यां दिशि जलधिमभिप्रविशति, यस्यां स्नानार्थमागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं दुर्लभं न ।।९।। अन्ये च बहुशो नदा नद्यश्च सन्ति, एवं वर्षे वर्षे शतशो मेर्वादिगिरिदुहितरः सन्ति ।।१०।। जम्बूद्वीपे नवसु वर्षेषु मध्ये भारतवर्षमेव कर्मक्षेत्रम्, अन्यान्यष्टवर्षाणि तु स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ।।११।। तेष्वष्टसु खण्डेषु निवासिनां देवकल्पानां पुरुषाणां दशसहस्रगजबालानां परमायुर्दश सहस्राणि वर्षाणि भवन्ति, बलवद्दृढङ्गानां आमोदप्रमोदविषयभोगपरायणानां तेषां तत्र त्रेतायुगसमः कालो वर्तते ।।१२।। तत्र देवपतयः स्वकीयैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुपुष्पगुच्छफलादीनां समृद्धिभिर्ननम्यमानविटपलताविटपिभिः सुशोभितेषु वनेषु गिरिद्रोणीषु आश्रमेषु राजहंस-जल-कुक्कुट-कारण्डव-सारस-चक्रवाकादिभिरुपकूजितेषु विमलजलाशयेषु च जलक्रीडादिभिर्विनोदैः सुरसुन्दरीणां कामोत्तेजकविलासहासादिभिः आकृष्टमनोदृष्टयः सन्तो यथेष्टं विहरन्ति ।।१३।।

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेना-त्मनाद्यापि संनिधीयते ।।१४।। इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्त-त्रापरो निर्विशति भवान्याः शापनिमित्तज्ञः यत्प्रवेष्टुः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ।।१५।। भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुमूर्तेर्महा-पुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधावति ।।१६।। *श्रीमहारुद्र उवाच* - ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ।।१७।। भजे भजन्याऽरणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम्। भक्तेष्वलं भावित-भूतभावनं भवापहं त्वा भवभावमीश्वरम् ।।१८।। न यस्य मायागुणचित्तवृत्तिभि-र्निरीक्षतो ह्यण्वपि दृष्टिरज्यते। ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ।।१९।। असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः। न नागवध्वोऽर्हणमीशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ।।२०।।

।। सङ्ग्रहोक्तिः ।।

नवस्वपि खण्डेषु महापुरुषो भगवान् नारायणस्तत्तद् वर्षपतिना सेव्यमानः सन् तत्तद्वर्षजनान-नुग्रहीतुं समस्तकल्याणगुणविशिष्टेन रूपेणाऽद्यापि संनिहितो भवति ।।१४।। इलावृते वर्षे तु भव एक एव पुमान्, भवान्याः शापनिमित्तोऽपरः पुरुषस्तत्र न हि निर्विशति, तत् पश्चाद् नवमस्कन्धे वक्ष्यामि ।।१५।। भवानीदासीनां स्त्रीगणानामर्बुदसहस्रैः संसेव्यमानो भवः स्वकारणभूतां भगवतो महापुरुषस्य वासुदेवादि चतसृषु मूर्तिषु चतुर्थीं तमःप्रधानां संकर्षणसंज्ञां मूर्तिं चित्ते साक्षात्कृत्य वक्ष्यमाणं मन्त्रं जपन् स्तौति ।।१६।। *श्रीमहारुद्र उवाच* - ॐनमो भगवते महापुरुषाय सर्वगुणप्रकाशाय स्वरूपतः स्वभावतश्चान्तवर्जिताय अव्यक्ताय नमः ।।१७।। हे भजनीय! शरण्यपादपङ्कजं ऐश्वर्यादिषट्काश्रयं भक्ताभ्युदयकारकस्वरूपं भवनाशनं भक्तेषु प्रकटितस्वरूपं त्वां भजामि ।।१८।। यथाऽनिर्जितक्रोधवेगानामस्माकं दृष्टिर्लिप्यते तथा निरीक्षत ईश्वरस्य तव दृष्टिः मायागुणचित्तवृत्तिभिरणुरपि न लिप्यते ।।१९।। यो भवान् अपरमार्थदृष्टेर्जनस्याऽज्ञानेन मध्वासवाभ्यां रक्तलोचनो मत्त इव

यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः। न वेद सिद्धार्थमिव क्वचित्स्थितं भूमण्डलं मूर्द्धसहस्रधामसु ।।२१।। यस्याद्य आसीद् गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल। यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे।।२२।। एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः। महानहं वैकृततामसैन्द्रियाः सृजाम सर्वे यदनुग्रहादिदम्।।२३।। यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः। न वेद निस्तारणयोगमञ्जसा तस्मै नमस्ते विलयोदयात्मने।।२४।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे सप्तदशोऽध्यायः ।।१७।।

।। सङ्ग्रहोक्तिः ।।

प्रतिभाति, परमार्थतस्त्वमकर्मवश्यः कल्याणविग्रहोऽसि, अत एव नागपत्न्यस्त्वत्पादस्पर्शेन रागादिमत्यः सत्यो ह्रिया भुजादिपूजनं कर्तुं समर्था न बभूवुः।।२०।। तत्त्वज्ञा ऋषयो यं जगदुत्पत्तिस्थितिलयकारणमनन्तं निस्त्रैगुण्यमाहुः यः फणासहस्रोपरिस्थितं भूमण्डलं सर्षपमिव भारत्वेन न वेद, तस्मै भगवते महापुरुषाय नमः।।२१।। यस्मात् महत्तत्त्वतः ज्ञानाश्रयः रजःप्रचुरशरीरो ब्रह्मा आसीत्, तस्मादहं रुद्रोऽभवम्, त्वद्दत्तज्ञानेनाऽहं सत्त्वतमोभ्याम् इन्द्रियभूतादिकं च ससर्ज।।२२।। ब्रह्मादयो वयं सर्वे रज्ज्वा बद्धाः पक्षिण इव यस्य भगवतो वशे स्थिताः स्मः, यस्य भगवतोऽनुग्रहाद् वयमिदं ब्रह्माण्डं तदन्तर्वर्ति वस्तु जातं च यथायथं सृजामः।।२३।। येन भगवता निर्मितां कर्माख्यग्रन्थिमतीं मायां देहेन्द्रियादिसम्बन्धेन मोहितो जनो न वेद, तर्हि तन्मायातरणोपायं तु कथं वेद, अतः प्रकृतिविलयोदयज्ञानवते परमात्मने तुभ्यं नमः।।२४।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां सप्तदशोऽध्यायः।।१७।।

अथ अष्टादशोऽध्यायः ।।१८।।

श्रीशुक उवाच – तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानीं परमेण समाधिना संनिधाप्येदमभिगृणन्त उपधावन्ति।।१।। *भद्रश्रवस ऊचुः* – ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति।।२।। अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति। ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः ।।३।। वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः। तथापि मुह्यन्ति तवाज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम्।।४।। विश्वोद्भवस्थान-निरोधकर्म ते ह्यकर्त्तुरङ्गीकृतमप्यपावृतः। युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः।।५।। वेदान् युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरंगविग्रहः।

।। सङ्ग्रहोक्तिः ।।

अथ अष्टादशोऽध्यायः।।१८।।

मेरोः पूर्वादिक्रमतस्त्रिषूत्तरवर्षेषु सेव्यसेवकवर्णनम्

श्रीशुक उवाच – तथा मेरोः पूर्वदिग्भागे भद्राश्वखण्डे धर्मपुत्रो भद्राश्वस्तत्सेवकमुख्याः पुरुषाश्च साक्षाद् भगवतो वासुदेवस्य हयग्रीवाख्यां मूर्तिं परमेण समाधिना साक्षात्कृत्येदं वचो जपन्तः स्तुवन्ति।।१।। *भद्रश्रवस ऊचुः* – ॐ नमो भगवते, धर्मायात्मविशोधनाय नमः, त एवं स्तुवन्ति,।।२।। अहो भगवतो विचेष्टितं विचित्रमस्ति, यदधीनः पुमान् विषयसुखार्थं पापं कुर्वन् मृतं पितरं पुत्रं वा दग्ध्वा तद्धनैर्जीवितुं समीहते, एवं स्वस्यापि घातकं कालं पश्यन्नपि न पश्यति।।३।। विपश्चित इदं विश्वं नश्वरं वदन्ति, अध्यात्मविदः समाधौ पश्यन्ति च, तथापि हे अज! ते तव मायया मोहं प्राप्नुवन्ति, अत इदं कृत्यं सुविस्मितम्, अत ईदृशमोहनिवृत्तये त्वामजमहं नतोऽस्मि।।४।। हे स्वामिन्! अकर्तुरप्यखिलभुवनजन्मस्थेमभङ्गात्मकं कर्म तव योग्यमेव, प्रकृतिद्वारा जगद्विधातुस्तवाऽकर्तृत्वमेव, तत्कारणत्वेन प्रयोजकत्वेन च तत्कर्तृत्वमपि युक्तम्, इत्युभयतो न त्वय्येतच्चित्रम्।।५।। दैनंदिनप्रलयान्तेऽसुरेणोऽपनीतान् वेदान् –

प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथेहिताय त इति ।।६।। हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये। तद्दयितं रूपं महापुरुषगुणभाजनं महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ।।७।। ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस स्वाहा अभयमात्मनि भूयिष्ठा ॐ क्ष्रौम् ।।८।। स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया। मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ।।९।। मागारदारात्मजवित्तबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः। यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरात् न तथेन्द्रियप्रियः ।।१०।। यत्सङ्गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम्। हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं को वै न सेवेत मुकुन्दविक्रमम् ।।११।।

।। सङ्ग्रहोक्तिः ।।

हयग्रीवरूपेण त्वया रसातलादानीय तद् याचमानाय ब्रह्मणे प्रत्याददे, एवं विधाय सत्यसंकल्पाय ते नमः ।।६।। हरिवर्षखण्डे भगवान् नृसिंहरूपेणाऽऽस्ते तद्रूपग्रहणवृत्तं सप्तमस्कन्धेऽभिधास्ये, भगवद्गुणसमानगुणको महाभागवतो दैत्यदानवकुलपावकशीलचरितः प्रह्लादो तत्खण्डवासिभिः सह तद् दयितं नृसिंहस्वरूपमुपास्ते, इदं वक्ष्यमाणं च जपति ।।७।। ॐ नमो भगवते नृसिंहाय, नमस्तेजस्तेजसे, आविरार्वि भव, वज्रनख वज्रदंष्ट्र कर्माशयान् रन्धय रन्धय, तमो ग्रस ग्रस, स्वाहा अभयमात्मनि भूयिष्ठा ॐ क्ष्रौम् ।।८।। अथ स्तुतिश्लोकानाह –विश्वस्य स्वस्ति भूयात्, खलः स्वखलतां कुरुतात्, भूतानि परस्परं शिवं ध्यायन्तु, मनो भद्रं भजतात्, अस्माकं सर्वेषां मतिर्निष्कामा सती भगवतः श्रीमूर्तिचिन्तन आवेश्यताम् ।।९।। गृहदारात्मजवित्त-बन्धुष्वस्माकमासक्तिर्मा भूयात्, किन्तु भगवत्प्रियाणां भागवतानां संगः स्याद्, भगवद्ध्यानपरः पुमान् प्राणवृत्त्या तुष्यति, इन्द्रियतर्पणप्रसक्तो दारादितः तथा न तुष्यति ।।१०।। सत्संगात् प्राप्तं भगवत्पराक्रमं श्रद्धया सेवमानानां श्रवणद्वारान्तःप्रविष्टो भगवान् जनानां मनोगतं मलं हरति, गङ्गादितीर्थं तु वारंवारं संस्पर्शतां नृणां केवलं बाह्यं मलमेव हरति, नान्तरम्, अतो

यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः। हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥ हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितम्। हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनाम् ॥१३॥ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम्। हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति ॥१४॥ केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापते र्दुहितॄणां च पुत्राणां तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥१५॥ अतीवसुललितगतिविलास-विलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तम्भितसुन्दरभ्रूमण्डलसुभगवद-नारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥१६॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु

॥ सङ्ग्रहोक्तिः ॥

मुकुन्दविक्रमं को जनो न सेवेत? ॥११॥ यस्य मनसि निष्कामा भक्तिरस्ति तस्मिन् भक्ते सर्वसद्गुणैः सह सर्वे देवाः समासते, भक्तिरहिते विषयान् चिन्तयति च पुरुषे ते महान्तो गुणाः कुतः स्युः? ॥१२॥ मीनानां जलं यथा जीवनं तद्वत् शरीरिणां साक्षाद् भगवान् हरिरेव आत्मा धारकोऽस्ति, महान् सन्नपि भगवन्तं विहाय यदि स गृहासक्तो भवेत् तदा तस्य महत्त्वं केवलं वयसैव स्यात्, न तु भगवदाश्रयादिगुणैः ॥१३॥ तस्मात् कारणात् रजोरागविषादादि-दोषमूलं संसृतिचक्रवालं गृहं हित्वाऽकुतोभयं नृसिंहपादपद्मं भजत ॥१४॥ केतुमालखण्डे भगवान् कामरूपेण (प्रद्युम्नरूपेण) लक्ष्म्याः प्रियचिकीर्षया विराजते, स तस्मिन् खण्डे स्थितानां अहोरात्राभिमानिनां षट्त्रिंशत्सहस्रसंख्यानां तद्वर्षाधिपानां प्रजापतेर्दुहितॄणां च प्रियचिकीर्षया तैः सेव्यमानो वसति, यासां प्रजापतिदुहितॄणां भगवच्चक्रतेजसा भीतमनसां गर्भा विध्वस्ता निष्प्राणाश्च सन्तः संवत्सरान्ते निपतन्ति ॥१५॥ स कामोऽतीव सुललितगतिविलासविलसित-हासलिलया सुन्दरभ्रूमण्डलसुभगवदनारविन्द शोभया च रमामिन्द्रियाणि च रमयन् रमयते ॥१६॥ भगवतो मायामयं तद्रूपं रमा देवी संवत्सररात्रिषु प्रजापतिदुहितृभिः

प्रजापतेर्दुहितृभिरुपेताहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ।।१७।। ॐ ह्रां ह्रीं ह्रुं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ।।१८।। स्त्रियो व्रतैस्त्वां हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् । तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः ।।१९।। स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् । स एक एवेतरथा मिथोभयं नैवात्मलाभादधि-मन्यते परम् ।।२०।। या तस्य ते पादसरोरुहार्हणं निकामयेत् साखिलकामलम्पटा। तदेव रासीप्सितमीप्सितोऽर्च्चितो यद्भग्नयाच्ञा भगवन्प्रतप्यते ।।२१।। मत्प्राप्तयेऽ-जेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रियेधियः। ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित ।।२२।। स त्वं ममाप्यच्युत शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्त्वताम् ।

।। सङ्ग्रहोक्तिः ।।

तद्भर्तृभिश्चोपेता सती परमसमाधियोगेनोपास्ते, इदं चोदाहरति ।।१७।। ॐ ह्रां ह्रीं ह्रुं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र च भूयात् ।।१८।। लक्ष्मीराह – हे हृषीकेश! स्त्रियस्त्वां हृषीकेशमाराध्याऽन्यं पतिं कामयन्ते, ते पतयस्तासामपत्यं धनमायुश्च न परिपान्ति ।।१९।। यः स्वयमकुतोभयः सन् भयातुरं जनं पाति स एव पतिः स्यात्, एवं भूतः पतिरेकमात्रं त्वमेवाऽसि ।।२०।। या स्त्री निष्कामा सती तव चरणकमलमेवाभिलषति, सा त्वत्पादसेवनात् सर्वान् कामान् लभते, या केवलमेक मनोरथं संकल्प्य त्वामाराधयति सैकमेव फलं विन्दति, तत्फलभोगानन्तरं दुःखिनी च भवति ।।२१।। हे हरे! विषयेषणा अजेशसुरासुराः सर्वे मत्प्राप्तय उग्रं तपः तप्यन्ते, तथापि भवत्पादपरायणात् ऋते अन्ये मां लक्ष्मीं न विन्दन्ति, हे अजित! अतोऽहं त्वत्परायणाऽस्मि ।।२२।। भक्तानां शिरसि त्वया यत् कराम्बुजं कृपया स्थापितं वर्तते, तन्मे शिरसि अपि

बिभर्षि मा लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति ।।२३।। रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ।।२४।। ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ।।२५।। अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः। स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियम् ।।२६।। यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक् समेत्य च। पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ।।२७।। भवान् युगान्तार्णव ऊर्म्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम्। मया सहोरु क्रमतेऽज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ।।२८।। हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्य्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मन्त्रमिमं चानुजपति ।।२९।। ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणाय नोपलक्षितस्थानाय नमो -

---

।। सङ्ग्रहोक्तिः ।।

कृपया स्थापय, यद्यपि त्वं चिह्नरूपेण मां वक्षसि धारयसि, किन्तु शिरसि करस्थापनरूपां कृपां कुरु ।।२३।। रम्यके खण्डे तत्खण्डाधिपतेर्मनोः प्राक् दर्शितं मात्स्यं रूपम्, इदानीमपि मनुर्महता भक्तियोगेन तं मात्स्यं रूपमाराधयति, इमं मन्त्रं जपन् स स्तौति ।।२४।। ॐ नमो भगवते मुख्यतमाय, नमः सत्त्वाय प्राणायौजसे महसे बलाय महामत्स्याय नमः इति ।।२५।। अखिललोकपालैरपि बाह्याभ्यन्तरेऽदृष्टस्वरूपस्त्वं वेदध्वनिमत्यधिकं कुर्वन् विचरसि, य ईश्वरस्त्वं चिदचिदात्मकमिदं कृत्स्नं जगत् दारुमयीं पुत्तलिकामिव वशं नयन् रक्षसि ।।२६।। मत्सरिणो लोकपाला त्वद्बलं परित्यज्य पृथक् पृथक् संहत्य वा स्थावरजङ्गमात्मकमिदं जगत् पातुं न शेकुः, अतस्त्वमेव सर्वप्राणरूपेण पालक ईश्वरोऽसि ।।२७।। ऊर्मिमालिनि दैनंदिनप्रलयार्णवे औषधिवीरुधाश्रयरूपां भूमिं मया सह धृत्वा ओजसा विचरसि, हे अज! जगत्प्राणगणात्मने तुभ्यं नमोऽस्तु ।।२८।। हिरण्मये वर्षेऽपि कूर्मतनुं बिभ्राणो भगवान् निवसति, तत् प्रियतमां कूर्मतनुं पितृणामधिपोऽर्यमा तद्वर्षस्थजनैः सह उपास्ते, इमं मन्त्रं च जपति ।।२९।।

वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ।।३०।। यद्रूपमेतन्निजमाययार्पित-मर्थस्वरूपं बहुरूपरूपितम्। संख्या न यस्यास्त्ययथोपलम्भनात्तस्मै नमस्तेऽव्यप-देशरूपिणे ।।३१।। जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देवर्षिपितृभूतमैन्द्रियम् । द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ।।३२।। यस्मिन्नसंख्येय-विशेषनामरूपाकृतौ कविभिः कल्पितेयम्। संख्या यया तत्त्वदृशापनीयते तस्मै नमः सांख्यनिदर्शनाय त इति ।।३३।। उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृत-वराहरूप आस्ते तं तु देवी ह्येषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्त्तयति ।।३४।। ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ।।३५।। यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् । मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ।।३६।।

।। सङ्ग्रहोक्तिः ।।

ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणाय नोपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ।।३०।। स्वेच्छाशक्त्या स्वेनोद्भावितं पदार्थरूपं बहुरूपित-मेतज्जगत् यच्छरीरभूतं यस्य संख्या नास्ति, अयथार्थोपलम्भनात् मात्रं व्यपदेश एव क्रियते, तस्मै नमः ।।३१।। हे देव! इदं जगत् चराचरभेदेन विभक्तं सत् जरायुजस्वेदजाण्डजोद्भिज्जा-दिनाम्ना भिन्नं पुनः देवर्षिपितृभूतादिभिन्नम्, तदेव द्यौः एवं क्षितिः शैलसमुद्रसरित्द्वीपग्रहर्क्षाणि इति भिन्ननामभिर्यदुच्यते, यः कश्चनापि पदार्थः स त्वमेक एवासि ।।३२।। असंख्येयविशेष-नामरूपाकृतिधारिणि यस्मिन् त्वयीदं सर्वं बहुधा रचितमस्ति, वस्तुतस्तु सर्वं त्वदन्तर्यामिकं त्वत्शरीरकं त्वत्स्वरूपमेवास्ति, एवंभूताय सांख्यसिद्धान्तरूपाय ते नमोऽस्तु ।।३३।। उत्तरकुरुषु वराहरूपधरो भगवान् यज्ञपुरुष आस्ते, तं वराहं देवी भूः कुरुवर्षस्थैः पुरुषैः सहाऽखण्ड-भक्तियोगेन उपासते, इमं परमं मन्त्रमपि जपति ।।३४।। ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः, कर्मशुक्लाय त्रियुगाय नमस्ते ।।३५।। कवयो विपश्चितः यस्य स्वरूपं देवमनुष्यादिभूतेषु क्रियार्थैः गूढं वर्तते ते दिदृक्षवः सन्तः दारुषु

द्रव्यक्रिया-हेत्वयने सकर्त्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने। अन्वीक्षयाङ्गातिशयात्म-बुद्धिभिर्निरस्तमायाकृतये नमो नमः।।३७।। करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः। माया यथा योऽभ्रमते तदाश्रयं ग्राव्णे नमस्ते गुणकर्मसाक्षिणे ।।३८।। प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः। कृत्त्वाऽग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणताऽस्मि तं विभुमिति।।३९।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे अष्टादशोऽध्यायः।।१८।।

।। सङ्ग्रहोक्तिः ।।

वह्निमिव मनसा सततं मथ्नाति तस्मै प्रकटितात्मने नमः।।३६।। आत्मपरमात्मस्वरूपज्ञानिभिः निपुणनिरूपणेनाऽस्मिन् शरीरे भूतेन्द्रियगुणत्रयजीवात्मभिः सह विविच्य निरीक्षिताय निरस्त-मायाकृतये नमो नमः।।३७।। यथा चुम्बकसम्पर्केण लोहं भ्रमते तथैव तव सान्निध्येन ते माया विश्वोत्पत्तिस्थितिलयान् प्रकरोति, एवं गुणकर्मसाक्षिणे तुभ्यं नमः।।३८।। यो रणे हिरण्याक्षं हत्वा मां च दंष्ट्राग्रे निधाय क्रीडन् गजराज इव रसातलान्निरगात्, तं वराहमहं प्रणतास्मि ।।३९।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यामष्टादशोऽध्यायः।।१८।।

अथ एकोनविंशोऽध्यायः ।।१९।।

श्रीशुक उवाच – किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनूमान् सह किंपुरुषैरविरतभक्तिरुपास्ते ।।१।। आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदमुपगायन्ति ।।२।। ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मने उपासितलोकाय नमः साधुवादनिकषणायनमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ।।३।। यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणत्र्यवस्थम् । प्रत्यक् प्रशान्तं सुधियोपलम्भनं ह्यनामरूपं निरहं प्रपद्ये ।।४।। मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः । कुतोऽन्यथा स्यू रमतः स्व आत्मनि सीताकृतानि व्यसनानीश्वरस्य ।।५।। न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान्वासुदेवः । न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं

।। सङ्ग्रहोक्तिः ।।

अथैकोनविंशोऽध्यायः ।।१९।।

किंपुरुषभारतवर्षद्वयवर्णनं भारतवर्षस्य गौरवं च

श्रीशुक उवाच – किंपुरुषे वर्षे जगत्कारणभूतं परमपुरुषं लक्ष्मणाग्रजं सीताभिरामं भगवन्तं श्रीदाशरथिं रामं तच्चरणभजनासक्तः परमभागवतोऽनवच्छिन्नभक्तिर्हनुमान् किंपुरुषैः सह सेवते ।।१।। आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं स्वामिनः श्रीरामस्य कथां समुपशृणोति, स्वयं चेदं गायति=जपति ।।२।। ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नमः आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मने उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ।।३।। हे राम! यत्तव रूपमेकं विशुद्धानुभवमात्रं स्वसामर्थ्येन गुणत्रयपरं स्वभक्तोन्मुखं प्रशान्तं सुधियोपलभ्यं, प्राकृतनामरूपवर्जितं निरहंकृतिं त्वां प्रपद्ये ।।४।। भगवतस्तव मनुष्यावतारः केवलं रावणविनाशायैव न, किन्तु संसारे मर्त्य-शिक्षणायापि जातः, अन्यथा स्वस्वरूपे रममाणस्य परमेश्वरस्य तस्य सीताविरहजातानि व्यसनानि कुतः स्युः ।।५।। ज्ञानिनां प्रीतिविषयः सुहृत्तमो भगवान् वासुदेवो रामः परमात्मा त्रिलोक्यां क्वापि न सक्तोऽत एव स्त्रीवियोगजं दुःखं -

चापि विहातुमर्हति ।।६।। न जन्म नूनं महतो न सौभगं न वाङ्न बुद्धिर्नाकृति-
स्तोषहेतुः। तैर्यद्विसृष्टानपि नो वनौ कसश्चकार सख्ये बत लक्ष्मणाग्रजः ।।७।।
सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमम्। भजेत रामं मनुजाकृतिं
हरिं य उत्तराननयत् कोसलान् दिवमिति ।।८।। भारतेऽपि वर्षे भगवान्नर-
नारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्य्ययोगोपशमोपरमात्मोपलम्भनम्
अनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति ।।९।। तं भगवान्नारदो
वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोप-
वर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ।।१०।। ॐ
नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय
नरनारायणाय परमहंसपरमगुरवे आत्मारामायाधिपतये नमो नम ।।११।। गायति
चेदम्। कर्त्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः। द्रष्टुर्न
दृग्यस्य गुणैर्विदूष्यते तस्मै -

।। सङ्ग्रहोक्तिः ।।

मर्त्यशिक्षार्थं, न प्रादुर्भूतश्चेन्न प्राप्नुयात्, तथा च लक्ष्मणं न परित्यजेत् ।।६।। परब्रह्मणः श्रीरामस्य जन्म-वाग्-बुद्धि-जात्यादयस्तोषहेतुर्न भवति, श्रेष्ठजन्मादिभिः रहितानपि वनचरानस्मान् लक्ष्मणाग्रजः सन्नपि यः सखित्वेन स्वीचकार ।।७।। देवोऽसुरो मनुष्यो वानरो यः कोपि सर्वात्मना सुकृतज्ञमुत्तमं मनुष्याकृतिं हरिं रामं भजेत, य उत्तरकोसलवासिनो लोकान् दिवमनयत् ।।८।। भारतवर्षेऽपि नरनारायणनामा भगवानविज्ञातचेष्टः सन् बदरिकाश्रमे ज्ञानिनामनुग्रहाय धर्म-ज्ञान-वैराग्य-ऐश्वर्य-योगोपशमादिभिरुपचितं दिव्यं तप आकल्पान्तमनुकम्पया चरति ।।९।। भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरग्रे कथयमानो भगवान् नारदो भारतीयप्रजाभिः सह परमभक्तिभावेन तं नरनारायणमुपासते, इमं मंत्र जपति ।।१०।। ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय, नमोऽकिञ्चनवित्ताय, ऋषि ऋषभाय, नरनारायणाय परमहंसगुरवे आत्मारामाधिपतये नमो नम इति ।।११।। गायति चेदं श्लोकचतुष्टयम् - यो भगवान् सर्गादिषु कर्तृत्वेन न बध्यते,

नमोऽसक्तविविक्तसाक्षिणे ।।१२।। इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् । यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः ।।१३।। यथेहिकामुष्मिककामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् । शङ्कित विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ।।१४।। तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज । भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावजमिति ।।१५।। भारतेऽप्यस्मिन्वर्षे सरिच्छैलाः सन्ति बहवः मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिः ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः ।।१६।। एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ।।१७।।

।। सङ्ग्रहोक्तिः ।।

देहस्थोऽपि दैहिकैः क्षुत्पिपासादिभिरभिहतो न भवति, यस्य दृष्टिर्दृश्यै गुणैर्न विक्रियते, तस्मैऽनासक्तपूतसाक्षिणे नमः ।।१२।। हे योगेश्वर! भगवान् हिरण्यगर्भः इदमेव योगकौशलं जगाद, यत् त्यक्तदेहाभिमानः सन्नन्तकाले ध्यानयोगेन हेयगुणरहिते त्वयि मनः स्थिरं कुर्यात् ।।१३।। ऐहिकामुष्मिकसुखासक्तो जनः सुतदारधनानि चिन्तयन् मृत्योर्बिभीयात् अधीतशास्त्रस्याऽपि तस्य शास्त्राध्ययनश्रमो निष्फल एव ।।१४।। तस्माद् हे प्रभो! त्वं नस्त्वयि स्वभावजं योगं विधेहि, यद् वयं त्वन्मायया कुत्सितेऽस्मिन् देह आहितां सुदुर्भिदां अहंममतारूपामविद्यामाशु संत्यजेम ।।१५।। अस्मिन् भारते वर्षे सरितः शैलाश्च बहवः सन्ति, ते च शैलाः – मलयः, मङ्गलप्रस्थः, मैनाकः, त्रिकूटः, ऋषभः, कूटकः, कोल्लकः, सह्यः, देवगिरिः, ऋष्यमुकः, श्रीशैलः, वेंकटः, महेन्द्रः, वारिधारः, विन्ध्यः, शुक्तिमान्, ऋक्षगिरिः, पारियात्रः, द्रोणः, चित्रकूटः, गोवर्धनः,रैवतकः, ककुभः, नीलः, गोकामुखः, इन्द्रकीलः, कामगिरिः इति अन्ये च शतशः सहस्रशश्च शैलाः सन्ति, तेषां नितम्बसम्भवा नदा नद्यश्चाऽसंख्याताः सन्ति ।।१६।। भारतीयाः प्रजाः नामभिरेव पावयन्तीनामेतासां नदीनां जलं

चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृद्धा वितस्ता असिक्नी विश्वेति महानद्यः।।१८।। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथावर्णविधानमपवर्गश्चापि भवति ।।१९।। योऽसौ भगवति सर्वभूतात्मन्यनात्म्ये-ऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागति-निमित्ताऽविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषप्रसङ्गः।।२०।। एतदेव हि देवा गायन्ति- *अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।*

।। सङ्ग्रहोक्तिः ।।

स्नानपानादिना सेवन्ते।।१७।। चन्द्रवशा, ताम्रपर्णी, अवटोदा, कृतमाला, वैहायसी, कावेरी, वेणा, पयस्विनी, शर्करावर्त्ता, तुङ्गभद्रा, कृष्णवेणा, भीमरथी, गोदावरी, निर्विन्ध्या, पयोष्णी, तापी, रेवा, सुरसा, नर्मदा, चर्मण्वती, सिन्धुः, अन्धः, शोणश्च नदौ, महानदी, वेदस्मृतिः, ऋषिकुल्या, त्रिसामा, कौशिकी, मन्दाकिनी, यमुना, दृषद्वती, सरस्वती, गोमती, सरयूः, ओधस्वती, सप्तवती, सुषोमा, शतद्रूः, चन्द्रभागा, मरुद्वृद्धा, वितस्ता, अस्निकी, विश्वा, विश्वैव, क्वचिदुन्मत्तगङ्गेतिनाम्नाभिहिताऽस्ति।।१८।। अस्मिन् भारतवर्षे प्राप्तजन्मभिः पुरुषैः, सत्त्वरजस्तमोगुणात्मभिः कृतेन प्रारब्धेन कर्मणा देवमनुष्य-तिर्यगादिषु योनिषु जन्म प्राप्याऽऽनुपूर्व्येण इहामुत्र सुखदुःखान्यनुभूय कर्मज्ञानानुगृहीत-भक्तियोगेन मोक्षश्चापि प्राप्यते।।१९।। यदा भगवदेकान्तिकानां सत्समागमो भवति तदा अनाद्यविद्याजन्यवासनारूपा ग्रन्थयो भिद्यन्ते, तदनन्तरमेव सर्वान्तर्यामिणि वाङ्मनोगोचरे परमात्मनि वासुदेवे निष्कामाऽनन्यैकान्तिकी च भक्तिर्जायते, तया भक्त्यैव जीवस्य मोक्षो भवति, नान्यथा।।२०।। एतदेव हि भारतप्राशस्त्यं देवा गायन्ति, अहो! एभिः किं पुण्यमकारि, अथवा एषां स्वयं –

यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः।।२१।। किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना। न यत्र नारायण-पादपङ्कजस्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात्।।२२।। *कल्पायुषां स्थानजयात्पुन-र्भवात्* क्षणायुषां *भारतभूजयो वरम् । क्षणेन मर्त्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं* पदं *हरेः।।२३।। न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्त-दाश्रयाः। न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम्।।२४।।* प्राप्ता नृजतिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताम्। न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम्।।२५।। यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्रवस्तुतः। एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः।।२६।। सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः। स्वयं विधत्ते भजताम्-

---

।। सङ्ग्रहोक्तिः ।।

भगवान् हरिः प्रसन्नः, यैर्जीवैर्भारतवर्षाङ्गणे मुक्तिप्रदभगवत्सेवोपयोगि नृषु जन्म लब्धम्, हि यस्मात् तादृशजन्मनः स्पृहाऽस्माकमपि विद्यते।।२१।। दुष्करैः क्रतुभिः तपोव्रतैर्दानैरल्पा-स्थिरस्वर्गप्राप्त्याऽपि किंचित् फलं न भवति, यत्र स्वर्गादौ विषयभोगानामतिरेकात् नारायणचरणकमलस्मृतिर्न स्यात्, कथंचित् जाताऽपि सा प्रमुष्टा भवेत्।।२२।। कल्पायुषां स्थानप्राप्तेः सकाशात् क्षणायुषि भारतभुवि जन्मप्राप्तिः श्रेष्ठा, यतः भारतवर्षे क्षणभङ्गुरेण शरीरेण कृतं कर्म भगवति समर्प्य भगवदुपासका अकुतोभयं हरेर्गोलोकादिपदं संयान्ति।।२३।। येषु महरादिषु लोकेषु भगवतः कथारूपा अमृतनद्यो न सन्ति, यत्र कथापरायणा भगवत्स्मरणपरा सल्लक्षणाः भगवदुपासकास्त्यागिजना न सन्ति, यत्र भगवत्पूजामहोत्सवाः न सन्ति, स यदि ब्रह्मादिदिव्यलोकश्चेत् तदपि न सेव्यताम्।।२४।। इह भारतवर्षे ये जीवाः साङ्गोपांगसंपन्नं मनुष्यदेहं प्राप्याऽपि स्वस्य मोक्षाय न यतन्ते, तर्हि ते वनवसतयः शकुन्ता इव बन्धनं यान्ति।।२५।। अहो! भारतवासिनां भाग्यम्! यै र्भारतीयैर्यज्ञे श्रद्धया विधिमन्त्रवस्तुतो विभागशो दत्तं हविः विविधनामभिराहूतो भगवान् स्वयं पूर्णकामः सन्नपि मुदा गृह्णाति, यतः

निच्छतामिच्छापिधानं निजपादपल्लवम् ।।२७।। *यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम्। तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति।।२८।।* *श्रीशुक उवाच*– जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ।।२९।। तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ।।३०।। एवं तव भारतोत्तम जम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ।।३१।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे एकोनविंशोऽध्यायः ।।१९।।

।। सङ्ग्रहोक्तिः ।।

स्वयमाशिषां दाता वर्तते ।।२६।। प्रार्थितो भगवान् प्रार्थितं ददाति, इत्येतत् सत्यम्, तत्राऽल्पास्थिरपुरुषार्थदो भगवान् परमपुरुषार्थदाता न, यत् पुनरर्थिता भवति तथाविधं ददाति, किन्तु निष्कामानां भजतां जनानामिच्छामात्राच्छादकं निजपादपल्लवं स्वयमेव संपादयति समस्तपुरुषार्थरूपं स्वात्मानमेव ददाति ।।२७।। यदि नः सुयजनस्य सुप्रवचनस्यान्यस्यापि शुभकर्मणः स्वर्गसुखावशेषितं पुण्यं स्याच्चेत्तर्हि नो भारतवर्षे जन्मस्यात्, यत्र हरिः स्वं भजतां मोक्षरूपं सुखं तनोति ।।२८।। *श्रीशुक उवाच*– केचित् जम्बूद्वीपस्याऽष्टावुपद्वीपानपि कथयन्ति, ये यागीयाश्वान्वेषणसमये महीं परितो निखनद्भिः सगरात्मजैरुपकल्पिता इति दिशन्ति ।।२९।। ते च यथास्वर्णप्रस्थः, चन्द्रशुक्लः, आवर्त्तनः, रमणकः, मन्दरहरिः पाञ्चजन्यः, सिंहलः,लङ्का चेति ।।३०।। हे भारतोत्तम! इत्थं जम्बूद्वीपस्य खण्डशो विभागो गुरूपदेशानुसारेण यथाक्रममुपवर्णितः ।।३१।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यामेकोनविंशोऽध्यायः ।।१९।।

अथ विंशोऽध्यायः ।।२०।।

ऋषिरुवाच - अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ।।१।। जम्बूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जम्बूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तधा विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ।।२।। शिवं यवयसं सुभद्रं शान्तं क्षेमममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ।।३।। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ् -

---

।। सङ्ग्रहोक्तिः ।।

अथ विंशोऽध्यायः ।।२०।।

प्लक्षादिषड्द्वीपानां लोकालोकस्य च स्थितिः

ऋषिरुवाच - हे राजन्! अतः परं प्लक्षादीनां द्वीपानां प्रमाणं लक्षणं संस्थानं च वर्षविभागानुसारेण वक्ष्यामि ।।१।। यथा मेरुर्जम्बूद्वीपेन वेष्टितो भवति तथा जम्बूद्वपोऽयं लक्षयोजनपरिमाणः, तावता क्षारोदधिना वेष्टितः, एवं पूर्वस्माद् उत्तरोत्तरा द्वीपाः सागराश्च द्विगुणाः सन्ति, अतः परं द्विलक्षयोजनपरिमितः प्लक्षद्वीपो द्विलक्षयोजनपरिमाणेनेक्षुरससमुद्रेण परिवेष्टितोऽस्ति, प्लक्षद्वीपसंज्ञाधारकः प्लक्षवृक्षो विद्यते, स जम्बूपरिमाणः, एकादशशतयोजनोच्छ्रायः, तत्र हिरण्मयः सप्तजिह्वोऽग्निस्तिष्ठति, प्लक्षद्वीपस्याधिपतिः प्रियव्रततनय इध्मजिह्वोऽस्ति, स स्वस्य द्वीपस्य सप्त खण्डानि कृत्वा खंडनामभ्यः स्वपुत्रेभ्यो ददौ, स्वयं चाऽऽत्मयोगेनेनोपरराम ।।२।। तेषां वर्षाणां नामानि, यथा शिवं, यवयसं, सुभद्रं, शान्तं, क्षेमम्, अमृतम्, अभयम् इति सप्त, तेषु मर्यादापर्वताः नद्यश्च सप्त सप्त भवन्ति ।।३।। मणिकूटः, वज्रकूटः, इन्द्रसेनः, ज्योतिष्मान्, सुपर्णः, हिरंण्यष्ठीवः, मेघमालः, सप्त मर्यादा पर्वताः, अरुणाः, नृम्णा, अङ्गिरसी,

गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते।।४।। प्रत्नस्य विष्णो रूपं यत्सत्त्यस्यर्त्तस्य ब्रह्मणः। अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ।।५।। प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्तते।।६ ।। प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्कते।।७।। यत्र ह वै शाल्मली प्लक्षायामा यस्यां वा व किल निलयमाहुर्भगवतश्छन्दः स्तुतः पतत्त्रिराजस्य सा द्वीपहूतय उपलक्ष्यते।।८।। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति।।९।। तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः -

---

।। सङ्ग्रहोक्तिः।।

सावित्री, सुप्रभाता, ऋतुम्भरा, सत्यंभरा चेति सप्त नद्यः, यासां नदीनां जलस्नानपानादिना धौतरजस्तमस्का हंस-पतङ्ग-ऊर्ध्वायन-सत्यांगनामकाश्चत्वारो वर्णाः सहस्रवर्षायुषो भवन्ति, ते विबुधोपमसंदर्शनप्रजनाः, ते वेदत्रयी रूपया विद्यया सूर्यरूपिणं भगवन्तमुपासते।।४।। ते च "प्रत्नस्य विष्णोरूपं यत् सत्यस्यर्त्तस्य ब्रह्मणः" एनं मन्त्रं जपन्ति।।५।। प्लक्षादिषु पञ्चसु द्वीपेषु सर्वेषां जनानां "आयुः, इन्द्रियं, ओजः, सहः, बुद्धिः, बलं, विक्रमः" इत्येतेषां सिद्धिः साहजिकी च वर्तते।।६।। यथा प्लक्षद्वीपः स्वसमानेन द्विलक्षयोजनविशालेनेक्षुरसाब्धिना-ऽऽवृतोऽस्ति, तथा शाल्मली द्वीपः अपि द्विगुणपरिमाणः चतुर्लक्षयोजनविशालः समानेन सुराब्धिना आवृतः सन् परिवेष्टितः सन् तिष्ठति।।७।। यत्र द्वीपे स्थिता शाल्मली प्लक्षसमानविस्तारा-ऽऽस्ते, यत्र पक्षिराजस्य गरुडस्य निवासनीडमाहुः, सा शाल्मली हि तद् द्वीपस्य नामकरणं करोति।।८ ।। तस्याऽ-धिपतिः प्रियव्रतपुत्रो यज्ञबाहुः सप्तभ्यः स्वसुतेभ्यस्तन्नामानि सप्त वर्षाणि विभज्य प्रादात्, पुत्राणां वर्षाणां च समानि नामानि - यथा - सुरोचनं, सौमनस्यं, रमणकं, देववर्षं, पारिभद्रं, आप्यायनम्, अविज्ञातम्, इति।।९।।

पुष्पवर्षः सहस्रश्रुतिरिति। अनुमती सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ।।१०।। तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुन्धरेषुन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ।।११।। स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः अन्धः प्रजानां सर्वासां राजासोमो न अस्त्विति ।।१२।। एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा विराजयति ।।१३।। तद्द्वीपाधिपतिः प्रैयव्रतो राजन् हिरण्यरेतोनामा स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत ।।१४।। वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैव। चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ।।१५।। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा

।। सङ्ग्रहोक्तिः ।।

तेषु वर्षेषु वर्षाद्रयो नद्यश्च सप्तैव सन्ति, तत्र गिरयः– स्वरसः, शतशृङ्गः, वामदेवः, कुन्दः, कुमुदः, पुष्पवर्षः, सहस्रश्रुतिश्चेति, नद्यः अनुमती, सिनीवाली, सरस्वती, कुहू, रजनी, नन्दा, राका, चेति सप्त ।।१०।। तद्वर्षपुरुषाः श्रुतधरः, वीर्यधरः, वसुन्धरः, इषुन्धरश्चेति ब्राह्मणादिवर्ण-स्थानीया वर्तन्ते, तत्खण्डवासिनो जना वेदमयं भगवन्तं सोममात्मानं वेदोक्तेन धर्मेणाऽऽराधयन्ति ।।११।। जपन्ति चैनं मन्त्रं, "ॐ स्वगोभिः शुक्लकृष्णपक्षयोः पितृदेवेभ्योऽन्न-सम्पादकः सोमो नो राजाऽस्तु तस्मात् सुरासमुद्राद् अष्टलक्षयोजनविस्तीर्णः, तावतैव विस्तीर्णेन घृतसमुद्रेण वेष्टितः कुशद्वीपोऽस्ति, तत्र तस्य तन्नामकः कुशस्तम्बः देवकृतोऽपरो ज्वलन इव स्वरोचिषा विराजयति ।।१३।। तस्य द्वीपस्याऽधिपतिः प्रियव्रतपुत्रो हिरण्यरेतास्तं कुशद्वीपं सप्तधा विभज्य स्वसुतेभ्यो वितीर्य स्वयमेकान्ते तपश्चचार ।।१४।। वर्षनाम्नां तत्पुत्राणां नामानि – यथा वसुः, वसुदानः, दृढरुचिः, नाभिगुप्तः, स्तुत्यव्रतः, विविक्तः, वामदेवश्चेति, तेषु वर्षेषु सीमापर्वता नद्यश्च सप्त सप्तैव सन्ति, ते च यथा पर्वताः चक्रः, चतुःशृङ्गः, कपिलः, चित्रकूटः, देवानीकः, ऊर्ध्वरोमा, द्रविणश्चेति ।।१५।। नद्यः– यथा रसकुल्या, मधुकुल्या, -

भगवन्तं जातवेदसरूपिणं कर्मकौशलेन यजन्ते ।।१६।। परस्य ब्रह्मणः साक्षाज्जात-वेदोऽसि हव्यवाट्। देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजेति ।।१७।। तथा बहिःक्रौञ्चद्वीपो द्विगुणः स्वसमानेन क्षीरोदेन परित उपक्लृप्तः वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्त्तक आस्ते ।।१८।। योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ।।१९।। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवतः परम-कल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम ।।२०।। आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिज्ञाताः। शुक्लो वर्द्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्वतोभद्र इति ।।२१।। अभयामृतौघा आर्यका तीर्थवती रूपवती पवित्रवती शुक्लेति यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं

।। सङ्ग्रहोक्तिः ।।

मित्रविन्दा, श्रुतविन्दा, देवगर्भा, घृतच्युता, मन्त्रमाला चेति, यासां नदीनां जलैर्विधूतमलाः तद्द्वीपवासिनः कुशलकोविदाऽभियुक्तकुलजनामानश्चत्वारो वर्णाः सन्ति ते चाऽग्नि-रूपिणमीश्वरमाराधयन्ति, जपन्ति चैनं मन्त्रम् ।।१६।। "ॐ" परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट्, देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यज इति।।१७।। तस्माद् घृतार्णवाद् बहिः षोडशलक्षयोजनः क्रौञ्चद्वीपस्तावतैव परिमाणविस्तृतेन क्षीरसागरेण वेष्टितोऽस्ति, तस्य द्वीपस्य नामकरः स क्रौञ्चपर्वतो विराजते ।।१८।। योऽसौ क्रौञ्चपर्वतः कार्तिकेयशस्त्राघातेन पीडितोऽपि क्षीरसमुद्रेण सिच्यमानस्तथा वरुणेन रक्षितः सन्निर्भयोऽभवत् ।।१९।। तत्राऽपि द्वीपस्याऽधिपतिः प्रियव्रततनयो घृतपृष्ठस्तं द्वीपं सप्तधा विभज्य स्वसुतेभ्यो दत्त्वा स्वयं श्रीहरेः शरणं ययौ ।।२०।। तेषां सप्तखण्डानां पुत्राणां च नामानि, आमः, मधुरुहः, मेघपृष्ठः सुधामा, भ्राजिष्ठः, वनस्पतिः, लोहितार्णश्चेति, तस्य सप्त सीमागिरयो यथा - शुक्लः, वर्धमानः, भोजनः, उपबर्हिणः, नन्दः, नन्दनः, सर्वतोभद्रश्चेति ।।२१।। तस्य द्वीपस्य सप्त

देवमपां पूर्णेनाञ्जलिना यजन्ते ।।२२।। आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवःसुवः।
ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ।।२३।। एवं परस्तात् क्षीरोदात्परित
उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परीतः
यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगन्धस्तं
द्वीपमनुवासयति ।।२४।। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य
सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान्पुरोजवमनोजवपवमानधूम्रानीक-
चित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्त-
पोवनं प्रविवेश ।।२५।। एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृङ्गो
बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति ।।२६।। अनघाऽऽयुर्दा
ऊभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति ।।२७।।

।। सङ्ग्रहोक्तिः ।।

महानद्यो यथा - अभया, अमृतौघा, आर्यका, तीर्थवती, रूपवती, पवित्रवती, शुक्ला चेति, यासां पवित्रममलं जलमुपयुञ्जनाः पुरुष -ऋषभ-द्रविण-देवक-नामानो वर्षपुरुषाश्चत्वारो वर्णाः सन्ति, ते च सदा देवं वरुणमपां पूर्णेनाऽञ्जलिना यजन्ति, जपन्ति चैनं मन्त्रम् ।।२२।। "ॐ आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवः सुवः, ता नः पुनीतामीवघ्नीः स्पृशतामात्मनाभुवः" इति ।।२३।। तस्मात् क्षीरसमुद्रात् परतो द्वात्रिंशल्लक्षयोजनविस्तृतः तावतैव परिमाणेन दधिसमुद्रेण वेष्टितः शाकद्वीपोऽस्ति, तस्य द्वीपस्य नामकरस्तत्र शाक नाम महीरुहोऽस्ति, यस्य महासुरभिगन्धस्तं द्वीपं सुरभी करोति ।।२४।। तस्याऽपि द्वीपस्याधिपतिः प्रियव्रतपुत्रो मेधातिथिस्तं द्वीपं सप्तधा विभज्य वर्षनामभ्यः स्वपुत्रेभ्य वितीर्य स्वयं भगवत्यनन्त आवेशितमतिः सन् तपसे वनं प्रविवेश, तेषां वर्षाणां पुत्राणां च नामानि यथा - पुरोजवः, मनोजवः, पवमानः, धूम्रानीकः, चित्ररेफः, बहुरूपः, विश्वधारश्चेति ।।२५।। तत्रापि वर्षमर्यादापर्वताः नद्यश्च सप्त सप्तैव सन्ति, तत्र गिरयः - ईशानः, उरुशृङ्गः, बलभद्रः, शतकेसरः, सहस्रस्रोतः, देवपालः, महानसश्चेति सप्त ।।२६।। नद्यः- अनघी, आयुर्दा, उभयसृष्टिः, अपराजिता, पंचपदी, सहस्रस्रुतिः, निजधृतिश्चेति सप्त ।।२७।।

तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायाम-विधूतरजस्तमसः परमसमाधिना यजन्ते ।।२८।। अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः। अन्तर्यामीश्वरः साक्षात्पातु नो सद्वशे इदम् ।।२९।। एवमेव दधिमण्डोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपक्लृप्तः समानेन स्वादुदकेन समुद्रेण बहिरावृतो यस्मिन्बृहत् पुष्करं ज्वलनशिखामलकनक-पत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम्। तद्द्वीपमध्ये मानसोत्तरो नामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात् सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ।।३०।। एतद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स्वयं पूर्वजवत् भगवत्कर्मशील एव आस्ते ।।३१।। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्मकेन कर्मणाऽऽराधयन्ति। इदं चोदाहरन्ति ।।३२।।

।। सङ्ग्रहोक्तिः ।।

तद्वर्षपुरुषा वर्णाश्च ऋतव्रत, सत्यव्रत, दानव्रतऽनुव्रतनामानश्चत्वारः सन्ति, ते प्राणायामविधूत-रजस्तमसो वायुरूपं परमात्मानं परमसमाधिनाऽराधयन्ति जपन्ति चैनं मंत्रम् ।।२८।। "अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः, अन्तर्यामीश्वरः साक्षात् नो यद्वश इदम्" इति ।।२९।। एवं दधिमण्डोदात् परतश्चतुःषष्टिलक्षयोजनविततस्तावतैव विस्तृतेन स्वादूदकेन समुद्रेण वेष्टितः पुष्करद्वीपोऽस्ति, तत्रैकं ज्वलनशिखामलकनकपत्रयुतं कमलं भगवतो ब्रह्मणोऽध्यासनं कल्पितमस्ति, तस्य द्वीपस्य मध्ये दशसहस्रयोजनोच्छ्रितो मानसोत्तरनामा अर्वाचीनपराचीन-वर्षयोर्मर्यादा पर्वतो विद्यते, तस्य चतुसृषु दिक्षु इन्द्रादीनां लोकपालां चत्वारि पुराणि सन्ति, तस्योपरि देवानामहोरात्राभ्यां सूर्यस्य संवत्सराख्यं रथचक्रं भ्रमति ।।३०।। तस्य द्वीपस्या-ऽधिपतिः प्रियव्रतपुत्रो वीतिहोत्रः, स स्वं द्वीपं द्विधा विभज्य रमणकधातकिनामभ्यां स्वपुत्राभ्यां दत्वा स्वपूर्वजवद् भगवदाराधने संलग्नो बभूव ।।३१।। तद्वर्षवासिनो जना ब्रह्मरूपिणं भगवन्तं भगवदुपासनयोगेनाऽऽराधयन्ति, इमं मन्त्रं जपन्ति च ।।३२।।

यत्तत्कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनोऽर्चयेत्। एकान्तमद्वयं शान्तं तस्मै भगवते नमः ।।३३।। ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः ।।३४।। यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यन्यादर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात् सर्वसत्त्वपरिहृतासीत् ।।३५।। लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यान्तर्वर्तिनाऽव-स्थाप्यते ।।३६।। स लोकत्रयान्ते परित ईश्वरेण विहितः यस्मात् सूर्यादीनां ध्रुवाप-वर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीँल्लोकानावितन्वाना न कदाचित्पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ।।३७।। एतावाँल्लोकविन्यासो मानलक्षण-संस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटिगुणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ।।३८।। तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाऽखिलजगद्गुरुणा-ऽधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोक-स्थितिहेतवः ।।३९।।

।। सङ्ग्रहोक्तिः ।।

"यत्तत् कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनोऽर्चयेत्, एकान्तमद्वयं शान्तं तस्मै भगवते नमः" ।।३३।। ततः शुद्धजलसमुद्रात् परस्तात् लोकालोकयोरन्तराले लोकालोकसंज्ञकः पर्वतोऽस्ति ।।३४।। मानसोत्तरमेर्वोरन्तराले सार्धसप्तलक्षोत्तरसार्धकोटियोजनपरिमिता (१५७५००००) आदर्शतलोपमा कांचनी भूमिरस्ति, यस्यां निहितः पदार्थो पुनर्न कथंचित् प्राप्यते, तस्मात् सा सर्वप्राणिरहिताऽस्ति ।।३५।। एकतो लोकमयः प्रदेशः अन्यतोऽलोकमयः प्रदेशोऽस्याऽस्ति, तयोरुभयोरन्तराले विद्यमानः पर्वतो "लोकालोक" इत्येव स्थाप्यते ।।३६।। लोकत्रयस्योपरि मर्यादास्वरूपः स साक्षादीश्वरेण निर्मितोऽस्ति, ध्रुवपदादप्युच्छ्रयत्वात् लोकालोकस्य परतः सूर्यादिज्योतिर्गणानां ज्योतींषि तत्र गन्तुं न शक्नुवन्ति ।।३७।। कृत्स्नभूमण्डलस्य मान-लक्षणसंस्थाभिः एतावान् पञ्चाशत्कोटियोजनपरिमितः कविभिः सम्यग् ज्ञातः, तस्य भूगोलस्य चतुर्थभागः सार्द्धद्वादशकोटियोजनात्मकः, तत्परिमितौन्नत्यायामवान् लोकालोकोऽस्ति ।।३८।। तस्योपरि चतुसृषु दिक्षु ब्रह्मणाऽधिनिवेशिताः ऋषभः, वामनः, अपराजितः पुष्कचूडश्चेति -

तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनोविशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्दोर्दण्डैः संधारयमाणस्तस्मिन् गिरिवरे समन्तात्सकललोकस्वस्तय आस्ते ।।४०।। आकल्पमेष एवं गतो भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथायेति ।।४१।। योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात्ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ।।४३।। मृतेऽण्ड एष एतस्मिन्यदभूत्ततो मार्त्तण्ड इति व्यपदेशः हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ।।४४।। सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा। स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ।।४५।। देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम्। सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ।।४६।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे विंशोऽध्यायः ।।२०।।

।। सङ्ग्रहोक्तिः ।।

लोकसंस्थितिहेतवश्चत्वारो दिग्गजाः सन्ति ।।३९।। तत्र लोकालोकपर्वते स्वविभूतीनां लोकपालानां विविधसामर्थ्याभिवृद्धये भगवान् महाविभूतिपतिः सर्वान्तर्यामी परममहापुरुषो वासुदेवो विश्वक्सेनादिभिः स्वपार्षदैर्युतः चक्रादिश्रेष्ठायुधधरै दोर्दण्डैर्विलसितः, विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्यादिसिद्धिसंयुतं संधार्यमाणः सन् विराजते ।।४०।। एवंविधं वेषं प्राप्तः सन् स्वयोगमायया विरचित विविधलोकस्य जीवनरक्षणाय लीलयैवंविधविग्रहवान् भगवान् समन्तादास्ते ।।४१।। एतेन लोकालोकपर्वतात् मेरुपर्यंतं सार्द्धद्वादशकोटिकथनेन लोकालोकात्परतो बृहत्कटाहपर्यन्तमलोकपरिमाणं कथितम्, ततः परस्ताद् योगेश्वराणां विशुद्धां गतिं कथयन्ति ।।४२।। सूर्योऽण्डमध्यगतोऽस्ति, स एव द्यावापृथिव्योर्मध्यस्थानम्, सूर्याण्डगोलयोर्मध्ये सर्वतः पञ्चविंशति कोटियोजनानि सन्ति ।।४३।। सूर्योऽण्डेऽचेतने सति तस्मिन् प्रविष्टः सन् मार्तण्डः इति स हिरण्याण्डात्समुद्भूतः अतो हिरण्यगर्भ इति कथ्यते ।।४४।।

अथ एकविंशोऽध्यायः ।।२१।।

श्रीशुक उवाच- एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्षणतो व्याख्यातः। एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति।।१।। यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणाऽन्तरिक्षं तदुभयसंधितम्।।२।। तन्मध्यगतो भगवांस्तपतां पतिस्तपन् आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवत-संज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमवस्थानेषु यथासवन-मभिपद्यमानो मकरादिषु राशिषु अहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते।।३।। यदा मेषतुलयोर्वर्त्तते तदाहोऽरात्राणि समानानि भवन्ति यदा वृषभादिषु पञ्चसु

।। सङ्ग्रहोक्तिः ।।

तेन सूर्येणैव हि दिशः खं, द्यौः, मही, स्वर्गापवर्गौ, नरकाः, अतलादीनि, सर्वशः विभज्यन्ते ।।४५।। देवाः, मनुष्याः, तिर्यञ्चः, सरीसृपाः, विरुधः इत्येषां सर्वेषां जीवनिकायानामात्मा दृगधिष्ठाता च सूर्य एवाऽस्ति।।४६।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्गहोक्त्यां विंशोऽध्यायः।।२०।।

अथ एकविंशोऽध्यायः ।।२१।।

सूर्यस्य राशिसञ्चारैर्लोकयात्रानिरूपणम्

श्रीशुक उवाच - भूमण्डलस्य संस्थानं लक्षणप्रमाणतः पञ्चाशतकोटियोजनपरिमितमेव व्याख्यातमस्ति, एतेन भूमण्डलपरिमाणेनैव दिवो मण्डलपरिमाणं तद्विदः कथयन्ति।।१।। यथा निष्वापादीनां द्वयोर्दलयोर्मध्य एकस्य परिमाणकथनेनाऽपरस्य दलस्य परिमाणं कथनं विनाऽपि बुद्ध्यते, तयोर्भूद्युमण्डलयोर्मध्य अन्तरिक्षलोकमुपदिशन्ति, तदन्तरिक्षमुभयतोऽध ऊर्ध्वं च संलग्नं दृष्टम्।।२।। तदन्तरिक्षमध्यगत भगवान् तपतां पतिः सूर्यः स्वप्रकाशेन त्रिलोकीं प्रकाशयति, स्वकान्त्याऽवभासयति च, स सूर्य उत्तरायणदक्षिणायन विषुवसंज्ञाभि-र्मान्द्यशैघ्र्यसमानाभिर्गतिभिरुच्चनीचसमस्थानेषु प्राप्तः सन् मकरादिराशिषु, अहोरात्राणि दीर्घह्रस्वमानानि च करोति।।३।। यदा सूर्यो मेषतुलयोर्वर्तते तदा दिनरात्रयः -

राशिषु चरति तदाऽहान्येव वर्द्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ।।४।। यदा वृश्चिकादिषु पञ्चसु वर्त्तते तदाऽहोरात्राणि विपर्ययाणि भवन्ति।।५।। यावद्दक्षिणायनमहानि वर्द्धन्ते यावदुदगयनं रात्रयः।।६।। एवं नव कोटय एकपञ्चाशल्लक्षाणि च योजनानां मानसोत्तरगिरिपरिवर्त्तनस्योपदिशति। तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नामोत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानि भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम्।।७।। तत्रत्यानां दिवसमध्यं गत एव सदाऽऽदित्यस्तपति सव्येनाचलं दक्षिणेन करोति।।८।। यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यन्देनाभितपति तस्य हैष समान-सूत्रनिपाते प्रस्वापयति। तत्र गतं न पश्यन्ति येऽस्तं समनुपश्येरन्।।९।। यदा चैन्द्र्याः पुर्य्याः प्रचलते पञ्चदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां

।। सङ्ग्रहोक्तिः।।

समाना भवन्ति, यदा च वृषभादिषु पञ्चराशिषु चरति तदा दिनानि वर्द्धन्ते, मासि मासि रात्रिष्वेकैका घटिका ह्रसति।।४।। यदा सूर्यो वृश्चिकादिषु पञ्चसु राशिषु चरति तदा - दिनानि ह्रस्वानि भवन्ति रात्रयश्च वर्द्धन्ते।।५।। सूर्यस्योत्तरायणे दिनानि दक्षिणायने रात्रयो वृद्धिं यान्ति।।६।।एवं मानसोत्तरपर्वते सूर्यप्रदक्षिणाप्रमाणं नव कोटय एकपञ्चाशल्लक्षयोजनानि विद्वांसः कथयन्ति, किं च मेरोः पूर्वतो मानसोत्तरपर्वते देवधानी नाम्नीन्द्रस्य पुरी विद्यते, तस्य दक्षिणे संयमनी नाम्नी यमपुरी, तस्य पश्चिमे निम्लोचनी वरुणपुरी, उत्तरे विभावरी कुबेरपुरी वर्तते, आसु पुरीषु सूर्यस्य क्रमेणोदयमध्याह्नास्तमयनिशीथानि भूतानां प्रवृत्तिनिवृत्ति-निमत्तानि समयविशेषेण भवन्ति।।७।। मेरौ स्थितानां जनानां तु सदैव मध्याह्नं भवति, नक्षत्राभिमुखतया सूर्यः स्वगत्या मेरुं वामतः कृत्वाऽपि ज्योतिश्चक्रवशात् प्रत्यहं दक्षिणतः करोति।।८।। स यात्रोदेति तस्य समसूत्रनिपातेऽस्तं याति, स यत्र मध्याह्नं करोति तस्य समसूत्रनिपातेऽर्धरात्रं विधत्ते।।९।। स सूर्यो यदेन्द्रपुर्याश्चलति पञ्चदश घटिकाभिः कोटिद्वयं सप्तत्रिंशल्लक्षाणि पञ्चसप्ततिसहस्राणि योजनानि (२,३७,७५०००) संयमनीं पुरीं -

सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति ।।१०।। एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनस्तथाऽन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रेण समभ्युद्यन्ति सहैव निम्लोचन्ति ।।११।। एवं मुहूर्त्तेन चतुस्त्रिंशत् लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्त्तते पुरीषु ।।१२।। यस्यैकं द्वादशारं षण्नेमि त्रिनाभि संवत्सरात्मकं समामनन्ति तस्याक्षो मेरोर्मूर्द्धनि कृतोत्तरभागो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ।।१३।। तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयन्त्राक्षवत् ध्रुवे कृतोपरिभागः ।।१४।। रथनीडस्तु षट्त्रिंशल्लक्षयोजनायामस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ।।१५।। पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ।।१६।। तथा वालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ।।१७।।

।। सङ्ग्रहोक्तिः ।।

याति ।।१०।। एवं ततो वारुणीं सौम्यां पुनरैन्द्रीं पुरीं च स याति, तथाचाऽन्ये चन्द्रादिग्रहा नक्षत्रैः सह ज्योतिश्चक्रे एवं सूर्यस्य रथो मुहूर्त्तेनाऽष्टशताधिकचतुस्त्रिंशल्लक्षयोजनानि (३४००८००) उपर्युक्तासु चतसृषु पुरीषु भ्रमति ।।१२।। तस्य सूर्यरथस्यैकं (संवत्सरात्मकं) चक्रं, द्वादशारं (द्वादशमासात्मकं) षण् (ऋतवः) नेमि त्रिणाभि (त्रीणि चातुर्मास्यानि नाभिर्यस्य) संवत्सरात्मकं कथयन्ति, तस्य रथस्याऽक्षो मेरोर्मूर्धनि कृतोत्तरभागः, मानसोत्तरे कृतेतरभागः, यत्र प्रोतं रविरथचक्रं तैलयन्त्रवत् मानसोत्तरगिरौ भ्रमति ।।१३।। तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्ष सार्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षयोजनसंमिलितस्तैलयंत्राक्षवत् ध्रुवे कृतोपरिभागो विद्यते ।।१४।। रथोपवेशनस्थानं तु षट्त्रिंशल्लक्षयोजनं दीर्घं नवलक्षयोजनं विशालमस्ति, सूर्यरथयुगश्च नवलक्षयोजनं विशालोऽस्ति, यत्रारुढेनारुणेन योजिताश्छन्दोनामानः सप्ताऽश्वाः सूर्यं वहन्ति ।।१५।। यस्मिन् रथे सूर्यस्य पुरस्तात् सूर्यस्याऽभिमुखं स्थितोऽरुणः सारथित्वं करोति ।।१६।। तथैवाऽङ्गुष्ठपर्वमात्रा वालखिल्या ऋषयः -

तथान्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्योयातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथक् नानानामानः पृथक्कर्मभिर्द्वन्द्वश उपासते ।।१८।। लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ।।१९।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे नाम एकविंशोऽध्यायः ।।२१।।

अथ द्वाविंशोऽध्यायः ।।२२।।

राजोवाच – यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णिममुष्य वयं कथमनुमीमहीति ।।१।। *स होवाच* – यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन

।। सङ्ग्रहोक्तिः ।।

षष्टिसहस्राणि पुरतः सूर्यं स्तुवन्ति ।।१७।। तथा अन्ये ऋषयः, गन्धर्वाः, अप्सरसः, नागाः, यक्षाः, राक्षसाः, देवाश्च एते सप्तगणाः, नाना नामानः सन्तः मासि मासि नानानामानसूर्यं पृथक् पृथक् कर्मभिरुपासते ।।१८।। एवमेकपञ्चाशल्लक्षाधिकनवकोटियोजन (९५१,००००००) विस्तृतस्य भूमण्डलस्य एकेन क्षणेन स सूर्यो द्विक्रोशाधिकद्विसहस्र-योजनानि (२००२) भुंक्ते ।।१९।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यामेकविंशोऽध्यायः ।।२१।।

अथ द्वाविंशोऽध्यायः ।।२२।।

सोमशुक्रादिस्थानं तद्गत्यनुसारेण मनुष्याणामिष्टानिष्टे च

राजोवाच – हे मुने! भवता यदेतद् भगवतः सूर्यस्य मेरुं ध्रुवं च परिक्रमतो राशीनां संमुखप्रदक्षिणं गमनं वर्णितं तद् वयं कथं जानीमहे ।।१।। *स होवाच* – हे राजन्! यथा भ्रमता कुलालचक्रेण सह भ्रमतां पिपीलिकादीनां गतिरन्यैव भवति, एवं कालचक्रेण सह

कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ।।२।। स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोपजोषमृतुगुणान् ।।३।। तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ।।४।। अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादश मासान् भुङ्क्ते राशिसंज्ञान्संवत्सरावयवान्मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयं समुपदिशन्ति यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ।।५।। अथ च यावतार्द्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते ।।६।। अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन सह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः समामनन्ति ।।७।।

।। सङ्ग्रहोक्तिः ।।

भ्रमतां सूर्यादिग्रहाणामपि गतिरन्यैव भवति, यतस्तेषां राश्यन्तरे नक्षत्रान्तरे च दृष्टत्वात् ।।२।। स एष वेदरूपो भगवान् सूर्य आत्मानं द्वादशधा विभज्य लोकानां हिताय षट्सु ऋतुषु शीतोष्णादीन् ऋतुगुणान् विदधाति, ।।३।। वर्णाश्रमाचारनियमेन वैदिकैरुच्चावचकर्मभिः त्रय्या विद्यया आम्नातैर्योगवितानैश्च श्रद्धया तं सूर्यं यजन्तो लोकाः श्रेयांसि लभन्ते ।।४।। लोकानामात्मा स एष सूर्यो द्यावापृथिव्योर्मध्यस्थकालचक्रगतः सन् मेषादिराशिसंज्ञान् द्वादशमासान् भुंक्ते, तत्र चान्द्रमानेन पक्षद्वयं मासो भवति, सपादनक्षत्रद्वयं सौरमानेन मासः स्यात्, पितृमानेनाऽहोरात्रं मासो भवति, सूर्यो यावता कालेन राशिद्वयं भुंक्ते स ऋतुर्ज्ञेयः ।।५।। अथ च यावता कालेनाऽर्द्धं नभोमण्डलं प्रचरति तं कालमयनं कथयन्ति ।।६।। सूर्यः यावता कालेन मान्द्यशैघ्र्यसमगतिभिर्निखिलं नभोमण्डलं प्रचरति तं कालं संवत्सरं, परिवत्सरम्, इडावत्सरम्, अनुवत्सरं, वत्सरं च समामनन्ति ।।७।।

एवं चन्द्रमा अर्कगभस्ति उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमुग्रचारी द्रुततरगमनो भुङ्क्ते।।८।। अथ चापूर्य्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्च एकमेकं नक्षत्रं त्रिंशता मुहूर्त्तैर्भुङ्क्ते।।९।। य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवर्षिपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति।।१०।। तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः।।११।। तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदाऽनुकूल एव प्रायेण वर्षं चारेणानुमीयते स वृष्टिविष्टम्भग्रहोपशमनः। उशनसा बुधो व्याख्यातः ।।१२।। तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रायाऽनावृष्ट्यादिभयमाशंसते।।१३।।

।। सङ्ग्रहोक्तिः।।

सूर्योस्योपरि लक्षयोजनान्ते चन्द्रो विराजते, शीघ्रगामी चन्द्रः सूर्यस्य संवत्सरभोगं पक्षाभ्यां, मासभोगं सपादनक्षत्राभ्यां पक्षभोगं दिनेनैव भुंक्ते।।८।।एवं पूर्यमाणाभिः कलाभिः शुक्लपक्षे देवानां, क्षीयमाणाभिः कलाभिः कृष्णपक्षे पितृणामहोरात्राणि कुर्वन् षष्टिघटिकाभिः प्रत्येकं नक्षत्रं भुनक्ति।।९।। स एष षोडशकलायुक्तः पुरुषो चन्द्रशरीरको भगवान् चन्द्रोऽन्नमयोऽमृतमयो मनोमयो देवर्षिपितृमनुष्यपशुपक्षिप्रभृतीनां रक्षणशीलत्वात् सर्वमयः कथ्यते।।१०।। तस्य त्रिलक्षयोजनोपरि अभिजिता सहाष्टाविंशतिः नक्षत्राणि कालचक्र ईश्वरेण योजितानि मेरुं दक्षिणेनैव प्रचरन्ति।।११।। तत उपरिष्टात् द्विलक्षयोजनोपरि शुक्रस्य स्थितिरस्ति, स शुक्रः सूर्यस्याऽग्रे पश्चात् सहैव वा शैघ्र्यमान्द्यसाम्याभिर्गतिभिश्चरति, स लोकानां नित्यमनुकूलः यस्य गत्या वृष्टिरनुमीयते, शुक्रो वृष्टिरोधकं ग्रहमुपशमयति, बुधोऽपि शुक्रवदेव चरति।।१२।। तस्योपरि द्विलक्षयोजनमुच्छ्रितो बुधोऽस्ति, प्रायेण लोकानां शुभकृत् स बुधः सूर्यस्याऽग्रे

अत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्त्तते प्रायेणाशुभग्रहोऽघशंसः।।१४।। तत उपरिष्टाद्द्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिरेकैकस्मिन्राशौ परिवसरं परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्मणकुलस्य।।१५।। तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चरः एकैकस्मिन् राशौ त्रिंशत्त्रिंशन्मासान् विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः।।१६।। तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमन्ति।।१७।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वाविंशोऽध्याय।।२२।।

।। सङ्ग्रहोक्तिः ।।

पश्चात सहैव वा संचरति, यदा स सूर्याद् वियुज्येत् तदाऽनावृष्ट्यादिभयं जनयति।।१३।। तस्य द्विलक्षयोजनोपरि मङ्गलोऽस्ति, प्रायः स लोकानां दुःखदः पापग्रहः कथ्यते।।१४।। तस्य द्विलक्षयोजनोपरि भगवान् बृहस्पतिः प्रायः ब्राह्मणानामनुकूलो भवति, यदि स वक्रो न स्यात् तदैकस्मिन् राशौ संवत्सरं संवत्सरं यावच्चरति।।१५।।तस्य द्विलक्षयोजनोपरि विद्यमानः शनैश्चर एकैकस्मिन् राशौ त्रींस्त्रीन् मासान् विलम्बमानः सन्ननुक्रमेण चरति, बहुधा स सर्वेषामशान्तिकरो ग्रहोऽस्ति।।१६।।ततः शनैश्चरमण्डलात् उत्तरस्मात् एकादशलक्षयोजनान्तरे सप्तर्षय उपलभ्यन्ते, ते सर्वे लोकानां शुभमिच्छन्तो भगवतो विष्णोः परं पदं ध्रुवमण्डलं प्रदक्षिणीकुर्वन्ति।।१७।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां द्वाविंशोऽध्याय।।२२।।

अथ त्रयोविंशोऽध्यायः ।।२३।।

श्रीशुक उवाच – अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविना-माजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ।।१।। स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरि-वावष्टम्भ ईश्वरेण विहितः शश्वदवभासते ।।२।। यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति। एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्म्मसारथयः परिवर्त्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्म्मितगतयो भुवि न पतन्ति ।।३।। केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य

।। सङ्ग्रहोक्तिः ।।

अथ त्रयोविंशोऽध्यायः ।।२३।।

ज्योतिश्चक्राश्रयं ध्रुवस्थानं शिशुमारस्वरूपेण विष्णोः स्थितिश्च

श्रीशुक उवाच – अथ तस्मात् सप्तर्षिमण्डलात् त्रयोदशलक्षयोजनान्तरे विष्णोः परं पदमभि-वदन्ति, यत्र महाभागवत उत्तानपादपुत्रो ध्रुवोऽग्नीन्द्रकश्यपधर्मादिभिः समकालयुग्भिः स बहुमानं प्रदक्षिणीक्रियते, तस्य प्रभावः पूर्वमुक्तः ।।१।। अव्यक्तवेगेन कालेन भ्राम्यमाणानां सर्वेषां ग्रहनक्षत्राणां ज्योतिर्गणानां मध्ये स्थाणुरिवेश्वरेण विहितोऽवष्टम्भः शश्वदवभासते ।।२।। मेढीस्तम्भे (खलमध्येऽवष्टम्भस्थाणौ) बद्धा धान्याक्रमणप्रयोजना बलीवर्दा इव सर्वे ग्रहनक्षत्रादय कालचक्र आयोजिता सवनैर्यथास्थानं मण्डलानि चरन्ति, नभसि यथा वायुना प्रेर्यमाणा मेघाः श्येनादयः पक्षिणो यथा भुवि न पतन्ति तथा ते ज्योतिर्गणाः प्रकृतिपुरुषसंयोगा-नुगृहीताः कर्मनिर्मितगतयः सन्त आकल्पान्तं नभसि ध्रुवमेवावलम्ब्य परिक्रामन्ति भुवि न पतन्ति ।।३।। केचित् एतज्जोर्तिवृन्दं शिशुमारसंस्थानेन भगवतो वासुदेवस्य –

योगधारणायामनुवर्णयन्ति ।।४।। यस्य पुच्छाग्रेऽवाक्शिरसि कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः। तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः। तस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति। दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसंनिवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः।।५।। पुनर्वसुपुष्पौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोः अभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथा-संख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोः धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत। तथैव मृगशीर्षादी-न्युदगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषग्ज्येष्ठे स्कन्धयो-र्दक्षिणवामयोर्न्यसेत् ।।६।। उत्तराहनावगस्तिरधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना-स्तनयोरश्विनौ बुधः प्राणापानयो

।। सङ्ग्रहोक्तिः ।।

योगधारणायामनुवर्णयन्ति ।।४।। कुण्डलीभूतदेहस्याऽवाक्शिरसो यस्य शिशुमारस्य पुच्छाग्रे ध्रुव उपकल्पितः, तस्य पुच्छाग्रादधोभागे प्रजापतिः, अग्निः, इन्द्रः धर्मश्च पुच्छमूले धाता, विधाता, कट्यां सप्तर्षयः, दक्षिणपार्श्वभागेऽभिजिदादिचतुर्दशनक्षत्राणि, वामपार्श्वभागेऽपि पुष्यादिचतुर्दशनक्षत्राणि, पृष्ठे त्वजवीथी, उदरे चाकाशगङ्गा विद्यते ।।५।। यस्य दक्षिणवामयोः कटिप्रदेशयोः पुनर्वसु पुष्यौ, दक्षिणवामयोश्चरणयोरार्द्राऽश्लेषे, दक्षिणवामयोर्नासिकयो-रभिजिदुत्तराषाढे नक्षत्रे, दक्षिणवामयोर्नेत्रयोः श्रवणपूर्वाषाढे, दक्षिणवामयोः श्रोत्रयोर्धनिष्ठामूले, वामपार्श्वस्थिषु मघादीन्यष्टौ नक्षत्राणि, दक्षिणपार्श्वास्थिषु मृगशीर्षात् पूर्वाणि पूर्वभाद्रपदान्ता-न्यष्टौ नक्षत्राणि सन्ति ।।६।। तस्योत्तरहनावगस्तिः, अधरहनौ नक्षत्ररूपधारी यमः, मुखे भौमः, उपस्थे शनिः, ककुदि बृहस्पतिः, वक्षसि सूर्यः, हृदये नारायणः, मनसि चन्द्रमाः नाभौ शुक्रः, स्तनयोरश्विनीकुमारौ, प्राणापानयोर्बुधः, कण्ठे राहुः, सर्वाङ्गेषु केतुः, रोमसु सर्वे

राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥७॥ एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाणः उपतिष्ठेत। नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥८॥ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकालम्। नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे त्रयोविंशोऽध्यायः॥२३॥

अथ चतुर्विंशोऽध्यायः॥२४॥

श्रीशुक उवाच - अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके। योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः॥१॥ यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य

॥ सङ्ग्रहोक्तिः॥

तारागणाः सन्ति॥७॥ भगवतः सर्वदेवतामयमेदद्रूपं प्रतिदिनं मौनी सन् सन्ध्यायामवलोकयन्नुपतिष्ठेत, एनं मन्त्रं चोच्चारयेत् - ॐ नमोज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषाय धीमहि, इति॥८॥ ग्रहर्क्षतारामयमाधिदैविकमेनं शिशुमारस्वरूपं भगवन्तं त्रिकालं नमस्यतः स्मरणं वा कुर्वतः पुरुषस्य तात्कालिकं पापं द्रुतं विनश्यति॥९॥

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां त्रयोविंशोऽध्यायः॥२३॥

अथ चतुर्विंशोऽध्यायः ॥२४॥

सूर्यादधोराह्वादिस्थितिः, अतलादिबिलस्वर्गमर्यादाश्च

श्रीशुक उवाच - सूर्यादधस्तात् राहुरयुतयोजनं नक्षत्रवत् संचरति, असौ राहुर्भगवदनुग्रहादमरत्वं ग्रहत्वं च लेभे, तस्यासुरापसदस्य जन्मकर्माणि चाग्रे वक्ष्यामः॥१॥ सूर्यस्य मण्डलं दशसहस्रयोजनं, चन्द्रमसो द्वादशसहस्रयोजनं राहोश्च मण्डलं -

त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्य्याचन्द्रमसावभिधावति ।।२।। तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहेण मुहुः परिवर्त्तमानमभ्यवस्थितो मुहूर्त्तमुद्विजमानश्चकितहृदय आरादेव निवर्त्तते तदुपरागमिति वदन्ति लोकाः।।३।। ततोऽधस्तात्सिद्धचारण-विद्याधराणां सदनानि तावन्मात्र एव।।४।। ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यन्ते।।५।। ततोऽधस्ताच्छत-योजनान्तर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्त्रिप्रवरा उत्पतन्तीति ।।६।। उपवर्णितं भूमेर्यथासंनिवेशावस्थानम्। अवनेरप्यधस्तात्सप्त भूविवराः एकैकशो योजनायुतान्तरेणायामविस्तारेणोपक्लृप्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति।।७।। एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिक-कामभोगैश्वर्य्यानन्दविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्य-

---

।। सङ्ग्रहोक्तिः ।।

त्रयोदशसहस्रयोजनं विततमस्ति, स राहुर्यदा यदा पर्वणि पूर्ववैरमनुस्मृत्य सूर्याचन्द्रमसौ प्रति धावति।।२।। तदा तदा सूर्यचन्द्रयोः रक्षणाय भगवता नारायणेन नियुक्तं दयितमस्त्रं सुदर्शनं तं प्रति धावति, दुर्विषहेण तत्तेजसोद्विजमानो मुहूर्तं सन्मुखमवस्थितः सन्नपि राहुः दूरादेव निवर्तते, लोकास्तद् ग्रहणं वदन्ति।।३।। राहोर्दशसहस्रयोजनादधः सिद्धचारणविद्या-धराणां सदनानि सन्ति।।४।। तस्याऽधस्ताद् यक्षरक्षःपिशाचप्रेतभूतगणानां क्रीडाक्षेत्रमन्तरिक्षं विद्यते, यावन् मेघा उपलभ्यन्ते तावत् तीव्रो वायुर्वाति।।५।। तस्माच्छतयोजनादधस्तादियं पृथ्वी वर्तते, तस्योपरि यावद्धंसश्येनादिपक्षिणो यान्ति तावत्पर्यन्तं भूर्लोक एव ज्ञेयः।।६।। पृथिव्या रचनाप्रकारः प्रागेव कथितः, अस्याः पृथिव्या अधः सप्त भूविवराणि सन्ति, तानि चैकैकशो दशसहस्रयोजनान्तरेणाऽऽयामविस्तारेण निर्मितानि सन्ति, तेषा नामानि यथा - अतलं, वितलं, सुतलं, तलातलं, महातलं, रसातलं पातालं चेति।।७।। एतेषु सप्तसु बिलस्वर्गेषु स्वर्गादप्याधिककामभोगैश्वर्यानन्दविभूतिभिः सुसमृद्धगृहोद्यानारामाक्रीडविहारेषु

बन्धुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसन्ति ।।८।। येषु महाराज मयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुक-सारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासति ।।९।। उद्यानानि चातितरां मनइन्द्रियानन्दिभिः कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनां लताङ्गालिङ्गितानां श्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानां झषकुलोल्लङ्घनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्त्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिन्द्रियोत्सवैरमरलोकश्रियमतिशयितानि ।।१०।। यत्र ह वा व न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ।।११।। यत्र महाहिप्रवरशिरोमणयः सर्वं तमः प्रबाधन्ते ।।१२।। न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोवस्थाश्च भवन्ति ।।१३।। न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना-

---

।। सङ्ग्रहोक्तिः ।।

दैत्यदानवनागा नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचराः ईश्वरादप्यप्रतिहत कामा मायाविनोदाः सन्तो निवसन्ति ।।८।। तेषु विवरेषु मायाविना मयेन विनिर्मिता विचित्रभवन-प्राकार-गोपुर-सभा-चत्त्वर-चैत्यायतनादिभिःनागासरमिथुन-पारावत-शुक-सारिकाकीर्णकृत्रिम-भूमिभिर्विश्वेश्वरगृहोत्तमैः समलंकृता नगर्यश्चकासति ।।९।। तथा येषूद्यानानि कुसुम-फल-स्तबक-किसलयावनतविटपविटपिनां लताङ्गालिङ्गितानां शोभाभिः तथा निर्मलजलपूर्णानां समिथुनविविधविहङ्गमयुतानां जलाशयानां शोभाभिश्च, देवलोकशोभाया अप्यतिशयानि वर्तन्ते ।।१०।। तत्र सूर्यादिनामभावाद् अहोरात्रादिभिः कालविभागैर्जायमानं कालभयं नैव भवति ।।११।। यत्र महासर्पशिरःसु स्थिता मणयो निखिलं तमो नाशयन्ति ।।१२।। एतेषु निवसतां दिव्यौषधिरसरसायनाऽन्नपानस्नानादिभिराधिव्याधिवलीपलितजरादयः, देहवैवर्ण्य-दौर्गन्ध्य-स्वेद-क्लम-ग्लान्यादयो वयोऽवस्थाश्च नैव भवन्ति ।।१३।।

भगवत्तेजसश्चक्रापदेशात् ।।१४।। यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ।।१५।। अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयन्ति। यस्य च जृम्भमाणस्य मुखतस्त्रयस्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्य इति। या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुराग-स्मितसंलापोपगूहनादिभिः स्वैरं किल रमयन्ति। यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमिति अयुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदान्ध इव ।।१६।। ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापति-सर्गोपबृंहणाय भवान्या सह मिथुनीभूयास्ते। यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्य्येण यत्र चित्रभानुर्मातरिश्वना समिद्ध्यमान ओजसा पिबति। तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषा सह पुरुषीभिर्धारयन्ति ।।१७।।

।। सङ्ग्रहोक्तिः ।।

भगवत्तेजसः सुदर्शनचक्राद्विना निर्दुःखानां बिलस्थानां कुतश्चन मृत्युर्न प्रभवति ।।१४।। तत्र सुदर्शन चक्रे प्रविष्टे सति, तस्य भयादेवासुरसुन्दरीणां गर्भाः स्रवन्ति ।।१५।। अथाऽतले मयपुत्रो बलोनामाऽसुरो निवसति, येन बलेनाऽस्मिँल्लोके षण्णवतिसंख्याका माया विनिर्मिताः, तासां मध्ये काश्चन माया (कपटविद्याः) अद्यापि मायाविनो धारयन्ति, यस्य जृम्भमाणस्य बलस्य मुखात् त्रयः स्त्रीगणाः जाताः, स्वैरिण्यः (स्ववर्णेरताः), कामिन्यः (असवर्णेऽप्यासक्ताः) पुंश्चल्यः (अत्याधिकचञ्चलाः) ताः स्त्रियो बिले प्रविष्टं पुरुषं हाटकाख्यं रसं पाययित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं रमन्ते रमयन्ति च, तस्मिन् हाटकरसे पीते सति पुमान् दशसहस्रबलः सन् "ईश्वरोऽहं, सिद्धोऽहं" इति मन्यमानो मदान्ध इव विकत्थते ।।१६।। तस्मादधस्ताद् दशसहस्रयोजनदूरे वितले स्वगणैर्वृतः भगवान् हाटकेश्वरः शिव प्रजापतिसर्गोपबृंहणाय भवान्या सह मिथुनीभूयाऽऽस्ते, तयोः शिवपार्वत्योर्वीर्यतो निःसृता हाटकी नदी वर्तते, तत्र वायुना समुद्दीपितोऽग्निस्तस्या रेतोभूतं जलं पिबति, तदेव जलं पुनस्तत्त्यक्तं सत् हाटकं सुवर्णं भवति, तस्य आभूषणान्यसुरेन्द्राणामन्तःपुरेषु पुरुषैः

ततोऽधस्तात् सुतल उदारश्रवाः पुण्यश्लोको महाभागवतो विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा बटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः स्वधर्म्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ।।१८।। नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्य्यम् ।।१९।। यस्य ह वा व क्षुत्पतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबन्धनमञ्जसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभन्ते ।।२०।। तद्भागवतानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतमे च ।।२१।। न वै भगवन्नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ।।२२।। यत्तद्भगवतानधिगतान्योपायेन याञ्चाछलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च -

---

।। सङ्ग्रहोक्तिः ।।

सह स्त्रियो धारयन्ति ।।१७।। तस्माद् वितलादधः सुतले उदारश्रवाः पुण्यश्लोको विरोचनतनयो बलिरिन्द्रस्य प्रियकारिणा वामनेन हृतलोकत्रयोऽपि भगवदनुकम्पया शक्रादीनामपि सुदुर्लभया सुसमृद्धसम्पत्त्या सेवितोऽधुनाऽपि स्वधर्मानुसारं भगवन्तमाराधयन् निवसति ।।१८।। एतस्मिन् सुतले लोके बलेर्यदैश्वर्यं तद् सकलभूतजीवानामन्तरात्मनि तीर्थतमे परमात्मनि वासुदेवे सत्पात्रे उपपन्ने सति परमादरसमाहितमनसा श्रद्धया संप्रतिपादितस्य साक्षादपवर्गद्वारस्य भूमिदानस्य फलं न भवति ।।१९।। क्षुत्पतनस्खलनादिषु विवशः सन्नपि पुमान् यस्य हरेर्नाम सकृदपि उच्चारयन् कर्मबन्धं छिनत्ति ।।२०।। परमभागवतानां ज्ञानिनामन्तरात्मनि भगवतीश्वरार्पणबुद्ध्या कृतस्य भूदानस्यैतत् फलं कुतः सम्भवति ।।२१।। एवं कृतेऽपि भगवान् अमुं बलिं नाऽनुगृहीतवान्, यतः स तस्मै भगवत्स्मृतिरोधकमिन्द्रपदैश्वर्यमेव ददौ ।।२२।। अप्राप्तान्योपायेन भगवता याञ्चाछलेन हृतसर्वस्वो वरुणपाशैर्बद्धः सुतले निक्षिप्तोऽपि -

संप्रतिमुक्तो गिरिदर्य्यां चापविद्ध इति होवाच ।।२३।। नूनं बताऽयं भगवानर्थेषु न निष्णातो योऽसाविन्द्रो यस्य सचिवो मन्त्राय एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेणात्मानमयाचत आत्मनश्चाशिषो नो एव तद्दास्यं अतिगभीररंहसः कालस्य मन्वन्तरपरिवृतं कियल्लोकत्रयमिदम् ।।२४।। यस्यानुदास्यमेवाऽस्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ।।२५।। तस्य महानुभावस्यानुपथममृजितकषायः को वाऽस्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ।।२६।। अथ यस्यानुचरितमुपरिष्टाद्वि-स्तरिष्यते यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो येनाङ्गुष्ठेन पदा दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः ।।२७।। ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ।।२८।। ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः -

---

।। सङ्ग्रहोक्तिः ।।

बलिरुवाच ।।२३।। बृहस्पतिसहायोऽपीन्द्रः पुरुषार्थे पटुर्नास्ति, यतो बृहस्पतिमपृष्ट्वा स वामनद्वारेण मां लोकत्रयमयाचत, मन्वन्तरसमाप्तौ कालेन नश्वरमिदं लोकत्रयं कियदस्ति? ।।२४।। भगवता स्वपितरि हते सत्यस्मत्पितामहः प्रह्लादः स्वपित्र्यं राज्यं परित्यज्य हरेर्दास्यमेवाऽऽचकांक्ष ।।२५।। रागद्वेषादियुक्तो भगवदनुग्रहरहितोऽस्मद्विधः कः पुमान् तस्य प्रह्लादस्य मार्गं गन्तुं शक्नोति ।।२६।। तस्य बलेश्चरितमष्टमस्कन्धे विस्तरेण वक्ष्यामि, यस्य बलेर्द्वारि स्वयमखिलजगद्गुरुर्निजजनानुकम्पितहृदयो गदापाणिर्भगवान् नारायणो विराजते, येन नारायणेन द्वारि प्रविशन् दशकन्धरो रावणः दिग्विजयसमये पादाङ्गुष्ठेन दशकोटियोजनदूर-मुच्चाटितोऽभूत् ।।२७।। ततोऽधस्तात् तलातले दशसहस्रयोजनदूरे मायाविनामाचार्यस्त्रि-पुराधिपो महादेवेन रक्षित अत एव विगतसुदर्शनभयो मयोनाम दानवेन्द्रो निवसति ।।२८।। तस्मात् तलातलादधस्तान्महातले काद्रवेयाणां सर्पाणां क्रोधवशो नाम गणो वसति, कुहक-

कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवन्तः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित्प्रमत्ता विहरन्ति ।।२९।। ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसन्ति ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद्बिभ्यति ।।३०।। ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनंजयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति। तेषामु ह वै पञ्चसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ।।३१।।

इति श्रीमद्भागवते पञ्चमस्कन्धे चतुर्विंशोऽध्यायः ।।२४।।

।। सङ्ग्रहोक्तिः ।।

तक्षककालिय प्रधनास्ते सर्पा गरुडाद् भीताः क्वचित् प्रमत्ताः सन्तः स्त्रीपुत्रादिभिः सह स्वैरं विहरन्ति ।।२९।। तस्मान्महातलादधो रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया, विबुधप्रत्यनीका, उत्पत्या महौजसो, महासाहसिका भगवतो हरेरेव तेजसा प्रतिहतबलावलेपास्ते निवसन्ति, ते च सरमानामिकयोन्द्रदूत्योच्चारिताभिर्मन्त्रवर्णाभिर्वाग्भिरिन्द्राद् बिभ्यति ।।३०।। तस्माद् रसातलादधस्तात् पाताले महाभोगिनो महामर्षा वासुकिप्रमुखाः शङ्ख-कुलिक-महाशङ्ख-श्वेत-धनञ्जय-धृतराष्ट्रादयो नागलोकपतयो निवसन्ति, तेषां नागानां पंच-सप्त-दश-शत-सहस्रशीर्षाणां फणासु स्थिता रोचिष्णवो मणयः पातालस्यान्धकारं दूरीकुर्वन्ति ।।३१।।

इति श्रीमद्भागवते पञ्चमस्कमस्कन्धे सङ्ग्रहोक्त्यां चतर्विंशोऽध्यायः ।।२४।।

अथ पञ्चविंशोऽध्यायः ।।२५।।

श्रीशुक उवाच – तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्यातानन्त इति सात्त्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं संकर्षणं इत्याचक्षते ।।१।। यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ।।२।। यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरन्तरेण संकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ।।३।। यस्याङ्घ्रिकमलयुगलारुणविशदनखमणिषण्डमण्डलेष्वहिपतयः सह सात्त्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः स्ववदनानि परिस्फुरत्कुण्डलप्रभामण्डलमण्डितगण्डस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयन्ति ।।४।। यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वङ्गदवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तम्भेष्वगुरुचन्दनकुङ्कुमपङ्कानुलेपेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविन्दं–

अथ पञ्चविंशोऽध्यायः ।।२५।।

संकर्षणदेवस्य संस्थितिस्तदीयं स्तवनं च

श्रीशुक उवाच – हे राजन्! तस्य पातालस्य मूलप्रदेशे त्रिंशत् सहस्रयोजनदूरे तामसाहंकाराधिष्ठात्री या भगवतः कलामूर्त्तिरास्ते, तां सात्वतीयाः पञ्चरात्रनिष्ठाः संकर्षणम् इत्याचक्षते ।।१।। यस्य भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन् शीर्षणि ध्रियमाणमिदं भूमण्डलं सर्षप इव दृश्यते ।।२।। कालेनेदं जगत् संजिहीर्षतः संकर्षणस्य भ्रूमध्यतः संकर्षणोनाम रुद्र एकादशव्यूहस्त्रिनेत्रस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ।।३।। सात्वतर्षभैः सह एकान्तभक्तियोगेन प्रणमन्तो नागराजाः यस्याऽङ्घ्रिसरोजयुगलारुणविशदनखमणिमण्डलेषु परिस्फुरत्कुण्डलप्रभामण्डलमण्डितगण्डस्थलानि स्ववदनानि विलोकयन्ति ।।४।। नागराजकुमार्य आशिषः कामयमाना अनन्तस्य चार्वङ्गदवलयरुचिरभुजेष्वगरुचन्दनकुङ्कुमानुलेपनं कुर्वाणाः

सव्रीडं किल विलोकयन्ति ।।५।। स एष भगवाननन्तोऽनन्तगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ।।६।। ध्यायमानः सुरासुरोरग-सिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुख-रिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोद-मध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान्माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति ।।७।। य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादि-कालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थिं सत्त्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावं स्वायंभुवो नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ।।८।। उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयासन् ।यद्रूपं ध्रुवमु कृतं यदेकमात्मन्नानाऽधात्कथमु ह वेद तस्य वर्त्म ।।९।। मूर्त्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र। यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ।।१०।।

।। सङ्ग्रहोक्तिः ।।

तत्स्पर्शोन्मथितहृदयरुचिरस्मिताः सत्यः मदविघूर्णितारुणनयनारविन्दं सव्रीडं विलोकयन्ति ।।५।। अनन्तगुणसागरः स भगवाननन्त उपसंहृतामर्षरोषवेगः सन् लोकानां कल्याणाय तत्र विराजते ।।६।। स भगवाननन्तो देव-दैत्य-उरग-सिद्ध-गन्धर्वादिभिर्ध्यायमान एककुण्डलो नीलवासा नवतुलसिकामोदमधुरसेन च माद्यन् मधुकराणां मधुरगीतेन शोभितां वैजयन्तीं मालां धारयति ।।७।। य एष एवमनुश्रुतः स ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथित-मविद्यामयं हृदयग्रन्थिं सत्त्वरजस्तमोमयं संसारं चान्तर्हृदयं गतः सन् शीघ्रं निर्भिनत्ति तस्याऽ-नुभावान् तुम्बुरुणा सह स्वयंभूतनयो नारदो देवसभायां जगौ ।।८।। अस्य जगत उत्पत्तिस्थिति-लयहेतवः सत्त्वाद्याः प्रकृतिगुणा यस्य भगवतः सिसृक्षात्मिकया दृष्ट्या सृष्ट्यादिसमर्था बभूवुः, यस्यैकं रूपं सिसृक्षानन्तरं नाना कृतम्, तस्य भगवतो मार्गं को वेद ।।९।। इदं कार्यकारणात्मकं जगद्यस्मिन् भाति, स एव भगवाननन्तोऽस्माकमुपरि कृपां कृत्वा विशुद्धां

यन्नाम श्रुतमनुकीर्त्तयेदकस्मादार्त्तो वा यदि पतितः प्रलम्भनाद्वा। हन्त्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः।।११।। मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् । आनन्त्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः।।१२।। एवं प्रभावो भगवाननन्तो दुरन्तवीर्योरुगुणानुभावः। मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्त्ति ।।१३।। एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्म विनिर्मिताः यथोपदेशमनुवर्णिताः कामान् कामयमानैः।।१४।। एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याख्याताः किमन्यत्कथयाम इति ।।१५।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चविंशोऽध्यायः।।२५।।

।। सङ्ग्रहोक्तिः ।।

सत्त्वमूर्त्तिं दधार।।१०।। कश्चिद् रोगाद्यार्तः पतितो वा यस्याऽनन्तस्य नाम कीर्त्तयेत् शृणुयाद्वा परिहासाद्वा कीर्त्तयेत्, स सद्यः पापात् प्रमुच्यते, तस्मात् शेषादन्यं कं शरणं मुमुक्षुर्गच्छेत्।।११।। गिरिसरित्सागरसत्त्वसहितं भूगोलमिदं सहस्रशिरसोऽनन्तस्य यस्य मूर्द्धनि अणुवद् वर्तते, तस्याऽमितपराक्रमस्य वीर्याणि सहस्रजिह्वोऽपि कश्चित् पुरुषः किं गणयितुं शक्नुयात्?।।१२।। एवंप्रभावो दुरन्तवीर्यो भगवाननन्तो भूमेर्मूले स्थितः सन् जगतः स्थितये क्ष्मां लीलया बिभर्त्ति ।।१३।। हे महाराज! इह संसारे सकामैः पुंभिः कृतैः कर्मभिनिर्मिता गतयो यथोपदेशमुपवर्णिताः।।१४।। हे राजन्! जीवस्य प्रवृत्तिरूपस्य धर्मस्य फलरूपा गतय उच्चावचा विसदृशाः एतावत्यो मया यथाप्रश्नं व्याख्याताः, अतः परमन्यत् किं कथयामः।।१५।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां पञ्चविंशोऽध्यायः।।२५।।

अथ षड्विंशोऽध्यायः ।।२६।।

राजोवाच - महर्षे एतद्वैचित्र्यं जीवलोकस्य कथमिति ।।१।। *ऋषिरुवाच* - त्रिगुणत्वात्कर्त्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ।।२।। अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्त्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति या ह्यनाद्यविद्याकृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ।।३।। *राजोवाच* - नरका नाम भगवन्किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ।।४।। *ऋषिरुवाच* - अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्या-मग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ।।५।। यत्र ह भगवान्पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुलङ्घितभगवच्छासनः सगणो दमं धारयति ।।६।।

।। सङ्ग्रहोक्तिः ।।

अथ षड्विंशोऽध्यायः ।।२६।।

नारकाणां स्थितिः पापिनां यातनावर्णनं च

राजोवाच - हे महर्षे! एषूक्तेषु लोकेषु वर्त्तमानस्य जीवस्य सुखदुःखयोर्न्यूनाधिकभावलक्षणं वैचित्र्यं कथम्? ।।१।। *ऋषिरुवाच* - हे राजन्! सर्वे कर्तारस्त्रिगुणात्मका भवन्ति, तेषां श्रद्धया विभिन्नाः कर्मगतयः श्रद्धातारतम्येनैव जायन्ते ।।२।। अथेदानीं प्रतिषिद्धलक्षणस्य अधर्मस्याऽऽचरणात् श्रद्धायास्तारतम्यात् कर्मफलं दुःखरूपं भवति, अत एव अविद्याकृत-कामपरिणामलक्षणाः सहस्रशो नारकाः प्राप्यन्ते, कर्मगतीनामानन्त्यात्, तासां स्थानानि कानिचिद् वर्णयिष्यामः ।।३।। *राजोवाच* - हे भगवन्! ते नरकाः किं देशविशेषाः? त्रिलोक्याः बहिरन्तराले वा विद्यन्ते? ।।४।। *ऋषिरुवाच* - हे राजन्! ते नारकास्तु त्रिलोक्यारन्तराले दक्षिणस्यां दिशि, भूमेरधस्तात् अण्डान्तर्गततोयात् उपरिष्टाद् वर्तन्ते, यस्यां दिश्यग्निष्वात्तादयः पितृगणा ध्यानयोगेन स्वगोत्राणां सत्या आशिष आशासाना निवसन्ति ।।५।। यत्र स्थितः भगवान्

तत्र हैके नरकानेकविंशतिं गणयन्ति। अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः। तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं शूकरमुखमन्धकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिमदयःपानमिति। किं च क्षारकर्द्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकोऽवटनिरोधनः पर्यावर्त्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः।।७।। तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते अनशनापानदण्डताडनसंतर्ज्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये।।८।। एवमेवान्धतामिस्रे यस्तु वञ्चयिता पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति। यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति।।९।।

।। सङ्ग्रहोक्तिः ।।

सूर्यपुत्रो यमो मृतानां प्राणिनां कर्मानुसारं दण्डं विदधाति।।६।। तत्र केचन महर्षयो नरकान् एकविंशतिं गणयन्ति, हे राजन्! अथ तान् नाम-रूप-लक्षणतोऽनुक्रमेण कथयामः, ते च तामिस्रः, अन्धतामिस्रः, रौरवः, महारौरवः, कुम्भीपाकः, कालसूत्रम्, असिपत्रवनम्, शूकरमुखम्, अन्धकूपः, कृमिभोजनः, संदंशः, तप्तसूर्मिः, वज्रकण्टकः, शाल्मली, वैतरणी, पूयोदः, प्राणरोधः, विशसनं, लालाभक्षः, सारमेयादनम्, अवीचिमत्, अयःपानम्, इत्येकविंशतिः नरका भवन्ति, मतान्तरेण पुनरन्यानपि निर्दिशति - क्षारकर्दमः, रक्षोगणभोजनः, शूलप्रोतः, दन्दशूकः, अवटनिरोधनः, पर्यावर्तनः, सूचीमुखम्, इति सप्त, इत्येवमाहत्य अष्टाविंशतिः नरकाः विविधयातनाभूमयो भवन्ति।।७।। तत्र यः पुमान् इह लोके परेषां वित्तापत्यकलत्राण्यपहरति तं पाशैर्बद्ध्वा यमदूता अन्धतामिस्रं नरकं बलात् पातयन्ति, तत्र भोजनपानाभावात् ताडनसन्तर्जनादिभिश्च दुःखितो जन्तुर्मूर्च्छितो भवति।।८।। यः कश्चित् पुरुषं वञ्चयित्वा तस्य दारादीनुपभुंक्ते, स प्राण्यन्धतामिस्रे नरके व्रश्चमानमूलो वनस्पतिरिव पततति, तत्र

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति । स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ।।१०।। ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति। तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरः सत्त्वापदेशः।।११।। एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहंभरः ।।१२।। यस्त्विह वा उग्रः पशून्पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैल उपरन्धयन्ति ।।१३।। यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञकेऽयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानोऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठते परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि ।।१४।। यस्त्विह निजवेदपथादनापद्यपगतः पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति

।। सङ्ग्रहोक्तिः ।।

विविधा यातनाः प्राप्य नष्टमतिर्नष्टदृष्टिश्च भवति ।।९।। इह संसारे यः प्राणी "ममेदं अहंच" इति अहंममतां कृत्वा भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स तत्सर्वमिहैव विहाय तत्पापेन स्वयं रौरवे नरके निपतति ।।१०।। तेन जीवेन ये प्राणिनो हिंसितास्त एव तत्र हिंसका रुरवो भूत्वा निरये पतितं तं खादन्ति, तत्र रुरवो हिंसन्ति, तस्मात् कारणात् तं नरकं रौरवं इति कथ्यते ।।११।। यः केवलं निजदेहं पोषयति, स महारौरवे निपतति, तत्र क्रव्यादा रुरवस्तं क्रव्येण निमित्तेन घातयन्ति ।।१२।। यः प्राणी सजीवान् पशून् प्राणिनश्च पचति, निष्कृपं राक्षसैरपि निन्दितं तं पुरुषं कुम्भीपाके यमानुगाः तप्ततैल उपरुन्धयन्ति ।।१३।। यस्त्विह मातरं पितरं ब्राह्मणं च द्रुह्यति तमयुतयोजनविस्तृते ताम्रमये तप्तखले कालसूत्रके नरके यावत् याम्यैः प्रवेशितः क्षुत्पिपासाभ्यां दह्यमानान्तर्बहिः शरीरः पशुरोमसंख्याकान् वर्षान् यावत् तत्र वसति, आस्ते, शेते, चेष्टतेऽ-वतिष्ठति धावति च ।।१४।। यः पुमानिहाऽनापद्यपि वेदमान्यं धर्मं विहाय पाखण्डमार्गमाश्रयति तं यमदूता –

तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्डानुगतं फलं भुङ्क्ते।।१५।। यस्त्विह वै राजा राजपुरुषो वाऽदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुदण्डं आर्त्तस्वरेण स्वनयन्क्वचिन्मूर्च्छितः कश्मलमुपगतः यथैवेहादृष्टदोषा उपरुद्धाः।।१६।। यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्राऽन्धकूपे तदभिद्रोहेण निपतति। तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृत्तिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः।।१७।। यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपञ्चयज्ञो वायससंस्तुत स परत्र कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते।।१८।। यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वाऽनापदि -

---

।। सङ्ग्रहोक्तिः ।।

"असिपत्रवनं" नाम नरकं नीत्वा, तत्र कशया प्रहरन्ति, स्वधर्म-नाशकः प्राणी तत्रेतस्ततो धावन् उभयतोधारैः तालासिपत्रैश्छिद्यामानावयवः स "हा! हतोऽस्मि" इति वदन् वेदनया मूर्च्छितः पदे पदे निपतति ।।१५।। यस्त्विह राजा राजपुरुषो वाऽदण्ड्यं ब्राह्मणं दण्डं प्रणयति शरीरदण्डं च करोति स पापीयान् नरके सूकरमुखे निपतति, तत्राऽतिबलैर्याम्यैरिक्षुदण्डमिव निष्पिष्यमाणावयव आर्तस्वरेण रुदन् कष्टमुपगतः सन् मूर्च्छितो भवति ।।१६।। यश्चेह परमेश्वरकल्पितवृत्तीनामविदितपरव्यथानां भूतानां परव्यथां जानन् य व्यथामाचरति स परत्राऽन्धकूपे निपतति, तत्र तेन पूर्वं पीडितैः पशु-पक्षि-मृग-वृश्चिक-यूका-मत्कुण-मक्षिकाभिः खाद्यमानो विहतनिद्रावृत्तिरलब्धावस्थानः सन् दुःखं लभते।।१७।। यो देही लोके यत् किंचिदपि भक्ष्यमन्नादिकमविभज्याऽश्नाति, अकृतपञ्चमहायज्ञो वायसतुल्यः स शतसहस्रयोजनविस्तृते कृमिभोजने नरके निपतति, तत्र तैः कृमिभिर्भक्ष्यमाणः सन् स्वयमपि कृमीन्नश्नाति।।१८।।

पुरुषस्तममुत्र राजन्यमपुरुषा अयस्मयैरग्नितप्तैः संदंशैस्त्वचि निष्कुषन्ति ।।१९।। यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ।।२०।। यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्त्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कुषन्ति ।।२१।। ये त्विह वै राजन्या राजपुरुषा वाऽपाषण्डान् धर्म्मसेतून् भिन्दन्ति ते संपरेत्य वैतरण्यां निपतन्ति। भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरन्त उपतप्यन्ते विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ।।२२।। ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतन्ति। तदेवातिबीभत्सितमश्नन्ति ।।२३।।

।। सङ्ग्रहोक्तिः ।।

हे राजन्! यस्त्विह लोके देह्यनापदि स्तेयेन बलाद् वा ब्राह्मणस्याऽन्यस्य वा हिरण्यरत्नादिकमपहरति तं देहिनं परत्र संदंशाख्यनरके यमभटा अतितप्तैः संदंशैः त्वचि छिन्दन्ति ।।१९।। इह यः पुमान् अगम्यां नारीमभिगच्छति वा या नार्यगम्यं पुरुषमभिगच्छति, तौ द्वावपि कशया ताडयन्तो यमदूताः तप्तसूर्मिनरके तप्तलोहमय्यां स्त्रीप्रतिमायां पुरुषं, पुरुषप्रतिमायां च नारीमालिंगयन्ति ।।२०।। इह तु यः सर्वाभिः स्त्रीभिः कृतसौरतः, तं सर्वगामिनं पुरुषं परत्र निरये वज्रकण्टकशाल्मली नरके पातितं यमदूताः वज्रकण्टकीं शाल्मलीमारोप्य निष्कुषन्ति ।।२१।। ये वै राजन्या राजपुरुषा वाऽपाषण्डान् धर्मसेतून् भिन्दन्ति, ते जनाः परत्र वैतरण्यां पतन्ति, तत्र निरयपरिखाभूतायां तस्यां यादोगणैरितस्ततो भक्ष्यमाणाः, यातनामयदेहेनाऽवियुज्यमाना, स्वाघमनुस्मरन्त उपतप्यन्ते, विण्मूत्र-पूय-शोणित-केश-नखाऽस्थि-मेदो-मांस-वसावाहिन्यां वैतरण्यां संतप्यन्ते ।।२२।। ये त्विह वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति, तेऽपि प्रेत्य परत्र पूयोदनरके पूय-विण्मूत्र-श्लेश्ममलपूर्णार्णवे निपतन्ति, अतिबिभत्सितं तदेवाऽश्नन्ति ।।२३।।

ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति तानपि संपरेताँल्लक्ष्यभूतान्यमपुरुषा इषुभिर्विध्यन्ति ।।२४।। ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति ।।२५।। यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतः कुल्यायां पातयित्वा रेतः संपाययन्ति ।।२६।। ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान्वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादन्ति ।।२७।। यस्त्विह वाऽनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद् गिरिमूर्द्ध्नः संपात्यते । यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ।।२८।। यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयनीतानामुरसि

।। सङ्ग्रहोक्तिः ।।

ये ब्राह्मणादयः श्वगर्दभपालका मृगयाविहाराः सन्तोऽतीर्थेऽपि मृगादीन् निघ्नन्ति, तानपि संपरेतान् लक्ष्यभूतान् कृत्वा यमदूता इषुभिर्विध्यन्ति ।।२४।। ये दाम्भिका इह दम्भेन कृतेषु यज्ञेषु पशून् निघ्नन्ति, तान् परत्र वैशसे नरके पतितान् यमदूता घातयित्वा सुतरां दुःखयित्वा हिंसन्ति ।।२५।। यो द्विजः काममोहितः सन् सवर्णां भार्यां रेतः पाययति तं पापकृतं पुरुषं परत्र याम्या रेतःकुल्यां रेतः पातयन्ति ।।२६।। इह ये राजानो राजसेवका दस्यवो वा अग्निदा विषदाः सन्तो ग्रामादीन् सार्थंश्च लुम्पन्ति, सारमेयादने नरके पतितान् तान् पापिनः विंशत्यधिकसप्तशतानि (७२०) वज्रदंष्ट्राः श्वानः खादन्ति ।।२७।। य इह द्रव्यविनिमये साक्ष्ये वा दानेऽनृतं वदति, तं परलोके यमदूता अवीचिनामके नरकेऽधःशिरसं तं शतयोजनोच्छ्रितात् पर्वतशृङ्गादधः पातयन्ति, तत्र प्रस्तरपृष्ठं स्थलं जलमिवाऽवभासते, तत्र तिलशो विशीर्यमाणावयवोऽपि न म्रियमाणः स पुनः पर्वतमारोपितोऽधःपात्यते ।।२८।। इह यो विप्रस्तत्कलत्रं वा प्रमादतः सुरां पिबति, अन्योऽपि वा व्रतस्थः क्षत्रियो वैश्यो वा प्रमादतः कृतसोमपीथः स्यात्, निरयनीतानां तेषां हृदि पादं निधाय यमदूता वह्नितापेन

पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसंनिषिञ्चन्ति ।।२९।। अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्द्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते ।।३०।। ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ते पशव इह निहता यमसदने घातयन्तो रक्षोगणाः सौनिका इव स्वधितिनावदार्यासृक् पिबन्ति नृत्यन्ति गायन्ति च हृष्यमाणा यथेह पुरुषादाः ।।३१।। ये त्विह वाऽनागसोऽरण्ये ग्रामे वा वैस्रम्भकैरुपसृतानुपविस्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया घातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलसूत्रादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्म-तुण्डैराहन्यमाना आत्मशमलं स्मरन्ति ।।३२।। ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखाः उपसृत्य ग्रसन्ति यथा बिलेशयान् ।।३३।। ये त्विह वा बालानन्धान्काणान्बलहीनान्यवटकुसूलगुहादिषु भूतानि निरुन्धन्ति

।। सङ्ग्रहोक्तिः ।।

द्रवीभूतं कार्ष्णायसं तन्मुखे निषिञ्चन्ति ।।२९।। य इह स्वयमेवात्मनं सर्वश्रेष्ठं मन्यमानो जन्म-विद्या-वर्णाश्रमवतः पुरुषान् श्रेष्ठान् न मन्यते, स पापीयानवाक्शिराः सन् क्षारकर्दमे नरके निपतति, तत्र दुरन्ता यातनाश्च प्राप्नोति ।।३०।। इह ये पुरुषाः पुरुषमेधेन भूतान् प्रेतांश्च यजन्ति, याः स्त्रियो नृपशून् खादन्ति, निहतास्ते पशवो यमसदने रक्षोगणा भूत्वा सैनिका इव स्वायुधैः ताश्छित्त्वा तासां रक्तं पिबन्ति, तेन हृष्यमाणाः सन्तो नृत्यन्ति गायन्ति च ।।३१।। इह ये प्राणिनो विपिने ग्रामे निरपराधान् जिजीविषून् पशून् वा विश्वास्य शूलसूत्रादिषूपप्रोतान् कृत्वा घातयन्ति, ते परलोके यमयातनासु शूलादिषु प्रोताः कंकवटादिभिः पक्षिभिस्तुण्डैराहताः सन्तः स्वपापं स्मरन्ति ।।३२।। हे नृप! ये सर्पादय इव तीव्रस्वाभावाः पुरुषा भूतानि भीषयन्ति ते दन्दशूकाख्ये नरके निपतन्ति, तत्र पञ्चमुखाः सप्तमुखा वा सर्पादयः समीपमागत्य मूषकानिव ग्रसन्ति ।।३३।। इह लोके ये बालान्, अन्धान्, बलहीनानि

तानमुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति।।३४।। यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षेत तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डाः गृध्राः काककङ्कवटादयः प्रसह्योरुबलादुत्पाटयन्ति।।३५।। यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशङ्की व्ययविनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणं संरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति।।३६।। एवंविधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु च सर्व एवाधर्मवर्त्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशन्ति तथैव धर्मानुवर्त्तिन इतरत्र। इह तु पुनर्भवे त उभयशेषाभ्यां निविशन्ति निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः। एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते ।।३७।। यदेतद्भगवतो नारायणस्य साक्षान्मायापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनो-

---

।। सङ्ग्रहोक्तिः।।

भूतानि वाऽवटकुसूल-गुहादिषु निरुन्धन्ति, परत्र तान् अवटनिरोधाख्य नरक उपवेश्य सविषेण धूमेन निरुन्धन्ति।।३४।।यस्त्विह गृहस्वामी अतिथीन् अभ्यागतान् भिक्षून् संजातक्रोधो दिधक्षुरिव पापेन चक्षुषा निरीक्षेत, तस्य पापदृष्टेरक्षिणी नरके वज्रतुण्डा गृध्राः काकादयश्च प्रसह्योत्पाटयन्ति।।३५।। य इह लोके धनगर्ववान् अभिमानेन तिर्यक्प्रेक्षणः सर्वशङ्की व्ययविनाशशङ्कया परिशुष्यमाणवदनहृदयो ग्रह इव धनं रक्षति, स परत्र सूचीमुखे नरके पतति, तत्र वित्तग्रहं पापपुरुषं यमदूताः तुन्नवाया इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति।।३६।। हे राजन्! एवं यमालये शतशः सहस्रश्च नरकाः सन्ति, तेषु केचिद् इहोक्ता अनुक्ताश्च पापिनः कर्मानुसारं प्रविशन्ति, धर्मात्मनः स्वर्गं यान्ति, धर्माधर्मोभयशेषाभ्यां प्राणिनो मर्त्यलोके प्रविशन्ति, निवृत्तिलक्षणमार्गस्तु आदौ द्वितीयस्कन्ध एवोक्तः, पुराणेषु चतुर्दशलोकरूपेण योऽण्डकोशो गीयते स एतावानेव ज्ञेयः।।३७।। भगवतो महापुरुषस्य नारायणस्य एतत् स्वप्रकृतिगुण-

ऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ।।३८।। श्रुत्वा स्थूलं यथा सूक्ष्मं रूपे भगवतो यतिः। स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ।।३९।। भूद्वीपवर्ष-सरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था। गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ।।४०।।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षड्विंशोऽध्यायः ।।२६।।

❀ इति पञ्चमकन्धः समाप्तः ।। ❀

।। सङ्ग्रहोक्तिः ।।

प्रचुरं स्थविष्ठं रूपमनुवर्णितम्, य आदरपूर्वकमेतत् पठति शृणोति श्रावयति च, स श्रद्धाभक्तिभ्यां विशुद्धबुद्धिः सन् भगवत उपनिषद्गीतं दिव्यं रूपं वेत्ति ।।३८।। यतिः पुमान् भगवतः स्थूलरूपे वशीकृतं मनः शनैर्धिया सूक्ष्मे रूपे नयेत् ।।३९।। हे नृप! एवं भू-द्वीप-वर्ष- सरिद्-अद्रि-नभः-समुद्र-पाताल-दिक्-नरक-भागण-लोक-संस्था मया तुभ्यमुक्ता, तस्येश्वरस्येदं निखिलजीवनिवासरूपं स्थूलं रूपं ते वर्णितम् ।।४०।।

इति श्रीमद्भागवते पञ्चमस्कन्धे सङ्ग्रहोक्त्यां षड्विंशोऽध्यायः ।।२६।।

❀ इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां पञ्चमस्कन्धः समाप्तः ❀

ॐ

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम् ।।

सङ्ग्रहोक्तिटीकासहितम्

षष्ठ स्कन्धः

अथ प्रथमोऽध्यायः ।। १ ।।

परीक्षित् उवाच - निवृत्तिमार्गः कथितः आदौ भगवता यथा। क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ।।१।। प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने। योऽसावलीन-प्रकृतेर्गुणसर्गः पुनः पुनः ।।२।। अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः। मन्वन्तरश्च व्याख्यात आद्यः स्वायंभुवो यतः ।।३।। प्रियव्रतोत्तानपादौ वंशस्तच्चरितानि च। द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ।।४।। धरामण्डलसंस्थानं भागलक्षणमानतः। ज्योतिषां विवराणां च यथेदमसृजद्विभुः ।।५।। अधुनेह महाभाग यथैव नरकान्नरः। नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ।।६।। *श्रीशुक उवाच* - न चेदिहेवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ।

।। सङ्ग्रहोक्तिः ।।

अथ प्रथमोऽध्यायः ।।१।।

अजामिलोपाख्यानं विष्णुदूतयमदूतयोः संवादश्च

परीक्षित् उवाच - भगवता त्वया क्रमशः कर्म-ज्ञान-भक्तियोगसंप्राप्तेन परमात्मना मुक्तिदो निवृत्तिमार्गो यतावत् कथितः ।।१।। त्रैगुण्यविषयः प्रवृत्तिलक्षणो यो मार्गः कथितः सोऽविनष्ट-प्रकृतिसम्बन्धस्य जीवस्य पुनः पुनर्देहसम्बन्धकारकोऽस्ति ।।२।। अधर्मलक्षणात्मका विविधा नरका आद्यं स्वायंभुवं मन्वन्तरं च वर्णितम् ।।३।। प्रियव्रतस्य उत्तानपादस्य च द्वयो राज्ञोर्वंश-स्तच्चरितं च कथितम्, द्वीप-खण्ड-समुद्र-गिरि-नदी-उद्यान-वनस्पतयश्च वर्णिताः ।।४।। परमात्मा यथेदमसृजत् तथा भूमण्डलस्थितिः ज्योतिर्गणस्य पातालादीनां संस्थानं लक्षणं चाभिहितम् ।।५।। हे महाभाग! नरोऽधुना यथा विविधान् यातनामयान् नरकान् न प्राप्नुयात्, तत् साधनं मे व्याख्यातुं त्वमर्हसि ।।६।। *श्रीशुक उवाच* - मनोवाक्कायैः कृतस्य पापस्य प्रायश्चित्तं -

ध्रुवः स वै प्रेत्य नरकानुपैति ये कीर्त्तिता मे भवतस्तिग्मयातनाः ।।७।। तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना। दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ।।८।। *राजोवाच* – दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम्। करोति भूयो विवशः प्रायश्चित्तमथो कथम् ।।९।। क्वचिन्निवर्त्ततेऽभद्रात् क्वचिच्चरति तत्पुनः। प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत् ।।१०।। *श्रीशुक उवाच* – कर्मणा कर्मनिहारो न ह्यात्यन्तिक इष्यते । अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम् ।।११।। नाश्नतः पथ्यमेवान्नं व्याधयोऽभि भवन्ति हि । एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते ।।१२।। तपसा ब्रह्मचर्येण शमेन च दमेन च । त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ।।१३।। देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः। क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ।।१४।। केचित् केवलया भक्त्या वासुदेवपरायणाः। अघं धुन्वन्ति कात्स्न्र्येन नीहारमिव भास्करः ।।१५।।

।। सङ्ग्रहोक्तिः ।।

तैर्मनआदिभिर्यावन्न क्रियते तावद् अकृतनिष्कृतिः पुरुषः प्रेत्य नूनं मया भवते या तीव्रा यातनाः कथिताः ताः प्राप्नोत्येव ।।७।। तस्मात् मृत्योः पूर्वमेव पटुतरेण देहेन इह लोके प्रायश्चित्ताचरणेन पापस्य गौरवं लाघवं च दृष्ट्वा रोगाणां निदानविद् वैद्य इव शीघ्रमेव पापनिवारणं कुर्यात् ।।८।। *राजोवाच* – पापं जीवस्याऽहितमिति प्रत्यक्षेण शास्त्रेण च जानन्नपि पुमान् विवशः सन् भूयो पापाय प्रवर्तते, अथ तत्कृते प्रायश्चित्तं किम्? ।।९।। स क्वचित् प्रायश्चित्तेन पापान्निवृत्तो भवति, पुनर्विषयपरवशः सन् तत् पापं कुरुते, अत्र कृतमपि प्रायश्चित्तं कुञ्जरस्नानवद् व्यर्थमेव मन्ये ।।१०।। *श्रीशुक उवाच* – प्रायश्चित्तेन पापक्षयः समूलो न, प्रायश्चित्तं तु तत्र कर्तुरज्ञानमेव कारणम्, अत एव ज्ञानप्राप्तिरेव प्रधानं प्रायश्चित्तं ज्ञेयम् ।।११।। हे राजन्! यथा पथ्यभोजिनः प्राणिनो व्याधिर्नैव भवति, नियमादिपालकः पुमान् शनैः शनैस्तत्त्वज्ञानं प्राप्नोति ।।१२।। श्रद्धान्विता धर्मज्ञा धीराः पुरुषाः तपसा, ब्रह्मचर्येण, शम-दम-यम-नियमैः त्याग-सत्य-शौचैश्च कायवाग्बुद्धिजं महदपि पापं वह्निर्वेणुगुल्ममिव क्षिपन्ति ।।१३-१४।। केचिद् वासुदेवपरायणाः पुरुषाः सूर्यो हिमसमूहमिव केवलया भक्त्यैव

न तथा ह्यघवान् राजन्पूयेत तप आदिभिः। यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया
।।१६।। सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः। सुशीलाः साधवो यत्र
नारायणपरायणाः।।१७।। प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् । न निष्पुनन्ति
राजेन्द्र सुराकुम्भमिवापगाः।।१८।। *सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि
यैरिह। न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः।।१९।।*
अत्र चोदाहरन्तीममितिहासं पुरातनम् । दूतानां विष्णुयमयोः संवादस्तं निबोध मे
।।२०।। कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः। नाम्ना नष्टसदाचारो दास्याः
संसर्गदूषितः।।२१।। बन्द्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः। बिभ्रत्कुटुम्बमशुचि-
र्यातयामास देहिनः।।२२।। एवं निवसतस्तस्य लालयानस्य तत्सुतान्। कालो-
ऽभ्ययान्महान् राजन्नष्टाशीत्यायुषः समाः।।२३।। तस्य प्रवयसः पुत्रा दश तेषां
तु योऽवमः। बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम्।।२४।। स बद्धहृदयस्त-
स्मिन्नर्भके कलभाषिणि । –

।। सङ्ग्रहोक्तिः।।

निखिलं पापं नाशयन्ति।।१५।। हे राजन्! पापी पुमान् भगवदेकान्तिकभक्तसेवया कृष्णार्पितात्मा सन् यथा पवित्रो भवति तथा तपआदिप्रायश्चित्ताचरणेन न भवति।।१६।। लोके भगवद्भक्तिरूपो मार्गः समीचीनोऽकुतोभयो मतः, यत्र नारायणपरायणाः सुशीलाः साधवो वर्तन्ते।।१७।। राजेन्द्र! नारायणपराङ्मुखं पुरुषं सम्यगनुष्ठितानि प्रायश्चित्तानि मदिरापूर्णं घटं गङ्गाद्या नद्य इव न निष्पुनन्ति ।।१८।। इह लोके भगवद्गुणानुरक्तं मनः सकृदपि कृष्णपदारविन्दयोः समर्पितं स्यात्, ते कृतप्रायश्चित्ताः सन्तः स्वप्नेऽपि यमं पाशधारिणस्तद्भटांश्च नैव पश्यन्ति।।१९।। अत्र प्रसङ्गे विष्णुयमयोर्दूतानां संवादरूपमिममितिहासं शृणु।।२०।। पूर्वकाले कन्यकुब्ज जनपदे दास्याः संसर्गदूषितः सदाचाराद् भ्रष्टः दासीपतिरजामिलो नाम विप्र आसीत्।।२१।। एवं द्यूतकैतवचौर्यादिकर्मभिः कुटुम्बं पुष्णन् स सदाऽशुचिः सन् प्राणिनः पीडयामास।।२२।। एवं निवसतो दास्याः सुतान् लालयतः तस्याऽजामिलस्याऽष्टाशीति-वर्षात्मको (८८) महान् आयुष्कालो व्यतीतः।।२३।। वृद्धस्य तस्य तस्यां दास्यां दश पुत्रा जाताः, –

निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम्॥२५॥ भुञ्जानः प्रपिबन् खादन् बालक-स्नेहयन्त्रितः। भोजयन्पाययन् मूढो न वेदागतमन्तकम्॥२६॥ स एवं वर्त्तमानोऽज्ञो मृत्युकाल उपस्थिते। मतिं चकार तनये बाले नारायणाह्वये॥२७॥ स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषान् भृशदारुणान्। वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान्॥२८॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम्। प्लावितेन स्वरेणोच्चैराजुहावाकुलेद्रियः॥२९॥ निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्त्तनम्। भर्त्तुर्नाम महाराज पार्षदाः सहसापतन्॥३०॥ विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम्। यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा॥३१॥ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः। के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम्॥३२॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ। किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः॥३३॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः। किरीटिनः कुण्डलिनो लसत्पुष्करमालिनः॥३४॥

॥ सङ्ग्रहोक्तिः॥

तेषां मध्ये कनिष्ठपुत्रो नारायणनामा बालः पित्रोश्च भृशं दयित आसीत्॥२४॥ अजामिलो मधुरभाषिणि तस्मिन् बालक आसक्तचित्तः तस्य चेष्टां निरीक्षमाणः सन्नपि भृशं मुमुदे॥२५॥ स्वयं भुञ्जानो बालकं भोजयन्, स्वयं प्रपिबन् बालं पाययन्, इत्थं बाले स्नेहबद्धः मूढः स समागतमन्तकालमपि न वेद॥२६॥ एवं वर्तमानः स मृत्युकाल उपस्थिते सति नारायणाह्वये बाले तनये मतिं युयोज॥२७॥ तस्मिन्नेव काल आत्मानं नेतुमागतान् पाशहस्तान् भृशं दारुणान् वक्रतुण्डान् त्रीन् पुरुषान् स ददर्श॥२८॥ तानवलोक्य व्याकुलेन्द्रयः स दूरे क्रीडनकासक्तं नारायणाह्वयं पुत्रं चीत्कारेण सहाऽऽजुहाव॥२९॥ एवं म्रियमाणस्याजामिलस्य मुखाद्धरिनामकीर्त्तनं कुर्वतः, "नारायण" इति भर्तुर्नाम श्रुत्वा हे महाराज! तत्र सहसा विष्णुपार्षदा आजग्मुः, समागत्य ते विष्णुदूता दासीपतिमजामिलमन्तर्हृदयाद् विकर्षतो यमदूतान् स्वप्रतापेन वारयामासुः॥३०-३१॥ ते यमानुचरा विष्णुपार्षदानूचुः - धर्मराजस्य शासनं प्रतिषेद्धारो यूयं के?॥३२॥ कस्य दूताः? कुतः समायाताः, अस्मान् कस्मान्निषेधथ, यूयं देवा उपदेवा वा सिद्धसत्तमाः स्थ?॥३३॥ यूयं सर्वे कमलनयनाः पीतांबराः, किरीटिनः, कुण्डलिनः, वनमालिनः,

सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः। धनुर्निषङ्गासिगदाशङ्खचक्राम्बुज-
श्रियः।।३५।। दिशो वितिमिरालोकाः कुर्वन्तः स्वेन रोचिषा। किमर्थं धर्मराजस्य
किंकरान्नो निषेधथ।।३६।। *श्रीशुक उवाच* – इत्युक्ता यमदूतैस्ते वासुदेवोक्त-
कारिणः। तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा।।३७।। *विष्णुदूता ऊचुः* -
यूयं वै धर्मराजस्य यदि निर्देशकारिणः। ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य
लक्षणम्।।३८।। कथं स्विद् ध्रियते दण्डः किं वास्य स्थानमीप्सितम्। दण्ड्याः
किं कारिणः सर्वे आहोस्वित् कतिचिन्नृणाम्।।३९।। *यमदूता ऊचुः* – वेदप्रणिहितो
धर्मो ह्यधर्मस्तद्विपर्ययः। वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुमः।।४०।। येन
स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः। गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम्
।।४१।। सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः। कं कुः कालः स्वयं
धर्मो ह्येते दैह्यस्य साक्षिणः।।४२।। एतैरधर्मो विज्ञातः स्थानं दण्डस्य युज्यते।
सर्वे कर्मानुरोधेन दण्डमर्हन्ति कारिणः।।४३।।

।। सङ्ग्रहोक्तिः ।।

नूतनवयसः, चतुर्भुजाः, धुनुर्निषङ्गासिशंखचक्रगदापद्मधराः।।३४-३५।। स्वतेजसा दिशां तमो नाशयन्तो यूयं धर्मराजस्य किंकरान्नः किमर्थं निषेधथ।।३६।। *श्रीशुक उवाच* - यमदूतैरेवमुक्ते सति भगवदाज्ञाकारिणो विष्णुदूताः प्रहस्य मेघगंभीरया गिरा तानूचुः।।३७।। *विष्णुदूता ऊचुः* – यदि यूयं धर्मराजस्याऽऽज्ञाकारिणो दूतास्तर्हि धर्मस्य तत्त्वं लक्षणं च ब्रूत।।३८।। कया रीत्या दण्डो दीयते? को दण्डार्हः? किं सर्वे कर्मकारिणो दण्ड्याः? अथवा कतिचिदे? तत् कथयत।।३९।। *यमदूता ऊचुः* – वेदैर्विहितो धर्मः, वैदैर्निषिद्धोऽधर्मः, वेदः साक्षान्नारायणः स्वयंभूश्चेति शुश्रुम।।४०।। येन नारायणेन स्वस्वरूपे त्रिगुणप्रचुरा देवमनुष्यादयः पदार्थाः गुणनामरूपक्रियाभिः विविच्यन्ते।।४१।। सूर्यः, अग्निः, आकाशः, वायुः, गावः, सोमः, संध्या, दिनम्, रात्रिः, दिशः, जलं, पृथिवी, कालः धर्मश्च एते चतुर्दश जीवस्य साक्षिणो भवन्ति।।४२।। एतैरभिज्ञातोऽधर्मो दण्डस्य विषयो भवति, पापकर्मकारिणः सर्वे पापकर्मतारतम्यतया दण्डमर्हन्ति।।४३।।

संभवन्ति हि भद्राणि विपरीतानि चानघाः। कारिणां गुणसङ्गोऽस्ति देहवान्न ह्यकर्मकृत्।।४४।। येन यावान्यथा धर्मोऽधर्मो देहसमीहितः। स एव तत्फलं भुङ्क्ते तथा तावदमुत्र वै।।४४।। यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते। भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते।।४६।। वर्त्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा। एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम्।।४७।। मनसैव पुरे देवः पूर्वरूपं विनश्यति। अनु मीमांसते पूर्वं मनसा भगवानजः।।४८।। यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि। न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा।।४९।। पञ्चभिः कुरुते स्वार्थान्पञ्च वेदाथ पञ्चभिः। एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते।।५०।। तदेतत् षोडशकलं लिङ्गं शक्तित्रयं महत्। धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्त्तिदाम् ।।५१।।

।। सङ्ग्रहोक्तिः।।

हे अनघाः! देहिनां पुण्यानि कर्माणि तथा अपुण्यानि च भवन्ति, कर्मकर्तॄणां विषयेष्वासक्तिर्भवति हि, कश्चिदपि देही कर्मपरिहारी नैव भवति।।४४।। अत एव हि मर्त्यलोके यः प्राणी धर्ममधर्मं वा यथा करोति तथा परलोके तत्फलस्वरूपं सुखं दुःखं वा प्राप्नोति।।४५।। हे देवप्रवराः! यथेह भूतेषु त्रिगुणवैचित्र्यात् सुखित्व-दुःखित्व-मूढत्वरूपं त्रैविध्यमुपलभ्यते तथा परत्र तदनुमीयते ।।४६।। यथा वर्तमानः कालो वसन्तादिः स भूतभविष्यतोर्गुणाभिख्यापको भवति, तथैव वर्तमानं जन्म पूर्वापरजन्मनोर्धर्माधर्मयोर्ज्ञापकं भवति।।४७।। पुरे देहे सर्वान्तर्यामितया वर्तमानः परमात्मैव जीवस्य पूर्वं कर्मरूपं पश्यति एवं च अजोऽन्तर्यामी स एव परं जन्मादिकं चिन्तयति।।४८।। अन्धकारेणाभिहतोऽज्ञः व्यक्तशरीरमेव जानाति पुरःस्थितं वा पृष्ठतःस्थितं वस्तु न जानाति तद्वत् अज्ञो वर्तमानं देहमेव जानाति, नष्टजन्मस्मृतिः स भूतभविष्यतोः शरीरे न जानाति।।४९।। षोडशकलात्मकलिङ्गशरीरस्थो जीवः पञ्चकर्मेन्द्रियैः कर्माणि करोति, ज्ञानेन्द्रियैः पञ्चविषयान् भुंक्ते, प्राणैः देहवृत्तिं धारयति, स्वयं च सप्तदशो सुख-दुःख-मोहान् भुंक्ते।।५०।। एवमेतत् षोडशकलात्मकं लिङ्गशरीरं जीवाय हर्षशोक भयदात्रीं संसृतिं ददाति।।५१।।

देह्यज्ञोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते । कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति ।।५२।। न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ।।५३।। लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत। यथायोनि यथाबीजं स्वभावेन बलीयसा ।।५४।। एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः। आसीत्स एव न चिरादीशसङ्गाद्विलीयते ।।५५।। अयं हि श्रुतसंपन्नः शीलवृत्तगुणालयः। धृतव्रतो मृदुर्दान्तः सत्यवाङ्मन्त्रविच्छुचिः ।।५६।। गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः। सर्वभूतसुहृत्साधुर्मितवागनसूयकः ।।५७।। एकदासौ वनं यातः पितृसंदेशकृद् द्विजः। आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ।।५८।। ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया। पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ।।५९।। मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम्। क्रीडन्तमनु गायन्तं हसन्तमनयान्तिके ।।६०।। दृष्ट्वा तां कामलिप्तेन बाहुना परिरम्भिताम्। जगाम हृच्छयवशं सहसैव विमोहितः ।।६१ ।।

।। सङ्ग्रहोक्तिः ।।

अजितषड्वर्गोऽज्ञो जीवोऽनिच्छन्नपि कर्माणि बलात् करोति, तेन कर्मणा कोशकारः कीट इव आत्मानमवच्छाद्य मुह्यति ।।५२।। कश्चिदपि प्राणी जातु कर्माऽकुर्वाणः क्षणमपि न तिष्ठति, यतः परतन्त्रो जीवः सः स्वाभाविकैः सत्त्वादिगुणैः बलात् कर्म कार्यते ।।५३।। जीवस्याऽदृष्टवशात् स्थूलं सूक्ष्मं च शरीरं, मातृसदृशं पितृसदृशं च बलीयसा स्वभावेन = वासनया भवति ।।५४।। अत एव प्रकृतिसङ्गेन जीवस्य संसारो भवति, परमेश्वरभजनात् स संसारः शीघ्रमेव विलीयते ।।५५।। अयमजामिलः पूर्वं विद्वान् शीलाचारगुणसंपन्नः धृतव्रतः, कोमलस्वभावः, दान्तः, सत्यवाक् मन्त्रवित्, पवित्रः, गुर्वग्न्यतिथीनां सेवकः, निरहंकारः, मितभाषी, सर्वभूतसुहृद् साधुरासीत् ।।५६-५७।। एकदाऽसौ पितुराज्ञया वनं यातः, ततः फलपुष्पसमित्कुशान् गृहीत्वा परावृतः ।।५८।। परावर्तन समये मार्गे मदिरां पीत्वा मदाघूर्णितनेत्रया मत्तया नग्नया कयाचिद् दास्या सह निर्लज्जं हसन्तं गायन्तं च कञ्चिच्छूद्रं ददर्श ।।५९-६०।। तेन कामिना बाहुनाऽऽलिङ्गितां दृष्ट्वा मोहितोऽजामिलः सहसैव कामवशो

स्तम्भयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतम्। न शशाक समाधातुं मनो मदनवेपितम्
॥६२॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः। तामेव मनसा ध्यायन् स्वधर्मा-
द्विरराम ह॥६३॥ तामेव तोषयामास पित्र्येणार्थेन यावता। ग्राम्यैर्मनोरमैः कामैः
प्रसीदेत यथा तथा॥६४॥ विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम्।
विससर्जाचिरात्पापः स्वैरिण्यपाङ्गविद्धधीः॥६५॥ यतस्ततश्चोपनिन्ये न्यायतो-
ऽन्यायतो धनम्। बभारास्याः कुटुम्बिन्याः कुटुम्बं मन्दधीरयम् ॥६६॥ यदसौ
शास्त्रमुल्लङ्घ्य स्वैरचार्यार्यगर्हितः। अवर्त्तत चिरं कालमघायुरशुचिर्मलात्॥६७॥
तत एनं दण्डपाणेः सकाशं कृतकिल्बिषम्। नेष्यामोऽकृतनिर्वेशं यत्र दण्डेन
शुद्ध्यति॥६८॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे प्रथमोऽध्यायः॥१॥

॥ सङ्ग्रहोक्तिः॥

जातः॥६१॥स्वज्ञानधैर्याभ्यां मनः स्तम्भयन्नपि काममथितं मनो निग्रहीतुं न शशाक॥६२॥
दासीनिमित्तेन स्मरकपटपिशाचेन ग्रस्तोऽयं मनसा तां दासीमेव ध्यायन् स्वधर्माद् भ्रष्टो
बभूव॥६३॥ तदनन्तरं तां स्वीकृत्याऽयं स्वगृहस्थितेन पितृप्राप्तेन धनेन मनोरमैर्ग्राम्य-
विषयैस्तामेव तुतोष॥६४॥ततो महति कुले जातामप्रौढां विप्रां स्वभार्यामपि स्वैरिणीनष्टधीरयं
पापस्तत्याज॥६५॥ एवमयं मन्दधीश्चौर्यादिना, न्यायतोऽन्यायतो वा यतस्ततो धनमानीय
तस्याः कुटुम्बिन्याः शूद्रायाः कुटुम्बं बभार॥६६॥ ततोऽयं शास्त्रमर्यादामुल्लंघ्य स्वैरचारी
मलादशुचिः सन् तया सह चिरकालमवर्त्तत॥६७॥ अत एवैनमकृतप्रायश्चित्तं कृतकिल्विषं
दण्डपाणेः सकाशं नेष्यामः यत्रैष दण्डेन शुद्धिमेष्यति॥६८॥

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः॥१॥

अथ द्वितीयोऽध्यायः ।। २।।

श्रीशुक उवाच - एवं ते भगवद्दूता यमदूताभिभाषितम्। उपधार्याथ तान् राजन् प्रत्याहुर्नयकोविदाः।।१।। *विष्णुदूता ऊचुः* - अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम्। यत्रादण्ड्येष्वपापेषु दण्डो यैर्ध्रियते वृथा।।२।। प्रजानां पितरो ये च शास्तारः साधवः समाः। यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः।।३।। यद्यदाचरति श्रेयानितरस्तत्तदीहते। स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते।।४।। यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः। स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः।।५।। स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम्। विश्रम्भणीयो भूतानां सघृणो द्रोग्धुमर्हति।।६।। अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि। यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः।।७।। एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम्। यदा नारायणाऽऽयेति जगाद चतुरक्षसम्।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ द्वितीयोऽध्यायः ।।२।।

भगवन्नाममाहात्म्यादजामिलस्य याम्यान्मुक्तिः

श्रीशुक उवाच - हे राजन्! एवं यमदूतैः कथितं वचः श्रुत्वा न्यायनिपुणा भगवत्पार्षदास्तान् प्रत्याहुः।।१।। *विष्णुदूता ऊचुः* - अहो! कष्टं प्राप्तम्, धर्मदृशां सभामधर्मः स्पृशते, यत्र यमसभायामपापेष्वदण्ड्येषु भवादृशैर्वृथा दण्डो ध्रियते।।२।। ये प्रजानां पितृवत्पालनकर्तारः साधवः समाः शास्तारस्तेषु यदि वैषम्यं स्यात्, तदा प्रजाः कस्य शरणं यायुः।।३।। श्रेष्ठः पुरुष यद्यदाचरति, यच्च प्रमाणं कुरुते, इतरो लोकस्तदनुवर्तते।।४।। लोको यस्य विश्वसनीयस्याऽङ्के शिरो निधाय निःशंकं शेते, स विश्वासी जनः पशुवद् धर्ममधर्मं वा न वेत्ति।।५।। विश्वसनीयः स दयालुः पुमान् समर्पितकलेवरं कृतमैत्रमचेतनं पुरुषं कथं द्रोग्धुमर्हति।।६।। अनेन कोटिजन्मभिः कृतमपि पापं प्रायश्चित्तेन विशोधितम्, यतोऽयं विवशः सन् स्वशुभावहं हरेर्नाम व्याजहार।।७।। प्राणप्रयाणसमयेऽयं "नारायणऽऽय" इति चतुरक्षरं भगवन्नाम जगाद, तदा एतेन पापस्य प्रायश्चित्तं कृतं स्यात्।।८।।

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे
॥९॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्। नामव्याहरणं विष्णोर्यतस्तद्विषया
मतिः॥१०॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रतादिभिः। यथा
हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकम्॥११॥ नैकान्तिकं तद्धि कृतेऽपि
निष्कृते मनः पुनर्द्धावति चेदसत्पथे। तत् कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः
खलु सत्त्वभावनः॥१२॥ अथैनं मापनयत कृताशेषाऽघनिष्कृतम्। यदसौ
भगवन्नाम म्रियमाणः समग्रहीत् ॥१३॥ *सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव*
वा। वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥१४॥ *पतितः स्खलितो भग्नः संदष्टस्तप्त*
आहतः। हरिरित्यवशेनाह पुमान्नार्हति यातनाः॥१५॥ गुरूणां च लघूनां च गुरूणि
च लघूनि च। प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः॥१६॥

॥ सङ्ग्रहोक्तिः॥

स्तेन, सुरापः, मित्रद्रोही, ब्रह्मघ्नः, गुरुतल्पगः, स्त्री-राज-पितृ-गो-हन्ता चाऽपरेऽपि ये पापिनः सर्वेषामपि पापिनां श्रेष्ठं प्रायश्चित्तमिदमेव, यत् अन्ते नारायणेति नामोच्चारणम्, यतस्तदा विष्णोः "अयंमम" इति तद्विषयामतिर्जायते॥९-१०॥ मन्वादिभिः कथितैर्व्रतादिप्रायश्चित्तैरघवान् तथा न विशुद्ध्यति यथा भगवन्नामोच्चारणाच्छुद्ध्यति, यतो नामोच्चारणं भगवद्गुणविषयक-मत्युत्पादकं वर्तते॥११॥ मुनिभिः संप्रोक्तं प्रायश्चित्तमत्यन्तं पापशोधकं न, यतो निष्कृते कृते सत्यपि जनस्य पुनः पापे बुद्धिर्भवति, अतो पापस्याऽऽत्यन्तिकं नाशमभीप्सतां नृणां हरेर्नामगुणानुवाद एव चित्तशोधको भवति॥१२॥ हे यमदूताः! अन्तसमये म्रियमाणोऽयं भगवन्नाम "नारायण" इति समग्रहीत्, अतोऽनेनाऽशेषाघनिष्कृतिकृतत्वात् एनं यूयं मापनयत ॥१३॥ पुत्रादौ संकेतितं=सांकेत्यं, परिहासेनोच्चारितं, नर्मवचनकृतं, सावज्ञोच्चारितं च हरेर्नाम समग्रपापहरं वर्तत इति नाममाहात्मविदो विदुः॥१४॥ पतितः, मार्गेस्खलितः, भग्नगात्रः, सर्पादिना दष्टः, ज्वरादिना तप्तः, दण्डादिनाऽऽहतः, जनो यदि विवशतयाऽपि "हरिः" इत्याह, तर्हि स नारकीर्यातना नार्हति॥१५॥ महर्षिभिः गुरूणां पापानां प्रायश्चित्तानि गुरूणि विचार्य प्रोक्तानि सन्ति, लघूनां लघूनि कथितानि सन्ति॥१६॥

तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः। नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ।।१७।। अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत्। संकीर्तितमघं पुंसो दहेदेधो यथाऽनलः ।।१८।। यथागदं वीर्यतममुपयुक्तं यदृच्छया। अजानतोऽप्यात्मगुणं कुर्यान् मन्त्रोऽप्युदाहृतः।।१९।। पतिं वः पृच्छत भटा धर्मेऽस्मिन् यदि संशयः। स वेद परमं गुह्यं धर्मस्य भगवान्यमः।।२०।। *श्रीशुक उवाच* – त एवं सुविनिर्णीय धर्मं भागवतं नृप। तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन्।।२१।। इति प्रत्युदिता याम्या दूता यात्वा यमान्तिकम्। यमराज्ञे यथा सर्वमाचचक्षुररिंदम।।२२।। द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः। ववन्दे शिरसा विष्णोः किंकरान् दर्शनोत्सवः ।।२३।। तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः। सहसा पश्यतस्तस्य तत्रान्तर्दधिरे-ऽनघ।।२४।। अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः। धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम्।।२५।।

।। सङ्ग्रहोक्तिः।।

तैस्तपोदानजपादिभिः प्रायश्चित्तैस्तानि पापानि निवर्त्त्यन्ते, किन्तु तस्याधर्मजं हृदयं न शुद्ध्यति, तद्धृदयं तु नामस्मरणादिभगवत्सेवया शुद्ध्यति।।१७।। ज्ञानात् अज्ञानाद्वा संकीर्त्तितं हरेर्नाम पुंसः पापं वह्निः काष्ठमिव दहत्येव ।।१८।। यथा वीर्यवत्तमं भक्षितमौषधं तदजानतोऽपि पुरुषस्याऽरोगतापादकं स्वगुणं कुर्यादेव, यथा वोच्चारितो मन्त्रोऽपि स्वगुणं ख्यापयत्येव तद्वत् संकीर्त्तितं भगवन्नामपि स्वगुणं कुर्यादेव।।१९।। हे यमदूताः! धर्मरूपेऽस्मद्वचने यदि संशयः स्यात् तर्हि स्वस्वामिनं यमं पृच्छत, स भगवान् यमो धर्मस्य परमं रहस्यं वेद।।२०।। *श्रीशुक उवाच* – हे नृप! ते विष्णुदूता एवं भागवतं धर्मं सुविनिर्णीय विप्रमजामिलं यमदूतपाशान् मोचयित्वा मृत्योरप्यमूमुचन्।।२१।।हे अरिंदम! विष्णुदूतैः प्रत्याख्याता यमदूता यमस्याऽन्तिकं गत्वा तस्मै सर्वं यथावदाचचक्षुः।।२२।। अजामिलोऽपि यमपाशात् विमुक्तो निर्भीकः सन् स्वस्थो जातः, विष्णुदूतदर्शनादुत्साहितः सन् स विष्णुपार्षदान् शिर आनम्य ववन्दे।।२३।। हे अनघ! श्रीविष्णुपार्षदास्तं द्विजं विवक्षुमालक्ष्य सहसैव द्विजस्य पश्यतः सन्तस्तत्रैवा-ऽन्तर्दधे।।२४।। अजामिलोऽपि यमदूतविष्णुदूतयोर्मध्ये गुणाश्रयं वेदत्रयविहितं -

भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः। अनुतापो महानासीत्स्मरतोऽशुभमात्मनः
।।२६।। *अजामिल उवाच* – अहो मे परमं कष्टमभूदविजितात्मनः। येन विप्लावितं
ब्रह्म वृषल्यां जायतात्मना।।२७।। धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्।
हित्वा बालां सतीं योऽहं सुरापामसतीमगाम्।।२८।। वृद्धावनाथौ पितरौ नान्यबन्धू
तपस्विनौ। अहो मयाधुना त्यक्तावकृतज्ञेन नीचवत्।।२९।। सोऽहं व्यक्तं पतिष्यामि
नरके भृशदारुणे। धर्मघ्नाः कामिनो यत्र विन्दन्ति यमयातनाः।।३०।। किमिदं
स्वप्न आहोस्वित्साक्षाद्दृष्टमिहाद्भुतम्। क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः
।।३१।। अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः। व्यमोचयन्नीयमानं बद्ध्वा
पाशैरधो भुवः।।३२।। अथापि मे दुर्भगस्य विबुधोत्तमदर्शने। भवितव्यं मङ्गलेन
येनात्मा मे प्रसीदति।।३३।। अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः। वैकुण्ठनाम
ग्रहणं जिह्वा वक्तुमिहार्हति।।३४।। क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः।

।। सङ्ग्रहोक्तिः ।।

संवादं विष्णुदूतोक्तं शुद्धं भागवतधर्मं चाऽवधार्य, हरेर्माहात्म्यश्रवणाच्चाऽऽशु भगवति भक्तिमान् जातः, आत्मनः पापमनुस्मरतस्तस्य महान् पश्चात्तापो जातः।।२५-२६।। *अजामिल उवाच* – अहो, मनोवश्यस्य मे महत् कष्टमभूत्, शूद्रायां पुत्ररूपेणात्मानमुत्पाद्य मया स्वस्य ब्रह्मतेजो विनाशितम्।।२७।। अत एव सज्जनैर्निन्दितं कुलकज्जलं मां धिक्, यतोऽहं सतीं बालां भार्यां हित्वा सुरापामसतीमगाम्।।२८।। अहो कष्टम्, वृद्धौ रक्षकरहितावन्यपुत्रादिरहितौ तपस्विनौ च मातापितरौ कृतघ्नेन मया नीचवत् त्यक्तौ।।२९।। सोऽहं नूनं भृशदारुणे नरके पतिष्यामि, यत्र धर्मघ्नाः कामिनो यमयातना विन्दन्ति।।३०।। अधुनैव मया कश्चित् स्वप्नो दृष्टः सत्यं वा? ये मां व्यकर्षन्, ते पाशहस्ता यमकिङ्कराः क्व गताः?।।३१।। अथवा ते चारुदर्शनाश्चत्वारः सिद्धाः क्व गताः? ये मां पाशैर्बद्ध्वा नरकं नीयमानं बन्धादमोचयन् ।।३२।। मन्दभाग्यस्याऽपि मे किंचित् पुण्यं कर्माऽस्ति, तदेव मया पापिना विष्णुदूतानां दर्शनं प्राप्तम्।।३३।। अन्यथा म्रियमाणस्याऽशुचेः शूद्रापते में जिह्वा भगवन्नाम कथमुच्चारयेत् ।।३४।। क्वाहं धूर्तः, पापी, ब्रह्मघाती, निर्लज्जश्च क्व च "नारायण" इत्येतत् मंगलं

क्व च नारायणेत्येतद्भगवन्नाम मङ्गलम् ।।३५।। सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः। यथा न भूय आत्मानमन्धे तमसि मज्जये।।३६।। विमुच्य तमिमं बन्धमविद्याकामकर्मजम्। सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान्।।३७।। मोचये ग्रस्तमात्मानं योषिन्मय्येह मायया। विक्रीडितो ययैवाहं क्रीडामृग इवाधमः।।३८।। ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिम्। धास्ये मनो भगवति शुद्धं तत्कीर्त्तनादिभिः।।३९।। *श्रीशुक उवाच* - इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु। गङ्गाद्वारमुपेयाय मुक्तसर्वानुबन्धनः।।४०।। स तस्मिन् देवसदन आसीनो योगमाश्रितः। प्रत्याहृतेन्द्रियग्रामो युयुजे मन आत्मनि।।४१।। ततो गुणेभ्य आत्मानं विविच्यात्मसमाधिना। युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि।।४२।। यर्ह्युपारतधी-स्तस्मिन्नद्राक्षीत्पुरुषान् पुरः। उपलभ्योपलब्धान् प्राग् ववन्दे शिरसा द्विजः।।४३।। हित्वा कलेवरं तीर्थे गङ्गायां दर्शनादनु। सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ।।४४।।

।। सङ्ग्रहोक्तिः।।

भगवन्नाम।।३५।। अतः परमहं जितेन्द्रियप्राणः सन् तथा यतिष्यामि, यथा भूयो घनान्धकारमये नरक आत्मानं न मज्जये।।३६।। अतः परमविद्याकामकर्मजं बन्धं विमुच्य सर्वभूतसखः शान्तः कारुणिकश्च भूत्वाऽहं स्त्रीमय्या मायया ग्रस्तमात्मानं मोचये, यया माययाऽधमोऽहं क्रीडामृग इव विक्रीडितः।।३७-३८।। देहादौ "अहंमम" इति मतिं त्यक्त्वाऽहं भगवन्नाम-कीर्त्तनादिभिः शुद्धं मनो भगवत्येव धारयिष्यामि।।३९।। *श्रीशुक उवाच* - एवं साधूनां क्षण सत्सङ्गेन वैराग्यं प्राप्तोऽजामिलः पुत्रादिस्नेहरूपाणि सर्वाणि बन्धनानि विहाय गङ्गाद्वारं हरिद्वारं जगाम।।४०।। तस्यां देवभूमौ स योगमार्गमाश्रित्येन्द्रियनिग्रहं च कृत्वा स्वं मनः स्वस्वरूपे युयुजे।।४१।। तत इन्द्रियेभ्य आत्मानं विविच्य, निजात्मानं देहत्रयाद् विलक्षणं विभाव्य स्वानुभवगोचरे ब्रह्मणि परमात्मरूपे युयुजे।।४२।।यदा स भगवत्स्वरूपे निश्चलधीर्जातः तदा प्राक् मरणकाले संवीक्षितान् भगवत्पार्षदान् पुरो ददृशे, ततः स्वान्तिके प्राप्तान् तान् शिरसा ववन्दे।।४३।।ततस्तीर्थरूपायां गङ्गायां स्वकलेवरं त्यक्त्वा सद्य एव भगवत्पार्षदानां

साकं विहायसा विप्रो महापुरुषकिंकरैः। हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः।।४५।। एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मा। निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन्।।४६।। *नातः परं कर्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्त्तनात्। न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा।।४७।।* य एवं परमं गुह्यमितिहासमघापहम्। शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्त्तयेत्।।४८।। न वै स नरकं याति नेक्षितो यमकिंकरैः। यद्यप्यमङ्गलो मर्त्त्यो विष्णुलोके महीयते।।४९।। म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम्। अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन्।।५०।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे द्वितीयोऽध्यायः ।। २ ।।

।। सङ्ग्रहोक्तिः ।।

स्वरूपं जगृहे।।४४।। ततः स तैर्भगवत्पार्षदैः सह सौवर्णं विमानमारुह्य यत्र लक्ष्मीपतिर्विराजते तद् वैकुण्ठं धाम जगाम।।४५।। एवं त्यक्तसर्वधर्मा स्वनिन्द्यकर्मणा नरके पात्यमानः शूद्रापतिः स पतितोऽजामिलो भगवन्नामग्रहणात् सद्यो विमुक्तो जातः।।४६।। अतो मुक्तिमभिलाषिणां जनानां भगवन्नामोच्चारणादतिरिक्तं कर्मबन्धविनाशकमन्यत् किमपि साधनं नास्ति, यद् भगवन्नामानुकीर्तनात् रजस्तमोभ्यां मलिनं मनः कर्मसु भूयो न सज्जते।।४७।। यो जन पापनाशकरमिममितिहासं भक्त्या शृणयात् कीर्त्तयेद्वा स नरो नरकं न याति यमकिङ्करैरिक्षीतोऽपि न भवति, यद्यपि सोऽमङ्गलोऽपिस्यात् तथापि स विष्णुलोके पूज्यते।।४८-४९।। यदा मरणोन्मुखोऽजामिलः पुत्रव्याजनेन विष्णोर्नाम उच्चारयन् वैकुण्ठं प्राप तदा श्रद्धया तस्य नाम गृणन् वैकुण्ठं प्राप्नुयात् तदा किं वक्तव्यम्।।५०।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः ।। ३ ।।

राजोवाच –निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः। एवं हताज्ञो विहतान् मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ।।१।। यमस्य देवस्य न दण्डभङ्गः कुतश्चनर्षे श्रुतपूर्व आसीत्। एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे सुनिश्चितम् ।।२।। *श्रीशुक उवाच* – भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः। पतिं विज्ञापयामासुर्यमं संयमनीपतिम् ।।३ ।। *यमदूता ऊचुः– कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो। त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः।।४।।* यदि स्युर्बहवो लोके शास्तारो दण्डधारिणः। कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ।।५ ।। किं तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम्। शास्तृत्वमुपचारो हि यथा मण्डलवर्त्तिनाम् ।।६ ।। अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः। शास्ता दण्डधरो नृणां शुभाशुभविवेचनः ।।७।।

।। सङ्ग्रहोक्तिः ।।

अथ तृतीयोऽद्ध्यायः ।।३।।

यमेन कृतं वैष्णवोत्कर्षवर्णनं स्वदूतसांत्वनं च

राजोवाच – हे मुने! यस्य धर्मराजस्य वशेऽयं सांसारिको जनो वर्तते स यमः दूतमुखात्तद्वृत्तान्तमाकर्ण्य विष्णुदूतैः पराकृतान् तान् स्वकिंकरान् प्रति किमाह ।।१।। हे महर्षे! पूर्वं कुत्रापि यमस्य दण्डभङ्गो न श्रुतः, हे मुने! अयं संशयो मां तुदति, अस्य छेत्ताऽपि त्वदन्यः कोऽपि नास्ति ।।२।। *श्रीशुक उवाच* – हे राजन्! भगवत्पार्षदैः प्रतिहतोद्यमाः यमदूताः स्वस्वामिनं संयमनीपतिं स्ववृत्तान्तं कथयामासुः ।।३।। *यमदूता ऊचुः* – हे प्रभो! इहलोके पुण्य-पाप-तदुभयमिश्ररूपेण त्रिविधं कर्मकुर्वतः जीवलोकस्य शास्तारः फलप्रदारः कति सन्ति? ।।४।। यदि लोके बहवो दण्डधारिणः शास्तारः स्युः तदा कस्य मृत्युर्वा अमृतं स्यात्, कस्य वा न स्यात्, इति विनिर्णय एव न स्यात् ।।५।। यदि बहूनां जनानां बहवो शासकाः स्युस्तथापि सार्वभौम इव सर्वेषु शासकेषु मध्ये भवतः प्राधान्यं स्यादितरेषां गौणं स्यात् ।।६।। अतः सेश्वराणां भूतानामधीश्वरस्त्वमेक एव, ततो नृणां दण्डधरः शास्ता –

तस्य ते विहतो दण्डो न लोके वर्त्ततेऽधुना । चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलम्भिता ।।८।। नीयमानं तवादेशादस्माभिर्यातनागृहान्। व्यमोचयन्पातकिनं छित्त्वा पाशान् प्रसह्य ते।।९।। तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम्। नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतम् ।।१०।। *श्रीशुक उवाच* - इति देवः स आपृष्टः प्रजासंयमनो यमः। प्रीतः स्वदूतान् प्रत्याह स्मरन् पादाम्बुजं हरेः।।११।। *यम उवाच* - परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम्। यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः।।१२।। यो नामभिर्वाचि जनान्निजायां बध्नाति तन्त्यामिव दामभिर्गाः। यस्मै बलिं त इमे नामकर्मनिबन्धबद्धाश्चकिता वहन्ति ।।१३।। अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरञ्चः। आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः।।१४।। अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः।

।। सङ्ग्रहोक्तिः ।।

शुभाशुभविवेचनश्च त्वमेक एवासि।।७।। इत्थंभूतस्य शासकस्य ते दण्डोऽधुना लोके न वर्तते, यतोऽद्यैवाऽद्भुतैश्चतुर्भिः सिद्धैस्तवाऽऽज्ञा तिरस्कृता ।।८।। भवदादेशाद् अस्माभिर्नरकान्नियमानमेकं पातकिनं ते सिद्धा बलात् पाशांच्छित्वा मोचयामासुः।।९।। तान् सिद्धान् त्वत्तो वेदितुमिच्छामः, यदि नो हितं मन्यसे तर्हि तद् वद, तेन पातकिना "नारायण" एतावन्मात्रमुक्ते सति ते "मा भैः" इति कथयन्तस्तूर्णं तत्राऽऽगताः।।१०।। *श्रीशुक उवाच* - इत्थं स्वदूतैः संपृष्टः प्रजाशासको यमो देवः प्रीतः हरेः, पादाम्बुजं स्मरन् सन् स्वदूतान् प्रत्याह ।।११।। *यम उवाच* - मत्तः परः स्थावरजङ्गमस्य पतिरस्ति, यस्मिन् चराचरात्मकमिदं सर्वं जगत् तन्तवः पट इव ओतं प्रोतं चाऽस्ति, यस्यांशतोऽस्य जगत उत्पत्तिस्थितिविनाशा भवन्ति, नसिप्रोतबलीवर्दवत् यस्य वशे लोकोऽस्ति ।।१२।। यथा कृषिवलो बलीवर्दान् दामन्या बध्नाति तद्वत् यो भगवान् वेदरूपायां स्ववाक्तन्त्यां जनान् बध्नाति, नामकर्मादिरज्जुभिर्बद्धा सर्वे जना यस्मै पूजामर्पयन्ति ।।१३।। अहं यमः, महेन्द्रः, निर्ऋतिः, वरुणः, सोमः, अग्निः, रुद्रः, पवनः, सूर्यः, ब्रह्माद्याश्च तथाऽन्ये भृग्वादयश्च अस्पृष्टरजस्तमस्काः स्पृष्टमाया

यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ।।१५।। यं वा न
गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते। आत्मानमन्तर्हृदि सन्तमात्मनां
चक्षुर्यथैवाकृतयस्ततः परम् ।।१६।। तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य
मायाधिपतेर्महात्मनः। प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः।।१७।।
भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि। रक्षन्ति तद्भक्तिमतः
परेभ्यो मत्तश्च मृत्योरथ सर्वतश्च ।।१८।। धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो
नापि देवाः। न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः।।१९।।
स्वयंभूर्नारदः शम्भुः कुमारः कपिलो मनुः। प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम्
।।२०।। द्वादशैते विजानीमो धर्मं भागवतं भटाः। गुह्यं विशुद्धं दुर्बोधं यं
ज्ञात्वामृतमश्नुते ।।२१।। एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः। भक्तियोगो
भगवति तन्नामग्रहणादिभिः।।२२।। *नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रका।-*

।। सङ्ग्रहोक्तिः ।।

सत्त्वप्रधाना अपि यस्याऽभिप्रायं न विदुः।।१४-१५।। जीवानामन्तरात्मानमन्तर्हृदि सन्तं यं भगवन्तं, आकृतीनां प्रकाशकं चक्षुः यथा रूपं प्रकाशयति तथा यं न प्रकाशयति, प्राणिनो अन्यैरिन्द्रियैः, मनसा, असुभिः हृदा गिरा यं नैव जानन्ति, एवं रूपो भगवान् मदन्योऽस्ति।।१६।। स्वतन्त्रस्य सर्वशास्तुर्मायाधिपतेर्महात्मनो हरेः मनोहराः तत्समानरूपगुणस्वभावाः पार्षदा प्रायेण इह लोके विचरन्ति ।।१७।। ब्रह्मादिभिः पूजिताः दुर्दर्शस्वरूपा महाद्भुतास्ते विष्णोर्दूताः सकलान् भगवद्भक्तान् मत्तो मृत्योः परेभ्यः सर्वेभ्यश्च रक्षन्ति ।।१८।। साक्षाद् भगवदभिहितं धर्मं तु ऋषयो तद्भक्तसमागमं विना न विदुः, अन्ये देवाः, सिद्धाः असुराः, मनुष्या अपि न विदुः, विद्याधरचरणादयस्तु कुतो विदुः।।१९।। स्वयंभूः, नारदः, शंभुः, सनत्कुमार, कपिलः मनुः, प्रह्लादः, जनकः, बलिः, वैयासकिर्वयं यमः, एते द्वादश वयं तं धर्मं जानीमः, गोप्यं विशुद्धं दुर्बोधं यं धर्मं ज्ञात्वा जनो मुक्तिं प्राप्नोति, ।।२०-२१ ।। अस्मिँल्लोके पुंसां एतावानेव मुख्यो धर्मः प्रोक्तः, यद् भगवन्नामग्रहणादिभिः वासुदेवे भक्तियोगः स्यात् ।।२२ ।। हे पुत्रकाः! हरेर्नामोच्चारणमाहात्म्यं तु पश्यत, येन नामोच्चारणेनाऽजामिलोऽपि यमपाशादमुच्यत ।।२३।।

अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥२३॥ एतावतालमघनिर्हरणाय पुंसां संकीर्त्तनं भगवतो गुणकर्मनाम्नाम्। विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥२४॥ प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययालम्। त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥२५॥ एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगम्। ते मे न दण्डमर्हन्त्यथ यद्यमीषां स्यात्पातकं तदपि हन्त्युरुगायवादः ॥२६॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः। तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां भयं न च वयं प्रभवाम दण्डे ॥२७॥ *तानानयध्वमसतो विमुखान् मुकुन्दपादारविन्दमकरन्दरसादजस्रम्। निष्किंचनैः परमहंसकुलै रसज्ञैर्जुष्टात् गृहे निरयवर्त्मनि बद्धतृष्णान् ॥२८॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम्। कृष्णाय नो नमति यच्छिर एकदाऽपि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥२९॥*

॥ सङ्ग्रहोक्तिः ॥

भगवतो गुणकर्मनाम्नां संकीर्त्तनमेव पुंसां पापनाशायाऽलं भवति, यतो महापापी अजामिलोऽपि पुत्रव्याजेन "नारायण" इति नामोच्चारयन् मुक्तिमवाप ॥२४॥ देव्या मायया मोहितमतिः माधुर्यभरितयां त्रय्यां जडीकृतमतिः, यज्ञादिकर्मणि युज्यमानमतिश्च एते सर्वे स्मृतिकारादयो महाजना नाममाहात्म्यादिकं न विदुः ॥२५॥ ये सुधियो जना नाममाहात्म्यादिकं विचार्यऽनन्ते भगवति हरौ सर्वात्मना भक्तियोगं विदधते, ते मे दण्डं नार्हन्ति, यद्यमीषां पातकं स्यात् तर्हि तदपि भगवतो नामगुणानुवादः क्षपयति ॥२६॥ ये साधुगुणयुक्ता जनाः समदृशः, भगवत्प्रपन्नाः, येषां पवित्रागाथा देवैः सिद्धैश्च परिगीता स्युः, तत्समीपं यूयं न गच्छत, हरेर्गदया परिगुप्तान् तान् संसृतिभयं नास्ति, तेषां दण्डविधाने वयं न प्रभवामः ॥२७॥ अजस्रनिष्कामैः रसज्ञैः परमहंसवृन्दैः संसेवितात् मुकुन्दपादारविन्दरसाद् विमुखान् पापिष्ठान्, निरयद्वारभूते गृहे भार्यादौ च बद्धतृष्णान् दुर्जनान् आनयध्वम् ॥२८॥ येषां जिह्वा भगवद्गुणनामधेयं न वक्ति, येषां चेतो भगवच्चरणारविन्दं न स्मरति, यच्छिरः सकृदपि श्रीहरये नो नमति, तान् अकृतविष्णु

तत् क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः। स्वानामहो न विदुषां रचिताञ्जलीनां क्षान्तिर्गरीयसि नमः पुरुषाय भूम्ने।।३०।। *श्रीशुक उवाच* – तस्मात्संकीर्त्तनं विष्णोर्जगन्मङ्गलमंहसाम्। महतामपि कौरव्य विद्ध्येकान्तिकनिष्कृतिम्।।३१।। शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः। यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः।।३२।। कृष्णाङ्घ्रिपद्ममधुलिट् न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु। अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात्।।३३।। इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते। तेनाच्युताश्रयजनं प्रतिशङ्कमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ।।३४।। इतिहासमिमं गुह्यं भगवान् कुम्भसंभवः। कथयामास मलय आसीनो हरिमर्चयन्।।३५।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे तृतीयोऽध्यायः।।३।।

।। सङ्ग्रहोक्तिः ।।

कृत्यान् दुष्टानानयत।।२९।। अस्मद्दूतैर्यद् अपराद्धं तत् पुराणपुरुषो भगवान् नारायणः क्षम्यताम्, स्वीयानामज्ञानां विहिताञ्जलीनामस्माकमुपरि क्षमाविधानं भगवति योग्यमेव, तस्मै भूम्ने पुरुषाय नमः।।३०।। *श्रीशुक उवाच* – हे कौरव्य! तस्मात् जगन्मङ्गलं विष्णोः संकीर्तनं महतामपि पापानां मुख्यं प्रायश्चित्तं विद्धि।।३१।। हरेः विपुलानि यशांसि पुनः पुनः शृण्वतां कथयतां च चित्तं यथा भगवत्कथादिश्रवणेन जातया भक्त्या शुद्धेत् तथा व्रतादिप्रायश्चित्तैर्न शुद्ध्येत।।३२।। कृष्णाङ्घ्रिसरोजरसास्वादी जनो दुरितापादकेषु मायागुणेषु न सज्जते, तद्रसरहितस्तु कामहतः सन् निजदोषान् मार्ष्टुं प्रायश्चित्तरूपं कर्म कुर्यात्, यतः कर्मणा पुनः पापमेव स्यात्।।३३।। हे राजन्! इत्थं स्वभर्त्रा कथितं भगवतो माहात्म्यं ज्ञात्वा विस्मिता यमकिंकरा भगवद्भक्तं प्रति शंकमानाः सन्तः तदारभ्य भगवज्जनं निरीक्षितुमपि बिभ्यति स्म।।३४।। मलयाचल आसीनो भगवान् अगस्त्यो हरिं ध्यायन् इमं गुह्यमितिहासं महर्षीन् कथयामास।।३५।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

राजोवाच - देवासुरनृणां सर्गो नागानां मृगपक्षिणाम्। सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेऽन्तरे।।१।। तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा । अनुसर्गं यया शक्त्या ससर्ज भगवान्परः।।२।। *सूत उवाच* - इति संप्रश्नमाकर्ण्य राजर्षे-र्बादरायणिः। प्रतिनन्द्य महायोगी जगाद मुनिसत्तमाः।।३।। *श्रीशुक उवाच*-यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः। अन्तःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम्।।४।। द्रुमेभ्यः क्रुद्ध्यमानास्ते तपोदीपितमन्यवः। मुखतो वायुमग्निं च ससृजुस्त-द्दिधक्षया।।५।। ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह। राजोवाच महान् सोमो मन्युं प्रशमयन्निव ।।६।। *चन्द्र उवाच* - मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ। विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः।।७।। आदौ प्रजापतिपतिर्भगवान् हरिरव्ययः। वनस्पतीनोषधीश्च ससर्जोर्ज्जमिषं विभुः।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ चतुर्थोऽध्यायः ।।४।।

प्रजासृष्ट्यै दक्षकृतं हंसगुह्यस्तोत्रेण स्तवनम्

राजोवाच - स्वायम्भुवे मन्वन्तरे देवा-ऽसुर-नर-नाग-मृग-पक्षिणां सर्गः संक्षिप्तस्त्वया प्रोक्तः।।१।। हे मुने! तस्यैव सर्गस्य विस्तारं त्वत्तो ज्ञातुमिच्छामि, यथा भगवान् यया शक्त्या यं यं व्यष्टिसर्गं ससर्ज।।२।। *सूत उवाच* - हे मुनिसत्तमाः! इति राजर्षेः परीक्षितः संप्रश्नमाकर्ण्य प्रतिनन्द्य च महायोगी बादरायणिर्जगाद।।३।। *श्रीशुक उवाच* - प्राचीनबर्हिषो दशपुत्रा प्रचेतसो यदा समुद्रमध्याद् बहिर्निर्गताः, तदा ते भूमिं वृक्षैर्वृतां ददृशुः।।४।। तदा तेषां वृक्षाणामुपरि कुपितास्ते तद्दिधक्षया मुखाद् वायुमग्निं च ससृजुः।।५।। हे नृपते! वायुवह्निभ्यां निर्दह्यमानान् वृक्षान् दृष्ट्वा महान् सोमो राजा प्रचेतसः प्राप्य च तत्क्रोधं शमयन्निवोवाच।।६।। *चन्द्र उवाच* - हे महाभागाः! दीनेभ्यो द्रुमेभ्यो द्रोग्धुं माऽर्हथ, यतो यूयं लोकान् वर्द्धयितुमिच्छवः प्रजापतयः स्मृताः।।७।। अहो! प्रजापतीनामपि पतिर्भगवान् हरिर्वनस्पतीनौषधीरन्नं च प्रजानां हेतवे ससर्ज।।८।।

अन्नं चराणामचरा ह्यपदः पादचारिणाम्। अहस्ता हस्तयुक्तानां द्विपदां च
चतुष्पदः।।९।। यूयं च पित्राऽन्वादिष्टा देवदेवेन चानघाः। प्रजासर्गाय हि कथं
वृक्षान्निर्दग्धुमर्हथ।।१०।। आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् । पित्रा
पितामहेनाऽपि जुष्टं वः प्रपितामहैः।।११।। तोकानां पितरौ बन्धू दृशः पक्ष्म
स्त्रियाः पतिः। नृपः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत्।।१२।। अन्तर्देहेषु
भूतानामात्माऽऽस्ते हरिरीश्वरः। सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ।।१३।।
यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् । आत्मजिज्ञासया यच्छेत्स गुणा-
नतिवर्त्तते।।१४।। अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः। वार्क्षी ह्येषा वरा
कन्या पत्नीत्वे प्रतिगृह्यताम्।।१५।। *श्रीशुक उवाच* - इत्यामन्त्र्य वरारोहां
कन्यामाप्सरसीं नृप ।सोमो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे।।१६।।तेभ्यस्तस्यां
समभवत् दक्षः प्राचेतसः किल।

।। सङ्ग्रहोक्तिः।।

चराणां, पादचारिणां, हस्तयुक्तानां द्विपदां, गवादिचतुष्पदां च अपदः अचराः अहस्ताः
वृक्षौषधिघासादयोऽन्नमस्ति।।९।। हे प्रचेतसः! यूयं पित्रा, तपसा तोषितेन भगवता च
प्रजासर्गायाऽन्वादिष्टाः, अत एवं वृक्षान् निर्दग्धुं कथमर्हथ।।१०।।युष्माकं पित्रा, पितामहेन
प्रपितामहेन च सेवितं साधूनां मार्गमाश्रयत, उद्दीपितं कोपमुपसंहरत च।।११।। बालानां
बन्धू=रक्षकौ पितरौ, दृष्टेर्बन्धुः पक्ष्म, स्त्रिया बन्धुः पतिः, प्रजानां बन्धुर्नृपः, भिक्षूणां
बन्धुर्गृहस्थः, एवमज्ञानां बन्धुर्ज्ञानदो बुधः कथितोऽस्ति।।१२।। भूतानां देहान्तर्वर्तिजीवेषु
परमेश्वरस्तदन्तरात्मा सन् तिष्ठति, अतः सर्वं तदावासस्थानमीक्षध्वम्, एवमीक्षणे कृते सती
भगवान् वो तुष्टो भवति।।१३।। अकस्मादागतं कोपं यः स्वात्मपरमात्मयाथात्म्यविचारेण
शमयति स क्रमेण बन्धाद् विमुच्यते।।१४।।अतो दीनद्रुमदाहनेनाऽलम्, अवशिष्टानां द्रुमाणां
युष्माकं च शिवमस्तु, वृक्षैः पालितामेतां वरां मारिषाख्यां कन्यां पत्नीत्वेन यूयं प्रतिगृह्णन्तु।।१५।।
श्रीशुक उवाच - इत्थं सान्त्वयित्वा प्रम्लोचाप्सरसो देहजां वरारोहां कन्यां तेभ्यो दत्वा सोमो
राजा ययौ, ततस्ते प्रचेतसो धर्मेण तामेकामुपयेमिरे।।१६।।प्रचेतेभ्यो मारिषायां दक्षः पुत्रोऽभवत्

यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः।।१७।। यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः। रेतसा मनसा चैव तत् ममावहितः शृणु।।१८।। मनसैवाऽसृजत्पूर्वं प्रजापतिरिमाः प्रजाः। देवासुरमनुष्यादीन्नभःस्थलजलौकसः।।१९।। तमबृंहित-मालोक्य प्रजासर्गं प्रजापतिः। विन्ध्यपादानुपव्रज्य सोऽचरत् दुश्चरं तपः।।२०।। तत्राघमर्षणं नाम तीर्थं पापहरं परम्। उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम्।।२१।। अस्तौषीद्धंसगुह्येन भगवन्तमधोक्षजम् । तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः।।२२।। *दक्ष उवाच* – नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे। अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानावधये स्वयंभुवे।।२३।। न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन्। गुणो यथा गुणिनोऽ-व्यक्तदृष्टिस्तस्मै महेशाय नमस्करोमि।।२४।। देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत्।

।। सङ्ग्रहोक्तिः।।

यस्य दक्षस्य प्रजाविसर्गेण त्रयो लोका आपूरिता अभवन्।।१७।। दक्षो रेतसा मनसा च यथा भूतानि ससर्ज, तद् वदतो मम मुखाद् एकाग्रमनाः सन् शृणु।।१८।। प्रजापतिर्दक्षो देवासुरमनुष्यादीन् जलस्थलखौकस इमाः प्रजाः प्रथमं मनसैवाऽसृजत्।।१९।। तं प्रजासर्गमसंवर्द्धमानमालोक्य प्रजापतिर्दक्षो विन्ध्यस्य प्रत्यन्तपर्वतान् उपव्रज्य दुश्चरं तपोऽतप्यत्।।२०।। तत्र विन्ध्यपादेष्वघमर्षणं नाम सर्वोत्तमं तीर्थं भवति, तत्र त्रिकालं सम्यक् स्नात्वा तपसा हरिमतोषयत्।।२१।। दक्षो हंसगुह्येन स्तोत्रेण भगवन्तमस्तौषीत्, येन स्तोत्रेण हरिर्दक्षोपरि तुष्टोऽभूत् तत्स्तोत्रं तुभ्यं कथयामि ।।२२।। *दक्ष उवाच* – चिदचिद्वि-लक्षणाय, सत्यसंकल्पाय प्रकृतिशरीराय, त्रिविधपरिच्छेदरहितस्वरूपाय, अनुपलक्षित स्वरूपाय स्वयंभुवे तुभ्यं नमः।।२३।। अस्मिन् देहे संवसतः सर्वथा हितकारिणः सख्युः परमात्मनो निकटे वसन्नपि जीवः परमात्मनः सख्यं न वेद, तस्मै जीवस्य परममित्राय महेशाय नमस्करोमि।।२४।। देहः, प्राणाः, इन्द्रियाणि, मनश्च एते सर्वे स्वस्वरूपं न विदन्ति, जीवस्तु स्वस्वरूपमिन्द्रियगणं देववर्गं च वेत्ति, किन्तु सर्वज्ञमीश्वरं न जानाति, तमनन्तं –

सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ।।२५।। यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ।।२६।। मनीषिणोऽन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः। वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कर्षन्ति गूढम् ।।२७।। स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः। स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ।।२८।। यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य। मा भूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्गलक्षणः ।।२९।। यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्य्यते च। परावरेषां परमं प्राक् प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम् ।।३०।। यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति। कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ।।३१।। अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः। अपेक्षितं किंचन सांख्ययोगयोः समं परं ह्यनुकुलं बृहत्तत् ।।३२।।

।। सङ्ग्रहोक्तिः ।।

विष्णुमहं स्तौमि ।।२५।। नामरूपात्मकयोर्दर्शनस्मरणयोर्लयेन यदा मन एकाग्रं भवति, तदा केवलेन ज्ञानेन यो दृष्टिगोचरो भवति, तस्मै पवित्रतेजसे हंसाय नमस्करोमि ।।२६।। यथा याज्ञिकाः पञ्चदशसामिधेनीमन्त्रैः काष्ठे गुप्तरूपेण स्थितमग्निं बहिर्निःसारयन्ति तथैव हृदये स्थितं गूढं त्रिकत्रयावर्तनमापन्नाभिः शक्तिभिः सह स्वमनिषया ज्ञानिनश्चिन्तयन्ति, स मायाया निवारणेन मोक्षानुभवस्वरूपः सर्वनामा स भगवानस्माकं प्रसीदतु ।।२७-२८।। वाचा धिया, अन्यैरिन्द्रियैः, मनसा वा यत् उक्तं निर्णीतं चिन्तितं वाऽनुभूतं तत् यस्य तत्त्वं न भवति, तद् वाङ्मनसोः परं, जगदुत्पत्तिस्थितिलयकारणं च परमात्मतत्त्वमस्ति ।।२९।। परावरेषां प्राक् परमं प्रसिद्धं भावकर्मादिप्रययार्थं स्वरूपं कर्ता कर्म करणादि सप्तविभक्तिप्रतिपादितं यदेकं ब्रह्म, तस्मै नमोस्तु ।।३०।। विवदतां वादिनां विवादसंवादहेतुभूता यस्य शक्तयो ज्ञानिनामपि मनःसु मोहं जनयन्ति, तस्मा अनन्तगुणाय भूम्ने नमस्करोमि ।।३१।। भगवदाराधनशास्त्रानुसारं यस्य करचरणादिसहितं स्वरूपं, निरस्तनिखिलहेयप्रत्यनीकं च अस्ति, केचिद् तत्स्वरूपं निरवयवं

योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः। नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु।।३३।। यः प्राकृतैर्ज्ञानपथैर्जनानां यथाऽऽशयं देहगतो विभाति। यथाऽनिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान् मनोरथम्।।३४।। *बादरायणि-रुवाच* - इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे। आविरासीत् कुरुश्रेष्ठ भगवान् भक्तवत्सलः।।३५।। कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः। चक्रशङ्खासिचर्मेषुधनुष्पाशगदाधरः।।३६।। पीतवासा घनश्यामः प्रसन्नवदनेक्षणः। वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः।।३७।। महाकिरीटकटकः स्फुरन्मकरकुण्डलः। काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः ।।३८।। त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः। वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः। स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः।।३९।।

।। सङ्ग्रहोक्तिः।।

निरंजनं कथयन्ति, एवं परस्परविरुद्धशास्त्रयोरनुकूलं यत् परं ब्रह्म तस्मै नमस्करोमि।।३२।। योऽनन्तो भगवान् चरणसेविनामनुग्रहार्थं कर्मकृतनामरूपरहितः सन्नपि जन्मकर्मभिः नामानि रूपाणि च भेजे, स परमपुरुषो भगवान् मह्यं प्रसीदतु।।३३।। जनानामर्वाचीनैरुपासनामार्गैः तत्तद्वासनानुसारेण यो भवान् देहगतः सन्नपि तत्तत् देवरूपेण भाति, यथाऽनिलः तत्तत् गुणरहितोऽपि रूपगन्धादिगुणान् दर्शयति, तद्वत् स परमेश्वरो मे मनोरथान् सफलीकरोतु ।।३४।। *बादरायणिरुवाच* - हे कुरुश्रेष्ठ! इति दक्षेण स्तुतो भक्तवत्सलो भगवान् तस्मिन्नघमर्षणे तीर्थे संस्तुवतो दक्षस्य पुरस्ताद् आविरासीत् ।।३५।। गरुडस्कन्धयोः कृतपादः प्रलम्बाष्टमहाभुजः, चक्र-शङ्खा-ऽसि-चर्म-इषु-धनुष्-पाश-गदाधरः।।३६।। पीताम्बरः, घनश्यामः, प्रसन्नवदनेक्षणः वनमालावृताङ्गः, लसच्छ्रीवत्स-कौस्तुभः।।३७।। महाकिरीटकटकः, स्फुरन्मकरकुण्डलः, काञ्ची-अङ्गुलीय-वलय-नूपुरा-ऽङ्गद भूषितः।।३८।।(भगवान् दक्षस्य पुरस्ताद् आविरासीत्) त्रिभुवनेश्वरः स त्रैलोक्यमोहनं रूपं बिभ्राण आसीत्, नारदादिस्वपार्षदैर्वृतः ससुरवृन्दैः अनुगायद्भिः सिद्धगन्धर्वचारणैः स्तूयमानोऽभवत्।।३९।।

रूपं तन्महदाश्चर्यं विचक्ष्य गतसाध्वसः। ननाम दण्डवद्भूमौ प्रहृष्टात्मा प्रजापतिः।।४०।। न किंचनोदीरयितुमशकत्तीव्रया मुदा। आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः।।४१।। तं तथाऽवनतं भक्तं प्रजाकामं प्रजापतिम्। चित्तज्ञः सर्वभूताना-मिदमाह जनार्दनः।। ४२।। *श्रीभगवानुवाच* – प्राचेतस महाभाग संसिद्धस्तपसा भवान् । यच्छ्रद्धया मत्परया मयि भावं परं गतः।। ४३ ।। प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योदबृंहणं तपः। ममैष कामो भूतानां यद्भूयासुर्विभूतयः।।४४।। ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः। विभूतयो मम ह्येता भूतानां भूतिहेतवः।।४५।। तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाकृतिः। अङ्गानि क्रतवो यज्ञा धर्म आत्माऽसवः सुराः।।४६ ।। अहमेवासमेवाग्रे नान्यत् किंचान्तरं बहिः। संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः।।४७।। मय्यनन्तगुणेऽनन्ते गुणतो गुणविग्रहः। यदासीत्तत एवाद्यः स्वयंभूः समभूदजः।। ४८।।

।। सङ्ग्रहोक्तिः।।

महदाश्चर्यकरं भगवतस्तद्रूपं व्यालोक्य वीतभयः प्रजापतिर्दक्षः प्रसन्नचित्तः सन् भूमौ दण्डवन्ननाम।।४०।। स हर्षातिरेकेण निरुद्धमना गद्गदकण्ठः सन् किंचिदपि मनीषितं वक्तुं नाऽशकत्।।४१।। स्वाग्रे नम्रं भक्तं प्रजाकामं प्रजापतिं दक्षं तदभिप्रायविद् जनार्दनो भगवानिदमाह।।४२।। हे महाभाग! प्राचेतस! भवान् तपसा सिद्धः, मत्परया श्रद्धया त्वं मयि परां भक्तिं प्राप्तोऽसि।।४३।। हे प्रजानाथ! अहं तुभ्यं प्रीतः, तव तपोऽस्य जगतो वृद्धिकरं वर्तते, ममैषा कामना, यद् भूतानां समृद्धयो भूयासुः, अतोऽहं ते प्रसन्नोऽस्मि।।४४।। ब्रह्मा, भवः, भवन्तः प्रजापतयः, मनवः इन्द्रादिदेवप्रवराश्च एताः सर्वा मम विभूतयो भूतानां समृद्धिहेतवो भवन्ति।।४५।। हे ब्रह्मन्! तपो मे हृदयम्, विद्या शरीरम्, ध्यानादिप्रवृत्तिः मे आकृतिः क्रतवो यज्ञाश्च ममाऽवयवाः, धर्मो मे आत्मा, सुरा मे प्राणा भवन्ति।।४६।। अग्रे सृष्टेः प्राक् अहमेवाऽऽसम्, अन्यद् आन्तरं बहिः किंचिद् नाऽऽसीत्, केवलं नामरूपविभागरहितं प्रधानं अनन्तगुणाकरेऽनन्ते मच्छरीरत्वेनाऽऽसीत्, ततो गुणत्रयात् त्रिगुणपरिणामात्मको ब्रह्माण्डात्मको मम देहो जातः, ततो वैराजपुरुषात् ब्रह्माऽभूत्।।४७-४८।।

स वै यदा महादेवो मम वीर्योपबृंहितः। मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि ।।४९।। अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम्। नव विश्वसृजो युष्मान्येनादाव-सृजद्विभुः ।।५०।। एषा पञ्चजनस्याङ्ग दुहिता वै प्रजापतेः। असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ।।५१।। मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः। मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ।।५२।। त्वत्तोऽधस्तात् प्रजाः सर्वा मिथुनीभूय मायया। मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम् ।।५३।। *श्रीशुक उवाच* - इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः। स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ।।५४।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे चतुर्थोऽध्यायः ।।४।।

।। सङ्ग्रहोक्तिः ।।

स ब्रह्मा मम संकल्पेन वृद्धिं प्राप्तः सन् सर्गकर्मण्युद्यतो जातः, किंतु तत्र स आत्मानम-समर्थमिव मेने ।।४९ ।। ततो मया कथितो ब्रह्मा दारुणं तपोऽतप्यत, तेन तपोबलेनाऽऽदौ स युष्मान् नव प्रजापतीन् ससर्ज ।।५०।। हे दक्ष! संप्रति प्रजपतेः पञ्चजनस्य दुहितरमसिक्नीं पत्नीत्वेन प्रतिगृह्यताम् ।।५१।। स्त्रीपुंसोर्मैथुनधर्ममाश्रित्य त्वमस्यामसिक्न्यां पुनर्भूरिशः प्रजासर्गं वर्द्धयिष्यसि ।।५२।। त्वत्तोऽर्वाचीन्यः सर्वाः प्रजा मदीयेन संकल्पेन मैथुनकर्मणैवोत्पत्स्यन्ते, तथा च मदाराधनरूपं यज्ञादि कर्म च करिष्यन्ति ।।५३।। इत्थमुक्त्वा विश्वोत्पादको हरिर्दक्षस्य पश्यतः सतस्तत्रैवाऽन्तर्दधे ।।५४।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः ।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

श्रीशुक उवाच – स तस्यां पाञ्चजन्यां वै विष्णुमायोपबृंहितः। हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ।।१ ।। अपृथक्धर्मशीलास्ते सर्वे दाक्षायणा नृप। पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ।।२ ।। तत्र नारायणसरस्तीर्थं सिन्धुसमुद्रयोः। संगमो यत्र सुमहत् मुनिसिद्धनिषेवितम् ।।३ ।। तदुपस्पर्शनादेव विनिर्द्धूतमलाशयाः। धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ।।४ ।। तेपिरे तप एवोग्रं पित्रादेशेन यन्त्रिताः। प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ।।५ ।। उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः। अदृष्ट्वाऽन्तं भुवो यूयं बालिशा बत बालकाः ।।६ ।। तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमम्। बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ।।७ ।। नदीमुभयतोवाहां पञ्चपञ्चाद्भुतं गृहम्। क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ।।८ ।। कथं स्वपितुरादेशमविद्वांसो विपश्चितः। अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ।।९ ।।

।। सङ्ग्रहोक्तिः ।।

अथ पञ्चमोऽध्यायः ।।५।।

नारदोपदेशात् सृष्टिविमुखान् सुतान् वीक्ष्य नारदाय दक्षशापः

श्रीशुक उवाच – भगवत्संकल्पेन दक्षः पाञ्चजन्यां पत्न्यां हर्यश्वसंज्ञान् दशसहस्रसंख्यकान् पुत्रानजनयत् ।।१ ।।हे नृप! सर्वे ते दक्षपुत्राः समानधर्मशीलाः प्रजासर्गाय पित्रा दक्षेणाऽऽदिष्टाः सन्तः प्रतीचीं दिशं ययुः ।।२ ।। तत्र दिशि सिन्धुसमुद्रयोः संगमे नारायणसरो नाम सुमहत् पुण्यं मुनिसिद्धनिषेवितं तीर्थं वर्तते ।।३ ।। तत्तीर्थोदके स्नानाचमनादिना विशुद्धान्तःकरणानां तेषां मनसि पारमहंस्ये धर्मे रुचिरुत्पन्ना ।।४ ।। पित्रादेशेन वशीकृतास्ते प्रजाविवृद्धये तत्र तीव्रं तपोऽतप्यन्त, तदा देवर्षिर्नारदस्तान् ददर्श ।।५ ।। नारदस्तत्र गत्वा हर्यश्वानाह – हे बाला! यूयमज्ञाः स्थ, भूवोऽन्तमदृष्ट्वा प्रजाः किमर्थं स्रक्ष्यथ ।।६ ।। तथा एकपुरुषं राष्ट्रं, अज्ञातनिर्गमां बहुरूपां स्त्रीम्, पुंश्चलीपतिं पुरुषम्, उभयतोवाहिनीं नदीम्, पञ्चविंशत्याश्चर्यं गृहम्, चित्रकथं हंसम्, स्वतो भ्रममाणं क्षौरपव्यम्, स्वयं विदुषः पितुरादेशं सम्यग् अविज्ञायाऽनुरूपं प्रजासर्गं कथं करिष्यथ ।।७-९ ।।

श्रीशुक उवाच -तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया। वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ।।१०।। *हर्यश्वा ऊचुः*- भूः क्षेत्रं जीवसंज्ञं यदनादिनिजबन्धनम्। अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ।।११।। एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः। तमदृष्ट्वा भवं पुंसः किमसत्कर्मभिर्भवेत् ।।१२।। पुमान्नैवैति यद्गत्वा बिलस्वर्गं गतो यथा। प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् ।।१३।। नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता। तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ।।१४।। तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत्। तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ।।१५।। सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगिताम्। मत्तस्य तामविज्ञाय किमसत्कर्मभिर्भवेत् ।।१६।। पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम्। अध्यात्मम-बुधस्येह किमसत्कर्मभिर्भवेत् ।।१७।। ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् । विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ।।१८।।

।। सङ्ग्रहोक्तिः ।।

श्रीशुक उवाच- हर्यश्वा, देवर्षेस्तद् वचः श्रुत्वा स्वभावसिद्धविचारशक्त्या देवर्षेः कूटवचनानि स्वयमेव विममृशुः ।।१०।। *हर्यश्वा उचुः*- जीवसंज्ञं भुवः क्षेत्रमनादिपुण्यपापरूपकर्मनिबन्धनम् तस्य प्रकृतौ लयमदृष्ट्वाऽसद्भिः कर्मभिः किं भवेत् ।।११।। सर्वेषां प्राणिनामेक एव भगवान् परमाश्रयः सर्वसाक्षी चाऽस्ति तं जीवभवनिवर्तकं भगवन्तमज्ञात्वाऽसद्भिः कर्मभिः को लाभः? ।।१२।। पातालं गत इव जीव यद्धाम - भगवदुपासनया मुक्तभावं प्राप्तस्याऽऽत्मनो निवासभूतं ब्रह्मधाम अविदुषः पुरुषस्याऽसत्कर्मभिः किं भविष्यति ।।१३।। नानारूपा बुद्धीरज आदिगुणैर्युक्ता पुंश्चली स्त्रीव चंचलाऽस्ति तस्या विवेकं विनाऽसत्कर्मभिः किं स्यात् ।।१४।। बुद्धिसंगाद् भ्रष्टैश्वर्यं कुभार्यवत् संसारे भ्रमन्तं जीवमविज्ञायाऽविवेककृतैरसत्कर्मभिः किं भविष्यति ।।१५।। जन्ममरणकरीमत्यन्तवेगवतीं मायामविज्ञाय तद्वेगविवशस्य मायिकैः को लाभः ।।१६।। चतुर्विंशतितत्त्वात्रिका प्रकृतिः, पञ्चविंशो जीवः, इत्येवं पञ्चविंशतितत्त्वानि, तेषामद्भुतकर्मभिः किं भवेत् ।।१७।। बन्धमोक्षप्रदर्शकं ईश्वरतद्धामादिसत्यताप्रतिपादकं शास्त्रमनभ्यस्य वर्तमानस्याऽसद्भिः कर्मभिः को लाभः ।।१८।।

कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत्। स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत्।।१९।। शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकम्। कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमेत्।।२०।। *श्रीशुक उवाच* – इति व्यवसिता राजन् हर्यश्वा एकचेतसः। प्रययुस्तं परिक्रम्य पन्थानमनिवर्त्तनम्।।२१।। स्वरब्रह्मणि निर्भातहृषीकेशपदाम्बुजे। अखण्डं चित्तमावेश्य लोकाननुचरत् मुनिः।।२२।। नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् । अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदम्।।२३।। स भूयः पाञ्चजन्यायामजेन परिसान्त्वितः। पुत्रानजनयद्दक्षः सबलाश्वान् सहस्रशः।।२४।। तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः। नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः।।२५।। तदुपस्पर्शनादेव विनिर्धूतमनोमलाः। जपन्तो ब्रह्म परमं तेपुस्तत्र महत्तपः।।२६।। अब्भक्षाः कतिचिन्मासान् कतिचिद्वायुभोजनाः। आराधयन्मन्त्रमिममभ्यसन्त इडस्पतिम् ।।२७।। ॐ नमो नारायणाय पुरुषाय महात्मने।

।। सङ्ग्रहोक्तिः ।।

आब्रह्मस्तम्बपर्यन्तं सर्वं जगत् त्रोटयत् स्वतन्त्रं भ्रमत् तीक्ष्णं कालचक्रमविज्ञाय पुंसोऽसत्कर्मभिः किं स्यात्।।१९।।शास्त्ररूपस्य पितुः निवर्तकमादेशं यो न वेद स पुमान् त्रिगुणात्मके प्रवृत्तिमार्गे विश्वस्तः सन् सृष्ट्यादिकर्मणि कथं प्रवृत्तो भविष्यति।।२०।। *श्रीशुक उवाच* – नारदोपदेशानुसारेण कृतनिश्चयास्ते हर्यश्वास्तं प्रदक्षिणीकृत्य मोक्षमार्गमनुजग्मुः।।२१।। ततो नारदोऽपि वल्लकीस्वरे साक्षात्कृतपरमात्मचरणकमले मन आवेश्य लोके पर्यटनमकरोत् ।।२२।। सुशीलानां पुत्राणां नारदात् नाशमाकर्ण्य दक्षो दुःखितोऽभवत्।।२३।। ततो ब्रह्मणाऽऽश्वासितो दक्षो भूयः पाञ्चजन्यां सबलाश्वसंज्ञान् सहस्रशः पुत्रानजनयत्।।२४।। पित्रा दक्षेण प्रजासृष्टावादिष्टास्तेऽपि पुत्रा धृतव्रताः सन्तो नारायणसरो ययुः, यत्र तेषां पूर्वभ्रातरः सिद्धा अभूवन्।।२५।। तत्र सरसि स्नानाचमनादिविधानात् निर्मलान्तःकरणास्ते प्रणवं - वक्ष्यमाणमंत्रं वा जपन्तः सन्तो महत् तपस्तेपुः।।२६।। तत्र ते कतिचिन्मासान् उदकाहाराः कतिचिन्मासान् वायुभक्षाः सन्तो भगवन्तमाराधयन्तः "ॐ नमो नारायणाय पुरुषाय महात्मने,

विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ।।२८।। इति तानपि राजेन्द्र प्रजासर्गधियो मुनिः। उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् ।।२९।। दाक्षायणाः संशृणुत गदतो निगमं मम। अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ।।३०।। भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित्। स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ।।३१।। एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः। तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ।।३२।। सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः। नाद्यापि ते निवर्त्तन्ते पश्चिमा यामिनीरिव ।।३३।। एतस्मिन् काल उत्पातान् बहून्पश्यन्प्रजापतिः। पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ।।३४।। चुक्रोध नारदायासौ पुत्रनाशविमूर्च्छितः। देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ।।३५।। *दक्ष उवाच* - अहो असाधो साधूनां साधुलिङ्गेन यस्त्वया। असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ।।३६।। ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् । विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ।।३७।। एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः।

॥ सङ्ग्रहोक्तिः ॥

विशुसत्त्वधिष्ण्याय महाहंसाय धीमहि" इति मन्त्रं जेपुः ।।२७-२८।। हे राजेन्द्र! इत्थं मन्त्रं जपतः प्रजासर्गधियः, तान् सबलाश्वानपि नारदः पूर्ववदुपेत्य वाचः कूटानि प्राह ।।२९।। हे दक्षतनयाः! गदतो मम वचः शृणत, भ्रातृवत्सला यूयं भ्रातॄणां मार्गमनुसरत ।।३०।। धर्मज्ञो यो पुरुषो भ्रातॄणां मार्गमनुसरति स पुण्यबन्धुर्देवैः सह मोदते ।।३१।। सफलदर्शनो नारद एतावदुक्त्वा प्रययौ, ते दक्षपुत्रा अपि भगवदुपासनरूपं भ्रातॄणां मार्गमन्वगमन् ।।३२।। अनुकूलमर्चिरादिमार्गं गतास्ते सबलाश्वा अतीता रात्रय इवाद्यापि न पुनरावर्तन्ते ।।३३।। एतस्मिन् काले दक्षो बहून् उत्पातान् पश्यन् पूर्ववत् नारदकृतं पुत्रनाशमुपाशृणोत् ।।३४।। पुत्रनाशेन विमूर्च्छितो दक्षो नारदाय चुक्रोध, देवर्षिं तमुपलभ्य रोषविस्फूरिताधरः सन्नाह ।।३५।। *दक्ष उवाच* - अहो, हे असाधो! साधुवेषेण त्वया सदाचाराणां ममार्भकाणां योऽयं संन्यासिनो मार्गः प्रदर्शितः, तदसाधु कृतम् ।।३६।। हे पाप! देवर्षिपितॄणां ऋणैरमुक्तानामविचारितकर्मणां मत्सुतानामुभयोर्लोकयोः श्रेयोविघातस्त्वया कृतः ।।३७।।

पार्षदमध्ये चरसि यशोहा निरपत्रपः।।३८।। ननु भागवता नित्यं भूतानुग्रहकातराः।ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणाम्।।३९।। नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा। मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम्।।४०।। नानुभूय न जानाति पुमान् विषयतीक्ष्णताम्। निर्विद्येत स्वयं तस्मान्न तथा भिन्नधीः परैः।।४१।। यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनाम्। कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम्।।४२।। तन्तुकृन्तन यन्नस्त्वमभद्रमचरः पुनः। तस्माल्लोकेषु ते मूढ न भवेद् भ्रमतः पदम्।।४३।। *श्रीशुक उवाच* – प्रतिजग्राह तद्बाढं नारदः साधुसंमतः। एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयम् ।।४४।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पञ्चमोऽध्यायः ।। ५ ।।

।। सङ्ग्रहोक्तिः ।।

एवं निर्दयो बालानां मतिभ्रमकारी यशोघ्नस्त्वं निर्लज्जः सन् विष्णुपार्षदानां मध्ये कथं चरसि?।।३८।। ननु हे नारद! अवैरिणां वैरं करं सौहृदघ्नं त्वां विना सर्वे भागवतास्तु नित्यं भूतानुग्रहपरवशा वै, त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जसे?।।३९।। त्वमेवं वैराग्यं मन्यसे, तथापि पुंसामित्थं विरागो न स्यात्, मिथ्या वेषभृता त्वया मतिचालने कृतेऽपि स्नेहपाशनिकृन्तनं न जायते।।४०।। पुमान् विषयाणां दुःखरूपतामननुभूय स्वयमेव विषयान्न निर्विद्येत, तथैव परैर्भिन्नधीरपि न विरज्येत।।४१।। त्वं कर्ममर्यादापालकानां साधूनां गृहस्थानामस्माकं दुःसहं विप्रियं कृतवानसि, तदप्यस्माभिः सोढम्।।४२।। हे सन्तानविच्छेदक! त्वं पुनरस्माकमभद्रं कृतवानसि, तस्माद् हे मूढ! लोकेषु भ्रमतस्ते स्थानं क्वचिदप्येकत्र न स्यात्।।४३।। *श्रीशुक उवाच* – साधुजनमान्यो नारदस्तत्कृतं शापवचनं बाढमिति जग्राह, यतः स्वयं समर्थः सन्नपि सहेत एतावानेव साधूनां स्वभावो विद्यते।।४४।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः।।५।।

अथ षष्ठोऽध्यायः।।६।।

श्रीशुक उवाच – ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा। षष्टिं संजनयामास दुहितृः पितृवत्सलाः।।१।। दश धर्माय कायेन्दोर्द्विषद् त्रिनव दत्तवान्। भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः।।२।। नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु। यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः।।३।। भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती। वसुर्मुहूर्त्ता संकल्पा धर्मपत्न्यः सुतान् शृणु।।४।। भानोस्तु वेदऋषभ इन्द्रसेनस्ततो नृप। विद्योत आसील्लम्बायास्ततश्च स्तनयित्नवः।।५।। ककुभः संकटस्तस्य कीकटस्तनयो यतः। भुवो दुर्गाणि जामेयः स्वर्गो नन्दिस्ततो-ऽभवत्।।६।। विश्वेदेवास्तु विश्वाया अप्रजांस्तान् प्रचक्षते। साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः।।७।। मरुत्वांश्च जयन्तश्च मरुत्वत्यां बभूवतुः। जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः।।८।।

।। सङ्ग्रहोक्तिः।।

अथ षष्ठोऽध्यायः।।६।।

दक्षस्य षष्टिकन्यानां विवाहः, विश्वरूपस्योत्पत्तिश्च

श्रीशुक उवाच – ततो ब्रह्मणा सान्त्वितो दक्षोऽसिक्न्यां भार्यायां पितृवत्सलाः षष्टिं कन्याः संजनयामास।।१।। तासां मध्ये धर्माय दश, कश्यपाय त्रयोदश, चन्द्राय सप्तविंशतिः, भूताय द्वे, अंगिरसे द्वे, कृशाश्वाय द्वे, तार्क्ष्येति नामधारिणे कश्यपाय चतस्रः कन्याः प्रादात्।।२।। अपत्यसहितानामासां कन्यानां नामानि शृणु, यासां सन्ततिभिर्निखिला त्रिलोकी परिपूर्णा बभूव।।३।। तत्र भानुः, लम्बा, ककुप्, जामिः, विश्वा, साध्या, मरुत्वती, वसुः, मुहूर्ता, संकल्पा चेति दश धर्मस्य पत्न्य आसन् आसां सुतान् शृणु।।४।। तासु भानोः पुत्रो देवऋषभः, तस्य पुत्र इन्द्रसेनः, लम्बायाः सुतो विद्योतः, तस्य स्तनयित्नव आसन्।।५।। ककुभः पुत्रः संकटस्तस्य तनयः कीकट जातः, कीकटाद् दुर्गाभिमानिनो देवा अभवन्, दक्षकन्यायाः जाम्याः सुतः स्वर्गः, स्वर्गान्नन्दिर्बभूव।।६।। विश्वाया विश्वेदेवास्ते च निःसन्ताना आसन्, साध्यायास्तु साध्यगणः, तत्सुतोऽर्थसिद्धिरभूत्।।७।। मरुत्वत्यां मरुवान् जयन्तश्च द्वौ पुत्रौ

मौहूर्त्तिका देवगणा मुहूर्त्तायाश्च जज्ञिरे। ये वै फलं प्रयच्छन्ति भूतानां स्वस्वकालजम् ।।९।। संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः। वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ।।१०।। द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः। द्रोणस्याभिमतेः पत्न्यां हर्षशोकभयादयः ।।११।। प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः। ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ।।१२।। अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः। अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ।।१३।। स्कन्दश्च कृत्तिकापुत्रो ये विशाखादयस्ततः। दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ।।१४।। वसोराङ्गिरसीपुत्रो विश्वकर्माऽऽकृतीपतिः। ततो मनुश्चाक्षुषोऽभूद्विश्वे साध्या मनोः सुताः ।।१५।। विभावसोरसूतोषा व्युष्टं रोचिषमातपम्। पञ्चयामोऽथ भूतानि येन जाग्रति कर्मसु ।।१६।। सुरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः। रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ।।१७।। अजैकपादहिर्बुध्न्यो बहुरूपो महानिति।

।। सङ्ग्रहोक्तिः ।।

जातौ, तयोर्मध्ये जयन्तो वासुदेवांश उपेन्द्रनाम्ना प्रसिद्धोऽभवत् ।।८।। मुहूर्ताया मौहूर्तिका देवा जाताः, ये प्राणिभ्यः स्वस्वकालजं फलं यच्छन्ति ।।९।। संकल्पायाः संकल्पः, तस्य सुतः कामो जातः, वसोरष्टौ सुता अभवन् तेषां नामानि यथा ।।१०।। ध्रुवः, प्राणः, द्रोणः, अर्कः, अग्निः, दोषः, वसुः, विभावसुः इति, द्रोणस्याऽभिमतिभार्यायां हर्षशोकभयादयः सुता अभवन् ।।११।। प्राणस्य ऊर्जस्वत्यां पत्न्यां सहः, आयुः, पुरोजवश्चेति त्रयः पुत्रा अभवन्, ध्रुवस्य धरण्यां भार्यायां विविधानगरदेवता बभूवुः ।।१२।। अर्कस्य वासनायां पत्न्यां तर्षादयः पुत्राः जाताः, अग्नेर्वसोर्धारायां पत्न्यां द्रविणकादयः पुत्रा बभूवुः ।।१३।। तस्यैवाग्नेरन्यस्यां भार्यायां कृत्तिकायां स्कन्दो जातस्तस्य विशिखादयः सूनवोऽभवन्, दोषस्य शर्वर्यां पत्न्यां शिशुमारो बभूव ।।१४।। वसोरांगिरस्यां विश्वकर्मा, तस्य चाक्षुषो मनुर्जातः, तस्य मनोर्विश्वे-साध्याश्चाभवन् ।।१५।। विभावसोरुषायां भार्यायां व्युष्टो रोचिः आतपश्चेति त्रयः पुत्राः अभवन्, आतपस्य दिवसः पुत्रो जज्ञे, भूतस्य सरूपायां पत्न्यां रैवतः, अजः, भवः, भीमः, वामः, उग्रः, वृषाकपिः, अजैकपात्, अहिर्बुध्न्यः, बहुरूपः, महांश्चेति एकादश सुनवोऽभवन्,

रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनायकाः।।१८।। प्रजापतेरङ्गिरसः स्वधा पत्नी पितृनथ । अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत्सती।।१९।। कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत्। धिषणायां वेदशिरो देवलं वयुनं मनुम्।।२०।। तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनी इति। पतङ्ग्यसूत पतगान्यामिनी शलभानथ।।२१।। सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनम्। सूर्यसूतमनुरुं च कद्रूर्नागाननेकशः।।२२।। कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत। दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः। पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः।।२३।। शृणु नामानि लोकानां मातृणां शंकराणि च । अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्।।२४।। अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला। मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः।।२५।। तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः। सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप।।२६।।

।। सङ्ग्रहोक्तिः।।

तस्यैव भूतस्याऽन्यस्यां पत्न्यां भूतप्रेतविनायकादयो रुद्रपार्षदा अभवन्।।१६-१८।। अंगिरसः स्वधानाम्न्यां पत्न्यां पितरो जाताः, तस्यान्यस्यां सतीनाम्न्यां पत्न्यां अथर्वांगिराभिधो वेदः पुत्रत्वेनाऽभवत्।।१९।। कृशाश्वस्य अर्चिषि पत्न्यां धूम्रकेशस्तथा अन्यस्यां धिषणायां देवलः, वयुनः मनुश्चेति त्रयः पुत्राः जज्ञिरे।।२०।। तार्क्ष्यस्य वनिता, कद्रूः, पतंगी, यामिनी चेति चतस्रः स्त्रिय आसन्, तासु पतंगी पक्षिणोऽसूत, यामिन्यां शलभा अभवन्।।२१।। विनतायां गरुडोऽरुणश्चेति द्वौ सुतौ जातौ, तत्र गरुडो साक्षाद् विष्णोः वाहनं जातः, अनूरुररुणः सूर्यस्य सारथिर्जातः, कद्रूरनेकान् नागानसूत ।।२२।। चन्द्रमसः कृत्तिकाप्रभृतयः सप्तविंशतिः स्त्रियोऽभवन्, किन्तु स चन्द्रमा दक्षस्य शापवशात् क्षयव्याधिमान् अनपत्यश्च बभूव, पुनर्दक्षं प्रसाद्य चन्द्रः कृष्णपक्षे खण्डिताः कलाः लेभे, न त्वपत्यानि।।२३।। अथ यस्मादिदं विश्वं जातं, तस्य कश्यपस्य पत्नीनां सुखकराणि नामानि शृणु।।२४।। अदितिः, दितिः, दनुः, काष्ठा, अरिष्टा, सुरसा, इला, मुनिः, क्रोधवशा, ताम्रा, सुरभिः, सरमा, तिमिश्चेति।।२५।। तासु तिमेर्जलचराः, सरमायां श्वापदाः, सुरभेर्गावो महिषादयश्च द्विशफाः।।२६।।

ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः। दन्दशूकादयः सर्पा राजन् क्रोधवशात्मजाः ।।२७।। इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः। अरिष्टायास्तु गन्धर्वाः काष्ठाया द्विशफेतराः।।२८।। सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु। द्विमूर्द्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः।।२९।। अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः। पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः।।३०।। धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः। स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल। वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली।।३१।। वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः। उपदानवी हयशिरा पुलोमा कालका तथा। उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप।।३२।। पुलोमां कालकां चैव वैश्वानरसुते तु कः। उपयेमेऽथ भगवान् कश्यपो ब्रह्मचोदितः।।३३।। पौलोमाः कालकेयाश्च दानवा युद्धशालिनः। तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता। जघान स्वर्गतो राजन्नेक इन्द्रप्रियंकरः।।३४।। विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत्। राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः।।३५।। अथातः श्रूयतां वंशो ह्यदितेरनुपूर्वशः।

।। सङ्ग्रहोक्तिः ।।

ताम्रायां श्येनगृध्राद्याः, मुनेरप्सरसां गणाः, क्रोधवशायां दन्दशूकादयः सर्पाः।।२७।। इलायां सर्वे पादपा जाताः, सुरसायां राक्षसा, अरिष्टायां गन्धर्वाः, काष्ठायामश्वाद्या एकशफाः सन्ततयोऽभूवन्।।२८।। कश्यपस्य दनुनाम्न्यां पत्न्यामेकषष्टिः पुत्रा जाताः, तेषु मुख्याः - द्विमूर्धा, शम्बरः, अरिष्टः, हयग्रीवः, विभावसुः।।२९।। अयोमुखः, शंकुशिराः, स्वर्भानुः, कपिलः, पुलोमा, अरुणः, वृषपर्वा, एकचक्रः, अनुतापनः।।३०।। धूम्रकेशः, विरूपाक्षः, दुर्जयो विप्रचितिश्चेति पुत्रा जाताः, तेषु स्वर्भानोः सुप्राभानाम्नीं पुत्रीं नमुचिरुवाह, वृषपर्वणः पुत्रीं शर्मिष्ठां नहुषपुत्रो बलवान् ययातिरुपयेमे।।३१।। दनोः पुत्रस्य वैश्वानरस्य चतस्रश्चारुदर्शनाः कन्या आसन्, ताश्च उपदानवी, हयशिरा, पुलोमा, कालका चेति, हे नृप! तासां मध्ये उपदानवीं हिरण्याक्षः, हयशिरां च क्रतुरुपयेमे।।३२।। ब्रह्मणः प्रेरणया कश्यपो वैश्वानरसुतां पुलोमां कालकां चोपयेमे।।३३।। तयोः पौलोम, कालकेय नामानः षष्टिसहस्राणि युद्धनिपुणा दानवा अभवन्, स्वर्गं गतस्तव पितामहोऽर्जुनस्तानिन्द्रोपकारार्थं जघान।।३४।। विप्रचितिः सिंहिकायामेकाधिकं शतं पुत्रान् जनयामास, तेषां मध्ये ग्रहत्वं प्राप्तो राहुर्ज्येष्ठः, कनिष्ठाः केतवः शतसंख्याका आसन्।।३५।।

यत्र नारायणो देवः स्वांशेनावतरद्विभुः।।३६।। विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः। धाता विधाता वरुणो मित्रः शक्र उरुक्रमः।।३७।। विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुम्। मिथुनं च महाभाग यमं देवं यमीं तथा। सैव भूत्वाऽथ वडवा नासत्यौ सुषुवे भुवि।।३८।। छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः। कन्यां च तपतीं या वै वव्रे संवरणं पतिम्।।३९।। अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता।।४०।। पूषाऽनपत्यः पिष्टादो भग्नदन्तोऽभवत्पुरा। योऽसौ दक्षाय कुपितं जहास विवृतद्विजः।।४१।। त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका। संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ।।४२।। तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि। विमतेन परित्यक्ता गुरुणा-ऽऽङ्गिरसेन यत्।।४३।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षष्ठोऽध्यायः ।। ६ ।।

।। सङ्ग्रहोक्तिः ।।

अथाऽनुपूर्वशोऽदितेर्वंशान् शृणु, यत्र सर्वान्तरात्मा नारायणः स्वांशेनाऽवतरत्।।३६।। विवस्वान्, अर्यमा, पूषा, त्वष्टा, सविता, भगः, धाताः, विधाता, वरुणः, मित्रः, शक्रः, उरुक्रमश्चेति द्वादशाऽदितेः पूत्राऽभवन्।।३७।। हे महाभाग! तत्र विवस्वतो भार्या संज्ञा श्राद्धदेवं मनुं तथा यमं यमुनां चेति मिथुनमसूयत, संज्ञैव वडवा भूत्वा भुव्यश्विनीकुमारौ सुषुवे।।३८।। विवस्वतः पत्नीं छाया शनैश्चरं, ततः सावर्णिं मनुं तपतीं कन्यां चाऽसूत, सा तपती संवरणं नृपं पतिं वव्रे।।३९।। अर्यम्णः पत्नी मातृकाऽभूत्, तयोः सुता ब्रह्मणा मनुष्यजातिष्वुपकल्पिताः।।४०।। दक्षयज्ञे पूषा शिवनिन्दावसरे दन्ता दर्शयन् जहास, अतः स भग्नदन्तोऽनपत्यः पिष्टभोजी च बभूव।।४१।। दैत्यानुजा रचनाभिधा त्वष्टुः भार्याऽऽसीत्, स तस्यां संनिवेशं विश्वरूपं च जनयामास।।४२।। यदाऽवज्ञातेन बृहस्पतिना सुरगणास्त्यक्तास्तदा शत्रूणां दौहित्रं विश्वरूपं देवाः पौरोहित्ये वव्रुः।।४३।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः ।।६ ।।

अथ सप्तमोऽध्यायः ।।७।।

राजोवाच – कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः । एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ ।।१।। *श्रीशुक उवाच* – इन्द्रस्त्रिभुवनैश्वर्यमदोल्लङ्घितसत्पथः। मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ।।२।। विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः। सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ।।३।। विद्याधराप्सरोभिश्च किंनरैः पतगोरगैः। निषेव्यमाणो भगवान् स्तूयमानश्च भारत ।।४।। उपगीयमानो ललितमास्थानाध्यासनास्थितः। पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ।।५।। युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः। विराजमानः पौलोम्या सहार्द्धासनया भृशम् ।।६।। स यदा परमाचार्यं देवानामात्मनश्च ह । नाभ्यनन्दत संप्राप्तं प्रत्युत्थानासनादिभिः ।।७।। वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् । नोच्चचालासनादिन्द्रः पश्यन्नपि सभागतम् ।।८।। ततो निर्गत्य सहसा कविराङ्गिरसः प्रभुः। आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियाम् ।।९।।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तमोऽध्यायः ।।७।।

विश्वरूपस्य पौरोहित्यम्

राजोवाच – हे भगवन्! गुरुणा बृहस्पतिना स्वशिष्याः सुराः कस्मात् कारणात् त्यक्ताः, तथा गुरौ शिष्याणामपराधं चाऽऽचक्ष्व ।।१।। श्रीशुक उवाच – हे नृप! त्रिभुवनैश्वर्यस्य मदेनोल्लङ्घितसत्पथो देवराज इन्द्रो मरुद्भिः, वसुभिः, रुद्रैः, आदित्यैः, ऋभुभिः ।।२।। विश्वेदेवैः, साध्यैः, अश्विनीकुमाराभ्यां च परिवेष्टितः, सिद्धचारणगन्धर्वैः, ब्रह्मवादिभिर्मुनिभिः विद्याधराप्सरोभिः, किन्नरैः, सर्पैः पक्षिभिश्च निषेव्यमाणः स्तूयमान आसीत् ।।३-४।। सभायां सिंहासने आसीनः, चन्द्रमण्डलनिभेन चारुश्वेतच्छत्रेण विराजमानः ।।५।। चामरव्यजनादिभी राजचिह्नैरर्द्धासन स्थितया पौलोम्या च भृशं शोभमान उपविष्ट आसीत् ।।६।। तदा देवानां स्वस्य च परमाचार्यः सुरासुरनमस्कृतो मुनिवरो बृहस्पतिस्तत्राजगाम, प्राप्तं गुरुमिन्द्रः प्रत्युत्थानादिभिर्नाभ्यनन्दत, सभायामागतं तं पश्यन्नपि निजासनादुत्थितो नाऽभवत् ।।७-८।। तदा विभुर्मन्त्रद्रष्टा बृहस्पतिः

तर्ह्येव प्रतिबुद्ध्येन्द्रो गुरुहेलनमात्मनः। गर्हयामास सदसि स्वयमात्मानमात्मना ।।१०।। *इन्द्र उवाच* – अहो बत मयाऽसाधु कृतं वै दभ्रबुद्धिना। यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः।।११।। को गृध्येत्पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि। ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः।।१२।। ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन। प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः।।१३।। तेषां कुपथदेष्टृणां पततां तमसि ह्यधः। ये श्रद्दध्युर्वचस्ते वै मज्जन्त्यश्मप्लवा इव।।१४।। अथाहममराचार्य-मगाधधिषणं द्विजम् । प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ।।१५।। *श्रीशुक उवाच* – एवं चिन्तयतस्तस्य मघोनो भगवान् गृहात्। बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया।।१६।। गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट्। ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः।।१७।। तच्छ्रुत्वैवासुराः सर्वे आश्रित्यौशनसं मतम् । दैवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः।।१८।।

।। सङ्ग्रहोक्तिः।।

ऐश्वर्यमदविक्रियां जानन् सन् सहसा तत्स्थानान् निर्गत्य तूष्णीं स्वगृहमाययौ।।९।। तर्ह्येव स्वात्मना जातं गुरोरवहेलनं प्रतिबुद्ध्य सदसि स्वयं स्वबुद्ध्या स्वं गर्हयामास।।१०।। *इन्द्र उवाच* - अहो, अल्पमतिना मयाऽत्यन्तमसाधु कृतं, यत् ऐश्वर्यमत्तेन मया सदसि गुरुस्तिरस्कृतः।।११।। विद्वांश्चेत् स्वर्लोकाधिपतेरपि लक्ष्मीं कोऽभिकांक्षेत्, न कोऽपि, यया लक्ष्म्याऽहं विबुधेश्वरोऽप्यासुरं भावं नीतोऽस्मि।।१२।। पारमेष्ठ्यं सिंहासनमधिष्ठितोऽधिपो कंचन न प्रत्युतिष्ठेत् इति ये ब्रूयुस्ते परं धर्मं न विदुः।।१३।। कुमार्गोपदेशिनामधःपततां तेषां वचसि ये श्रद्दध्युस्ते पाषाणनावाश्रिता इव मज्जन्ति।।१४।। अतोऽगाधधिषणं मत्कृतापराध-मगणयन्तं देवगुरुं बृहस्पतिं निःशठोऽहं तच्चरणं शिरसा स्पृशन् प्रसादयिष्ये ।।१५।। *श्रीशुक उवाच* - एवमिन्द्रस्य चिन्तयतः सतो बृहस्पतिः स्वीययोगप्रभावेण गृहाददृश्योऽभूत्।।१६।। ततः स्वराट् मघवा गुरोर्दर्शनोपायं विचारयन् सन्नपि तं नाधिगतवान्, सुरैः सहितश्चिन्तयन्नपि आत्मनः सुखं नाऽलभत।।१७।। तदेतद् वृत्तं श्रुत्वा स्वगुरोः शुक्रस्य मतमाश्रित्य दुर्मदा असुरा आततायिनः सन्तो देवान् प्रति युद्धोद्योगं चक्रुः।।१८।।

तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नाङ्गोरुबाहवः। ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकंधराः ।।१९।। तांस्तथाभ्यर्दितान् वीक्ष्य भगवानात्मभूरजः। कृपया परया देव उवाच परिसान्त्वयन् ।।२०।। *ब्रह्मोवाच* - अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत्। ब्रह्मिष्ठं ब्राह्मणं दान्तमैश्वर्यान्नाभ्यनन्दत ।।२१।। तस्यायमनयस्यासीत्परेभ्यो वः पराभवः। प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ।।२२।। मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात्। संप्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः ।।२३।। अद्य श्वो वा परश्वो वा दृप्तास्ते बलशालिनः। आददीरन्निलयनं ममापि भृगुदेवताः ।।२४।। त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षितार्थाः। न विप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणि नरेश्वराणाम् ।।२५।। तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथाऽऽत्मवन्तम्। संभावितार्थान् स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ।।२६।। *श्रीशुक उवाच* - त एवमुदिता राजन् ब्रह्मणा विगतज्वराः। ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ।।२७।।

।। सङ्ग्रहोक्तिः ।।

तैरसुरैर्विसृष्टैस्तीक्ष्णेषुभिर्निर्भिन्नाङ्गोरुबाहव इन्द्रसहिता देवा नतकन्धराः सन्तः ब्रह्माणं शरणं ययुः ।।१९।। भगवान् स्वयंभूः तथाऽभ्यर्दितान् सकलान् देवान् वीक्ष्य कृपया परिसान्त्वयन्नुवाच ।।२०।। *ब्रह्मोवाच* - अहो बत, हे सुरश्रेष्ठाः! युष्माभिरतिशयितमभद्रं कृतम्, यत ब्रह्मनिष्ठं ब्राह्मणं दान्तं स्वगुरुमैश्वर्यं प्राप्यापि नाऽभ्यनन्दन्त ।।२१।। हे सुराः! ऐश्वर्यहीनेभ्य स्ववैरिभ्योऽधिकं संपन्नानां युष्माकमयं परेभ्यः पराजयः स्वकृतान्यायस्य फलरूपोऽस्ति ।।२२।। हे मघवन्! तव शत्रून् आदौ गुर्वतिक्रमात् प्रक्षीणान्, संप्रति स्वगुरुं शुक्रं समाराध्य भूयः समृद्धान् पश्य ।।२३।। बलशालिनो भृगुदेवतास्ते दृप्ता असुरा अद्य श्वो वा परश्व मम स्थानमपि गृह्णीयुः ।।२४।। अभेद्यमन्त्राणां भृगूणां शिष्या त्रिविष्टपं किं गणयन्ति, न गणयन्त्येव, विप्रगोविन्दगवां कृपाभाजनानामभद्राणि न भवन्ति ।।२५।। तस्मात् शीघ्रमेव जितेन्द्रियं तपस्विनं त्वष्टुः पुत्रं विश्वरूपं विप्रं भजत, यूयं यदि विश्वरूपस्य कृत्यं क्षमिष्यध्वं तर्हि स युष्मान् सफलपुरुषार्थान् करिष्यति ।।२६।। *श्रीशुक उवाच* - हे राजन्! ब्रह्मणा ते देवा एवमुदिता

देवा ऊचुः – वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते। कामः संपाद्यतां तात पितॄणां समयोचितः।।२८।। पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् । अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणाम्।।२९।। आचार्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः। भ्राता मरुत्पतेर्मूर्त्तिर्माता साक्षात् क्षितेस्तनुः।।३०।। दयाया भगिनी मूर्त्तिर्द्धर्मस्यात्माऽतिथिः स्वयम्। अग्नेरभ्यागतो मूर्त्तिः सर्वभूतानि चात्मनः।।३१।। तस्मात् पितॄणामार्त्तानामार्त्तिं परपराभवम्। तपसाऽपनयंस्तात संदेशं कर्त्तुमर्हसि।।३२।। वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम्। यथाञ्जसा विजेष्यामः सपत्नांस्तव तेजसा।।३३।। न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम्। छन्दोभ्योऽन्यत्र न ब्रह्मन् व्ययो ज्येष्ठत्वकारणम्।।३४।। *श्रीशुक उवाच* – अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः। स विश्वरूपस्तानाह प्रहसन् श्लक्ष्णया गिरा।।३५।।

।। सङ्ग्रहोक्तिः।।

विगतज्वराः सन्तःऋषिं त्वष्टृपुत्रं विश्वरूपमुपेत्य परिष्वज्येदं वाक्यमब्रुवन्।।२७।। *देवा ऊचुः* – हे विश्वरूप! वयं ते आश्रममतिथयः सन्तः प्राप्ताः, ते भद्रमस्तु, हे तात! पितृणामस्माकं समयोचित इच्छाविषयोऽर्थस्त्वया सम्पादनीयोऽस्ति ।।२८।। हे ब्रह्मन्! पुत्रवतामपि सतां पुत्राणां पितृशुश्रूषणं परो धर्मः, ब्रह्मचारिणां पुत्राणां किमुत?।।२९।। हे ब्रह्मन्! वेदाध्यापक आचार्यो वेदस्य मूर्त्तिः, पिता ब्रह्मणो मूर्त्तिः भ्राता मघोनो मूर्त्तिः, माता क्षितेर्मूर्त्तिः।।३०।। भगिनी दयाया मूर्त्तिः, स्वयं क्षेत्रज्ञो धर्मस्य मूर्त्तिः, अतिथिः साक्षाद्विष्णोमूर्त्तिः, अभ्यागतोऽग्नेर्मूर्त्तिः, सर्वभूतानि स्वदेहस्य मूर्त्तिः।।३१।।हे तात! तस्मात् पितृतया मान्यानामार्तानामस्माकं परपराभवं पीडां च त्वत्तपःप्रभावेण विनाशयन् त्वमस्माकं प्रार्थितं कर्त्तुमर्हसि।।३२।। ब्रह्मिष्ठं ब्राह्मणं गुरु त्वां वयमुपाध्यायं (आचार्यं) वृणीमहे, त्वय्युपाध्याये सति यथा येन प्रकारेण तव तेजसा सपत्नान् जेष्यामः, तथाऽनुगृहाण।।३३।। प्रयोजननिमित्तं यवीयसश्चरणाभिवन्दनं गर्ह्यं न हि, हे ब्रह्मन्! वेदाध्ययनादितरस्य ज्येष्ठत्वकारणं वयः कथ्यते, वेदज्ञत्वात् त्वमेव ज्येष्ठो भवसि।।३४।। *श्रीशुक उवाच* – इत्थं पौरोहित्ये कर्मणि सुरैः प्रार्थितो महातपाः स विश्वरूपः प्रहसन् तान् श्लक्ष्णया गिरा प्राह।।३५।।

विश्वरूप उवाच – विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययम्। कथं नु मद्विधो नाथा लोकेशैरभियाचितः। प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ।।३६।। अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियाः। कथं विगर्ह्यं नु करोत्यधीश्वराः पौरोहितं हृष्यति येन दुर्मतिः ।।३७।। तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत्। भवतां प्रार्थितं सर्वं धर्मैः प्राणैश्च साधये ।।३८।। *श्रीशुक उवाच* – तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः। पौरोहित्यं वृतश्चक्रे परमेण समाधिना ।।३९।। सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया। आच्छिद्यादान् महेन्द्राय वैष्णव्या विद्यया विभुः ।।४०।। यया गुप्तः सहस्राक्षो जघ्नेऽसुरचमूर्विभुः। तां प्राह स महेन्द्राय विश्वरूप उदारधीः ।।४१।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे सप्तमोऽध्यायः ।।७।।

।। सङ्ग्रहोक्तिः ।।

विश्वरूप उवाच – हे देवाः! पौरोहित्यं धर्मशीलैर्विगर्हितम्, तत् पूर्वसिद्धब्रह्मतेजसो व्ययकरमपि, हे नाथाः! लोकेशैरभियाचितो मद्विधः पितृसेवकः, तत्रापि शिष्यः, स कथं प्रत्याख्यास्यति, आज्ञाकारित्वं मम स्वधर्मः ।।३६।। अकिञ्चनानां तु शिलोञ्छनं धनमुच्यते, शिलादिनैव गृहस्थाश्रमोचिता अग्निहोत्रसत्क्रिया निष्पद्यते चेत् पौरोहित्यमनुचितम्, येन पौरोहित्येन दुर्मतिर्हृष्यति ।।३७।। तथापि तत् न प्रत्याख्यामि, गुरुभिर्भवद्भिर्यत् प्रार्थितं तत् सर्वमहं धर्मैः प्राणैरपि साधये ।।३८।। *श्रीशुक उवाच* – एवं देवेभ्यः प्रतिज्ञाय महातपा विश्वरूपो देवैर्वृतः सन् सावधानेन चेतसा पौरोहित्यं चक्रे ।।३९।। शुक्रस्य विद्यया रक्षितामसुराणां श्रियं समर्थो विश्वरूपो वैष्णव्या नारायणकवचात्मिकया विद्ययाऽऽछिद्य महेन्द्राय प्रादात् ।।४०।। यया विद्ययाऽभिरक्षितो महेन्द्रो समर्थो भूत्वाऽसुरसेनां जघ्निवान्, तां विद्यां विपुलमतिर्विश्वरूपो महेन्द्राय प्राह ।।४१।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां सप्तमोऽध्यायः ।।७।।

अथ अष्टमोऽध्यायः ।।८।।

राजोवाच - यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् । क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ।।१।। भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् । यथाततायिनः शत्रून्येन गुप्तोऽजयत् मृधे ।।२।। *श्रीशुक उवाच* - वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते । नारायणाख्यं वर्माह तदिहैकमनाः शृणु ।।३।। *विश्वरूप उवाच* - धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः । कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ।।४।। दैवभूतात्मकर्मभ्यो नारायणमयः स्वयम् । नारायणमयं वर्म सन्नह्येद् भय आगते ।।५।। पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि । मुखेशिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ।। ॐ नमो नारायणायेति विपर्ययमथापि वा ।।६।।

।। सङ्ग्रहोक्तिः ।।

अथाऽष्टमोऽध्यायः ।।८।।

विश्वरूपेणेन्द्राय प्रोक्तं नारायणकवचम्

राजोवाच - इन्द्रो यया वैष्णव्या विद्यया गुप्तः सन् वाहनैः सहितान् शत्रुसैनिकान् क्रीडन् इव निर्जित्य त्रिलोक्या लक्ष्मीं बुभुजे ।।१।। हे भगवन्! येन नारायणवर्मणा रक्षित इन्द्रः संग्राम आततायिनः शत्रून् यथाऽजयत् तत् नारायणात्मकं वर्म मह्यमाख्याहि ।।२।। *श्रीशुक उवाच* - विश्वरूपः पुरोहितो वृतः सन् अनुपृच्छते महेन्द्राय यन्नारायणाख्यं वर्म आह, तद् इह एकमनाः सन् त्वं शृणु ।।३।। *विश्वरूप उवाच* - शुचिः प्रक्षालितपादपाणिः हस्ते विधृतदर्भमय पवित्रः, उदङ्मुखः पुमान् आचम्य चतुर्थ्यन्तनमोऽन्त केशवनारायणमाधवनामभिस्त्रिराचमनं कृत्वा, वाग्यतो मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतस्वाङ्गकरन्यासो भवेत् ।।४।। आधिदैविकाधिभौतिकाध्यात्मिकक्रियाभ्यो भये आगते सति नारायणमयं वर्म धारयेत् ।।५।। पादयोः, जानुनोः ऊर्वोः, उदरे, हृदि, उरसि, मुखे, शिरसि च मन्त्राक्षरानुपूर्वीक्रमेण ॐकारादीनि अक्षराणि विन्यसेत्, तत्तु शिर आदिपादान्तं उत्पत्तिन्यासं संहारन्यासं वा कुर्यात्, यद्यप्यत्र ऋष्यादिविनियोगश्च नोक्तस्तथापि स इत्थं बोध्यः, आदावद्येत्यादि पठित्वा "अस्य श्रीनारायणवर्ममन्त्रस्य विश्वरूपः ऋषिः, त्रिष्टुबनुष्टुभौ छन्दसी, श्रीनारायणो देवता, मम श्रीनारायणप्रीतिपूर्वकं सकलोपद्रवशान्त्यर्थं नारायणवर्मजपे विनियोगः इति संकल्प्य,-

अस्य श्रीनारायणवर्ममन्त्रस्य विश्वरूपः ऋषिः, "त्रिष्टुबनुष्टुभौ छन्दसि" श्रीनारायणो देवता मम श्रीनारायणप्रीतिपूर्वकसकलोपद्रवशान्त्यर्थं नारायणवर्मजपे विनियोगः। करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया। प्रणवादि यकारान्तमंगुल्यंगुष्ठपर्वसु।।७।। न्यसेद्धृदय ॐकारं विकारमनुमूर्धनि। षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत्।।८।। वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु। मकारमस्त्रमुद्दिश्य मन्त्रमूर्ति-र्भवेद्बुधः। सविसर्गं फडन्तं तु सर्वदिक्षु विनिर्दिशेत्।।९।।

।। सङ्ग्रहोक्तिः।।

न्यासाः - ॐॐॐ पादयोः, ॐनंॐ जानुनोः, ॐमोंॐ ऊर्वोः, ॐनांॐ उदरे, ॐरांॐहृदि, ॐयंॐ उरसि, ॐणांॐ मुखे, ॐयंॐ शिरसि इति, विपर्यय पक्षे ॐॐॐ शिरसि, ॐनंॐ मुखे, ॐमोंॐ उरसि, ॐनांॐ हृदि, ॐरांॐ उदरे, ॐयंॐ ऊर्वोः, ॐणांॐ जानुनोः, ॐयंॐ पादयोः इत्यष्टाक्षरन्यासाः।।६।। ततो द्वादशाक्षरविद्यया "ॐनमो भगवते वासुदेवाय" इति मन्त्रेण प्रणवादियकारान्त्तं करन्यासं कुर्यात्, तत्प्रकारो यथा - ॐॐॐ दक्षिणकरतर्जन्याम्, ॐनंॐ दक्षिणकरमध्यमायां, ॐमोंॐ दक्षिणकरानामिकायाम्, ॐभंॐ दक्षिणकरकनिष्ठिकायाम्, ॐगंॐवामकरकनिष्ठिकायाम्, ॐवंॐ वामकरानामिकायाम्, ॐतेंॐ वामकरमध्यमायाम्, ॐवांॐ वामकरतर्जन्याम्, ॐसुंॐ वामकरांगुष्ठाद्यपर्वणि, ॐदेंॐ वामकरांगुष्ठान्तपर्वणि, ॐवांॐ दक्षिणकरांगुष्ठाद्यपर्वणि, ॐयंॐ दक्षिणकरांगुष्ठान्त-पर्वणि।।७।। मत्रान्तरन्यासः - अत्र "ॐ विष्णवे नमः" इति मन्त्रः, ॐकारादीनि वकारान्तानि हृन्मूर्द्ध-भ्रूमध्य-शिखा-नेत्रेषु विन्यस्य मकारमस्त्रत्वेनोद्दिश्य दिग्बन्धनं कुर्यात्, हृदये ॐकारंन्यसेत्, ततः विकारं मूर्द्धनि न्यसेत्, षकारं भ्रुवोर्मध्ये विन्यसेत्,णकारं शिखया दिशेत्।।८।। वेकारं नेत्रयोः युञ्ज्यात्, नकारं सर्वसन्धिषु युञ्ज्यात्, मकारं सवसिर्गं फडन्तं उच्चार्य तत्राऽस्त्रमुद्दिश्य मः फडिति दिग्बन्धे विनिर्दिषेत्, इति न्यासकर्ता मन्त्रमूर्तिर्भवेत्, अस्य सम्पुटितता तु ॐॐॐ हृदये, ॐविंॐ मूर्द्धनि, ॐषंॐ भ्रुवोर्मध्ये, ॐणंॐ शिखायाम्, ॐवेंॐ नैत्रयोः ॐनंॐ सर्वसन्धिषु, ॐमःॐ अस्त्राय फट् इति दिग्बन्धे न्यसेत्, "नारायण त्रिलोकेश सर्वदुःखविमर्दन, सर्वोपद्रवशान्त्यर्थं त्वदीयं वर्म धारये" इति मन्त्रत्रयन्यासानन्तरं संकल्पयेत्।।९।।

नारायण त्रिलोकेश! सर्वदुःखविमर्दन!। सर्वोपद्रवशान्त्यर्थं त्वदीयं वर्म धारये।।
ॐ विष्णवे नमः इति मन्त्रः। आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम्। विद्यातेज-स्तपोमूर्तिमिमं मन्त्रमुदाहरेत्।।१०।। ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेन्द्रपृष्ठे। दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः।।११।। जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात्। स्थलेषु मायाबटुवामनो-ऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः।।१२।। दुर्गेष्वटव्याजिमुखादिषु प्रभुः पाया-न्नृसिंहोऽसुरयूथपारिः। विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः।।१३।। रक्षत्वसौ माऽध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः। रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजो माम्।।१४।। मामुग्रधर्मा-दखिलात्प्रमादान्नारायणः पातु नरश्च हासात्। दत्तस्त्वयोगादथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात्।।१५।। सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात्।

।। सङ्ग्रहोक्तिः।।

ॐविष्णवे नमः, ध्येयं षड्भिः ज्ञान-शक्ति-बल-ऐश्वर्य-विर्य-तेज इत्यात्मशक्तिभिः युतं, परमात्मनं ध्यायेत्, ततो विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुच्चारयेत्।।१०।। ॐहरिः गरुडपृष्ठप्रदेशे स्थापितचरणकमलः शंख-चक्र-चर्माऽसि-गदा-इषु-चाप-पाशान् बिभ्रत्, अणिमादि-सिद्धिरूपगुणाष्टकयुतो वा अपहतपाप्मत्वादिगुणाष्टकविशिष्टः, अष्टभुजो हरिर्मम सर्वरक्षां विदध्यात्।।११।। यादोगणेभ्यो वरुणस्य पाशाच्च मत्स्यमूर्तिर्मां जलेषु रक्षतु, स्थलेषु स्वसंकल्पस्वीकृतवामनस्वरूपो वामनो मां रक्षतु, त्रिविक्रमो विश्वरूपो मामाकाशेऽवतु।।१२।। अटवीसंग्रामोपक्रमादिषु दुर्गमस्थानेषु च समर्थः असुरसेनानायकरिपुः नृसिंहो मां पायात्, यस्य विमुक्तेन महाट्टहासेन दिशो विनेदुः, असुरस्त्रीणां गर्भाश्च निपेतुः।।१३।। स्वदंष्ट्रोपरि भूमिं दधानो यज्ञमूर्तिः श्रीवराहो मामध्वनि रक्षतु, पर्वतशिखरेषु जामदग्न्यो रामः, प्रवाससमये सलक्ष्मणो भरताग्रजो दाशरथिरामोऽस्मान् रक्षतु।।१४।। अभिचाराद्युग्रधर्माद् समग्रप्रमादाच्च मां नारायणः पातु, नरो हासाद्- उन्मादजाद् गर्वात् पातु, दत्तात्रेयो भगवान् योगभ्रंशात्

देवर्षिवर्यः पुरुषार्चनान्तरात्कूर्मो हरिर्मां निरयादशेषात् ।।१६।। धन्वन्तरिर्भगवान् पात्वपथ्याद् द्वन्द्वाद्भयादृषभो निर्जितात्मा। यज्ञश्च लोकादवताज्जनान्ताद्बलो गणात्क्रोधवशादहीन्द्रः ।।१७।। द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाषण्डगणात्प्रमादात्। कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ।।१८।। मां केशवो गदया प्रातरव्याद् गोविन्द आसंगव आत्तवेणुः। नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररीन्द्रपाणिः ।।१९।। देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम्। दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ।।२०।। श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः। दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ।।२१।। चक्रं युगान्तानलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तम्।

।। सङ्ग्रहोक्तिः ।।

पायात्, योगेश्वरो गुणनियन्ता कपिलः कर्मबन्धात्, पायात् ।।१५।। कामात् मां भगवान् सनत्कुमारोऽवतु, पथि देवापराधात् हरग्रीवो भगवान् मामवतु, भगवदर्चने जायमानापराधेभ्यो देवर्षिवर्यो नारदः पातु, कूर्मो हरिर्मां नरकव्रातादवतु ।।१६।। धन्वन्तरिर्भगवान् मामपथ्यात् पातु, निर्जितमना ऋषभो भगवान् क्षुत्पिपासादिद्वन्द्वजात् भयात् पातु, भगवान् यज्ञो लोकापवादात् अवतु, भगवान् बलभद्रो मां जननिमित्तोपघातात् पातु, शेषो भगवान् क्रोधवशात् सर्पगणात् मामवतु ।।१७।। अज्ञानात् भगवान् व्यासो मां रक्षतु, मोहजनकात् पाखण्डवृन्दात् भगवान् बुद्धः प्रपातु, धर्मरक्षणाय बहुकृतावतारः कल्किः भगवान् मलभूतात् कलेः प्रपातु ।।१८।। गदायुक्तो भगवान् केशवो मां प्रातरव्यात्, वेणुपाणिर्गोविन्दो भगवान् संगवपर्यन्तमव्यात्, पूर्वाह्णे शक्तिधरो नारायणोऽव्यात्, मध्यांह्ने चक्रपाणिर्विष्णुरव्यात् ।।१९।। उग्रधन्वा स्वतेजसा दीप्यमानो मधुसूदनो मामपराह्णेऽवतु, सायंकाले त्रिधामा माधवो मामवतु, प्रदोषसमये हृषीकेशो मामवतु, अर्धरात्रपर्यन्ते काले निशीथकाले मामेकः पद्मनाभोऽवतु ।।२०।। अपररात्रे मां भगवान् श्रीवत्सलक्ष्मा लक्ष्मीकान्तोऽवतु, अरुणोदयारम्भे खड्गधरो भगवान् जनार्दनोऽव्यात्, प्रतिसंध्यं भगवान् दामोदरोऽव्यात्, प्रभातसमये कालशरीरको विश्वेश्वर भगवानव्यात्

दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः।।२२।। गदेऽशनिस्पर्शन-विस्फुलिंगे निष्पिण्ढि निष्पिढ्यजिताप्रियासि। कूष्माण्डवैनायकयक्षरक्षो भूतग्रहांश्चूर्णय चूर्णयारीन् ।।२३।। त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोर-दृष्टीन् । दरेन्द्र! विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन्।।२४।। त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि । चक्षूंषि चर्मन् शतचन्द्र छादय द्विषामघोनां हर पापचक्षुषाम्।।२५।। यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च। सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च।।२६।। सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात्। प्रयान्तु संक्षयं सद्यो येऽन्ये श्रेयप्रतीपकाः।।२७।। गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः। रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः।।२८।। सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः। बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः।।२९।।

।। सङ्ग्रहोक्तिः।।

।।२१।। प्रलयानलवत्तीक्ष्णधारं भगवता प्रयुक्तं सुदर्शनं चक्रं भ्रमत् सत् वातसखो वह्निः यथा कक्षं दहति तद्वत् समन्ताद् अरिसैन्यमाशु दन्दग्धि दन्दग्धि,।।२२।। वज्रस्पर्शवत् विस्फुल्लिङ्गवर्षिणि! हे गदे! त्वं विष्णुप्रियाऽसि, अतस्त्वं कुष्माण्ड-वैनायक-यक्ष-रक्षस-भूत-ग्रहान् निष्पिण्ढि निष्पिण्ढि, अरीन् चूर्णय चूर्णय च।।२३।। हे शङ्खराज! कृष्णपूरितो भीमध्वनिः त्वं शत्रोर्हृदयानि कम्पयन् सन् यातुधान-प्रमथ-प्रेत-मातृ-पिशाच-विप्रग्रहाः येऽन्ये च घोरदृष्टयः, तान् विद्रावय।।२४।। हे तीक्ष्णधार! हे अरिवर! परमेश्वरप्रयुक्तस्त्वम् ममाऽरिसैन्यं छिन्धि छिन्धि, हे शतचन्द्र! खेट! अघवतां शत्रूणां चक्षूंषि छादय छादय, च चक्षूंषि हर!।।२५।। अस्माकं येभ्यो भयमभूत्, तेभ्यो ग्रहेभ्यः, केतुभ्यः, नृभ्यः सरीसृपेभ्यः, दंष्ट्रिभ्यः, इतरभूतेभ्यः व्यसनेभ्यः वा एतानि सर्वाणि भयानि, ये अस्माकं श्रेयःप्रतीपकाः ते सर्वे भगवन्नामरूपास्त्र-कीर्तनात् स्मरणाच्च सद्यः संक्षयं प्रयान्तु।।२६-२७।। बृहद्रथन्तरसामभिस्तूयमानो वेदमूर्त्तिः समर्थः भगवान् गरुडोऽशेषकृच्छ्रेभ्यो रक्षतु, विश्वक्सेनः श्रीहरिः स्वनामभिः सर्वत्र रक्षतु।।२८।। हरेर्नामानि, रूपाणि, वाहनानि, आयुधानि च तानि सर्वाणि सर्वापद्भ्यो नो बुद्धीन्द्रियमनःप्राणान्

यथा हि भगवानेव वस्तुतः सदसच्च यत्। सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ।।३०।। यथैकात्म्यानुभावानां विकल्परहितः स्वयम्। भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया।।३१।। तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः। पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः।।३२।। विदिक्षु दिक्षूर्द्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः। प्रहायँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः।।३३।। मघवन्निदमाख्यातं वर्म नारायणात्मकम्। विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान्।।३४।। एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा। पदा वा संस्पृशेत् सद्यः साध्वसात्स विमुच्यते।।३५।। न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत्। राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्।।३६।। इमां विद्यां पुरा कश्चित् कौशिकोऽधारयत् द्विजः। योगधारणया स्वाङ्गं जहौ स मरुधन्वनि।।३७।। तस्योपरि विमानेन गन्धर्वपतिरेकदा। ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः।।३८।।

।। सङ्ग्रहोक्तिः ।।

पान्तु, पार्षदमुख्या अपि पान्तु।।२९।। यत् सदसत् मूर्तामूर्तं सर्वं यदिदं जगत्, तद्वस्तुतः भगवानेव, अनेन सत्येन प्रमाणेन नः सर्वे उपद्रवा नाशं यान्तु ।।३०।। यथा शुद्धभगवन्मूर्त्यैकनिरीक्षकाणां स्वयं श्रीहरिर्यथावदेव स्वदर्शनं ददाति, स्वभक्तजनेच्छया भूषणायुधलिङ्गाख्या शक्तीर्धत्ते।।३१।। सर्वज्ञः सर्वगः भगवान् हरिरनेन सत्येन प्रमाणेन भक्तेच्छानुरूपविधृतैः स्वरूपैः सदा सर्वत्र नः पातु।।३२।। दिक्षु विदिक्षु उर्ध्वमधस्तात् समन्तात् अन्तर्बर्हिश्च स्वतेजसा ग्रस्तसमस्ततेजाः अट्टहास ध्वनिना लोकभयमपनुदयन् नारसिंहो नः पातु।।३३ ।।हे मघवन्! येन वर्मणा कवचितस्त्वं सुखेनैवाऽसुरयूथपान् विजेष्यसि, तथाविधमिदं नारायणात्मकं वर्म मया तुभ्यमाख्यातम्।।३४।। एतद्वर्म धारयमाणः पुमान् यं यं पुरुषं चक्षुषा पश्यति तथा पदा संस्पृशेद् वा स सद्यो भयाद् विमुच्यते।।३५।। नारायणकवचरूपां विद्यां धारयतः पुंसः कुतश्चिदपि राज-दस्यु-ग्रहादिभ्यो व्याघ्रादिभ्यश्च भयं न भवेत्।।३६।। पुरा कौशिकगोत्रजः कश्चिद् द्विज इमां विद्यामधारयत्, स च योगधारणया निरुदकदेशे स्वदेहं तत्याज।।३७।। यत्र ब्रह्मणस्य देहत्यागोऽभूत्, तस्योपर्येकदा विमानेन गन्धर्वपतिश्चित्ररथः स्त्रिभिः वृतः सन् ययौ।।३८।।

गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः। सवालखिल्यवचनादस्थीन्यादाय विस्मितः। प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात्॥३९॥ *श्रीशुक उवाच* - य इदं शृणुयात् काले यो धारयति चादृतः। तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥४०॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः। त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४१॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे अष्टमोऽध्यायः ॥८॥

अथ नवमोऽध्यायः॥९॥

श्रीशुक उवाच - तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत। सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥१॥ स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः। अवदद्यस्य पितरो देवाः सप्रश्रयं नृप॥२॥

॥ सङ्ग्रहोक्तिः॥

स सद्यः सविमानोऽवाक्शिराः सन् गगनान्न्यपतत्, स वालखल्यवचनात् तस्याऽस्थीन्यादाय, प्राग्वाहिन्यां सरस्वत्यां तानि प्रक्षिप्य, स्नात्वा विस्मितः सन् स्वं स्थानमन्वगात्॥३९॥ *श्रीशुक उवाच* - यः पुमान् भयागमनावसर इदं वर्माऽऽदृतः सन् शृणुयात् धारयति च तं पुमांसं भूतानि नमस्यन्ति, सर्वतो भयात् स मुच्यते च॥४०॥ इन्द्रो विश्वरूपादेतां विद्यां संप्राप्तः सन् युद्धेऽसुरान् विनिर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे॥४१॥

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः॥८॥

अथ नवमोऽध्यायः ॥९॥

विश्वरूपवधः वृत्राद् भीतैर्देवैः कृता विष्णुस्तुतिश्च

श्रीशुक उवाच- हे भारत! तस्य विश्वरूपस्य त्रीणि शिरांस्यासन्, सोमपीथं, सुरापीथमन्नादमिति च॥१॥ हे नृप यस्य देवाः पितरः, स विश्वरूपो यज्ञे प्रत्यक्षं सविनयं देवेभ्यो हविर्भागमुच्चकैरवदत्॥२॥

स एव हि ददौ भागं परोक्षमसुरान् प्रति । यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥३॥ तद्देवहेलनं तस्य कर्मालीकं सुरेश्वरः । आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥४॥ सोमपीथं तु यत्तस्य शिर आसीत्कपिञ्जलः । कलविङ्कः सुरापीथमन्नादं यत्स तित्तिरः ॥५॥ ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः । संवत्सरान्ते तदघं भूतानां स विशुद्धये । भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्द्धा व्यभजद्धरिः ॥६॥ भूमिस्तुरीयं जग्राह खातपूरवरेण वै । ईरणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥७॥ तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः । तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥८॥ शश्वत् कामवरेणांहस्तुरीयं जगृहुः स्त्रियः । रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥९॥ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम् । तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरिकिल्बिषम् ॥१०॥ हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे । इन्द्रशत्रो विवर्द्धस्व माचिरं जहि विद्विषम् ॥११॥

॥ सङ्ग्रहोक्तिः ॥

मातृस्नेहवशो यजमानो विश्वरूपोऽसुरान् प्रति परोक्षं तूष्णीं हविर्भागं ददौ ॥३॥ विश्वरूपस्य देववञ्चनात्मकमलीकं कर्म ज्ञात्वा इन्द्रो भीतः सन् शीघ्रं क्रोधेन तच्छीर्षाणि चिच्छेद ॥४॥ तस्य सोमपीथं शिरः कपिञ्जलः पक्षी, सुरापीथं शिरः कलविङ्कः पक्षी, अन्नादं शिरः तित्तिरः पक्षी च बभूव ॥५॥ इन्द्रो ब्रह्महत्यानिवारणाय समर्थः सन्नपि तामञ्जलिना जग्राह, पुनः स संवत्सरान्ते भूतानां मध्ये विशुद्धये तत्पापं भूमि-अम्बु-द्रुम-योषिद्भ्यः चतुर्धा व्यभजत् ॥६॥ खातपूरवेण सह भूमिर्ब्रह्महत्यायाश्चतुर्थं भागं जग्राह, भूमौ तस्य पापस्य स्वरूपमूषरत्वेन दृश्यते ॥७॥ अग्रच्छेदेऽपि पुनर्वृद्धिरूपेण वरेण द्रुमास्तस्याश्चतुर्थांशं जगृहुः तेषु तत्पापस्वरूपं निर्यासरूपेण प्रदृश्यते ॥८॥ गर्भावस्थायामपि संभोगक्षमत्ववरेण, स्त्रियश्चतुर्थांशं जगृहुः, तासु तस्य पापस्य रूपं मासि मासि रजोरूपेण दृश्यते ॥९॥ द्रव्याधिक्यरूपवरेण जलानि ब्रह्महत्यायाश्चतुर्थं भागं जगृहुः, जलेषु तत्पापस्वरूपं बुद्बुदफेनरूपेण दृश्यते ॥१०॥ पुत्रनाशं विज्ञाय विश्वरूपस्य पिता त्वष्टा, "इन्द्रशत्रो विवर्धस्व माचिरं जहि विद्विषम्" इति मन्त्रेणाऽग्नौ जुहाव ॥११॥

अथान्वाहार्यपचनादुत्थितो घोरदर्शनः। कृतान्त इव लोकानां युगान्तसमये यथा।।१२।। विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने। दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसम्।।१३।। तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम्। देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी। नृत्यन्तमुन्नदन्तं च चालयन्तं पदा महीम्।।१४।। दरीगम्भीरवक्त्रेण पिबता च नभस्तलम्। लिहता जिह्वयार्क्षाणि ग्रसता भुवनत्रयम् ।।१५।। महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः। वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश।।१६।। येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना। स वै वृत्र इति प्रोक्तः पापः परमदारुणः।।१७।। तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः। स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः।।१८।। ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः। प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः।।१९।। *देवा ऊचुः* - वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः। हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः।।२०।।

।। सङ्ग्रहोक्तिः ।।

अथ होमानन्तरं दक्षिणाग्नेः सकाशात् प्रलयकाले लोकानां क्षयायोत्थितः कृतान्तः इव घोरदर्शनोऽसुर उत्थितोऽभूत्।।१२।। संध्याकालीनाभ्रसदृशं दग्धशैलसमं प्रत्यहं सर्वतो बाणमात्रं विवर्धमानम्।।१३।। तप्तताम्रवत् शिखाश्मश्रुधारिणं, मध्याह्नसूर्यवद् उग्रचक्षुषं, देदीप्यमाने त्रिशिखे शूले द्यावापृथिव्यावारोप्य नृत्यन्तं, गर्जन्तं, पादाघातेन महीं कम्पयन्तं च।।१४।। गिरिकन्दरासदृशेन मुखेन नभस्तलं पिबन्तं, जिह्वया नक्षत्राणि लिहन्तं, भुवनत्रयं ग्रसता महाता मुखेन मुहुर्मुहुर्जृम्भमाणं वृत्रासुरमवलोक्य त्रस्ताः सर्वे लोका दश दिशो दुद्रुवुः।।१५-१६।। येन त्वष्टृतपोभूतेन सर्वे लोका व्याप्ताः, स परमदारुणः पापः वृत्रासुर नाम्ना कथितः।।१७।। इन्द्रादयो देवा तमभिद्रुत्य स्वैः स्वैः दिव्यास्त्रशस्त्रैर्जघ्नुः, किन्तु वृत्रस्तानि सर्वाण्यस्त्रशस्त्राण्यग्रसत्।।१८।। ततो विस्मिता विषण्णा ग्रस्ततेजसः सर्वे देवाः समाहितमनसः सन्त आदिपुरुषं परमत्मानं तुष्टुवुः।।१९।। *देवा ऊचुः* - क्षित्यप्तेजोमरुद्व्योमपञ्चभूतात्मका लोका ब्रह्मादयो वयं च सर्वे देवाः बिभ्यतः सन्तः यस्याऽऽराधनं कुर्मः यस्मात् कालोऽपि

अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम्। विनोपसर्पत्यपरं हि बालिशः श्वलाङ्गुलेनातितितर्त्ति सिन्धुम् ।।२१।। यस्योरुशृङ्गे जगतीं स्वनावं मनुर्यथाबद्ध्य ततार दुर्गम्। स एव नस्त्वाष्ट्रभयात् दुरन्तात्त्राताश्रितान्वारिचरोऽपि नूनम् ।।२२।। उदीर्णवातोर्मिरवैः कराले पुरा स्वयंभूरपि संयमाम्भसि। एकोऽरविन्दात्पतितस्तु येन ततार पारोऽस्तु स एव नो भयात् ।।२३।। य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम्। वयं न यस्यापि पुरः समीहितः पश्याम लिङ्गं पृथगीशमानिनः ।।२४।। यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव। कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ।।२५।। तमेव देव वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यम्। सर्वे व्रजामः शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ।।२६।। *श्रीशुक उवाच* – इति तेषां महाराज सुराणामुपतिष्ठताम् ।प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ।।२७।। आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ। पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ।।२८।।

।। सङ्ग्रहोक्तिः ।।

बिभेति, स भगवान् नः शरणमस्तु ।।२०।। यः पुमान् परिपूर्णकामं प्रशान्तमीश्वरं विहायाऽन्यस्य कस्यचिच्छरणं याति स श्वपुच्छमवलम्ब्य समुद्रं तितीर्षति, ।।२१।। सत्यव्रतोमनुर्यस्य मत्स्यरूपस्यशृङ्गे जगतीरूपां नावं बद्ध्वा दुस्तरं संकटं ततार, स एव प्रभुरस्मान् वृत्रभयात् त्रास्यति ।।२२।। पुरा कराले प्रलयकालीनजले वैराजनाभिकमलात् पतितोऽसहायो ब्रह्मा येन सहायभूतेन भगवता तारितः, स भगवानेव नः पालकोऽस्तु ।।२३।। य ईश्वरो निजसंकल्परूपज्ञानेन नो देवान् ससर्ज, यस्यानुग्रहेण वयं विश्वं सृजामः, अन्तर्यामितयाऽस्मान् नियमयतो यस्य दिव्यविग्रहं वयं न पश्यामः ।।२४।। यो युगे युगे शत्रुभिः पीड्यमानानस्मान् देवर्षितिर्यङ्नृषु कृतावतारः सन् रक्षति ।।२५।। वयमस्माकं देवतारूपं, सर्वोत्कृष्टं भक्तवत्सलं शरणागतप्रतिपालकं तं भगवन्तं शरणं व्रजामः, स महात्माऽस्माकं सुखं विधास्यति ।।२६।। *श्रीशुक उवाच* – हे महाराज! तेषां देवानामेवं दीनं वचः श्रुत्वा शंखचक्रगदापद्मधरो विष्णुः प्रतीच्यां दिशि प्रकटितोऽभवत् ।।२७।। श्रीवत्सकौस्तुभौ विना स्वतुल्यै षोडशभिः सुनन्दादिभिः

दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः। दण्डवत्पतिता राजन् शनैरुत्थाय तुष्टुवुः ।।२९।। *देवा ऊचुः* – नमस्ते यज्ञवीर्याय वयसे ऊतये नमः। नमस्ते आत्तचक्राय नमः सुपुरुहूतये ।।३०।। यत्ते गतीनां तिसृणामीशितुः परमं पदम्। नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ।।३१।। ॐ नमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमः कपाटद्वारे चित्ते अपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ।।३२।। दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनपेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ।।३३।। अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशफलमुपाददाति –

।। सङ्ग्रहोक्तिः ।।

पार्षदैः पर्युपासितं शरत्कालीनकमलसदृशनयनं तं भगवन्तं विलोक्य दर्शनानन्दविह्वलास्ते देवा भूमौ दण्डवत्पतिताः सन्तः प्रणामं चक्रुः, पुनरुत्थिताः सन्तस्तुष्टुवुः ।।२८-२९।। *देवा ऊचुः* – यज्ञवीर्याय श्रितरक्षणाय धृतसुदर्शनाय आयुःप्रदाय पुरुहूतये ते नमः ।।३०।। नरक-स्वर्ग-मोक्षरूपाणां योग्याधिकारिणे प्रदातुः ते परं पदं स्वरूपं च ज्ञातुमर्वाचीनः कोऽपि शक्तो न भवति ।।३१।। हे भगवन् नारायण! वासुदेव! आदिपुरुष! महापुरुष महानुभाव! परममङ्गल! परमकल्याण! केवल! जगदाधार! लोकैकनाथ! सर्वेश्वर! लक्ष्मीनाथ तुभ्यं नमोऽस्तु, भागवतपरमहंसैरुत्कृष्टसमाधियोगेनाऽनुशीलितेन भक्तियोगरूपधर्मेणोद्घाटिके चित्ते निजानन्दस्वरूपो भवान् वर्तते ।।३२।। हे हरे! तवायं लीलाविहारयोगोऽत्यन्तं दुर्बोधोऽस्ति, यस्त्वं मायिकगुणरहितः=अगुणः, प्राकृतशरीरवर्जितः=अशरीरः, प्राकृताधाररहितः=अशरणः, स्वशक्त्यैव सर्वक्रियमाणः=अनपेक्षितः श्रमादिरहितत्वात् त्वमविक्रियः सन्नपि सगुणं साकारं साधारं सापेक्षं चेदं विश्वं सृजसि रक्षसि संहसि च ।।३३।। हे भगवन्! भवान् कर्मनिष्ठसंसारिजीववत् लोके कार्यरूपे प्रपञ्चे पतितः सन् पारतन्त्र्येण स्वकृतं –

आहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ।।३४।। न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरे अनवगाह्य-माहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणा-धिकरणदुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममाया-मन्तर्धाय को नु अर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ।।३५।। समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम् ।।३६।। स एव हि पुनः सर्ववस्तुषु वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभास उपलक्षित एक एव पर्यवशेषितः ।।३७।। अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुख-लेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरनिर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजसेवां विसृजन्ति यत्र न पुनरयं संसारपर्यावर्त्तः ।।३८।।

।। सङ्ग्रहोक्तिः ।।

शुभाशुभं फलं भुंक्ते किम्? आहोस्वित् आत्माराम उपशमशील समदर्शन उदास्ते किम्? वयं तन्न विदामः ।।३४।। हे हरे! विरोधो न हि, त्वयि विरुद्धवत् भासमानत्वेऽपि विरोधो नास्ति, उभयमपि संभवति, कर्मभावनया ब्रह्मभावनया च समन्वितानां सर्वेषां चेतनानामन्तरा-त्मभूतत्वेन तद्विलक्षणे विविधविचत्रशक्तिमति त्वयि सर्वमविरुद्धम् ।।३५।। हे भगवन्! त्वं समविषममतीनां वादिप्रतिवादिनां विप्रतिपत्तीरप्रतिषिद्ध्य तुष्णीं भवसि, सर्पादिभ्रान्तिमतां रज्जुखण्डवत् ।।३६।। यो निमित्तकारणः स एव भवान् सकलजगदुपादानकारणभूतोऽसि, देवादिसर्वपदार्थेषु स्थितः संश्चापि निर्विकारस्वरूपः विकाराणां शरीरभूतचिदचिद्गतत्वात् न स्वरूपे तत्प्रसंगः ।।३७।। परमभागवता एकान्तिकाः साधवस्तव माहात्म्यपीयूषोदधिबिन्दुं सकृदप्यास्वाद्य स्वमनसि नितान्तं तृप्ता सन्तो दृष्टश्रुताशेषसुखाभासान् विस्मरन्ति, सर्वात्मनि सर्वभूतप्रियसुहृदि त्वयि निरन्तरनिवृत्तमनसस्ते स्वार्थकुशलाः भागवताः सन्तस्त्वच्चरणाम्बुज-सेवां न विसृजन्ति यस्यां सेवायां पुनरावृत्तिरूपो संसारो न विद्यते ।।३८।।

त्रिभुवनात्मभवनत्रिविक्रमत्रिनयनत्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममाययोपात्तसुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दण्डं दण्डधर दधर्थ एवमेनमपि भगवन् जहि त्वाष्ट्रमुत यदि मन्यसे।।३९।। अस्माकं तावकानां तत ततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिङ्गविवरणेनात्मसात्कृतानामनुकम्पानुरञ्जितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चान्तस्तापमनघार्हसि शमयितुम्।।४०।। अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलम्भकतयाऽनुभवतः सर्वप्रत्ययसाक्षिणः आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वार्थविशेषो विज्ञापनीयः स्याद्विस्फुलिङ्गादिभिरिव हिरण्यरेतसः।।४१।।

।। सङ्ग्रहोक्तिः।।

त्रिभुवनस्यान्तःप्रविश्य नियमकर्त! हे त्रिविक्रम! हे त्रिलोकमनोंहरमहिमन्! हे भगवन्! यद्यपि दैत्यदानवादयः सर्वे तवैव विभूतयः सन्ति, तथापि तेषामयमभ्युदयकालो न वर्तते, भवता पूर्वमपि देवर्षिमनुजतिर्यागादिषु विविधरूपैरवतीर्य देवानां धर्मस्य साधूनां च रक्षणं कृतमासीत्, अधर्मिणामुपरि यथोचितो दण्डोऽपि धृत आसीत्, हे भगवन्! इदानीं त्वं त्वाष्ट्रं वृत्रमपि जहि, यदि मन्यसे।।३९।। हे तात! हे पितामह! तव चरणकमलद्वन्द्वध्यानानुबद्धहृदयानां भवत्स्वरूपदर्शनेनैवाऽऽत्मसात्कृतानां तावकानां दयार्द्रविशदरुचिरस्मितावलोकनेन मधुरमुखामृतरसवर्षिण्या वाण्या चाऽन्तस्तापं शमयितुं त्वमर्हसि।।४०।। हे भगवन्! अखिलजगदुदयविभवविलयादिकं तु भवतः केवलं लीला एव भवति, सकलप्राणिनामन्तर्हृदये स्थित्वा सर्वेषां साक्षी भवसि, यथा कार्यरूपस्य भवान् साक्षी तथा प्रधानकालादेरपि नियन्ताऽसि, सर्वसाक्षिण आकाशवन्निर्लेपस्य भवतः अस्माभिः किं निवेदनं कर्त्तव्यम्, स्वयं सर्वज्ञोऽसि, विस्फुल्लिङ्गादिभिरग्नेरिव भगवदग्रे कियानर्थो विज्ञापनीयः स्यात्।।४१।।

अत एव स्वयं तदुपकल्पयाऽस्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत् कामेनोपसादिताः।।४२।। अथो ईश जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयं। ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च।।४३।। हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय। सत्संग्रहाय भवपान्थनिजाश्रमाय शश्वत्गरिष्ठगतये हरये नमस्ते।।४४।। *श्रीशुक उवाच* - अथैवमीडितो राजन् सादरं त्रिदशैर्हरिः। स्वमुपस्थानमाकर्ण्य प्राह तानभिनन्दितः ।।४५।। *श्रीभगवानुवाच* – प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया। आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि।।४६।। किं दुरापं मयि प्रीते तथापि विबुधर्षभाः। मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित्।।४७।। न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक्। तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः।।४८।। स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि। न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः।।४९।। मघवन् यात भद्रं वो दध्यञ्चमृषिसत्तमम्।

।। सङ्ग्रहोक्तिः ।।

विविधपापफलसंसारदुःखशमनीं परमगुरोर्भवतः चरणकमलछायां प्राप्तानामस्माकं दुःखनिवारणं स्वयमेव कृपया कुरु, यदाशया वयमागता तामाशां सफलीकुरु।।४२।।हे कृष्ण! तेनाऽस्माकं तेजांसि आयुधानि च ग्रस्तानि, तं लोकत्रयं ग्रसन्तं त्वाष्ट्रं वृत्रासुरं जहि।।४३।। निरस्त निखिलदोषाय, अस्मदीयदुःखाभिज्ञाय, साक्षिणे कृष्णाय, विशुद्धकीर्तये, प्रपन्नार्तिहारिणे स्वगृहभूताय गरिष्ठगतये तुभ्यं नमः।।४४।। *श्रीशुक उवाच* – हे राजन्! देवैः सादरं स्तुतो हरिः स्वं स्तोत्रमाकर्ण्य संतुष्टः सन् तान् प्राह।।४५।। हे सुरश्रेष्ठाः! मत्स्तुत्याऽहं वो प्रतोऽस्मि, यया स्तुत्या वो मयि भक्तिस्तत आत्मैश्वर्यस्मृतिश्च भवति।।४६।। हे विबुधश्रेष्ठा! मयि प्रीते किमपि दुरापं नहि, किन्तु तत्त्वज्ञो मदेकान्तिको भक्तो मत्तः किमपि वाञ्छति नहि ।।४७।। स्वार्थदृष्टिः कृपणः पुमान् आत्मनः श्रेयो न वेद, यदि याचकेच्छानुसारं स्वामी दद्याच्चेत् तर्हि स दाताऽपि कृपण एव, इति ज्ञेयम्।।४८।। कल्याणतमं वस्तु ज्ञाता स्वामी स्वार्थकामिनं यथेष्टं न ददाति, यथा वैद्यवर्यो रोगिणमपथ्यं किमपि न ददाति,

विद्याव्रततपःसारं गात्रं याचत मा चिरम् ।।५०।। स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्। यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ।।५१।। दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम् । विश्वरूपाय यत् प्रादात्त्वष्टा यत्त्वमधास्ततः ।।५२।। युष्मभ्यं याचितो दध्यङ् धर्मज्ञोऽङ्गानि दास्यति। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः। येन वृत्रशिरो हर्त्ता मत्तेज उपबृंहितः।।५३।। तस्मिन् विनिहते यूयं तेजोऽस्त्रायुधसंपदः। भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ।।५४।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे नवमोऽध्यायः ।। ९ ।।

।। सङ्ग्रहोक्तिः ।।

तद्वत् ।।४९।। हे मघवन्! ऋषिसत्तमं दध्यञ्चं यात, युष्माकं भद्रं भविष्यति, तत्र गत्वा विद्याव्रततपःसारं तच्छरीरं याचत, मा चिरम् ।।५०।।स दध्यङ्नामा ऋषिर्विशुद्धं ब्रह्म यथावद् ज्ञातवान्, तद् ब्रह्मज्ञानं सोऽश्विनीकुमाराभ्यां ददौ, तेन च अश्वशिरोनामाऽमरतां व्यधात् ।।५१।। आथर्वणो दध्यङ् ऋषिर्मदात्मकमभेद्यं "नारायणवर्म" त्वाष्ट्रे ददौ, स च विश्वरूपाय प्रादात्, विश्वरूपस्तुभ्यमदात्, यदिदानीं त्वं धारयसि ।।५२।। धर्मज्ञः ऋषिः दध्यङ् याचितः सन् युष्मभ्यं स्वाङ्गानि दास्यति, ततस्तैर्विश्वकर्मणाऽऽयुधश्रेष्ठं वज्रं निर्मापय, येन वज्रेण मत्तेजोपबृंहित इन्द्रो वृत्रशिरो हर्ता भविष्यति ।।५३।।वृत्रे निहते सति यूयं स्वीयानि तेजांसि, आयुधानि संपदश्च भूयः प्राप्स्यथ, मत्परान् युष्मान् केऽपि बाधितुं न क्षमन्ते, अतो वो भद्रं भविष्यति ।।५४।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः ।।९ ।।

अथ दशमोऽध्यायः ।।१०।।

श्रीशुक उवाच - इन्द्रमेवं समादिश्य भगवान् विश्वभावनः। पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः ।।१।। तथाभियाचितो देवैर्ऋषिराथर्वणो महान्। मोदमान उवाचेदं प्रहसन्निव भारत ।।२।। *दध्यङ् उवाच* - अपि वृन्दारका यूयं न जानीथ शरीरिणाम्। संस्थायां यस्त्वभिद्रोहो दुस्सहश्चेतनापहः ।।३।। जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः। क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ।।४।। *देवा ऊचुः* - किं नु तत् दुस्त्यजं ब्रह्मन् पुंसां भूतानुकम्पिनाम्। भवद्विधानां महतां पुण्यश्लोकेड्य-कर्मणाम् ।।५।। ननु स्वार्थपरो लोको न वेद परसंकटम्। यदि वेद न याचेत नेति नाह यदीश्वरः ।।६।। *दध्यङ् उवाच* - धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः। एष वः प्रियमात्मानं त्यजन्तं संत्यजाम्यहम् ।। ७ ।। योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् । ईहेत भूतदयया स शोच्यः स्थावरैरपि ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ दशमोऽध्यायः ।।१०।।

वज्रधरस्येन्द्रस्य वृत्रेण सहयुद्धम्

श्रीशुक उवाच - विश्वस्य सुखकारी भगवान् श्रीहरिरिन्द्रमेवं समादिश्य देवानां पश्यतां सतां तत्रेवाऽन्तर्दधे ।।१।। हे भारत! सुरेन्द्रादिदेवैरभियाचित आथर्वणः ऋषिर्दध्यङ् महान् हृष्टचितः सन् प्रहसन्निवेदमुवाच ।।२।। *दध्यङ् उवाच* - हे देवाः! शरीरिणां मरणावसारे यो दुःसहश्चेतन्यहरः क्लेशो जायते तं यूयं न जानीथ, यदि जानीथ तर्ह्येवं संकल्पं न करिष्यथ ।।३।। इह लोके जिजीविषूणां जीवानां स्वदेहः प्रियतमो भवति, तं देहं भिक्षमाणाय साक्षाद् विष्णवेऽपि दातुं क उत्सहेत् ? ।।४।। *देवा ऊचुः* - हे ब्रह्मन्! शुद्धकीर्त्तिभिरपि स्तुत्यचरित्राणां दयालूनां महतां भवादृशां पुंसां किं वस्तु दुस्त्यजम् ? ।।५।। स्वार्थपरो लोकः परसंकटं न वेद, यदि वेद तर्हि न याचेत, यदि दाता समर्थश्चेत् तर्हि स नेति न ब्रूयात् ।।६।। *दध्यङ् उवाच* - युष्मन्मुखाद् धर्मं श्रोतुकामेन मया यूयं प्रत्याख्याताः, वस्तुतस्तु कालान्तरे त्याज्यं भवतां प्रियं स्वदेहमधुनैव त्यक्ष्यामि ।।७।। हे नाथाः! यः पुमान् भूतदयामाश्रित्य क्षणभंगुरेण देहेन -

एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः। यो भूतहर्षशोकाभ्यामात्मा शोचति हृष्यति ।।९।। अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः। यन्नोपकुर्यादस्वार्थैर्मर्त्त्यः स्वज्ञातिविग्रहैः।।१०।। एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम्। परे भगवति ब्रह्मण्यात्मानं संनयन्जहौ।।११।। यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबन्धनः। आस्थितः परमं योगं न देहं बुबुधे गतम्।।१२।। अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा। मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः।।१३।। वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत। स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव।।१४।। वृत्रमभ्यद्रवच्छत्रुमसुरानीकयूथपैः। पर्यस्तमोजसा राजन् क्रुद्धो रुद्र इवान्तकः।।१५।। ततः सुराणामसुरै रणः परमदारुणः। त्रेतामुखे नर्मदायामभवत् प्रथमे युगे।।१६।। रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः। मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ।।१७।।

।। सङ्ग्रहोक्तिः।।

चिरस्थायि यशो धर्मं च न साधयेत्, स पादपादिस्थावरप्राणिभिरपि शोच्यो भवति।।८।। पुण्यश्लोकैर्महापुरुषैर्धर्मस्य तावदेव तत्त्वं कथितं यत् भूतानां शोकमवलेक्य यो दयार्द्रः सन् शोचति, तेषां सुखं वीक्ष्य हृष्यति च, स एव तस्य परो धर्मो ज्ञेयः।।९।। मर्त्यो जनः श्वशृगालादिभक्ष्यैरस्थिरैरुपयोगशून्यैर्धनस्वजनशरीरैर्यो परोपकारं न कुर्यात्, एतद् अहो, कष्टम्।।१०।।एवं कृतनिश्चय आथर्वणो दध्यङ् सर्वकारणे ब्रह्मणि परमेश्वरे आत्मानं संनयन् देहं जहौ।।११।।यतेन्द्रियमनोबुद्धिस्तत्त्वद्रष्टा ध्वस्ताशेषबन्धन ऋषि दध्यङ् परमं योगमास्थाय देहं जहौ, ततः पतितं देहं न बुबुधे।।१२।। अथ इन्द्र दधीचोऽस्थिभिर्विश्वकर्मणा निर्मितं वज्रमुद्यम्य भगवत्तेजसान्वित ऊर्जितश्च सर्वैर्देवगणैश्च संयुतः ऐरावतोपरि शुशोभ, तदानीं मुनिगणैः स्तूयमानोऽत एव त्रैलोक्यं हर्षयन्निव सोऽदृश्यत।।१३-१४।। हे राजन्! असुरसेनानायकैः परिवृतं स्वशत्रुं वृत्रं प्रति क्रुद्ध इन्द्रः प्रलयान्तको रुद्र इव बलेन वृत्राभिमुखमगात्।।१५।।तदा प्रथमे चतुर्थयुगे त्रेतायुगारम्भे नर्मदानदीतीरे देवानामसुरैः सह परमदारुणः संग्रामोऽभवत्।।१६।। युद्धप्रांगणे रुद्रवस्वादित्याश्विपितृवह्निमरुदृभुसाध्यविश्वेदेवप्रभृतिभिः

दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया। नामृष्यन्नसुरा राजन् मृधे वृत्रपुरः
सराः ।।१८।। नमुचिः शम्बरोऽनर्वा द्विमूर्द्धा ऋषभोऽम्बरः। हयग्रीवः शङ्कुशिरा
विप्रचित्तिरयोमुखः ।।१९।। पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः। दैतेया दानवा
यक्षा रक्षांसि च सहस्रशः ।।२०।। सुमालिमालिप्रमुखाः कार्त्तस्वरपरिच्छदाः।
प्रतिषिध्येन्द्रसेनाग्रं मृत्योरपि दुरासदम् ।।२१।। अभ्यद्रवन्नसंभ्रान्ताः सिंहनादेन
दुर्मदाः। गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ।।२२।। शूलैः परश्वधैः खड्गैः
शतघ्नीभिर्भुशुण्डिभिः। सर्वतोऽवाकिरन् शस्त्रैरस्त्रैश्च विबुधर्षभान् ।।२३।। न
तेऽदृश्यन्त संछन्नाः शरजालैः समन्ततः। पुङ्खानुपुङ्खपतितैर्ज्योतींषीव नभोघनैः
।।२४।। ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान्। छिन्नाः सिद्धपथे देवैर्लघुहस्तैः
सहस्रधा ।।२५।। अथ क्षीणास्त्रशस्त्रौघा गिरिशृङ्गद्रुमोपलैः। अभ्यवर्षन् सुरबलं
चिच्छिदुस्तांश्च पूर्ववत् ।।२६।। तानक्षतान् स्वस्तिमतो निशम्य शस्त्रास्त्रपूगैरथ
वृत्रनाथाः। द्रुमैर्दृषद्भिर्विविधाद्रिशृङ्गैरविक्षतांस्तत्रसुरिन्द्रसैनिकान् ।।२७।।

।। सङ्ग्रहोक्तिः ।।

परिवृतं वज्रधरं स्वीयया श्रिया रोचमानं शक्रं दृष्ट्वा संग्रामे वर्तमाना वृत्रपुरःसरा असुरा
नासहन्त ।।१७-१८।। नमुचिः, शम्बरः, अनर्वा, द्विमूर्धा, ऋषभः, अम्बरः, हयग्रीवः, शंकुशिराः,
विप्रचित्तिः, अयोमुखः, पुलोमा, वृषपर्वा, प्रहेतिः, हेतिः, उत्कलश्चेति प्रमुखाः सहस्रशः दानवा
यक्षा रक्षांसि, सुमालिमालिप्रमुखास्ते सर्वेऽसुराः सुवर्णमयपरिच्छदाः सन्तः मृत्योरपि दुरासदं
शक्रसेनाधिपतिं सिंहनादेनाऽवरुद्ध्याऽभ्यद्रवन्, ततोऽसम्भान्ता दुर्मदास्ते गदा-परिघ-बाण-
प्रास-मुद्गर-शूल-परश्वध-खड्ग-शतघ्नी-भुशुण्डि प्रमुखैरस्त्रैः शस्त्रैश्च विबुधर्षभान् सर्वतोऽवा
किरन् ।।१९-२३।। पुंखानुपुंखापतितैर्बाणसमूहैराच्छादिता देवा, मेघैराच्छादितानि नक्षत्राणीव
नाऽदृश्यन्त ।।२४।। किन्तु ते शस्त्रास्त्रवर्षौघाः सुरसैनिकान् न सम्प्रापुः, क्षिप्रहस्तैर्देवैश्छिन्नास्त
आकाश एव व्यर्था बभूवुः ।।२५।। अथ क्षीणास्त्रशस्त्रौघास्तेऽसुरा गिरिशिखरैः शिलाभिश्च
सुरसैन्यमभ्यवर्षन्, किन्तु देवास्तान् सर्वप्रक्षिप्तान् पूर्ववदेव नभसि चिच्छिदुः ।।२६।। वृत्रनाथा
असुराः शस्त्रास्त्रौघैरक्षतान्, द्रुमैः पाषाणैर्विविधाद्रिशृङ्गैरप्यविक्षतान् सुखिनः शक्रसैनिकान्

सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः। कृष्णानुकुलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः।।२८।। ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः। पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः।।२९।। वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत्। पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः।।३०।। कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः। हे विप्रचित्ते नमुचे पुलोमन्मयानर्वन् शम्बर मे शृणुध्वम्।।३१।। जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता। लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तम्।।३२।। द्वौ संमताविह मृत्यू दुरापौ यद् ब्रह्मसंधारणया जितासुः। कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः।।३३।। ❁ *इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे दशमोऽध्यायः ।।१०।।* ❁

।। सङ्ग्रहोक्तिः ।।

वीक्ष्य तत्रसुः।।२७।। कृष्णानुकूलेषु देवेषु दैत्यैः कृताः सर्वेऽपि प्रयासाः महापुरुषेषु क्षुद्रजनैः प्रयुक्ता पुरुषा वाचः इव विफला अभवन्।।२८।। भगवद्विमुखाः सुरैरात्तसारा नष्टयुद्धदर्पा असुरा स्वप्रयासं निष्फलं निरीक्ष्य युद्धे वृत्रं परित्यज्य पलायनाय मनश्चक्रुः।।२९।। मनस्वी वीरो वृत्रोऽनुगतान् तान् असुरान् तीव्रेण भयेन पलायमान् प्रेक्ष्य, सकलं सैन्यं च भग्नप्रायं वीक्ष्य, विहस्य तदाह्वानं कुर्वन्नुवाच।।३०।। हे विप्रचित्ते! हे नमुचे! हे पुलोमन्! हे मय! हे अनर्वन्! हे शम्बर! मम वाचं शृणुध्वम्, इति सम्बुद्ध्य पुरुषप्रवीरो वृत्रः समयोचितां रुचिरां वाचमुवाच।।३१।। संसारे जातस्य सर्वस्यैष मृत्युर्निश्चितः, यस्य लोके प्रतिकारो न, हे दानवाः! संग्रामे जातान् मृत्योर्यदि स्वर्गो यशश्च स्यात् तर्हि योग्यं तं मृत्युं को न वृणीत?।।३२।। लोके द्विधा मृत्युर्दुर्लभः, संयतप्राणो योगी ब्रह्मसंधारणया कलेवरं संजह्यात् तथा संग्रामेऽपराङ्मुखः सन् रणभूवि कलेवरं विजह्यात्।।३३।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः।।१०।।

अथ एकादशोऽध्यायः ।। ११ ।।

श्रीशुक उवाच – त एवं शंसतो धर्मं वचः पत्युरचेतसः। नैवागृह्णन् भयत्रस्ताः पलायनपरा नृप ।।१।। विशीर्यमाणां पृतनामासुरीमसुरर्षभः। कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ।।२।। दृष्ट्वातप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः। तान्निवार्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ।।३।। *वृत्र उवाच* – किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः। न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ।।४।। यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि। अग्रे तिष्ठत मात्रं मे न चेद् ग्राम्यसुखे स्पृहा ।।५।। *श्रीशुक उवाच* – एवं सुरगणान् क्रुद्धो भीषयन्वपुषा रिपून्। व्यनदत्सुमहाप्राणो येन लोका विचेतसः ।।६।। तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै। निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ।।७।। ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरङ्गदुर्मदः। गां कम्पयन्नुद्यतशूलओजसा नालं वनं यूथपतिर्यथोन्मदः ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथैकादशोऽध्यायः ।। ११ ।।

युध्यतो वृत्रस्य भक्तिज्ञानबलाधिका विचित्रा वाचः

श्रीशुक उवाच – हे नृप! एवं धर्मं कथयतः पत्युर्वृत्रस्य वचो भयत्रस्ता युद्धानासक्तचेतसोऽसुराः पलायनपराः सन्तो नैवाऽगृह्णन् ।।१।। ततोऽसुरश्रेष्ठो वृत्रः कालानुकूलैर्दैवैः पीड्यमानां विद्राव्यमाणामासुरीसेनां दृष्ट्वाऽतप्यत, ततोऽसहमानः संक्रुद्धः वृत्रः पलायमानान् तानसुरान् बलेन निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणमुवाच ।।२-३।। *वृत्र उवाच* – मातुः पुरीषप्रायैः पलायमानैः पृष्ठतो हतैरसुरैः किं प्रयोजनम्? शूरमानिनां भीतवधो न श्लाघ्यो नापि स्वर्ग्यः ।।४।। अतः हे क्षुल्लका! देवाः युष्माकं हृदि यदि श्रद्धा सारं वा स्यात्, ग्राम्यसुखे च स्पृहा न स्यात्, तर्हि क्षणं मेऽग्रे तिष्ठत ।।५।। *श्रीशुक उवाच* – एवं क्रुद्धः, रिपून् देवान् स्ववपुषा भीषयन् सुमहाप्राणो वृत्रस्तथा व्यनदत्, येन नादेन लोका मूर्च्छिता बभूवुः ।।६।। तेन वृत्रसिंहनादेन सर्वे देवगणा मूर्च्छिताः सन्तः वज्रताडिता जना इव भूमौ निपेतुः ।।७।। रणदुर्मद उद्यतशूलो बलेन गां कम्पयन् स उन्मदो गज वनमिव मूर्च्छितं निमीलिताक्षं सुरसैन्यं पद्भ्यां ममर्द ।।८।।

विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् । चिक्षेप तामापततीं स दुःसहां जग्राह वामेन करेण लीलया ।।९।। स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोरुविक्रमः। जघान कुम्भस्थल उन्नदन् मृधे तत् कर्म सर्वे समपूजयन्नृप ।।१०।। ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ।अपासरद्भिन्नमुखः सहेन्द्रो मुञ्चन्नसृक् सप्तधनुर्भृशार्त्तः ।।११।। न सन्नवाहाय विषण्णचेतसे प्रायुङ्क्त भूयः स गदां महात्मा। इन्द्रोऽमृतस्यन्दिकराभिमर्शवीतव्यथक्षतवाहोऽभितस्थौ ।।१२।। स तं नृपेन्द्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ।स्मरंश्च तत्कर्म नृशंसमंहः शौकेन मोहेन हसन् जगाद ।।१३।। *वृत्र उवाच* – दिष्ट्या भवान् मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च। दिष्ट्याऽनृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् ।।१४।। यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ।

।। सङ्ग्रहोक्तिः ।।

तथाविधं वृत्रं विलोक्य वज्रधर इन्द्रोऽपि सुतरां क्रुद्धः सन् संमुखं धावते स्वशत्रवे वृत्राय हन्तुं महतीं गदां चिक्षेप, स वृत्रोप्यापतन्तीं दुःसहां गदां वामकरेण लीलया जग्राह ।।९।। भृशं कुपित उरुविक्रमो युद्धे भृशमुन्नदन्निन्द्रशत्रुः स वृत्रः स्वगृहीतया गदयैव महेन्द्रवाहमैरावतं कुम्भस्थले जघान, हे नृप! तस्य तत्कर्म सर्वे समपूजयन् ।।१०।। वृत्रस्य गदया ताडित ऐरावतः कुलिशाहतो भ्राम्यमाणः पर्वत इव विघूर्णितो भिन्नमुखो भृशार्त्तो रक्तं मुञ्चन् सहेन्द्रः सन्नेव सप्तधनुः प्रमाणं पश्चादगच्छत् ।।११।। महात्मा स वृत्रो दुःखितवाहनाय खिन्नचेतसे भूयो गदां न प्रायुङ्क्त, तत इन्द्रः सुधास्राविणा करेण गजं संस्पृश्य तं निर्व्यथं कृत्वा वृत्रस्याऽभिमुखमवतस्थे ।।१२।। हे नृपेन्द्र! स वृत्रो युद्धेच्छयाऽवस्थितं वज्रायुधं भ्रातृहणं रिपुं तमिन्द्रं विलोक्य शक्रकृतमतिक्रूरं पापं स्मरन्, पश्चात् मोहेन हसन् सन्निदं जगाद ।।१३।। *वृत्र उवाच* – यो भवान् ब्रह्महा गुरुहा मम भ्रातृहा च मम शत्रुः मे पुरः स्थितः, इदं दिष्ट्या, हे असत्तम! अचिरेणाऽहमद्य शूलेन दृषत्तुल्यं ते हृदयं निर्भिद्य भ्रातुः ऋणान्मुक्तो भविष्यामि, एतदपि दिष्ट्या ।।१४।। अकरुणः स्वर्गकामो भवान् नोऽग्रजस्याऽऽत्मविदो गुरोरपापस्य –

विश्रभ्य खड्गेन शिरांस्यवृश्चत्पशोरिवाकरुणः स्वर्गकामः ।।१५।। ह्रीश्रीदयाकीर्त्ति-
भिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम्। कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं
समदन्ति गृध्राः ।।१६।। अन्येऽनु ये त्वेह नृशंसमज्ञा यद्युद्यतास्त्राः प्रहरन्ति मह्यम्।
तैर्भूतनाथान् सगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि ।।१७।। अथो हरे मे कुलिशेन
वीर हर्त्ता भवानेव शिरो यदीह। तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः
प्रपत्स्ये ।।१८।। सुरेश कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघम्। मा
संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ।।१९।। नन्वेष वज्रस्तव
शक्र तेजसा हरेर्दधीचस्तपसा च तेजितः। तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो
हरिर्विजयः श्रीर्गुणास्ततः ।।२०।। अहं समाधाय मनो यथाह संकर्षणस्तच्चरणार-
विन्दे। त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ।।२१।। पुंसां
किलैकान्तधियां स्वकानां याः संपदो दिवि भूमौ रसायाम्। न राति यद्द्वेष उद्वेग
आधिर्मदः कलिर्व्यसनं संप्रयासः ।।२२।।

।। सङ्ग्रहोक्तिः ।।

दीक्षितस्य च विश्वास्य अकरुणो याज्ञिकः खड्गेन पशोरिव शिरांसि खड्गेन चिच्छेद ।।१५।।
ह्री-श्री-दया-कीर्तिभिः शून्यं, स्वकर्मणा पिशाचैरपि गर्ह्यं, मच्छूलेन विभिन्नदेहमदग्धदेहं
त्वां ज्ञात्वा गृध्राः कृच्छ्रेण सम्यगत्स्यन्ति ।।१६।। अन्येऽप्यज्ञा देवा मां क्रूरतया प्रहरन्ति,
तानपि स्वनिशितत्रिशूलेन निहत्य भैरवादीनां यजनं करिष्यामि ।।१७।। हे वीर! इन्द्र! युद्धे
भवानेव वज्रेण मम शिरो हरिष्यति तदा मद्देहेन भूतबलिं विधायाऽनृणः सन् धीराणां पदं
प्रपत्स्ये ।।१८।। हे सुरेश! पुरः स्थिते त्वच्छत्रौ मय्यमोघं वज्रं कथं न प्रतिमुञ्चसि? वज्रे
संशयो न विधेयः, कृपणाद् याच्ञा यथा विफला भवति तद्वत् ते वज्रं विफलं न स्यात् ।।१९।।
हे शक्र! तवैष वज्रो हरेर्तेजसा दधीचो मुनेस्तपसा च तीक्ष्णीकृतोऽस्ति, साक्षाद् विष्णुनाऽऽदिष्टो
भवान् वज्रेण मां जहि, यतः यत्र पक्षे हरिस्तत्रैव विजयः, श्रीः संपदादयो गुणा भवन्ति ।।२०।।
वज्रेण निहतोऽहं श्रीसंकर्षणचरणकमले मनो निवेश्य स्वकलेवरं हित्वा च योगिनां गतिं
प्राप्स्यामि ।।२१।। भगवान् स्वभक्तेभ्यः स्वर्गे भूमौ रसातले वा सम्पदो नैव ददाति, यतः

त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र। ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः।।२३।। अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः। मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः ।।२४।। न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्। न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे।।२५।। अजातपक्षा इव मातरं खगास्तन्यं यथा वत्सतराः क्षुधार्त्ताः। प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम्।।२६।। ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः। त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ।।२७।।

इति श्रीमद्भागवते महापुराणे एकादशोऽध्यायः ।।११।।

।। सङ्ग्रहोक्तिः ।।

सम्पद्भ्य एव हि द्वेषः, उद्वेगः, आधिः, मदः, कलिः, संप्रयासश्चेत्यादयो भवन्ति।।२२।। हे शक्र! अस्मत्पतिर्हरिर्भक्तस्य त्रैवर्गिकस्य प्रयासस्य विघातं विधत्ते, तत भगवत्प्रसादोऽनुमेयः, अतोऽकिंचनगोचरोऽयं भगवत्प्रसादः भवादृशां सकामानां न प्राप्यः, अतोऽन्यैर्दुर्लभः।।२३।। एवमिन्द्राय स्वाभिप्रायं निवेद्य स हरिं तुष्टाव - हे हरे! अहं जन्मान्तरे त्वद् दासानुदासो भविताऽस्मि, मम मनस्ते गुणान् स्मरतु, वाणी तव नाम कीर्त्तयतु, शरीरं ते पूजादिकं कर्म करोतु।।२४।। हे निखिलसौभाग्यनिधे! त्वां विहाय, वैकुण्ठं न काङ्क्षे तथा पारमेष्ठ्यं न काङ्क्षे, सार्वभौमं रसाधिपत्यं योगसिद्धीः, किं बहुनाऽपुनर्भवं वा न काङ्क्षे, केवलं त्वामेवेच्छामि ।।२५।।हे अरविन्दाक्ष! अजातपक्षाः खगाः घूकादिभि पीडिताः सन्तः स्वमातरमिव, क्षुधातुरा वत्सतराः स्वमातुःस्तन्यमिव, प्रोषितं स्वपतिं विषण्णा प्रिया इव, मे मनः केवलं त्वां दिदृक्षते। ।।२६।। हे नाथ! तवैकान्तिकभक्तेष्वेव मम सख्यं स्यात्, स्वकर्मभिः संसारचक्रे भ्रमतो मम, देहात्मपुत्रदारगृहेष्वासक्तचित्तस्य सतोऽपि भूयस्तेष्वासक्तिर्न भवेत्, एवं मामनुगृहाण।।२७।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यामेकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः ।।१२।।

श्रीशुक उवाच – एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमानः। शूलं प्रगृह्याभ्यपतत्सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ।।१।। ततो युगान्ताग्निकठोरजिह्व-माविद्ध्य शूलं तरसाऽसुरेन्द्रः। क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ।।२।। ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः। वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगम् ।।३।। छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम्। हनौ तताडेन्द्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ।।४।। वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः। अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ।।५।। इन्द्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसंनिधौ पुनः। तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ।।६।।

।। सङ्ग्रहोक्तिः ।।

अथ द्वादशोऽध्यायः ।।१२।।

इन्द्रवृत्रयोर्युद्धे वृत्रवधश्च

श्रीशुक उवाच – हे नृप! स्वकलेवरं जिहासुः संग्रामे विजयात् मृत्युमेव श्रेष्ठं मन्यमानो वृत्रस्त्रिशिखं शूलं स्वपाणौ प्रगृह्य प्रलयोदके कैटभः श्रीविष्णुमिव सुरेन्द्रं प्रत्यभ्यपतत् ।।१।। ततो वीरोऽसुरेन्द्रो वृत्रः प्रलयकालानलकठोरजिह्वं शूलं भ्रामयित्वा महेन्द्रं हन्तुं बलेन क्षिप्त्वा विनद्य च "हे पाप! हतोऽसि" इति क्रोधेन जगाद ।।२।। ततो वज्री शक्र ख आपत् परिभ्रमत् ग्रहोल्कावत् दुष्प्रेक्ष्यं तत् शूलं निरीक्ष्य धीरः सन् शतपर्वणा वज्रेण तच्छूलमुरगराजाभोगमिव तद्भुजं चाच्छिनत् ।।३।। तत श्छिन्नेकबाहुर्वृत्रः क्रुद्धः सन् गृहीतवज्रमिन्द्रमागत्य परिघेणेन्द्र-मैरावतं च हनौ तताड, तदा मघोनो हस्ताद् वज्रं पपात ।।४।। वृत्रस्य तदद्भुतं कर्म निरीक्ष्य देवा-सुराश्चारणसिद्धसंघाश्च बह्वमन्यन्त, तत तन्महेन्द्रसंकटं प्रेक्ष्य सर्वे देवपक्षपातिनो "हा हा" इति भृशं विचुक्रुशुः ।।५।। ततः शत्रुसन्निधाने स्वहस्ताच्च्युतं वज्रमिन्द्रो लज्जितः सन् यदा न जगृहे तदा वृत्रः पुनरिन्द्रमाह, हे हरे परिगृहीतवज्रः सन् स्वशत्रुं मां जहि, अयं विषादकालो न ।।६।।

युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम्। विनैकमुत्पत्तिलय-स्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम्।।७।। लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे । द्विजा इव शिचा बद्धाः स काल इह कारणम्।।८।। ओजः सहो बलं प्राणममृतं मृत्युमेव च। तमज्ञाय जनो हेतुमात्मानं मन्यते जडम्।।९।। यथा दारुमयी नारी यथा यन्त्रमयो मृगः। एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भोः ।।१०।। पुरुषः प्रकृतिर्व्यक्तमात्मभूतेन्द्रियाशयाः। शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात्।।११।। अविद्वानिममात्मानं मन्यतेऽनीशमीश्वरम्। भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम्।।१२।। आयुः श्रीः कीर्त्तिरैश्वर्यमाशिषः पुरुषस्य याः। भवन्त्येव हि तत्काले यथाऽनिच्छोर्विपर्ययाः।।१३।। तस्मादकीर्त्तियशसो-र्जयापजययोरपि। समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा।।१४।। सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः।

।। सङ्ग्रहोक्तिः।।

निखिलजगदुदयविभवविलयकारिणमेकं सर्वज्ञं सनातनं पुराणपुरुषं परमेश्वरं विना युयुत्सतामाततायिनां पराधीनानां सदैकस्य विजयः कुत्रचिदपि न दृष्टः।।७।। पालकैः सहिता इमे लोका विवशाः पाशेन बद्धाः पक्षिणः इव यस्येच्छानुसारं श्वसन्ति, स कालरूपेश्वर एव जयाजयादिषु कारणम्।।८।। ओजः, वेगः, बलं, प्राणं, मोक्षं, संसारं च, इत्येतेषां हेतुं कालरूपं परमेश्वरमविज्ञाय जनो जडं देहं हेतुं मन्यते।।९।। हे मघवन्! यथा काष्ठमयी नारी (पुत्तलिका) यथा वा यन्त्रमयो मृगः, परतन्त्रो विद्यते तथा सर्वाणिभूतानि परमेश्वराधीनानि विद्यन्ते।।१०।। प्रकृतिः महत्तत्त्वं, अहंकारः, भूतानि, ज्ञानकर्मोभयात्मकानीन्द्रियाणि, अन्तःकरणं च इत्येतानि सर्वाणि परमेश्वरानुप्रवेशं विना विश्वोत्पत्त्यादिषु नैव शक्नुवन्ति।।११।। एवमजानन्नरोऽनीश्वर-मप्यात्मानमीश्वरं मन्यते, भूतैर्भूतानि सृजति, स्वयं तैस्तानि ग्रसते च।।१२।। आयुः, श्रीः, कीर्त्तिः, ऐश्वर्यं, पुरुषस्य आशिषश्चेत्येतत्सर्वं जयादिकाले भवन्त्येव, यथाऽनिच्छो-रप्यकीर्त्यादयो भवन्ति हि, तद्वत्।।१३।। तस्मात् विवेकी कीर्त्यपकीर्त्योः जयपराजययोः, जीवन-मरणयोः सुखदुःखयोः, सर्वेष्वपि च भावेषु समबुद्धिः स्यात्।।१४।। सत्त्वं रजस् तमस् इति -

तत्र साक्षिणमात्मानं यो वेद न स बद्ध्यते।।१५।। पश्य मां निर्जितं शक्र वृक्णायुधभुजं मृधे। घटमानं यथाशक्ति तव प्राणजिहीर्षया।।१६।। प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः। अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः।।१७।। *श्रीशुक उवाच* – इन्द्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत्। गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः।।१८।। *इन्द्र उवाच* – अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी। भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरम्।।१९।। भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम्। यद्विहायासुरं भावं महापुरुषतां गतः।।२०।। खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव। वासुदेवे भगवति सर्वात्मनि दृढा मतिः।।२१।। यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे। विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः।।२२।। *श्रीशुक उवाच* – इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप। युयुधाते महावीर्याविन्द्रवृत्रौ युधां पती।।२३।। आविद्ध्य परिघं वृत्रः कार्ष्णायसमरिंदमः। इन्द्राय प्राहिणोद् घोरं वामहस्तेन मारिष।।२४।।

।। सङ्ग्रहोक्तिः ।।

त्रयोऽपि प्रकृतेर्गुणाः नाऽऽत्मनः, तेष्वात्मानं साक्षिणं यो वेद, स तत्र न निबद्ध्यते।।१५।। हे शक्र! युद्धे छिन्नायुधभुजं, त्वया निर्जितं, तथापि त्वत्प्राणजिहीर्षया यथाशक्ति यतमानं मां पश्य, विचारय।।१६।। अस्मिन् समरद्यूते प्राणाः पणः, बाणाः अक्षाः, वाहनानि फलकाः सन्ति, अत्र अमुष्य जयः, अमुष्य पराजयः, इति वा न ज्ञायते ।।१७।। *श्रीशुक उवाच* - शक्रो निष्कपटं वृत्रवचः श्रुत्वा, तद् बहुमन्यत, ततो गृहीतवज्रो गतविस्मयः प्रहसन् सन् तं वृत्रं प्राह।।१८।। *इन्द्र उवाच* – अहो, आश्चर्यमिदम्, हे दानव! त्वं सिद्धोऽसि, यस्य त इदृशं ज्ञानम्, भक्तस्त्वं सर्वात्मानं सुहृदं जगदीश्वरं परमात्मानं सेवितवानसि।।१९।। भवान् जनमोहिनीं वैष्णवीं मायामतार्षीद्धि, यतस्त्वमासुरं भावं विहाय महापुरुषतां प्राप्तोऽसि।।२०।। इदं खलु महदाश्चर्यं वर्तते, यत् राजसस्वभावस्य तव सर्वात्मनि भगवति वासुदेवे दृढा मतिरवस्थिताऽस्ति।।२१।। मोक्षाधिपतौ हरौ भगवति यस्य पुंसो भक्तिर्भवति, ब्रह्मानन्दसमुद्रे क्रीडतस्तस्य तुच्छैर्गर्तोदकतुल्यैः स्वर्गादिभिः किम्?।।२२।। *श्रीशुक उवाच* – हे नृप! एवं धर्मजिज्ञासया परस्परं ब्रुवाणौ योधृणां पती महावीर्याविन्द्रवृत्रौ युयुधाते।।२३।। हे मारिष! शत्रुदमनो वृत्रः कार्ष्णायसं घोरं परिघं वामहस्तेन भ्रामयित्वेन्द्रं हन्तुं प्रचिक्षेप।।२४।।

स तु वृत्रस्य परिघं करं च करभोपमम्। चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ।।२५।। दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः। छिन्नपक्षो यथा गोत्रः खाद् भ्रष्टो वज्रिणा हतः।।२६।। कृत्वाऽधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ।नभोगम्भीरवक्त्रेण लेलिहोल्बणजिह्वया ।।२७।। दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम्। अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन्।।२८।। गिरिराट् पादचारीव पद्भ्यां निर्जरयन् महीम्। जग्रास स समासाद्य वज्रिणं सहवाहनम्।।२९।। महाप्राणो महावीर्यो महासर्प इव द्विपम्। वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः। हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः।।३०।। निगीर्णोऽप्यसुरेन्द्रेण न ममारोदरं गतः। महापुरुषसन्नद्धो योगमायाबलेन च।।३१।। भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः। उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा।।३२।। वज्रस्तु तत्कंधरमाशुवेगः कृन्तन् समन्तात्परिवर्त्तमानः। न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्यै।।३३।।

।। सङ्ग्रहोक्तिः ।।

देवराजः स इन्द्रस्तु शतपर्वणा वज्रेण परिघं वृत्रस्य करभोपमं करं च युगपच्चिच्छेद।।२५।। छिन्नमूलाभ्यां बाहुभ्यां रक्तस्रवो वृत्रः, इन्द्रेण ताडित छिन्नपक्षः आकाशात् पतित पर्वत इव बभौ।।२६।। अधरां हनुं भूमौ, उत्तरां हनुं दिवि च कृत्वा नभोगम्भीरवक्त्रेण सर्पस्य इव उग्र जिह्वया युक्तः, कालसदृशीभिर्दंष्ट्राभिर्जगत्त्रयं ग्रसन्निव अतिमात्रमाहाकायः गमनवेगेन गिरीन् कम्पयन्, पादचारी गिरिराडिव पद्भ्यां भुवं चूर्णयन् महाप्राणो महावीर्यो महासर्पो द्विपमिव स वृत्रः सवाहनं वज्रिणं समासाद्य जग्रास।।२७-२९।। ततः सप्रजापतयः सुराः सर्वे वृत्रग्रस्तमिन्द्रं विलोक्य हा कष्टम्!!! इति निविण्णाः महर्षिभिः सहिताः सन्तश्चुक्रुशुः।।३०।। महापुरुषविद्यया नारायणवर्मणा संनद्धो योगमायाबलेन च युक्तः शक्रो वृत्रेण निगीर्णोऽत एव वृत्रजठरप्राप्तोऽपि न ममार।।३१।। महासमर्थो बलभिदिन्द्रो वज्रेण तत्कुक्षिं भित्त्वा निष्क्रम्य वृत्रस्य शिर ओजसा गिरिशृङ्गमिव चिच्छेद।।३२।। वृत्रहनने प्रवृत्तः तत्कन्धरां समन्ततः परिभ्रमन् आशुवेगो वज्रो ज्योतिषामयने यावदहर्गणः स्यात् तावता कालेन तच्छिरो भूमौ –

तदा च खे दुन्दुभयो विनेदुर्गन्धर्वसिद्धाः समहर्षिसंघाः। वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना मन्त्रैर्मुदा कुसुमैरभ्यवर्षन् ।।३४।। वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिररिंदम पश्यतां सर्वलोकानां ह्यलोकं समपद्यत ।।३५।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

श्रीशुक उवाच – वृत्रे हते त्रयो लोका विना शक्रेण भूरिद। सपाला ह्यभवन् सद्यो विज्वरा निर्वृतेन्द्रियाः ।।१।। देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम् । प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेन्द्रादयस्ततः ।।२।। *राजोवाच* – इन्द्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने। येनासन् सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ।।३।। *श्रीशुक उवाच* – वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः।

।। सङ्ग्रहोक्तिः ।।

न्यपातयत् ।।३३।। तदा खे दुन्दुभयो नेदुः, समहर्षिसंघाः गन्धर्वसिद्धाः वृत्रघ्नवीर्यप्रकाशकैर्मन्त्रैस्तमिन्द्रमभिस्तुवन्तःसन्तो मुदा कुसुमैरभ्यवर्षन् ।।३४।। हे राजन्! वृत्रस्य देहात् निष्क्रान्तमात्मज्योतिः सर्वलोकानां पश्यतां सतामलोकं = भगवद्धाम समपद्यत ।।३५।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

विष्णुना वृत्रब्रह्महत्याभयादिन्द्रस्य रक्षणं कृतम्

श्रीशुक उवाच – हे भूरिद! राजन्! शक्रेण वृत्रे हते सत्येकं शक्रं विना सपालास्त्रयो लोकाः सद्य एव विज्वराः सुखितेन्द्रिया अभवन् ।।१।। देवाः, ऋषयः, पितरः, भूतानि, देवानुगा दैत्याश्चैते, सर्वे स्वयमेव रणस्थानात् स्वस्वस्थानानि प्रतिजग्मुः, ततो ब्रह्मा, शिवः, इन्द्रश्च, तेऽपि तत्स्थानात् स्वधिष्ण्यानि प्रतिजग्मुः ।।२।। *राजोवाच* – हे महर्षे! इन्द्रस्याऽनिर्वृतौ कारणं श्रोतुमिच्छामि, येन वृत्रवधेन देवाः सुखिन आसन्, तत्रेन्द्रस्य दुःखं कुतोऽभवत्? ।।३।।

तद्वधायार्थयन्निन्द्रं नैच्छद्भीतो बृहद्वधात् ।।४।। *इन्द्र उवाच* - स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम्। विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्वमाज्र्म्यहम्।।५।। *श्रीशुक उवाच* - ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन्। याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः।।६।। हयमेधेन पुरुषं परमात्मानमीश्वरम्। इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात्।।७।। ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाऽघवान्। श्वादः पुष्कसको वापि शुद्ध्येरन्यस्य कीर्त्तनात्।।८।। तमश्वमेधेन महामखेन श्रद्धान्वितो-ऽस्माभिरनुष्ठितेन ।हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण।।९।। *श्रीशुक उवाच* - एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुम्। ब्रह्महत्या हते तस्मिन्ना-ससाद वृषाकपिम्।।१०।।तयेन्द्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत्। ह्रीमन्तं वाच्यतां प्राप्तं सुखयन्त्यपि नो गुणाः।।११।। तां ददर्शानुधावन्तीं चाण्डालीमिव रूपिणीम्। जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटाम्।।१२।।

।। सङ्ग्रहोक्तिः ।।

श्रीशुक उवाच - वृत्रपराक्रमभीताः सर्वे देवाः ऋषिभिः सह वृत्रवधार्थमिन्द्रं प्रार्थयामासुः, किन्तु स ब्रह्मण्यवधाद् भीतः सन् वृत्रवधं नैच्छत्।।४।। *इन्द्र उवाच* - विश्वरूपवधोद्भवं पापं मामनुगृह्णद्भिः स्त्री-भू-जल-द्रुमैः विभज्य गृहीतम्, अधुना वृत्रहत्योद्भवं पापं कुत्र मार्ज्मि?।।५।। *श्रीशुक उवाच* - इन्द्रस्य वचः श्रुत्वा, ऋषय इन्द्रमूचुः - हे इन्द्र! वयं त्वामश्वमेधेन भगवन्तं याजयिष्यामः, त्वं मा भैः, तव भद्रमेव भविष्यति।।६ ।। परमात्मानं परमेश्वरं देवं परमपुरुषं नारायणमश्वमेधेन समाराध्य जगद्वधनिमित्तादपि पापान्मोक्ष्यसे।।७।। यस्य भगवन्नाम्नः कीर्त्तनाद् ब्रह्महा, पितृहा, गोघ्नः, मातृहा, आचार्यहा, एवंविधेतरपापयुक्तः, श्वादः, पुष्कसः, इतरः, कोऽपि पापः, ते सर्वेऽपि शुद्ध्येरन्।।८।। तं भगवन्तमस्माभिरनुष्ठितेन महामखेना-ऽश्वमेधेनेष्ट्वा श्रद्धान्वितस्त्वं सब्रह्मचराचरं जगद् हत्वाऽपि पापेन न लिप्यसे, खलस्य वृत्रस्य हननेन किम्?।।९।। श्रीशुक उवाच - एवं ऋषिभिः संप्रेरित इन्द्रो रिपुं वृत्रमहनत्, तस्मिन् हते सति ब्रह्महत्या शक्रमाससाद।।१०।। तया ब्रह्महत्ययेन्द्रस्तापमसहत्, इन्द्रः सुखी नाऽभूत्, ह्रीमन्तं निन्द्यतां प्राप्तं तं धैर्यशौर्यादयो गुणा अपि नैव सुखयन्ति स्म।।११।।

विकीर्य पलितान् केशांस्तिष्ठ तिष्ठेति भाषिणीम् । मीनगन्ध्यसुगन्धेन कुर्वन्तीं मार्गदूषणम् ।।१३।। नभो गतो दिशः सर्वाः सहस्राक्षो विशां पते। प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसम् ।।१४।। स आवसत्पुष्करनालतन्तूनलब्धभागो यदिहाग्निदूतः। वर्षाणि साहस्रमलक्षितोऽन्तः संचिन्तयन् ब्रह्मवधाद्विमोक्षम् ।।१५।। तावत् त्रिणाकं नहुषः शशास विद्यातपोयोगमहानुभावः। स संपदैश्वर्यमदान्धबुद्धिर्नीतस्तिरश्चां गतिमिन्द्रपत्न्या ।।१६।। ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः। पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ।।१७।। तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत। यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह ।।१८।। अथेज्यमाने पुरुषे सर्वदेवमयात्मनि। अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ।।१९।। स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप। नीतस्तेनैव शून्याय नीहार इव भानुना ।।२०।। स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः।

।। सङ्ग्रहोक्तिः ।।

इन्द्रः पृष्टत एव धावन्तीं मूर्तिमतीं चाण्डालीमिव स्थितां जरया वेपमानाङ्गीं यक्ष्मग्रस्तां रजोरक्तपटां तां ब्रह्महत्यां ददर्श ।।१२।। पलितान् केशान् विकीर्य "तिष्ठ तिष्ठ" इति भाषिणीं मीनगन्धिना प्राणवायुगन्धेन मार्गदूषणं कुर्वन्तीं ददर्श ।।१३।। हे नृप! सहस्राक्षो नभः, सर्वा दिशो गतः, तत ऐशानीं दिशं गतः सन् तूर्णं मानसं सरः प्रविष्टः ।।१४।। सरस्यन्तर्जले ब्रह्महत्याया दर्शनाविषय इन्द्रो ब्रह्मवधाद् विमोक्षं विचिन्तयन् सहस्रवर्षपर्यन्तं पुष्करनालतन्तूनाश्रित्याऽऽवसत् ।।१५।। तावत् कालपर्यन्तं विद्या-तपो-योग-महानुभावो नहुषः स्वर्गं शशास, संपदैश्वर्यमदेनाऽन्धबुद्धिः स शच्या सर्पयोनिं प्रापितः ।।१६।। तत इन्द्रो ब्राह्मणवाक्येन स्वर्गं गतः, श्रीनारायणध्याननिरस्तपापं दिग्देवतया पद्मालयया विष्णुपत्न्या लक्ष्म्या रक्षितमिन्द्रं हतबलं तत् पापं तु नाऽभ्यभूत् ।।१७।। हे भारत! तमागतमिन्द्रं ब्रह्मर्षयः संप्राप्य परमपुरुषाराधनरूपेणाऽश्वमेधेन दीक्षयाञ्चक्रुः ।।१८।। अथ ब्रह्मर्षिभिः क्रियमाणेऽश्वमेधे सर्वदेवानामन्तरात्मभूते परमपुरुष आराध्यमाने सति भूयान् त्वाष्ट्रवधनिमित्तः पापचयः सूर्येण नीहार इव शून्यतां गमितः ।।१९-२०।। मरीचिप्रभृतिभिरनुष्ठीयमानेन यथोक्तेनाऽश्वमेधेनाऽधियज्ञं

इष्ट्वाधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः।।२१।। इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्त्तनम्। भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः।।२२।। पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियम्। धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथायुषम् ।।२३।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः।।१४।।

परीक्षित् उवाच – रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः। नारायणे भगवति कथमासीत् दृढा मतिः।।१।। देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम्। भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते।।२।। रजोभिः समसंख्याताः पार्थिवैरिह जन्तवः। तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः।।३।।

।। सङ्ग्रहोक्तिः।।

पुराणपुरुषमिष्ट्वा स इन्द्रो विधूतपापो निष्प्रतिपक्ष आसीत्।।२१।।महेन्द्रविमोक्षणं शक्रविजयरूपं निःशेषपापप्रक्षालनं भगवत्कीर्त्तनरूपं भक्तिविवर्द्धनं, भक्तजनानुवर्णनमिदं महाख्यानं भवति।।२२।। भगवत्प्रीतिकरं धन्यं यशस्यं सर्वपापप्रक्षालनं मङ्गलावहमायुष्करं रिपूंजयमिदमाख्यानं ये बुधाः पर्वणि पर्वणि पठेयुः अथवा शृणुयुः तेषामुक्तसकलार्थप्रदं भविष्यति।।२३।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः।।१४।।

कृच्छ्राल्लब्धे पुत्रे मृते चित्रकेतोः शोकः

परीक्षिद् उवाच – हे ब्रह्मन्! रजस्तमःस्वभावस्य पापकारिणो वृत्रस्य भगवति नारायणे दृढा भगवदेकान्तिकी भक्तिरूपा धीः कथमासीत्।।१।।शुद्धसत्त्वानां देवानां निर्मलचित्तानां ऋषीणां चापि प्रायेण मुकुन्दचरणे भक्तिर्नोपजायते।।२।। इह लोके पृथिव्या रेणुभिः समसंख्याता

प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम। मुमुक्षूणां सहस्रेषु कश्चित् मुच्येत सिद्धयति।।४।। मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने।।५।। वृत्रस्तु स कथं पापः सर्वलोकोपतापनः। इत्थं दृढमतिः कृष्ण आसीत् संग्राम उल्बणे।।६।। अत्र नः संशयो भूयान् श्रोतुं कौतूहलं च भो। यः पौरुषेण समरे सहस्राक्षमतोषयत् ।।७।। *सूत उवाच* - परीक्षितोऽथ संप्रश्नं भगवान् बादरायणिः । निशम्य श्रद्दधानस्य प्रतिनन्द्येदमब्रवीत् ।।८।। *श्रीशुक उवाच* - शृणुष्वावहितो राजन्नितिहासमिमं यथा। श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि।।९।। आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप। चित्रकेतुरिति ख्यातो यस्यासीत् कामधुङ्महीं।।१०।। तस्य भार्यासहस्राणां सहस्राणि दशाभवन्। सांतानिकश्चापि नृपो न लेभे तासु संततिम्।।११।। रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः। संपन्नस्य गुणैः सर्वैश्चिन्ता वन्ध्यापतेरभूत्।।१२।।

।। सङ्ग्रहोक्तिः ।।

जीवाः सन्तिः, तेषां मध्ये ये केचन मनुजादय एव श्रेय ईहन्ते।।३।। हे द्विजोत्तम! श्रेयः प्रवणमनुष्याणां मध्ये प्रायो मुमुक्षवः केचनैव, किंच मुमुक्षूणां सहस्रेषु कश्चिदेव मुच्येत, लब्धयोगश्च भवति।।४।। योगसिद्धिं प्राप्तानां मुक्तानां मध्येऽपि नारायणपरायणः सुदुर्लभः, हे महामुने! नारायणपरायणानां कोटिष्वपि प्रशान्तात्मा सुतरां दुर्लभः।।५।। पापरूपः सर्वलोकदुःखकारी स वृत्रस्तु दुःसहे संग्राम इत्थं कृष्णे दृढमतिः कथमासीत्।।६।। हे मुने! अस्मिन् विषयेऽस्माकं महान् संशयो वर्तते, यो वृत्रः समरे स्वपराक्रमेण महेन्द्रमप्यतोषयत्।।७।। *सूत उवाच* - हे शौनक! भगवान् बादरायणिः श्रद्दधानस्य परीक्षितः संप्रश्नं कात्स्न्येन निशम्य तं प्रतिनन्द्य चेदं वक्ष्यमाणमब्रवीत्।।८।। *श्रीशुक उवाच* - हे राजन्! वक्ष्यमाणमितिहासं सावधानः सन् यथावत् शृणुष्व, मत्पितुर्मुखात् नारदात् देवलाच्च श्रुतं तच्छृणुष्व।।९।। हे नृप! वृत्रः पूर्वजन्मनि शूरसेनदेशेषु चित्रकेतुनामा प्रसिद्धः सार्वभौमो राजाऽऽसीत्, यस्य मही कामदुघाऽभूत्।।१०।। तस्य चित्रकेतोः कोटिसंख्याका भार्या आसन्, स नृपः सन्तानार्थी सन्नपि तासु सन्ततिं न लेभे।।११।। रूप-औदार्य-वयो-जन्म-विद्या-ऐश्वर्य-श्रियादिभिः सर्वगुणैः सम्पन्नस्याऽपि -

न तस्य संपदः सर्वा महिष्यो वामलोचनाः। सार्वभौमस्य भूश्चेयमभवन् प्रीतिहेतवः ।।१३।। तस्यैकदा तु भवनमङ्गिरा भगवानृषिः। लोकाननुचरन्नेतानुपागच्छद्यदृच्छया।।१४।। तं पूजयित्वा विधिवत् प्रत्युत्थायार्हणादिभिः। कृत्वाऽऽतिथ्यमुपासीदत्सुखासीनं समाहितः।।१५।। महर्षिस्तमुपासीनं प्रश्रयाऽवनतं क्षितौ। प्रतिपूज्य महाराज समाभाष्येदमब्रवीत्।।१६।। *अङ्गिरा उवाच* – अपि तेऽनामयं स्वस्ति प्रकृतीनां तथाऽऽत्मनः। यथा प्रकृतिभिर्गुप्तः पुमान् राजाऽपि सप्तभिः ।।१७।। आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात्। राज्ञा तथा प्रकृतयो नरदेवाहताधयः।।१८।। अपि दाराः प्रजामात्या भृत्याः श्रेण्योऽथ मन्त्रिणः। पौरा जानपदा भूपा आत्मजा वशवर्त्तिनः।।१९।। यस्यात्मानुवशश्चेत्स्यात्सर्वे तद्वशगा इमे। लोकाः सपाला यच्छन्ति सर्वे बलिमतन्द्रिताः।।२०।। आत्मनः प्रीयते नात्मा परतः स्वत एव वा। लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम्।।२१।।

।। सङ्ग्रहोक्तिः ।।

वन्ध्यापतेस्तस्य चिन्ताऽभवत्।।१२।। सार्वभौमस्य तस्य सर्वाः सम्पदः, सुन्दरेक्षणा महिष्यः, कृत्स्ना भूमिश्च, एता प्रसन्नताहेतवो नाऽभवन्।।१३।। तस्य भवनं प्रत्येकदा भगवान् अङ्गिराः ऋषिर्लोकाननुचरन् यदृच्छया समुपागच्छत्।।१४।। तं मुनिं यथावत् प्रत्युत्थायाऽर्घ्यपाद्यादि-पूजाविधिभिः पूजयित्वा आतिथ्यं च कृत्वा सुखासीनं तं संयतचित्तः सन्नुपासीदत्।।१५।। हे महाराज! महर्षिः क्षितौ समीपे समुपविष्टं प्रश्रयावनतं तं चित्रकेतुमभिनन्द्य संबोध्य चेदमब्रवीत्।।१६।। *अङ्गिरा उवाच*– हे नृप! तेऽनामयमस्ति किल? तव सप्तप्रकृतीनामपि स्वस्ति किम्? यथा महदहंपञ्चतन्मात्रात्मकाभिः सप्तप्रकृतिभिर्जीवः नित्यं रक्षितो भवति, तथा राजाऽपि स्वाम्यादिभिः सप्तभिर्गुप्तो सुखी भवति।।१७।। राजाऽपि स्वं प्रकृतिषु साक्षात् निधाय राज्यसुखमाप्नुत् तथा प्रकृतयोऽपि राज्ञैव निरस्तमनोदुःखाः सत्यः सुखमाप्नुयुः।।१८।। येन मनो वशीकृतं भवेत् तस्य दाराः, प्रजा, अमात्याः, भृत्याः, श्रेण्यः, मन्त्रिणः, पौराः, जानपदाः, भूपाः, आत्मजाश्च सर्वेऽपि वशवर्तिनो भवेयुः, जितेन्द्रियस्य राज्ञः सपालाः सर्वे लोकाः समाहिताः सन्तः बलिमर्पयन्ति।।१९-२०।। तव स्वस्य मन न तुष्यति किम्?

श्रीशुक उवाच - एवं विकल्पितो राजा विदुषा मुनिनाऽपि सः। प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ।।२२।। *चित्रकेतुरुवाच* - भगवन् किं न विदितं तपोज्ञान-समाधिभिः। योगिनां ध्वस्तपापानां बहिरन्तः शरीरिषु ।।२३।। तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिन्तितम्। भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ।।२४।। लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः। न नन्दयन्त्यप्रजं मां क्षुत्तृट्काममिवाऽपरे ।।२५।। ततः पाहि महाभाग पूर्वैः सह गतं तमः। यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ।।२६।। *श्रीशुक उवाच* - इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः। श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ।।२७।। ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत। नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद् द्विजः ।।२८।। अथाह नृपतिं राजन् भवितैकस्तवात्मजः। हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ।।२९।। साऽपि तत्प्राशनादेव चित्रकेतोरधारयत्।

।। सङ्ग्रहोक्तिः ।।

तत् किं स्वतः परतो वा? त्वामलब्धकामं लक्षये, यतस्तव मुखं चिन्तया विच्छायं दृश्यते ।।२१।। *श्रीशुक उवाच* - विदुषा मुनिनैवं विकल्पपूर्वकं पृष्टः प्रश्रयावनतः राजा चित्रकेतुः प्रजाकामः सन् मुनिमङ्गिरसमभ्याह ।।२२।। *चित्रकेतुरुवाच* - हे भगवन्! तपोज्ञानसमाधिभिर्ध्वस्तपापानां भवादृशां योगिनां शरीरिष्वन्तर्बहिश्च किं विदितं न, सर्वं विदितमेवाऽस्ति ।।२३।। हे ब्रह्मन्! मन्मनोगतं जानता, तथापि पृच्छता भवता प्रेरितोऽहं मनोगतं यत्, तत् त्वदनुज्ञया कथयामि ।।२४।। हे भगवन्! लोकपालैरपि प्रार्थ्याः मम साम्राज्यैश्वर्यसम्पदः प्रजारहितं मां क्षुत्तृट्काममपरे स्रक्चन्दनादय इव न सुखयन्ति ।।२५।। अत एव स्वपूर्वजैः सह नरकं गमिष्यन्तं मां पाहि, हे भगवन्! त्वं तथा विधेहि यत् वयं प्रजया दुस्तारं नरकं तरेम ।।२६।। *श्रीशुक उवाच* - इत्थं प्रार्थितो भगवान् कृपालुर्ब्रह्मणः सुतोऽङ्गिरा मुनिस्त्वाष्ट्रं चरुं श्रपयित्वा त्वष्टारमयजत् ।।२७।। हे भारत! ततो राज्ञो महिषीणां मध्ये ज्येष्ठा श्रेष्ठा च नाम्ना या कृतद्युतिः भार्या, तस्यै द्विजोऽङ्गिरा यज्ञशेषं हविरदात् ।।२८।। अथ ब्रह्मसुतोऽङ्गिरा नृपतिं प्राह, हे राजन्! तुभ्यं हर्षशोकप्रद एक आत्मजो भविता, इत्युक्त्वा स ततो ययौ ।।२९।।

गर्भं कृतद्युतिर्देवी कृत्तिकाऽग्नेरिवात्मजम् ।।३०।। तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः। ववृधे शूरसेनेशतेजसा शनकैर्नृप ।।३१।। अथ काल उपावृत्ते कुमारः समजायत। जनयन् शूरसेनानां शृण्वतां परमां मुदम् ।।३२।। हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः। वाचयित्वाऽऽशिषो विप्रैः कारयामास मङ्गलम् ।।३३।। तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च। ग्रामान् हयान् गजान् प्रादाद्धेनूनामबुर्दानि षट् ।।३४।। ववर्ष कामानन्येषां पर्जन्य इव देहिनाम् । धन्यं यशस्यमायुष्यं कुमारस्य महात्मनः ।।३५।। कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः। यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्द्धत ।।३६।। मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः। कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ।।३७।। चित्रकेतोरतिप्रीतिर्यथादारे प्रजावति। न तथान्येषु संजज्ञे बालं लालयतोऽन्वहम् ।।३८।। ताः पर्यतप्यन्नात्मानं गर्हयन्त्योऽभ्यसूयया ।

।। सङ्ग्रहोक्तिः।।

ततो देवी सा कृतद्युतिरपि चरुशेषहविषः प्राशनात् चित्रकेतोः सकाशात् कृत्तिका अग्नेरिव पुत्रात्मकं गर्भमधारयत् ।।३०।। चित्रकेतुवीर्यरूपः कृतद्युतेर्गर्भः शुक्लपक्षे चन्द्र इव शनकैरनुदिनं ववृधे ।।३१।। अथ दशमासात्मके समये संप्राप्ते शृण्वतां शूरसेनानां परमां मुदं जनयन् कुमारः समजायत ।।३२।। ततो हृष्टो राजा चित्रकेतुः स्नातः शुचिरलंकृतः सन् विप्रैः कुमारस्याऽऽशिषो वाचयित्वा मङ्गलं जातकर्म कारयामास ।।३३।। ततस्तेभ्यो विप्रेभ्यो हिरण्यं, रजतं वासांसि, आभरणानि, ग्रामान्, हयान्, गजान्, धेनूनां षट् अर्बुदानि दानरूपाणि स प्रादात् ।।३४।। देहिनामिष्टान् कामान् पर्जन्य इव सोऽन्येषां बन्धुभृत्यादीनां कामान् ववर्ष, तदानीं कृतं दानं महात्मनः कुमारस्य धन्यं यशस्यमायुष्करमिति ज्ञात्वा ददौ ।।३५।। अथ पितुः राजर्षेश्चित्रकेतोः कृच्छ्रलब्धे तनये निर्धनस्य कृच्छ्रलब्धे धने इव स्नेहोऽनुदिनमन्ववर्द्धत ।।३६।। मातुः कृतद्युतेस्तु मोहसमुद्भवो स्नेहोऽतितरामन्ववर्द्धत, तदा कृतद्युतेः सपत्नीनां प्रजाकामरूपस्तापोऽभवत् ।।३७।। प्रतिदिनं बालं कुमारं लालयतश्चित्रकेतोः पुत्रवत्यां पत्न्यां यथाऽतिप्रीतिरासीत् तथाऽन्येषु दारेषु नैवासीत् ।।३८।।

आनपत्येन दुःखेन राज्ञोऽनादरणेन च ।।३९।। धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमताम्। सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ।।४०।। दासीनां कोऽनु संतापः स्वामिनः परिचर्यया। अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः।।४१।। एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा। राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत् ।।४२।। विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः। गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति।।४३।। कृतद्युतिरजानन्ती सपत्नीनामघं महत् । सुप्त एवेति संचिन्त्य निरीक्ष्य व्यचरद् गृहे।।४४।। शयानं सुचिरं बालमुपधार्य मनीषिणी। पुत्रमानय मे भद्रे इति धात्रीमचोदयत्।।४५।। सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम्। प्राणेन्द्रियात्मभिस्त्यक्तं हताऽस्मीत्यपतद्भुवि।।४६।। तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नन्त्याः कराभ्यामुर उच्चकैरपि । प्रविश्य राज्ञी त्वरयात्मजान्तिकं ददर्श बालं सहसा मृतं सुतम्।

।। सङ्ग्रहोक्तिः ।।

ततः कृतद्युतावभ्यसूयादुःखेन राज्ञोऽनादरेण चाऽऽत्मानं गर्हन्त्यस्ताः, सपत्न्यः पर्यतप्यन्।।३९।। पापां पत्युरपि "इयं गृहिणी न" इत्यसंमतां सुप्रजाभिः सपत्नीभिः दासीमिव तिरस्कृतामप्रजां स्त्रीं धिक्।।४०।। परिचर्यया स्वामिनोऽभीक्ष्णं लब्धमानानां दासीनां को नु संतापः. न कोऽपि हि, वयं तु दास्या दासीव दुर्भगाः स्मः।।४१।। एवं सप्त्न्याः कृतद्युतेः पुत्रसम्पदा दह्यमानानां चित्रकेतुनाऽसमर्पितवृत्तीनां प्रजाहीनानां स्त्रीणां विद्वेषो बलवत्तरोऽभूत्।।४२।। नृपं चित्रकेतुं प्रत्यसहमाना विद्वेषनष्टविवेकाः दारुणचेतसः स्त्रियः कुमाराय विषं ददुः।।४३।। सपत्नीनां गरलप्रदानरूपं पापमजानती कृतद्युतिः कुमारं वीक्ष्य "सुप्त एव" इति मत्वा गृहे व्यचरत्।।४४।। मनीषिणी कृतद्युतिर्बालं सुचिरं शयानमुपधार्य "भद्रे मम पुत्रमानय" इत्येवं धात्रीं प्रेरयामास।।४५।। सा धात्री शयानं कुमारमुपव्रज्य उत्तारलोचनं प्राणेन्द्रियात्मभिस्त्यक्तं तं दृष्ट्वा "हा हताऽस्मि" इति क्रोशन्ती भूव्यपतत्।।४६।। कराभ्यामतितरामुरोघ्नन्त्यास्तस्या धात्र्या भृशातुरं स्वरमाकर्ण्य तत्क्षणमेव राज्ञी कृतद्युतिरपि त्वरया स्वपुत्रान्तिकप्रदेशं प्रविश्य सहसा मृतं बालं ददर्श, ततो भूमौ पपात, परिवृद्धेन शोकेन विलुलितकेशाम्बरा च सती मुमोह।।४७।।

पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहाम्बरा।।४७।। ततो नृपान्तःपुरवर्त्तिनो जना नराश्च नार्यश्च निशम्य रोदनम्। आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः।।४८।। श्रुत्वा मृतं पुत्रमलक्षितान्तकं स नष्टदृष्टिः प्रपतन्स्खलन् पथि। स्नेहानुबन्धैधितया शुचा भृशं विमूर्च्छितोऽनुप्रकृतिद्विजैर्वृतः।।४९।। पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहाम्बरः। दीर्घं श्वसन् बाष्पकलोपरोधतो निरुद्धकण्ठो न शशाक भाषितुम्।।५०।। पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिम्। जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा।।५१।। स्तनद्वयं कुङ्कुमगन्धमण्डितं निषिञ्चती साञ्जनबाष्पबिन्दुभिः। विकीर्य केशान् विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम्।।५२।। *कृतद्युतिरुवाच* - अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे। परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवं परः।।५३।।

।। सङ्ग्रहोक्तिः।।

ततो नृपस्याऽन्तःपुरवासिनो जनाः नरा नार्यश्च तद्रोदनं निशम्य तत्रागत्य राज्ञः समानदुःखा अत एव सुतरां दुःखिता बभूवुः, कृतापराधाः सपत्न्यस्तु सकपटं व्यलीकं रुरुदुः।।४८।। अलक्षितमृत्युहेतुकं मृतं पुत्रमाश्रुत्य स चित्रकेतुर्नष्टदृष्टिरत एव पथि स्खलन् स्नेहाधिक्यप्रवृद्धेन शोकेन भृशं मूच्छितः सन्नन्वागच्छद्भिरमात्यैर्ब्राह्मणैश्च वृतः पुत्रान्तिक आययौ।।४९।। स नृपः मृतबालस्य पादमूले पपात, विस्रस्तशिरोरुहाम्बरो दीर्घं श्वसन्, बाष्पनिरुद्धकण्ठः सन् किंचिदपि वक्तुं न शशाक।।५०।। अधिकशोकव्याप्तं पतिम्, एकसन्ततिं मृतं पुत्रं च निरीक्ष्य तदा साध्वी कृतद्युतिर्जनस्य प्रकृतेश्च मनःपीडां दधाना सती नैकधा विललाप।।५१।। कुंकुमगन्धमण्डितं स्तनद्वयं साञ्जनबाष्पबिन्दुभिर्निषिञ्चती, विगलत्स्रजः केशान् विकीर्य कुररी इव पुत्रं शुशोच।।५२।। *कृतद्युतिरुवाच* - अहो, हे विधातः! त्वमतीव मूर्खो निर्दयो वाऽसि, यतः स्वयमेव स्वसृष्टेर्विपरीतं चेष्टसे, यदि वृद्धे जीवति बालस्य मृत्युर्भविष्यति तदा ते निखिला सृष्टिर्विनंक्ष्यति, तथेव वैपरीत्ये सति त्वं लोकानां शत्रुरेवाऽसि।।५३।।

न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः। यः स्नेहपाशो निजसर्ग-
वृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि।।५४।। त्वं तात नार्हसि च मां कृपणामनाथां
त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम्। अञ्जस्तरेम भवताऽप्रजदुस्तरं यद्ध्वान्तं
न याह्यकरुणेन यमेन दूरम्।।५५।। उत्तिष्ठ तात त इमे शिशवो वयस्या-
स्त्वामाह्वयन्ति नृपनन्दन संविहर्त्तुम् । सुप्तश्चिरं ह्यशनया च भवान् परीतो भुङ्क्ष्व
स्तनं पिब शुचो हर नः स्वकानाम्।।५६।। नाहं तनूज ददृशे हतमङ्गला ते
मुग्धस्मितं मुदितवीक्षणमाननाब्जम्। किं वा गतोऽस्यपुनरन्वयमन्यलोकं नीतो-
ऽघृणेन न शृणोमि कला गिरस्ते।।५७।। *श्रीशुक उवाच* – प्रलपन्त्या मृतं पुत्रमिति
चित्रविलापनैः। चित्रकेतुर्भृशं तप्तो मुक्तकण्ठो रुरोद ह।।५८।। तयोर्विलपतोः
सर्वे दंपत्योस्तदनुव्रताः। रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ।।५९।। एवं
कश्मलमापन्नं नष्टसंज्ञमनायकम्। ज्ञात्वाऽङ्गिरा नाम मुनिराजगाम सनारदः
।।६०।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे चतुर्दशोऽध्यायः।।१४।।

।। सङ्ग्रहोक्तिः ।।

इह संसारे शरीरिणां जन्ममरणयोः क्रमो न हि भवेद् यदि, कर्मणैव सर्वं स्याच्चेत् तर्हि त्वया किं कृत्यम्, निजसर्गवृद्धये त्वया यः स्नेहपाशः कृतस्तं त्वं स्वयमेव छिनत्सि।।५४।। हे तात! पुत्र! त्वमनाथां दीनां मां त्यक्तुं नार्हसि, शोकतप्तं तव पितरं पश्य, अप्रजत्वदुःखं यथाकथञ्चित् सोढुं शक्यम्, त्वद्वियोगात्मकमिदं तु सर्वथाऽशक्यमेव, अतस्त्वमकरुणेन यमेन सह दूरं न याहि।।५५।। हे तात! उत्तिष्ठ, इमे शिशवस्ते वयस्यास्त्वां संविहर्तुमाह्वयन्ति, हे नृपनन्दन! भवान् चिरं सुप्तः, क्षुधा च परीतः, अतो भुंक्ष्व, स्तन्यं पिब, स्वकानां नो शोकं परिहर।।५६।। हे पुत्र! हतमङ्गलाऽहं ते मुग्धस्मितं मुदितवीक्षणं मुखकमलं न दृष्टवती?, तव मधुरा गिरो नाऽश्रौषम्? तर्हि किं वा निर्दयेन दैवेन लोकान्तरं प्रापितोऽसि?।।५७।। इत्थं चित्रविलापनैः प्रलपन्त्याः कृतद्युत्याः सत्याः चित्रकेतुरऽपि मुक्तकण्ठः सन् भृशं रुरोद।।५८।। तयोर्दम्पत्यो- र्विलपतोः सतोस्तदनुवृताः सर्वे नरा नार्यश्च रुरुदुः, सर्वं जनजातमचेतनमासीत् ।।५९।। एवं

अथ पञ्चदशोऽध्यायः ।।१५।।

श्रीशुक उवाच – ऊचतुर्मृतकोपान्ते पतितं मृतकोपमम् । शोकाभिभूतं राजानं बोधयन्तौ सदुक्तिभिः ।।१।। कोऽयं स्यात्तव राजेन्द्र भवान् यमनुशोचति । त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम् ।।२।। यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः। संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ।।३।। यथा धानासु वै धाना भवन्ति न भवन्ति च। एवं भूतानि भूतेषु चोदितानीशमायया ।।४।। वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः। जन्ममृत्योर्यथा पश्चात् प्राङ्नैवमधुनापि भो ।।५।। भूतैर्भूतानि भूतेशः सृजत्यवति हन्त्यजः। आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ।।६।।

।। सङ्ग्रहोक्तिः ।।

महद्दुःखप्राप्तं नष्टचेतनं तत्त्वोपदेष्टृरहितं नृपं ज्ञात्वाऽङ्गिरा नाम मुनिः सनारदस्तत्राऽऽजगाम ।।६०।।

इति श्रीमद्भागवते षष्ठस्कन्धे चतुर्दशोऽध्यायः ।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

नारदेनाङ्गिरसा च चित्रकेतोः शोकापनोदनम्

श्रीशुक उवाच – शवसमीपे पतितमतएव मृतकोपमं शोकाभिभूतं राजानं चित्रकेतुं सदुक्तिभिर्बोधयन्तौ नारदाङ्गिरसावूचतुः ।।१।। हे राजेन्द्र! यं प्रति भवाननुशोचति सोऽयं सृष्टौ पुरा इदानीमतः परं च तव कः स्यात्? त्वं चास्य शोच्यमानस्य कतमः स्याः? ।।२।। यथा प्रवाहवेगेन वालुकाः क्वचित् संयुक्ता भवन्ति क्वचिच्च वियुक्ता भवन्ति तथा देहिनोऽन्यैर्देहिभिः संयुज्यन्ते वियुज्यन्ते च ।।३।। यथेश्वरसंकल्पेन बीजेषु बीजान्तराणि भवन्ति, न भवन्ति च तथा भूतेषु भूतान्युत्पद्यन्ते नोत्पद्यन्ते च ।।४।। हे राजन्! वयं त्वं च इमे चराचराश्च वर्तमानकालीना ये भवन्ति, ते जन्ममृत्योः प्राक् पश्चाच्च तथा नाऽभवन् न भविष्यामश्च, एवमधुनाऽपि न ।।५।। भूतेशोऽजः परमेश्वरः स्वतन्त्रेण स्वेन सृष्टैरस्वतन्त्रैर्भूतैर्भूतानि सृजति, रक्षति हन्ति च, स्वयमनपेक्षः सन् बालवत् लीलया करोति ।।६।।

देहेन देहिनो राजन् देहाद्देहोऽभिजायते। बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः।।७।। देहदेहिविभागोऽयमविवेककृतः पुरा । जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः।।८।। *श्रीशुक उवाच* – एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः। प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ।।९।। *चित्रकेतुरुवाच* - कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसाम् । अवधूतेन वेषेण गूढाविह समागतौ ।।१०।। चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः। मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः।।११।। कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः। अपांतरतमो व्यासो मार्कण्डेयोऽथ गौतमः।।१२।। वसिष्ठो भगवान् रामः कपिलो बादरायणिः। दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथारुणिः।।१३।। रोमशश्च्यवनो दत्त आसुरिः स पतञ्जलिः। ऋषिर्वेदशिरा बोध्यो मुनिः पञ्चशिरास्तथा।।१४।। हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः। एतेऽपरे च सिद्धेशाश्चरन्ति ज्ञानसंपदः।।१५।। तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ।

।। सङ्ग्रहोक्तिः ।।

हे राजन्! जीवस्य शरीरं पित्रोः शरीराद् जायते यथा भूमौ निहिताद् बीजाद् बीजान्तरमभिजायते तद्वत्।।७।। अयं देहदेहिविभागोऽनादिकालत एवाऽविवेककृतोऽस्ति, यथाऽयं जाति व्यक्तिविभागो वस्तुनि कल्पितस्तद्वत्।।८।। *श्रीशुक उवाच* - नारदाङ्गिरसोरुक्तिभिरेवमाश्वासितो राजा चित्रकेतुः पुत्रशोकेन म्लानं मुखं हस्तेन प्रमृज्याऽभाषत।।९।। *चित्रकेतुरुवाच* - अवधूतवेषेण गूढौ सन्ताविह समागतौ ज्ञानसम्पनौ पूज्यानामपि पूज्यौ युवां स्तः, अतः कौ युवाम्।।१०।। भगवद्भक्ता उन्मत्तसमा ब्राह्मणा विषयासक्तानां मादृशां बोधाय भूमौ यथेच्छं विचरन्ति हि।।११।। सनत्कुमारः, नारदः, ऋभुः, देवलः, असितः, अपान्तरतमः, व्यासः, मार्कण्डेयः, गौतमः।।१२।। वसिष्ठः, भगवान् रामो भार्गवः, कपिलः, बादरायणिः, दुर्वासाः, याज्ञवल्क्यः, जातूकर्ण्यः, आरुणिः।।१३।। रोमशः, च्यवनः, दत्तः, आसुरिः, पतञ्जलिः ऋषिर्भारद्वाजः, वेदशिराः, बोध्यः, मुनिरुतथ्यः, पञ्चशिराः।।१४।। हिरण्यनाभः, कौशल्यः, श्रुतदेवः, ऋतध्वजश्चेति एते कुमारादयो ज्ञानसम्पदोऽपरे च सिद्धेशाः चरन्ति।।१५।।

अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ।।१६।। *अङ्गिरा उवाच* – अहं ते पुत्रकामस्य पुत्रदोऽस्म्यङ्गिरा नृप। एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः।।१७।। इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे। अतदर्हमनुस्मृत्य महापुरुषगोचरम्।।१८।। अनुग्रहाय भवतः प्राप्तावावामिह प्रभो । ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ।।१९।। तदैव ते परं ज्ञानं ददामि गृहमागतः। ज्ञात्वाऽन्याभिनिवेशं ते पुत्रमेव ददावहम्।।२०।। अधुना पुत्रिणां तापो भवतैवाभूयते। एवं दारा गृहा रायो विविधैश्वर्यसंपदः।।२१।। शब्दादयश्च विषयाश्चला राज्यविभूतयः। मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः।।२२।। सर्वेऽपि शूरसेनेमे शोकमोहभयार्त्तिदाः। गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः।।२३।। दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः। कर्मभिर्ध्यायतो नाना कर्माणि मनसोऽभवन्।।२४।। अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः।

।। सङ्ग्रहोक्तिः ।।

तस्माद् युवां मम रक्षकौ स्तः, अतो नरपशोर्मूढधियोऽज्ञानध्वान्ते मग्नस्य मम ज्ञानदीपो दीयताम्।।१६।। *अङ्गिरा उवाच* – हे नृप! पुत्रं कामयमानस्य ते पुत्रदोऽहमङ्गिरा अस्मि, एष द्वितीयो ब्रह्मणः सुतो भगवान् साक्षान्नारद ऋषिरस्ति।।१७।। पुत्रशोकेनेत्थं दुस्तरेऽज्ञाने मग्नं महापुरुषैरनुग्राह्यं हरिभक्तं त्वां प्रत्यभिज्ञाय।।१८।। हे प्रभो! राजन्! भवन्तमनुग्रहीतुमावामिह प्राप्तौ स्वः, ब्रह्मण्यो भगवद्भक्तो भवान् अवसीदितुं नार्हति।।१९।। पूर्वमेवमहं तुभ्यं ज्ञानं दातुं तव गृहमागतोऽभवम्, किंतु तदा तव पुत्राभिलाषं ज्ञात्वा तुभ्यं पुत्रमेव ददौ।।२०।। हे राजन्! अधुना भवता पुत्रिणां तापोऽनुभूयते, एवं दाराः, गृहाः, रायः, विविधैश्वर्यसंपदश्चानुभूयन्ते ।।२१।। शब्दादयो विषयाः, क्षणिका राज्यविभूतयः, मही, राज्यं, बलं, कोशो, भृत्याः, अमात्याः, सुहृज्जना अप्यनुभूयन्ते।।२२।। हे शूरसेन! इमे सर्वेऽपि शोक-मोह-भया-ऽऽर्तिदाः सन्तिः, गन्धर्वनगरोपमाः, स्वप्नवत् मायावद् वा दृश्यमाना भवन्ति।।२३।। निरतिशयानन्द-रूपेणाऽर्थेन विना दृश्यमाना एते मनोभवास्ततो न दृश्यन्ते, अनादिवासनारूपैः कर्मभिर्विषयान् ध्यायतः पुंसो मनसो नानाकर्माण्यभवन्।।२४।। जीवस्य अयं देहो भूतेन्द्रियान्तः करणात्मको

देहिनो विविधक्लेशसंतापकृदुदाहृतः ।।२५।। तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः। द्वैते ध्रुवार्थविश्रम्भं त्यजोपशममाविश ।।२६।। *नारद उवाच* - एतां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम। यां धारयन् सप्तरात्रात् द्रष्टा संकर्षणं प्रभुम् ।।२७।। यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य। सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ।।२८।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पञ्चदशोऽध्यायः ।।१५।।

अथ षोडशोऽध्यायः ।।१६।।

श्रीशुक उवाच - अथ देवऋषी राजन् संपरेतं नृपात्मजम्। दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ।।१।। *नारद उवाच* - जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते। सुहृदो बान्धवांस्तप्तान् शुचा त्वत्कृतया भृशम् ।।२।।

।। सङ्ग्रहोक्तिः ।।

विविधक्लेशसंतापदायकः कथितः ।।२५।। तस्मात् स्वस्थेन मनसा प्रत्यगात्मनः स्वरूपं विमृश्य देवमनुष्यादिभेदभिन्ने शरीर आत्माभिमानं त्यज, वैराग्यमाश्रय च ।।२६।। *नारद उवाच* - एतामुपदेक्ष्यमाणां मन्त्रोपनिषदं समाहितचित्तः सन् मत्तः स्वीकुरु, यां मन्त्रोपनिषदं धारयन् भवान् सप्तरात्रादूर्ध्वं संकर्षणं प्रभुं द्रक्ष्यति ।।२७।। हे नरेन्द्र! यस्य संकर्षणस्य पादमूलमाश्रित्य पूर्वे शर्वादयो द्विदलात्मकं भ्रमं त्यक्त्वा निःसमाभ्यधिकं तदीयं माहात्म्यं प्रापुः, तथा भवानपि शीघ्रं परं माहात्म्यमुपैष्यति ।।२८।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः ।।१५।।

अथ षोडशोऽध्यायः ।।१६।।

स्वसुतोक्त्यैव चित्रकेतोर्ज्ञानलाभः, नारदद्वारा तस्मै शेषतोषणीविद्यादानम् च

श्रीशुक उवाच - हे राजन्! देवर्षिर्नारदो मृतं नृपात्मजमनुशोचतां चित्रकेत्वादीनां दर्शयित्वा वक्ष्यमाणमिदमुवाच ।।१।। *नारद उवाच* - हे जीवात्मन्! तव भद्रमस्तु, तव मातरं पितरं

कलेवरं त्वमाविश्य शेषमायुः सुहृद्वृतः। भुङ्क्ष्व भोगान् पितृप्रत्तानधितिष्ठ नृपासनम्॥३॥ *जीव उवाच* - कस्मिन् जन्मन्यमी मह्यं पितरो मातरोऽभवन्। कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु॥४॥ बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः। सर्व एवं हि सर्वेषां भवन्ति क्रमशो मिथः॥५॥ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः। पर्यटन्ति नरेष्वेवं जीवा योनिषु कर्त्तृषु॥६॥ एवं योनिगतो जीवः स नित्यो निरहंकृतः। यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत्॥८॥ एष नित्योऽव्ययः सूक्ष्मः एकः सर्वाश्रयः स्वदृक्। आत्ममायागुणैर्विश्वमात्मानं सृजते परः॥९॥ न ह्यस्यातिप्रियः कश्चिन्नाऽप्रियः स्वः परोऽपि वा। एकः सर्वधियां द्रष्टा कर्त्तृणां गुणदोषयोः॥१०॥ नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम्। उदासीनवदासीनः परावरदृगीश्वरः॥११॥

॥ सङ्ग्रहोक्तिः॥

सुहृदः बान्धवांश्च त्वत्कृतया शुचा भृशं तप्तान् पश्य॥२॥ त्वं कलेवरमाविश्य शेषमायुः सुहृद्वृत्तः सन् भुङ्क्ष्व, नृपासनमधितिष्ठ, पितृदत्तान् भोगान् भुङ्क्ष्व॥३॥ *जीव उवाच* - देव-तिर्यङ्-नृयोनिषु कर्मभिर्भ्राम्यमाणस्य मम अमी चित्रकेत्वादयः कस्मिन् जन्मनि पितरो मातरश्चाभवन्?॥४॥ बन्धु-ज्ञाति-अरि-मध्यस्थ-मित्र-उदासीन-विद्विषः, एवं सर्वे जीवाः सर्वेषां जीवानां क्रमशोऽन्योन्यं भवन्ति हि॥५॥ यथा पण्यानि हेम्नः कटककुण्डलादीनि वस्तूनि व्यवहारकर्त्तृषु नरेष्वितस्ततः पर्यटन्ति, एवं जीवा अपि देवतिर्यगादिषु संसरन्ति॥६॥ जीवतः पश्वादेः सम्बन्धो नृष्वनित्यो दृश्यते, यतो यावत् कालपर्यन्तं यस्य सम्बन्धः तावत् एव हि तस्मिन् ममत्वम् वर्तते, विक्रयादिना पश्वादिसम्बन्धो निवर्तते॥७॥ नित्यस्य जीवस्य जन्मादिना यः सम्बन्धः, स जीवनकालपर्यन्तं तिष्ठति मरणोत्तरं निवर्तते॥८॥ एष जीवो नित्यः सूक्ष्मोऽव्ययः एको ज्ञानैकाकारः बुद्धीन्द्रियादीनां धारकः स्वदृक् च भवति, परमपुरुषः परमात्मा जीवकर्मानुरूपं देवमनुष्यादिविश्वाकारं जीवं सृजति॥९॥ अस्य परमपुरुषस्य कश्चिद् अतिप्रयोऽप्रियो वा न भवति, एवं च तस्य कश्चिद् स्वीयः परकीयो वा न भवति, किन्तु स समदृष्टिरस्ति, पुण्यपापयोः कर्तॄणां सर्वबुद्धिवृत्तीनां च स एक एव द्रष्टा भवति॥१०॥ परमात्मा गुणं दोषं वा नाऽऽदत्ते, तथैव क्रियाफलमपि नाऽऽदत्ते, किंतु स उदासीनवत्

श्रीशुक उवाच – इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा। विस्मिता मुमुचुः शोकं छित्त्वाऽऽत्मस्नेहशृङ्खलाम् ।।१२।। निर्हृत्य ज्ञातयो देहं ज्ञातेः कृत्वोचिताः क्रियाः। तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्त्तिदम् ।।१३।। बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः। बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम्। यमुनायां महाराज स्मरन्त्यो द्विजभाषितम् ।।१४।। स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः। गृहान्धकूपात् निष्क्रान्तः सरःपङ्कादिव द्विपः ।।१५।। कालिन्द्यां विधिवत् स्नात्वा कृतपुण्यजलक्रियः। मौनेन संयतप्राणो ब्रह्मपुत्राववन्दत ।।१६।। अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने। भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ।।१७।। *नारद उवाच* – नमस्तस्मै भगवते वासुदेवाय धीमहि। प्रद्युम्नायाऽनिरुद्धाय नमः संकर्षणाय च ।।१८।। नमो विज्ञानमात्राय परमानन्दमूर्त्तये। आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये ।।१९।। आत्माऽऽनन्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः।

।। सङ्ग्रहोक्तिः ।।

जीवकृतशुभाशुभफलयोः साक्षी सन् प्रदाता ईश्वरोऽस्ति ।।११।। *श्रीशुक उवाच* – इत्थमुक्त्वा जीवः कलेवरात् निष्क्रम्य प्रयातः, ततस्तस्य ये ज्ञातयस्ते विस्मिताः सन्तः स्वीयस्नेहशृङ्खलां छित्वा शोकं मुमुचुः ।।१२।। ततो ज्ञातयो देहमग्नौ दग्ध्वा, ज्ञातेरुचिताः क्रियाः कृत्वा शोक-मोहार्तिदं स्नेहं तत्यजुः ।।१३।। ततस्तासु स्त्रीषु मध्ये या बालघ्न्य आसन्, ताः सर्वा अङ्गिरसा भाषितं स्मरन्त्यः व्रीडिताः बालहत्याहतप्रभाः सत्यो ब्राह्मणैर्बोधितं बालहत्याव्रतं यमुनायां चेरुः ।।१४।। स चित्रकेतुरङ्गिरोनारदोपदेशेन प्रतिबुद्धविवेकः सन् सरःपङ्काद् गज इव गृहान्धकूपान्निर्गतः ।।१५।। कालिंद्यां यथाविधि स्नात्वा पुण्या जलक्रियाः कृत्वा मौनेन संयतप्राणः सन् नारदाङ्गिरसाववन्दत ।।१६।। अथ प्रपन्नाय गुरुभक्तियुक्ताय प्रयतमनस्काय तस्मै चित्रकेतवे भगवान् नारदः प्रीतः सन् मन्त्रोपनिषदं विद्यामुपदिदेश ।।१७।। *नारद उवाच* – वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपचतुर्व्यूहात्मनाऽवस्थिताय तुभ्यं भूयो भूयो नमस्कृत्वा धीमहि ।।१८।। जाड्यरहिताय, निरतिशयानन्दस्वरूपाय, आत्मारामाय, शान्ताय, स्थूलत्वादिभेददर्शनरहिताय, स्वात्मानन्दानुभवेन निरस्तषडूर्मये, हृषीकेशाय महतेऽनन्तशक्तये

हृषीकेशाय महते नमस्तेऽनन्तशक्तये।।२०।। वचस्युपरते प्राप्यो य एको मनसा सह। अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः।।२१।। यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते। मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः।।२२।। यं न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः। अन्तर्बहिश्च विततं व्योमवत्त्वां नतोऽस्म्यहम् ।।२३।। देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु । नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद् द्रष्ट्रपदेशमेति।।२४।। ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्त्वतपरिवृढनिकरकरकमलकुड्मलोप-लालितचरणारविन्दयुगलपरमेष्ठिन्नमस्ते।।२५।। *श्रीशुक उवाच* - भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः। ययावङ्गिरसा साकं धाम स्वायंभुवं प्रभो।।२६।। चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम्। धारयामास सप्ताहमब्भक्षः सुसमाहितः।।२७।।

।। सङ्ग्रहोक्तिः।।

तस्मै नमो नमः।।१९-२०।। वाङ्मनसोरगोचरः, अपरिच्छिन्नतया प्राप्यः, निःसमाभ्यधिकः कर्मकृतनामरूपरहितः, ज्ञानैकाकारः चेतनाचेतनाभ्यां विलक्षणो, यो भगवान् सोऽस्मानवतु ।।२१।। इदं जगत् यस्माद् जायते, यस्मिन् तिष्ठति, यस्मिन् लीयते च, मृत्पीण्डेभ्यो यथा घटशरावादिरूपा मृज्जातिर्जायते तथा इदं चिदचिदात्मकं विश्वमपृथक्सिद्धविशेषणतया यस्मिन् वर्तते, तस्मै ब्रह्मणे नमः।।२२।। यद् अन्तर्बहिश्च व्योमवद् व्याप्य निर्लेपं व्यवस्थितं, यत् ब्रह्मस्वरूपं मनोबुद्धीन्द्रियप्राणा न स्पृशन्ति तं ब्रह्मस्वरूपं भगवन्तं नतोऽस्मि।।२३।। अमी देहेन्द्रियप्राणमनोधियो यदीयशक्तिव्याप्ताः सत्यः कर्मसु प्रवर्तन्ते, यथाऽप्रतप्तं लोहं वह्निना-ऽनुविद्धमेव प्रतप्तं सदितरद् दहति न तु वह्निम्, तद्वत् जीवस्यापि ईश्वरसंकल्पादेव ज्ञानविकाशो भवति।।२४।। सकलभक्तोत्तमाः स्वहस्तकमलकुड्मलैर्यस्य चरणकमलयुगलस्य परिचर्यां कुर्वन्ति, एवंविध हे सात्वतसेव्य! षाड्गुण्यपूर्णाय तस्मै तुभ्यं नमः।।२५।। *श्रीशुक उवाच* - हे राजन्! प्रपन्नाय भक्ताय चित्रकेतव एतां विद्यामुपदिश्य अङ्गिरसा साकं नारदः सत्यलोकं ययौ।।२६।। चित्रकेतुस्तु नारदोक्तां विद्यामेकाग्रचित्तः केवलजलमात्राशनः सन् -

ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया। विद्याधराऽऽधिपत्यं स लेभेऽप्रतिहतं नृप।।२८।। ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः। जगाम देवदेवस्य शेषस्य चरणान्तिकम्।।२९।। मृणालगौरं शितिवाससं स्फुरत् किरीटकेयूरकटित्रकङ्कणम्। प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमण्डलैः प्रभुम्।।३०।। तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलान्तःकरणोऽभ्ययान्मुनिः। प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽनमदादिपूरुषम्।।३१।। स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन् मुहुः। प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम्।।३२।। ततः समाधाय मनो मनीषया बभाष एतत् प्रतिलब्धवागसौ। नियम्य सर्वेन्द्रियबाह्यवर्त्तनं जगद्गुरुं सात्त्वतशास्त्रविग्रहम् ।।३३।। *चित्रकेतुरुवाच* - अजित जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता । विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः।।३४।। तव विभवः खलु भगवन् जगदुद्भवस्थितिलयादीनि।

।। सङ्ग्रहोक्तिः ।।

सप्तदिनपर्यन्तं जजाप।।२७।। हे नृप! चित्रकेतुरपि सप्तरात्रान्ते जपितया विद्ययाऽप्रतिहतं विद्याधराधिपत्यं लेभे।।२८।। ततः कतिपयैर्दिवसैर्विद्याप्रभावेन यथेष्टगतिः स देवदेवस्य शेषस्य चरणान्तिकं जगाम।।२९।। तत्र मृणालगौरं नीलाम्बरं स्फुरत्किरीटकेयूरकटित्रकङ्कणम् प्रसन्नवक्त्रमरुणलोचनं सिद्धेश्वरमण्डलैर्वृतं प्रभुं शेषं स ददर्श।।३०।। तद्दर्शनेन ध्वस्तसमस्तदोषः, शुद्धनिर्मलान्तःकरणः, भक्त्युद्रेकेण प्रेमाश्रुनयनः प्रहृष्टरोमा मुनिः स आदिपुरुषं सम्मुखं गत्वाऽनमत्।।३१।। स चित्रकेतुः संकर्षणस्य पादपीठं प्रेमाश्रुकणैर्मुहुरुपसेचयन्, प्रेमातिशयेन संरुद्धोच्चारणः चिरं स्तोतुं नैवाऽशकत्।।३२।। ततोऽसौ चित्रकेतुः स्वबुद्ध्या मनो वशीकृत्य प्रतिलब्धवाक् सर्वेन्द्रियाणां बाह्यव्यापारमवरुद्ध्य सात्वतशास्त्रप्रतिपाद्यस्वरूपं जगद्गुरुं संकर्षणं प्रतिबभाषे।।३३।। *चित्रकेतुरुवाच* - हे अजित! भवान् अजितोऽपि जितमनोभिः समबुद्धिभिः साधुभिर्जितो भवति, यो भवान् निष्कामभक्तानां स्वस्वरूपदोऽस्ति, तेन भवता ते भक्ता अपि जिताः सन्ति।।३४।।

विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्द्धन्ते पृथगभिमत्या।।३५।। परमाणुपरममहतो-स्त्वमाद्यन्तान्तरवर्त्ती त्रयविधुरः। आदावन्तेऽपि च सत्त्वानां यत् ध्रुवं तदेवाऽ-न्तरालेऽपि।।३६।। क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरयमण्डकोशः। यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः।।३७।। विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम्। तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् ।।३८।। कामधियस्त्वयि रचिता न परम रोहन्ति यथा करम्भबीजानि। ज्ञानात्मन्य-गुणमये गुणगणतोऽस्य द्वन्द्वजालानि।।३९।। जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यम्। निष्किंचना ये मुनय आत्मारामा य उपासतेऽपवर्गाय।।४०।। विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र। विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः।।४१।। कः क्षेमो निजपरयोः कियान् वाऽर्थः स्वपरद्रुहा धर्मेण। स्वद्रोहात्तव कोपः परसंपीडया च तथाऽधर्मः।।४२।।

।। सङ्ग्रहोक्तिः ।।

हे भगवन्! जगदुद्भवस्थितिलयादीनि तव विभवोऽस्ति खलु, तव विश्वसृजोंऽशांशास्ते पृथगभिमानेन व्यर्थं प्रस्पर्धन्ते।।३५।। अतिसूक्ष्मः परमाणुः, अतिस्थूलं यत् कार्यं जगत्, तयोरन्तरालं, तस्य सर्वस्याऽपि अन्तर्वर्ती भवान् तत्त्रयविधुरोऽस्ति तदन्तर्यामितया वर्तते च।।३६।। क्षित्यादिभिः सप्तभिरावरणैः दशगुणोत्तरैरावृतोऽयमण्डकोशोऽस्ति, स अन्याण्ड-कोटिकोटिभिः सह यस्य रोमकूपेऽणुकल्पो परिभ्रमति, अतस्त्वमनन्तोऽसि।।३७।। विषयाभिलाषिणो नृपशवस्त्वद्विभूतीरुपासते न तु त्वाम् , किन्तु तासामनित्यानां विभूतीनां नाशेन सह तद्दत्तस्वर्गादीनामपि नाशो भवति, यथा राजकुलस्य नाशानन्तरं तद्भृत्यानामपि सम्पन्नाशो भवति तद्वत्।।३८।। प्राकृतगुणरहिते ज्ञानस्वरूपे त्वयि कामात्मभिः कृता उपासना भर्जितबीजवत् सफला न भवन्ति तद्वत्।।३९।। हे अजित! यदा भवान् भागवतं निर्दोषं धर्ममाह तदा हे भगवन्! त्वया जितम्, यं भागवतं धर्मं निष्किंचना आत्मारामा मुनयो मुक्तयेऽनुतिष्ठन्ति।।४०।। यत्र भागवते धर्मे, अन्य काम्यधर्मवत् "अहं त्वं" वा "तव मम" इति मिथाऽहंबुद्धिर्नास्ति, अहंकारपूर्णो विषमधिया रचितो यो धर्मः सोऽविशुद्धः -

न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः। स्थिरचरसत्त्वकदम्बेष्व-पृथग्धियो यमुपासते त्वार्याः।।४३।।न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिल-पापक्षयः। यन्नामसकृच्छ्रवणात्पुष्कसकोऽपि विमुच्यते संसारात्।।४४।। अथ भगवन् वयमधुना त्वदवलोकपरिमृष्टाऽऽशयमलाः। सुरर्षिणा यदुदितं तावकेन कथमन्यथा भवति।।४५।।विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम्। विज्ञाप्यं परमगुरो कियदिव सवितुः खद्योतैः।।४६।। नमस्तुभ्यं भगवते सकल-जगत्स्थितिलयोदयेशाय। दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ।।४७।। यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं चेकितानमनु चित्तय उच्चकन्ति। भूमण्डलं सर्षपायति यस्य मूर्द्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्द्ध्ने।।४८।। *श्रीशुक उवाच* – संस्तुतो भगवानेवमनन्तस्तमभाषत। विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह।।४९।।

।। सङ्ग्रहोक्तिः।।

क्षयिष्णुरधर्मबहुलश्च भवति।।४१।। स्वपरद्रुहा धर्मेण निजपरयोः किं सुखम्, स्वद्रोहात् तव कोपः=निग्रहः स्यात्, परद्रोहात् अधर्मश्च भवति।।४२।। अनन्तजीवानां समुद्धरणाय त्वया कृतः संकल्परूपो धर्मोऽयथार्थो न भवति यं कल्याणकरं त्वत्संकल्परूपं धर्मं स्थावरजंगमेषु त्वदात्मकबुद्धयो महानुभावा भक्ता अनुतिष्ठन्ति।।४३।।हे भगवन्! नृणां त्वद्दर्शनाद् अखिलपाप विनाशो भवति, तद् अघटितं न हि, किंतु युक्तमेव, कुतः सकृदपि भवन्नामश्रवणाच्चण्डालोऽपि संसारान्मुच्यते।।४४।।हे भगवन्! अधुना वयं भवद्दर्शनेन विशुद्धहृदयाः संजाताः, भवदीयेन देवर्षिणा नारदेन कथितं तदन्यथा कथं भवति।।४५।। हे अनन्त! जनैर्यदाचरितं तत्सर्वं जगदन्तर्यामिणस्तव विदितमेव भवति, हे परमगुरो! सूर्यस्याऽग्रे खद्योतैर्विज्ञाप्यं कियद् भवति?।।४६।। षाड्गुण्यपूर्णाय सकलजगत्स्थितिलयोदयेशाय, कुयोगिभिर्ज्ञातुमशक्य-स्वरूपस्वभावाय परमहंसाय तुभ्यं नमः।।४७।। यं श्वसन्तं त्वां विश्वसृजोऽनुश्वसन्ति, सर्वं पश्यन्तं यमनु चित्तवृत्तयः प्रसरन्ति, यस्य तव मूर्द्ध्नि कृत्स्नं भूमण्डलं सर्षपायति, तस्मै सहस्रमूर्द्ध्ने भगवते तुभ्यं नमोऽस्तु।।४८।। *श्रीशुक उवाच* – हे कुरूद्वह! इत्थं संस्तुतो

श्रीसंकर्षण उवाच – यन्नारदाऽङ्गिरोभ्यां ते व्याहृतं मेऽनुशासनम्। संसिद्धोऽसि तया राजन् विद्यया दर्शनाच्च मे॥५०॥ अहं वै सर्वभूतानि भूतात्मा भूतभावनः। शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू॥५१॥ लोके विततमात्मानं लोकं चात्मनि संततम्। उभयं च मया व्याप्तं मयि चाप्युभयं कृतम्॥५२॥ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि। आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः॥५३॥ एवं जागरणादीनि जीवस्थानानि चात्मनः। मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत्॥५४॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तथा। सुखं हि निर्गुणं ब्रह्म तमात्मानमवेहि माम्॥५५॥ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः। अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम्॥५६॥ यद्येतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः। ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः॥५७॥

॥ सङ्ग्रहोक्तिः॥

भगवाननन्तः प्रीतः सन् विद्याधरपतिं चित्रकेतुमभाषत॥४९॥ *श्रीसंकर्षण उवाच* – नारदाङ्गिरोभ्यां तुभ्यं यच्छिक्षावचनमुक्तं तन् ममैव शिक्षावचनं ज्ञेयम्, हे राजन्! नारदोपदिष्टया विद्यया मद्दर्शनाच्च त्वं संसिद्धोऽसि॥५०॥ सर्वाणि भूतानि मच्छरीरत्वात् मदात्मकान्येव, अहं भूतभावनो भूतात्मा च, शब्दब्रह्मवेदः, वेदेन वाच्यमर्थात्मकं यद् ब्रह्म, ते उभे ब्रह्मणी मच्छरीरभूते स्तः॥५१॥ लोके धारकतया व्याप्तं प्रत्यगात्मानम्, तथा तस्मिन् प्रत्यगात्मनि धार्यत्वेन स्थितं लोकम्, तदुभयात्मकं लोकं मयाऽन्तःप्रविश्य व्याप्तम्, एवं च तदुभयं मयि आधेयतया स्थितम्॥५२॥ यथा स्वप्नावस्थो जीवः स्वप्ने, आत्मनि विश्वं पश्यति, स एव उत्थितः सन् स्वं भूमौ शय्यायां वा एकदेशस्थितं मन्यते, एवं जागरणादीनि जीवस्थानानि एकस्य जीवस्यैव केवलप्रकृत्युपाधिकानि सन्ति, इति विज्ञाय तद्द्रष्टारं परं जीवात्मानं स्मरेत्॥५३-५४॥ येन परमात्मना सुषुप्त्यवस्थां प्राप्तो जीवः स्वस्य स्वापं वेद, तथा सुखं च वेद, तं हेयगुणरहितं ब्रह्मशब्दवाच्यं परमात्मानं मामवेहि॥५५॥ प्रस्वापं प्रतिबोधं च स्मरतो देहिनः स्वापप्रबोधयोः यदन्वेति, ताभ्यां प्रस्वापप्रतिबोधाभ्यां यद् व्यतिरिच्येत तद् ज्ञानमेव परब्रह्म, तच्च मामवेहि॥५६॥ यदि देहिनः स्वस्य मच्छरीरत्वं विस्मृतं स्यात् तदा

लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवाम्। आत्मानं यो न बुद्ध्येत न क्वचित् क्षेममाप्नुयात्।।५८।।स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम्। अभयं चाप्यनीहायां संकल्पाद्विरमेन्मुनिः।।५९।। सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः। ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च।।६०।। एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम्। आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणम्।।६१।। दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा। ज्ञानविज्ञानसंतुष्टो मद्भक्तः पुरुषो भवेत्।।६२।। एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः। स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैक्यदर्शनम् ।।६३।। त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम। ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिद्ध्यसि।।६४।। *श्रीशुक उवाच* – आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः। पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः।।६५।।

❀ इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षोडशोऽध्यायः ।।१६।। ❀

।। सङ्ग्रहोक्तिः ।।

भिन्नत्वं स्यात्, तत एव जीवस्य संसारो देहाद् देहः, मृतेर्मृतिः।।५७।।यो जीवः ज्ञानविज्ञानयोः जनकं मानुष्यं जन्म प्राप्यापि प्रत्यगात्मपरमात्मस्वरूपं न विद्यात् स जीवः सुखं न प्राप्नुयात् ।।५८।।प्रवृत्तिमार्गे परिक्लेशं फलविपर्यासं स स्मृत्वा निवृत्तिमार्गेऽभयममृतं च स्मृत्वा मुनिः संकल्पाद्विरमेत।।५९।। दम्पती सुखप्राप्तये दुःखनिवृत्तये च क्रियाः कुर्वाते, तथापि तत् क्रियाभ्यः दुःखस्याऽनिवृत्तिः सुखस्याऽप्राप्तिश्च भवति।।६०।। वयं "विज्ञाः" इत्यभिमानिनां विपर्ययं विचार्य जाग्रदाद्यवस्थात्रयविलक्षणां प्रत्यगात्मनो दिव्यां गतिं बुद्ध्वा ऐहिकामुष्मिक विषयसुखलेशैः स्वेन तेजसा निर्मुक्तः ज्ञानविज्ञानाभ्यां संतुष्टः पुरुषः मद्भक्तो भवेत्।।६१-६२।। योगनिपुणबुद्धिभिर्मनुजैः सर्वप्रकारेण ज्ञेयः स्वार्थ एतावानेवाऽस्ति यत् परमात्मनः प्रत्यगात्मनश्च शरीरशरीरिभावेनाऽपृथक्सिद्धसम्बन्धदर्शनम्।।६३।।हे राजन्! त्वं समाहितचित्तो ज्ञानविज्ञानसंपन्नः ममैतद् वचनं श्रद्धया धारयन् आशु मुक्तो भविष्यसि।।६४।। विश्वात्मा जगद्गुरुर्भगवान् हरिरित्थं चित्रकेतुमाश्वास्य तस्य पश्यतः सतः तत्रैवाऽन्तर्दधे।।६५।।

❀ इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां षोडशोऽध्यायः।।१६।। ❀

अथ सप्तदशोऽध्यायः ।।१७।।

श्रीशुक उवाच – यतश्चान्तर्हितोऽनन्तस्तस्यै कृत्वा दिशे नमः। विद्याधरश्चित्रकेतुश्चचार गगनेचरः ।।१।। स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः। स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ।।२।। कुलाचलेन्द्रद्रोणीषु नानासंकल्पसिद्धिषु। रेमे विद्याधरस्त्रीभिर्गापयन् हरिमीश्वरम् ।।३।। एकदा स विमानेन विष्णुदत्तेन भास्वता। गिरिशं ददृशे गच्छन् परीतं सिद्धचारणैः ।।४।। आलिङ्ग्याङ्कीकृतां देवीं बाहुना मुनिसंसदि । उवाच देव्याः शृण्वन्त्या जहासोच्चैस्तदन्तिके ।।५।। *चित्रकेतुरुवाच* – एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम्। आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ।।६।। जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः। अङ्कीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ।।७।। प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति।

।। सङ्ग्रहोक्तिः ।।

अथ सप्तदशोऽध्यायः ।।१७।।

चित्रकेतोर्गगने गतिः, पार्वत्याः शापाद् वृत्रासुरत्वप्राप्तिः

श्रीशुक उवाच – यस्यां दिशि संकर्षणोऽन्तर्हितः, तस्यै दिशे नमस्कृत्य विद्याधरश्चित्रकेतुः गगनेचरो भूत्वा विचचार ।।१।। महायोग्यव्याहतबलेन्द्रियः स वर्षलक्षाणां लक्षं-बहुकालं मुनिभिः सिद्धैःचारणैश्च स्तूयमानः सन् ।।२।। संकल्पानुसारिभोगसंपन्नासु कुलाचलेन्द्रगुहासु विद्याधरैस्तत्स्त्रीभिश्च संकर्षणं भगवन्तं गापयन् रेमे ।।३।। स चित्रकेतुरेकदा विष्णुदत्तेन भास्वता विमानेन तत्र संचरन् सिद्धचारणैर्वेष्टितं गिरिशं ददर्श ।।४।। स्वोत्सङ्ग उपावेशिताम-म्बिकां बाहुनाऽऽलिङ्ग्य मुनिसंसदि स्थितं रुद्रं प्रति तदन्तिके स्थितः सन् पार्वत्याः शृण्वत्याः सत्या उवाच, उच्चैर्जहास च ।।५।। *चत्रकेतुरुवाच* – एष रुद्रः साक्षाल्लोक-गुरुः, शरीरिणां धर्मवक्ता मुख्यो भवति, स्वयमीदृशः सन्नपि सभायां भार्यया मिथुनीभूय आस्ते ।।६।। किंच जटाधरस्तीव्रतपाः ब्रह्मवादी, सभापतिः, लज्जाहीनः प्राकृतः जन इव स्त्रियं स्वोत्सङ्ग आरोप्य आस्ते ।।७।। प्राकृता जनाः प्रायशः स्त्रियं रहस्येवाङ्के बिभ्रति, अयं तु महाव्रतधरः सन्नपि सदसि स्त्रियमङ्के बिभर्त्ति ।।८।।

अयं महाव्रतधरो बिभर्त्ति सदसि स्त्रियम् ।।८।। *श्रीशुक उवाच* - भगवानपि तच्छ्रुत्वा प्रहस्याऽगाधधीर्नृप। तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः।।९।। इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम्। रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ।।१०।। *पार्वत्युवाच* - अयं किमधुना लोके शास्ता दण्डकरः प्रभुः। अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत्।।११।। न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः। न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्त्तिनं हरम्।।१२।। एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम्। यः क्षत्त्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्ड्यः।।१३।। नायमर्हति वैकुण्ठपादमूलोपसर्पणम्। संभावितमतिः स्तब्धः साधुभिः पर्युपासितम्।।१४।। अतः पापीयसीं योनिमासुरीं याहि दुर्मते। यथेह भूयो महतां न कर्त्ता पुत्र किल्बिषम्।।१५।। *श्रीशुक उवाच* - एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः। प्रसादयामास सतीं मूर्द्ध्ना नम्रेण भारत।।१६।।

।। सङ्ग्रहोक्तिः ।।

श्रीशुक उवाच- हे नृप! ततः सदसि तच्चित्रकेतोर्वचः श्रुत्वाऽपि भगवानगाधधी रुद्रः प्रहस्य तूष्णीं बभूव, तदनुव्रताः सभ्याश्च तूष्णीं बभूवुः।।९।। रुद्रप्रभावमजानति चित्रकेतावत्यशोभनं ब्रुवाणे सति देवी पार्वती "जितेन्द्रियोऽहम्" इत्यभिमानिने धृष्टाय चित्रकेतवे रुषाऽऽह।।१०।। *पार्वत्युवाच* - अयमधुना किमर्थमागतः? अहो, निर्लज्जानामस्मद्विधानां दुष्टानां लोकेऽयं शास्ता दण्डधरो दमनकारी कश्चिदयं जातः किम्?।।११।। ब्रह्मा धर्मं न वेद, भृगुनारदाद्या ब्रह्मपुत्राः, सन्तकुमारः, कपिलः, मनुश्च एते सर्वे किं धर्मं न विदुः, ये शास्त्रमतिलङ्घ्यवर्तिनं हरं नो निषेधन्ति।।१२।। एषां ब्रह्मादिनामपि ध्येयपदाम्बुजयुग्मं जगद्गुरुं मङ्गलमङ्गलं, हरमृषींश्चाऽयं क्षत्रीयाधमः परिभूय प्रशास्ति, तस्मादयं धृष्टो दण्ड्योऽस्ति।।१३।। साधुभिः पर्युपासितं भगवच्चरणोपसर्पणमयं क्षत्रबन्धुर्नार्हति, यतोऽयं देहाभिमानी स्तब्धोऽस्ति।।१४।। अतः हे दुर्मते! त्वमतिपापरूपामासुरीं योनिं याहि, यतो भूयो महतामपराधं न करिष्यसि।।१५।। *श्रीशुक उवाच* - हे भारत! एवं शप्तः स चित्रकेतुर्विमानादवरुह्य सतीं नम्रेण मूर्ध्ना -

चित्रकेतुरुवाच – प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनाऽम्बिके। देवैर्मर्त्त्याय यत् प्रोक्तं पूर्वदिष्टं हि तस्य तत्।।१७।। संसारचक्र एतस्मिन् जन्तुरज्ञानमोहितः। भ्राम्यन् सुखं च दुःखं च भुङ्क्ते सर्वत्र सर्वदा।।१८।। नैवात्मा न परश्चापि कर्त्ता स्यात्सुखदुःखयोः। कर्त्तारं मन्यते प्राज्ञः परमात्मानमेव च।।१९।। गुणप्रवाह एतस्मिन् कः शापः को न्वनुग्रहः। कः स्वर्गो नरको वापि किं सुखं दुःखमेव वा।।२०।। एकः सृजति भूतानि भगवानात्ममायया। एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः।।२१।। न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिर्बन्धुर्न परो न च स्वः। समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुत एव रोषः।।२२।। तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय। बन्धाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते।।२३।।

।। सङ्ग्रहोक्तिः ।।

प्रसन्नामकरोत्।।१६।। *चित्रकेतुरुवाच* – हे अम्बिके! त्वया दत्तं शापमात्मनोऽञ्जलिना स्वीकरोमि, देवैर्मर्त्याय यत् प्रोक्तं तत् तस्य प्राचीनं कर्म प्राप्तमेव।।१७।। अज्ञानमोहितो जन्तुरेतस्मिन् संसारचक्रे भ्राम्यन् सर्वत्र सर्वदा सुखं दुःखं च भुंक्ते।।१८।। सुखदुःखयोः कर्ता स्वयमात्मा न स्यान्न चाऽन्योऽपि, प्राज्ञः सुखदुःखयोः कर्मफलप्रदातारमेकं परमात्मानमेव मन्यते।।१९।। सत्त्वरजस्तमसां गुणानां परिणामरूपेऽस्मिन् संसारे जन्तूनां कः शापः, कोऽवाऽनुग्रहः? तयोः स्वरूपं दुर्निरूपम्, अत्र लोके कः स्वर्गः को वा नरकः? किं सुखं किं वा दुःखमिति वा।।२०।। भगवान् परमपुरुष आत्ममायया कर्त्रन्तरनिरपेक्षः चिदचिदात्मकानि देवमनुष्यादीनि सृजति, कर्मायत्तदेहनिरपेक्षः स भूतानां बन्धं, मोक्षं, सुखं, दुःखं, च सृजति।।२१।। तस्य भगवतः कश्चिद् अपि दयितः अप्रियः वा नास्ति ज्ञातिर्बन्धुर्वा परः स्वो वा नास्ति, सर्वत्र समस्य रूपान्तररहितस्य तस्य सुखे रागो नास्ति, तर्हि रोषः कुतः स्यात्।।२२।। एवं भूता जीवाः सन्ति, तथापि शरीरिणां जीवानामनादिवासना अथवा उत्तरोत्तरकर्मैव, सुखाय दुःखाय, हिताहिताय, जन्मने मरणाय, बन्धाय मोक्षाय च संसृतयेऽवकल्पते।।२३।।

अतः प्रसादये न त्वां शापमोक्षाय भामिनि । यन्मन्यसे असाधूक्तं मम तत् क्षम्यतां सति ।।२४।। *श्रीशुक उवाच* - इति प्रसाद्य गिरिजां चित्रकेतुररिंदम । जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ।।२५।। ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् । देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ।।२६।। *रुद्र उवाच* - दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः । माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ।।२७।। नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ।।२८।। देहिनां देहसंयोगाद् द्वन्द्वानीश्वरलीलया । सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव वा ।।२९।। अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि । गुणदोषविकल्पश्च भिदेव स्वप्नकल्पिता ।।३०।। वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् । ज्ञानविज्ञानवीर्याणां नेह कश्चिद्व्यपाश्रयः ।।३१।। नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेश्वराः । विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ।।३२।।

।। सङ्ग्रहोक्तिः ।।

हे भामिनि! शापात् मोक्षायाऽहं न प्रार्थये, हे सति! मया यदुक्तं तदसाधु मन्यसे, तत् क्षम्यतामिति प्रसादये ।।२४।। *श्रीशुक उवाच* – हे अरिंदम! इत्थं पार्वतीं प्रसाद्य चित्रकेतुराश्चर्यं प्राप्तयोर्भवभवान्योः पश्यतोः सतोः स्वविमानेन जगाम ।।२५।। ततो भगवान् रुद्रो रुद्राणीं देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वतामिदमब्रवीत् ।।२६।। *रुद्र उवाच* - हे सुश्रोणि! अद्भुतकर्मणो हरेर्दासानुदासानां निःस्पृहाणां महात्मनां महत्तां दृष्टवत्यसि ।।२७।। नारायणपरा भगवद्भक्ताः सर्वेऽपि कुतश्चन निग्रहादेर्न बिभ्यति, ते भक्ताः स्वर्गापवर्गनरकेष्वपि तुल्यप्रयोजनदर्शिनो भवन्ति ।।२८।। देहिनामीश्वरलीलया देहसम्बन्धात् द्वन्द्वानि - सुखंदुःखं, मृतिर्जन्म, शापोऽनुग्रहः, एव भवन्ति, एतानि जीवस्वरूपे न भवन्ति ।।२९।। ज्ञानैकाकारे जीवे देवत्वाद्यर्थ इव गुणदोषविकल्पश्च अविवेककृतो भवति, स च स्वप्नविकल्पभेद इव वर्तते ।।३०।। ज्ञानविज्ञानवीर्याणां भगवति वासुदेवे भक्तिं कुर्वाणानां भक्तानामन्यः कश्चिद् वासनाश्रयो नास्ति ।।३१।। अहं रुद्रो यस्य नारायणस्य चेष्टां, तत्स्वरूपं च न वेद्मि तथा विरिञ्चः सनत्कुमारः, नारदः, मरीच्यादयः, इतरेः मुनयः, सुरेश्वराश्चैते सर्वे यस्य चेष्टां स्वरूपं च न जानन्ति, यतो वयं -

न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा। आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः।।३३।। तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः। सर्वत्र समदृक् शान्तो ह्यहं चैवाच्युतप्रियः।।३४।। तस्मान्न विस्मयः कार्यो पुरुषेषु महात्मसु। महापुरुषभक्तेषु शान्तेषु समदर्शिषु।।३५।। *श्रीशुक उवाच* – इति श्रुत्वा भगवतः शिवस्योमाऽभिभाषितम्। बभूव शान्तधी राजन् देवी विगतविस्मया।।३६।।इति भागवतो देव्याः प्रतिशप्तुमलंतमः। मूर्द्ध्ना संजगृहे शापमेतावत्साधुलक्षणम्।।३७।। जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः। वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः।।३८।। एतत्ते सर्वमाख्यातं यत् मां त्वं परिपृच्छसि। वृत्रस्याऽसुरजातेश्च कारणं भगवन्मतेः।।३९।। इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः। माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद्विमुच्यते।।४०।। य एतत् प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् । इतिहासं हरिं स्मृत्वा स याति परमां गतिम्।।४१।। *❀ इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे सप्तदशोऽध्यायः।।१७।।❀*

।। सङ्ग्रहोक्तिः।।

तदाहितज्ञानशक्तिक्लेशयुक्ताः स्मः।।३२।। अस्य नारायणस्य कश्चिद् अतिप्रियो न, कश्चिदप्रियोऽपि न, न स्वकीयः परकीयो वा, हरिः सर्वभूतानामात्मत्वात् स सर्वभूतप्रियोऽस्ति ।।३३।। महाभागः सर्वत्र समदृक् शान्तश्चाऽयं चित्रकेतुर्यथा नारायणस्य प्रियो भृत्यो भवति तथाऽहमपि नारायणप्रियोऽस्मि।।३४।। तस्मात् शान्तेषु महात्मसु समदर्शिषु भक्तेषु विस्मयो न कार्यः।।३५।। *श्रीशुक उवाच* – भगवतः शिवस्येत्युक्तं वचः श्रुत्वा हे राजन्! उमा देवी विगतविस्मया शान्तधीश्च बभूव ।।३६।। भागवतश्चित्रकेतुर्देव्याः प्रतिशप्तुमतिसमर्थोऽपि तस्याः शापं मूर्द्धना संजगृहे, तदेतावत् साधुलक्षणम्।।३७।। अथ योऽयं चित्रकेतुरुक्तः स एव दानवीं योनिमाश्रितः सन् त्वष्टुर्दक्षिणाग्नौ जज्ञे, ततः स वृत्र इत्यभिख्यातो ज्ञानविज्ञानसंयुतश्चाऽभवत्।।३८।। यत् त्वं मां वृत्रस्याऽसुरजातेः भगवन्मत्तेश्च कारणं पर्यपृच्छः, एतत्सर्वं तुभ्यं मयाऽऽख्यातम्।।३९।। महात्मनश्चित्रकेतोः सम्बन्धिनं पुण्यमेतमितिहासं विष्णुभक्तानां माहात्म्यं च श्रुत्वा पुमान् संसारबन्धाद् विमुच्यते।।४१।। यः पुमान् प्रातरुत्थाय वाचंयमः सन् हरिं स्मृत्वेममितिहासं श्रद्धया पठेत् स परमां गतिं प्राप्नोति।।४१।।

❀ इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यां सप्तदशोऽध्यायः।।१७।।❀

अथ अष्टादशोऽध्यायः ।।१८।।

श्रीशुक उवाच – पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीम् । अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ।।१।। सिद्धिर्भगस्य भार्याऽङ्गं महिमानं विभुं प्रभुम्। आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ।।२।। धातुः कुहूः सिनीवाली राका चानुमतिस्तथा। सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ।।३।। अग्नीन्पुरीष्यानाधत्त क्रियायां समनन्तरः। चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः। वाल्मीकिश्च महायोगी वल्मीकादभवत् किल ।।४।। अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी । रेतः सिषिचतुः कुम्भे उर्वश्याः संनिधौ द्रुतम् ।।५।। रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात्। एवं साधारणतया मुख्यत्वेन च तत्सुताः ।।६।। पौलोम्यामिन्द्र आधत्त त्रीन्पुत्रानिति नः श्रुतम् । जयन्तमृषभं तात तृतीयं मीढुषं प्रभुः ।।७।।

।। सङ्ग्रहोक्तिः ।।

अथाऽष्टादशोऽध्यायः ।।१८।

दितेर्गर्भे शक्रकृतं मरुतां छेदनम्

श्रीशुक उवाच – अदितेः पञ्चमपुत्रस्य सवितुः पत्नी पृश्निः सावित्रीं, व्याहृतिं त्रयीं च तत्तदभिमानी देवताः, अग्निहोत्रं, पशुयागं, सोमं, चातुर्मास्यं, पञ्चमहायज्ञान्, प्रासूत, ।।१।। भगस्य भार्या सिद्धिः अङ्गं, महिमानं, विभुं, प्रभुं, एतांश्चतुरः सुतान् आशीर्नाम्नीं कन्यां चेति पञ्चाऽपत्यानि प्रासूत ।।२।। धातुः कुहूः, सिनीवाली, राका, अनुमतिश्चेति चतस्रः पत्न्यः अनुक्रमात् सायं, दर्शं, प्रातः, पूर्णमासं चेति सुतान् प्रसुषुवुः ।।३।। विधाता क्रियासंज्ञायां भार्यायां पुरीष्यसंज्ञकान् अग्नीन् जनयामास, वरुणस्य चर्षणीसंज्ञा भार्याऽऽसीत्, तस्यां चर्षण्यां भृगुः पुनर्जातः, वाल्मीकिश्च महायोगी, चर्षण्यां जातः, स तपोऽकरोत् कालेन वल्मीकात् निःसृतो वाल्मीकोऽभवत् ।।४।। मित्रावरुणावुर्वशीदर्शनात् स्कन्नं रेतः उर्वश्या सन्निधावेव कुम्भे सिषिचतुः, तस्मात् अगस्त्यो वसिष्ठश्च जातौ ।।५।। मित्रः रेवतीसंज्ञायां भार्यायां उत्सर्गं, अरिष्टं, पिप्पलं च उत्पादयामास, एते उत्सर्गादय साधारणतया मित्रावरुणयोः पुत्रा उक्ताः ।।६।। देवाधिप इन्द्र पौलोम्यां भार्यायां जयन्तं ऋषभं मीढुषं चेति त्रीन् पुत्रानजनयत् ।।७।।

उरुक्रमस्य देवस्य मायावामनरूपिणः। कीर्त्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन् सौभगादयः॥८॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः। पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह॥९॥ अथ काश्यपदायादान् दैतेयान् कीर्त्तयामि ते। यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च॥१०॥ दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ। हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्त्तितौ॥११॥ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी। जृम्भस्य तनया दत्ता सुषुवे चतुरः सुतान्॥१२॥ संह्लादं प्रागनुह्लादं ह्लादं प्रह्लादमेव च। तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत्॥१३॥ शिरो हरद्यस्य हरिश्चक्रेण पिबतोऽमृतम्। संह्लादस्य कृतिर्भार्याऽसूत पञ्चजनं ततः॥१४॥ ह्लादस्य धमनी भार्याऽसूत वातापिमिल्वलम्। योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलः॥१५॥ अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा। विरोचनस्तु प्राह्लादिर्धुत्यां तस्याऽभवद्बलिः॥१६॥

॥ सङ्ग्रहोक्तिः॥

स्वसंकल्पेन वामनरूपेणाऽवतीर्णस्य उरुविक्रमस्य कीर्त्यां पत्न्यां बृहश्लोकः पुत्रोऽभवत्, तस्य सौभगादयः पुत्रा आसन्॥८॥ कश्यपपुत्रस्य उरुक्रमस्य महात्मनश्चरित्र-गुण-कर्माणि, अदित्यां स यथाऽवततार, एतत् सर्वं पश्चादेव (अष्टमस्कन्धे) वक्ष्यामहे॥९॥ अथ कश्यपाज्जाता ये विवस्वदादयः तेषां दायादान् दैतेयान् तुभ्यं कथयामि, यस्मिन् वंशे भागवतः श्रीमान् प्रह्लादो बलिश्च जातौ॥१०॥ दितेर्द्वौ पुत्रौ दैत्यदानववन्दितावास्ताम्, तौ च हिरण्यकशिपुर्हिरण्याक्षश्चेतिलोकप्रसिद्धौ कीर्त्तितौ॥११॥ तत्र हिरण्यकशिपोर्भार्या कयाधुर्दनुवंशोद्भवा जम्भृस्य दुहिताऽऽसीत् या चतुरः पुत्रान् सुषुवे॥१२॥ ते च संह्लादः अनुह्लादः ह्लादः प्रह्लादश्चेति, तेषां स्वसा संहिका आसीत्, या विप्रचितेः सकाशात् राहुं पुत्रं सुषुवे॥१३॥ अमृतं पिबतो यस्य शिरो हरिश्चक्रेणाऽहरत्, संह्लादस्य पत्नी कृतिः पञ्चजनं नाम पुत्रमसूत॥१४॥ ह्लादस्य भार्या धमनी वातापिमिल्वलं चाऽसूत, य इल्वलो निमन्त्रितायाऽगस्त्याय मेषरूपं वातापिं पेचे॥१५॥ अनुह्लादस्य सूर्म्यायां भार्यायां बाष्कलः, महिषश्चेति द्वौ पुत्रो बभूवतुः, धुत्याख्यायां प्रह्लादस्य भार्यायां पुत्रो विरोचनोऽभवत्, तस्य

बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत्। तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ।।१७।। बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम्। यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः।।१८।। मरुतश्चादितेः पुत्राश्चत्वारिंशन्नवाधिकाः। त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम्।।१९।। *राजोवाच* – कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो। इन्द्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः।।२०।। इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह। परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि।।२१।। *सूत उवाच* – तद्विष्णुरातस्य च बादरायणिर्वचो निशम्यादृतमल्पमर्थवत्। सभाजयंस्तं निभृतेन तेजसा जगाद सत्त्रायण सर्वदर्शनः।।२२।। *श्रीशुक उवाच* – हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना। मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्।।२३।। *दितिरुवाच* – कदा नु भ्रातृहन्तारमिन्द्रियाराममुल्बणम्। अक्लिन्नहृदयं पापं घातयित्वा स्वपे सुखम्।।२४।। कृमिविड्भस्मसंज्ञाऽऽसीद्यस्येशाभिहितस्य च।

।। सङ्ग्रहोक्तिः।।

विरोचनस्य पुत्रो बलिरभूत्।।१६।। ततो बलेरशनाख्यायां भार्यायां बाणज्येष्ठं पुत्रशतमभवत्, तस्य प्रह्लादस्य बलेर्वा प्रभावः पश्चात् सप्तमेऽष्टमे च स्कन्धेऽभिधास्यते।।१७।। बाणासुरः शिवमाराध्य तद्गणमुख्यतां लेभे. यस्य पार्श्वे भगवान् शिवः पुरपालकः सन्नद्याप्यास्ते।।१८।। एकोनपञ्चाशत् मरुतो दितेः पुत्रा आसन्, त इन्द्रेण समानरूपतां नीताः सन्तोऽप्यपुत्रा आसन्।।१९।। *राजोवाच* – हे गुरो! ते मरुतो जन्मसिद्धमासुरभावं परित्यज्येन्द्रेण साम्यं कथं प्रापिताः, देवत्वं प्राप्तैर्मरुतैरिन्द्रस्य साधु किं कृतम्?।।२०।। हे ब्रह्मन्! मया सहेम ऋषयोऽपि तद् वेदितुं श्रद्धां कुर्वन्ति, ततो हे भगवन् तन्नो कथयितुमर्हसि।।२१।। *सूत उवाच* – हे सत्त्रायण! शौनक! बादरायणिः सर्वज्ञः स शुको विष्णुरातस्याल्पमपि बह्वर्थं वचः सादरं निषम्य निश्चलेन चेतसा तं राजानं सम्मानयन् जगाद।।२२।। *श्रीशुक उवाच* – शक्रपक्षपातिना विष्णुना हतपुत्रा दितिः शोकदीप्तेन मन्युना ज्वलन्ती सती पर्यचिन्तयत्।।२३।। भ्रातृहन्तारमिन्द्रियारामं क्रूरमक्लिन्नहृदयं पापमिन्द्रं घातयित्वाऽहं कदा सुखं स्वपे।।२४।। ईशत्वेन मन्यमानस्य यस्य देहस्य कृमिविड्भस्मसंज्ञा भवति, तादृशदेहस्य सुखार्थं हिंसाचारी

भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥२५॥ आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः। मदशोषक इन्द्रस्य भूयाद्येन सुतो हि मे॥२६॥ *श्रीशुक उवाच* – इतिभावेन सा भर्त्तुराचचारासकृत् प्रियम् । शुश्रूषयाऽनुरागेण प्रश्रयेण दमेन च ॥२७॥ भक्त्या परमया राजन् मनोज्ञैर्वल्गुभाषितैः। मनो जग्राह भावज्ञा सुस्मितापाङ्गवीक्षणैः॥२८॥ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया। बाढमित्याह विवशो न तच्चित्रं हि योषिति॥२९॥ विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः। स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता॥३०॥ एवं शुश्रूषितस्तात भगवान् कश्यपः स्त्रिया। प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च॥३१॥ *कश्यप उवाच* – वरं वरय वामोरु प्रीतस्तेऽहमनिन्दिते। स्त्रिया भर्त्तरि सुप्रीते कः काम इह चागमः॥३२॥ पतिरेव हि नारीणां दैवतं परमं स्मृतम्। मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥३३॥

॥ सङ्ग्रहोक्तिः॥

स किं स्वार्थं वेद, कुतः यतो भूतद्रोहान्नरकपात एव भवति॥२५॥ शरीरमेवाऽऽत्मानं मन्यमानस्योच्छृङ्खलचेतस इन्द्रस्य मदशोषकः सुतः येन मे भूयात् हि॥२६॥ *श्रीशुक उवाच* – हे राजन्! इत्यभिप्रायेण सा दितिः भर्त्तुः कश्यपस्य प्रियं हितं च सेवयाऽनुरागेण प्रश्रयेण दमेन चाऽसकृदाचचार॥२७॥ हे राजन्! भावज्ञा सा दितिः परया भक्त्या, मनोज्ञैर्वल्गुभाषितैः, मन्दहाससहितैरपाङ्गवीक्षणैश्च कश्यपस्य मनः स्ववशं चकार॥२८॥ विद्वानपि स्त्रिया दित्या मोहं प्रापितोऽत एव विवशः कश्यपो बाढमित्याह, योषिति पुरुषस्य बाढमिति वचः चित्रं न हि॥२९॥ प्रजापतिर्ब्रह्मा प्रथमं भूतानि परस्परस्नेहरहितानि विलोक्य सृष्टिवृद्ध्यर्थं स्नेहवृद्ध्यर्थं च स्वस्य देहार्द्धमिव जनानां माननार्थं स्त्रियं चक्रे, यया पुंसां मतिर्हृता॥३०॥ कश्यपः स्त्रिया दित्या शुश्रूषितः परम प्रीतः सन् प्रहस्य तस्याः प्रशंसां कृत्वा च तामाह॥३१॥ हे वामोरु! हे अनिन्दिते! त्वदभीष्टं वरय, तेऽहं प्रीतोऽस्मि, भर्तरि प्रीते सति लोके स्त्रियाः कः कामोऽप्राप्यो भवेत्॥३२॥ नारीणां पतिरेव परमं दैवतं स्मृतमस्ति, लक्ष्म्याः पतिर्वासुदेवस्तु सर्वभूतानां केवलं मानसः पतिर्न बाह्यः॥३३॥

स एव देवतालिङ्गैर्नामरूपविकल्पितैः। इज्यते भगवान् पुम्भिः स्त्रीभिश्च पतिरूपधृत्।।३४।। तस्मात्पतिव्रता नार्य्यः श्रेयस्कामाः सुमध्यमे। यजन्तेऽनन्यभावेन पतिमात्मानमीश्वरम्।।३५।। सोऽहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः। तत्ते संपादये काममसतीनां सुदुर्लभम्।।३६।। *दितिरुवाच* – वरदो यदि मे ब्रह्मन् पुत्रमिन्द्रहणं वृणे। अमर्त्त्यहतपुत्राऽहं येन मे घातितौ सुतौ।।३७।। *श्रीशुक उवाच* – निशम्य तद्वचो विप्रो विनमाः पर्यतप्यत। अहो अधर्मः सुमहानद्य मे समुपस्थितः।।३८।। अहो अद्येन्द्रियारामो योषिन्मय्यैव मायया। गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम्।।३९।। कोऽतिक्रमोऽनुवर्त्तन्त्याः स्वभावमिह योषितः। धिङ्मां बताबुधं स्वार्थं यदहं त्वजितेन्द्रियः।।४०।। *शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम्। हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम्।।४१।। न हि कश्चित् प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम्। पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च।।४२।।*

।। सङ्ग्रहोक्तिः ।।

स भगवान् वासुदेव एव नामरूपविभिन्नैर्देवतालिङ्गैः पुंभिः पूज्यते, स एव पतिरूपधृत् सन् स्त्रीभिश्च पूज्यते।।३४।। हे सुमध्यमे! तस्मात् श्रेयस्कामाः पतिव्रता नार्योऽनन्यभावेन पतिरूपमात्मवत्प्रेमास्पदं श्रीवासुदेवं यजन्ते।।३५।। हे भद्रे! सोऽहं त्वयाऽनन्यभावेन भक्तितश्चार्चितः, तस्मात् असतीनां सुदुर्लभं ते कामं संपादये।।३६।। *दितिरुवाच* – हे ब्रह्मन्! त्वं यदि मम वरं दद्यास्तर्हि देवहतपुत्राऽहमिन्द्रहणं पुत्रं वृणे, येनेन्द्रेण मे सुतौ हिरण्यकशिपुहिरण्याक्षौ घातितौ स्तः।।३७।। विप्रः कश्यपस्तद्वचः श्रुत्वा विमनाः सन् परितापं चकार, अहो, अद्य मे सुमहानधर्मः समुपस्थितः।।३८।। अहो, अद्येन्द्रियारामोऽत एव योषिन्मय्या मायया गृहीतचेताः कृपणोऽहं ध्रुवं नरके पतिष्ये।।३९।। स्वभावमनुवर्त्तन्त्या योषितोऽत्र कोऽपराधः. न कश्चित्, अपि तु स्वार्थमजानन्तं मां धिक्, यस्मादहमजितेन्द्रियोऽस्मि।।४०।। स्त्रीणां मुखं शरत्पद्मोत्सवं तथा वचः श्रवणामृतं, तस्या हृदयं क्षुरधाराभं वर्तते, अतः स्त्रीणां चेष्टितं को वेद?।।४१।। स्वापेक्षितार्थप्रियाणां स्त्रीणां तत्वतः कश्चित् प्रियः नास्ति, अतः सा स्वार्थनिमित्तं पतिं पुत्रं भ्रातरं वा घातयन्ति।।४२।।

प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत्। वधं नार्हति चेन्द्रोऽपि तत्रेदमुपकल्पते ।।४३।। *श्रीशुक उवाच* - इति संचिन्त्य भगवान् मारीचः कुरुनन्दन। उवाच किंचित् कुपितो ह्यात्मानं च विगर्हयन्।।४४।। *कश्यप उवाच* - पुत्रस्ते भविता भद्रे इन्द्रहा देवबान्धवः। संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि।।४५।। *दितिरुवाच* - धारयिष्ये व्रतं ब्रह्मन् ब्रूहि कार्याणि यानि मे। यानि चेह निषिद्धानि न व्रतं घ्नन्ति यान्युत।।४६।। *कश्यप उवाच* - न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत्। न छिन्द्यान्नखरोमाणि न स्पृशेद्यदमङ्गलम् ।।४७।। नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः। नावसीताधौतवासः स्रजं च विधृतां क्वचित्।।४८।। नोच्छिष्टं चण्डिकान्नं च सामिषं वृषलाहृतम्। भुञ्जीतोदक्यया दृष्टं पिबेदञ्जलिना ह्यपः।।४९।। नोच्छिष्टाऽस्पृष्टसलिला संध्यायां मुक्तमूर्द्धजा।

।। सङ्ग्रहोक्तिः ।।

"अहं ददामि" इति प्रतिश्रुतं मे वचो मृषा न स्यात्, इन्द्रश्चापि वधं नार्हति, तत्रेदमुपकल्प्यते ।।४३।। *श्रीशुक उवाच* - हे कुरुनन्दन! कश्यप इति संचिन्त्य, मनसा किञ्चित् कुपितः, आत्मानं विगर्हंश्चोवाच ।।४४।। हे भद्रे! मयोच्यमानं व्रतं सम्यक् संवत्सरपर्यन्तं त्वं धारयिष्यसि तर्हि तव पुत्र इन्द्रस्य हन्ता भविष्यति, नो चेत्, देवबान्धवो भविष्यति ।।४५।। *दितिरुवाच* - हे ब्रह्मन्! व्रतमहं धारयिष्ये, मया "अवश्यं कार्याणि यानि तानि ब्रूहि, इह यानि निषिद्धानि तान्यपि ब्रूहि, यानि व्रतं न घ्नन्ति, तानि च ब्रूहि" ।।४६।। *कश्यप उवाच* - १- प्राणिसमूहान् न हिंस्यात्, २- कंचन न शपेत्, ३- असत्यं न वदेत्, ४- नखरोमाणि न छिन्द्यात्, ५- अमङ्गलं न स्पृशेत्, ।।४७।। ६- जलेषु प्रविश्य न स्नायात्, ७- कस्मैचिदपि न कुप्येत्, ८- दुर्जनैः सह न संभाषेत, ९- अधौतं वासो न बिभृतात्, १०- स्वेन परेण वा पूर्वं धृतां पुष्पमालां पुनर्न धारयेत्, ।।४८।। ११- उच्छिष्टं न भुञ्जीत, १२- चण्डिकान्नं न भुञ्जीत, १३- सामिषमन्नं न भुञ्जीत, १४- वृषलाहृतमन्नं न भुञ्जीत, १५- रजस्वलया दृष्टमन्नं न भुञ्जीत, १६- अञ्जलिना जलं न पिबेत्, ।।४९।। १७- उच्छिष्टा स्वगृहाद् बहिर्न गच्छेत्, १८- अस्पृश्यपदार्थस्पर्शेऽस्नाता बहिर्नगच्छेत्, १९- संध्यायां बहिर्न चरेत्,

अनर्चिता संयतवाङ्नासंवीता बहिश्चरेत् ।।५०।। नाधौतपादाऽप्रयता नार्द्रपान्नो उदकशिराः। शयीत नापराङ्नान्यैर्न नग्ना न च संध्ययोः ।।५१।। धौतवासाः शुचिर्नित्यं सर्वमङ्गलसंयुता। पूजयेत् प्रातराशात् प्राग्गोविप्रान् श्रियमच्युतम् ।।५२।। स्त्रियो वीरवतीश्चार्चेत्स्रग्गन्धबलिमण्डनैः। पतिं चार्च्योपतिष्ठेत ध्यायेत् कोष्ठगतं च तम् ।।५३।। सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् । धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ।।५४।। *श्रीशुक उवाच* – बाढमित्यभिप्रेत्याथ दिती राजन् महामनाः। काश्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ।।५५।। मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद। शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत् कविः ।।५६।। नित्यं वनात्सुमनसः फलमूलसमित्कुशान्। पत्राङ्कुरमृदोऽपश्च काले काले उपाहरत् ।।५७।। एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप।

।। सङ्ग्रहोक्तिः ।।

२०- मुक्तमूर्द्धकेशा बहिर्न चरेत्, २१- अनलङ्कृता बहिर्न चरेत्, २२- असंयतवाक् बहिर्न चरेत्, २३-अप्रावृता सती गृहाद् बहिर्न चरेत्, ।।५०।। २४- अधौतपादा न शयीत, २५- असमाहितचित्ता न शयीत, २६- आर्द्रप्रादा न शयीत, २७- उदक् शिराः न शयीत, २८- पश्चिमशिरा न शयीत, २९- अन्यैः साकं न शयीत, ३०-नग्ना न शयीत, ३१- सन्ध्ययोर्न शयीत, ।।५१।। ३२- धौतवासाः, ३३- सर्वकालं शुचिः, ३४- नित्य सर्वमङ्गलसंयुता, ३५- प्रातराशात् प्राक् गोविप्रान् पूजयेत्, ३६- महालक्ष्मीं पूजयेत्, ३७- नारायणं च पूजयेत् ।।५२।। ३८- जीवद्भर्तृकाः स्त्रियः स्रग्गन्धबलिमण्डनैरर्च्येत, ३९- स्वपतिं पूजयित्वा, ४०- स्वपतिं स्तुवीत, ४१- हृत्स्थं पतिं हरिं च ध्यायेत्, ।।५३।। पुंसवनमेतद् व्रतमविकलं सांवत्सरं धारयिष्यसि चेत् तव सुतः शक्रहा भविष्यति ।।५४।। *श्रीशुक उवाच* - हे राजन्! इत्युक्ता दितिर्बाढमित्यङ्गीकृत्य, अथ महामनाः सती काश्यपं गर्भं दधार, सा व्रतमपि सम्यग् दधार ।।५५।। हे मानद! ततो विद्वान् इन्द्रो मातृष्वसुर्दितेरभिप्रायं ज्ञात्वाऽऽश्रमस्थां दितिं शुश्रूषणेन पर्यचरत् ।।५६।। नित्यं पुष्प-फल-मूल-समित्-कुश-वृन्दापत्रां-ऽकुर-मृद्-अपो वनादानीय शक्रः काले काले समर्पितवान् ।।५७।। हे नृप! एवं व्रतस्थायास्तस्या

प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः।।५८।। नाध्यगच्छद् व्रतच्छिद्रं तत्परोऽथ महीपते। चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह।।५९।। एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता। अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता।।६०।। लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः। दितेः प्रविष्ट उदरं योगेशो योगमायया।।६१।। चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम्। रुदन्तं सप्तधैकैकं मा रोदीरिति तान्पुनः।।६२।। ते तमूचुः पाट्यमानाः सर्वे प्राञ्जलयो नृप। नो जिघांससि किमिन्द्र भ्रातरो मरुतस्तव।।६३।। मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः। अनन्यभावान् पार्षदानात्मनो मरुतां गणान्।।६४।। न ममार दितेर्गर्भः श्रीनिवासानुकम्पया। बहुधा कुलिशच्छिन्नो द्रोण्यस्त्रेण यथा भवान्।।६५।। सकृदिष्ट्वाऽऽदिपुरुषं पुरुषो याति सात्मताम्। संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः।।६६।। सजूरिन्द्रेण पञ्चाशद्देवास्ते मरुतोऽभवन्। व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः।।६७।।

।। सङ्ग्रहोक्तिः।।

व्रतच्छिदं प्राप्तुमिच्छुरत एव जिह्म इन्द्र मृगाकृतिर्मृगहा इव पर्यचरत्।।५८।। हे महीपते! तत्परः सन्नपि यदा व्रतच्छिद्रं नाऽऽध्यगच्छत् तदा तीव्रां चिन्तां गतः शक्र इह मे शिवं केन स्याद् इति व्यचिन्तयत्।।५९।। एकदा सा दितिर्व्रतकर्शिता अस्पृष्टवारिः अधौताङ्घ्रि-र्विधिमोहिता सती सुष्वाप।।६०।। योगसामर्थ्यवान् इन्द्रस्तच्छिद्रं लब्ध्वा निद्रया अपहृतचेतसः दितेरुदरं योगमायया प्रविष्टः।।६१।। ततः कनकप्रभं गर्भं वज्रेण सप्तधा चकर्त, रुदन्तं तं गर्भस्यैकैकं भागं "मा रोदीः" इति वदन् पुनः सप्तधा चकर्त।।६२।। हे नृप! उक्तरीत्या शक्रेण भिद्यमानाः सर्वे त एकोनपञ्चाशतदपि भागाः प्राञ्जलयः सन्तः, हे इन्द्र! मरुतो वयं ते भ्रातरो भवामः, अतो नो किं जिघांससि? इति तमूचुः।।६३।। तैरित्युक्तः शक्रः यदि यूयं मम भ्रातरस्तर्हि "मा भैष्टः" इति स्वस्य पार्षदत्वं प्राप्ताननन्यभावान् मरुतां गणानाह।।६४।। दितेर्गर्भो बहुधा कुलिशच्छिन्नोऽपि भगवदनुकम्पयाऽश्वत्थाम्नोऽस्त्रेण भवान् इव न ममार।।६५।। पुरुषः सकृदप्यादिपुरुषं संपूज्य तन्माहात्म्येन शनैः समानरूपतां याति, तर्हि दित्या किंचिदूनं संवत्सरं यावद्धरिरर्चितः, अतोऽस्या गर्भो न ममार।।६६।। ते मरुत इन्द्रेण सह

दितिरुत्थाय ददृशे कुमाराननलप्रभान्। इन्द्रेण सहितान् देवी पर्यतुष्यदनिन्दिता ।।६८।। अथेन्द्रमाह ताताहमादित्यानां भयावहम्। अपत्यमिच्छन्त्यचरं व्रतमेतत्सुदुष्करम् ।।६९।। एकः संकल्पितः पुत्रः सप्त सप्ताभवन् कथम्। यदि ते विदितं पुत्र सत्यं कथय मा मृषा ।। ७०।। *इन्द्र उवाच* – अम्ब तेऽहं व्यवसितमुपधार्यागतोऽन्तिकम्। लब्ध्वान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ।।७१।। कृत्तो मे सप्तधा गर्भ आसन् सप्त कुमारकाः। तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ।।७२।। ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया। महापुरुषपूजायाः सिद्धिः कार्यानुषङ्गिणी ।।७३।। आराधनं भगवत ईहमाना निराशिषः। ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ।।७४।। आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरम्। को वृणीत गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ।।७५।।

।। सङ्ग्रहोक्तिः ।।

वर्तमानाः पञ्चाशद् देवा अभवन्, हरिणा ते मरुतो मातृदोषं परित्याज्य यज्ञभागार्हाः कृताः ।।६७।। ततो दितिरुत्थाय, इन्द्रेण सहितान् अनलप्रभान् कुमारान् ददृशे, तान् दृष्ट्वा चाऽनिन्दिता देवी दितिः पर्यतुष्यत् ।।६८।। अथ दितिरिन्द्रमाह, हे तात! अहं भवदादीनामादित्यानां भयावहं पुत्रमिच्छन्ती सती सुदुष्करं व्रतमचरम् ।।६९।। हे इन्द्र! मया त्वेकः पुत्रः संकल्पितः, अत्रैकोनपञ्चाशत् कथमभवन्, हे पुत्र! यदि ते विदितं भवेत् तर्हि सत्यं वद, मा मृषा ।।७०।। *इन्द्र उवाच* – हे मातः! तवाभिप्रेतं ज्ञात्वाऽहं तवान्तिकं संप्राप्तः लब्धच्छिद्रस्त्वदुदरं प्रविश्य वज्रेण गर्भमच्छिदम्, यतः स्वार्थी धर्मविन्न हि ।।७१।। ततो मया गर्भः सप्तधा कृत्तः, तदा सप्त कुमारा आसन्, ते सप्ताऽपि एकैकशः सप्तधा छिन्नाः, तदा सप्त सप्त प्रकाराः सन्तोऽपि नैव मम्रिरे ।।७२।। ततस्तत् परमाश्चर्यं वीक्ष्य महापुरुषपूजायाः सिद्धिः पूजाभिलषितप्रयोजनावहा भवति, इति मया निश्चितं ।।७३।। अत एव ये पुरुषाः निष्कामाः सन्तो भगवदाराधनं कुर्वाणा मोक्षमपि नेच्छन्ति, त एव स्वार्थकुशलाः स्मृताः ।।७४।। स्वस्वरूपप्रदं स्वात्मानं जगदीश्वरं परमेश्वरं समारध्य यदि विवेकी स्यात् कः पुमान् शब्दादिविषयानुभवं वृणीत, यतो विषयास्तु नरकेऽपि स्युः ।।७५।।

तदिदं मम दौर्जन्यं बालिशस्य महीयसि। क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः।।७६।। *श्रीशुक उवाच* – इन्द्रस्तयाऽभ्युनुज्ञातः शुद्धभावेन तुष्टया। मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः।।७७।। एवं ते सर्वमाख्यातं यन् मां त्वं परिपृच्छसि। मङ्गलं मरुतां जन्म किं भूयः कथयामि ते।।७८।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धेऽष्टादशोऽध्यायः।।१८।।

अथ एकोनविंशोऽध्यायः।।१९।।

राजोवाच – व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितम् । तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति।।१।। *श्रीशुक उवाच* – शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया। आरभेत व्रतमिदं सार्वकामिकमादितः।।२।। निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च। स्नात्वा शुक्लदती शुक्ले वसीतालंकृताम्बरे। पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह।।३।।

।। सङ्ग्रहोक्तिः।।

हे पूज्ये! बालिशस्य मम तदिदं दौर्जन्यं त्वं क्षन्तुमर्हसि, हे मातः! मृतोऽपि ते गर्भो दैवादुत्थितः।।७६।। इन्द्रस्य निष्कपटभावेन तुष्टया तया दित्याऽभ्यनुज्ञातः प्रभुरिन्द्रस्तां दितिं नत्वा मरुद्भिः सह त्रिदिवं जगाम।।७७।। यन् मरुतां जन्म मां पर्यपृच्छः, मङ्गलं तत्सर्वं तुभ्यमेवं कथितम्, भूयः किं तुभ्यं कथयामि?।।७८।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यामष्टादशोऽध्यायः।।१८।।

अथ एकोनविंशोऽध्यायः।।१९।।

पुंसवनव्रतविधिः

राजोवाच – भवता यत् पुंसवनं व्रतदुदीरितं, तद् वेदितुमिच्छामि, यतो येन व्रतेन तच्छ्रवणेन वा स्वयं श्रीहरिः प्रसीदति।।१।। *श्रीशुक उवाच* – मार्गशीर्षे मासि शुक्ले पक्षे योषिद् भर्तुराज्ञया वाञ्छितार्थप्रदमिदं व्रतं शुक्लपक्षमारभ्य आरभेत्।।२।। प्रथमं मरुतां जन्म श्रुत्वा ब्राह्मणान् पृष्ट्वा शुक्लदती स्त्री स्नात्वा शुक्ले वस्त्रे वसीत, ततोऽलंकृता सती प्रातराशात् पूर्वं -

अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते। महाविभूतिपतये नमः सकलसिद्धये।।४।।
यथा त्वं कृपया भूत्या तेजसा महिनौजसा । जुष्ट ईशगुणैः सर्वैस्ततोऽसि भगवान्
प्रभुः।।५।। विष्णुपत्नि महामाये महापुरुषलक्षणे। प्रीयेतां मे महाभागे लोकमातर्नमो-
ऽस्तु ते।।६।। ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह
महाविभूतिभिर्बलिमुपहराम्यनेनाहरहर्म्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-
स्नानवासउपवीतविभूषणगन्धपुष्पधूपदीपोपहाराद्युपचारांश्च समाहिता उपाहरेद्धविः
शेषं तु जुहुयादनले द्वादशाहुतीः।। ७।। ॐ नमो भगवते महापुरुषाय महाविभूतिपतये
स्वाहेति। श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ। भक्त्या संपूजयेन्नित्यं
यदीच्छेत्सर्वसंपदः।।८।। प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेणचेतसा। दशवारं जपेत् मन्त्रं
ततः स्तोत्रमुदीरयेत्।।९।। युवां तु विश्वस्य विभू जगतः कारणं परम्। इयं हि
प्रकृतिः सूक्ष्मा माया शक्तिर्दुरत्यया ।।१०।।

।। सङ्ग्रहोक्तिः।।

श्रियासह भगवन्तं नारायणं पूजयेत्।।३।। निरपेक्षाय तेऽलमेव, न किंचिदन्यैः कृत्यमस्ति, हे पूर्णकाम! तुभ्यं नमोऽस्तु, महाविभूतिपतये लक्ष्मीपतये सकलसिद्धये नमः।।४।। हे ईश! यतस्त्वं कृपया भूत्या, महिम्ना, ओजसा, सर्वैः कृपादिभिर्गुणैर्जुष्टोऽसि, ततो भगवानसि।।५।। हे विष्णुपत्नि! हे महामाये! हे महापुरुषलक्षणे! हे महाभागे! हे लोकमातः! ते नमोऽस्तु, युवां प्रीयेताम्।।६।। ॐनमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये, महाविभूतिभिः सह बलिं-अर्घ्यादिकं समर्पयामि, अनेन मन्त्रेण प्रतिदिनं विष्णोः आवाहनं, अर्घ्यं, पाद्यं, उपस्पर्शनं, स्नानं, वासः, उपवीतं, विभूषणानि, गन्धः, पुष्पाणि, धूपः दीपः, उपहारश्चेत्येतानुपचारान् समाहिता सती उपाहरेत्, हविः शेषमनले द्वादश आहुतीर्जुहुयात्।।७।। भगवते महापुरुषाय महाविभूतिपतये ॐनमः स्वाहा, हविः समर्पयामि इति , यदि सर्वसम्पद इच्छेत् तर्हि मनोरथानां प्रभवौ वरदौ श्रियं विष्णुं चेत्यभौ भक्त्या नित्यं सम्पूजयेत्।।८।। भक्तिनम्रेण शिरसा चेतसा च भूमौ दण्डवत् प्रणमेत्, ततो "ॐनमो भगवते महानुभावाय महाविभूतिपतये" इति दशवारं मन्त्रं जपेत्, ततः स्तोत्रमुदीरयेत्।।९ ।। युवां तु विश्वस्य विभू जगतः कारणं

तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः। त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥११॥ गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान्। त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशया। नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः॥१२॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ । तथा म उत्तमश्लोक सन्तु सत्या महाशिषः॥१३॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह। तन्निःसार्योपहरणं दत्त्वाऽऽचमनमर्चयेत्॥१४॥ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा। यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम्॥१५॥ पतिं च परया भक्त्या महापुरुषचेतसा। प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः। बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च॥१६॥ कृतमेकतरेणापि दंपत्योरुभयो-रपि। पत्न्यां कुर्यादनर्हायां पतिरेतत् समाहितः। विष्णोर्व्रतमिदं बिभ्रत् न विहन्यात् कथंचन॥१७॥ विप्रान् स्त्रियो वरिवतीः स्रग्गन्धबलिमण्डनैः। अर्चयेदहरहर्भक्त्या देवं नियममास्थिता॥१८॥

॥ सङ्ग्रहोक्तिः॥

परम्, इयं लक्ष्मीः सूक्ष्मा दुरवबोधा, माया शक्तिर्दुरत्यया प्रकृतिरस्ति॥१०॥ तस्याः प्रकृतेरधीश्वरः साक्षात् परः पुरुषस्त्वमेवाऽसि, सर्वज्ञस्त्वमेव, इयं लक्ष्मीरिज्या, क्रियारूपा वा, भवान् फलभुक्॥११॥ देवीयं लक्ष्मीः सर्ववस्तुगता गुणाभिव्यक्तिः, गुणभुक् भवान् व्यञ्जकः, त्वं सर्वशरीरिणामात्मा, श्रीः-लक्ष्मीः शरीरेनिद्रयाशयाविभूतिभूता, भगवती लक्ष्मी-र्नामरूपे, त्वं नामरूपप्रकाशक आधारः॥१२॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ च भवथः, तथा हे उत्तमश्लोक! मे आशिषः सत्याः सन्तु॥१३॥ लक्ष्म्या सह वरदं श्रीनिवासं भगवन्तमित्यभिष्टूय तदुपहरणं निःसार्य, आचमनं, दत्वाऽर्चयेत्॥१४॥ ततः पुनः स्तोत्रेण स्तुवीत, भक्तिप्रह्वेण चेतसा यज्ञोच्छिष्टमवघ्राय पुनरपि हरिमभ्यर्चयेत्॥१५॥ पतिं चापि महापुरुषभावनया परया भक्त्योपनमेत्, तैस्तैः प्रियैर्वस्तुभिः पतिं भजेच्च, स्वयं पतिरपि भार्यायां प्रेमशीलः सन् पत्न्या उच्चावचानि सर्वकर्माणि पोषयेत्॥१६॥ दम्पत्योरेकतरेणापि कृतं कर्मोभयोरपि फलदं भवति, अत एव पत्न्यामशक्तायां सत्यां पतिरेतद् व्रतं समाहितः सन् कुर्यात्, विष्णोरिदं व्रतं बिभ्रत् जनः कथंचन न विहन्यात्॥१७॥ प्रतिदिनमुक्तप्रकारेण

उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः। अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा।।१९।। एतेन पूजाविधिना मासान् द्वादश हायनम्। नीत्वाऽथोपचरेत्साध्वी कार्त्तिके चरमेऽहनि ।।२०।। श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत्। पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा।।२१।। पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः । द्वादश ब्राह्मणान् भक्त्या साध्वन्नैर्भोजयेत्ततः।।२२।। आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः। प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया।।२३।। आचार्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः। दद्यात्पत्न्यै चरोः शेषं सुप्रजस्त्वं च सौभगम्।।२४।। एतच्चरित्वा विधिवद् व्रतं विभोरभीप्सितार्थं लभते पुमानिह। स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम्।।२५।। कन्या च विन्देत समग्रलक्षणं पतिं त्ववीरा हतकिल्बिषा गतिम्। मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम्।।२६।।

।। सङ्ग्रहोक्तिः।।

नियममास्थिता सती विप्रान् पुत्रवतीः स्त्रियः देवं च स्रग्गन्धबलिमण्डनैर्भक्त्या समर्चयेत् ।।१८।। ततो देवं भगवन्तं स्वस्थानभूते हृदयादावावास्य भगवदर्चापूरो भागे निवेदितं हविः, तदात्मशुद्ध्यर्थं तथा सकलकामप्राप्त्यर्थमश्नीयात्।।१९।। एतेनोक्तविधिना द्वादशमासात्मकं संवत्सरं नीत्वा, अथ साध्वी कार्त्तिके मासि चरमे दिने व्रतोद्यापनाङ्गमुपचारं कुर्यात्।।२०।। प्रातःकाले जाते स्नात्वा पूर्वोक्तविधिना कृष्णमभ्यर्च्य पयसि पक्वेन सर्पिःसहितेन चरुणा जुहुयात्।।२१।। पतिः पाकयज्ञविधानेन द्वादश एव आहुतीर्जुहुयात्, ततः भक्त्या द्वादश ब्राह्मणान् समीचीनान्नैर्भोजयेत्।।२२।। प्रीतैर्द्विजैः समीरिता आशिषः शिरसाऽऽदाय भक्त्या शिरसा प्रणम्य ब्राह्मणाऽभ्यनुज्ञया भुञ्जीत।।२३।। ततः व्रतकर्त्र्यङ्गनापतिर्वाग्यतो, आचार्यमग्रतः कृत्वा बन्धुभिः सह सुप्रजाप्रदं सौभगतापादकं च चरोः शेषं पत्न्यै दद्यात्।।२४।। परमात्मन एतद् व्रतं विधिवच्चरित्वा पुमानिह लोकेऽभिप्सीतार्थं लभते, स्त्री तु एतद् व्रतमास्थाय सौभाग्यं, श्रियं, पुत्रापत्यं, पत्युर्दीर्घायुष्ट्वं, यशः, सन्मन्दिरं च लभते।।२५।। कन्या समग्रशुभलक्षणं पतिं विन्देत, विधवा तु हतकिल्बिषा सती सद्गतिं विन्देत, मृतप्रजा स्त्री -

विन्देद्विरूपा विरुजा विमुच्यते यश्चामयावीन्द्रियकल्पदेहम्। एतत्पठन्नाभ्युदये च कर्मण्यनन्ततृप्तिः पितृदेवतानाम्।।२७।। तुष्टाः प्रयच्छन्ति समस्तकामान् होमावसाने हुतभुक् श्रीर्हरिश्च। राजन् महत् मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते।।२८।।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे एकोनविंशोऽध्यायः।।१९।।

इति षष्ठस्कन्धः समाप्तः

।। सङ्ग्रहोक्तिः।।

जीवत्सुता भवेत्, दरिद्रा धनेश्वरी भवेत्, सौभाग्यरहिता सुभगा भवेत्, विरूपा श्रेष्ठं रूपं विन्देत्।।२६।। रोगी रोगरहितो जायते, पटुतरेन्द्रियं देहं विन्देत, पुमान् आभ्युदये कर्मण्येतत् पठन् स्याच्चेत् तस्य पितृदेवतानामनन्ततृप्तिर्भवेत्।।२७।। संतोषं प्राप्ताः पितृदेवताः समस्तकामान् प्रयच्छन्ति, होमावसाने हुतभुग् अग्निः प्रसन्नः स्यात्, श्रीर्हरिश्च, उभौ प्रसन्नौ भवेताम्, हे राजन्! एवं मरुतां पुण्यं जन्म, दितेः पुंसवनाख्यं व्रतं च तुभ्यं मयाऽभिहितम्।।२८।।

इति श्रीमद्भागवते षष्ठस्कन्धे सङ्ग्रहोक्त्यामेकोनविंशोऽध्यायः।।१९।।

इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां षष्ठस्कन्धः समाप्तः

ॐ

।। श्रीस्वामिनारायणो विजयतेतराम् ।।

नमोऽवतारिणे श्रीस्वामिनारायणाय

।।श्रीमद्भागवतमहापुराणम्।।

सङ्ग्रहोक्तिटीकासहितम्

सप्तम स्कन्धः

अथ प्रथमोऽध्यायः ।।१।।

परीक्षित् उवाच – समः प्रियः सुहृद् ब्रह्मन् भूतानां भगवान् स्वयम्। इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ।।१।। न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः। नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ।।२।। इति नः सुमहाभाग निर्गुणस्य गुणान् प्रति। संशयः सुमहान् जातस्तद्भवान् छेत्तुमर्हति ।।३।। *श्रीशुक उवाच* – साधु पृष्टं महाराज हरेश्चरितमद्भुतम्। यद्भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनम् ।।४।। गीयते परमं पुण्यमृषिभिर्नारदादिभिः। नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ।।५।। निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः। स्वमायागुणमाविश्य बाध्यबाधकतां गतः ।।६।।

।। सङ्ग्रहोक्तिः ।।

अथ प्रथमोऽध्यायः ।।१।।

विष्णुभक्ते प्रह्लादे हिरण्यकशिपोर्विरोधः

परीक्षित् उवाच – हे ब्रह्मन्! भगवान् भूतानां समः प्रियः सुहृत्, स्वयमेवंभूतः सन्निन्द्रस्य प्रयोजनसिद्धये विषमवत् दैत्यान् कथमवधीत् ।।१।। साक्षान्निःश्रेयसात्मनः सत्वादिगुणरहितस्याऽस्य भगवतः सुरगणैः स्वार्थो नहि, तथाऽसुरेभ्य उद्वेगो न, तेषु विद्वेषश्च नैवाऽस्ति ।।२।। हे सुमहाभाग! इत्थं प्राकृतगुणरहितस्य श्रीनारायणस्य गुणान् प्रति नोऽतिमहान् संशयो जातोऽस्ति, तं संशयं भवान् छेत्तुमर्हति ।।३।। *श्रीशुक उवाच* – हे महाराज! अद्भुतं यद्धरेश्चरित्रं प्रति साधु पृष्टम्, यस्मिन् भागवतानां माहात्म्यं संभृतं वर्तते, तद्धरेश्चरित्रं भगवद्भक्तिं वर्द्धयति ।।४।। अतिपवित्रतापादकं श्रीहरिचरित्रं तु नारदादिभिः ऋषिभिर्गीयते, अहं कृष्णद्वैपायनाख्यमुनये नत्वा हरेः कथां कथयिष्ये ।।५।। हेयगुणरहितः प्रमाणान्तराविषयोऽजो भगवान् प्रकृतेः परोऽपि सत्त्वादिगुणविशिष्टां स्वांशभूतां प्रकृतिं समाविश्य

सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः। न तेषां युगपद्राजन् ह्रास उल्लास एव च।।७।। जयकालेऽपि सत्त्वस्य देवर्षीन् रजसोऽसुरान्। तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत्।।८।। ज्योतिरादिरिवाभाति संघातान्न विविच्यते। विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः।।९।। यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया। सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरत्यसौ। कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नवरदेव सत्यकृत्।।१०।। य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः। तत् प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः।।११।। अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा। प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे।।१२।। दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ। वासुदेवे भगवति सायुज्यं चेदिभूभुजः।।१३।।

।। सङ्ग्रहोक्तिः।।

बाध्यबाधकभावं प्राप्नोति।।६।। हे राजन्! सत्त्वं रजस् तमस् इति त्रयो गुणाः प्रकृतेः, न परमात्मनः, तेषां गुणानां क्षयो विकासो वा युगपन्न जायते।।७।। तत्तत् कर्मविपाककालानुगुणो भगवान् सत्त्वोत्कर्षकाले देवर्षीन् अनुग्राहको भवति, रजस उत्कर्षसमयेऽसुराननुग्राहको भवति, तमस उत्कर्षकाले यक्षरक्षांसि अनुग्राहको भवति।।८।। काष्ठं प्रविष्टोऽग्निर्यथा काष्ठानुरूपो भवति, तद्वत् परमात्माऽपि सुरासुरदेहसंघातात् पृथक् न प्रतीयते, तत्तत्देवादि-जीवात्मस्थं परमात्मानं विचार्य निपुणा जानन्ति।।९।। भगवान् यदा स्वसंकल्परूपज्ञानेन जीवस्य शरीराणि सिसृक्षुर्भवति तदा रजोगुणं प्रेरयति, यदा रिरक्षिषुर्भवति तदा सत्त्वगुणं सृजति, यदा संजिहिर्षुर्भवति तदा तमोगुणमीरयति, परमात्मा स्वशरीरभूतं कालं सृष्ट्वा प्रकृतिपुरुषाभ्यां चिदचितोरुभयोः सृष्टिं करोति।।१०।। हे राजन्! कालशरीरकः परमात्मा यदा सत्वगुणप्रधानान् सुरान् वर्द्धयति, तदा महाकीर्त्तिः स स्वयं सुरप्रियः सन् तत्प्रत्यनीकान् रजस्तमःप्रकृतिकानसुरान् विनाशयति।।११।। हे राजन्! परमात्मनः सर्वभूतसुहृत्वे राजसूये प्रीत्या पृच्छते युधिष्ठिराय नारदेन पूर्वं इतिहासः कथित आसीत्।।१२।। राजा युधिष्ठिरः राजसूये महाक्रतौ महाद्भुतं शिशुपालस्य वासुदेवे भगवति सायुज्यं दृष्ट्वा विस्मितोऽभूत्।।१३।।

तत्रासीनं सुरऋषिं राजा पाण्डुसुतः क्रतौ। पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ।।१४।। *युधिष्ठिर उवाच* - अहो अत्यद्भुतं ह्येतद्दुर्लभैकान्तिनामपि। वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः।।१५।। एतद्वेदितुमिच्छामः सर्व एव वयं मुने। भगवन्निन्दया वेनो द्विजैस्तमसि पातितः।।१६।। दमघोषसुतः पाप आरभ्य कलभाषणात्। संप्रत्यमर्षी गोविन्दे दन्तवक्त्रश्च दुर्मतिः।।१७।।शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम्। श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः।।१८।। कथं तस्मिन् भगवति दुरवग्राह्यधामनि। पश्यतां सर्वलोकानां लयमीयतुरञ्जसा।।१९।। एतद् भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना। ब्रूह्येतदद्भुततमं भगवंस्तत्र कारणं्।।२०।। *श्रीशुक उवाच* - राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः। तुष्ट प्राह तमाभाष्य शृण्वन्त्यास्तत्सदः कथाः।।२१।। *नारद उवाच* - निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम्। प्रधानपरयो राजन्नविवेकेन कल्पितम्।।२२।। हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा।

।। सङ्ग्रहोक्तिः।।

तदा स पाण्डुसुतो युधिष्ठिरस्तत्रोपविष्टं देवर्षिं नारदं मुनीनां शृण्वतामिदं पप्रच्छ।।१४।। *युधिष्ठिर उवाच* - अहो, अत्युद्भुतमेतद्, यत् एकान्तिकभक्तानामपि दुर्लभा परे तत्वे वासुदेवे विद्विषः शिशुपालस्य सायुज्यमुक्तिरूपा प्राप्तिर्जाता।।१५।।हे मुने! वयं सर्व एतद् वेदितुमिच्छामः, भगवतो निन्दाकारणात् "वेनः" मुनिभिर्नरके पातितः।।१६।।पापो दमघोषसुतः शिशुपालस्तु शैशवादारभ्यैतावत्कालपर्यन्तं श्रीकृष्णे मत्सरी भवति, तद्वदेव दन्तक्त्रोऽपि दुरात्मा भवति ।।१७।।परं निर्विकारं श्रीकृष्णमसकृन्निदतोरनयोर्जिह्वायां कुष्ठरोगोऽपि न जातः, एवं चैतौ नरकमपि न विविशतुः, प्रत्युत सर्वलोकानां पश्यतां सतां दुर्ज्ञेयस्वरूपे तस्मिन् भगवति तत्साधनानुष्ठानमन्तरेण भगवत्सायुज्यं कथं प्रापतुः?।।१८-१९।। एतस्मिन्नर्थे वायुना दीपार्चिरिव मे मनो भ्राम्यति, अतो हे भगवन्! तत्र कारणं ब्रूहि?।।२०।। *श्रीशुक उवाच* - राज्ञो युधिष्ठिरस्य वचः श्रुत्वा नारदऋषिस्तुष्टः सन् तं युधिष्ठिरमाभाष्य सभायाः शृण्वन्त्याः सत्याः कथाः प्राह।।२१।। *नारद उवाच* - हे राजन्! निन्दनं गुणकथनं पूजनं तिरस्कारश्चैतेषां विषयभूतकलेवरमस्ति, शरीरस्य जीवस्य च स्वरूपाविवेकेन तत्सर्वं कल्पितं वर्तते।।२२।।

वैषम्यमिह भूतानां ममाहमिति पार्थिव ।।२३।। यन्निबद्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः। तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः। परस्य दमकर्त्तुर्हि हिंसा केनास्य कल्प्यते ।।२४।। तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा। स्नेहात् कामेन वा युञ्ज्यात्कथंचिन्नेक्षते पृथक् ।।२५।। यथा वैरानुबन्धेन मर्त्यस्तन्मयता-मियात्। न तथा भक्तियोगेन इति मे निश्चिता मतिः ।।२६।। कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन्। संरम्भभययोगेन विन्दते तत्सरूपताम् ।।२७।। एवं कृष्णे भगवति मायामनुज ईश्वरे। वैरेण पूतपाप्मानस्तमापुरनुचिन्तया ।।२८।। *कामाद् द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ।।२९।। गोप्यः कामाद्भयात् कंसो द्वेषाच्चैद्यादयो नृपाः।*

।। सङ्ग्रहोक्तिः ।।

हे पार्थिव! इह संसारे मनुष्यादीनां "ममाहम्" इत्यभिमानरूपं वैषम्यं जायते, तद्वैषम्येण दण्डनिन्दयोः परेण कृतयोः सतोः निन्दादिकारिषु हिंसाचरणं जायते ।।२३ ।। अभिमानो देहेन सम्बद्धः, तस्माद् देहस्य वधादेव प्राणिनां वधो जायते, निरस्तनिखिलदोषत्वात् अखिलात्मनः परमात्मनोऽभिमानो नास्ति, परस्य दमकर्तुर्भगवतः परहितार्थं दण्डकारित्वात् तस्य हिंसा केन हेतुना कल्प्यते? न केनाऽपि प्रकारेण, देहाभिमानरहितत्वात् परमपुरुषस्य स्तुतिनिन्दाद्यभिमानरहितत्वाच्च तयोर्मुक्तिं ददौ ।।२४ ।। परमेश्वरस्योक्तविधस्वभावत्वात् वैरानुबन्धेन निर्वैरेण भयेन स्नेहेन कामेन च भगवति मनो युञ्ज्यात् कथंचन पृथक् न ईक्षते ।।२५ ।। संसारी जीवो यथा वैरानुबन्धेन तन्मयतां संप्राप्नुयात् तथा भक्तियोगेन न, इति मे मतिर्निश्चिता ।।२६ ।। भ्रमरेण कुड्यायां रुद्धः कीटः भ्रमरमेवाऽनुस्मरन् सन् तत्समस्वरूपतां याति, भ्रमरतां प्राप्नोति ।।२७ ।। स्वसंकल्पोपात्तमजाकृतौ भगवति कृष्णे वैरेणाऽनुचिन्तया पूतपाप्मानस्ते तं श्रीकृष्णं संप्रापुः, संरम्भभययोगिनौ भगवत्स्वरूपतां प्राप्नुयातां न त्वैक्यमिति-भावः ।।२८ ।। यथा भक्त्या परमेश्वरे मन आवेश्य मुक्तिं प्राप्ताः तथा कामात्, द्वेषात्, भयात्, स्नेहात् अपि परमेश्वरे मन आवेश्य तत्पापं हित्वा बहवस्तद्गतिं प्राप्ताः ।।२९ ।। हे विभो! भगवति कामाद् गोप्यः, भयात् कंसः, द्वेषात् शिशुपालादयो नृपाः, संबन्धाद् वृष्णयः,-

संबन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ।।३०।। कतमोऽपि न वेनस्तु पञ्चानां पुरुषं प्रति। तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ।।३१।। मातृष्वस्रेयो वश्चैद्यो दन्तवक्रश्च पाण्डव। पार्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ ।।३२।। *युधिष्ठिर उवाच* – कीदृशः कस्य वा शापो हरिदासाभिमर्शनः। अश्रद्धेय इवाभाति हरेरेकान्तिनां भवः ।।३३।। देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्। देहसंबन्धसंबद्धमेतदाख्यातुमर्हसि ।।३४।। *नारद उवाच* – एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया। सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ।।३५।। पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः। दिग्वाससः शिशून् मत्वा द्वाःस्थौ तान् प्रत्यषेधताम् ।।३६।। अशपन् कुपिता एवं युवां वासं न चार्हथः। रजस्तमोभ्यां रहिते पादमूले मधुद्विषः। पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ।।३७।। एवं शप्तौ स्वभवनात्पतन्तौ तौ कृपालुभिः। प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम् ।।३८।।

।। सङ्ग्रहोक्तिः ।।

देहसंबन्धकृतस्नेहात् यूयं पाण्डवाः, भक्त्या वयं तद्गतिं प्राप्ताः ।।३०।। उक्तविधकामुकादीनां पञ्चानां मध्ये वेनस्तु परमेश्वरं प्रति कतमो–अन्यतमोऽपि न भवति, तस्मात् पञ्चोपायानां मध्ये केनाप्युपायेन कृष्णे मनो निवेशयेत् ।।३१।। हे पाण्डव! युष्माकं मातृष्वस्रेयः शिशुपालो दन्तवक्त्रश्च, द्वाविमौ विष्णोः पार्षदप्रवरौ विप्रशापात् स्वस्थानात् भ्रष्टावास्ताम् ।।३२।। *युधिष्ठिर उवाच* – विष्णुपाषदौ पराभवति तथाविधः शापः कस्य? कीदृशोवा? हरेरेकान्तिनामिदं जन्म, अश्रद्धेयमिवाऽऽभाति ।।३३।। कर्मायत्तदेहरहितानां वैकुण्ठपार्षदानां प्राकृतदेहसम्बद्धं रागद्वेषादिकं कथम्? तदेतत् मह्यमाख्यातुं त्वमर्हसि ।।३४।। *नारद उवाच* – ब्रह्मणः पुत्राः सनन्दनादयो भुवनत्रयं चरन्तः सन्तः एकदा यदृच्छया विष्णोर्लोकं जग्मुः ।।३५।। पञ्चषड्वर्षाः शिशुकान्तयः पूर्वेषामपि प्रथमजाता दिगम्बराः, इत्थंभूतांस्तान् द्वारपालौ न्यवारयताम् ।।३६।। ताभ्यां प्रतिषिद्धास्ते कुपिताः सन्तस्तावशपन् रागद्वेषादिरहिते भगवत्पादमूले वासं कर्तुं युवां नार्हथ, किंतु बालिशौ युवामस्मात् स्थानादाशु पापिष्ठामासुरीं योनिं प्राप्नुतम् ।।३७।। एवं शप्तौ तौ स्वस्थानात् यदा पतन्तावभवतां तदा कृपालुभिः सनकादिभिः युवां त्रिभिर्जन्मभिः

जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ। हिरुण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ।।३९।। हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा। हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः।।४०।। हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम्। जिघांसुरकरोन्नाना यातना मृत्युहेतवे।।४१।। सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनम्। भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः।।४२।। ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ। रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ।।४३।। तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये। रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात् प्रभो।।४४।। तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव। अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ।।४५।। वैरानुबन्धतीव्रेण ध्यानेनाच्युत-सात्मताम्। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ।।४६।। *युधिष्ठिर उवाच* - विद्वेषो दयिते पुत्रे कथमासीत् महात्मनि। ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता।।४७।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे प्रथमोऽध्यायः।।१।।

।। सङ्ग्रहोक्तिः।।

पुनरेतल्लोकप्राप्त्यै कल्पताम्।।३८।। इत्थं शप्तौ तौ पार्षदाविह लोके दैत्यदानववन्दितौ दितेः पुत्रौ जज्ञाते, तत्र हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजश्च।।३९।। तत्र हिरण्यकशिपुर्नृसिंहरूपेण हरिणा हतः, हिरण्याक्षस्तु धराया उद्धारसमये वराहरूपेण भगवता हतः।।४०।। स हिरण्यकशिपुः केशवप्रियं प्रह्लादं पुत्रं जिघांसुः सन् तन्मृत्युहेतवे नाना यातना अकरोत्।।४१।। यातनाः कुर्वाणोऽपि स भगवत्तेजसा व्याप्तं प्रशान्तं समदर्शनं सर्वभूतानामात्मभूततामापन्नं तं प्रह्लादं हन्तुं सर्वोपायैरपि नाऽशक्नोत्।।४२।। ततस्तावेव द्वितीये जन्मनि केशिन्यां भार्यायां विश्रवसः सुतौ रावणकुम्भकर्णौ सर्वलोकसंतापनौ जातौ।।४३।। तत्र द्वितीये जन्मन्यपि भगवान् श्रीरामो भूत्वा तयोः शापोत्तारणाय तौ न्यहनत्, हे प्रभो! रामवीर्यं त्वं मार्कण्डेयमुखात् श्रोष्यसि।।४४।। तौ जयविजयावेव तृतीये जन्मनि तव मातृष्वस्रात्मजौ शिशुपालदन्तवक्त्रौ क्षत्रियौ जातौ, अथ कृष्णचक्रेण हतपापौ तौ शापनिर्मुक्तौ जातौ स्तः।।४५।। वैरानुबन्धेन तीव्रेण ध्यानेन भगवतः साधर्म्यतांसमानगुणयोगतां नीतौ अतः पुनर्विष्णुपार्षदौ भूत्वा हरेः पार्श्वं जग्मतुः।।४६।। *युधिष्ठिर उवाच* - सद्गुणाश्रये प्रिये पुत्रे प्रह्लादे हिरण्यकशिपोर्विद्वेषः कथमासीत्, येन प्रकारेण प्रह्लादस्य

अथ द्वितीयोऽध्यायः ॥२॥

नारद उवाच – भ्रातर्येवं विनिहते हरिणा क्रोडमूर्त्तिना। हिरण्यकशिपू राजन् पर्यतप्यद्रुषा शुचा ॥१ ॥ आह चेदं रुषा पूर्णः संदष्टदशनच्छदः। कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन् धूम्रमम्बरम् ॥२ ॥ करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभृकुटीमुखः। शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥३ ॥ *हिरण्यकशिपुरुवाच* – भो भो दानव-दैतेया द्विमूर्द्धन् त्र्यक्षशम्बर। शतबाहो हरग्रीव नमुचे पाक इल्वल ॥४ ॥ विप्रचित्ते मम वचः पुलोमन् शकुनादयः। शृणुतानन्तरं सर्वे क्रियतामाशु मा चिरम् ॥५॥ सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत्। पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥६ ॥ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः। भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥७ ॥

॥ सङ्ग्रहोक्तिः ॥

भगवदात्मता प्रसिद्धाऽभवत्, एतद् द्वयं मे ब्रूहि ॥४७ ॥

❀ *इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः ॥१ ॥* ❀

अथ द्वितीयोऽध्यायः॥२॥

हिरण्यकशिपोर्विष्णौ कोपः

नारद उवाच – हे राजन्! वराहमूर्त्तिना हरिणा भ्रातरि हिरण्याक्षे विनिहिते सति क्रोधेन शोकेन च व्याप्तः हिरण्यकशिपुः परितापं चकार ॥१॥ क्रोधेन व्याप्तः सन्दष्टदशनच्छदः, ज्वलद्भ्यां चक्षुर्भ्यामाकाशं धूम्रं निरीक्षमाणः, करालदंष्ट्राभिर्दृष्ट्या च दुष्प्रेक्ष्यभृकुटीमुखो हिरण्यकशिपुः सदसि शूलमुद्यम्य दानवानिदमाह ॥२-३॥ *हिरण्यकशिपुरुवाच* – भो भो दानवाः! दैत्याः! हे द्विमूर्द्धन्! हे त्र्यक्ष! हे शम्बर! हे शतबाहो! हे हयग्रीव! हे नमुचे! हे पाक! हे इल्वल! हे विप्रचित्ते! हे पुलोमन्! हे शकुनादयः! सर्वे मम वचनं श्रूयताम्, अनन्तरमाशु सर्वे तत् क्रियताम्, चिरं मा कुरुत ॥४-५॥ देवासुरयोः समेनापि भजनानुवर्तनैर्देवानां सहायभूतेन हरिणा सपत्नैः क्षुद्रैर्देवैर्मम दयितः सुहृत् भ्राता हिरण्याक्षो घातितः ॥६॥

मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै। रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ।।८।। तस्मिन् कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ। विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः।।९।। तावद्यात भुवं यूयं विप्रक्षत्रसमेधिताम्। सूदयध्वं तपोयज्ञ-स्वाध्यायव्रतदानिनः।।१०।। विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान्। देवर्षिपितृ-भूतानां धर्मस्य च परायणम्।।११।। यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः। तं तं जनपदं यात संदीपयत वृश्चत।।१२।। *नारद उवाच* - इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः। तथा प्रजानां कदनं विदधुः कदनप्रियाः।।१३।। पुरग्रामव्रजोद्यान-क्षेत्रारामाश्रमाकरान्। खेटखर्वटघोषांश्च ददहुः पत्तनानि च।।१४।। केचित्खनित्रै-र्बिभिदुः सेतुप्राकारगोपुरान्। आजीव्यांश्चिच्छिदुर्वृक्षान् केचित् परशु पाणयः। प्रादहन् शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः।।१५।।

।। सङ्ग्रहोक्तिः।।

तेजस्विनोऽपि मायावराहस्य त्यक्तस्वभावस्य भजतोऽनुवर्तमानस्य बालस्येवऽस्थिरचित्तस्य मच्छूलभिन्नग्रीवस्य हरेर्भूरिणा रुधिरेण रुधिरप्रियं मे भ्रातरं तर्पयिष्ये, ततोऽहं गतव्यथः स्याम्।।७-८।। तस्मिन् कूटशत्रौ विष्णौ निहते सति वृक्षे कृत्तमूले सति तस्य शाखाः इव विष्णुमूला देवा शुष्यन्ति।।९।। तावद् यूयं विप्रक्षत्रियवर्गबहुलां भूमिं यात, तत्र तपो-यज्ञ-स्वाध्याय-व्रत-दानादिभिर्युक्तान् जनान् घातयत।।१०।। द्विजानां क्रियामूलो यज्ञः, स एव धर्मरूपः, तदाकृतिः पुमान् विष्णुः, स विष्णुरेव देवर्षिपितृभूतानां धर्मस्य च परमाश्रयोऽस्ति, यज्ञादिधर्मेषु नाशितेषु शरीरनाशेन विष्णुरपि विनाशितो भवति।।११।। यत्र विप्राः, गावः, वेदाः, वर्णाश्रमाः, यज्ञादिक्रियाश्च भवन्ति त तं देशं गच्छत, तान् दहत, लुनीत, छिन्नभिन्नान् कुरुत।।१२।। *नारद उवाच* - इत्थं स्वभर्तुर्हिरण्यकशिपोराज्ञामादृताः सन्तः शिरसाऽऽदाय कदनप्रियास्ते दानवादय प्रजानां पीडनं चक्रुः।।१३।। पुर-ग्राम-व्रज-उद्यान-क्षेत्र-आराम-आश्रम-आकरान् तथैव खेट-खर्वट-घोषांश्च अदहन् पत्तनान्यपि अदहन्।।१४।। केचिद् दानवा खननसाधनैः सेतु-प्राकार-गोपुरान् बिभिदुः, केचित् परशुपाणय सन्त आजीव्यान् वृक्षान् चिच्छिदुः, अन्ये च ज्वलितोल्मुकैः प्रजानां गृहाणि जनांश्च प्रादहन्।।१५।।

एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः। दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ।।१६।। हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः। कृत्वा कटोदकादीनि भ्रातृपुत्रान-सान्त्वयत् ।।१७।। शकुनिं शम्बरं धृष्टं भूतसंतापनं वृकम्। कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ।।१८।। तन्मातरं रुषाभानुं दितिं च जननीं गिरा। श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर ।।१९।। *हिरण्यकशिपुरुवाच* - अम्बाम्ब हे वधूः पुत्रा वीरं मार्हथ शोचितुम्। रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ।।२०।। भूतानामिह संवासः प्रपायामिव सुव्रते। दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ।।२१।। नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः। धत्तेऽसावात्मनो लिङ्गं मायया विसृजन् गुणान् ।।२२।। यथाऽम्भसा प्रचलता तरवोऽपि चला इव। चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ।।२३।। एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान्। याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवानिव ।।२४।।

।। सङ्ग्रहोक्तिः ।।

हिरण्यकशिपोरनुचरैर्लोके पीडिते सति देवाः स्वर्गं परित्यज्य, अलक्षिताः सन्तः भुवि विचेरुः ।।१६।। ततो दुःखितो हिरण्यकशिपुर्मृतस्य भ्रातुर्हिरण्याक्षस्य कटोदकादीनि कृत्वा शकुनिं शम्बरं धृष्टं भूतसंतापनं वृकं कालनाभं महानाभं हरिश्मश्रुम् उत्कचं चैतान् हिरण्याक्षस्य पुत्रान् असान्त्वयत् ।।१७-१८।। हे जनेश्वर! देशकालज्ञो हिरण्यकशिपुः शकुन्यादीनां मातरं रुषाभानुं, स्वमातरं दितिं च श्लक्ष्णया गिरेदमाह ।।१९।। *हिरण्यकशिपुरुवाच* - हे अम्बाम्ब! हे वधूः! हे पुत्राः! वीरं हिरण्याक्षं शोचितुं नाऽर्हथ, कुतः शूराणां वधः रिपोरभिमुखे श्लाघ्यः, ईप्सितः ।।२०।। हे सुव्रते! मातः! इह संसारे स्वकर्मभिर्दैवेन एकत्र नीतानां पुनरन्यत्रोन्नीतानां भूतानां सह निवासः प्रपायामिव विश्रान्त्यर्थमेव भवति ।।२१।। आत्मा तु नित्योऽव्ययः सर्वगः सर्ववित् परोऽस्ति, य आत्मनःपुण्यपापात्मककर्मणा सत्त्वादिगुणान् विसृजन् आत्मनो लिङ्ग-शरीरं धारयति ।।२२।। यथा शीघ्रं प्रचलता जलेन तरवोऽपि चला इव दृश्यन्ते, यथा भ्राम्य-माणेन चक्षुषा भूमिर्भ्रमतीव दृश्यते तथा देहेऽहमिति प्रतीतिरपि भान्तिरूपाऽस्ति ।।२३।। हे भद्रे! एवं सत्त्वादिगुणैः सह मनसि भ्राम्यमाणे जीवो देहाद्भिन्नः सन्नपि तत्साम्यतां याति हि,

एष आत्मा विपर्यासो ह्यलिङ्गे लिङ्भावना। एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ।।२५।। संभवश्च विनाशश्च शोकश्च विविधः स्मृतः। अविवेकश्च चिन्ता च विवेका स्मृतिरेव च।।२६।। अत्राप्युदाहरन्तीममितिहासं पुरातनम्। यमस्य प्रेतबन्धूनां संवादं तं निबोधत।।२७।। उषीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः। सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत।।२८।। विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम्। शरनिर्भिन्न-हृदयं शयानमसृगाविलम्।।२९।। प्रकीर्णकेशध्वस्ताक्षं रभसा दष्टदच्छदम्। रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे।।३०।। उशीनरेन्द्रं विधिना तथाकृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः। हताः स्म नाथेति करैरुरो भृशं घ्नन्त्यो मुहुस्तत्पद-योरुपापतन्।।३१।। रुदन्त्य उच्चैर्दयिताङ्घ्रिपङ्कजं सिञ्चन्त्य अस्रैः कुच-कुङ्कुमारुणैः। विस्रस्तकेशाभरणाः शुचं नृणां सृजन्त्य आक्रन्दनया विलेपिरे।।३२।। *स्त्रिय ऊचुः*– अहो विधात्राऽकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशाम्।

।। सङ्ग्रहोक्तिः ।।

लिङ्गशरीरादन्योऽप्यात्मा स्वं लिङ्गवानिव प्रत्येति।।२४।। शरीराद् भिन्नेऽप्यात्मनि देहत्वेनानुध्यानं हि आत्मविपर्यासः कर्मकृतश्च संसारः भवति, एवं प्रियाप्रियैः संयोगवियोगौ सुखदुःखयोर्हेतुर्भवति।।२५।। इह संसारे जन्म, मृत्युः, विविधः शोकः, अविवेकः, चिन्ता, विवेकस्याऽस्मरणं, चेत्येतत् सर्वमात्मविपर्यासमूलमेव वर्तते।।२६।। कारणं विनापि यः शोकः, एतस्मिन्नर्थे यमस्य प्रेतबन्धूनां च इममितिहासं पुरातत्त्वविद उदाहरन्ति, तेषां संवादं मत्तः शृणुत।।२७।। उशीनरेषु देशेषु सुयज्ञः इति नाम्ना विश्रुतः कश्चिद् राजा बभूव, स शत्रुभिः संग्रामे निहतः, शत्रुनिहतं तं ज्ञातयः परिवृत्योपविविशुः।।२८।। विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं शरनिर्भिन्नहृदयमसृग्व्याप्तं शयानं, प्रकीर्णकेशं, ध्वस्ताक्षं, रभसा दष्टदच्छदं,रजःकुण्ठमुखाम्भोजं युद्धे छिन्नायुधभुजं दैवेनेदृशीं दशां प्राप्तमुशीनरेन्द्रं भर्तारं प्रसमीक्ष्य महिष्यो दुःखिताः, सत्यः "हे नाथ! वयं हताः स्मः" इति वदन्त्यः करैर्भृशमुरो मुहुर्घ्नन्त्यः सत्यस्तत्पादयोरुपापतन्।।२९-३१।। उच्चैः रुदन्त्यः कुचकुङ्कुमारुणैरस्रैर्दयित-पदपङ्कजं सञ्चिन्त्यो विस्रस्तकेशाभरणाः सत्यो रोदनेन सह विलेपिरे।।३२।।

उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्द्धनः।।३३।। त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते। तत्राऽनुयानं तव वीरपादयोः शुश्रूषतीनां दिश यत्र यास्यसि।।३४।। *हिरण्यकशिपुरुवाच* - एवं विलपतीनां वै परिगृह्य मृतं पतिम्। अनिच्छतीनां निर्हारमर्कोऽस्तं स न्यवर्त्तत।।३५।। तत्र ह प्रेतबन्धूनामाश्रुत्य परिदेवितम्। आह तान् बालको भूत्वा यमः स्वयमुपागतः।।३६।। *यम उवाच* - अहो अमीषां वयसाऽधिकानां विपश्यतां लोकविधिं विमोहः। यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचन्त्यपार्थम्।।३७।। अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः। अभक्ष्यमाणा अबला वृकादिभिः सरक्षिता रक्षति यो हि गर्भे ।।३८।। य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते च यः। तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं संग्रहनिग्रहे प्रभुः।।३९।। पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति। जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति।।४०।।

।। सङ्ग्रहोक्तिः ।।

स्त्रिय ऊचुः - अहो प्रभो! निर्दयेन विधिना भवान् दृगगोचरां दशां गमितोऽस्ति, उशीनराणां जीवनप्रदस्त्वमधुना शोकविवर्द्धनः कृतोऽसि।।३३।। हे महीपते! कृतज्ञेन त्वया विना वयं कथं जीवेम, अतस्त्वं यत्र यास्यसि तत्रैव हे वीर! तव पादयोः शुश्रूषतीनामस्माकं सह गमनं देहि ।।३४।। *हिरण्यकशिपुरुवाच* - एवं मृतं पतिं परिगृह्य विलपन्तीनां दाहार्थं नयनमनिच्छन्तीनां सूर्योऽस्ताचलं संन्यवर्तत।।३५।। मृतनृपतिबन्धूनां रुदनं श्रुत्वा स्वयं यमो बालको भूत्वा तान् प्रेतबन्धूनुपागतः सन्नाह।।३६।। *यम उवाच* - अहो, आश्चर्यमिदम्, मत्तो वयसाऽधिकानामपि जन्ममरणादिपरिपाटीं विपश्यतामपि अमीषां विमोहः? मनुष्यो यत्र भुवि जातस्तत्रे विलयं गतः, एतस्मिन् विषये सधर्माण इमे सर्वे मुधैव शोचन्ति।।३७।। अहो वयं न्यूनवयस्का अपि धन्यतमाः, यतः पितृभ्यां वने त्यक्ता दुर्बला वृकादिभिरभक्ष्यमाणाः सन्तो न विचिन्तयामः, कुतो यो गर्भे रक्षति स एव रक्षिष्यति हि ।।३८।। य ईश्वरः स्वेच्छयेदं जगत् सृजति, य एव रक्षति, यः स्वेन रक्षितं जगत् संहरते च, हे अबलाः! तस्येश्वरस्य चराचरमिदं जगत् क्रीडनकं वर्तते, स एव अस्य संग्रहे निग्रहे च प्रभुः ।।३९।। यथा मार्गे स्रस्तं वस्तु दैवेन रक्षितं सत्

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः। न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबद्ध्यते।।४१।। इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहम्। यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति।।४२।। यथाऽनलो दारुषु भिन्न ईयते यथाऽनिलो देहगतः पृथक् स्थितः। यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः।।४३।। सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ। यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित्।।४४।। न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः। यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः।।४५।। भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान्विभुः। भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा।।४६।। यावल्लिङ्गान्वितो ह्यात्मा तावत् कर्म निबन्धनम्। ततो विपर्ययः क्लेशो मायायोगोऽनुवर्त्तते।।४७।।

।। सङ्ग्रहोक्तिः।।

तिष्ठति, गृहे स्थितमपि दैवविहतं चेद् विनश्यति, एवं वने स्थितोऽनाथो जनस्तद्रक्षितः सन् जीवति, गृहे गुप्तोऽपि देवेनोपेक्षितश्चेन्नजीवति।।४०।। सर्वाणि भूतानि निजयोनिकर्मभिः परिपाकसमये जायन्ते, तत्कर्मक्षये नश्यन्ति च, शरीरेऽन्तर्यामितया स्थितः परमात्मा प्रकृतिगुणैर्न निबद्ध्यते, जीवो निबद्ध्यते च।।४१।। इदं शरीरं जीवस्य संचितकर्मजं जीवाद् भिन्नं, यथा गृहिणो गृहं भिन्नं तद्वत्, भौतिकं शरीरं कालकृतभूतसंयोगात् जायते, तद्वियोगान्नश्यति च।।४२।। यथाऽनलः काष्ठेषु स्थितः सन्नपि भिन्नः प्रतीयते, यथा देहे स्थितः सन्नपि वायुः पृथक् प्रतीयते, यथा वा नभः सर्वगतमपि क्वापि न सज्जते तथा सर्वगुणाश्रयो जीवो देहादेः परस्तिष्ठति।।४३।। हे मूढाः! यमनुशोचथ सोऽयं सुयज्ञस्तु शेते, इह शरीरे यः श्रोता यश्चानुवक्ता, स कर्हिचिदपि न दृश्यते ।।४४।। अत्र देहे यो मुख्यो महान् प्राणः सोऽपि न श्रोता नानुवक्ता च, यः श्रोता वक्ता च वर्तते स तु इन्द्रियवान् आत्मा, स तु प्राणदेहयोरन्योऽस्ति।।४५।। स विभुरात्मा स्वतेजसा भूतेन्द्रियमनोयुक्तान् उच्चनीचदेहान् धारयति त्यजति च।।४६।। अयमात्मा यावल्लिङ्गशरीरवान् तावदेव तस्य कर्मबन्धो भवति, ततश्च मायायोगात्मकः क्लेशोऽनुवर्तते।।४७।।

वितथाऽभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः। यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ।।४८।। अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः। नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ।।४९।। लुब्धको विपिने कश्चित्पक्षिणां निर्मितोऽन्तकः। वितत्य जालं विदधे तत्र तत्र प्रलोभनम् ।।५०।। कुलिङ्गमिथुनं तत्र विचरत्समदृश्यत। तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ।।५१।। साऽसज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता। कुलिङ्गस्तां तथाऽऽपन्नां निरीक्ष्य भृशदुःखितः। स्नेहादकल्पः कृपणः करुणं पर्यदेवयत् ।।५२।। *कुलिङ्ग उवाच* – अहो अकरुणो देवः स्त्रियाऽऽकरुणया विभुः। कृपणं माऽनुशोचन्त्या दीनया किं करिष्यति ।।५३।। कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे। दीनेन जीवता दुःखमनेन विधुरायुषा ।।५४।। कथं त्वजातपक्षांस्तान्मातृहीनान् बिभर्म्यहम्। मन्दभाग्याः प्रतीक्षन्ते नीडे मे मातरं प्रजाः ।।५५।।

।। सङ्ग्रहोक्तिः ।।

पुंसां सुखदुःखादिषु परमार्थत्वस्य दर्शनं वचनं च तत्तु मिथ्याभिनिवेशरूपं वर्तते, यथा मनोरथाश्रयः स्वाप्नः पदार्थो मिथ्या तथा सर्वोऽपि बाह्येन्द्रियगोचरोऽपि मिथ्या वर्तते ।।४८।। तस्माद् हे अबलाः! नित्यमात्मानमनित्यं देहं च तद्विज्ञाः न शोचन्ति, कुतः यस्य यो स्वभावः, सः शोचद्भिरन्यथा कर्तुं न शक्यते ।।४९।। पक्षिणां मृत्युरीश्वरेणैव निश्चितः कृतः, यथा कश्चिद् व्याधः वने जालं वितत्य पक्षिणां प्रलोभनं विदधे ।।५०।। एवं व्याधे पक्षिणः प्रलोभयति सति कुलिङ्गमिथुनं तत्र विचरत् व्याधेन ददृशे, तयोर्मध्ये कुलिङ्गी सहसा व्याधेन लोभिता ।।५१।। सा कुलिङ्गी कालवशा सती तस्मिन् जाले बद्धा बभूव, कुलिङ्गस्तामापद्गतां निरीक्ष्य भृशं दुःखितः, तां मोचयितुमसमर्थः स्नेहात् करुणः सन् विलापं चकार ।।५२।। *कुलिङ्ग उवाच* – अहो, विभुर्विधाताऽकरुणः, मां शोचन्त्याऽनुकम्प्यया मम भार्यया किं करिष्यति ।।५३।। देवो मय्यकरुणस्ततो मामपि यथेष्टं नयतु, यतो दुःखेन प्राणान् धारयता विधुरायुषाऽनेनाऽऽत्मनोऽर्द्धेन मम प्रयोजनं नास्ति ।।५४।। अजातपक्षान् मातृहीनान् तान् बालकान् कथमहं पुष्णामि, मन्दभाग्या मे प्रजाः नीडे मातरं प्रतीक्षन्ते ।।५५।।

यम उवाच – एवं कुलिङ्गं विलपन्तमारात् प्रियावियोगातुरमश्रुकण्ठम्। स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो निलीनः।।५६।। एवं यूयमपश्यन्त्य आत्माऽपायमबुद्धयः। नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि।।५७।। *हिरण्यकशिपुरुवाच* – बाल एवं प्रवदति सर्वे विस्मितचेतसः। ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम्।।५८।। यम एतदुपाख्याय तत्रैवान्तरधीयत। ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत् सांपरायिकम्।।५९।। ततः शोचत मा यूयं परं चात्मनमेव च। क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा। स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम्।।६०।। *नारद उवाच* – इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा। पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत्।।६१।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वितीयोऽध्यायः।।२।।

।। सङ्ग्रहोक्तिः ।।

यम उवाच – एवं प्रियावियोगाऽऽतुरं विलपन्तमश्रुकण्ठं कुलिङ्गं स एव शाकुनिको व्याधःसमीपे कालप्रेरितो निलीनः सन् शरेण विव्याध।।५६।। एवं स्वमृत्युमपश्यन्त्योऽतएवाऽबुद्धयो यूयं वर्षशतैः शोचन्त्योऽप्येनं पतिं न प्राप्स्यथ।।५७।। *हिरण्यकशिपुरुवाच* – इत्थं बाले वदति सति सर्वे सुयज्ञस्य सपिण्डा विस्मितचेतसः सन्तोऽपुरुषार्थत्वेन प्रतीतं सर्वं देहादिकमनित्यं मेनिरे।।५८।।स्वयं यम एतत् कथयित्वा तत्रैवाऽन्तर्दधे, ततः सुयज्ञस्य ज्ञातयस्तस्य मृतोद्देशेन कर्त्तव्यं कर्म चक्रुः।।५९।। ततो यूयमतः परं हिरण्याक्षं स्वमात्मानं च मा शोचत, तस्मादज्ञानेन विना कः परः को वा आत्मा, कः स्वीयः कः पारक्य एव वा।।६०।। *नारद उवाच* – इत्थंभूतं हिरण्यकशिपोर्वाक्यं श्रुत्वा सस्नूषा दितिः क्षणेन शोकं विहाय तत्त्वचिन्तनपरा बभूव।।६१।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः।।२।।

अथ तृतीयोऽध्यायः।।३।।

नारद उवाच - हिरण्यकशिपू राजन्नजेयमजरामरम्। आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत।।१॥ स तेपे मन्दरद्रोण्यां तपः परमदारुणम्। ऊर्द्ध्व बाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रिताऽवनिः।।२।। जटादीधितिभी रेजे संवर्त्ताऽर्क इवांशुभिः। तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे।।३॥ तस्य मूर्द्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः। तिर्यगूर्द्ध्वमधोलोकानतपद्विष्वगीरितः।।४।। चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः। निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ।।५।। तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः। धात्रे विज्ञापयामासुर्देवदेव जगत्पते। दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः।।६।। तस्य चोपशमं भूमन् विधेहि यदि मन्यसे। लोका न यावन्नङ्क्ष्यन्ति बलिहारस्तवाभिभो।।७।। तस्याऽयं किल संकल्पश्चरतो दुश्चरं तपः।

।। सङ्ग्रहोक्तिः।।

अथ तृतीयोऽध्यायः।।३।।

हिरण्यकशिपोस्तपो वरप्राप्तिश्च

नारद उवाच - हे राजन्! हिरण्यकशिपुरात्मानमजेयं जरामरणरहितमप्रतिद्वन्द्वमेकराजं साधयितुमैच्छत्।।१।। स दैत्य ऊर्ध्वबाहुर्नभोदृष्टिः सन् पादाङ्गुष्ठेन भूमिमधिष्ठाय मन्दरगिरेर्गुहायां परमदारुणं तपस्तेपे।।२।। जटानां रश्मिभिः स प्रलयकर्ता सूर्य इव रेजे, तस्मिन् तपस्तप्यमाने सति ये देवाः पूर्वं दैत्यैरलक्षिता सन्तः भुवि चेरुस्ते स्वस्वस्थानानि प्रापुः।।३।।तस्य दैत्यस्य मूर्द्ध्नः समुद्भूतस्तपोमयः सधूमोऽग्निः प्रवृद्धः सन्नधश्चोर्ध्वं समन्ततश्च लोकान् ततापः।।४।। नद्यः, समुद्राश्च, चुक्षुभुः, सद्वीपाद्रिर्भूश्चचाल, सग्रहास्तारा निपेतुः, दश दिशो जज्वलुश्च।।५।। तपोऽग्निना तप्ताः सुराः स्वर्गं त्यक्त्वा सत्यलोकं ययुः, तत्र धात्रे विज्ञापयामासुः, हे देवदेव! हे जगत्पते! दैत्येन्द्रस्य तपसा तप्ता वयं दिवि स्थातुं न शक्नुमः।।६।। हे भूमन्! यदि त्वं क्षमं मन्यसे तर्हि हे अभिभो! तव हविर्भागप्रदा लोका यावन्न नङ्क्ष्यन्ति तावत् तस्य दैत्येन्द्रस्य चापि तापोविशमनं विधेहि।।७।। हे ब्रह्मन्! दुश्चरं तपः कुर्वतस्तस्य




યમદૂતો અજામિલના સૂક્ષ્મશરીરને ખેંચે છે અને વિષ્ણુદૂતોએ બળપૂર્વક તેઓને રોકી દીધા.
છઠો સ્કન્ધ અ-૨

ચિત્રકેતુ પર શેષ ભગવાનની કૃપા




ભગવાન શેષનારાયણનાં દર્શન થતાંજ ચિત્રકેતુના બધા પાપ નષ્ટ થઈ ગયાં.
છઠો સ્કન્ધ અ-૧૬

પ્રહલાદની માતા કયાધુને ઉપદેશ આપતાં નારદજી




નારદજીએ ભાગવતધર્મનું રહસ્ય અને વિશુદ્ધજ્ઞાન,
બન્નેનો ઉપદેશ પ્રહલાદની માતાને આપ્યો.
સાતમો સ્કન્ધ અ.-૭

ભગવાન નૃસિંહ




હિરણ્યકશિપુ ગદા લઈને ભગવાનની સામે દોડયો.

સાતમો સ્કન્ધ અ. ૮



ભગવાન શ્રીહરિએ સુદર્શનચક્રથી ગ્રાહનું મસ્તક કાપી ગજેન્દ્રની રક્ષા કરી
આઠમો સ્કન્ધ અ.-૩

શંકરજીનું વિષપાન




ભગવાન શંકર હળાહળ ઝેરને હથેળીમાં લઈને પી ગયા.

આઠમો સ્કન્ધ અ-૭

મોહિની અવતાર



પોતાના હાવભાવ અને કટાક્ષથી દૈત્યોને મોહિત કરી
ભગવાન દેવતાઓને અમૃત પાય છે.
આઠમો સ્કન્ધ અ.-૮



भगवान वामन
आठमो स्कन्ध अ.-१८

श्रूयतां किं न विदितं तवाऽथाऽपि निवेदितम् ।।८।। सृष्ट्वा चराऽचरमिदं तपोयोग-समाधिना। अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ।।९।। तदहं वर्द्धमानेन तपोयोगसमाधिना। कालात्मनोश्च नित्यत्वात्साधयिष्ये तथाऽऽत्मनः ।।१०।। अन्यथेदं विधास्येऽहमयथापूर्वमोजसा। किमन्यैः कालनिर्द्धूतैः कल्पान्तैर्वैष्णवादिभिः ।।११।। इति शुश्रुम निर्बन्धं तपः परममास्थितः। विधत्स्वाऽनन्तरं युक्तं स्वयं त्रिभुवनेश्वर ।।१२।। तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते। भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ।।१३।। इति विज्ञापितो देवैर्भगवानात्मभूर्नृप। परीतो भृगुदक्षाद्यै-र्ययौ दैत्येश्वराश्रमम् ।।१४।। न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः। पिपीलिकाभि-राचीर्णमेदस्त्वङ्मांसशोणितम् ।।१५।। तपन्तं तपसा लोकान्यथा-ऽभ्रापिहितं रविम्। विलक्ष्य विस्मितः प्राह प्रहसन्हंसवाहनः ।।१६।। *ब्रह्मोवाच* - उत्तिष्ठोत्तिष्ठ भद्रं ते. तपःसिद्धोऽसि काश्यप। वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ।।१७।।

।। सङ्ग्रहोक्तिः ।।

दैत्यस्याऽयं संकल्पः किल, तत् तव न विदितः किम्? तथापि निवेद्यते त्वया श्रूयताम् ।।८।। परमेष्ठी ब्रह्मा तपोयोगसमाधिना चराचरमिदं सर्वं जगत् सृष्ट्वा इन्द्रादिसर्वस्थानेभ्यः परं सत्यलोकमध्यास्ते ।।९।। तदासनमेवाहं आत्मनो वर्द्धमानेन तपोयोगसमाधिना तद्वदेव साधयिष्ये, कालस्याऽऽत्मनश्च नित्यत्वात् बहुभिर्जन्मभिरपि साधयिष्ये ।।१०।। अहं तपोबलेनेदं जगत् अधरोत्तरं अन्यथा = सुरासुरादिव्यत्ययेनाऽयथापूर्वं विधास्ये, कालावधिभिः कालविनाश्यै-र्वैष्णवादिभिरन्यैवा किं प्रयोजनम् ।।११।। इत्येवंविधं तस्य निर्बन्धं शुश्रुम, तदर्थमेव परमं तप आस्थितः, अतः त्रिभुवनेश्वर! अत्र कर्तुं यद् युक्तं तद् आशु स्वयमेव विधत्स्व ।।१२।। हे जगत्पते! सर्वोत्कृष्टं तवाऽऽसनं द्विजगवां भवाय, उद्भवाय, श्रेयसे, सुखाय, भूत्यै, विजयाय चाऽस्ति ।।१३।। हे नृप! देवैरित्थं विज्ञापितो भगवान् ब्रह्मा भृगुदक्षाद्यैश्च परिवृतः सन् हिरण्यकशिपोस्तपःस्थानं प्रतिययौ ।।१४।। वल्मीक-तृण-कीचकैश्छन्नं तं हंसवाहनो ब्रह्मा ददर्श, ततः पिपीलिकाभिर्भक्षितमेदस्त्वक्मांसशोणितं तपोऽग्निना लोकान् तपन्तं मेघैश्छन्नं सूर्यमिव स्थितं हिरण्यकशिपुं कथंचिद् विलक्ष्य ब्रह्मा विस्मययुतः सन् प्राह ।।१५-१६।। *ब्रह्मोवाच* - हे काश्यप! उत्तिष्ठ उत्तिष्ठ, ते भद्रमस्तु, यतस्त्वं तपसा सिद्धोऽसि, अत एव

अद्राक्षमहमेतत्ते हृत्सारं महदद्भुतम्। दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते।।१८।।
नैवं पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे। निरम्बु धारयेत् प्राणान् को वै दिव्यसमाः
शतम्।।१९।। व्यवसायेन तेऽनेन दुष्करेण मनस्विभिः। तपोनिष्ठेन भवता जितोऽहं
दितिनन्दन।।२०।। ततस्त आशिषः सर्वा ददाम्यसुरपुङ्गव। मर्त्त्यस्य ते ह्यमर्त्त्यस्य
दर्शनं नाफलं मम।।२१।। *नारद उवाच* - इत्युक्त्वादिभवो देवो भक्षिताङ्गं
पिपीलिकैः। कमण्डलुजलेनौक्षद्दिव्येनामोघराधसा।।२२।। ततः कीचकवल्मीकात्
सह ओजोबलान्वितः। सर्वावयवसंपन्नो वज्रसंहननो युवा। उत्थितस्तप्तहेमाऽऽभो
विभावसुरिवैधसः।।२३।। स निरीक्ष्याऽम्बरे देवं हंसवाहमवस्थितम्। ननाम शिरसा
भूमौ तद्दर्शनमहोत्सवः।।२४।। उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम्।
हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणात्।।२५।। *दैत्येन्द्र उवाच* - कल्पान्ते काल-
सृष्टेन योऽन्धेन तमसा वृतम्। अभिव्यनग्जगदिदं स्वयंज्योतिः स्वरोचिषा।।२६।।

।। सङ्ग्रहोक्तिः ।।

वरदोऽहं त्वमनुप्राप्तोऽस्मि, ईप्सितो वरो व्रियताम्।।१७।। अहं ते एतदद्भुतं धैर्यं दृष्टवान् अस्मि, यतो दंशैर्भक्षितदेहस्य ते प्राणा अस्थिषु तिष्ठन्ति।।१८।। पूर्वर्षयो भृग्वादयोऽप्येवं तपो न चक्रुः, अपरे न करिष्यन्ति, को वै पुमान् त्यक्तोदकः सन् देवमानेन शतं समाः प्राणान् धारयेत्, न कोऽपि।।१९।। हे दितिनन्दन! मनस्विभिरपि दुष्करेण तेऽनेन तपोनिष्ठेन निश्चयेन भवताऽहं सुतरां जितोऽस्मि।।२०।। हे असुरपुङ्गव! यतोऽहं जितस्ततस्ते सर्वान् इष्टार्थान् ददामि, मर्त्त्यस्य ते ममाऽमरस्य दर्शनमफलं न भवति।।२१।। इत्युक्त्वा ब्रह्माऽमोघप्रभावेण दिव्येन कमण्डलुजलेन तमसुरं प्रोक्षितवान्।।२२।। ततः कीचकवल्मीकात् काष्ठनिचयादग्निरिव प्राणेन्द्रियदेहबलान्वितः सर्वावयवसंपन्नो वज्रवद् दृढो युवा तप्तहेमाभः सन्नुत्थितः सोऽसुर आकाशे स्थितं हंसवाहनं देवं ब्रह्माणं निरीक्ष्य तद्दर्शनमहोत्सवः सन् भूमौ शिरसा ननाम।।२३-२४।। तत उत्थाय प्राञ्जलिः प्रह्वो दृशा विभुं ब्रह्माणमीक्षमाणो हर्षाश्रुभी रोमाञ्चितः सन् गद्गदया गिरा तमस्तौषीत्।।२५।। *दैत्येन्द्र उवाच* - हे प्रभो! दैनन्दिनप्रलयान्ते कालसृष्टेन निबीडेन ध्वान्तेन व्याप्तमिदं जगत् स्वयंज्योतिर्भवान् प्रकाशयित्वाऽभिव्यक्तमकरोत्।।२६।।

आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति। रजःसत्त्वतमोधाम्ने पराय महते नमः ॥२७॥ नम आद्याय बीजाय ज्ञानविज्ञानमूर्त्तये। प्राणेन्द्रियमनोबुद्धिविकारै-र्व्यक्तिमीयुषे ॥२८॥ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम्। चित्तस्य चित्तेर्मनइन्द्रियाणां पतिर्महान् भूतगुणाशयेशः ॥२९॥ त्वं सप्ततन्तून् वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च। त्वमेक आत्मात्मवतामनादिरनन्तपारः कविरन्तरात्मा ॥३०॥ त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि। कुटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥३१॥ त्वत्तः परं नाऽपरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति। विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥३२॥ व्यक्तं विभो स्थूलमिदं शरीरं येनेन्द्रियप्राण-मनोगुणांस्त्वम्। भुङ्क्ष्वे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ॥३३॥

॥ सङ्ग्रहोक्तिः ॥

यः शक्तित्रयवता स्वेनैवेदं विश्वं सृजति रक्षति हरति च, रजःसत्त्वतमोधाम्ने पराय महते तुभ्यं नमः ॥२७॥ आद्याय कारणकारणाय ज्ञानविज्ञानमूर्त्तये प्राणेन्द्रियमनोविकारैः कार्यरूपतां प्राप्तवते तुभ्यं नमः ॥२८॥ त्वं स्थावरस्य जंगमस्य च नियंता भवसि, मुख्येन प्राणेनोपलक्षितस्त्वमेव प्रजानां पतिरसि, चित्तस्य बुद्धेः मनस इन्द्रियाणां च पतिरसि, अत एव भूतगुणाशयानामपि पतिस्त्वमेवाऽसि ॥२९॥ हे ब्रह्मन्! वेदत्रयेणाऽग्निष्टोमादियज्ञान् वितनोषि, त्वं योगिनां योगात्मकज्ञानप्रवर्तकोऽसि, त्वमेकोऽनादिरनन्तपारः कविरन्तरात्मा चाप्यसि ॥३०॥ त्वं सदा जागरुकः कालो लवाद्यवयवैर्जनानामायुः क्षिणोषि, त्वं निर्विकार, परमात्मा, परमेष्ठी, अजोऽपरिच्छिन्नो जीवलोकस्य जीवयिताऽऽत्माऽपि त्वमेवाऽसि ॥३१॥ किं बहुना स्थावरं जङ्गमं च यत् किञ्चिदस्ति तत् त्वत्तः परं तुल्यं च नास्ति तथा त्वद्व्यतिरिक्तमपि नास्ति, सर्वे वेदा उपवेदाश्च ते तनवः सन्ति, हिरण्यगर्भस्त्वं स्वरूपेण गुणैश्च बृहत्त्ववान् त्रिलोकात् बहिर्भूतोऽसि ॥३२॥ हे विभो! चिदचिदात्मकं जगदिदं तव स्थूलशरीरमस्ति, अव्यक्त आत्मा पुराणः पुरुषस्त्वं पारमेष्ठ्ये पदे स्थितः सन् -

अनन्ताव्यक्तरूपेण येनेदमखिलं ततम्। चिदचिच्छक्तिरूपाय तस्मै भगवते नमः।।३४।। यदि दास्यस्यभिमतान् वरान् मे वरदोत्तम। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो।।३५।। नाऽन्तर्बहिर्दिवानक्तमन्यस्मादपि चायुधैः। न भूमौ नाऽम्बरे मृत्युर्न नरैर्न मृगैरपि।।३६।। व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः। अप्रतिद्वन्द्वतां युद्धे ऐकपत्यं च देहिनाम्।।३७।। सर्वेषां लोकपालानां महिमानं तथाऽऽत्मनः। तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित्।।३८।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे तृतीयोऽध्यायः।।३।।

अथ चतुर्थोऽध्यायः।।४।।

नारद उवाच – एवं वृतः शतधृतिर्हिरण्यकशिपोरथ। प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान्।।१।।

।। सङ्ग्रहोक्तिः ।।

इन्द्रियप्राणमनोगुणान् भुङ्क्षे।।३३।। येन त्वयाऽनन्ताव्यक्तरूपेणाऽखिलमिदं जगद् व्याप्तमस्ति, चिदचिच्छक्तिरूपाय तस्मै भगवते तुभ्यं नमः।।३४।। हे वरदोत्तम! त्वं यदि मेऽभिमतान् वरान् दास्यसि, तर्हि हे प्रभो! त्वत्सृष्टेभ्यो भूतेभ्यो मे मृत्युर्मा भूत्।।३५।।अन्तः बहिः, दिवा, नक्तं अन्यस्मादायुधैरपि मे मृत्युर्मा भूत्, भूमावम्बरे नरैर्मृगैरपि मम मरणं मा भूत्।।३६।। अप्राणैः प्राणवद्भिः सुरासुरमहोरगैरपि मम मृत्युर्मा भूत्, युद्धेऽप्रतिद्वन्द्वत्वं देहि, प्रजानामेकाधिपत्यं च देहि।।३७।। सर्वेषां लोकपालानामिन्द्रादीनां महिमानं देहि, तपोयोगप्रभावाणामैश्वर्यमखण्डं मां देहि, तव चैकपत्यमपि देहि।।३८।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः।।३।।

अथ चतुर्थोऽध्यायः ।।४।।

हिरण्यकशिपोः प्राप्तवरदर्पाद् विष्णुद्वेषः

नारद उवाच – एवं याचितो ब्रह्मा हिरण्यकशिपोः तपसा प्रीतः सन् सुदुर्लभानपि वरान्

ब्रह्मोवाच - तातेमे दुर्लभाः पुंसां यान् वृणीषे वरान् मम। तथापि वितराम्यङ्ग वरान् यदपि दुर्लभान्।।२।। *नारद उवाच* - ततो जगाम भगवानमोघाऽनुग्रहो विभुः। पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः।।३।। एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः। भगवत्यकरोद् द्वेषं भ्रातुर्वधमनुस्मरन्।।४॥ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः। देवासुरमनुष्येन्द्रान् गन्धर्वगरुडोरगान्।।५।। सिद्धचारणविद्याध्रा-नृषीन् पितृपतीन् मनून्। यक्षरक्षःपिशाचेशान् प्रेतभूतपतीनथ।।६।। सर्वसत्त्वपतीन् जित्वा वशमानीय विश्वजित्। जहार लोकपालानां स्थानानि सह तेजसा।।७।। देवोद्यानं श्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम्। महेन्द्रभवनं साक्षान्निर्मितं विश्व-कर्मणा। त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत्।।८।। यत्र विद्रुमसोपाना महा-मारकता भुवः। यत्र स्फटिककुड्यानि वैदूर्यस्तम्भपङ्क्तयः।।९।। यत्र चित्रविता-नानि पद्मरागासनानि च। पयःफेनिनिभाः शय्या मुक्तादामपरिच्छदाः।।१०।।

।। सङ्ग्रहोक्तिः।।

कात्स्न्येन प्रादात्।।१।। *ब्रह्मोवाच* - हे तात! मत्तो यान् वरान् वृणीषे, त इमे वराः पुंसां यद्यपि दुर्लभाः सन्ति तथापि तान् वरान् तुभ्यं ददामि।।२।। *नारद उवाच* - सत्याऽनुग्रहो विभुर्ब्रह्मा-ऽसुरवर्येण पूजितः प्रजेश्वरैश्च स्तूयमानः सन् ततः स्वस्थानं जगाम।।३।। एवं लब्धवरो हेममयं वपुर्बिभ्रद् दैत्यो हिरण्यकशिपुः हिरण्याक्षवधमनुस्मरन् सन् भगवति नारायणे द्वेषमकरोत्।।४।।महासुरः स सर्वा दिशस्त्रीन् लोकान् देवासुरमनुष्येन्द्रान् गन्धर्व-गरुड-उरगान् विजित्य, सिद्ध-चारण-विद्याधर-ऋषीन्, पितृपतीन्, मनून्, यक्षान्, रक्षांसि, पिशाचेशान्, प्रेत-भूत-पतीन्, सर्वसत्त्वपतींश्च जित्वा, सर्वान् वशमानीय विश्वजिद् भूत्वा, तेजसा सह लोकपालानां स्थानानि जहार।।५-७।। स देवोद्यानं जहार, सर्वसमृद्ध्या युक्तं स्वर्गमध्यास्ते स्म, तत्र च विश्वकर्मणा निर्मितं त्रैलोक्यसमृद्ध्या आश्रयं महेन्द्रभवनं साक्षात् स्वयमध्युवास।।८।। यत्र महेन्द्रभवने विद्रुमसोपाना महामारकता भुवः सन्ति, यत्र स्फटिकमणिमय्या भित्तयो वैदुर्यस्तम्भपङ्क्तयश्च सन्ति।।९।। यत्र नानाविधचित्रवन्ति वितानानि सन्ति, पद्मराग मयान्यासनानि, पयः फेननिभा मुक्तादामपरिच्छदाः शय्याः सन्ति।।१०।।

कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्य इतस्ततः। रत्नस्थलीषु पश्यन्ति सुदतीः सुन्दरं मुखम्।।११।। तस्मिन् महेन्द्रभवने महाबलो महामना निर्जितलोक एकराट्। रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः।।१२।। तमङ्ग मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः। उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम्।।१३।। जगुर्महेन्द्रासनमोजसा स्थितं विश्वावसुस्तुम्बरुरस्मदादयः। गन्धर्वसिद्धा ऋषयोऽस्तुवन् मुहुर्विद्याधरा अप्सरसश्च पाण्डव ।।१४।। स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः। इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा।।१५।। अकृष्टपच्या तस्याऽऽसीत्सप्तद्वीपवती मही। तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः।।१६।। रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः। क्षारसीधुघृतक्षौद्रदधिक्षीराऽमृतोदकाः।।१७।।शैला द्रोणीभिराक्रीडान् सर्वर्त्तुषु गुणान् द्रुमाः। दधार लोकपालानामेक एव पृथग्गुणान्।।१८।।

।। सङ्ग्रहोक्तिः।।

यत्र देव्यः सुदत्यः स्त्रियः कूजद्भिर्नूपुरैः शब्दं कुर्वन्त्यः सत्यो रत्नस्थलीषु सुन्दरं मुखं पश्यन्ति।।११।। महाबली निर्जितलोक एकराट् चण्डशासनो प्रतापितैः सुरादिभिरभिवन्द्यचरणयुगः सन् हिरण्यकशिपुः महेन्द्रभवने रेमे।।१२।। हे युधिष्ठिर! सुगन्धिना मद्येन मत्तं विवृत्तताम्राक्षं तपो-योग-बल-ओजसां पदं तं ब्रह्मविष्णुशिवैर्विना सर्वे लोकपाला उपायनपाणिभिरुपासत।।१३।। हे पाण्डव! स्वबलेन महेन्द्रासनमधिष्ठितं तं हिरण्यकशिपुं विश्वावसुः, तुम्बरुः अस्मदादयः सर्वे तद्गुणगानं चक्रुः, गन्धर्वसिद्धाः ऋषयो विद्याधरा अप्सरसश्च मुहुस्तमस्तुवन्।।१४।। स एव वर्णाश्रमिभिः भूरिदक्षिणैः क्रतुभिरिज्यमानः सन् स्वतेजसा हविर्भागान् अग्रहीत्।।१५।।तस्य सप्तद्वीपवती मह्यकृष्टपच्याऽऽसीत्, द्यौः कामदुघा आसीत्, नभो नानाश्चर्यपदमभूत्।।१६।।रत्नाकराः समुद्रास्तरङ्गैः रत्नसमूहान् ऊहुः, तत्पत्न्यो नद्योऽपि क्षारेक्षुरस-घृत-क्षौद्र-दधि-क्षीरा-ऽमृतोदकरत्नवहा आसन्।।१७।। पर्वता दोणीभिराक्रीडान् दधुः, द्रुमाः सर्वेषु ऋतुषु पुष्पफलादीन् दधुः, सर्वलोकपालानां पृथक् पृथक् गुणान् एक एव दधार।।१८।।

स इत्थं निर्जितककुबेकराड् विषयान् प्रियान्। यथोपजोषं भुञ्जानो नाऽतृप्यद-जितेन्द्रियः।।१९।। एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्त्तिनः। कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः ।।२०।। तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः। अन्यत्राऽ-लब्धशरणाः शरणं ययुरच्युतम्।।२१।। तस्यै नमोऽस्तु काष्ठायै यत्राऽऽत्मा हरिरीश्वरः। यद्गत्वा न निवर्त्तन्ते शान्ताः संन्यासिनोऽमलाः।।२२।। इति ते संयतात्मानः समाहितधियोऽमलाः। उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ।।२३।। ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने। विशुद्धानुभवाऽऽनन्दसंदोहाय यतोऽभयम्।।२४।। तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना। संनादयन्ती ककुभः साधूनामभयंकरी ।।२५।। *हरिरुवाच* - माभैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः। मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये।।२६।। ज्ञातं मे तस्य दौरात्म्यं दैतेयाऽपसदस्य यत्। तस्य शान्तिं करिष्यामि कालं तावत् प्रतीक्षत।।२७।।

।। सङ्ग्रहोक्तिः ।।

दिग्विजय्येकराट् सन् यथेष्टं प्रियान् विषयान् भुञ्जानोऽप्यजितेन्द्रियो स विषयैर्नाऽतृप्यत् ।।१९।।ऐश्वर्यमत्तस्य दृप्तस्योन्मार्गगामिनो कुमारशप्तस्य तस्य महान् कालो व्यतीयाय।।२०।। तस्योग्रदण्डेन भीताः सपालकाः सर्वे लोका अन्यत्राऽलब्धशरणाः सन्तो नारायणं शरणं ययुः।।२१।। यस्यां दिशि सर्वनियन्ता सर्वान्तर्यामी श्रीहरिर्भगवान् आस्ते, यां काष्ठां प्राप्ताः शान्ताः शुद्धान्तःकरणाः संन्यासिनो योगिनो न पुनः संसरन्ति तस्यै दिशे नमोऽस्तु।।२२।। इत्थं दृढविश्वस्ताः समाहितधियो विनिद्रा वायुभोजनाः शूद्धान्तःकरणास्ते हृषीकेशं श्रीहरिं तुष्टुवुः।।२३।।षाड्गुण्यपूर्णाय, सर्वान्तरात्मने, महात्मने, विशुद्धानन्दानुभवसन्दोहाय, निर्भय समाश्रयाय तस्मै ते नमः।।२४।। प्रार्थनां कुर्वतां देवानां सुखाय वाणी प्रादुरभूत्, या वाणी अदृष्टवक्तृका मेघनिःस्वना दिशः संनादयन्ती साधूनामभयंकरी आसीत्।।२५।। *हरिरुवाच* - हे विबुधश्रेष्ठाः! यूयं मा भैष्ट, सर्वेषां वो भद्रमस्तु, यतो मद्दर्शनं भूतानां सकलश्रेयः सम्प्राप्तये भवति।।२६।।दैत्याधमस्य तस्य हिरण्यकशिपोर्दौरात्म्यं मया ज्ञातम्, तस्याहं वधं करिष्यामि, कंचित् कालं प्रतीक्षत।।२७।।

यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु। धर्मे मयि च विद्वेषः स वा आशु विनश्यति ।।२८।। निर्वैराय प्रशान्ताय स्वसुताय महात्मने। प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ।।२९।। *नारद उवाच* - इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः न्यवर्त्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ।।३०।। तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः। प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ।।३१।। ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेन्द्रियः। आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ।।३२।। दासवत्संनतार्याङ्घ्रिः पितृवद्दीनवत्सलः। भ्रातृवत्सदृशस्निग्धो गुरुष्वीश्वरभावनः। विद्यार्थरूपजन्माऽऽढ्यो मानस्तम्भविवर्जितः ।।३३।। नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक्। दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहिताऽऽसुरोऽसुरः ।।३४।। यस्मिन् महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः। न तेऽधुनाऽपिधीयन्ते यथा भगवतीश्वरे ।।३५।।

।। सङ्ग्रहोक्तिः ।।

देव-वेद-गो-विप्र-साधु-धर्मेषु-मयि चेत्येतेषु यदा तस्य विद्वेषो भविष्यति तदा स दैत्य आशु विनङ्क्ष्यति ।।२८।। यदा स महात्मने निर्वैराय प्रशान्ताय स्वसुताय प्रह्लादाय द्रोहं करिष्यति तदा ब्रह्मवरेणोत्कटप्रतापमप्याश्वेव हनिष्यामि ।।२९।। *नारद उवाच* - इत्थं लोकगुरुणा श्रीहरिणा कथिता देवा एवं कथयन्तं भगवन्तं प्रणम्य गतोद्वेगभयाः सन्तः न्यवर्तन्त, तथा असुरं हतं मेनिरे ।।३०।। तस्य दैत्यपतेः परमाद्भुताश्चत्वारः पुत्रा आसन्, तेषां मध्ये प्रह्लादो गुणैर्महान्, भागवतानामुपासकश्चाऽऽसीत् ।।३१।। स ब्राह्मणभक्तः शीलसंपन्नः सत्यप्रतिज्ञो जितेन्द्रियः सर्वभूतान्यात्मतुल्यदृष्ट्या पश्यन्, सर्वभूतसुहृत्तमश्चाऽऽसीत् ।।३२।। महतां चरणेषु दासवन्नमनशीलः, पितृवत् दीनेषु वत्सलः, स्वतुल्येषु भ्रातृवत् स्निग्धः, गुरुष्वीश्वरभावनाशील आसीत्, विद्या-धन-रूप-जन्मभिः समृद्धोऽपि स मानस्तम्भाभ्यां रहितोऽभवत् ।।३३।। दुःखेषु सत्स्वपि प्रसन्नमनाः, दृष्टश्रुतविषयेषु निःस्पृहः, तेष्वनित्यताबुद्धिः, इन्द्रियप्राणशरीरधियां दमयिता, सदा प्रशान्तः, स्वयमसुरः सन्नप्यासुरभाववर्जितो बभूव ।।३४।। हे राजन्! यस्मिन् प्रह्लादे ये महान्तो गुणाः कविभिरतिशयेन मन्यन्ते ते गुणाः भगवति यथार्थत्वेनाऽधुनापि -

यं साधुगाथासदसि रिपवोऽपि सुरा नृप। प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ॥३६॥ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते। वासुदेवे भगवति यस्य नैसर्गिकी रतिः॥३७॥ न्यस्तक्रीडनको बालो जडवत्तन्मनस्कया। कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम्॥३८॥ आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन्। नानुसंधत्त एतानि गोविन्दपरिरम्भितः॥३९॥ क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः। क्वचिद्धसति तच्चिन्ताऽऽह्लाद उद्गायति क्वचित् ॥४०॥ नदति क्वचिदुत्कण्ठो निर्लज्जो नृत्यति क्वचित्। क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥४१॥ क्वचिदुत्पुलकस्तुष्णीमास्ते संस्पर्शनिर्वृतः। अस्यन्दप्रणयाऽऽनन्दसलिला-मीलितेक्षणः ॥४२॥ स उत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिंचनसङ्गलब्धया। तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनस्य मनः शमं व्यधात्॥४३॥ तस्मिन् महाभागवते महाभागे महात्मनि।

॥ सङ्ग्रहोक्तिः॥

तिरोहिता न भवन्ति॥३५॥ हे नृप! सत्पुरुषवार्ताप्रमुखायां सभायां शत्रवोऽपि सुरा यं प्रह्लादं दृष्टान्तत्वेन स्वीकुर्वन्ति स्म॥३६॥ तस्याऽसंख्येयैर्गुणैरलम् कियत् कथयामि, यस्य प्रह्लादस्य भगवति वासुदेवे स्वाभाविकी प्रीतिरभवत्॥३७॥ बाल्यत एवाऽन्यानि क्रीडनकानि त्यक्त्वा स प्रह्लादः कृष्णस्वरूपे दृढासक्त्या भगवदेकचित्तत्वेन जडवत् जगत् ईदृशं वर्तत इति न वेद॥३८॥ गोविन्दस्वरूपानुसन्धानरतः स आसीनः पर्यटन्, अश्नन्, शयानः, प्रपिबन्, ब्रुवन् इत्येतानि कुर्वन्नपि तानि नाऽनुसंधत्ते॥३९॥ वैकुण्ठचिन्ताविह्वलचेतनः स क्वचिद् रोदीति, क्वचिद् हसति, तच्चिन्तनानन्दः सन् क्वचित् गायति॥४०॥ क्वचित् तच्चिन्तनाह्लादः सन् नन्दति, क्वचित् निर्लज्जो भूत्वा नृत्यति, क्वचित्तद्भावनायुक्तः स्वं तदपृथक्त्वेन पश्यन् तच्चेष्टादिकं चकार॥४१॥ क्वचित् ध्यानप्राप्त भगवत्स्पर्शसुखितोऽत एव रोमाञ्चितगात्रः सन् सस्नेहानन्दबाष्पेण ईषन्मीलितेक्षणः तूष्णीमास्ते॥४२॥ सः प्रह्लादः निष्किञ्चनानां सत्संगप्राप्तया भगवच्चरणारविन्दसेवया स्वस्य परां शान्तिमनुभवन् सन् अन्यस्य दुःसंगदीनस्य मनसः शान्तिं व्यधात्॥४३॥

हिरण्यकशिपू राजन्नकरोदघमात्मजे ।।४४।। *युधिष्ठिर उवाच* – देवर्ष एतदिच्छामो वेदितुं तव सुव्रत। यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ।।४५।। पुत्रान्विप्रतिकूलान् स्वान् पितरः पुत्रवत्सलाः। उपालभन्ते शिक्षार्थं नैवाऽघमपरो यथा। किमुतानुवशान् साधूंस्तादृशान् गुरुदेवतान् ।।४६।। एतत् कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो। पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ।।४७।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्थोऽध्यायः ।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

नारद उवाच – पौरोहित्याय भगवान् वृतः काव्यः किलाऽसुरैः। शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ।।१।। तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम्। पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ।।२।।

।। सङ्ग्रहोक्तिः ।।

हे राजन्! उक्तविधगुणवति महाभागवते महाभागे महात्मनि प्रह्लाद आत्मजे हिरण्यकशिपुर्द्रोहमकरोत् ।।४४।। *युधिष्ठिर उवाच* – हे देवर्षे! एतत् त्वत्तो वेदितुमिच्छामः, हे सुव्रत! शुद्धाय निरपराधाय साधव आत्मजाय स्वयं पितैव द्रोहं चक्रे ।।४५।। पुत्रवत्सलाः पितरो विप्रतिकूलानपि स्वान् पुत्रान् शिक्षार्थमुपालभन्ते, किन्तु शत्रुवद् द्रोहं यदा नैव कुर्वन्ति, तदाऽनुकूलान् साधून् गुरुदेवतान् तान् किमुत? ।।४६।। हे प्रभो! पुत्रमुद्दिश्य पित्रा पुत्रस्य मरणाय प्रयोजितः द्वेषः पितुर्मरणाय जातः, हे ब्रह्मन्! एतदस्माकं कौतुहलमपाकुरु ।।४७।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः ।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

विष्णुस्तुतौ रतस्य प्रह्लादस्य वधायोद्योगः

नारद उवाच – भगवान् शुक्रः पुरोहितकर्मकर्तुमसुरैर्वृत आसीत्, तस्य सुतौ शण्डामर्कौ दैत्यराजस्य गृहान्तिक आस्ताम् ।।१।। तौ राज्ञा राजनीतिपठनार्थं प्रापितं बालं नयकोविदं

यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनु पपाठ च। न साधु मनसो मेने स्वपरासद्ग्रहाश्रयम्
।।३।। एकदाऽसुरराट् पुत्रमङ्कमारोप्य पाण्डव। पप्रच्छ कथ्यतां वत्स मन्यते
साधु यद्भवान्।।४।। *प्रह्लाद उवाच* – तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्न-
धियामसद्ग्रहात्। हित्वाऽऽत्मपातं गृहमन्धकूपं वनं गतो यद्धरिमाश्रयेत।।५।।
नारद उवाच – श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः। जहास बुद्धिर्बालानां
भिद्यते परबुद्धिभिः।।६।। सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः। विष्णुपक्षैः
प्रतिच्छन्नैर्न भिद्येताऽस्य धीर्यथा।।७।। गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः।
प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः।।८।। *गुरव ऊचुः* – वत्स प्रह्लाद भद्रं
ते सत्यं कथय मा मृषा। बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः।।९।। बुद्धिभेदः
परकृत उताहो ते स्वतोऽभवत्। भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन।।१०।।

।। सङ्ग्रहोक्तिः।।

प्रह्लादं पाठ्यानन्यांश्चाऽसुरबालकान् पठयामासतुः।।२।। तत्र प्रह्लादो गुरुणा प्रोक्तं यत् तत् श्रुतवान्, तदनुपठितवांश्च, परंतु गुरुभ्यां शिक्षितं स्वपरभेददर्शकमसदाग्रहं स मनसा साधु न मेने।।३।। हे पाण्डव! असुरराट् हिरण्यकशिपुरेकदा पुत्रं प्रह्लादमङ्क आरोप्य पप्रच्छ, वत्स! भवान् यत् साधु मन्यते तत् कथ्यताम्।।४।। *प्रह्लाद उवाच* – हे असुरवर्य! देहात्माभिमानाद्य-सदाग्रहात् समुद्विग्नचित्तानां देहिनां आत्मनोऽधःपतनहेतुभूतमन्धकूपतुल्यं गृहं हित्वा वनं प्रविष्टः सन् हरिमाश्रयेत, तदेवाऽहं साधुमन्ये।।५।। *नारद उवाच* – परपक्षे विष्णौ परिनिष्ठिताः पुत्रस्य गिरः श्रुत्वा दैत्यो हिरण्यकशिपुर्जहास, बालानां बुद्धिः शत्रुपक्षमतिमद्भिर्विद्यते।।६।। गुरुगृहे वेषान्तरेण छन्नैर्विष्णुपक्षैर्ब्राह्मणैरयं बालो विपरीतबुद्धिः क्रियते, अतोऽस्य बुद्धिर्यथा न भिद्येत तथा सम्यग् विधार्यताम्।।७।। तत दैत्यपुरोहिताः स्वगृहमानीतं प्रह्लादमाहूय श्लक्ष्णया वाचा प्रशस्य सामोक्तिभिः समपृच्छन्त।।८।। *गुरव ऊचुः* – हे वत्स! हे प्रह्लाद! ते भद्रमस्तु, सत्यं कथय, मा मृषा, सर्वबालानतिक्रम्य तव एष बुद्धिविपर्यय कुतोऽभूत्।।९।। तव एष बुद्धिभेदः परकृतः, आहोस्वित् स्वत एवाऽभवत्, हे कुलनन्दन! श्रोतुकामानां गुरुणां पुरः कथ्यताम्।।१०।।

प्रह्लाद उवाच – परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः। विमोहितधियां दृष्टस्तस्मै भगवते नमः।।११।। स यदाऽनुव्रतः पुंसां पशुबुद्धिर्विभिद्यते। अन्य एष तथाऽन्योऽहमिति भेदगताऽसती।।१२।। स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरन्वयानुक्रमणो निरूप्यते। मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ।।१३।। यथा भ्राम्यत्यतो ब्रह्मन् स्वयमाकर्षसंनिधौ। तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया।।१४।। *नारद उवाच* – एतावद् ब्राह्मणानुक्त्वा विरराम महामतिः। तं निर्भर्त्स्याथ कुपितः स दीनो राजसेवकः।।१५।। *गुरुरुवाच* – आनीयतामरे वेत्रमस्माकमयशस्कृतः। कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः।।१६।। दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ।।१७।। *नारद उवाच* – इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः। प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम्।।१८।।

।। सङ्ग्रहोक्तिः ।।

प्रह्लाद उवाच – यस्य मायया पुंसामयं स्वकीयः, अयं परकीयः, इति देहात्मभ्रमः समुत्पन्नः, स मोहितधियां भवतां मध्ये दृष्टः, न मम, तस्मा अचिन्त्यमायेश्वराय भगवते नमः।।११।। स भगवान् यदा पुंभिराश्रितः स्यात्, तदा पशुबुद्धिर्निरस्यते, या "एष अन्यः" तथा "अहमन्यः" इति भेदप्राप्ता बुद्धिरसती कथ्यते।।१२।। एष परमात्मा "स्वकीयः परकीयः" इति बुद्धिहीनैर्निरूप्यते, अन्यैरशक्यं स लीलयैव करोति, यस्य स्वरूपविमर्शमार्गे ब्रह्मादयोऽपि मुह्यन्ति, स परमात्मा मे मतिं भिनत्ति।।१३।। यथाऽयस्कान्तस्य सन्निधौ लोहं स्वयमेव भ्राम्यति, हे ब्रह्मन्! तथा चक्रपाणेः सन्निधौ मे चेतो यदृच्छया भिद्यते।।१४।। *नारद उवाच* – दैत्यपुरोहितान् एतावद् उक्त्वा महामतिः प्रह्लाद तूष्णीं बभूव, ततो दीनः स राजसेवकस्तं प्रह्लादं निर्भर्त्स्य कुपितः सन्नुवाच।।१५।। *गुरुरुवाच* – अरे हे राजभट! वैत्रमानीयताम्, अस्माकमपकीर्त्तिकरस्य कुलाङ्गारस्य दुर्बुद्धेः प्रह्लादस्य कृते तु दण्ड एव योग्य उदितः।।१६।। दैतेयचन्दनवनेऽयं कण्टकतरुर्जातः, दैत्यमूलोच्छेदनपरस्य विष्णुरूपपरशोरयं बालो नालायितः= हस्तायितः (हाथो) जातः।।१७।। नारद उवाच – इत्थं वदन् –

तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम्। दैत्येन्द्रं दर्शयामास मातृमृष्टमलंकृतम् ॥१९॥ पादयोः पतितं बालं प्रतिनन्द्याशिषाऽसुरः परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥२०॥ आरोप्याङ्कमवघ्राय मूर्द्धन्यश्रुकलाम्बुभिः। आसिञ्चन् विकसद्वक्त्र इदमाहासुरः सुतम् ॥२१॥ *हिरण्यकशिपुरुवाच* – प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमम्। कालेनैतावताऽऽयुष्मन्यदशिक्षद्गुरोर्भवान् ॥२२॥ *प्रह्लाद उवाच* – *श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥२३॥* इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥२४॥ *नारद उवाच* – निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा। गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥२५॥ *दैत्यराज उवाच* – ब्रह्मबन्धो किमेतत्ते विपक्षं श्रयताऽसता। असारं ग्राहितो बालो मामनादृत्य दुर्मते ॥२६॥ सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः। तेषामुदेत्यघं काले रोगः पातकिनामिव ॥२७॥

॥ सङ्ग्रहोक्तिः॥

तर्जनादिभिर्विविधैरुपायैर्भीषयन् तं प्रह्लादं त्रिवर्गस्य प्रतिपादकं शास्त्रं ग्राहयामास ॥१८॥ ततो गुरुरेनं सामाद्युपायचतुष्टये शिक्षितं ज्ञात्वा मात्रा स्नापितमलकृतं च विधाप्य हिरण्यकशिपुं दर्शयामास ॥१९॥ ततोऽसुरः पादयोः पतितं बालं प्रह्लादमाशिषा प्रतिनन्द्य, दोर्भ्यां चिरं परिष्वज्य परमां निर्वृतिमाप ॥२०॥ तत उत्सङ्गमारोप्य, मूर्द्धन्यवघ्राय, हर्षाश्रुबिन्दुभिरासिञ्चन् प्रसन्नमुखोऽसुरः सुतमिदमाह ॥२१॥ *हिरण्यकशिपुरुवाच* – हे आयुष्मन्! प्रह्लाद! एतावता कालेन गुरोः सकाशाद् भवान् यद् अशिक्षत्, तन्मध्ये किञ्चित् उत्तमं स्वधीतं, तदनूच्यताम् ॥२२॥ *प्रह्लाद उवाच* – विष्णोः श्रवणं, कीर्तनं, स्मरणं, पादसेवनं, अर्चनं, वन्दनं, दास्यं, सख्यं, आत्मनिवेदनम् चेति नवविधाभक्तिर्येन पुंसा भगवति विष्णावर्पिता सती साक्षात् क्रियते चेत्, तद् उत्तममधीतं मन्ये ॥२३-२४॥ *नारद उवाच* – एवंविधं सुतवचो निशम्य तदा हिरण्यकशिपुः क्रोधेन प्रस्फुरिताधरः सन् गुरुपुत्रं प्रति वक्ष्यमाणं वच उवाच ॥२५॥ *दैत्यराज उवाच* – हे ब्रह्मबन्धो! हे दुर्मते! मामनादृत्य बालोऽयं मच्छत्रुपक्षं श्रयताऽहितकारिणा त्वयाऽसारं ग्राहितः किम्? ॥२६॥ लोके दुर्मैत्राश्छद्मवेषिणोऽसाधवः सन्ति हि, पातकिनां

गुरुपुत्र उवाच – न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो। नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः।।२८।। *नारद उवाच* – गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम्। नो चेद्गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः।।२९।। *प्रह्लाद उवाच* – मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम्। अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानाम्।।३०।। न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः। अन्धा यथाऽन्धैरुपनीयमाना वागीशतन्त्यामुरुदाम्निबद्धाः।।३१।। नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः। महीयसां पादरजोऽभिषेकं निष्किंचनानां न वृणीत यावत्।।३२।। *नारद उवाच* – इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा। अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले।।३३।। आहामर्षरुषाऽऽविष्टः कषायीभूतलोचनः।

।। सङ्ग्रहोक्तिः ।।

कुष्ठादिरोग इव तेषां पापं काले प्रकटीभवति।।२७।। *गुरुपुत्र उवाच* – हे इन्द्रशत्रो! एष तव सुतो मया पाठितं न वदति, अन्येन पाठितं च न वदति, हे राजन्! अस्य त्वत्पुत्रस्य मतिर्नैसर्गिकी हि भवति, अतोऽस्मदुपरि जातं क्रोधं नियच्छ, अस्मभ्यं कुत्सितं दोषं मा स्म दाः।।२८।। *नारद उवाच* – गुरुणैवं प्रत्युक्तो हिरण्यकशिपुर्भूयः सुतमाह – हे अभद्र! तवेयं मतिर्यदि गुरूपदेशजाता न चेत्तर्हि एवमसती कुतः?।।२९।। *प्रह्लाद उवाच* – अजितैरिन्द्रियैर्निरयरूपं संसारं विशतां पूर्वं पूर्वं भुक्तानां विषयाणां तृष्णया भूयो भूयो भुञ्जानानां भवादृशानां गृहव्रतानां स्वतः परतोऽन्योन्यस्माद् वा कृष्णे भक्तिरूपा मतिर्न संपद्येत।।३०।। शब्दादिविषयेषु पुरुषार्थमानिनो दुराशया ये ग्रहव्रताः सन्ति तेऽन्धैर्नीयमाना अन्धाः पन्थानं यथा न विदुः, तथा वेदलक्षणायां दृढरज्ज्वां बद्धाः पुरुषाः स्वार्थगतिं परमपुरुषार्थरूपं विष्णुं परमेश्वरं न विदुः।।३१।। विषयासक्तानां मतिर्भगवच्चरणकमलं न स्पृशति, निष्किञ्चनानां परमभागवतानां पादरजःसेवां यावन्न कुर्यात् तावदनर्थापगमो न स्यात्।।३२।। *नारद उवाच* – इत्थमुक्त्वा तूष्णीमासीनं पुत्रं क्रोधेन विवेकशून्यो जातो हिरण्यकशिपुः स्वोत्सङ्गात् महीतले चिक्षेप।।३३।। सामर्षरुषा व्याप्त कषायीभूतलोचनः स हे नैर्ऋताः! इत एनं बहिर्गमयत,

वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः॥३४॥ अयं मे भ्रातृहा सोऽयं हित्वा स्वान् सुहृदोऽधमः। पितृव्यहन्तुर्यः पादौ विष्णोर्दासवदर्चति॥३५॥ विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः। सौहृदं दुस्त्यजं पित्रोरहाद् यः पञ्चहायनः ॥३६॥ परोऽप्यपत्यं हितकृद्यथौषधं स्वदेहजोऽप्यामयवत्सुतोऽहितः। छिन्द्यात्तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात्॥३७॥ सर्वैरुपायैर्हन्तव्यः संभोजशयनासनैः। सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम्॥३८॥ *नारद उवाच* – नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः। तिग्मदंष्ट्राः करालास्यास्ताम्रश्मश्रुशिरोरुहाः॥३९॥ नदन्तो भैरवान्नादांश्छिन्धि भिन्धीति वादिनः। आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु॥४०॥ परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः॥४१॥ प्रयासेऽपहते तस्मिन् दैत्येन्द्रः परिशङ्कितः। चकार तद्वधोपायान्निर्बन्धेन युधिष्ठिर॥४२॥ दिग्गजैर्दन्दशूकेन्द्रैरभिचाराऽवपातनैः।

॥ सङ्ग्रहोक्तिः॥

बालोऽयं वध्यः, अत आशु वध्यताम्, इत्याह॥३४॥ अयं बालः, मम भ्रातृहा, योऽधमः स्वान् सुहृदो हित्वा पितृव्यहन्तुर्विष्णोः पादौ दासवद् अर्चति॥३५॥ असमीचीनोऽसौ बालो विष्णोरपि साधु किं नु करिष्यति, यः पञ्चहायनः सन्नेव दुस्त्यजं पित्रोः सौहृदमत्याक्षीत्॥३६॥ शत्रुपक्षे भवोऽपि यदौषधवत् हितकारी चेत् तर्हि स अपत्यमेव, यदि स्वदेहजोऽपि सुतो रोगवत् अहितकारी चेत् परित्याज्यो भवति, आत्मनो यदङ्गं स्वविनाशकरं भवेच्चेत् तदपि छिन्द्यादेव॥३७॥ अतो मुनेरवशवर्त्ति चक्षुरादीन्द्रियवत् सुहृल्लिङ्गधरोऽयं शत्रुः, भोजनशयनाऽऽसनादिषु सर्वासु क्रियासु सर्वैरुपायैरयं हन्तव्यः॥३८॥ *नारद उवाच* – हिरण्यकशपुना समादिष्टाः शूलपाणयस्तिग्मदंष्ट्रा करालास्यास्ताम्रश्मश्रुशिरोरुहा राक्षसा भयंकरान् नादान् कुर्वन्तश्छिन्धि भिन्धीति वादिनः सन्तः उपविष्टं प्रह्लादं सर्वमर्मसु शूलैरहनन्॥३९-४०॥ निर्देष्टुमशक्ये सर्वान्तरात्मनि भगवति परे ब्रह्मणि नियुक्तात्मनि प्रह्लादे पापरतस्य सत्क्रिया इव राक्षसकृता मारणोपाया व्यर्था आसन्॥४१॥ हेयुधिष्ठिर! तस्मिन् प्रह्लादे शस्त्रघातादिप्रयासे व्यर्थे जाते सति दैत्येन्द्रो हिरण्यकशिपुः परिशङ्कितः सन् निर्बन्धेन तद्वधोपायान् चकार॥४२॥

मायाभिः संनिरोधैश्च गरदानैरभोजनैः।।४३।। हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि। न शशाक यदा हन्तुमपापमसुरः सुतम्। चिन्तां दीर्घतमां प्राप्तस्तत् कर्त्तुं नाभ्यपद्यत।।४४। *हिरण्यकशिपुरुवाच* – एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः। तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा।।४५।। वर्त्तमानो विदूरे वै बालोऽप्यजडधीरयम्। न विस्मरति मेऽनार्यं शुनःशेफ इव प्रभुः।।४६।। अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः। नूनमेतद्विरोधेन मृत्युर्मे भविता न वा।।४७।। *नारद उवाच* - इति तच्चिन्तया किंचिन् म्लानश्रियमधोमुखम्। शण्डामर्कावौशनसौ विविक्त इति होचतुः।।४८।। जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृम्भणत्रस्तसमस्तधिष्ण्यपम्। न तस्य चिन्त्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदम्।।४९।। इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा। बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति।।५०।।

।। सङ्ग्रहोक्तिः ।।

दिग्गजाक्रमणैः, सर्पश्रेष्ठदंशनैः कृत्याद्यभिचारैः, गिरिशृङ्गादधःपातनैः, शांबरीमायाभिः, गर्तादिषु संनिरोधनैः, विषप्रदानैः, अभोजनैः, हिम-वायु-वह्नि-सलिलप्रभृतिषु क्षेपणैः, पर्वतानां तदुपरि क्षेपणैः, एवंविधैरुपायैरपि सोऽसुरो निष्पापं पुत्रं हन्तुं न शशाक तदा दीर्घतमां चिन्तां प्राप्तः, तथापि पुत्रहननं कर्त्तुं नाऽभ्यपद्यत।।४३-४४।। *हिरण्यकशिपुरुवाच* - एष बालो मया बहुधा असाधूक्तः - तिरस्कृतः, मारणोपायाः कारिताः, तैः तैरभिचारादिभिः शूलघातादिभिश्च द्रोहैः कृतैरपि मुक्तः, तदपि स्वेन तेजसैव,।।४५।। विदुर एव वर्तमानो बालो निपुणमतिः प्रभुः मत्कृतं द्रोहं .शुनःशेफः इव न विस्मरति।।४६।। अप्रमेयप्रभावोऽकुतोभयोऽमरोऽयं बालो वर्तते, एतद्विरोधेन नूनं मे मृत्युर्भविता वा न?।।४७।। *नारद उवाच* - इति पुत्रचिन्तया किञ्चित् म्लानश्रियमधोमुखं तं हिरण्यकशिपुं शुक्रपुत्रौ शण्डामर्कौ निर्जने देश इत्यूचतुः।।४८।। त्वयैकेनैव जगत्त्रयं जितम्, भवतो भ्रूविजृम्भणमात्रेणैव सर्वे लोकपालास्त्रस्ता भवन्ति, एवं भूतस्य तव चिन्त्यं न पश्यामः, शिशूनां वृत्तं गुणदोषयोर्विषयो न भवति।।४९।। अत इमं बालं तु यावत् गुरुः शुक्र आगमिष्यति तावत् वरुणस्य पाशैर्बद्ध्वा निधेहि, यतो भीतोऽयं न -

तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्। धर्मा ह्यस्योपदेष्टव्या राज्ञां ये गृहमेधिनाम् ।।५१।। धर्ममर्थं च कामं च नितरां चानुपूर्वशः। प्रह्लादायोचतू राजन् प्रश्रयावनताय च।।५२।। यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम्। न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम्।।५३।। यदाचार्यः परावृत्तो गृहमेधीयकर्मसु। वयस्यैर्बालकैस्तत्र सोपाहूतः कृतक्षणैः।।५४।। अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महान् सुधीः। उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव।।५५।। ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः। बाला न दूषितधियो द्वन्द्वारामेरितेहितैः।।५६।। तमुपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः। तानाह करुणो मैत्रो महाभागवतोऽसुरः।।५७।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चमोऽध्यायः।।५।।

।। सङ्ग्रहोक्तिः ।।

पलायते, वयोवृद्धया्ऽऽर्याणां सेवया पुंसो बुद्धिः समीचीना भवति।।५०।। गुरुपुत्रोक्तं तथेत्यङ्गीकृत्य दैत्येन्द्रो गुरुपुत्रमिदमब्रवीत्, अस्य बालस्य गृहमेधिनां राज्ञां ये धर्मास्त उपदेष्टव्याः।।५१।। हे राजन्! गुरुपुत्रौ विनयावनताय तस्मै प्रह्लादाय धर्मं अर्थं कामं चेति त्रयं नितरामनुपूर्वश ऊचतुः।।५२।। गुरुभिरात्मने यथावदेवोपशिक्षितमपि त्रिवर्गं द्वन्द्वारामैरुपवर्णितं तच्छिक्षणं स बालः साधु न मेने।।५३।। यदाऽऽचार्यो गृहमेधीयकर्मसु प्रवृत्तः, तदा क्रीडार्थं लब्धावकाशैर्वयस्यैर्बालकैः स प्रह्लादः स्वस्थाने उपाहूतः।।५४।। अथ महाबुधो बालानां जन्ममरणादिनिष्ठां जानन् प्रह्लादो मधुरया वाचा तान् प्रत्याहूय प्रहसन्निव कृपयोवाच।।५५।। द्वन्द्वारामाणां वचनैः प्रवृत्तिभिश्चाऽदूषितबुद्धयः ते सर्वे बालकास्तद्गौरवात् सर्वक्रीडापरिच्छदान् त्यक्त्वा प्रह्लादाय एवं हृदयं नेत्रवृत्तिं च समर्प्य तं परिवेष्ट्योपविविशुः, तदा दयालुर्मित्रभावयुक्तो महाभागवतोऽसुरः प्रह्लादस्तानसुरबालकान् प्रत्याह।।५६-५७।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः।।५।।

अथ षष्ठोऽध्यायः ।।६ ।।

प्रह्लाद उवाच - कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह। दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ।।१ ।।यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् । यदेषः सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ।।२ ।। सुखमैन्द्रियकं दैत्या देहयोगेन देहिनाम्। सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ।।३ ।। तत्प्रयासो न कर्त्तव्यो यत आयुर्व्ययः परम्। न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ।।४ ।। ततो यतेत कुशलः क्षेमाय भवमाश्रितः। शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ।।५ ।। पुंसो वर्षशतं ह्यायुस्तदर्द्धं चाऽजितात्मनः। निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ।।६ ।। मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः। जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ।।७ ।।

।। सङ्ग्रहोक्तिः ।।

अथ षष्ठोऽध्यायः ।।६।।

प्रह्लादस्य दैत्यबालकेभ्यो नारदोक्ततत्त्वोपदेशः

प्रह्लाद उवाच - इह मनुष्यजन्मन्येव प्राज्ञः पुमान् बाल्यात् प्रभृति भागवतान् धर्मान् आचरेत्, यतो मानुष्यं जन्म दुर्लभम्, तद् अध्रुवमपि चरमपुरुषार्थदं वर्तते ।।१।। इह जन्मनि पुरुषस्य विष्णोश्चरणकमलभजनं योग्यमेवास्ति, यतः एष परमपुरुषः सर्वभूतानामिष्टसाधकः, प्रियवर्द्धितकारकः सुहृच्च वर्तते ।।२।। हे दैत्याः! देहिनां देहसम्बन्धमात्रेणेन्द्रियसम्बन्धिसुखं सर्वत्र यत्नमन्तरेणाऽपि दैवाल्लभ्यते, यथा दुःखमनायासेन लभ्यते तद्वत् ।।३।। वैषयिकसुखार्थः प्रयासो न कर्त्तव्यः, तस्मात् प्रयासात् तु केवलमायुषः क्षयो भवति, यथा मुकुन्दचरणाम्बुजं भजन् क्षेमं विन्दते तथा विषयसुखार्थं यतमानो न विन्दते ।।४।। तत्कारणात् संसारमाश्रितः पुमान् कुशलः सन् क्षेमाय यतेत, पौरुषं शरीरं यावत् पटुतरमस्ति विपन्नं न भवति तावदेव क्षेमाय यतेत ।।५।। पुंसो वर्षशतं हि आयुः, तस्याऽर्द्धमजितेन्द्रियस्य निष्फलमेव याति, यद् अजितात्मा पुमान् रात्र्यामन्धंतमः निद्रात्मकं प्रापितः शेते ।।६।। एवं बाल्ये मूढस्य दश वर्षाणि, कौमारे क्रीडतो दश वर्षाणि, एवं विंशतिः वर्षाणि यान्ति, एवं जरया ग्रस्तदेहस्याऽसमर्थस्य वर्षाणां विंशतिर्याति ।।७।।

दुरापूरेण कामेन मोहेन च बलीयसा। शेषं गृहेषु सक्तस्य प्रमत्तस्याऽपयाति हि ॥८॥ को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः। स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥९॥ कोन्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः। यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥१०॥ कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान्। सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥११॥ पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ। गृहान्मनोज्ञोरु-परिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥१२॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः। औपस्थ्यजैह्व्यं बहु मान्यमानः कथं विरज्येत दुरन्तमोहः ॥१३॥ कुटुम्बपोषाय वियन्निजायुर्न बुद्ध्यतेऽर्थं विहितं प्रमत्तः। सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरागः ॥१४॥

॥ सङ्ग्रहोक्तिः ॥

अवशिष्टं दशवर्षात्मकमायुर्गृहात्मकेषु कर्मसु सक्तस्य अत एव प्रमत्तस्य पुरुषस्य दुष्पूरेण कामेन, बलीयसा मोहेन चाऽपयाति हि ॥८॥ गृहेषु सक्तं दृढैः स्नेहपाशैर्बद्धमात्मानं मोचयितुमजितेन्द्रियश्चेत् कः पुमानुत्सहेत ॥९॥ कः पुमान् अजितेन्द्रियश्चेत् वित्ततृष्णां त्यजेत्, यद् वित्तं प्राणेभ्योऽपीप्सितं वर्तते, यदर्थं चौरः सेवकः वणिक् च प्रियैः प्राणैरपि वित्तं साधयति ॥१०॥ पुमान् दयनीयायाः प्रियाया रहस्यं सङ्गं, रुचिरान् मन्त्रान्, सुहृत्सु सङ्गं स्मरन् स्नेहेन बद्धः, कलभाषणानां शिशुनां सङ्गं प्राप्य, तेषु सर्वेषु बद्धचित्तो भवेत्, पुत्रान् स्मरन्, श्वशुरगृहे स्थिता दुहितॄः स्मरन् तथा भ्रातॄन्, स्वसॄः, दीनौ पितरौ मनोहरानेकपरिच्छान्, कुल्या वृत्तीः पशून् भृत्यवर्गांश्च स्मरन् तेषु सङ्गं कथं त्यजेत् ॥११-१२॥ यथा कोशकृत् कीटः (रेशमनो कीडो) कोशात्मकं गृहं कुर्वन्नात्मनो निर्गमनद्वारं नावशेषयति तथा स्वबन्धकानि कर्माणि कुर्वाणः, विषयभोगादिषु लोभं प्राप्याऽतृप्तकामतृष्णः, औपस्थ्यं जैह्व्यं च सुखं बहुमन्यमानो दुरन्तमोहः स कथं विरक्तो भवेत् ॥१३॥ कुटुम्बपोषणाय प्रमत्तः क्षीयमाणं निजमायुः परमपुरुषार्थं च न जानाति, सर्वत्र तापत्रयेण दुःखितात्मा स्वकुटुम्बे रागयुक्तः पुमान् वैराग्यं न प्राप्नोति ॥१४॥

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्त्तुः। प्रेत्येह चाथाप्यजितेन्द्रियस्त-
दशान्तकामो हरते कुटुम्बी।।१५।। विद्वानपीत्थं दनुजाः कुटुम्बं पुष्णन् स्वलोकाय
न कल्पते वै। यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः।।१६।।
यतो न कश्चित् क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः। विमोचितुं वामदृशां
विहारे क्रीडामृगो यन्निगडो विसर्गः।।१७।। ततो विदूरात्परिहृत्य दैत्या दैत्येषु
सङ्गं विषयात्मकेषु। उपेत नारायणमादिदेवं स मुक्तसङ्गैरिषितोऽपवर्गः।।१८।।
न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः। आत्मत्वात्सर्वभूतानां सिद्धत्वादिह
सर्वतः।।१९।। परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु। भौतिकेषु विकारेषु भूतेष्वथ
महत्सु च।।२०।। गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा। एक एव परो ह्यात्मा
भगवानीश्वरोऽव्ययः।।२१।। प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम्। व्याप्य-
व्यापकनिर्देश्यो ह्यनिर्देश्यो विकल्पितः।।२२।।

।। सङ्ग्रहोक्तिः ।।

परद्रव्यापहारिणः प्रेत्येह च दोषं जानन्नपि वित्तेषु नित्यमभिनिविष्टचेता अजितेन्द्रियोऽशान्तकामः कुटुम्बी सन् परवित्तं कात्स्न्र्येन हरति।।१५।। हे दनुजाः! इत्थं विद्वान् अपि कुटुम्बमेव पुष्णन् यो वर्तते स आत्मयाथात्म्यदर्शनाय समर्थो न भवति, किंत्विदं स्वीयम्, इदं परकीयमिति विभिन्नभावत्वात् यथावदेव विमूढः सन् नरकमेव प्रपद्येत।।१६।। यतः कश्चिदपि पुमान् तदा स्वमात्मानं क्वचिदपि काले विमोचयितुं समर्थो न भवेत्, ततो विषयलम्पटः सन् वामदृशां विहारे क्रीडामृगो भवति, यत् शृङ्खलारूपः संसारबन्धो भवति।।१७।।हे दैत्याः! विषयात्मकानां दैत्यानां सङ्गं दूरत एव परिहृत्याऽऽदिदेवं भगवन्तं नारायणं शरणं व्रजत, यतः स नारायण एव विमुक्तसङ्गैरपवर्गे समभीष्टः।।१८।। हे असुरात्मजाः! नारायणं प्रीणयतः पुंसोऽति प्रयत्नो न विद्यते, यत सर्वभूतानामात्मत्वात् लोके सर्वेषां सिद्धत्वाच्च अनायासेन सिद्ध्यति ।।१९।।ब्रह्मण आरभ्य स्थावरान्तेषु सर्वेषु भौतिकेषु महत्सु भूतेषु च विद्यमानो वर्तते।।२०।। मूलप्रकृतौ महदहंकारयोः सत्त्वादिगुणेषु च चिदचिद्भ्यः स्वरूपतो विलक्षणः निरस्तनिखिलदोषो भगवान् एक एव निविष्टो वर्तते, स च व्याप्येषु चिदचित्सु व्यापकतया निर्देष्टव्यः, -

केवलानुभवानन्दस्वरूपः परमेश्वरः। माययाऽन्तर्हितैश्वर्य ईयते गुणसर्गया।।२३।। तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम्। भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः ।।२४।। तुष्टे च तत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः। धर्मादयः किमगुणेन च काङ्क्षितेन सारं जुषां चरणयोरुपगायतां नः।।२५।। धमार्थकाम इति चाभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता। मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः।।२६।। ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय। एकान्तिनां भगवतस्तद-किञ्चनानां पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात्।।२७।। श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम्। धर्मं भागवतं शुद्धं नारदाद् देवदर्शनात्।।२८।। *दैत्यपुत्रा ऊचुः* - प्रह्लाद त्वं वयं चापि नर्त्तेऽन्यं विद्महे गुरुम्। एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ।।२९।।

।। सङ्ग्रहोक्तिः ।।

तदतिरिक्तस्वरूपेण निर्देष्टुमशक्य जातिगुणादिरहितो वर्तते।।२१-२२।। केवलानन्दानुभव-स्वरूपः परमेश्वरः संसारिणां देहादिगुणसर्जनकर्त्र्या माययाऽन्तर्हितैश्वर्यः सन्नपि सदाचार्यो-पदेशेन ज्ञायते।।२३।। तस्मात् यूयं सर्व आसुरं भावं त्यक्त्वा सर्वेषु भूतेषु दयां सौहृदं भावं च कुरुत, यया दयया भगवान् श्रीहरिः तुष्यति।।२४।। जगत्कारणभूतेऽनन्ते तस्मिन् तुष्टे सत्यलभ्यं किम्, तथापि भगवच्चरणयोः सारं सेवमानानां निरन्तरं तद्गुणगानं कुर्वतां, नः सत्त्वादिगुणपरिणामत्वात् स्वतः सिद्धाः ये धर्मार्थकामाः, तैः किं प्रयोजनं?।।२५।। धर्मः, अर्थः, कामश्चेति त्रिवर्गः मुनिभिरभिहितः, तदर्था त्रयीविद्याऽऽन्वीक्षिकीनयदमौ विविधाश्च वार्ता अहं जानामि, तथापि जीवस्य परमसुहृदः परमपुरुषस्य स्वात्मसमर्पणमेव वेदान्तस्य परमं प्रमेयं प्रतिपाद्यं वर्तते इति मन्ये।।२६।। तदेतत् निर्दोषं दुष्प्राप्यं च ज्ञानं भगवान् नरसखो नारायणो नारदाय प्राह, भगवतश्चरणारविन्दरजोभिरभिषिक्तानामेकान्तिनां निष्किंचनानां भक्तानां तद् ज्ञानं स्यादेव।।२७।। विज्ञानसंयुतमेतद् ज्ञानं मया पूर्वं नारदाच्छ्रुतमासीत्, शुद्धं भागवतं धर्ममप्यहं देवदर्शनान्नारदादेव श्रुतवानस्मि।।२८।। *दैत्यपुत्रा ऊचुः* - हे प्रह्लाद! त्वं वयं -

बालस्यान्तःपुरस्थस्य महत्सङ्गो दुरन्वयः। छिन्धि नः संशयं सौम्य स्याच्चेद्विश्रम्भकारणम् ।।३०।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे षष्ठोऽध्यायः।।६।।

अथ सप्तमोऽध्यायः।।७।।

नारद उवाच – एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः। उवाच स्मयमानस्तान्स्मरन् मदनुभाषितम् ।।१।। *प्रह्लाद उवाच* – पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम्। युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ।।२।। पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः पापेन पापोऽभक्षीति वादिनो वासवादयः ।।३।। तेषामतिबलोद्योगं निशम्यासुरयूथपाः। वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतोदिशम् ।।४।। कलत्रपुत्रमित्राप्तान् गृहान्पशुपरिच्छदान्।

।। सङ्ग्रहोक्तिः ।।

चाप्येताभ्यां गुरुपुत्राभ्यां विनाऽन्यं गुरुं न विद्महे, बालानामस्माकमेतौ द्वावेव नियन्तारौ भवतः।।२९।। अन्तःपुरस्थस्य बालस्य तव नारदसमागमो दुर्घटः, हे सौम्य! विश्वासकारणं चेदस्माकं संशयं छिन्धि।।३०।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः।।६।।

अथ सप्तमोऽध्यायः ।।७।।

शिष्याणां दैत्यबालकानां विश्वासहेतवे प्रह्लादस्य नारदोपदेशवर्णनम्

नारद उवाच – एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः प्रह्लादो मदनुभाषितं स्मरन् स्मयमानः सन्नुवाच।।१।। *प्रह्लाद उवाच* – अस्माकं पतिरि हिरण्यकशिपौ तपः कर्त्तुं मन्दराचलं प्रति प्रस्थिते सति शक्रादयो देवा दानवान् प्रति युद्धोद्यमं चक्रुः।।२।। लोकानां दुःखकारी पापो दैवात् पिपीलिकाभिः सर्प इवऽभक्षि दिष्ट्या, इत्येवं वदन्तो वासवादयो युद्धोद्यमं चक्रुः।।३।। वासवादीनामतिबलेन युद्धोद्योगं निशम्य देवैर्वध्यमाना अत एव भीताः सर्वेऽसुरयूथपाः –

नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः।।५।। व्यलुम्पन् राजशिबिरममरा जयकाङ्क्षिणः। इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ।।६।। नीयमानां भयोद्विग्नां रुदतीं कुररीमिव। यदृच्छयाऽऽगतस्तत्र देवर्षिर्ददृशे पथि।।७।। प्राह मैनां सुरपते नेतुमर्हस्यनागसम्। मुञ्च मुञ्च महाभाग सतीं परपरिग्रहम्।।८।। *इन्द्र उवाच* - आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः। आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः।।९।। *नारद उवाच* - अयं निष्किल्बिषः साक्षान्महाभागवतो महान्। त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली।।१०।। *प्रह्लाद उवाच* - इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन्वचः। अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ।।११।। ततो नो मातरमृषिः समानीय निजाश्रमम्। आश्वास्येहोष्यतां वत्से यावत् ते भर्तुरागमः।।१२।। तथेत्यवात्सीद् देवर्षेरन्ति साप्यकुतोभया।

।। सङ्ग्रहोक्तिः ।।

कलत्राणि, पुत्राः वित्तं, आप्तांश्चेत्येतान् सर्वान् गृहान् पशून्, परिच्छदान्, अनवेक्षमाणाः सन्तः प्राणपरीप्सवः सर्वे त्वरिताः सर्वतो दिशं दुद्रुवुः।।४-५।।स्वजयकाङ्क्षिणो देवा राजशिबिरं महासौघं व्यलुम्पन्, इन्द्रस्तु राजमहिषीं कयाधूसंज्ञां मम मातरं चाऽग्रहीत्।।६।। इन्द्रेण ह्रियमाणां भयोद्विग्नां कुररीमिव रुदतीं तां तत्र यदृच्छयाऽऽगतो देवर्षिर्नारदः पथि ददर्श।।७।। हे सुरपते! निरपराधामेनां कयाधूं नेतुं नैवाऽर्हसि, अतः हे महाभाग! परस्त्रीं सतीं मुञ्च मुञ्च।।८।। *इन्द्र उवाच* - अस्याः कुक्षावविसह्यं हिरण्यकशिपोर्वीर्यं तिष्ठति, अतोऽनया यावत्प्रसवं मत्समीपे स्थीयताम्, ततो जातो पुत्रं हत्वेमां मोक्ष्यामि।।९।। *नारद उवाच* - हे इन्द्र! अयं शिशुस्त्वया हन्त्रा मृत्युं न प्राप्स्यते, यतोऽयं निष्पापः साक्षान्महाभागवतोऽनन्तस्यानुयायी महाबलसम्पन्नोऽस्ति।।१०।। *प्रह्लाद उवाच* - इत्युक्त इन्द्रो देवर्षेर्वचो मानयन् सन् तां राजमहिषीं विहाय, भगवत्प्रियस्य मम भक्त्या मम मातरं प्रदक्षिणीकृत्य दिवं ययौ।।११।। ततो नारदो मम मातरं निजाश्रममानीय सान्त्वयित्वा "वत्से"! तव स्वामिनो यावदागमनं स्यात् तावत्पर्यन्तं त्वयाऽत्र ममाश्रमे स्थीयताम्, इत्युवाच।।१२।। ततः सा मम माताऽपि "तथेति" अङ्गीकृत्य नारदस्य समीपेऽकुतोभया सत्यवात्सीत्, यावद् दैत्यपतिर्घोरात्तपसो -

यावद् दैत्यपतिर्घोरात् तपसो न न्यवर्तत ।।१३।। ऋषिं पर्यचरत्तत्र भक्त्या परमया सती। अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ।।१४।। ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः। धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम् ।।१५।। तत्तु कालस्य दीर्घत्त्वात् स्त्रीत्वान्मातुस्तिरोदधे। ऋषिणाऽनुगृहीतं मां नाधुनाप्यजहात् स्मृतिः ।।१६।। भवतामपि भूयान्मे यदि श्रद्दधते वचः। वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ।।१७।। जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः। फलानामिव वृक्षस्य कालेनेश्वरमूर्त्तिना ।।१८।। आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः। अविक्रियः स्वदृग् हेतुर्व्यापकोऽसङ्ग्यनावृतः ।।१९।। एतैर्द्वादशभि-र्विद्वानात्मनो लक्षणैः परैः। अहंममेत्यसद्भावं देहादौ मोहजं त्यजेत् ।।२०।। स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात्। क्षेत्रेषु देहेषु तथाऽऽत्मयोगै-रध्यात्मविद् ब्रह्मगतिं लभेत ।।२१।।

।। सङ्ग्रहोक्तिः ।।

न न्यवर्तत, तत्राश्रमेऽन्तर्वत्नी सा मम माता स्वगर्भस्य रक्षणायेच्छाप्रसूतये च परमया भक्त्या नारदं पर्यचरत् ।।१३-१४।। कारुणिकः समर्थः ऋषिर्नारदो मन्मातरं मामपि लक्षीकृत्य निर्मलं धर्मस्य तत्त्वं तदङ्गभूतं ज्ञानं चेत्युभयं समुपदिष्टवान् ।।१५।। तदुपदिष्टमुभयं मातुःस्त्रीत्वात् कालदैर्घ्याच्च तिरोदधे, मां तु सा स्मृतिरधुनाऽपि न तत्याज ।।१६।। यदि भवन्तो मे वचनं श्रद्दधते चेत् भवतामपि "धर्मतत्त्वं तदङ्गभूतं ज्ञानं च" इत्युभयं भवेदेव, वैशारदी बुद्धिः स्त्रीणां बालानां चापि श्रद्धातो ममेव भूयादेव ।।१७।। ईश्वरमूर्त्तिना कालेन जन्माद्या विकारा दृश्यन्ते तद्वत् ।।१८।। प्रत्यगात्मा नित्यः, अपक्षयरहितः, अविक्रियः, शुद्धः, एकः, क्षेत्रज्ञः, स्वदृक्, देहादीनामाश्रयः, व्यापकः, असङ्गी, अनावृतश्चास्ति, देहस्तु जीव-स्वरूपस्वभावविलक्षणो वर्तते ।।१९।। एतैर्द्वादशभिः प्रत्यगात्मनो लक्षणैर्विद्वान् पुमान् "अहं मम" इत्यसद्भावं देहादौ मोहजमज्ञानं च त्यजेत् ।।२०।। यथा हेमकारः हेमप्रकृतीनां ग्राव्णामभिज्ञश्चेत् ग्रावसु स्थितं सुवर्णं योगैः प्राप्नुयात् तथा अध्यात्मवित् पुरुषः देहेषु क्षेत्रेषु आत्मानात्मविवेकोपायैः स्वरूपेण गुणैश्च पुरुषोत्तमस्य ज्ञानं लभेत ।।२१।।

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः। विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ।।२२।। देहस्तु सर्वसंघातो जगत् तस्थुरिति द्विधा। अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ।।२३।। अन्वयव्यतिरेकेण विवेकेनोशताऽऽत्मना। सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः।।२४।। बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः। ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः।।२५।। एभिस्त्रिवर्णैः पर्यस्तै-र्बुद्धिभेदैः क्रियोद्भवैः। स्वरूपमात्मनो बुध्येद् गन्धैर्वायुमिवान्वयात् ।।२६।। एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः। अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवार्प्यते ।।२७।। तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम्। बीजनिर्हरणं योगः प्रवाहोपरमो धियः।।२८।। तत्रोपायसहस्राणामयं भगवतोदितः। यदीश्वरे भगवति यथा यैरञ्जसा रतिः।।२९।।

।। सङ्ग्रहोक्तिः।।

अत्र शरीरे भूमिरापोऽनलो वायुः खं मनो बुद्धिः अहंकारश्चेति अष्टौ प्रकृतयः सन्ति, सत्वं रजस् तमस् चेति त्रयोगुणाः सन्ति, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च प्राणाः, एकं मनश्चेति षोडश विकाराः, साक्षित्वेन विद्यमानः पुमान् जीव एकः कथितः।।२२।। सर्वसंघात्मकोऽयं देहः स्थावरजंगमभेदेन द्विधा भिन्नः, तस्मिन् देह एव प्रत्यगात्मा मृग्यः, "नेति नेति" पृथिव्यादिदृश्यपदार्थविलक्षणोऽयमात्माऽन्वेषणीयः।।२३।। अन्वयव्यतिरेक विवेकेन निर्मलेन मनसा प्रत्यगात्मा तथा जगदुत्पत्तिस्थितिलयनिरूपकशास्त्रीयवचनैः विचारयद्भिर-व्यग्रचित्तैः पुरुषैः परमात्मा च मृग्यः।।२४।। जागरणं, स्वप्नः, सुषुप्तिश्चेति तिस्रो बुद्धेर्वृत्तयः सन्ति, ता अवस्था येनाऽनुभूयन्ते स देहादीनामध्यक्षः पुरुषः प्रत्यगात्माऽस्ति।।२५।। एभि-स्त्रिविधैः सत्त्वादिगुणत्रयमूलकैरस्थिरैः पुण्यपापात्मककर्मनिमित्तैर्जागरादिबुद्धिवृत्तिभेदै-रुपलक्षितं प्रत्यगात्मनो स्वरूपं कुसुमादिगन्धैर्वायुमिव विद्यात् ।।२६।। सत्वादिगुणानां कर्मणां चाऽऽधीनोऽज्ञानमूलोऽयं संसारः स्वप्नवत् अपार्थः सन्नपि प्रत्यगात्मना प्राप्यते।।२७।। तस्माद् भवद्भिः त्रिगुणात्मनां कर्मणां बीजनाशोपायात्मको बुद्धेः प्रवाहोपरम उपायः कर्त्तव्यः ।।२८।। तत्र कर्मणां बीजनाशके उपाये कर्त्तव्य उपायसहस्राणां मध्ये यैः साधनैः परमेश्वरे दृढा प्रीतिः सुखेन यथा स्यात् स एव हि उत्तमोपायो भगवता कथितः।।२९।।

गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च। सङ्गेन साधुभक्तानामीश्वराराधनेन च।।३०।। श्रद्धया तत्कथायां च कीर्त्तनैर्गुणकर्मणाम्। तत्पादाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः।।३१।। हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः। इति भूतानि मनसा कामैस्तैः साधु मानयेत्।।३२।। इति निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे। वासुदेवे भगवति यया संलभते रतिम्।।३३।। निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि। यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति।।३४।। यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम्। मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः।।३५।। तदा पुमान्मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः। निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ।।३६।। अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम्।

।। सङ्ग्रहोक्तिः ।।

सा दृढा प्रीतिर्गुरुशुश्रूषया, स्वसुलभपदार्थानां गुरवेऽर्पणेन, साधुभक्तानां सत्संगेन, परमात्मनो मानसबाह्येति द्विविधपूजाविधानेन, भगवत्कथायां श्रद्धया, तद्गुणचरित्राणां कीर्तनेन, तच्चरणारविन्दध्यानेन तदर्चाविग्रहणां दर्शनपूजनादिना साधनेन च भवति।।३०-३१।। भगवान् श्रीहरिः सर्वेषु भूतेष्वन्तरात्मतया वर्त्तते, अतस्तानि सर्वाणि भगवदात्मभावनया तत्तद्भूतापेक्षितकामैः यथायोग्यं मनसा सम्यक्तया मानयेत्।।३२।। इत्येतैः साधनैर्जितकामादिषड्वर्गैः साधकैर्वासुदेवे भगवति भक्तिः क्रियते, यया भगवत्स्वरूपे दृढां प्रीतिं संलभते।।३३।। यदा दृढप्रीतिमान् भवति तदा भगवतो वात्सल्यादीन् तुल्यान् गुणान् शृणोति, तथा च लीलातनुभिः रामकृष्णहरिकृष्णादिभिः कृतानि चरित्राणि वीर्याणि च शृणोति, तदाऽतिहर्षेण रोमाञ्चितः प्रेमाश्रुगद्गदकण्ठश्च भूत्वा प्रोत्कण्ठः स उद्गायति रौति नृत्यति च।।३४।। कदाचिद् यदा ग्रहग्रस्त इव हसति, क्वचित् आक्रोशं करोति, क्वचिद् ध्यायति, भगवज्जनं वन्दते, क्वचित् मुहुः श्वासं मुञ्चन् गतत्रप आत्ममतिः सन् हे हरे! हे जगत्पते! हे नारायण! इति वक्ति।।३५।। भक्तियोगनिष्ठो जनः सर्वोत्तमेन भक्तियोगेन प्रारब्धावसाने मुक्तसमस्तबन्धनो निर्दग्धबीजानुशयो भगवता समानरूपः सन् भगवन्तं प्राप्नोति।।३६।। इह लोके तापत्रयदुःखितमनसः शरीरिणो

तद् ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ।।३७।। कोऽतिप्रयासो-ऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः। स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः।।३८।। *रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः। सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः।।३९।।* एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः। तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये।।४०।। यदर्थमिह कर्माणि विद्वन्मान्यसकृन्नरः। करोत्यतो विपर्यासममोघं विन्दते फलम्।।४१।। सुखाय दुःखमोक्षाय सङ्कल्प इह कर्मिणः। सदाऽऽप्नोतीहया दुःखमनीहायाः सुखावृतः।।४२।। कामान्कामायते काम्यैर्यदर्थमिह पूरुषः। स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च।।४३।।

।। सङ्ग्रहोक्तिः।।

भगवत्प्राप्तिं संसारचक्रनिवर्तिकां बुधा विदुः, तां भगवत्प्राप्तिमेव मोक्षदशायामनुभूयमानं ब्रह्मसम्बन्धिसुखं विदुः ततो हे दैत्यबालकाः! हृदये स्थितमन्तर्यामिणं परमात्मानं भजध्वम् ।।३७।। हे असुरबालकाः! स्वे हृद्यवकाशवद् विद्यमानस्याऽन्तर्यामिणोऽशेषदेहिनां सख्युर्हरेरुपासने कोऽतिप्रयासः? न कोऽपि, अतः शब्दादिविषयार्जनैः किम्? विषयास्तु देहिनां साधारण्येनैव लभ्याः सन्ति।।३८।। धनं, कलत्रं, पशवः, सुतादयः, गृहाः, मही, कुञ्जराः कोशाः समृद्धयश्च एते सर्वे चलाः सन्तः क्षणभङ्गुरायुषो मर्त्यस्य कियत् प्रियं कुर्वन्ति?।।३९।।एवमेव यागादिभिः संचिताः स्वर्गादयो लोकाः क्षयिष्णवः, सातिशया दुःख-सहिताश्च भवन्ति, अतोऽदृष्टाश्रुतदूषणं परमेश्वरं स्वात्मलाभाय केवलया भक्त्या भजत ।।४०।। पण्डितंमन्यो नरो यद् वैषयिकसुखार्थं बहुवारं यागादीनि कर्माणि करोति, किन्तु तत्र विपरीतं फलमवश्यमेव प्राप्नोति।।४१।।इह कर्माणि कुर्वतः संकल्पः सुखाय दुःखमोक्षाय च भवति, य फलेच्छया कर्म करोति स सदा दुःखमेवाप्नोति, अनीच्छया कर्मकुर्वन् तु सुखं प्राप्नोति।।४२।। इह लोके पुरुषो यस्य देहस्य सुखार्थं काम्यैः कर्मभिर्भोगान् कामयते स देहस्तु पारक्यः क्षणभङ्गुरः, स कदाचित् देहिनमालिङ्गति, कदाचित् याति।।४३।।

किमु व्यवहितापत्यदारागाराधनादयः। राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ।।४४।। किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः। अनर्थैरर्थसंकाशैर्नित्यानन्दमहोदधेः ।।४५।। निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः। निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ।।४६।। कर्माण्यरभते देही देहेनात्मानुवर्तिना। कर्मभिस्तनुते देहमुभयं त्वविवेकतः ।।४७।। तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः। भजतानीहयाऽऽत्मानमनीहं हरिमीश्वरम् ।।४८।। सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः। भूतैर्महद्भिः स्वकृतैः कृतानां बीजसंज्ञितः ।।४९।। *देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च। भजन् मुकुन्दचरणं स्वस्तिमान् स्याद् यथा वयम् ।।५०।। नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः। प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ।।५१।। न दानं न तपो नेज्या न शौचं न व्रतानि च।*

।। सङ्ग्रहोक्तिः ।।

यदि देहः पारक्यस्तर्हि देहाद्भिन्नाममतास्पदाः अपत्य-दारा-ऽगार-धनादयो राज्य-कोश-बला-ऽमात्य-भृत्याऽऽप्ताः, अपि पारक्याः इति किमु वक्तव्यम् ।।४४।। देहेन सह नश्वरैः, अनर्थैः, अर्थवत् प्रतीयमानैरेतैस्तुच्छैरपत्यादिभिर्नित्यानन्दमहोदधेरात्मनः क उपयोगः? ।।४५ ।। हे असुराः! गर्भाधानादिष्ववस्थासु प्राचीनैः कर्मभिः क्लिश्यमानस्य जीवस्य कियान् स्वार्थः? तन्निरूप्यताम् ।।४६।। देही आत्मानुवर्तिना देहेन देहान्तरारम्भकाणि कर्माणि कुरुते, तैः कर्मभिः पुनर्देहं बिभर्त्ति, तेन देहेन पुनः कर्माणि, इति ह्ययमप्यविवेकत एवाऽस्ति ।।४७।। अर्थाः, कामाः, धर्माश्च श्रीहर्येकाधीना भवन्ति, तस्मादनीहं परमेश्वरं श्रीहरिं निष्कामभावेन भजत ।।४८।। स्वसृष्टैः पृथिव्यादिभिः सृष्टानां सर्वेषां देवादिभूतानामपि बीजसंज्ञितः कारणभूतोऽन्तः प्रविश्य धारकः प्रियः शासकश्च हरिरीश्वरो भवति ।।४९।। अतो देवोऽसुरो मनुष्यो यक्षो गन्धर्वो वा यो कोऽपि वा भवतु नाम, मुकुन्दचरणकमलं भजन् वयमिव स्वस्तिमान् स्यात् ।।५०।। हे असुरात्मजाः! द्विजत्वं, देवत्वं, ऋषित्वं, वा मुकुन्दस्य प्रीणनायाऽलं-पर्याप्तं न हि, तथैव बहुत्वं वृत्तत्वं च मुकुन्दप्रसन्नतायै पर्याप्तं न ।।५१।। दानं, तपः, यागः, शौचं, व्रतानि च इत्येतानि भगवत्प्रीणनसमर्थनि न, हरिस्तु निर्मलया भक्त्यैव प्रसीदति, अन्यत् सर्वं -

प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम्।।५२।। ततो हरौ भगवति भक्तिं कुरुत दानवाः। आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे।।५३।। दैतेया यक्षरक्षांसि स्त्रियः शुद्रा व्रजौकसः। खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः।।५४।। एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकान्तभक्तिर्गोविन्दे यत् सर्वत्र तदीक्षणम्।।५५।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे सप्तमोऽध्यायः।।७।।

अथ अष्टमोऽध्यायः।।८।।

नारद उवाच – अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम्। जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम्।।१।। अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम्। आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद् यथा।।२।।

।। सङ्ग्रहोक्तिः ।।

विडम्बनमात्रमेव ।।५२।। हे दानवाः! सर्वत्राऽऽत्मौपम्येन सर्वभूतानामन्तर्यामिणि भगवति हरौ भक्तिं कुरुत।।५३।। दैत्याः, यक्षरक्षांसि, स्त्रियः, शूद्राः, व्रजवासिनः, खगाः, मृगाः अन्ये ये पापजीवाश्च ते सर्वे भक्त्या भगवत्साधर्म्यं प्राप्ताः सन्ति।।५४।। अस्मिन् लोके पुंसः परमोत्कृष्टः स्वार्थ एतावानेव स्मृतः, यत् भगवति गोविन्द ऐकान्तिकी भक्तिः कर्त्तव्या तथा सर्वभूतेषु भगवदात्मकत्वदर्शनम्।।५५।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां सप्तमोऽध्यायः।।७।।

अथाऽष्टमोऽध्यायः।।८।।

हिरण्यकशिपुवधो ब्रह्मादिकृता नृसिंहस्तुतिश्च

नारद उवाच – अथ सर्वे दैत्यसुताः प्रह्लादेनाऽनुवर्णितं श्रुत्वा निर्दोषत्वात् तदेव जगृहुः, गुर्वनुशिक्षितं नैव जगृहुः।।१।। अथ गुरुपुत्रो दैत्यपुत्राणां भगवद्विषयतां प्राप्तां बुद्धिं ज्ञात्वा भीत अत एव त्वरितः सन् हिरण्यकशिपवे यथावदेव विज्ञापितवान्।।२।।

श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम्। कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे।।३।।
क्षिप्त्वा परुषया वाचा पह्लादमतदर्हणम्। आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा।।४।।
विनयाऽवनतं दान्तं बद्धाञ्जलिमवस्थितम्। सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः
।।५।। *हिरण्यकशिपुरुवाच* - हे दुर्विनीत मन्दात्मन् कुलभेदकराधम। स्तब्धं
मच्छासनोद्वृतं नेष्ये त्वाद्य यमक्षयम्।।६।। क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः
सहेश्वराः। तस्य मेऽभीतवन्मूढ शासनं किम्बलोऽत्यगाः।।७।। *प्रह्लाद उवाच* - न
केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषाम्। परेऽवरेऽमी स्थिरजङ्गमा
ये ब्रह्मादयो येन वशं प्रणीताः।।८।। स ईश्वरः काल उरुक्रमोऽसावोजः सहः
सत्त्वबलेन्द्रियात्मा। स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः।।९।।
जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः। ऋतेऽजितादात्मन
उत्पथस्थितात् तद्धि ह्यनन्तस्य महत् समर्हणम्।।१०।।

।। सङ्ग्रहोक्तिः ।।

ततो दैत्यो हिरण्यकशिपुस्तदप्रियं श्रुत्वा स्वपुत्रस्य दुःसह्यामनीतिं च ज्ञात्वा कोपावशेन चलद्गात्रः सन् पुत्रं हन्तुं मनश्चक्रे।।३।। पदाहतः सर्प इव श्वसन् प्रकृतिदारुणः स पुरुषया वाचा विनयान्वितं दान्तं बद्धाञ्जलिं समीपेऽवस्थितं तिरस्कारानर्हं प्रह्लादं तिरस्कृत्य सरोषेण वक्रेण चक्षुषा पश्यन् सन्नाह।।४-५।। *हिरण्यकशिपुरुवाच* - हे दुर्विनीत! मन्दात्मन्! कुलभेदकर! अधम! मदाज्ञातिलङ्घिनं त्वामद्य यमालये नेष्यामि।।६।। यस्य मे क्रुद्धस्य सतः सहेश्वरास्त्रयो लोकाः कम्पन्ते, तस्य मम शासनं हे मूढ! निर्भयवत् कस्य बलेनाऽतिवर्त्तसे ।।७।। *प्रह्लाद उवाच* - हे राजन्! स केवलं ममैव बलप्रदो न, भवतोऽपि बलप्रदोऽस्ति, अपरेषां बलिनामपि बलप्रदोऽस्ति, ब्रह्मादयो ये उच्चावचाः स्थावरजङ्गमाः ते सर्वेऽपि येन वशीकृताः सन्ति।।८।। स परमेश्वरः कालो बहुपराक्रमः ओजः-सहः-सत्त्व-बल-इन्द्रिया-ऽऽत्मा, निःसमाभ्यधिकः, स परमपुरुष एव प्रकृतिपुरुषकालात्मिकाभिः स्वशक्तिभिर्विश्वं सृजति रक्षति संहरति च।।९।। हे राजन्! त्वमात्मन आसुरं भावं जहि, मनसि समत्वं धारय, एवं चेत् केऽपि विद्विषो न सन्ति, अजितात् उत्पथे स्थितात् आत्मनोऽन्तःकरणाद् ऋते विद्विषो

दस्यून्पुरा षण्न विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश। जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे।।११।। *हिरण्यकशिपुरुवाच* - व्यक्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे। मुमूर्षूणां हि मन्दात्मन् ननु स्युर्विप्लवा गिरः।।१२।। यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः। क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते।।१३।। सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते। गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम्।।१४।। *नारद उवाच* - एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः। खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः स्वमुष्टिना।।१५।। तदैव तस्मिन् निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत्। यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामाप्यय-मङ्ग मेनिरे।।१६।। स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम्। अन्तःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ।।१७।।

।। सङ्ग्रहोक्तिः।।

न सन्ति, तदेव च परमात्मनो महत् समर्हणम्।।१०।।पुरा केचन मन्दा आत्मनो लुम्पतः षड् दस्यून् अविजित्य दश दिशः स्वजिता इति मन्यन्ते, जितेन्द्रियस्य स्वात्मपरमात्मयाथात्म्यवेदिनः साधोः स्वमोहप्रभवाः शत्रवः कुतो भवन्ति?।।११।। *हिरण्यकशिपुरुवाच* - हे मन्दात्मन्! व्यक्तं त्वं मर्त्तुकामोऽसि, योऽतिकामं विकत्थसे, मुमूर्षूणां वाचोऽनन्विता भवेयुर्ननु।।१२।। हे मन्दभाग्य! त्वया यो मदन्यो जगदीश्वर उक्तः, असौ क्व आस्ते, यदि सः सर्वत्राऽन्तरात्मतया वर्तते तर्हि स्तम्भे कस्मान्न दृश्यते?।।१३।।स्तम्भे तमपश्यमानोऽहं विकत्थमानस्य ते शिरः कायाच्छिनद्मि ,यो हरिस्ते प्रियो रक्षको भवति सोऽधुना त्वां गोपायेत्।।१४।। *नारद उवाच* - इत्थं रुषा मुहुर्महाभागवतं सुतं दुर्वचनैः पीडयन् महासुरो हिरण्यकशिपुः खड्गं प्रगृह्य सिंहासनादुत्थितोऽभूत्, बद्धाञ्जलिना प्रह्लादेन निरीक्ष्यमाणं स्तम्भं अतिबलवता मुष्टिना तताड।।१५।।तदैव तस्मिन् स्तम्भेऽतिभीषणो ध्वनिर्बभूव, येन ध्वनिनाऽण्डकटाहं भिन्नमभूत्, हे युधिष्ठिर! यं श्रुत्वा स्वस्वधामसु स्थिताः सर्वे ब्रह्मादयः स्वधामनाशं मेनिरे।।१६।। बलेन पुत्रवधेप्सुः पराक्रमं कुर्वन् स दैत्येन्द्रस्तं कदापि न श्रुतमाश्चर्यजनकं ध्वनिं श्रुत्वा तस्य

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः। अदृश्यतात्यद्भुत-
रूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ।।१८।। स सत्त्वमेवं परितोऽपि पश्यन्
स्तम्भस्य मध्यादनुनिर्जिहानम्। नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्र-
रूपम् ।।१९।। मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम्। प्रतप्त-
चामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ।।२०।। करालदंष्ट्रं करवाल-
चञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम्। स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुत-
व्यात्तास्यनासं हनुभेदभीषणम् ।।२१ ।। दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थल-
मल्पमध्यमम्। चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ।।२२।।
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम्। प्रायेण मेऽयं हरिणोरुमायिना
वधः स्मृतोऽनेन समुद्यतेन किम् ।।२३ ।। एवं ब्रुवंस्त्वभ्यपतद् गदायुधो नदन्
नृसिंहं प्रति दैत्यकुञ्जरः।

।। सङ्ग्रहोक्तिः ।।

ध्वनेर्निर्गमनस्थानं सभायां न ददर्श, येन ध्वनिना दानवश्रेष्ठा वितत्रसुः ।।१७।। तदा भगवान् स्वभक्तवचनं सत्यं विधातुं, निखिलेषु भूतेषु स्वव्याप्तिं च विधातुमत्यद्भुतरूपं न मृगं, न मानुषं, किंतु नृमृगभावमिश्रं बिभ्रत् सन् सभायां स्तम्भेऽदृश्यत ।।१८।। स परितो विपश्यन् सन् स्तम्भस्य मध्यात् निर्गच्छन्तं सत्वं दृष्ट्वा "न मृगः, नापि नरः" नृमृगेन्द्ररूपमेतत् सत्त्वं किं? अहो विचित्रमेतत् ।।१९।। एवं तद्रूपं भयानकं मीमांसमानस्य तस्याऽग्रतो नृसिंहरूपो भगवान् प्रादुरभूत्, तप्तसुवर्णसमचण्डलोचनं, स्फुरत्सटाकेसरैः जृम्भिताननं, करालदंष्ट्रं करवालवत् क्षुरान्तवच्च तीक्ष्णजीह्वं, भृकुटीयुगेन मुखेन च उग्रं, स्तब्धोर्ध्वकर्णं, गिरिकन्दरवत् व्यात्तमुखनासिकं, हनुविदारेणन भयंकरं, दिवि स्पृक्कायं, अदीर्घपीवरग्रीवं, विशालवक्षसं, कृशोदरं, चन्द्रांशुगौरैस्तनूरुहैर्व्याप्तं, भुजानीकशतं, नखायुधं, दुरासदं, निजायुधविद्रावित-दैत्यदानवं रूपं (मीमांसमानस्य हिरण्यकशिपोरग्रे नृसिंह प्रादुरभूत) प्रायेण महामायावता हरिणा मे वध एवंविधः चिन्तितः स्यात्, तथाप्यनेन समुद्यमेन किम्? ।।२०-२३।। एवं ब्रुवन् दैत्यकुञ्जरः नृसिंहं प्रति नादं कुर्वन् गदायुधः सन्नभ्यपतत्, तदा सोऽसुरोऽग्नौ पतितः

अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा।।२४।। न तद् विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुरा पिबत् तमः। ततोऽभिपद्याभ्यहनन् महासुरो रुषा नृसिंहं गदयोरुवेगया।।२५।। तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत्। स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः। असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः।।२६।। तं मन्यमानो निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः। पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे।।२७।। तं श्येनवेगं शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः। कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः।।२८।। विष्वक् स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम्। द्वार्यूर आपत्य ददार लीलया नखैर्यथाहिं गरुडो महाविषम्।।२९।। संरम्भदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन्स्वजिह्वया। असृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः।।३०।। नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान्। अहन् समन्तान्नखशस्त्रपार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान् सहस्रशः।।३१।।

।। सङ्ग्रहोक्तिः ।।

शलभ इव नृसिंहौजसि विलीनोऽभूत्।।२४।। अयं भगवान् पुरा स्वतेजसा प्रलयकालीनं तमोऽपिबत्, सत्त्वधाम्नि हरावसुरादर्शनमाश्चर्यं न, ततो महासुरः स रुषा नृसिंहमभिपद्य बहुवेगवत्या गदयाऽभ्यहनत्।।२५।। विक्रमन्तं सगदं तमसुरं गरुडो महासर्पमिव गदाधरो नृहरिर्भगवान् अग्रहीत्, तावदेव विक्रीडतो गरुडस्य हस्तादहिरिव भगवतो हस्तात् निःसृतोऽसुरो जगर्ज, तदा हृतौकसो लोकपाला देवा घनेषु छन्नाः सन्तस्तदसाधु अमन्यन्त।।२६।। महासुरो यद्धस्तमुक्तस्तं नृहरिं निजवीर्यशंकितं मन्यमानो युद्धे श्रमरहितः सन् खड्गचर्मणी गृहीत्वा वेगेन पुनस्तमभ्यपद्यत।।२७।। श्येनवेगं खड्गचर्ममार्गैः सजवमुपर्यधश्चरन्तं तं नृहरिस्तीव्रं भयंकरं चाट्टहासं कृत्वा निमीलिताक्षं महाजवः सन् जगृहे।।२८।। ततो विश्वक् स्फुरन्तं ग्रहणातुरं कुटिलक्षतत्वचमसुरं नृहरिः व्यालो मूषकमिव गृहीत्वा सभाद्वारमध्य ऊरौ निपात्य नखैर्लीलया गरुडो महाविषमहिमिव ददार।।२९।। आहितक्रोधेन दुष्प्रेक्षकराललोचनो,

सटावधूता जलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः। अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः॥३२॥ द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता। शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे॥३३॥ अन्तःसभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुम्। अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन॥३४॥ निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे। प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः॥३५॥ तदा विमानावलिभिर्नभस्तलं दिदृक्षतां सङ्कुलमास नाकिनाम्। सुरानका दुन्दुभयोऽथ जघ्निरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः॥३६॥ तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः। ऋषयः पितरः सिद्धा विद्याधरमहोरगाः॥३७॥ मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः। यक्षाः किम्पुरुषास्तात वेतालाः सिद्धकिन्नराः॥३८॥ ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः। मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम्। ईडिरे नरशार्दूलं नातिदूरचराः पृथक्॥३९॥

॥ सङ्ग्रहोक्तिः ॥

व्यात्तं स्वाननं स्वजिह्वया विलहन्, रक्तबिन्दुभिर्व्याप्तारुणकेसराननः, अन्त्रमाली, गजवधेन सिंह इव वर्तमानः, नृसिंहो नखाङ्कुरैरुत्पाटितहृत्सरोरुहं तमसुरं विसृज्य, उदायुधाननुपथान् सहस्रशः तस्याऽनुचरान् दोर्दण्डयूथो सन् नखशस्त्रपार्ष्णिभिः समन्तात् अहन्॥३०-३१॥ नृसिंहस्य सटाभिः प्रकम्पिता मेघा व्यशीर्यन्त, नृहरेर्दृष्ट्या सूर्यादयो गृहा निस्तेजसोऽभवन्, नृसिंहश्वासपीडिताः समुद्रा विचुक्षुभुः, नृहरिगर्जनया भीता दिग्गजा विचुक्रुशुः॥३२॥ नृहरिसटाभिरुत्क्षिप्तविमानसंकुला द्यौः चलिताऽभूत्, भूमिश्च पद्भ्यामतीव पीडिता संजाता, अमुष्यऽसह्यवेगेन शैलाः समुत्पेतुः, तत्तेजसा खं ककुभश्च न रेजिरे॥३३॥ सभामध्य उत्तम नृपासन उपविष्टं संभृततेजसमप्रतिरथमत्यमर्षणं प्रचण्डवक्त्रं विभुं कश्चन नाऽसेवत॥३४॥ लोकत्रयस्य शिरोव्यथारूपं तमादिदैत्यं नृहरिणा हतं निशम्य प्रहर्षविकसिताननाः सुरस्त्रियः पुष्पाणि ववृषुः॥३५॥ तदा दिदृक्षतां देवानां विमानपङ्क्तिभिर्नभस्तलं संकुलमास, देवानां दुन्दुभयो नेदुः, गन्धर्वा जगुः, अप्सरसो ननृतुः॥३६॥ तत्र ब्रह्मेन्द्रगिरिशादयो देवाः,

ब्रह्मोवाच – नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे। विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेऽव्ययात्मने।।४०।। *रुद्र उवाच* – कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः। तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सलः।।४१।। *इन्द्र उवाच* – प्रत्यानीताः परमभवता त्रायता नः स्वभागा; दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि। कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किम्।।४२।। *ऋषय ऊचुः* – त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज। तद् विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः।।४३।। *पितर ऊचुः* – श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत् तिलाम्बु। तस्योदरान्नख-विदीर्णवपाद्य आर्च्छत् तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे।।४४।।

।। सङ्ग्रहोक्तिः ।।

ऋषयः, पितरः, सिद्धाः, विद्याधराः, महोरगाः, मनवः, प्रजापतयः गन्धर्वाः अप्सरसः, चारणाः, यक्षाः, किंपुरुषाः,वैतालाः, सिद्धाः, किन्नराः, सुनन्दादयो विष्णुपार्षदाश्च एते सर्वे तत्राऽऽगत्य तमुपवृज्य च मूर्द्ध्नि बद्धाञ्जलयो नातिदूरचराः सन्त उपविष्टं तीव्रतेजसं नृसिंहं पृथगैकैकशस्तुष्टुवुः।।३७-३९।। *ब्रह्मोवाच* – अनन्ताय, दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे स्वस्वाभाविकैर्गुणैर्विश्वस्य सर्गस्थितिसंयमान् लीलयैव संदधतेऽव्ययात्मने तुभ्यं नमः।।४०।। *रुद्र उवाच* – तव कोपकालस्तु युगान्त एव, नाऽयं, तुच्छोऽसुरो निहतः, हे भक्तवत्सल! त्वच्छरणं प्राप्तं भक्तं प्रह्लादं पाहि।।४१।। *इन्द्र उवाच* – हे सर्वोत्कृष्ट! अस्मान् त्रायता त्वया दैत्यैर्गृहीता अस्माकं यज्ञीयभागाः प्रत्यानीताः, तव निवासरूपमस्मद्धृदयं विकसितं कृतं, हे नाथ! श्रूयताम्? त्वां शुश्रूषतां नो लौकिकपुरुषार्थजातं कालेन नष्टम्, किंतु हे नारसिंह! त्वां परिचरतामस्माकं मुक्तिरपि न बहुमता, तर्हि अपरैः पुरुषार्थैः किम्?।।४२।। *ऋषय ऊचुः* – हे शरणागतपालक! यत्तपोऽनेन दैत्येन कुण्ठितमभवत्, एनं हत्वा पुनरस्मान् तपसे प्रोत्साहितवानसि, तुभ्यं नो नमोऽस्तु।।४३।। *पितर ऊचुः* – हे नृहरे! अस्माकं पुत्रादिभिर्दत्तानि श्राद्धानि यो दैत्यः प्रसभं बुभुजे, तीर्थोदौ तनुजैर्दत्तास्तिलापोऽप्यपिबत्, यस्तस्योदरात् पुनरानीतवान् तस्मै महापुरुषाय ते नमोऽस्तु।।४४।।

सिद्धा ऊचुः - यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन। नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह।।४५।। *विद्याधरा ऊचुः* - विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः। स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम्।।४६।। *नागा ऊचुः*- येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः। तद्वक्षःपाटनेनासां दत्तानन्द नमोऽस्तु ते।।४७।। *मनव ऊचुः*- मनवो वयं तव निदेशकारिणो दितिजेन येन परिभूतसेतवः। भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किङ्करान्।।४८।। *प्रजापतय ऊचुः* - प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः। स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः।।४९।। *गन्धर्वा ऊचुः*- वयं विभो ते नटनाट्यगायका येनात्मसाद् वीर्यबलौजसा कृताः। स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते।।५०।। *चारणा ऊचुः*- हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः। स एष साधुहृच्छयस्त्वयासुरः समापितः।।५१।।

।। सङ्ग्रहोक्तिः ।।

सिद्धा ऊचुः - हे नृसिंह! योऽसाधुरस्माकं योगसिद्धां सिद्धिं योगतपोबलेनाऽऽहृतवान्, तमहंकारिणं भवान्नखैर्विददार, अतस्तस्मै नमोऽस्तु।।४५।। *विद्याधरा ऊचुः* - बलदृप्तो योऽस्माकं पृथग् धारणया लब्धां विद्यां न्यषेधत्, स दैत्यो येन पशुवद्धतस्तं मायानृसिंहं वयं नमस्कुर्मः।।४६।। *नागा ऊचुः* - येन पापेनाऽस्माकं रत्नानि स्त्रीरत्नानि च प्रसह्य हृतानि, तस्य दैत्यस्य वक्षोविपाटनेन नः स्त्रीणामानन्ददात्रे तुभ्यं नमोऽस्तु।।४७।। *मनव ऊचुः*- हे प्रभो! वयं तवाऽऽज्ञापालकाः मनवः स्मः, येनाऽस्मन्निर्मिता मर्यादा विलुप्ताः, स पापीयांस्त्वया निहतः, हे तात! किंकरानस्मान् आज्ञापय, वयं किं करवाम।।४८।। *प्रजापतय ऊचुः* - हे सत्त्वमूर्ते! वयं प्रजापतयो येन दैत्येन प्रजासर्गे निषिद्धाः, स एष त्वया विदीर्णवक्षाः सन् भुवि शेते, हे प्रभो! तवायमवतारो जगन्मङ्गलरूपोऽभवत्।।४९।। *गन्धर्वा ऊचुः*- हे विभो! वयं नटनाट्यगायका गन्धर्वाः स्मः, येन प्रसह्य वयं वशीकृताः, स दुष्टस्त्वया हतः, कोप्युत्थगामी पुमान् कल्याणं न लभते।।५०।। *चारणा ऊचुः*- हे हरे! भवागपवर्गं तव पादपद्ममाश्रिता

यक्षा ऊचुः - वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम्। नतजनपरितापं तत्कृतं जानता ते नरहर उपनीतः पञ्चतां पञ्चविंश ।।५२।। *किम्पुरुषा ऊचुः* - वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः। अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा।।५३।। *वैतालिका ऊचुः* - सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे। यस्तां व्यनैषीद् भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽऽमयः।।५४।। *किन्नरा ऊचुः*- वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः। भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव।।५५।। *विष्णुपार्षदा ऊचुः* - अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म। सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः।।५६।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे अष्टमोऽध्यायः।।८।।

।। सङ्ग्रहोक्तिः ।।

वयमनेन निषिद्धाः, साधूनां हृदयरोगरूपोऽयमसुरस्त्वया समापितः।।५१।। *यक्षा ऊचुः* - हे नरहरे! मनोज्ञैः कर्मभिर्वयं तेऽनुचरश्रेष्ठा भवामः, तं वयमनेन शिबिकावाहकत्वे नियुक्ताः, भक्तजनपरितापं जानता त्वया स दैत्यः पञ्चत्वं मृत्युं प्रापितः।।५२।। *किंपुरुषा ऊचुः* - वयं किंपुरुषाः स्मः, त्वं तु महापुरुषः सर्वान्तरात्माऽसि, अतो भवान् केन प्रकारेण वर्ण्य इति चेत् - अयं महादैत्यस्त्वया हतः, यदा स साधुभिर्धिक्कृतस्तदैव कापुरुषो जातः।।५३।। *वैतालिका ऊचुः* - हे भगवन्! तव निर्मलं यशः सभासु यज्ञेषु च गीत्वा वयं महतीं सपर्यां लभामहे, तानयं दुष्टः स्ववशमनैषीत् शिरोरोगसदृश एष त्वया हतः एतद् दिष्ट्या।।५४।। *किंनरा ऊचुः* - हे नृसिंह! हे नाथ! वयं तवानुचराः किन्नरगणाः स्मः, अमुना दैत्येन वयं विष्टिं कारिताः, हे ईश! स त्वया निहतः, त्वं नो विभवाय भव।।५५।। *विष्णुपार्षदा ऊचुः* - हे ईश! सर्वेषां लोकानां कल्याणकरं ते नृसिंहरूपमस्माभिरद्यैव दृष्टं, पूर्वं विप्रशप्तोऽयं तव किंकरोऽस्ति, तस्य मरणं तदनुग्रहायैव परिणीतमिति वयं मन्महे।।५६।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः।।८।।

अथ नवमोऽध्यायः ।।९।।

नारद उवाच - एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः। नोपेतुमशकन्मन्युसंरम्भं सुदुरासदम् ।।१।। साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम्। अदृष्टाश्रुतपूर्वत्वात् सा नोपेयाय शङ्किता ।।२।। प्रह्लादं प्रेषयामास ब्रह्मावस्थितमन्तिके। तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ।।३।। तथेति शनकै राजन्महाभागवतोऽर्भकः। उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ।।४।। स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः। उत्थाप्य तच्छीर्ष्ण्यदधात् कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ।।५।। स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः। तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ।।६।। अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः। प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ।।७।। *प्रह्लाद उवाच* - ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः।

।। सङ्ग्रहोक्तिः ।।

अथ नवमोऽध्यायः ।।९।।

प्रह्लादकृता नृसिंहस्तुतिः

नारद उवाच - एवं ब्रह्मरुद्रपुरःसराः देवादयः सर्वे दूरत एव स्तुवन्तः सन्तो मन्युसंरम्भं दुरासदं नृहरिं समीपे गन्तुं न शेकुः ।।१।। ततो देवैः प्रेषिता साक्षात् लक्ष्मीः तदद्भुतं नृसिंहरूपं दृष्ट्वा पूर्वमदृष्टाश्रुतत्वात् शङ्किता सती समीपं नाऽगात् ।।२।। ततो ब्रह्माऽन्तिकेऽवस्थितं प्रह्लादं प्रेषयामास, हे वत्स! स्वपित्रे कुपितं प्रभुं प्रसन्नं कुरु, समीपं गच्छ ।।३ ।।हे युधिष्ठिर! ओमिति ब्रह्मवचोऽङ्गीकृत्य महाभागवतः प्रह्लादः शनकैरुपेत्य बद्धाञ्जलिः सन् भुवि कायेन दण्डवन्नाम ।।४।। ततः स्वपादयोः पतितं तमर्भकं प्रह्लादं विलोक्य श्रीनृसिंहः कृपाविष्टः सन् तमुत्थाप्य तन्मस्तके संसारभीतानामभयंकरं स्वहस्तकमलमधात् ।।५।। भगवतः करस्पर्शमात्रेण हताशेषाशुभः प्राप्तस्वात्मपरमात्मयाथात्म्यावबोधो हृष्टरोमाश्रुलोचनः स सुखितः सन् तत्पादपद्मं हृदि निदधौ ।।६।। ततः सुसमाहितः, तन्न्यस्तहृदयेक्षणः, स प्रह्लाद एकाग्रमनसा प्रेमगद्गदया वाचा च नृहरिमस्तौषीत् ।।७।। *प्रह्लाद उवाच* - ब्रह्मादयः सुरगणाः मुनयः -

नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः।।८।। *मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः। नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय।।९।। विप्राद् द्विषड्गुणयुतादरविन्द-नाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम्। मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः।।१०।।* नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते। यद् यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः।।११।। तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम्। नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ।।१२।। सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश तवोद्विजन्तः। क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः।।१३।।

।। सङ्ग्रहोक्तिः।।

सिद्धाश्च एते सर्वे सत्त्वैकनिष्ठमतयः सन्तो वचसां प्रवाहैर्बहुभिर्ज्ञानादिगुणैरपि यमाराधयितुं न शेकिरे, स हरिरसुरजातेर्मम स्तुतिभिः कथं संतोषमवाप्स्यति?।।८।। धना-ऽभिजन-रूप-तपः-श्रुत-ओजस्-तेजस्-प्रभाव-बल-पौरुष-बुद्धि-योगाः एते द्वादशगुणाः परमपुरुषस्य भगवत आराधनाय पर्याप्ता न भवन्ति, इत्यहं मन्ये, यतो भगवान् गजेन्द्राय भक्त्या तुतोष।।९।। उपर्युक्तैर्द्वादशभिर्गुणैर्युक्तादपि भगवतश्चरणारविन्दपराङ्मुखाद् विप्रात् मनोवचोकर्मप्राणैः भगवत्परायणं श्वपचमपि वरिष्ठं मन्ये, कुतः स भक्त्या स्वकुलं निखिलं पुनाति, किन्तु गुणाभिमानवान् स्वमपि न पुनाति।।१०।। भगवान् पूर्णकामः सन्नपि स्वयं सकरुणोऽल्पजनात् पूजां स्वीकरोति, सा पूजा भक्तहितायैव भवति, समाजे मुख्यस्य सत्कारः, सर्वस्य सुखाय भवति, तद्वत् भगवत्पूजाऽपि सर्वसुखायैव भवति।।११।। भगवान् भक्त्यैव तुष्यति, तस्माद् नीचोऽप्यहं निःशङ्कः सन् सर्वात्मनो भगवतो महिमानं यथामति स्तौमि, यया स्तुत्या प्राकृतशरीरप्रविष्टो नीचोऽपि पुमान् शुद्ध्येत।।१२।। हे ईश! वयमिव सर्वेऽपि ब्रह्मादयः सत्त्वमूर्तेस्तव किंकरा एव, ते त्वत्कोपाद् बिभ्यतो वर्तन्ते, भगवतस्तव सुन्दरैरेतैःप्रादुर्भावैः कृता विविधाः क्रीडा जगतः क्षेमाय, योगाय, आत्मसुखाय च भवन्ति।।१३।।

तद् यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या। लोकाश्च निर्वृतिमिताः प्रतियन्ति सर्वे रूपं नृसिंह विभयाय जनाः स्मरन्ति।।१४।। नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रकुटीरभसोग्रदंष्ट्रात्। आन्त्रस्रजः क्षतजकेसरशङ्कुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात्।।१५।। त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद् ग्रसतां प्रणीतः। बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु।।१६।। यस्मात् प्रियाप्रियवियोगसंयोग-जन्मशोकाग्निना सकलयोनिषु दह्यमानः। दुःखौषधं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगम्।।१७।। सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिञ्चगीताः। अञ्जस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः।।१८।। बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः।

।। सङ्ग्रहोक्तिः ।।

हे नृसिंह! कोपमुपसंहर, अधुनाऽसुरो मत्पिता हतः, भगवद्भक्ता अपि सुखं प्राप्ताः. साधुजनोऽपि वृश्चिकसर्पहननेन मोदेतैव, सुखिताः सर्वे जना निर्भयत्वाय तव क्रोधोपसंहारं प्रतीक्षन्ते।।१४।। हे अजित! आस्यस्थितैः जिह्वा-अर्कसमनेत्र-भृकुटी-रभस-उग्रदंष्ट्रादिभिरतिभयानकात् अन्त्रस्रजः, क्षतजकेसरशङ्कुकर्णात्, दिग्गजभयदनिनादात् अरिभिन्नखग्रात् तवाऽस्माद् रूपादहं न बिभेमि।।१५।। हे कृपणवत्सल! दुःसहोग्रसंसारचक्रदुःखादहं त्रस्तोऽस्मि, अहं अहंममत्वादिभिः संसारं प्रापितः, कर्मभिर्बद्धश्चाऽस्मि, हे कमनीयतम! प्रीतस्त्वं मोक्षोपायभूतं त्वत्पादपद्मसमीपं कदाऽऽह्वयसे?।।१६।। हे भूमन्! प्रियवियोगजेनाऽप्रियसंयोगजेन च शोकाग्निना दह्यमानोऽहं सकलयोनिषु देहाभिमानेन भ्रमामि, दुःखनिवृत्तेरुपायोऽपि दुःखरूप एवाऽस्ति, अतो दुःखनिवृत्तिपरं तव दास्ययोगं मे दिश।।१७।। प्रियसुहृदः परदेवतायास्ते ब्रह्मादिभिर्गीता लीलाकथा अनुगृणन्, रागादिभिर्विमुक्तः सन् भगवद्भक्तानां सत्संगेन महादुःखानि सुखेन तरिष्यामि।।१८।। बालस्य पितरौ शरणं न, ताभ्यां रक्षितस्याऽपि बालस्य दुःखसत्वात्, रोगार्तस्याऽगदं सुखकरं न, गृहीतागदस्याऽपि मृत्युदर्शनात्, समुद्रे -

तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्टस्तावद् विभो तनुभृतां त्वदुपेक्षितानाम् ।।१९।।
यस्मिन्यतो यर्हि येन च यस्य यस्माद् यस्मै यथा यदुत यस्त्वपरः परो वा। भावः
करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम् ।।२०।।
माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः। छन्दोमयं
यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत् त्वदन्यः।।२१।। स त्वं हि
नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्य विसर्गशक्तिः। चक्रे विसृष्टम-
जयेश्वर षोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नम् ।।२२।। दृष्टा मया दिवि
विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति याञ्जनोऽयम्। येऽस्मत्पितुः
कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः।।२३।।तस्मादमूस्त-
नुभृतामहमाशिषो ज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्चात्। नेच्छामि ते विलुलिता-
नुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वम् ।।२४।।

।। सङ्ग्रहोक्तिः ।।

नौः प्रवासितस्य रक्षिका न, क्वचिन्नावा सहितस्य समुद्रे निमज्जनदर्शनात्, अतो दुःखितानां प्राणिनां त्वमेव प्रतिपालकोऽसि ।।१९।। अपरः सर्वोत्तमः, परो ब्रह्मादिर्वा यो भावपदार्थः पृथग् भावः सन् जगत्सर्गादिरूपं कर्म येन पञ्चभूतादिवस्तुना कारणेन यस्मै भवते बल्याद्यर्थं यस्मात् त्वत्संकल्पात् यस्य तव संबन्धेन यस्मिन् काले एतस्मिन् अण्डे त्वया प्रेरितः सन् करोति तदखिलं भवतः स्वरूपमेव ।।२०।। हे अज! त्वदंशभूतस्य पुरुषस्य समीक्षणेन कर्ममयं बलीयः षोडशविकारात्मकं मनः माया रचयति, तत् संसारचक्ररूपं मनस्त्वतो-ऽन्यं भजस्त्वामभजन् कः पुमान् तरेत्? ।।२१।। हे विभो! सर्वेषां नियन्ता कालशरीरकस्त्वं अजया स्वकीयया मायया संसारे षोडशारचक्रे संपतितं निष्पीड्यमानं मां संसारचक्राद् बहिर्निर्गमय ।।२२।। हे विभो! अयं संसारी जनः यान् लोकापालानामायुःश्रीविभवान् इच्छति तेषां दिवि वर्तमानानां आयुः श्रीः विभवश्चैते मया दृष्टाः, ते अस्मत्पितुः कोप-हास-विजृम्भितेन ध्वस्ताः, एवंविधः मे पिता त्वया हतः ।।२३।। तस्माद् लोकपालादीनामायुरादीनां वेत्ताऽहं इन्द्रियभोग्यं आयुश्रियादिवैभवं आब्रह्मलोकान्नेच्छामि, कालात्मना तव विक्रमेण विध्वस्तान्

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः। निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन्दुरापैः।।२५।। क्वाहं रजःप्रभव ईश तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा। न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः।।२६।। नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथापि। संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वम्।।२७।। एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसङ्गात्। कृत्वाऽऽत्मसात् सुरर्षिणा भगवन् गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम्।।२८।। मत्प्राणरक्षणमनन्त पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम्। खड्गं प्रगृह्य तदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि।।२९।। एकस्त्वमेव जगदेतदमुष्य यत् त्वमाद्यन्तयोः पृथगवस्यसि मध्यतश्च।

।। सङ्ग्रहोक्तिः ।।

अणिमादिकानपि नेच्छामि, अतः स्वपार्षदानां समीपं मां प्रापय।।२४।। केवलं श्रवणप्रियाणि मृगतृष्णातुलानि स्वर्गादिसुखानि क्व? अशेषरोगोद्भवस्थानमिदं कलेवरं क्व? एतत् सर्वं जानन्नपि जनः कामाग्निं दुरापैः सुखलेशैः शमयन् वर्तते।।२५।। हे ईश! रजस्तमःप्रधानेऽसुरकुले जातोऽहं क्व? परमेश्वरस्य तवाऽनुकम्पा च क्व? परमप्रसादरूपस्तव पद्मवत्तापहरः करो मे शिरसि धृतः, यं करप्रसादं ब्रह्मा शिवो लक्ष्मीश्च एतेऽपि न प्राप्ताः।।२६।। देवा उत्तमाः अयमसुरो नीच इति परावरमतिस्तव नैवास्ति, अपि तु भक्तेच्छानुरूपा कल्पतरुवत् ते प्रसन्नता भवति।।२७।। संसाररूपे सर्पजुष्टकूपे विषयिजनप्रसङ्गात् पतमानं मां देवर्षिर्नारदो आत्मसात् कृत्वाऽनुजग्राह, सोऽहमिदानीं तव भृत्यसेवां कथं विसृजे।।२८।। हे अनन्त! मत्प्राणरक्षणं मज्जनकस्य वधश्च इत्येतदुभयं सनकादिवचनं सत्यं विधातुं कृतमिति मन्ये, एवं च मां जिघांसुः पिता खड्गं प्रगृह्य मत्तोऽन्यस्त्वद्रक्षकः परमेश्वरश्चेत् तर्हि स त्वामवतु, तव शिरो हरामि, इति तद्वचोऽसत्यं विधातुं मत्प्राणरक्षा त्वया कृता, इत्यहं मन्ये।।२९।। अस्य जगत आदिमध्यावसानेषु स्थित एकाकी त्वं विश्वं सृष्टवा तदनुप्रविष्टस्तैः-

सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः।।३०।। त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था। यद् यस्य जन्म निधनं स्थितिरीक्षणं च तद् वै तदेव वसुकालवदष्टितर्वोः।।३१।। न्यसेद-मात्मनि जगद् विलयाम्बुमध्ये शेषेऽऽत्मना निजसुखानुभवो निरीहः। योगेन मीलित-दृगात्मनि वीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे।।३२।। तस्यैव ते वपुरिदं निजकालशक्त्या सञ्चोदितप्रकृतिधर्मिण आत्मगूढम्। अम्भस्यनन्तशयनाद् विरमत्समाधेर्नाभेरभूत् स्वकणिकावटवन्महाब्जम्।।३३।। तत्सम्भवः कविरतो-ऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिन्त्य। नाविन्ददब्दशतमप्सु निमज्जमानो जातेऽङ्कुरे कथमुहोपलभेत बीजम्।।३४।। स त्वात्मयोनि-रतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः। त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श।।३५।।

।। सङ्ग्रहोक्तिः ।।

स्वशरीरभूतैश्चिदात्मकैर्देवादिभिर्नाना इव भिन्न एवावसितः, अतो देवमुनष्यादिभेदभिन्नं जगत्त्वमेवाऽसि।।३०।।हे ईश! चिदचिदात्मकमिदं जगत् त्वमेवासि, जीवात्मनि या ईश्वरमतिः सा मिथ्याभूताऽस्ति, यो यस्य उत्पत्तिस्थितिलयकारणं भवेत्, तद् वै तदेव स्यात्, अत एव कार्यं जगत् स्वोपादानकारणादव्यतिरिक्तमेव।।३१।। इदं जगत् आत्मनि विन्यस्य निजसुखानुभवो निरीहो मीलितदृक् वीतनिद्रस्तुर्य आत्मनि स्थितः सन् त्वं प्रलयोदकमध्ये शेषपर्यङ्के शयनं करोषि, तदानीं तमोरूपां प्रकृतिं सत्त्वादीन् तद्गुणांश्च न संबध्नासि।।३२।। कालशक्त्या संक्षुभितगुणप्रकृतिधर्मिणः शेषशयनात् विरमितसमाधेः सिसृक्षतोस्तव नाभेस्त्वच्छरीरभूतं जगदाकारं महाब्जं स्वबीजाद् वटवत् बभूव।।३३।।तस्माद् महाब्जादुद्भूतो ब्रह्मा तदन्यत् अपश्यमानः सन् स्वात्मन्यन्तर्यामितया व्याप्तं बीजं त्वां बहिः शतवर्षपर्यन्तं जले निमज्जमानो विचिन्वन् गवेषयन् नाऽविन्दत्।।३४।। स आत्मयोनिर्ब्रह्मा त्वतिविस्मितः परिवृत्याऽब्जमास्थितः, कालेन तीव्रतपसा परिशुद्धभावः सन् हे ईश! स भूतेन्द्रियाशयमये स्वस्मिन्नेव पृथिव्यां गन्धमिव विततमतिसूक्ष्मं ददर्श।।३५।।

एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम्। मायामयं सदुपलक्षितसंनिवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः।।३६।। तस्मै भवान् हयशिरस्तनुवं च बिभ्रद् वेदद्रुहावतिबलौ मधुकैटभाख्यौ। हत्वाऽऽनयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमाममन्ति।।३७।। इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि जगत्प्रतीपान्। धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्त्वम्।।३८।। नैतन्मनस्तव कथासु विकुण्ठनाथ सम्प्रीयते दुरितदुष्टमसाधु तीव्रम्। कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः।।३९।। *जिह्वैकतोऽच्युत विकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्। घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति।।४०।।* एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतम्।

।। सङ्ग्रहोक्तिः।।

पाद-मस्तक-कर-ऊरु-नासा-आस्य-कर्णादयो यस्मिन् स्वरूपे सहस्राणि व्यदृश्यन्त, ईदृक्स्वरूपं सर्वभूषणायुधोपेतं विलोक्य ब्रह्माऽपि हर्षमवाप।।३६।। तदा भगवान् हयग्रीवमूर्तिं बिभ्रत् सन् रजस्तमःप्रधानावतिबलौ वेदद्रुहौ मधुकैटभाख्यावसुरौ हत्वा वेदगणान् विरिञ्चाय समर्पितवान्, तव प्रियतमं तत्स्वरूपं शुद्धसत्वात्मकमामनन्ति।।३७।। हे महापुरुष! इत्थं मनुष्यदेवर्षितिर्यगादिष्वतारान् धृत्वा लोकान् सुखयसि, एवं जगद्द्रोहिणो विहंसि, युगानुरूपं धर्मं रक्षसि, त्रेतादियुगत्रये धृतावतारः कलौ यथोपयोगैश्वर्यस्वीकारेण निगूहितैश्वर्योऽभवः।।३८।। हे विकुण्ठनाथ! दुरितैर्दुष्टमसाधु तीव्रं विषयैकप्रवणं हर्ष-शोक-भय-एषणार्तं मदीयमेतन्मनः तव कथासु न संप्रीयते, एवंविधे मनसि दीनोऽहं तव गतिं कथं विचारयामि।।३९।। हे अच्युत! अतृप्ता जिह्वा मामेकतो रसान् प्रति विकर्षति, एवमवितृप्तः शिश्नः, त्वक्, उदरं, श्रवणं, घ्राणः, चपला दृष्टिः, पाणिपादादिकर्मशक्तिश्च एतानि सर्वाणीन्द्रियाणि बह्व्यः सपत्न्यो गृहस्थपुरुषमिव लुनन्ति।।४०।। यमलोकवैतरण्यां स्वकर्मभिः पतितमन्योन्य जन्ममरणाशनभीतभीतं परस्परवैरविग्रहं मूढं जनं पश्यन् त्वं हे पारचर! अद्यैतस्मात् -

पश्यञ्जनं स्वपरविग्रहवैरमैत्रं हन्तेति पारचर पीपृहि मूढमद्य ॥४१॥ को न्वत्र तेऽखिलगुरो भगवन्प्रयास उत्तारणेऽस्य भवसम्भवलोपहेतोः। मूढेषु वै महदनुग्रह आर्तबन्धो किं तेन ते प्रियजनाननुसेवतां नः ॥४२॥ नैवोद्विजे पर दुरत्ययवैतरण्या-स्त्वद्वीर्यगायनमहामृतमग्नचित्तः। शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥४३॥ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरन्ति विपिने न परार्थनिष्ठाः। नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥४४॥ यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम्। तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः ॥४५॥ *मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः। प्रायः परं पुरुष ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥४६॥* रूपे इमे सदसती तव वेददृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य।

॥ सङ्ग्रहोक्तिः ॥

कष्टात् वैतरणीमुत्तारय ॥४१॥ हे अखिलगुरो! भगवन्! अस्य कृत्स्नस्य जगत उत्पत्तिलय-कारणस्य ते मदीयजनतारणे को नु प्रयासः? हे आर्तबन्धो! मूढा महद्भिरनुग्राह्या एव, तव प्रियजनाननुसेवतां नः एकाकिना पारगमनेन किम्? न किमपि ॥४२॥ हे सर्वोत्तम! हे हरे त्वच्चरित्रगानामृतमग्नचित्तोऽहं भववैतरण्या न बिभेमि, किन्तु त्वद्वीर्यगानविमुखान् इन्द्रियार्थ-मायासुखान् कुटुम्बादिभारमुद्वहतो विमूढान् शोचामि ॥४३॥ हे देव! प्रायेण महान्तो मुनिजनाः स्वविमुक्तिकामाः सन्तोऽरण्ये मौनं चरन्ति, न तु परार्थनिष्ठाः, ततः कृपणान् मदीयजनान् विहायाहमेकस्तु मोक्तुं नेच्छामि, यतः संसृतौ भ्रमतो जनस्य त्वत्तोऽन्यं शरणं नैव पश्यामि। ॥४४॥ मैथुनप्रभृतिकं गृहस्थजनसुखं यत्, तत् दूषितहस्तयोर्घर्षणेन भूरिदुःखोत्पादकं अत एव तुच्छं हि, कामिनो बहुदुःखभाजः सन्तोऽपि न तृप्यन्ति, धीरश्चेत् कण्डूतिवत् काममपि विषहेत ॥४५॥ हे परमपुरुष! मौनं, व्रतं, श्रुतं, तपः, अध्ययनं, स्वधर्मः, व्याख्या रहः, जपः, समाधिः, एते दशगुणा जितेन्द्रियाणामेवापवर्गहेतवो भवन्ति, अजितेन्द्रियाणां तु जीवनोपाया वार्ता एव भवन्ति, दाम्भिकानां तु वार्ताः भवन्ति वा न ॥४६॥ बीजाङ्कुराविव

युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात्।।४७।। त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च। सर्वं त्वमेव सगुणो विगुणश्च भूमन् नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम्।।४८।। नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः। आद्यन्तवन्त उरुगाय विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात्।।४९।। तत् तेऽर्हत्तम नमःस्तुतिकर्मपूजाः कर्मस्मृतिश्चरणयोः श्रवणं कथायाम्। संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत।।५०।। *नारद उवाच* – एतावद्वर्णित-गुणो भक्त्या भक्तेन निर्गुणः। प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत।।५१।। *श्रीनृसिंह उवाच* – प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम। वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम्।।५२।। मामप्रीणत आयुष्मन्दर्शनं दुर्लभं हि मे। दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति।।५३।। प्रीणन्ति ह्यथ मां धीराः सर्वभावेन साधवः। श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम्।।५४।।

।। सङ्ग्रहोक्तिः ।।

स्थिते वेददृष्टे चिदचिद्द्रव्यरूपे इमे रूपे कर्माधीनशरीररहितस्य तव अत्वदात्मकं किंचिदपिवस्तु नास्ति, उभयत्र – चिदचितोर्वर्तमानं त्वां योगेन युक्ता मुनयो दारुषु वह्निमिव साक्षात् पश्यन्ति।।४७।। यत् किंच पञ्चमहाभूतप्राणेन्द्रियमनोऽहंकारादिस्थूलसूक्ष्मात्मकं मनोवचोभ्यां प्रकाशितं दृश्यते तत् सर्वं त्वमेवाऽसि।।४८।। सर्वे महत्तत्त्वादयस्तेषां देवताश्च सोपाध्याया आद्यवन्तश्च सन्ति, ते निरुपाधिमाद्यन्तहीनं त्वां न जानन्ति, एवं विमृश्य विद्वांसस्त्वामेव ध्यानादिभिर्भजन्ति।।४९।। हे पूज्यतम! नमस्कारः, स्तुतिः, सर्वकर्मार्पणं, सेवां, चरणयोः स्मरणं, कथाश्रवणं च इत्येवं षडङ्गया सेवया विनाऽयं जनस्त्वयि भक्तिं कथं प्राप्नुयात्।।५०।। निर्गुणोऽपि भक्तेनैतावद्वर्णितगुणो भगवान् नृसिंहः प्रीतः शान्तमन्युः सन् प्रणतं प्रह्लादमभाषत।।५१।। *श्रीनृसिंह उवाच* – हे वत्स प्रह्लाद! ते भद्रमस्तु, हे असुरोत्तम! अहं तुभ्यं प्रसन्नोऽस्मि, त्वमभिमतं वरं वृणीष्व, अहं नृणां कामपूरोऽस्मि।।५२।। हे आयुष्मन्! मामप्रीणतः पुंसो मे दर्शनं दुर्लभं हि, देही मां दृष्ट्वा पुनः तप्तुं नार्हति।।५३।। अतः धीराः

नारद उवाच - एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः। एकान्तित्वाद् भगवति नैच्छत् तानसुरोत्तमः।।५५।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे नवमोऽध्यायः।।९।।

अथ दशमोऽध्यायः।।१०।।

नारद उवाच - भक्तियोगस्य तत् सर्वमन्तरायतयार्भकः। मन्यमानो हृषीकेशं स्मयमान उवाच ह।।१।। *प्रह्लाद उवाच* - मा मां प्रलोभयोत्पत्त्याऽऽसक्तं कामेषु तैर्वरैः। तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः।।२।। भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत्। भवान् संसारबीजेषु हृदयग्रन्थिषु प्रभो। *नान्यथा तेऽखिलगुरो घटेत करुणात्मनः।।३।। यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्। आशासनो न वै भृत्यः स्वामिन्याशिष आत्मनः।*

।। सङ्ग्रहोक्तिः ।।

श्रेयस्कामा महाभागाः साधवः सर्वेषां पुरुषार्थानां दातारं मां सर्वभावेन तोषयन्ति।।५४।। *नारद उवाच* - एवं लोकप्रलोभनैर्वरैः प्रलोभ्यमानोऽपि भगवति एकान्तिकत्वात् असुरोत्तमः प्रह्लादस्तान् वरान् नैच्छत्।।५५।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः।।९।।

अथ दशमोऽध्यायः ।।१०।।

रुद्रस्योपपरि भगवदनुग्रहः

नारद उवाच - नृहरिणोक्तं वरप्रार्थनादिकं सर्वं भक्तौ विघ्नरूपं विदित्वा बालः प्रह्लादः स्मयमानः सन् हृषीकेशं तमाह।।१।। *प्रह्लाद उवाच* - हे भगवन्! स्वभावेनैव विषयेष्वासक्तं मां कामरूपैर्वरै मा प्रलोभय, विषयासक्त्या भीतोऽहं निर्विण्णो मुमक्षुः सन् त्वां शरणं प्राप्तोऽस्मि।।२।। प्रभुर्भवान् संसारबीजेषु दुर्मोच्येषु कामेषु भृत्यं मां भृत्यलक्षणजिज्ञासुः सन्नचोदयत्, हे अखिलगुरो! अन्यथा करुणात्मनस्तव विषयेषु प्रवर्तनं न घटेत।।३।। यः

न स्वामी भृत्यतः स्वाम्यमिच्छन् यो राति चाशिषः।।४।। अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः। नान्यथेहावयोरर्थो राजसेवकयोरिव।।५।। *यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ। कामानां हृद्यसंरोहं भवतस्तु वृणे वरम्।।६।।* इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः। ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना।।७।। विमुञ्चति यदा कामान्मानवो मनसि स्थितान्। तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते।।८।। ॐनमो भगवते तुभ्यं पुरुषाय महात्मने। हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने।।९।। *नृसिंह उवाच*– नैकान्तिनो मे मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः। अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ।।१०।। कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि सन्तमेकम्। सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन्।।११।।

।। सङ्ग्रहोक्तिः ।।

पुमान् त्वत्तः कामान् प्रार्थयते स भृत्यो (भक्तो) न, स तु वणिक्तुल्यः, यथा च स्वस्य स्वामिनि कामान् कामयानो भृत्यो न भवति, तथा भृत्यात् स्वस्य स्वामिभावमिच्छन् यः स्वामी कामान् भृत्याय ददाति सः स्वामी न, यौ गुणलब्धौ, स एव भृत्यः, स एव स्वामी च।।४।। अहं त्वनन्यप्रयोजनस्त्वद्भक्तः त्वं तु निरपेक्षोऽसि अत इहावयोः राजसेवकयोरिव स्वार्थरूपं प्रयोजनं नास्ति।।५।। हे ईश! हे वरदर्षभ! यदि त्वं मे इष्टान् वरान् ददासि, तर्हि तु भवतोऽहं कामानां हृद्यनुत्पत्तिरूपं वरं वृणे।।६।। यस्य कामाङ्कुरस्य जन्मना इन्द्रियाणि मनः, प्राणाः, आत्मा, धर्मः, धृतिः, मतिः, ह्रीः, श्रीः, तेजः, स्मृतिः, सत्यं, चेत्येतेषां सर्वेषां नाशो भवति।।७।। हे पुण्डरीकाक्ष! यदा मानवो मनसि स्थितान् सर्वान् कामान् विमुञ्चति, तर्हि स मानवो भगवत्त्वाय=मुक्तये योग्यो भवति।।८।। भगवते पुरुषाय महात्मने हरय अद्भुतसिंहाय, ब्रह्मणे परमात्मने ॐ इति प्रणव प्रतिपाद्याय तुभ्यं नमः।।९।। *श्रीनृसिंह उवाच* – हे प्रह्लाद! त्वादृशा ये मे एकान्तिनो भक्तास्ते मत्तो जात्विहाऽमुत्र च कामान् न प्रार्थयन्ते, तथापि त्वमेतन्मन्वन्तरपर्यन्तं लोके दैत्येश्वरगणानामधिपो भूत्वा भोगान् भुङ्क्ष्व।।१०।। त्वं प्रिया मदीयाः कथा जुषमाणः सन् बद्धो न स्याः, सर्वभूतेष्वन्तरात्मतया –

भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा। कीर्त्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबन्धः।।१२।। य एतत् कीर्तयेन्मह्यं त्वया गीतमिदं नरः। त्वां च मां च स्मरन्काले कर्मबन्धात् विमुच्यते।।१३।। *प्रह्लाद उवाच* – वरं वरय एतत् ते वरदेशान्महेश्वर। यदनिन्दत् पिता मे त्वामविद्वांस्तेज ऐश्वरम्।।१४।। वृद्धामर्षाशयः साक्षात् सर्वलोकगुरुं प्रभुम्। भ्रातृहेति मृषादृष्टिस्त्वभक्ते मयि चाघवान् ।।१५।। तस्मात्पिता मे पूयेत दुरन्ताद् दुस्तरादघात्। पूतस्तेऽपाङ्गसंदृष्ट-स्तदा कृपणवत्सल।।१६।। *श्रीभगवानुवाच* – त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ। यत् साधोऽस्य गृहे जातो भवान्वै कुलपावनः।।१७।। यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः। साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः।।१८।। सर्वात्मना न हिंसन्ति भूतग्रामेषु किञ्चन। उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः ।।१९।।

।। सङ्ग्रहोक्तिः।।

विद्यमानमेकमधियज्ञं परमेश्वरं हृदये ध्यात्वा कर्मक्षयं कुर्वन् भक्तियोगेन मां यजस्व।।११।। पुण्यं कर्म भोगेन, पापं कर्म प्रायश्चित्तादिकुशलकर्मणा हित्वा, कालजवेन कलेवरं त्यक्त्वा, सुरलोकगीतां विशुद्धां कीर्त्तिं विस्तार्य, मुक्तबन्धस्त्वं मामेष्यसि।।१२।। यः पुमान् त्वां मां च स्मरन् त्वया गीतं मत्स्तवनं कीर्त्तयेत्, स पुमान् प्रारब्धावसानसमये विमुच्यते।।१३।। *प्रह्लाद उवाच* – हे महेश्वर! वरदानामीश्वरात् त्वत्तोऽहं वरं वरये, मे पिता ऐश्वरं प्रभावमजानन्, वृद्धामर्षः सन् सर्वलोकगुरुं साक्षात् प्रभुं त्वामनिन्दत्, त्वद्भक्ते मयि च द्रोहं कृतवान्, हे नृहरे! मम पिता तस्माद् दुरन्तात् पापात् विशुद्ध्येत, इत्येतं वरं वृणे, हे कृपणवत्सल! तदा स ते कटाक्षेक्षणकाल एव पूतः।।१४-१६।। *श्रीभगवानुवाच* – हे अनघ! हे साधो! कुलपावनो भवान् अस्य गृहे जातस्ततस्ते पितैव केवलं न पूतः, किन्तु त्रिसप्तभिः (एकविंशतिसंख्यकैः) पितृभिः सह पूतः।।१७।। समदर्शिनः प्रशान्ताः परोपकारशीला मद्भक्ता यत्र देशे सन्ति ते कीकटतुल्या देशा अपि शुद्धा भवन्ति।।१८।। हे दैत्येन्द्र! लोके ये मद्भक्ता भवन्ति, ते भक्तश्रेष्ठं त्वामेवानुवर्तन्ते, अतो भवान् खलु मे भक्तानां दृष्टान्तरूपोऽस्ति, उच्चावचेषु –

भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः। भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृत् ।।२०।। कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः। मदङ्गस्पर्शनेनाङ्ग लोकान् यास्यति सुप्रजाः।।२१।। पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः।।२२।। *नारद उवाच* - प्रह्लादोऽपि तथा चक्रे पितुर्यत्साम्परायिकम्। यथाऽऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः।।२३।। प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम्। स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ।।२४।। *ब्रह्मोवाच* - देवदेवाखिलाध्यक्ष भूतभावन पूर्वज। दिष्ट्या ते निहतः पापो लोकसन्तापनोऽसुरः।।२५।। योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः। तपोयोगबलोन्नद्धः समस्तनिगमानहन्।।२६।। दिष्ट्यास्य तनयः साधुर्महाभागवतोऽर्भकः। त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना।।२७।। एतत् वपुस्ते भगवन् ध्यायतः प्रयतात्मनः। सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः।।२८।।

।। सङ्ग्रहोक्तिः ।।

भूतग्रामेषु सर्वात्मना कांश्चनाऽपि न हिंसन्ति, मद्भावेन विगतस्पृहाश्च भवन्ति।।१९-२०।। अतस्त्वं सर्वथा पूतस्य तव पितुः प्रेतकार्याणि कुरु, हे प्रह्लाद! सुप्रजस्तव पिता मदङ्गस्पर्शेनैव पुण्यलोकान् यास्यति।।२१।। अधुना पित्र्यं स्थानमातिष्ठ, हे तात! मयि मन आवेश्य, ब्रह्मवादिभिर्यथोक्तं मत्परः सन् मदाराधानरूपाणि कर्माणि कुरु।।२२।। *नारद उवाच* - हे राजन्! भगवान् नृसिंहो यथाऽऽह तथा प्रह्लादः पितुः प्रेतोद्देशेन कर्तव्यं कर्म चक्रे, ततो द्विजोत्तमैरभिषिक्तो बभूव।।३३।। ततः प्रसादसुमुखं नरहरिं भगवन्तं दृष्ट्वा ब्रह्मा देवादिभिः वृतः सन् पवित्राभिर्वाग्भिः स्तुत्वा प्राह।।२४।। *ब्रह्मोवाच* - हे देवाधिदेव! हे अखिलाध्यक्ष! हे भूतभावन! हे पूर्वज! लोकसंतापनोऽसुरपापस्त्वया निहतो दिष्ट्या।।२५।। योऽसावसुरो मत्तो लब्धवरः "मम सृष्टिभिर्न वध्यः" इत्यतस्तपोयोगबलोद्धतः स सर्वशास्त्रीयधर्मान् विनाशितवान्।।२६।। किंचाऽस्याऽसुरस्य तनयस्तत्रापि बालको महाभागवतः साधुः प्रह्लादस्त्वया मृत्योर्विमोचितः, एतदपि दिष्ट्या, अधुना त्वां स सम्यक् प्राप्तस्तदपि भद्रं जातम्।।२७।। हे भगवन्! एतद् नृसिंहरूपं ध्यायतः समाहितमनसः पुंसः सर्वतः संत्रासात्

नृसिंह उवाच – नैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव। वरः क्रूरनिसर्गाणामहीनाममृतं यथा॥२९॥ *नारद उवाच* – इत्यक्त्वा भगवान् राजंस्तत्रैवान्तर्दधे हरिः। अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना॥३०॥ ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम्। भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः॥३१॥ ततः काव्यादिभिः सार्धं मुनिभिः कमलासनः। दैत्यानां दानवानां च प्रह्लादमकरोत् पतिम्॥३२॥ प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः। स्वधामानि ययू राजन्ब्रह्माद्याः प्रतिपूजिताः॥३३॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः। हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥३४॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः। कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥३५॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः। तच्चित्तौ जहतुर्देहं यथा प्राक्तन-जन्मनि॥३६॥ ताविहाथ पुनर्जातौ शिशुपालकरूषजौ। हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः॥३७॥ एनः पूर्वकृतं यत् तद् राजानः कृष्णवैरिणः।

॥ सङ्ग्रहोक्तिः॥

रक्षकं, जिघांसतो मृत्योरपि गोप्तृ भवति॥२८॥ *श्रीनृसिंह उवाच* – हे पद्मसंभव! इतः प्रभृति त्वयाऽसुराणामेवंभूतो वरो न देयः, क्रूरस्वभावानामसुराणां वरः "सर्पाणां क्षीरपानं विषवर्धनम्" इव केवलं लोकोपद्रवकारी भवति॥२९॥ *नारद उवाच* – हे राजन्! ततो भगवान् हरिरित्युक्त्वा ब्रह्मणा पूजितः सर्वभूतानामदृश्यः सन् तत्रैवाऽन्तर्दधे॥३०॥ ततः प्रह्लादः परमेष्ठिनं, भवं, प्रजापतीन् देवांश्च, भगवदंशभूतान् सर्वान् संपूज्य शिरसा ववन्दे॥३१॥ ततो ब्रह्मा शुक्राचार्यादिभिर्मुनिभिः साकं प्रह्लादं दानवानां दैत्यानां चाधिपमकोरत्॥३२॥ विष्णोः पार्षदौ तौ जयविजयौ विप्रशापेन दितेः पुत्रत्वं प्रापितावास्ताम्, तौ वैरभावेन हृदि स्थितेन हरिणा नृसिंहं वाराहं रूपं च धृत्वा हतौ॥३४॥ पुनश्च तौ विप्रशापेन राक्षसौ बभूवतुः, कुम्भकर्णरावणौ तौ रामचंद्रपराक्रमैर्हतौ॥३५॥ तावपि रामबाणैर्युधि निर्भिन्नहृदयौ हतौ, रामं स्मरन्तौ सन्तौ पूर्वजन्मवत् देहं जहतुः॥३६॥ ताविह शिशुपालदन्तवक्त्ररूपौ पुनर्जातौ तव पश्यतः सतो वैरानुबन्धेन कृष्णेन हतौ सन्तौ सायुज्यं प्रापतुः॥३७॥ कृष्णवैरिणो येऽन्ये राजानस्तेऽपि पूर्वकृतं पापं संतत्यजुः, पेशस्कृतः चिन्तनात् कीट इव तत्तुल्यस्वभावा अभवन्॥३८॥

जहुस्त्वन्ते तदात्मानः कीटः पेशस्कृतो यथा ।।३८।। यथा यथा भगवतो भक्त्या परमया भिदा। नृपाश्चैद्यादयः साम्यं हरेस्तच्चिन्तया ययुः ।।३९।। आख्यातं सर्वमेतत् ते यन्मां त्वं परिपृष्टवान्। दमघोषसुतादीनां हरेः साम्यमपि द्विषाम् ।।४०।। एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः। अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ।।४१।। प्रह्लादस्यानुचरितं महाभागवतस्य च। भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ।।४२।। सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम्। परावरेषां स्थानानां कालेन व्यत्ययो महान् ।।४३।। धर्मो भागवतानां च भगवान्येन गम्यते। आख्यानेऽस्मिन् समाख्यातमाध्यात्मिकमशेषतः ।।४४।। य एतत् पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम्। कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ।।४५।। एतद् य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत। दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकम् ।।४६।। यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति।

।।। सङ्ग्रहोक्तिः ।।

यथाऽनन्यया भक्ताः सम्यं यान्ति तद्वदेव शिशुपालादयोऽपि संरम्भपूर्वकं भगवच्चिन्तनेन साम्यमापुः ।।३९।। द्विषतां शिशुपालादीनां तत्साम्यं कथमिति यत् त्वं मां परिपृष्टवान्, एतत्ते सर्वं मयाऽऽख्यातम् ।।४०।। ब्रह्मण्यदेवस्य महात्मनः कृष्णस्य पुण्यैषावतारकथाऽऽख्याता, यत्राऽऽदिदैत्ययोर्वधः प्रतिपादितः ।।४१।।यत्र महाभागवतस्य प्रह्लादस्य चरित्रं भक्तिः, ज्ञानं, विरक्तिः, श्रीहरेर्याथात्म्यं च निश्चयेन समाख्यातम् ।।४२।। जगत्सर्गस्थितिलयकारणस्य हरेर्गुणानां कर्मणां चाऽनुवर्णनं, देवासुरादीनां स्थानानां कालेन महान् विपर्यासश्च समाख्यातः ।।४३।। श्रीभगवान् येन लभ्यते, तथाविधो भागवतो धर्मः, यच्चाऽऽध्यात्मिकं वस्तु तदप्यस्मिन् आख्याने समाख्यातमस्ति ।।४४।। यः पुमान् भगवतो विष्णो वीर्योपबृंहितं विस्तीर्णं पुण्यमाख्यानं श्रद्धया श्रुत्वा कीर्त्तयेत् स पुमान् कर्मपाशैर्विमुच्यते ।।४५।। यः पुमान् आदिपुरुषस्य मृगेन्द्रलीलां, दैत्येन्द्रहिरण्यकशिपुवधविषयकमेतदाख्यानं सतां प्रवरस्य प्रह्लादस्य पुण्यं प्रभावं च श्रुत्वा समाहितचित्तः सन् पठेत् सोऽकुतोभयं वैकुण्ठलोकं प्राप्नोति ।।४६।।

येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ।।४७।। स वा अयं ब्रह्म महद्विमृग्य कैवल्यनिर्वाणसुखानुभूतिः। प्रियः सुहृद् वः खलु मातुलेय आत्मार्हणीयो विधिकृद् गुरुश्च ।।४८।। न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम्। मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः।।४९।। स एष भगवान् राजन् व्यतनोद्विहतं यशः। पुरा रुद्रस्य देवस्य मयेनानन्तमायिना ।।५०।। *राजोवाच* – कस्मिन् कर्मणि देवस्य मयोऽहञ्जगदीशितुः। यथा चोपचिता कीर्त्तिः कृष्णेनानेन कथ्यताम् ।।५१।। *नारद उवाच* – निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः। मायिनां परमाचार्यं मयं शरणमाययुः।।५२।। स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः। दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ।।५३।। ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन् सेश्वरान् नृप।

।। सङ्ग्रहोक्तिः ।।

हे युधिष्ठिर! मनुष्यलोके यूयं बहुभाग्यवन्तः स्थ, येषां युष्माकं गृहान् लोकं पुनाना मुनयोऽभियान्ति, कुतः मनुष्यसमानशरीरं साक्षात् परंब्रह्म श्रीकृष्णरूपं प्रच्छन्नं सत् येषां गृहान् आवसति ।।४७।। सोऽयं श्रीकृष्णो युष्माकं मातुलेयः, प्रियः, सुहृत्, अन्तरात्मा, पूज्यः, विधिकृत्, गुरुश्चास्ति, एवं भूतःसन्नपि परमानन्दानुभूतिरूपः, महतामपि तत्स्वरूपं दुरवगमं वर्तते।।४८।। साक्षात् वर्तमानस्य यस्य श्रीकृष्णभगवतः स्वरूपं भवब्रह्मादिभिः स्वमनीषया याथात्म्येन न विषयीकृतं, किंतु केवलेन मौनेन, भक्त्या इन्द्रियजयादिना च पूजितः सात्वतां पतिरेष भगवान् मह्यं प्रसन्नो भवतु ।।४९।।हे राजन्! स एव भगवान् श्रीकृष्णः पुराऽनन्तमायिना मयेन विहतं देवस्य रुद्रस्य यशो विततान।।५०।। *राजोवाच* – जगदीशितुर्देवस्य रुद्रस्य कीर्त्तिं कस्मिन् कर्मणि मयो हतवान्, या तस्य कीर्तिः कृष्णेना–ऽभिवर्द्धिता, तच्च कथ्यताम् ।।५१।। इति राज्ञा पृष्टो देवर्षिराह, *नारद उवाच* – रुद्रेणा–ऽऽहितबलैर्देवैर्युधि निर्जिता असुरा मायिनां परमाचार्यं मयासुरं शरणमाययुः।।५२।। ततो विभुः स मयो हैमी, रौप्या, आयसी चेति तिस्रः पुरः निर्मायाऽसुरेभ्यो ददौ, ताः दुर्लक्ष्यगमनागमनाः, दुर्वितर्क्यपरिच्छदाः आसन् ।।५३।। हे नृप! विमानरूपाभिः पूर्भिरसुरसेनान्यो देवैरनवेक्ष्यमाणाः पूर्ववैरं स्मरन्तः –

स्मरन्तो नाशयाञ्चक्रुः पूर्ववैरमलक्षिताः ।।५४।। ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो। त्राहि नस्तावकान्देव विनष्टांस्त्रिपुरालयैः ।।५५।। अथानुगृह्य भगवान्मा भैष्टेति सुरान्विभुः। शरं धनुषि सन्धाय पुरेष्वस्त्रं व्यमुञ्चत ।।५६।। ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात्। यथा मयूखसंदोहा नादृश्यन्त पुरो यतः ।।५७।। तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः। तानानीय महायोगी मयः कूपरसेऽक्षिपत् ।।५८।। सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः। उत्तस्थुर्मेघदलनाद् वैद्युता इव वह्नयः ।।५९।। विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम्। तदायं भगवान्विष्णु-स्तत्रोपायमकल्पयत् ।।६०।। वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः। प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ।।६१।। तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः। तद् विज्ञाय महायोगी रसपालानिदं जगौ। स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ।।६२।। देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन।

।। सङ्ग्रहोक्तिः ।।

सन्तः सेश्वरान् त्रीन् लोकान् नाशयांचक्रुः ।।५४।। ततः सेश्वरा लोका समर्थमीश्वरं रुद्रमुपसाद्य, हे देव! त्रिपुरालयैरसुरैर्विनष्टान् त्वदीयान् त्राहि, इति नम्राः सन्त ऊचुः ।।५५।। अथ भगवान् रुद्रस्तान् सुरान् मा भैष्ट, इत्यनुगृह्य धनुषि शरं संधाय, तस्मिन् पाशुपतास्त्रं संयोज्य तत् पुरेषु व्यमुञ्चत ।।५६।। यथा सूर्यमण्डलात् रश्मिसमूहा निर्गच्छेयुस्तथा तस्मात् शरादग्निवर्णा-बाणा उत्पेतुः. यैर्बाणैः जनैः पुराणि नाऽदृश्यन्त, किन्तु छिन्नानि बभूवुः ।।५७।। ततो बाणैर्विद्धा त्रिपुरौकसः निष्प्राणाः सन्तो निपेतुः, तान् मृतानसुरानानीय महायोगी मयः स्वयं निर्मिते कूपस्थे मृतसंजीवयितरि रसेऽपातयत् ।।५८।। सिद्धामृतरसस्पृष्टा वज्रसारा महोजस असुरा मेघच्छेदात् वैद्युता वह्नय इवोत्तस्थुः ।।५९।। तदा भग्नसंकल्पं दुःखितमनसं रुद्रं विलोक्याऽयं श्रीकृष्णरूपो विष्णुस्तत्र सिद्धामृतरसविनाश उपायमचीकरत् ।।६०।। तदा विष्णुः स्वयं गौरासीत्, ब्रह्मा तद्वत्स आसीत् ततः सवत्सो गोरूपधरो विष्णुस्त्रिपुरं प्रविश्य मध्याह्ने रसरूपकूपामृतं पपौ ।।६१।। तेऽसुराः पश्यन्तोऽपि विमोहिताः सन्तो न न्यवारयन्, महायोगी मयस्तज्ज्ञात्वा शोकार्तान् रसपालान् विशोकः स्वयं दैवगतिं स्मरन् संश्चेदं जगौ ।।६२।।

आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः॥६३॥ अथासौ शक्तिभिः स्वाभिः शम्भोः प्राधानिकं व्यधात्। धर्मज्ञानविरक्त्यर्द्धितपोविद्याक्रियादिभिः। रथं सूतं ध्वजं वाहान्धनुर्वर्म शरादि यत् ॥६४॥ सन्नद्धो रथमास्थाय शरं धनुरुपाददे। शरं धनुषि सन्धाय मुहूर्तेऽभिजितीश्वरः। ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप॥६५॥ दिवि दुन्दुभयो नेदुर्विमानशतसङ्कुलाः। देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः। अवाकिरञ्जगुर्हृष्टा ननृतुश्चाप्सरोगणाः॥६६॥ एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप। ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत॥६७॥ एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः। वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान् पुनानान्यपरं वदामि किम्॥६८॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे दशमोऽध्यायः॥१०॥

॥ सङ्ग्रहोक्तिः॥

आत्मनोऽन्यस्य वा द्वयोरपीश्वरेणाऽऽदिष्टं सुखं वा दुःखं व्यपोहयितुमिह लोके कश्चन देवोऽसुरो मनुष्यो वा समर्थो न भवति॥६३॥ अथाऽसौ श्रीकृष्णः धर्म-ज्ञान-विरक्ति-ऋद्धि-तपः-विद्या-क्रियादिभिः स्वाभिः शक्तिभिः शम्भोर्युद्धे समृद्धिसाहाय्यं व्यधात्॥६४॥ एवं सर्वस्मिन् युद्धसाधने सम्पन्ने सति सन्नद्धो रुद्रो रथमास्थाय शरं धनुश्चाऽऽददे, ततो रुद्रोऽभिजिन्मुहूर्ते शरं धनुषि संधाय, हे नृप! तेन शरेण दुर्भेद्यानि त्रीणि पुराणि कात्स्न्येन ददाह॥६५॥ तदा दिवि दुन्दुभयो नेदुर्विमानशतसंकुला देव-ऋषि-पितृ-सिद्धेशाः सर्वे जय जयेति वदन्तः कुसुमवर्षैः रुद्रमवाकिरन्, हृष्टाः सन्तो जगुः, अप्सरोगणाः ननृतुश्च॥६६॥ हे नृप! एवं तिस्रः पुरो दग्ध्वा पुरघ्न संज्ञां प्राप्तो भगवान् रुद्रो ब्रह्मादिभिः स्तूयमानः सन् स्वस्थानं प्रत्यपद्यत॥६७॥ एवं स्वसंकल्पेन स्वस्य नृलोकमनुकुर्वतो हरेर्जगद्गुरोरस्य श्रीकृष्णस्य ऋषिभिर्गीतानि लोकान् पुनानानि वीर्याणि बहूनि सन्ति, अतोऽन्यत् किं वदामि॥६८॥

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः॥१०॥

अथ एकादशोऽध्यायः ।।११।।

श्रीशुक उवाच – श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्यमुरुक्रमात्मनः। युधिष्ठिरो दैत्यपतेर्मुदा युतः पप्रच्छ भूयस्तनयं स्वयम्भुवः।।१।। *युधिष्ठिर उवाच* - भगवञ्छ्रोतुमिच्छामि नृणां धर्मं सनातनम्। वर्णाश्रमाचारयुतं यत् पुमान्विन्दते परम्।।२।। भवान् प्रजापतेः साक्षादात्मजः परमेष्ठिनः। सुतानां सम्मतो ब्रह्मंस्तपोयोगसमाधिभिः।।३।। नारायणपरा विप्रा धर्मं गुह्यं परं विदुः। करुणाः साधवः शान्तास्त्वद्विधा न तथापरे।।४।। *नारद उवाच* – नत्वा भगवतेऽजाय लोकानां धर्मसेतवे। वक्ष्ये सनातनं धर्मं नारायाणमुखाच्छ्रुतम्।।५।। योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः। लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे।।६।। धर्ममूलं हि भगवान् सर्ववेदमयो हरिः। स्मृतं च तद्विदां राजन् येन चात्मा प्रसीदति।।७।। सत्यं दया तपः शोचं तितिक्षेक्षा शमो दमः।

।। सङ्ग्रहोक्तिः ।।

अथ एकादशोऽध्यायः।।११।।

वर्णाश्रमाणां स्त्रीणां च मुख्यामुख्यधर्मविवेचना

श्रीशुक उवाच – उरुक्रमात्मनो दैत्यपतेः प्रह्लादस्य साधुसभानुसेवितं चरित्रं श्रुत्वा हर्षेण युक्तो युधिष्ठिरो भूयो महत्तमानामग्रगण्यं ब्रह्मपुत्रं नारदं पप्रच्छ।।१।। *युधिष्ठिर उवाच* – हे भगवन्! अहं वर्णाश्रमाचरयुतं नृणां सनातनं धर्मं श्रोतुमिच्छामि, यस्माद्धर्मात् पुमान् परमपुरुषं विन्दते।।२।। हे ब्रह्मन्! परमेष्ठिनः प्रजापतेर्ब्रह्मणः सुतानां मध्ये संमतस्त्वं साक्षात् पुत्रः, तपोयोगसमाधिभिर्युतोऽसि।।३।।नारायणपरा विप्रा गुह्यं परं धर्मं विदुः, करुणाः शान्तास्त्वद्विवधाः साधवः सन्ति, तथाऽपरे न।।४।। *नारद उवाच* – अजाय लोकानां धमेसेतवे भगवते श्रीनारायणाय नत्वाऽहं नारायणमुखाच्छ्रुतं सनातनं धर्मं वक्ष्ये।।५।। यो भगवान् स्वस्यांशेन नरेण सह दक्षदुहितरि मूर्तौ धर्मतोऽवतीर्य लोकानां कल्याणाय बदरिकाश्रमे तपोऽद्याप्याचरति।।६।। धर्ममूलं भगवान् हरिः सर्ववेदमयः, तद्विदां मतं, हे राजन्! येन धर्मेण परमात्मा प्रसीदति।।७।। तत्र तावन्नृणां साधारणान् धर्मानाह – सत्यं, दया, तपः,शौचम्, तितिक्षा, -

अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम्।।८।। सन्तोषः समदृक् सेवा ग्राम्येहोपरमः शनैः। नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्।।९।। अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः। तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव।।१०।। श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतेः। सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ।।११।। नृणामयं परोधर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणवान् राजन्सर्वात्मा येन तुष्यति।।१२।। संस्कारा यदविच्छिन्नाः स द्विजोऽजो जगाद यम्। इज्या-ध्ययनदानानि विहितानि द्विजन्मनाम्। जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ।।१३।। विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः। राज्ञो वृत्तिः प्रजागोप्तुरविप्राद् वा करादिभिः।।१४।। वैश्यस्तु वार्तावृत्तिः स्यान्नित्यं ब्रह्मकुलानुगः। शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत्।।१५।।

।। सङ्ग्रहोक्तिः।।

ईक्षा, शमः, दमः, अहिंसा, ब्रह्मचर्यम्, त्यागः, स्वाध्यायः, आर्जवम्।।८।। सन्तोषः समदृशां सेवा, शनैः प्रवृत्तिकर्मभ्यो निवृतिः, नृणां निष्फलक्रियाणामीक्षणम्, मौनम्, आत्मविमर्शनम्।।९।। यथायोग्यं भूतेभ्यो भक्ष्यभोज्यादेर्विभज्य प्रदानम्, भूतेषु स्वीयेष्टदेवताबुद्धिः, हे पाण्डव! मनुष्येषु सुतरामिष्टदेवताबुद्धिः।।१०।।महतां भक्तानां शरणस्य भगवतः गुणचरित्रादेः श्रवणम्, कीर्तनम्, स्मरणम्, चरणसेवा, पूजा, साष्टांगप्रणतिः, दासभावेन वर्तनम्, सख्यम्, आत्मनिवेदनम्।।११।।हे राजन्! सर्वेषां नृणां त्रिंशल्लक्षणवान् अयं परो धर्मः कथितः, येन धर्मेण सर्वान्तरात्मा भगवान् तुष्यति।।१२।।यत्र गर्भाधानादयः षोडश संस्कारा अविच्छिन्नाः स द्विजो ज्ञेय, इति ब्रह्मा जगाद, जन्माचारविशुद्धानां द्विजन्मनां इज्या-अध्ययन-दानानि विहितानि सन्ति, ब्रह्मचर्याद्याश्रमविधेयाः क्रियाश्च विहिताः सन्ति।।१३।। विप्रस्य इज्या-अध्यन-दान-याजन-अध्यापन,-प्रतिग्रहाख्यानि षट् कर्माणि विहितानि, राज्ञोऽप्रतिग्रहो विशेषः, एवं प्रजारक्षकस्य राज्ञो विप्रेतरवर्णात् करग्रहणादिकमपि।।१४।। वैश्यस्तु नित्यं ब्राह्मण-कुलानुयायी सन् कृषिगोरक्षावणिज्यादिवृत्तिं स्वीकुर्यात्, शूद्रस्य तु द्विजानां शुश्रूषा एव वृत्तिः, तथैव सेवासंप्रीतस्वामिना यद्दत्तं स्यात्।।१५।।

वार्ता विचित्रा शालीनं यायावरं शिलोञ्छनम्। विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ।।१६।। जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः। ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः।।१७।। ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा। सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथञ्चन।।१८।। ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम्। मृतं तु नित्ययाच्ञा स्यात् प्रमृतं कर्षणं स्मृतम्। सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ।।१९।। वर्जयेत् तां सदा विप्रो राजन्यश्च जुगुप्सिताम्। सर्ववेदमयो विप्रः सर्वदेवमयो नृपः।।२०।। शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवम्। ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम्।।२२।। देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम्। आस्तिक्यमुद्यमो नित्यं नैपुणं वैश्यलक्षणम्।।२३।। शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया।

।। सङ्ग्रहोक्तिः ।।

कृष्यादिरूपा विचित्रा वार्ता शालीनम् अयाचितम्, प्रत्यहं धान्ययाच्ञा=यायावरम्, शिलमुञ्छं चेति चतुर्धा विप्रस्य वृत्तिरुत्तरोत्तरा श्रेष्ठा कथिता।।१६।। यो यस्मान्नीचः स स्वस्मादुत्कृष्टस्य वृत्तिमनापदि न स्वीकुर्यात्, राजन्यं विनाऽऽपत्स्वप्युत्तमां वृत्तिं न भजेत्, सर्वेषां स्वकीया एव सर्वा वृत्तयो विहिताः।।१७।। ऋतेन, अमृतेन, मृतेन वा प्रमृतेन जीवेत, सत्येन, अनृतेन च जीवेत कथंचन श्ववृत्त्या तु न जीवेत।।१८।। तदेव स्पष्टयति - शिलोञ्छवृत्तिः=ऋतम्, अयाचितम्=अमृतम्, नित्य याच्ञा=मृतं, कृषिकर्म प्रमृतं च स्मृतम्, वाणिज्यं सत्यानृतं प्रोक्तं, नीचसेवा तु श्ववृत्तिः कथिताऽस्ति।।१९।। विप्रो राजन्यश्च सदा नीचसेवावृत्तिं निन्दितां ज्ञात्वा वर्जयेत्, यतः विप्रः सर्ववेदमयः, नृपः सर्वदेवमयश्च प्रोक्तोऽस्ति ।।२०।। शमः, दमः, तपः, शौचम्, संतोषः, क्षान्तिः, आर्जवम्, ज्ञानम्, दया, भगवत्प्रवणचित्तत्वम्, सत्यम्, चेति ब्राह्मणकुलस्य लक्षणानि सन्ति।।२१।। शौर्यं, वीर्यं, धृतिः, तेजः, त्यागः, मनसो जयः, क्षमा, विप्रभक्तत्वं, प्रसादः, रक्षा च इमानि सर्वाणि क्षत्रियलक्षणानि सन्ति।।२२।। देव-गुरु-ज्ञानवृद्ध-गावां भक्तिः, धर्मादित्रिवर्गेण परितुष्टिः, आस्तिकता, नित्यमुद्यमशीलता, नैपुण्यं च इत्येतानि सर्वाणि वैश्यस्य लक्षणानि सन्ति।।२३।। नम्रता, शौचं, निष्कपटतया स्वामिनः सेवा, मन्त्ररहितो यज्ञः, अस्तेयं, सत्यं, गोविप्ररक्षणम् इत्येतानि सर्वाणि शूद्रस्य वर्तनलक्षणानि विहितानि -

अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ।।२४।। स्त्रीणां च पतिदेवानां तच्छुश्रूषा-
नुकूलता। तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ।।२५।। संमार्जनोपलेपाभ्यां
सेकमण्डलवर्त्तनैः। स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा।।२६।। कामैरुच्चावचैः
साध्वी प्रश्रयेण दमेन च। वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत् पतिम् ।।२७।।
संतुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक्। अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं
भजेत्।।२८।। या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा। हर्यात्मना हरेर्लोके पत्या
श्रीरिव मोदते।।२९।। वृत्तिः सङ्करजातीनां तत्तत्कुलकृता भवेत्। अचौराणामपापा-
नामन्त्यजान्तेऽवसायिनाम् ।।३०।। प्रायः स्वभावविहितो नृणां धर्मो युगे युगे।
वेददृग्भिः स्मृतो राजन् प्रेत्य चेह च शर्मकृत् ।।३१।। वृत्त्या स्वभावकृतया वर्तमानः
स्वकर्मकृत्। हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ।।३२।। उप्यमानं मुहुः
क्षेत्रं स्वयं निर्वीर्यतामियात्। हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात्।

।। सङ्ग्रहोक्तिः ।।

सन्ति ।।२४।। पतिदेवतानां स्त्रीणां तु पत्युः सेवा तदनुकूलता च, पत्युर्बन्धुषु नित्यमनुवृत्तिः पत्युर्व्रतनियमधारणम् इत्यादीनि धर्मलक्षणानि सन्ति ।।२५।। निजगृहस्य संमार्जनोपलेपनाभ्यां सेकमण्डलवर्तनैश्च सम्यक्प्रकारेण पवित्रीकरणम् स्त्रियाः धर्मः, स्वयं च नित्यं मण्डिता परिमृष्टपरिच्छा भवेत् ।।२६।। पत्युरपेक्षितवस्तुभिः, विनयेन, दमेन, सत्यप्रियवाक्यैः, धर्मशीला स्त्री काले काले प्रेम्णा पतिं भजेत् ।।२७।। संतुष्टा, अलोलुपा, दक्षा, धर्मज्ञा, प्रियसत्यवाक्, अप्रमत्ता, शुचिः, स्निग्धा सती स्त्री अपतितं पतिं सेवेत ।।२८।। या स्त्री तत्परा सती श्रीरिव हरिभावेन पतिं सेवेत सा हरिरूपेण पत्या सह हरेर्लोके श्रीरिव मोदते ।।२९।। अचौराणाम् अपापानाम्, अन्त्यजानाम्, अन्तेवसायिनां सर्वेषां तत्कुलपरंपरया प्राप्ता वृत्तिर्भवेत् ।।३०।। हे राजन्! सर्वेषामपि नराणां प्रायः सात्त्विकादिस्वभावविहतो धर्मो इहामुत्र सुखकारको, युगे युगे मन्वादिभिः स्मृतः ।।३१।। स्वभावकृतया जीविकया वर्णाश्रमानुसारेण वर्तमानः स्वकर्मकृत् पुमान् स्वभावजं पुण्यपापात्मकं कर्म हित्वा शनैर्निर्गुणतां प्राप्नुयात् ।।३२।। यथा मुहुरुप्यमानं क्षेत्रं स्वयमसारतां प्राप्नुयात्, पुनः सस्यप्रसवाय समर्थं न जायते, उप्तं बीजं च नश्यति ।।३३।।

न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति।।३३।। एवं कामाशयं चित्तं कामानामतिसेवया। विरज्येत यथा राजन्नाग्निवत् कामबिन्दुभिः।।३४।। यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्। यदन्यत्रापि दृश्येत तत् तेनैव विनिर्दिशेत्।।३५।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे एकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः।।१२।।

नारद उवाच - ब्रह्मचारि गुरुकुले वसन्दान्तो गुरोर्हितम्। आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः।।१।। सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान्। उभे सन्ध्ये च यतवाग् जपन्ब्रह्म समाहितः।।२।। छन्दांस्यधीयीत गुरोराहूतश्चेत् सुयन्त्रितः। उपक्रमेऽवसाने च चरणौ शिरसा नमेत्।।३।। मेखलाजिनवासांसि जटादण्ड-कमण्डलून्।

।। सङ्ग्रहोक्तिः।।

हे राजन्! कामानामाश्रयभूतं चित्तं कामानामतिसेवया विरज्येत कामस्य बिन्दुभिर्न तु, यथाऽग्निवत्।।३४।। यस्य पुंसः यल्लक्षणं वर्णाभिव्यञ्जकं प्रोक्तं तद् यदि वर्णान्तरमपि तेन लक्षणनिमित्तेन वर्णेनैव विनिर्दिशेत्।।३५।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यानेकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः।।१२।।

ब्रह्मचारिवानप्रस्थयोर्धर्मश्चतुर्णामाश्रमाणां साधारणो धर्मश्च

नारद उवाच - उपकुर्वाणको वर्णी गुरुकुले वसन् दान्तो दासवन्नीचो गुरोर्हितमाचरन्, सुदृढसौहृदः सन् सायं प्रातश्च गुर्वग्निसूर्याच्युतान् उपासीत, मौनी, समाहितो गायत्रीं जपन् सन्नुभे सन्ध्ये उपासीत।।१-२।। गुरुणाऽऽहुत एकाग्रचित्तः सन् गुरोश्छंदांस्यधीयीत, नित्यं पाठग्रहणारम्भेऽवसाने च गुरोश्चरणौ नमेत्।।३।। यथोदितं मेखला-ऽजिन-वासांसि, जटा,

बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ।।४।। सायं प्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत्। भुञ्जीत यद्यनुज्ञातो नोचेदुपवसेत् क्वचित् ।।५।। सुशीलो मितभुग् दक्षः श्रद्दधानो जितेन्द्रियः। यावदर्थं व्यवहरेत् स्त्रीषु स्त्रीनिर्जितेषु च ।।६।। वर्जयेत् प्रमदागाथाम-गृहस्थो बृहद्व्रतः। इन्द्रियाणि प्रमाथीनि हरन्त्यपि यतेर्मनः ।।७।। केशप्रसाधनोन्मर्द-स्नपनाभ्यञ्जनादिकम्। गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ।।८।। *नन्वग्निः प्रमदा नाम घृतकुम्भसमः पुमान्। सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ।।९।।* कल्पयत्याऽऽत्मना यावदाभासमिदमीश्वरः। द्वैतं तावन्न विरमेत् ततो ह्यस्य विर्पयः ।।१०।। एतत् सर्वं गृहस्थस्य समाम्नातं यतेरपि। गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्त्तुगामिनः ।।११।। अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेखामिषं मधुः स्रग्गन्ध-लेपालंकारांस्त्यजेयुर्ये धृतव्रताः ।।१२।।

।। सङ्ग्रहोक्तिः ।।

दण्ड, कमण्डलूपवीतं च बिभूयात्, दर्भपाणिश्च भवेत् ।।४।। सायं प्रातश्च भिक्षां चरेत्, यद् भिक्षायां प्राप्नुयात् तद् गुरवे निवेदयेत्, गुरुणाऽऽज्ञप्तो भुञ्जीत, क्वचिन्नादिशेत् तदोपवसीत ।।५।। सुशीलो दक्षो मिताहारः श्रद्दधानो जितेन्द्रियो वर्णी स्त्रीषु स्त्रैणेषु च यावत्प्रयोजनं व्यवहरेत् ।।६।। अगृहस्थो बृहद्व्रतः पुमान् प्रमदागाथां वर्जयेत्, यतः प्रमाथीनीन्द्रियाणि यतेर्मनः प्रसभं हरेत् ।।७।। युवा वर्णी गुरुपत्नीप्रभृतिभिः स्त्रीभिः स्वस्य केशप्रसाधनो-न्मर्द्दस्नपनाऽभ्यञ्जनादिकं न कारयेत् ।।८।।प्रमदा शास्त्रप्रसिद्धोऽग्निर्ननु, पुमान् घृतकुम्भसमः, अतो रहसि सुतामपि जह्यात्, व्यवहारयोग्यसमये यावत् प्रयोजनं वसेत् ।।९।। परमेश्वरो यावदात्मन इदं शरीरं प्रवृत्तिसमर्थं करोति तावत् भेदज्ञानं प्रवर्तते, अतो यावत् भेदज्ञानं स्यात् तावत् स्वधर्मेभ्यो न विरमेत् ।।१०।। एतत् सुशीलत्वादिकं सर्वं व्रतस्थस्य यतेः गृहस्थस्याचाऽपि समाम्नातम्, ऋतुगामिनो गृहस्थस्य स्त्रीसंगराहित्यरूपा वृत्तिः विकल्पेन समाम्नाता ।।११।।ये धृतव्रता गृहस्था भवेयुः, तेऽपि अञ्जनं, अभ्यङ्गः, उन्मर्द्दनं, कुड्यादौ स्त्रीप्रतिकृतिलेखनम्, आमिषं, मद्यं, स्रक्, गंधलेपः, अलंकारश्च इत्यादीनि सर्वाणि शरीरप्रसाधनानि त्यजेयुः ।।१२।।

उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च। त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम् ।।१३।। दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः। गृहं वनं वा प्रविशेत् प्रव्रजेत् तत्र वा वसेत् ।।१४।। अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम्। भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ।।१५।। एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही। चरन्विदित-विज्ञानः परं ब्रह्माधिगच्छति ।।१६।। वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसम्मतान्। यानातिष्ठन् मुनिर्गच्छेदृषिलोकमिहाञ्जसा ।।१७।। न कृष्टपच्यमश्नीयादकृष्टं वाप्यकालतः। अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ।।१८।। वन्यैश्चरुपुरोडाशान् कल्पयेत् कालचोदितान्। लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् ।।१९।। अग्न्यर्थमेव शरणमुटजं वाद्रिकन्दराम्। श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ।।२०।। केशरोमनखश्मश्रुमलानि जटिलो दधत्। कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् ।।२१।।

।। सङ्ग्रहोक्तिः ।।

द्विज इत्थं गुरुकुल उषित्वा अङ्गैरुपनिषद्भिश्च सहिता ऋगादिवेदत्रयीं यथाबलमधीत्य तदर्थं ज्ञात्वा च यदि शक्तश्चेत् गुरोरपेक्षितां दक्षिणां प्रदाय, कृतानुज्ञः सन् गृहं वनं वा प्रविशेत्, संन्यासं स्वीकुर्यात् वा तत्रैव नैष्ठिको भूत्वा वसेत् ।।१३-१४।। अग्नौ गुरावात्मनि सर्वभूतेषु चान्तःप्रविश्य धारकतयाऽवस्थितं भगवन्तं पश्येत्, व्याप्यवस्तुगतदोषैरस्पृष्टं प्रविष्टवच्च पश्येत् ।।१५।। एवंविधदर्शी ब्रह्मचारी, वानप्रस्थो, यतिर्गृहस्थश्च धर्माननुतिष्ठन् विदितविज्ञानः सन् परं ब्रह्म प्राप्नोति ।।१६।। अथ मुनिभिः संमतान् वानप्रस्थस्य नियमान् वक्ष्यामि, यानिह लोक आतिष्ठन् मुनिरञ्जसा ऋषिप्राप्यं महर्लोकं गच्छति ।।१७।। वानप्रस्थः कृषावुत्पन्नं, अकृष्टमप्यसमयजं नाऽश्नीयात्, अग्निपक्वमाममर्कपक्वं च फलादिकमेवा-ऽश्नीयात् ।।१८।। वन्यैर्निवारादिभिर्नित्यान् चरुपुरोडशादीन् निवर्तयेत्, नवे नवेऽन्ने लब्धे पुराणं परित्यजेत् ।।१९।। अग्नीनां रक्षणार्थमेवोटजं वा गृहं कुर्यात् अथवा पर्वतगुहां श्रयेत्, स्वयं तु हिमं, वायुः अग्निः, वर्षं, आतपश्चेत्येतान् सहेत ।।२०।। जटिलः केशाः, रोमाणि, नखाः, श्मश्रूणि, मलानि चेत्येतानि दधत्, दण्ड-वल्कला-ऽग्नि-परिच्छदाश्चेत्येतान् दधत्

चरेद् वने द्वादशाब्दानष्टौ वा चतुरो मुनिः। द्वावेकं वा यथाबुद्धिर्न विपद्येत कृच्छ्रतः।।२२।। यदाऽकल्पः स्वक्रियायां व्याधिभिर्जरयाथवा। आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम्।।२३।। आत्मन्यग्नीन् समारोप्य संन्यस्याहंममात्मताम्। कारणेषु न्यसेत् सम्यक् संघातं तु यथार्हतः।।२४।। खे खानि वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान्। अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम्।।२५।। वाचमग्नौ सवक्तव्यामिन्द्रे शिल्पं करावपि। पदानि गत्या वयसि रत्योपस्थं प्रजापतौ। मृत्यौ पायुं सोत्सर्गं च यथास्थानं विनिर्दिशेत्।।२६।। दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम्। रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत्।।२७।। अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत्। मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे।।२८।। कर्माण्यध्यात्मना रुद्रे यदहंममताक्रिया। सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे।।२९।। अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम्।

।। सङ्ग्रहोक्तिः ।।

कमण्डलुमजिनं चेत्येते दधच्च, अन्यत् सर्वं परित्यजेत्।।२१।। मुनिः कृच्छ्रतो यथाबुद्धि न विपद्येत तथा द्वादश, अष्टौ चतुरोऽब्दान् द्वौ वौकाब्दं चरेत्।।२२।। यदा व्याधिभिर्जरया वा स्वक्रियायामशक्तः स्यात्तदाऽऽन्वीक्षिक्यां विद्यायामप्यशक्तः स्यात् तदाऽनशनादिकं कुर्यात्।।२३।। आत्मन्यग्निं समारोप्याऽहंतां ममतां च परित्यज्य यथायेग्यं कारणेष्वाकाशादिषु भूतसंघातं सम्यङ्न्यसेत।।२४।। धीमान् मुनिराकाशे खानि प्रलीनानि भावयेत्, निश्वासान् वायौ, उष्माणं तेजसि, असृक्-श्लेष्म-पूयानि अप्सु, शेषमस्थ्यादिकठिनांशं क्षितौ, एवं पञ्चभूतेषु शरीरावयवानि प्रलीनानि भावयेत्।।२५।। वक्तव्येन सह वाचमग्नौ विनिर्दिशेत्, करौ शिल्पं चेन्द्रे, गत्या सह पादौ कालात्मके विष्णौ, रत्या सहोपास्थं प्रजापतौ, सोत्सर्गं पायुं मृत्यौ, इति यथास्थानं विनिर्दिशेत्।।२६।। शब्देन सह श्रोत्रं दिक्षु, स्पर्शेन सह त्वचं वायौ, रूपेण सह चक्षुः सूर्ये, संश्लिष्टं भावयेत्।।२७।। रसेन सह जिह्वां वरुणे, गन्धेन सह घ्राणमश्विनोः न्यसेत्, मनारथैः सह मनश्चन्द्रमसि, बोद्धव्यैर्विषयैः सह बुद्धिं चतुर्मुखे न्यसेत्।।२८।। अहंममत्वेन सहाऽध्यात्माहङ्कारं रुद्रे, चिन्तनेन सह चित्तं क्षेत्रज्ञे वासुदेवेऽधिदैवते

कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ।।३०।। इत्यक्षरतयाऽऽत्मानं चिन्मात्रमवशेषितम्। ज्ञात्वाद्वयोऽथ विरमेद् दग्धयोनिरिवानलः ।।३१।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

नारद उवाच - कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः। ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ।।१।। बिभृयाद् यद्यसौ वासः कौपीनाच्छादनं परम्। त्यक्तं न लिङ्गदण्डादेरन्यत् किंचिदनापदि ।।२।। एक एव चरेद् भिक्षुरात्मारामोऽनपाश्रयः। सर्वभूतसुहृच्छान्तो नारायणपरायणः ।।३।। पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये। आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ।।४।।

।। सङ्ग्रहोक्तिः ।।

न्यसेत्, सात्त्विाकाहंकारं स्वकार्यरूपैन्द्रियैः सह महत्तत्त्वे न्यसेत् ।।२९।। क्षितिमप्सु न्यसेत्, अपस्तेजसि, तेजो वायौ, वायुमाकाशे, आकाशं कूटस्थे तामसाहंकारे, कूटस्थं महत्तत्त्वे, तन्महत् अव्यक्ते, अव्यक्तमव्ययेऽक्षरे परमात्मत्मके जीवे न्यसेत् ।।३०।। इत्थं चिन्मात्रमवशेषितं प्रत्यगात्मानमक्षरतया ज्ञात्वा (निजात्मानं ब्रह्मरूपं विभाव्य) अद्वयः जातिगुणाद्यभिमानरहितः सन् दग्धकाष्ठोऽग्निरिव विरमेत् ।।३१।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः ।।१२।।

अथ त्रयोदशोऽध्यायः ।।१३।।

साधकयतेर्धर्मस्य सिद्धावस्थायाश्च वर्णनम्

नारद उवाच - धर्मानुष्ठाने समर्थश्चेत् संन्यासं गृहीत्वा देहमात्रेणावशेषित एकस्मिन् ग्राम एकरात्रिवासविधिना निरपेक्षः सन् महीं चरेत् ।।१।। असौ परिव्राट् यदि वासः परिदध्यात् तर्हि कौपीनाच्छादनमात्रमेव, अनापदि वैष्णवचिह्नदण्डादेरन्यत् परित्यक्तं किमपि न बिभृयात् ।।२।। अनपाश्रय आत्माराम सर्वभूतसुहृच्छांन्तो नारायणपरायणो भिक्षुरेक एव चरेत् ।।३।। चिदचिद्भ्यां परेऽव्यये परमात्मानीदं जगत् पश्येत्, तथा परब्रह्मस्वरूपं परमात्मानं

सुप्तप्रबोधयोः सन्धावात्मनो गतिमात्मदृक्। पश्यन्बन्धं च मोक्षं च मायामात्रं न वस्तुतः।।५।। नाभिनन्देद् ध्रुवं मृत्युमध्रुवं चास्य जीवितम्। कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम्।।६।। नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम्। अतिवादां-स्त्यजेत्तर्कान्पक्षं कंचन नाश्रयेत्।।७।। न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद् बहून्। न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित्।।८।। न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः। शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत्।।९।। अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत्। कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम्।।१०।। अत्राप्युदाहरन्तीममितिहासं पुरातनम्। प्रह्लादस्य च संवादं मुनेराजगरस्य च।।११।। तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि। रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ।।१२।। ददर्श लोकान्विचरँल्लोकतत्त्वविवित्सया। वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः।।१३।। कर्मणाऽऽकृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः। न विन्दन्ति जना यं वै सोऽसाविति न वेति च।।१४।।

।। सङ्ग्रहोक्तिः ।।

चिदचिदात्मके सर्वत्र जगति पश्येत्।।४।। सायं प्रातः वा स्वप्न आत्मनो गतिं पश्येत्, बन्धं मोक्षं च वस्तुतः पश्येत्, न मायामात्रम्।।५।। देहस्य निश्चितं मृत्युमिव देहस्याध्रुवं जीवितं नाभिनन्देत्, भूतानां प्रलयोत्पत्तिहेतुकं कालमेवाऽऽलोचयत्।।६।। असच्छास्त्रेष्वासक्तो न भवेत्, जीविकां नोपजीवेत, अतिवादान् तार्कांश्च त्यजेत्, कंचन पक्षं नाश्रयेत्।।७।। शिष्यान् बलान्नापादयेत्, बहून् ग्रन्थान् नैवाऽऽभ्यसेत्, व्याख्यायोपजीवनं न कुर्यात्, महामठादिकारम्भान् क्वचिन्नारभेत् ।।८।। महात्मनः समचित्तस्य यतेः प्राय आश्रमो धर्मलिङ्गं न बिभृयात् वा त्यजेत्।।९।। कोऽयमित्यज्ञायमानोऽव्यक्तलिङ्गः, व्यक्तार्थः, मनीषी सन्नप्युन्मत्तवद् बालवच्च वर्तमानः, कविरपि मूकवदात्मानं नृणां स्वात्मदृष्ट्या दर्शयेत्।।१०।। अत्र पुरातनं प्रह्लादस्य अजगरव्रतस्य मुनेश्च संवादरूपमितिहासमप्युदाहरन्ति।।११।। सह्याद्रिशिखरभूमौ कावेरीतटे भूपृष्ठे शयानं रजोधूसरैर्देहावयवैर्निगूढामलतेजसं तं मुनिं भगवत्प्रियः कतिपयैरमात्यैः परिवृतो लोकतत्त्वविवित्सया विचरन् प्रह्लादो ददर्श।।१२-१३।। क्रियया, आकृत्या, वाचा, -

तं नत्वाभ्यर्च्य विधिवत् पादयोः शिरसा स्पृशन्। विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः।।१५।। *प्रह्लाद उवाच* – बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा। वित्तं चैवोद्यमवतां भोगो वित्तवतामिह। भोगिनां खलु देहोऽयं पीवा भवति नान्यथा।।१६।। न ते शयानस्य निरुद्यमस्य ब्रह्मन् नु हार्थो यत एव भोगः। अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत्।।१७।। कविः कल्पो निपुणदृक् चित्रप्रियकथः समः। लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा।।१८।। *नारद उवाच* – स इत्थं दैत्यपतिना परिपृष्टो महामुनिः। स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः।।१९।। *ब्राह्मण उवाच* – वेदेदमसुरश्रेष्ठ भवान् नन्वार्यसम्मतः। ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा।।२०।। यस्य नारायणो देवो भगवान्हृद्गतः सदा। भक्त्या केवलयाज्ञानं धुनोति ध्वान्तमर्कवत्।।२१।। अथापि ब्रूमहे प्रश्नांस्तव राजन्यथाश्रुतम्। सम्भाषणीयो हि भवानात्मनः शुद्धिमिच्छता।।२२।।

।। सङ्ग्रहोक्तिः ।।

वर्णाश्रमादिभिर्लिङ्गैर्जनाः सोऽसौ को वेति न जानन्ति।।१४।। तमाजगरं मुनिं महाभागवतोऽसुरः प्रह्लादः पादयोः शिरसा स्पृशन्, विधिवन्नत्वाऽभ्यर्च्य च विवित्सुः सन्निदमप्राक्षीत्।।१५।। *प्रह्लाद उवाच* – उद्यमी भोगवान् यथा भवेत् तद्वत् पुष्टं देहं बिभर्षि, अतोऽहंपृच्छामि – लोक उद्यमवतामेव वित्तं प्राप्तं भवति, वित्तवतां भोगश्चापि भवति, तथा भोगवतामेव देहः पीवा भवति, अन्यथा न।।१६।। हे ब्रह्मन्! शयानस्य निरुद्यमस्य तव लोके वित्तं नास्ति, यस्माद् वित्ताद् भोगा भवन्ति, अतोऽभोगिनस्तव देहोऽयं यतः पीवाऽभवत् तत्कारणं अस्मच्छ्रवणयोग्यं चेत् तर्हि वद।।१७।। त्वं विद्वान्, दक्षः, निपुणदृक् चित्रप्रियकथः कर्मकुर्वतः लोकस्य वीक्षिताऽपि समः तूष्णीं शयानोऽसि, तत्कारणं वद।।१८।। *नारद उवाच* – इत्थं दैत्यपतिना प्रह्लादेन पृष्टो महामुनिः प्रह्लादवागमृतनोदितः स्मयमानः सन् तमभ्याह।।१९।। *ब्राह्मण उवाच* – हे असुरश्रेष्ठ! भवान् आर्यसंमतोऽसि ततो नृणां प्रवृत्तिनिवृत्त्योः कारणान्यध्यात्मदृष्ट्या जानात्येव।।२०।। भगवान् देवो नारायणोऽनन्यया भक्त्या तुष्टः यस्य सदा हृद्गतः सन्नर्कवदज्ञानं धुनोति।।२१।। हे राजन्! तथापि यथाश्रुतं तव प्रश्नान् प्रतिब्रूमहे, स्वस्य

तृष्णया भववाहिन्या योग्यैः कामैरपूरया। कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ।।२३।। यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन्। स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ।।२४।। अत्रापि दम्पतीनां च सुखायान्यापनुत्तये। कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ।।२५।। सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः। मनः संस्पर्शजान् दृष्ट्वा भोगान् स्वप्स्यामि संविशन् ।।२६।। इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान्। विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ।।२७।। देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः। दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ।।२९।। आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित्। मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ।।३०।। पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम्। भयादलब्धनिद्राणां सर्वतोऽतिविशङ्किनाम् ।।३१।।

।। सङ्ग्रहोक्तिः ।।

शुद्धिमिच्छता पुंसा भवान् संभाषणीयो हि ।।२२।। हे प्रह्लाद! अहं यथोचितैः कामैः पूरयितुमशक्यया भववाहिन्या तृष्णया कर्मसु प्रवर्त्यमानः सन् नाना योनिषु संप्रवेशितः ।।२३।। तैरेव कर्मभिर्भ्रमन् अहं दैवेच्छया स्वर्गापवर्गस्य तिर्यग्योनेर्मनुष्ययोनेश्च द्वारभूतमिमं लोकं मनुष्यजन्म च तृष्णया प्रापितः ।।३४।। अत्र जन्मन्यपि सुखाय दुःखनिवृत्तये च कर्माणि कुर्वतां दम्पतीनां लोकानां सुखाय कृतेभ्यः कर्मभ्यो दुःखप्राप्तिरूपं विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ।।२५।। अस्य प्रत्यगात्मनः स्वरूपं स्वयं सुखमेवास्ति, तदर्थं यत्नो न कर्त्तव्यः, समग्रप्रवृत्ति-परित्याग एव तस्य स्वरूपम्, भोगान् मनोमात्रजन्यान् दृष्ट्वा निरुद्यमः शयानोऽस्मि ।।२६।। इत्येतत् स्वस्मिन् स्वभावत एव विद्यमानं स्वार्थं विस्मृत्य पुमान् असति देवमुष्यादिभेदे परिनिष्ठः सन् विचित्रां घोरां संसृतिं प्राप्नोति ।।२७।। तृणशैवलादिभिश्छन्नं जलं हित्वा यथा जललब्धीच्छया मृगतृष्णामुपधावेत् तथा स्वत एव सुखरूपमात्मनः स्वरूपं विस्मृत्याऽन्यत्र पुरुषार्थदृष्टिर्भवति ।।२८।। कर्मायत्तैर्देहादिभिः स्वस्य सुखं दुःखनिवृत्तिं चेच्छतः कर्मवश्यस्य पुंसः पुनःपुनरारब्धाः क्रिया व्यर्था दृष्टाः ।।२९।। आध्यात्मिकाद्यैर्दुःखैर्ग्रस्तस्य मरणशीलस्य जनस्य कृच्छ्रोपनितैरर्थैः कामभोगैश्च कियत् सुखं क्रियेत? ।।३०।। लुब्धानामजितात्मनां

राजतश्चोरतः शत्रोः स्वजनात्पशुपक्षितः। अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ।।३२।। शोकमोहभयक्रोधरागक्लैब्यश्रमादयः। यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ।।३३।। मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ। वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ।।३४।। विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात्। कृच्छ्राप्तं मधुवद् वित्तं हत्वाप्यन्यो हरेत्पतिम् ।।३५।। अनीहः परितुष्टात्मा यदृच्छोपनतादहम्। नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ।।३६।। क्वचिदल्पं क्वचिद् भूरि भुञ्जेऽन्नं स्वाद्वस्वादु वा। क्वचिद् भूरिगुणोपेतं गुणहीनमुत क्वचित् ।।३७।। श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम्। भुञ्जे भुक्त्वाथ कस्मिंश्चिद् दिवा नक्तं यदृच्छया ।।३८।। क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा। वसेऽन्यदपि सम्प्राप्तं दिष्टभुक् तुष्टधीरहम् ।।३९।। क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु।

।। सङ्ग्रहोक्तिः ।।

भयादलब्धनिद्राणां सर्वतोऽतिविशङ्किनां धनिनां क्लेशं पश्यामि ।।३१।। राजभ्यश्चोरेभ्यो वैरिभ्यः स्वजनेभ्यः पशुपक्षिभ्यो याचकजनेभ्यः कालतः स्वस्माच्च प्राणवतां धनवतां च नित्यं भयमनुवर्त्तते ।।३२।। शोकः, मोहः, भयं, क्रोधः, रागः, क्लैब्यं, श्रमश्च इत्येते सर्वे प्राणधनमूला नृणां भवेयुः, तस्माद् बुधः प्राणार्थयोः स्पृहां जह्यात् ।।३३।। अस्मिन् लोके अस्माकं मधुकारमहासर्पौ गुरूत्तमौ भवतः, ययोः शिक्षया वयं वैराग्यं संतोषं च प्राप्ताः स्मः ।।३४।। मया सर्वकामेभ्यो विरागो मधुव्रताच्छिक्षितः, कृच्छ्राप्तं वित्तं वित्तस्वामिनमपि हत्वा अन्यो मधुवत् हरेत् ।।३५।। अजगर इवाऽहमपि निर्व्यापारो दैवाल्लब्धान्नादेः परितुष्टात्मा भवामि, न लभ्येत चेत् धैर्यवान् सन् बह्वहानि शये ।।३६।। क्वचिद् अल्पं, क्वचित् भूरि वा क्वचित्साधु, क्वचिदसाधु वा, क्वचिद् भूरिगुणोपेतं क्वचिद् गुणहीनं वाऽन्नं भुञ्जे ।।३७।। क्वापि श्रद्धयोपहृतं, कदाचित् मानवर्जितम्, अन्नादिकमद्मि, क्वचिद् दिने भुक्त्वापि यदृच्छया प्राप्तं नक्तं भुञ्जे ।।३८।। एवं तुष्टधीर्दिष्टभुक् अहं क्वचित् क्षौमं वासः क्वचिद्दुकूलं वासः क्वचिद् अजिनं क्वचिच्चीरं, कदाचिद् वल्कलं, क्वचित् संप्राप्तमन्यत् परिदधे ।।३९।। क्वचित्

क्वचित् प्रासादपर्यङ्के कशिपौ वा परेच्छया ।।४०।। क्वचित् स्नातोऽनुलिप्ताङ्गः सुवासाः स्रग्व्यलंकृतः। रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद् विभो ।।४१।। नाहं निन्दे न च स्तौमि स्वभावविषमं जनम्। एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ।।४२।। विकल्पं जुहुयाच्चित्ते तन्मनस्यर्थविभ्रमे। मनो वैकारिके हुत्वा तन्मायायां जुहोत्यनु ।।४३।। आत्मानुभूतौ तां मायां जुहुयात् सत्यदृङ्मुनिः। ततो निरीहो विरमेत् स्वानुभूत्याऽऽत्मनि स्थितः ।।४४।। आत्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम्। व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्परः ।।४५।। *नारद उवाच* - धर्मं पारमहंस्यं वै मुनेः श्रुत्वासुरेश्वरः। पूजयित्वा ततः प्रीत आमन्त्र्य प्रययौ गृहम् ।।४६।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे त्रयोदशोऽध्यायः ।।१३ ।।

।। सङ्ग्रहोक्तिः ।।

भूपृष्ठे शये, तृण-पर्ण-ऽश्म-भस्मस्वपि शये, क्वचित् परेच्छया प्रासादपर्यङ्के शये वा कशिपौ शये ।।४०।। हे विभो! क्वचिदहं स्नातानुलिप्ताङ्गः सुवासाः, स्रग्भिरलङ्कृतः चरे, क्वापि रथ-गज-हयैश्चरे, क्वच भूतवद् दिगम्बरः सन् चरे ।।४१।। अहं विषमस्वभावं जनं न स्तौमि न च निन्दामि, प्रत्युतैतेषां हितमेव चिन्तयामि, उतापि भगवत्यैकात्म्यमाशासे ।।४२।। विकल्पं चित्ते जुहुयात्, तच्चित्तं देहात्मभ्रमहेतोर्मनसि जुहुयात्, मनः सात्त्विकेऽहंकारे हुत्वा, तमहंकारं प्रकृतौ जहुयात् ।।४३।। तां प्रकृतिं चित्प्रकृतौ जुहुयात्, ततः सत्यं परमात्मानं पश्यति, सत्यदृक् मुनिर्निरीहो परिशुद्धजीवस्वरूपानुसंधानपरः सन् विरमेत ।।४४।। हे प्रह्लाद! इत्थं मया सुगुप्तमपि मम वृत्तं लोकशास्त्राभ्यां व्यपेतमपि ते कथितम्, यतो भवान् भगवत्प्रवरः भवति ।।४५।। असुरेश्वरः प्रह्लादो मुनेः सकाशात् पारमहंस्यं धर्मं श्रुत्वा प्रीतः सन् तं पूजयित्वा तत आमन्त्र्य गृहं ययौ ।।४६।।

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः ।।१३ ।।

अथ चतुर्दशोऽध्यायः।।१४।।

युधिष्ठिर उवाच - गृहस्थ एतां पदवीं विधिना येन चाञ्जसा। यायाद्देवऋषे ब्रूहि मादृशो गृहमूढधीः।।१।। *नारद उवाच* - साधु पृष्टं महाराज लोकान् साध्वनुगृह्णता। एतत्तुभ्यं प्रवक्ष्यामि नैष्कर्म्यं कर्मणां यतः।।२।। गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः। वासुदेवार्पणं साक्षादुपासीत महामुनीन्।।३।। शृण्वन् भगवतोऽभीक्ष्णमवतारकथामृतम्। श्रद्दधानो यथाकालमुपशान्तजनावृतः।।४।। तत् सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु। विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः।।५।। यावदर्थमुपासीनो देहे गेहे च पण्डितः। विरक्तो रक्तवत् तत्र नृलोके नरतां न्यसेत्।।६।। ज्ञातयः पितरौ पुत्राः भ्रातरः सुहृदोऽपरे। यद् वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः।।७।। दिव्यं भौमं चान्तरिक्षं वित्तमच्युतनिर्मितम्। तत् सर्वमुपभुञ्जान एतत् कुर्यात् स्वतो बुधः।।८।।

।। सङ्ग्रहोक्तिः।।

अथ चतुर्दशोऽध्यायः।।१४।।

देशकालभेदेन गृहस्थधर्मवर्णनम्

युधिष्ठिर उवाच - हे देवर्षे! गृहासक्तचित्तो मादृशो गृहस्थजनो येन विधिना तां मोक्षपदवीं तूर्णं प्राप्नुयातात्, तं विधिं ब्रूहि।।१।। *नारद उवाच* - हे महाराज! लोकान् अनुगृह्णता जानताऽपि त्वया साधु पृष्टम्, एतत् पृष्टं तुभ्यमहं प्रवक्ष्यामि, यतो व्रतात् कर्मणां नैष्कर्म्यं स्यात्।।२।।हे राजन्! गृहस्थाश्रमस्थो गृहोचिताः क्रियाः साक्षाद् वासुदेवार्पणं कुर्वन् महामुनीन् उपासीत।।३।। यथाकालमुपशान्तजनैः सहितः श्रद्दधानः सन् भगवतोऽवतारकथामभीक्ष्णं शृणुयात्।।४।।एवं सतां सङ्गात् स्वयमेव मुच्यमानेषु देहस्त्रीपुत्रादिषु सत्सु स्वप्नवदुत्थितः सन्नासक्तिं विमुञ्चेत्।।५।। देहे गेहे दारादिषु च निपुणो विरक्तः सन् बहिस्त्वासक्तवत् यावदर्थं स्वीकुर्वन् मनुष्यदेह एव मनुष्यत्वमनुसन्दधीत।।६।।ज्ञातयः पितरौ, पुत्रा, भ्रातरोऽपरे सुहृदश्च यद् वदन्ति यदिच्छन्ति च तत् स्वयं निर्ममः सन्ननुमोदेत।।७।।दिव्यं, भौममाकस्मिकं दैवलब्धं च वित्तं, तत् सर्वं बुधो भुञ्जानः सन् पूर्वोक्तकर्मादिकं स्वत एव कुर्यात्।।८।।

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्। अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति।।९।। मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः। आत्मनः पुत्रवत् पश्येत्तैरेषामन्तरं कियत्।।१०।। त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि। यथादेशं यथाकालं यावद्दैवोपपादितम्।।११।। आश्वाघान्तेवसायिभ्यः कामान् संविभजेद् यथा। अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः।।१२।। जह्याद् यदर्थे स्वप्राणान् हन्याद् वा पितरं गुरुम्। तस्यां स्वत्वं स्त्रियां जह्याद् यस्तेन ह्यजितो जितः।।१३।। कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम्। क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः।।१४।। सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद् वृत्तिमात्मनः। शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात्।।१५।। देवानृषीन् नृभूतानि पितृनात्मानमन्वहम्। स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक्।।१६।। यर्ह्यात्मनोऽधिकारः स्यात्सर्वाः स्युर्यज्ञसम्पदः। वैतानिकेन विधिना अग्निहोत्रादिना यजेत्।।१७।।

।। सङ्ग्रहोक्तिः।।

हि यस्मात् यावता जठरं पूर्येत तावत् परिमितेऽन्नादावेव देहिनां स्वत्वं वर्तते, योऽधिकमभिमन्येत, स पुमान् चोरवद् दण्डमर्हति।।९।। मृग-उष्ट्र-खर-मर्कटा-ऽऽखु सरीसृप-खग-मक्षिकाः, एतान् प्राणिन आत्मनः पुत्रानिव मन्येत, पुत्रादिभिरेषामन्तरं कियत्?।।१०।। स्वयं गृहस्थः सन्नपि धमार्थकामान् अतिकृच्छ्रेणाऽऽपाद्य न सेवेत, यावद् दैवोपपादितं तावदेव देशकालानुगुण्येन भजेत्।।११।। श्वभ्य आरभ्य पापिचाण्डालपर्यन्तं यथार्हमन्नादीन् दद्यात्, यस्यां भार्यायां स्वत्वाग्रहो भवेत् तस्यां स्वत्वाभिमानं त्यजेत्।।१२।। जनो यद्भार्यार्थे स्वप्राणान् जह्यात् पितरं गुरुं वा हन्यात् तस्यां स्त्रियां यः पुमान् स्वत्वं जह्यात् तेन पुंसाऽजितः परमात्माऽपि जितो भवति।।१३।। कृमि-विट्-भस्मान्तमिदं तुच्छं शरीरं क्व, तथा च तच्छरीरसुखार्था भार्या क्व? एवं चाऽऽकाशवन्निर्लेपोऽयमात्मा क्व?।।१४।। दैवाल्लब्धैः पञ्चमहायज्ञावशिष्टैरन्नादिभिः स्वस्य वृत्तिं कल्पयेत्, शेषेऽप्यर्थे यः प्राज्ञः स्वत्वं त्यजेत् स महतां पदवी प्राप्नुयात्।।१५।। स्ववृत्या प्राप्तवित्तेन देवर्षिपितृभूतनृन् आत्मानं च पञ्चमहायज्ञैः पृथक् यजेत, परमपुरुषमपि यजेत।।१६।। यदा स्वस्य सर्वविधोऽधिकारः स्यात् सर्वा -

न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक्। इज्येत हविषा राजन्यथा विप्रमुखे हुतैः।।१८।। तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः। तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननम्।।१९।। कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः। श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान्।।२०।। अयने विषुवे कुह्वां व्यतीपाते दिनक्षये। चन्द्रादित्योपरागे च द्वादशीश्रवणेषु च।।२१।। तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके। चतुसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा।।२२।। माघे स सितसप्तम्यां मघाराकासमागमे। राकया वानुमत्या वा मासर्क्षाणि युतान्यपि।।२३।। द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः। तिसृष्वेकादशी वाऽसु जन्मर्क्षश्रोणयोगयुक्।।२४।। त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः। कुर्यात् सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः।।२५।। एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम्। पितृदेवनृभूतेभ्यो यद् दत्तं तद्ध्यनश्वरम्।।२६।।

।। सङ्ग्रहोक्तिः।।

यज्ञसंपदः स्यु तदा वैतानिकेन विधिनाऽग्निहोत्रादिकर्मणा परमपुरुषं यजेत।।१७।।हे राजन्! सर्वयज्ञभुग् अयं भगवान् विप्रमुखे हुतैरन्नादिभिर्यथेज्येत तथाऽग्निमुखतो हविषा नेज्येत।।१८।। तस्माद् विप्रेषु देवेषु पञ्चमहायज्ञाभिमानिषु देवेषु च यथायोग्यं तैस्तैः कामैर्विप्रमुखं क्षेत्रज्ञं परमात्मानं यजस्व।।१९।।द्विजो धनवांश्चेद् भाद्रपदमासे यथा वित्तं पित्रोस्तद्बन्धूनां चाऽऽपरपक्षीयं श्राद्धं कुर्यात्।।२०।।उत्तरदक्षिणसंज्ञकेऽयने, विषुवे, अमावास्यायां, व्यतीपाते, दिनक्षये, चन्द्रसूर्ययोर्गृहणे, द्वादशीषु, श्रवणेषु, च अक्षतृतीयायां कार्त्तिके शुक्लनवम्यां मार्गशीर्षादिमासचतुष्टयस्य कृष्णपक्षीयास्वष्टमीषु च श्राद्धं कुर्यात्।।२१-२२।। माघशुक्लसप्तम्यां, मघापूर्णमास्योः संयोगे, राकयाऽनुमत्या च पूर्णमास्या मासनामनक्षत्राणां संयोगे च श्राद्धं कुर्यात्।।२३।।द्वादश्यामनुराधा श्रवणं तिस्र उत्तराश्च स्युः, अथवा तिसृषूत्तरासु एकादशी वा यदा स्यात् यदा वा जन्मर्क्षश्रवणयोः संयोगः स्यात् तदाऽपि श्राद्धं कुर्यात्।।२४।।एत उक्ता अयनादयः श्रेयसः कालाः नृणां श्रेयोविवर्द्धनाः सन्ति, एतेषु यत् श्रेयः कुर्यात् तदेवाऽऽयुषः साफल्यं ज्ञेयम्।।२५।।एषु कालेषु कृतं स्नानं, जपः, होमः, व्रतं, देवद्विजार्चनं, पितृदेवनृभूतेभ्यो

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा। प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप॥२७॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेय आवहान्। स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते॥२८॥ बिम्बं भगवतो यत्र सर्वमेतच्चराचरम्। यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम्॥२९॥ यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम्। यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः॥३०॥ सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत। कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः॥३१॥ नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली। वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा॥३२॥ नारायणाश्रमो नन्दा सीतारामाश्रमादयः। सर्वे कुलाचला राजन्महेन्द्रमलयादयः॥३३॥ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये। एतान्देशान् निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः। धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः॥३४॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः।

॥ सङ्ग्रहोक्तिः॥

दत्तं च यत् किमपि सत्त्कर्म, तदनश्वरं भवति॥२६॥ हे नृप! जायाया अपत्यस्य स्वस्य च यः संस्कारकालः, मातृपित्रादीनामग्निदाहः, पितादीनां मृताहश्च एतेषु कालेषु तथाऽऽभ्युदयिके कर्मणि यत्कृतं स्नानदानादिकं तत्सर्वमनश्वरं भवति॥२७॥ अथ धर्मादिश्रेयस्करेषु कर्मसु हितावहान् देशान् वक्ष्यामि, देशस्तु यत्र सत्पात्रं लभ्यते स देशः पुण्यतमो विज्ञेयः॥२८॥ यस्मिन् एतच्चराचरमाधेयतया नियम्यतया च वर्तते तस्य भगवतो बिम्बं चक्राङ्कार्चावतार मूर्त्तिर्यत्र वर्तते, यत्र च तपोविद्यादयान्वितं ब्राह्मणकुलं वर्तते, स वै पुण्यतमो देशो भवति॥२९॥ यत्र देशे हरेर्यथाविधिपूजाप्रवाहो वर्तते, स देशः श्रेयसां पदम्, यत्र पुराणप्रसिद्धा गङ्गाद्या नद्यः॥३०॥ तथा पुष्करादीनि सरांसि, महात्मभिराश्रितानि क्षेत्राणि सन्ति, यथा - कुरुक्षेत्रं, गया, प्रयागः, पुलहाश्रमः॥३१॥ नैमिषं, फाल्गुनं, सेतुबन्धनस्थानं, प्रभासः, द्वारवती, वाराणसी, मथुरा, पम्पासरः, बिन्दुसरः॥३२॥ बदरिकाश्रमः, अलकनन्दातटं, चित्रकूटप्रभृतयः सीतारामाश्रमादयः, सर्वे महेन्द्रमलयादयः कुलाचलाः॥३३॥ एते सर्वे देशाः पुण्यतमाः, तथा हरेः स्थिरप्रतिमाश्रिताश्च देशाः पुण्यतमाः सन्ति, श्रेयःकामः पुमानभीक्ष्णश एतान् देशान्

हरिरेवैक उर्वीश यन्मयं वै चराचरम् ।।३५।। देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु। राजन् यदग्रपूजायां मतः पात्रतयाच्युतः ।।३६।। जीवराशिभिराकीर्ण आण्डकोशाङ्घ्रिपो महान्। तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ।।३७।। पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः। शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ।।३८।। तेष्वेषु भगवान् राजंस्तारतम्येन वर्तते। तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ।।३९।। दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप। त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ।।४०।। ततोऽर्चायां हरिं केचित् संश्रद्धाय सपर्यया। उपासत उपास्तापि नार्थदा पुरुषद्विषाम् ।।४१।। पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः। तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ।।४२।। नन्वस्य ब्राह्मणा राजन् कृष्णस्य जगदात्मनः।

।। सङ्ग्रहोक्तिः ।।

निषेवेत, यत्राचरितः धर्मः पुंसां सहस्रगुणतोऽप्यधिकस्य फलोदयस्य कारको भवेत् हि ।।३४।। हे उर्वीश! पात्रवित्तमैः कविभिरिदं चराचरात्मकं जगद् यन्मयं प्रोक्तं स हरिरेवैकः सत्पात्रं निरुक्तमस्ति ।।३५।। हे राजन्! देवेषु ऋषिषु पूज्यतमेषु सनकादिसिद्धेषु च सत्स्वपि भवदीयराजसूयेऽग्रपूजायां श्रीकृष्ण एव संमतोऽभूत् ।।३६।। जीवराशिभिर्व्याप्तोऽयं महान् ब्रह्माण्डकोशवृक्षोऽस्ति, तस्य मूलं भगवान् नारायणोऽस्ति, अतस्तस्य पूजया सर्वेषां जीवात्मानां तृप्तिर्जायते ।।३७।। नृ-तिर्यक्-ऋषि-देवताः, एतेषां सर्वेषां शरीराण्यनेन भगवता सृष्टानि, असौ भगवान् जीवाख्येन स्वशरीरेण तेषु पुरेषु शेते, अतः स पुरुष इत्युच्यते ।।३८।। तेषु नृतिर्यगादिषु पुरुषेषु भगवान् तारतम्येन वर्त्तते, तस्मात् कारणात् परमपुरुषो ज्ञानशक्त्यादिगुणैर्यावान् यत्र प्रतीयते तावत् तदुत्तमं पात्रं ज्ञेयम् ।।३९।। त्रेतादिषु नृणां परस्परमवज्ञात्मतां दृष्ट्वा, हे नृप! विद्वद्भिर्हरेः पूजार्थं प्रतिमा पूज्यत्वेन स्वीकृताऽऽसीत् ।।४०।। ततः केचित् हरिं प्रतिमायां श्रद्धां कृत्वोपासते, एवमुपासिता प्रतिमाऽपि भगवदात्मकपुरुषद्वेषकर्तॄणां पुरुषार्थदात्री न भवति ।।४१।। हे राजेन्द्र! पुरुषेष्वपि ब्राह्मणं सत्पात्रं विदुः, तद् ब्राह्मणकुलं तपसा विद्यया तुष्ट्या च हरेस्तनुं वेदं धत्ते ।।४२।।

पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ।।४३।।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्दशोऽध्यायः ।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

नारद उवाच - कर्मनिष्ठा द्विजाः केचित् तपोनिष्ठा नृपापरे। स्वाध्यायेऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ।।१ ।। ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता। दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ।।२ ।। द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा। भोजयेत् सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ।।३ ।। देशकालोचितश्रद्धाद्रव्य-पात्रार्हणानि च। सम्यग् भवन्ति नैतानि विस्तरात् स्वजनार्पणात् ।।४ ।। देशे काले च सम्प्राप्ते मुन्यन्नं हरिदैवतम्। श्रद्धया विधिवत् पात्रे न्यस्तं कामधुगक्षयम् ।।५ ।।

।। सङ्ग्रहोक्तिः ।।

हे राजन्! त्रिलोकीं स्वपादरजसा पुनन्तो ब्राह्मणा जगदन्तरात्मनः कृष्णस्य महद् दैवतं ननु ।।४३।। *इति श्रीमद्भागवते सप्तमस्कन्धे चतुर्दशोऽध्यायः ।।१४।।*

अथ पञ्चदशोऽध्यायः ।।१५।।

सर्ववर्णाश्रमसारसंग्रहः मोक्षलक्षणं च

नारद उवाच - हे नृप! केचिद् द्विजाः कर्मनिष्ठाः, अपरे तपोनिष्ठाः, केचिद् वेदाध्ययने निष्ठावन्तः, केचिद् अध्यापने निष्ठावन्तः, केचिच्च ज्ञानयोगयोः परिनिष्ठिताः सन्ति ।।१।। कर्मणां फलानन्त्यमिच्छता पुरुषेण पितृनुदिश्य देयान्यन्नादीनि भगवदुपासनात्मकज्ञाननिष्ठाय पुरुषाय देयानि, तदभावे कर्मनिष्ठादिभ्यो यथायोग्यं देयानि ।।२।। दैवकार्ये द्वौ ब्राह्मणौ भोजयेत्, पितृकार्ये त्रीन्, अथवा द्वयोः कार्ययोरेकैकं भोजयेत्, सुसमृद्धोऽप्येवं ब्राह्मणान् भोजयेत्, श्राद्धे विस्तरं न कुर्यात् ।।३।। देशः, कालः, उचिता श्रद्धा, द्रव्याणि, पात्राणि, अर्हणानि चेत्येतानि विस्तरात्स्वजनार्पणाच्च सम्यक् न भवन्ति, अतो विस्तरो न कर्त्तव्यः ।।४।। देशेऽपरपक्षादिकाले च संप्राप्ते श्राद्धादौ मुन्यन्नं हरये निवेदितं सत् सत्पात्रे विधिवत् -

देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च। अन्नं संविभजन्पश्येत् सर्वं तत् पुरुषात्मकम् ।।६।। न दद्यादामिषं श्राद्धे न चाद्याद् धर्मतत्त्ववित्। मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया।।७।। नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम्। न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः।।८।। एके कर्ममयान् यज्ञान् ज्ञानिनो यज्ञवित्तमाः। आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते।।९।। द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति। एष माऽकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम्।।१०।। तस्माद् दैवोपपन्नेन मुन्यन्नेनापि धर्मवित्। सन्तुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकाः क्रियाः।।११।। विधर्मः परधर्मश्च आभासः उपमा छलः। अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत् त्यजेत् ।।१२।। धर्मबाधो विधर्मः स्यात् परधर्मोऽन्यचोदितः। उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः।।१३।। यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमात् पृथक्।

।। सङ्ग्रहोक्तिः ।।

श्रद्धयाऽर्पितं चेदक्षयं भवति।।५।। देवाः, ऋषयः, पितरः, भूतानि चेत्येतेभ्यः स्वजनाय चान्नं संविभजन् सर्वमपि प्राणिजातं भगवदात्मकं पश्येत्।।६।। श्राद्धे मांसं न दद्यात्, धर्मवत् स्वयमपि मांसं नाऽद्यात्, पित्रादीनां मुन्यन्नैर्यथा परा प्रीतिः स्यात् तथा पशुहिंसया न।।७।। सद्धर्ममिच्छतां नृणामेतादृश उत्कृष्टो धर्मो नास्ति, यो भूतेषु मनोवाक्कायजस्य दण्डस्य त्यागः, अर्थात् मनसा वचसा कायेन च भूतद्रोहाऽभाव एव नृणां परो धर्मः।।८।। यज्ञवित्तमा निष्कामाः केचित् ज्ञानिन कर्ममयान् यज्ञान् ज्ञानदीपित आत्मसंयमने जुह्वति, मनसः संयमनात्मकं होमं कुर्वन्ति।।९।। द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा पश्वादीनि बिभ्यति, यत अयं अकरुणोऽतज्ज्ञोऽसुतृप् खलो ध्रुवं मां हन्यादिति।।१०।। तस्माद् धर्मवित् पुमान् दैवाद् प्राप्तेन मुन्यन्नेनैवाऽहरहो नित्यनैमित्तिकाः क्रियाः सन्तुष्टः सन् कुर्यात्।।११।। धर्मज्ञः पुरुषोऽधर्मस्य पञ्चशाखाः – यथा विधर्मः, परधर्मः, आभासधर्मः, उपमाधर्मः, छलधर्मश्च, ता अधर्मवदेव त्यजेत्।।१२।। यस्मात् स्वधर्मस्य बाधः स्यात् स विधर्मः, अन्यस्य विहितः सः परधर्मः, यस्मिन् पाखण्डः स पाखण्डो दम्भो वा स्यात् स उपमाधर्मः उपधर्मः, शब्दभेदेनाऽन्यथादर्शकः छलधर्मः, यः पुंभिः चतुर्भ्य आश्रमेभ्यः पृथक् स्वेच्छया कृतः, कल्पितः स

स्वभावविहितो धर्मः कल्प्यतेऽस्योपशान्तये।।१४।। धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनम्। अनीहानीहमानस्य महाहेरिव वृत्तिदा।।१५।। सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत् सुखम्। कुतस्तत् कामलोभेन धावतोऽर्थेहया दिशः।।१६।। सदा सन्तुष्टमनसः सर्वाः सुखमया दिशः। शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम्।।१७।। सन्तुष्टः केन वा राजन्न वर्तेतापि वारिणा। औपस्थ्यजैह्व्यकार्पण्याद् गृहपालायते जनः।।१८।। असन्तुष्टस्य विप्रस्य तेजो विद्या तपो यशः। स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते।।१९।। कामस्यान्तं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात्। जनो न याति लोभस्य जित्वा भुक्त्वा दिशो भुवः।।२०।। पण्डिता बहवो राजन् बहुज्ञाः संशयच्छिदः। सदसस्पतयोऽप्येक असन्तोषात् पतन्त्यधः।।२१।। असङ्कल्पाज्जयेत् कामं क्रोधं कामविवर्जनात्। अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात्।।२२।।

।। सङ्ग्रहोक्तिः।।

आभास धर्मः, स्वभावविहितो य इज्यादिरूपो धर्मः, तं धर्ममाचरतः पुंस उपशान्तये कल्प्यते।।१३-१४।। निर्धनः पुमान् धर्मार्थं देहधारणार्थमपि धनं न कामयेत, अजगरस्येव धनार्थं चेष्टां न कुर्वतः पुंसोऽकामना जीवनावहा भवति।।१५।। निष्कामस्य दैवाल्लब्धेन सन्तोषवतः स्वात्मारामस्य यत् सुखं भवति तत् विषयलोलुपस्य धनकाङ्क्षया दिशो धावतः पुंसः कुतो भवति।।१६।। सदा संतुष्टमनसः सर्वा दिशः सुखमय्यो भवन्ति यथा उपानद्रक्षितपादस्य शर्कराकण्टकादिभ्यो कष्टं न भवति तद्वत्।।१७।। हे राजन्! पुमान् संतुष्टश्चेत् स वारिणाऽपि प्राणयात्रां विधाय सुख्यति, किन्तु कोऽप्यसन्तुष्टश्चेत् उपस्थजिह्वासुखदैन्यात् गृहपालः श्ववेवाऽऽचरति।।१८।। असंतुष्टस्य विप्रस्य ब्रह्मवर्चसं, विद्या, तपो, यशश्चत्येते सर्वे गुणा इन्द्रियलौल्येन स्रवन्ति तथा ज्ञानमप्यपगच्छति।।१९।। जनःक्षुत्तृड्भ्यां कामस्याऽन्तं याति, क्रोधस्याऽन्तोऽपि फलरूपपरपीडोदयाद् भवति, लोभस्याऽन्तस्तु दिशो जित्वा भुवो भुक्त्वाऽपि च न याति।।२०।। हे राजन्! अत एव बहुज्ञाः, संशयच्छिदः सदस्पतयो बहवः पण्डिता अप्यसंतोषादधो नरके पतन्ति।।२१।। तद्विषयसंकल्पत्यागात् कामं जयेत, क्रोधं कामविवर्जनाद्

आन्वीक्षिक्या शोकमोहौ दम्भं महदुपासया। योगान्तरायान् मौनेन हिंसां कायाद्यनीहया।।२३।। कृपया भूतजं दुःखं दैवं जह्यात् समाधिना। आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया।।२४।। रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च। एतत् सर्वं गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत्।।२५।। यस्य साक्षात् भगवति ज्ञानदीपप्रदे गुरौ। मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत्।।२६।। एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः। योगेश्वरैर्विमृग्याङ्घ्रिर्लोको यं मन्यते नरम्।।२७।। षड्वर्गसंयमैकान्ताः सर्वा नियमचोदनाः। तदन्ता यदि नो योगानावहेयुः श्रमावहाः।।२८।। यथा वार्तादयो ह्यर्था योगस्यार्थं न बिभ्रति। अनर्थाय भवेयुस्ते पूर्तमिष्टं तथासतः।।२९।। यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः। एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः।।३०।।

।। सङ्ग्रहोक्तिः ।।

जयेत्, धने पञ्चदशदोषेक्षया लोभं जयेत्, वस्तुयाथात्म्यानुसंधानाद् भयं जयेत्।।२२।। आत्मानात्मविवेकेन शोकमोहौ जयेत्, ज्ञानिनां सेवया दम्भं जयेत् ,मौनेन योगविघ्नान् जयेत्, निषिद्धकर्मेच्छावर्जनेन हिंसा जयेत्।।२३।। भूतजं दुःखं कृपया जयेत्, आधिदैविकं दुःखं मनः समाधानेन जयेत्, देहजं दुःखं प्राणायामादियोगबलेन जयेत्, सात्त्विकाहारसंसेवनेन निद्रां जयेत्।।२४।। रजोगुणं तमोगुणं च सत्त्वगुणेन जयेत्, सत्त्वमन्तःकरणं ध्याननिष्ठया जयेत्, एतत्कामादिदोषसमूहं पुरुषो गुरौ भक्त्या जयेत्।।२५।। यस्य साक्षात् भगवति ज्ञानप्रदीपप्रदे गुरौ च सावज्ञा मर्त्यबुद्धिर्भवेत् तस्य सर्वशास्त्राध्ययनादिकं कामजयादिकं च गजस्नानवत् निरर्थकं भवति।।२६।।एष हि साक्षात् भगवान् श्रीकृष्णः प्रकृतिपुरुषयोर्नियामको वर्तते, योगेश्वरैरपि ध्येयचरणो विद्यते, तस्याऽनभिज्ञो लोकः तं सामान्यं मनुष्यं मन्यते।।२७।। उक्ताः सर्वे नियमादयः षण्णामिन्द्रियाणां जये पर्यवसन्ति, एवं सर्वेन्द्रियषड्वर्गजयादयोऽपि योगस्य धारणाध्यानादिषु तात्पर्यं वहन्ति, अन्यथा ते व्यर्था भवन्ति।।२८।। यथा कृष्यादिवार्तास्तल्लाभार्थाश्च मोक्षाय न भवन्ति तर्हि ते व्यथा ज्ञेयाः, एवं च भगवद्विमुखेन कृतानि इष्टपूर्तादीनि कर्माण्यपि यदि योगतात्पर्यं न साधयति तर्हि तान्यप्यनर्थाय भवन्ति।।२९।। यः पुमान् चित्तस्य जयउद्युक्तो भवेत् स निःसङ्गोऽपरिग्रहः भिक्षुः एकः -

देशे शुचौ समे राजन् संस्थाप्यासनमात्मनः। स्थिरं समं सुखं तस्मिन्नासीतर्ज्वङ्ग ओमिति ।।३१।। प्राणापानौ सन्निरुध्यात् पूरकुम्भकरेचकैः। यावन्मनस्त्यजेत् कामान् स्वनासाग्रनिरीक्षणः।।३२।। यतो यतो निःसरति मनः कामहतं भ्रमत्। ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः।।३३।। एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः। अनिशं तस्य निर्वाणं यात्यनिन्धनवह्निवत्।।३४।। कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत्। चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित्।।३५।। यः प्रव्रज्य गृहात् पूर्वं त्रिवर्गावपनात् पुनः। यदि सेवेत तान् भिक्षुः स वै वान्ताश्यपत्रपः।।३६।। यैः स्वदेहः स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात्। त एनमात्मसात्कृत्वा श्लाघयन्ति ह्यसत्तमाः।।३७।। गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि। तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलोल्यता।।३८।।

।। सङ्ग्रहोक्तिः।।

स्यात्, भिक्षाप्राप्तं यत् यत् मिताशनः विविक्तवासश्च भवेत्।।३०।। हे राजन्! स शुचौ समे देश आत्मनः स्थिरमासनं संस्थाप्य, तस्मिन्नासने ऋजुकायः, स्थिरं समं सुखं यथा स्यात् तथाऽऽसीत।।३१।। पूरक-रेचक-कुम्भकैः प्राणायामैः प्राणापानौ सन्निरुध्यात् यावन् मनो विषयसंकल्पान् त्यजेत् तावत् स्वनासाग्रे दृष्टिं स्थिरां कुर्यात्।।३२।। विषयाक्षिप्तं मनो भ्रमत् सत् यं यं विषयं धारयति तस्मात्. तस्मात् आकृष्य बुधो हृदि शुभाश्रये हरौ शनैः रुन्ध्यात्।।३३।। सर्वदाऽभ्यासं कुर्वतस्तस्य यतेश्चित्तमल्पीयसा कालेन निरिन्धनवह्निवत् निर्वाणं-शान्तं भवति।।३४।। विषयैरसंक्रान्तं प्रशान्ताखिलवृत्तिकं चित्तं ब्रह्मसुखस्पृष्टं सत् कर्हिचिदपि शुभाश्रयाद्धरेः प्रच्युतं न भवति।।३५।। त्रिवर्गक्षेत्रभूताद् गृहात् प्रव्रज्य यः पुमान् पुनः तान् त्रीन् धर्मादीन् सेवेत स निर्लज्जो वान्ताशिभषकतुल्यो ज्ञेयः।।३६।। यैः परिव्राड्भिः पूर्वं स्वदेहोऽनात्मत्वेन निश्चितः, मरणशीलः, विट्कृमिभस्मसात् च स्मृतः, त एव पुनरेनं देहमात्मसात् कृत्वा श्लाघयन्ति, ते परिव्राजोऽसत्तमाः कथ्यन्ते।।३७।। गृहस्थस्य स्ववर्णाश्रमोचितक्रियाणां त्यागः, ब्रह्मचारिणः स्वकीयव्रतत्यागः, वानप्रस्थस्य ग्रामवासः, संन्यासिन इन्द्रियलौल्यता, एते स्वधर्मत्यागिन आश्रमेषु निकृष्टा आश्रमविडम्बनाः सन्ति, -

आश्रमापसदा ह्येते खल्वाश्रमविडम्बकाः। देवमायाविमूढांस्तानुपेक्षेतानुकम्पया ।।३९।। आत्मानं चेद् विजानीयात् परं ज्ञानधुताशयः। किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति लम्पटः।।४०।। आहुः शरीरं रथमिन्द्रियाणि हयानभीषून् मन इन्द्रियेशम्। वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद् बन्धुरमीशसृष्टम्।।४१।। अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवम्। धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम्।।४२।। रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः। मानोऽवमानोऽसूया च माया हिंसा च मत्सरः।।४३।। रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः। रजस्तमःप्रकृतयः सत्त्वप्रकृतयः क्वचित्।।४४।। यावन्नृकाय-रथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम्। ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशान्त इदं विजह्यात्।।४५।। नो चेत् प्रमत्तम-सदिन्द्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपन्ति।

।। सङ्ग्रहोक्तिः।।

तान् देवमायाविमूढाननुकम्पयोपेक्षेत।।३८-३९।।स यदि परमात्मानं याथातथ्येन विजानीयात् ज्ञानेन निर्धूतवासनः सन् किमर्थं पुनर्लम्पटो भूत्वा देहं पुष्णीयात्।।४०।। वेदान्ताः शरीरं रथं, इन्द्रियाणि हयान्, मनः रश्मीन्, शब्दादीन् विषयान् वर्त्मानि, बुद्धिं सारथिं, परमात्मना सृष्टं, बृहद्बन्धुरं इति आहुः।।४१।। दशप्राणमक्षस्थानीयं, पुण्यापुण्ये चक्रे, देहाभिमानिनं जीवं रथिनं, प्रणवो धनुः, शुद्धः क्षेत्रज्ञः शरं, परमात्मानं तु वेध्यं वदन्ति।।४२।। रागः, द्वेषः, लोभः, शोकः, मोहः, भयं, मदः, मानः, असूया, माया, हिंसा, मत्सरः, अभिनिवेशः, प्रमादः, क्षुधा, निद्रा चेतीमे शत्रवो जेतव्याः, तत्र केचित् रजस्तमःप्रकृतयः सन्ति, क्वचित् सत्त्वप्रकृतयः सन्ति।।४३-४४।। यावदयं जीवो मनुष्यशरीरस्थः स्ववशं धारयति, तावदेव महापुरुषाणां चरणकमलसेवया तीक्ष्णं ज्ञानासिं बिभ्राणः निरस्तशत्रुः, भगवद्बलः उपशान्तचित्तः स्वाराज्यतुष्टः सन् नृकायरथादिकं विजह्यात्, तेषु स्पृहारहितो भवेत्।।४५।। यद्युक्तविधो नो चेत् असावधानमिमं देहिनं बहिर्मुखेन्द्रियरूपा अश्वाः, सूताख्या बुद्धिश्चोत्पथं नीत्वा विषयदस्युषु क्षिपन्ति, ते दस्यव सहयसुतं इन्द्रियबुद्धिसहितं प्रमत्तं देहिनमधिकमृत्युभये संसाररूपे -

ते दस्यवः सहयसूतममुं तमोऽन्धे संसारकूप उरुमृत्युभये क्षिपन्ति।।४६।। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्। आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम्।।४७।। हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम्। दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः।।४८।। एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च। पूर्तं सुरालयारामकूपाजीव्यादिलक्षणम्।।४९।। द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः। अयनं दक्षिणं सोमो दर्श औषधिवीरुधः।।५०।। अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः। एकैकश्येनानुपूर्वं भूत्वा भूत्वेह जायते।।५१।। निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः। इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति।।५२।। इन्द्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः। वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत्। ओङ्कारं बिन्दौ नादे तं तं तु प्राणे महत्यमुम्।।५३।।

।। सङ्ग्रहोक्तिः।।

तामिस्रनरकतुल्ये कूपे क्षिपन्ति।।४६।। वेदविहितं कर्म प्रवृत्तं निवृत्तं चेत्येवं द्विविधमस्ति, तत्र प्रवृत्तेन कर्मणा ततः कर्मफलभोगानन्तरं पुनरिहावर्त्तते, निवृत्तेन कर्मणाऽमृतमश्नुते, पुनर्नाऽऽवर्तते।।४७।। तत्राऽग्निहोत्रप्रभृतिकं, दर्शपौर्णमास्यं चातुर्मास्यं च कर्म, पशुयागाख्यं सोमयागाख्यं च कर्म, हुतं वैश्वदेवाख्यं कर्म, प्रहुतं बलिहरणाख्यं कर्म, इत्येतत् सर्वं वैदिकं कर्म इष्टाख्यं ज्ञेयम्, तत्र हिंस्रद्रव्यमयं कर्म, द्रव्यमयं काम्यं कर्माऽशान्तिदं प्रवृत्ताख्यं च स्यात्, देवमन्दिराणि, आरामः, कूपः, आजीविका च इत्यादीनि यानि कर्माणि तानि पूर्ताख्यानि कर्माणि ज्ञेयानि।।४८-४९।। हे पृथिवीपते! निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजो देहत्यागानन्तरं भूतसूक्ष्मपरिश्वक्तः सन् धूमः, रात्रिः, कृष्णपक्षः इति दक्षिणायनं, धूमादिक्रमेण चन्द्रं प्राप्य, तत्राऽमृतमयशरीरः सन् इष्टादिकर्मफलारूपान् नानाभोगाननुभूय पुनरोषध्यन्नरेतः साम्यप्राप्तिपरम्परया भुवि पुनः पुनर्जन्म प्राप्नोति, एवं प्रवृत्तिमार्गः कथितः।।५०-५१।। देवयानेन जिगमिषुः ज्ञानदीपितेष्विन्द्रियेषु कर्मेन्द्रियव्यापारान् जुहोति, ज्ञानेन्द्रियाणि मनसि नियच्छेत्, मनः वाचि नियच्छेत्।।५२।। वाचं वर्णसमाम्नाये न्यसेत्, वर्णसमाम्नायं स्वर ॐकारे, अकारं बिन्दुनादे, तं प्राणसहचारिणि जीवे न्यसेत्, जीवं महदात्मनि परब्रह्मणि

अग्निः सूर्यो दिवा प्राह्नः शुक्लो राकोत्तरं स्वराट्। विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ।।५४।। देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः। आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते ।।५५।। य एते पितृदेवानामयने वेदनिर्मिते। शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ।।५६।। आदावन्ते जनानां सद् बहिरन्तः परावरम्। ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिश्च यत् स्वयम् ।।५७।। अबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः। दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ।।५८।। क्षित्यादीनामिहार्थानां छाया न कतमापि हि। न संघातो विकारो वा न पृथङ् नान्वितो मृषा ।।५९।। धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना। न स्युर्ह्यसत्यवयविन्यसन्नवयवोऽन्ततः ।।६०।। स्यात् सादृश्यभ्रमस्तावद् विकल्पे सति वस्तुनः। जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ।।६१।।

।। सङ्ग्रहोक्तिः ।।

समर्पयेत् ।।५३।। अथ तस्य गतिहेतुभूतमर्चिमार्गमंशतो निर्दिशति यथा अग्निः, सूर्यः, दिवा. अहःपूर्वभागः, शुक्लपक्षः, पूर्णिमा,उदगयनं, स्वराट् ब्रह्मलोकं प्राप्नुयात्, एतान् अर्चिमार्गगतो जीवः प्राप्नोति, सत्यलोकाद् ब्रह्मधाम गच्छन् मुक्तः विश्वः स्यात्, तत तैजसः स्यात्, ततः प्राज्ञः, ततः समन्वयं प्राप्य तुर्येण वासुदेवेन साधर्म्यं प्राप्य मुक्तिभाग् भवेत् ।।५४।। वेदान्ता इदं देवयानमाहुः, परमात्मोपासकः क्रमेणाऽर्चिरादीन् प्राप्य, निःशेषनिवृत्तो ब्रह्मात्मकस्वरूपे स्थितः सन् पुनर्न निवर्तते ।।५५।। यो ममुक्षुर्वेदबोधिते पितृदेवानामयने शास्त्रेण चक्षुषा वेद, स देहस्थः सन्नपि न मुह्यति ।।५६।। यत् उत्कृष्टापकृष्टवस्तुज्ञानं जीवरूपं, ज्ञेयं, वचः, वाच्यं, तमः, ज्योतिः, तत् स्वयं परमात्मस्वरूपं, जनानामादावन्ते वर्तमानं अन्तर्बहिश्च सद्रूपेण वर्तमानं वस्तु परमात्मस्वरूपं बोध्यम् ।।५७।। दृश्यो देहोऽबाधितोऽपि यथाऽवस्तुतया स्मृतः तद्वत् शब्दार्थरूपेण विकल्पितमिन्द्रियग्राह्यं वस्तुमात्रमप्यवस्तु स्मृतम् ।।५८।। पृथिव्यादिपञ्चभूतानामैक्यालम्बनभूतं आत्मनः शरीरं न संघातः, न विकारः, न पृथक्, नाऽन्वितम्, अत एव शरीरस्याऽनित्यत्वात् तन्नात्मा ।।५९।। पृथिव्यादिधातवः अवयवित्वादवयवैर्विना न स्यात्, अवयविनि नष्टे अवयवा अपि असन्त एव, अवयवसंघातत्वात् रूपवत्वाच्छरीरमनित्यमेव, तद् आत्मा न भवति ।।६०।। द्वयोर्वस्तुनोर्ज्ञानादिगुणवत्त्वे सति सादृश्यभ्रमः स्यात्, यथा

भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथाऽऽत्मनः। वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः॥६२॥ कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत्। अवस्तुत्वाद् विकल्पस्य भावाद्वैतं तदुच्यते॥६३॥ यद् ब्रह्मणि परे साक्षात् सर्वकर्मसमर्पणम्। मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते॥६४॥ आत्मजायासुतादीनामन्येषां सर्वदेहिनाम्। यत् स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते॥६५॥ यद् यस्य वाऽनिषिद्धं स्याद् येन यत्र यतो नृप। स तेनेहेत कर्माणि नरो नान्यैरनापदि॥६६॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः। गृहेऽप्यस्य गतिं यायाद् राजंस्तद्भक्तिभाङ्नरः॥६७॥ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः। यत्पादपङ्केरुहसेवया भवान् महर्षिभिर्निर्जितदिग्जनः क्रतून्॥६८॥ अहं पुराभवं कश्चिद् गन्धर्व उपबर्हणः। नाम्नातीते ब्रह्मकल्पे गन्धर्वाणां सुसंमतः॥६९॥

॥ सङ्ग्रहोक्तिः॥

स्वप्ने जाग्रत् स्वापौ तथा विधिप्रतिषेधता, एवं यावद् देहे आत्मभ्रमस्याऽनुवृत्तिस्तावत् विधिनिषेधौ स्याताम्॥६१॥यथा देहात्मनोर्भेदः शास्त्रसंमतः तथा भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं च मनसि प्रतिष्ठितं कुर्वन् मुनिरिह स्वानुभूत्या भ्रमात्मकानि निरस्यति॥६२॥ पटतन्तुवत् कार्यकारणयोर्वस्तुनोरैक्यमर्शनं - एकत्वेन दर्शनं यत्, तद् भावाद्वैतमुच्यते, कुतो विकल्पस्याऽवस्तुत्वात् कृत्स्नं जगच्चिदचिदात्मकं सूक्ष्मचिदचिद्विशिष्टाद् ब्रह्मणोऽनन्यत्वात् ॥६३॥ हे पार्थ! साक्षात् परे ब्रह्मणि परमात्मनि मनोवाक्कायैः सर्वकर्मसमर्पणं यत्, तत् क्रियाद्वैतमुच्यते॥६४॥ आत्मजायासुतादीनामन्येषां सर्वदेहिनां च स्वार्थकामयोरैक्यम् - धनस्रक्चन्दनादिवस्तूनां आत्मजायादिपरिवारभोक्तृवर्गसाधारणत्ववेदनं द्रव्याद्वैतमुच्यते ॥६५॥ अनापदि यस्य पुरुषस्य यस्मिन् काले यद् द्रव्यं अनिषिद्धं स्यात् स तस्मिन् काले तेन द्रव्येन स्वकर्माणि विदध्यात्॥६६॥ वेदादिभिः कर्त्तव्यत्वेनोक्तैः स्वकर्मभिर्वर्त्तमानो भगवतो भक्तिं कुर्वन् नरो गृहस्थः सन्नपि श्रीकृष्णस्य गतिं यायात्॥६७॥ हे नृपदेव! यथा प्रभोरन्तरात्मनः श्रीकृष्णपरमात्मन एव यूयं दुस्त्यजानापद्गणानुत्तीर्णाः स्थ, भवान् यत्पादपद्मसेवया विजितदिक्पालः सन् महर्षिभिः सह क्रतूनकार्षीत्॥६८॥ब्राह्मकल्पे पूर्वजन्मन्यहमुपबर्हणंनामा

रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः। स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलम्पटः ।।७०।। एकदा देवसत्रे तु हरिगाथोपगायने। उपहूता विश्वसृड्भिर्गन्धर्वाप्सरसां गणाः।।।७१।। अहं च गायंस्तद्विद्वान् स्त्रीभिः परिवृतो गतः। ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ।।७२।। याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः। तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम्। शुश्रूषयानुषङ्गेण प्राप्तोऽहं ब्रह्मपुत्रताम्।।७३।। धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः। गृहस्थो येन पदवीमन्ते संन्यासिनामियात्।।७४।। यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति। येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ।।७५।। स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः। प्रियः सुहृद् वः खलु मातुलेय आत्मार्हणीयो विधिकृद् गुरुश्च।।७६।। न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम्।

।। सङ्ग्रहोक्तिः ।।

कश्चिद् गन्धर्वाणां संमतो गन्धर्वोऽभवम्।।६९।। सौन्दर्य-सौकुमार्य-माधुर्य-सौन्ध्यादिभिः प्रियदर्शनोऽहं सदा स्त्रीणां प्रियतमो मत्तः पुरुलम्पटश्चाऽभवम् ।।७०।। एकदा हरिगुणानुभवात्मकसत्रे प्रजापतिभिर्हरिकथागायनार्थं गन्धर्वाप्सरसां गणा आहूताः।।७१।। तत् गन्धर्वाह्वानं विद्वानहमपि स्त्रीभिः परिवृतो हरीतरगाथा गायन् तत्र गतः, तं मेऽपराधं ज्ञात्वा विश्वसृजस्तपोबलेन मां शेपुः।।७२।। कृतहेलनो नष्टश्रीस्त्वमाशु शूद्रतां याहि, तदा यस्मिन् क्षणे शापो जातस्तस्मिन् क्षण एवाऽहं शूद्रजातिभवायां दास्यां जातः, तत्रापि ब्रह्मवादिनां शुश्रूषया तत्सत्संगेन चाऽस्मिन् कल्पे ब्रह्मपुत्रतां प्राप्तोऽस्मि।।७३।। हे राजन्! तुभ्यं पापनाशनो गृहमेधीयो धर्मो वर्णितः, येन धर्मेण श्रुतेनाऽनुष्ठितेन च सता गृहस्थोऽन्ते भगवति संन्यस्तात्मनां मुक्तिरूपां पदवीं प्राप्नुयात्।।७४।। हे युधिष्ठिर! मनुष्यलोके यूयं बहुभाग्यवन्तः स्थ, येषां युष्माकं गृहान् लोकं पुनाना मुनयोऽभियान्ति, कुतः? मनुष्यसमानशरीरं साक्षात् परंब्रह्म श्रीकृष्णरूपं प्रच्छन्नं सत् येषां युष्माकं गृहानावसति।।७५।। सोऽयं श्रीकृष्णो युष्माकं मातुलेयः, प्रियः, सुहृत्, अन्तरात्मा, पूज्यः, विधिकृत्, गुरुश्चास्ति, एवं भूतः सन्नपि परमानन्दानुभूतिरूपः, स महतामपि तत्स्वरूपं दुरवगमं वर्तते।।७६।। साक्षाद वर्तमानस्य यस्य श्रीकृष्णभगवतः

मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः॥७७॥ *श्रीशुक उवाच* – इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः। श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः॥७८॥ पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः। कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः॥७९॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्त्तिाः। देवासुरमनुष्याद्या लोका यत्र चराचराः॥८०॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चदशोऽध्यायः॥१५॥

इति सप्तम स्कन्धः समाप्तः

॥ सङ्ग्रहोक्तिः॥

स्वरूपं ब्रह्मभवादिभिः स्वमनीषया याथात्म्येन न विषयीकृतं, किन्तु केवलेन मौनेन भक्त्या इन्द्रियजयादिना च पूजितः सात्वतां पतिरेष भगवान् मह्यं प्रसन्नो भवतु॥७७॥ *श्रीशुक उवाच* – इति देवर्षिणा यत् प्रोक्तं तत् निशम्य भरतर्षभो युधिष्ठिर प्रेम्णा कृष्णं नारदं च पूजयामास, मुनिर्नारदश्च कृष्णपार्थावुपामन्त्र्य प्रययौ, पार्थो युधिष्ठिरः कृष्णं परं ब्रह्म श्रुत्वा परमविस्मितो बभूव॥७८-७९॥ इत्थं दित्यादीनां वंशाः तुभ्यं पृथक् प्रकीर्तिताः, येषु वंशेषु देवासुरमनुष्याद्याश्चराचरा लोकाः जाताः॥८०॥

इति श्रीमद्भागवते सप्तमस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः॥१५॥

इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां सप्तमस्कन्धः समाप्तः

॥ श्रीस्वामिनारायणो विजयतेतराम् ॥

नमोऽवतारिणे श्रीस्वामिनारायणाय

॥श्रीमद्भागवतमहापुराणम्॥

सङ्ग्रहोक्तिटीकासहितम्

अष्टम स्कन्धः

अथ प्रथमोऽध्यायः ॥१॥

राजोवाच – स्वायम्भुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः। यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः॥१॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः। गृणन्ति कवयो ब्रह्मंस्तानि नो वद शृण्वताम्॥२॥ यद्यस्मिन्नन्तरे ब्रह्मन् भगवान् विश्वभावनः। कृतवान् कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा॥३॥ *ऋषिरुवाच* – मनवोऽस्मिन्व्यतीताः षट्कल्पे स्वायम्भुवादयः। आद्यस्ते कथितो यत्र देवादीनां च सम्भवः॥४॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः। धर्मज्ञानोपदेशार्थं भगवान् पुत्रतां गतः॥५॥ कृतं पुरा भगवतः कपिलस्यानुवर्णितम्। आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह॥६॥

॥ सङ्ग्रहोक्तिः ॥

अथ प्रथमोऽध्यायः ॥१॥

चतुर्णां मनूनां निरूपणम्

राजोवाच – हे गुरो! त्वत्तः स्वायंभुवस्य मनोर्वंशो विस्तराच्छ्रुतः, यस्मिन् वंशे मरीच्यादीनां सर्गः संभूतः, अथ नोऽन्यान् मनून् वदस्व॥१॥ हे ब्रह्मन्! यत्र यत्र मन्वन्तरेषु सर्वथा समर्थस्य हरेर्यानि जन्मकर्माणि कवयः स्तुवन्ति, तानि विस्तरान्नो वद॥२॥ हे ब्रह्मन्! विश्वपालको भगवान् यस्मिन्नतीते मन्वन्तरे यत् कर्म कृतवान्, अद्याऽस्मिन् मन्वन्तरे यत् कर्म कुरुते, भविष्यति मन्वन्तरे वा यत्कर्म करिष्यति, तत्सर्वं हि वद॥३॥ *श्रीशुक उवाच* – हे नृप! अस्मिन् कल्पे स्वायंभुवादयः षट् मनवो व्यतीताः, तेषु यत्र देवादीनां संभवः, तथा भूत आद्यः स्वायंभुवो मन्वन्तरः ते कथितः॥४॥ तत्र मनोदुहित्रोराकूतिदेवहूत्योः सर्वेश्वरो भगवान् द्वाभ्यां मूर्तिभ्यां पुत्रत्वं प्राप्तः॥५॥ तत्र भगवतः कपिलस्य चरित्रं मया तृतीयस्कन्धेऽनुवर्णितं, तत्त्वया श्रुतम्, हे कुरूद्वह! यज्ञाख्यो भगवान् यच्चकार तदाख्यास्ये॥६॥

विरक्तः कामभोगेषु शतरूपापतिर्विभुः। विसृज्य राज्यं तपसे सभार्यो वनमाविशत्
॥७॥ सुनन्दायां वर्षशतं पदैकेन भुवं स्पृशन्। तप्यमानस्तपो घोरमिदमन्वाह
भारत॥८॥ *मनुरुवाच* - येन चेतयते विश्वं विश्वं चेतयते न यम्। यो जागर्ति
शयानेऽस्मिन्नायं तं वेद वेद सः॥९॥ आत्मावास्यमिदं विश्वं यत् किञ्चिज्जगत्यां
जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥१०॥ यं न पश्यति
पश्यन्तं चक्षुर्यस्य न रिष्यति। तं भूतनिलयं देवं सुपर्णमुपधावत॥११॥ न
यस्याद्यन्तौ मध्यं च स्वः परो नान्तरं बहिः। विश्वस्यामूनि यद्यस्माद् विश्वं च तदृतं
महत्॥१२॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः। धत्तेऽस्य
जन्माद्यजयाऽऽत्मशक्त्या तां विद्ययोदस्य निरीह आस्ते॥१३॥ अथाग्रे ऋषयः
कर्माणीहन्तेऽकर्महेतवे। ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते॥१४॥

॥ सङ्ग्रहोक्तिः॥

शतरूपापतिः स्वायम्भुवो मनुः कामभोगेषु विरक्तः सन् राज्यं विसृज्य तपश्चर्तुं पत्न्या सह वनमाविशत्॥७॥ हे भारत! सः सुनन्दानदीतीर एकेन पादेन भुवं स्पृशन् शतवर्षपर्यन्तं घोरं तपः कुर्वाणः सन् वक्ष्यमाणं जजाप॥८॥ *मनुरुवाच* - अस्मिन् लोके शयाने सति यो जागर्ति, येन परमात्मना विश्वं चेतयते, यं परमात्मानं विश्वं न चेतयते, अहो चित्रमिदमयं जनस्तं न वेद, स परमात्मा तु तं वेद॥९॥ लोके वर्तमानं यत् किंचित् जगद् अस्ति, तत् परमात्मनाऽन्तः प्रविश्य नियमनपूर्वकं संव्याप्यं भवति, अतस्तेन विश्राणितेन धनेन भोगान् भुङ्क्ष्व, कस्यचिद् धनं नैवाभिकाङ्क्षीः॥१०॥ युगपत् सर्वं साक्षात् कुर्वन्तं यं परमात्मानमयं लोको न पश्यति, यस्य चक्षुः क्षयं नेष्यति, तं सर्वान्तर्यामिणं देवं सुपर्णत्वेन निरूपितं परमात्मानं यूयं भजध्वम्॥११॥ यस्य आद्यन्तौ मध्यं च न भवति, यस्य स्वः परः, अन्तर्बहिश्च न, अमूनि आद्यन्तानि सकलस्य विश्वस्य यस्माद् भवन्ति, विश्वं यदात्मकं भवति, तद् ब्रह्म ऋतं महत् परिपूर्णं भवति॥१२॥ स विश्वकायः, पुरुहूतः, सत्यः, ईशः, स्वयंज्योतिः, अजः, पुराणः, योऽस्य विश्वस्य जन्मादिकं स्वशक्त्या प्रकृत्या करोति, स परमात्मा तामजामपि विद्यया परिहृत्य निरीह आस्ते॥१३॥ अतः प्रथमं ऋषयः जीवाः कर्महेतवे कर्माणि ईहन्ते, ईहमानो जीवोऽनीहां प्रपद्यते॥१४॥

ईहते भगवानीशो न हि तत्र विषज्जते। आत्मलाभेन पूर्णार्थो नावसीदन्ति येऽनु
तम्।।१५।।तमीहमानं निरहङ्कृतं बुधं निराशिषं पूर्णमनन्यचोदितम्।नृन् शिक्षयन्तं
निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम्।।१६।। *श्रीशुक उवाच* - इति
मन्त्रोपनिषदं व्याहरन्तं समाहितम्। दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन् क्षुधा
।।१७।।तांस्तथावसितान् वीक्ष्य यज्ञः सर्वगतो हरिः।यामैः परिर्वतो देवैर्हत्वाशासत्
त्रिविष्टपम्।।१८।। स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्। द्युमत्सुषेण-
रोचिष्मत्प्रमुखास्तस्य चात्मजाः।।१९।।तत्रेन्द्रो रोचनस्त्वासीद् देवाश्च तुषितादयः।
ऊर्जस्तम्भादयः सप्त ऋषयो ब्रह्मवादिनः।।२०।। ऋषेस्तु वेदशिरसस्तुषिता नाम
पत्न्यभूत्। तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः।।२१।। अष्टाशीतिसहस्राणि
मुनयो ये धृतव्रताः। अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः।।२२।। तृतीय उत्तमो
नाम प्रियव्रतसुतो मनुः।

।। सङ्ग्रहोक्तिः ।।

भगवान् परमात्मेहां करोति तथापि स कर्मसाध्ये फले न सज्जते, कुतः य आत्मलाभेन पूर्णपुरुषार्थः भवति, तं भगवन्तं येऽनुसरन्ति तेऽपि नावसीदन्ति।।१५।। उक्तविधं जीव-कर्मानुगुणं प्रेरयन्तं निरहंकृतं बुधं, निरीहं पूर्णमनन्यप्रेरितं, स्वानुवर्त्तिनो जनान् शिक्षयन्तं निजवर्त्मसंस्थितं सर्वशक्तिमखिलधर्मपालनं परमेश्वरं शरणं प्रपद्ये।।१६।। *श्रीशुक उवाच* - इति मन्त्रोपनिषदं जपन्तं समाहितं मनुं दृष्ट्वा विवशमिव मन्वाना असुरा यातुधानाश्च क्षुधा तं जग्धुमभ्यद्रवन्।।१७।। मनुं हन्तुं समुन्नद्धान् तानसुरान् दृष्ट्वा सर्वगतो यज्ञाख्यो हरिः यामैर्देवैः संवेष्टितः सन् तान् हत्वा त्रिविष्टपमशासत्।।१८।। द्वितीयो मनुरग्नेः सुतः स्वारोचिष-संज्ञोऽभवत्, द्युमान्, सुषेणः, रोचिष्मांश्चेत्याद्यास्तस्याऽऽत्मजा अभवन्।।१९।। तत्र रोचन इन्द्र आसीत्, तुषितादय देवा आसन्, ऊर्जस्तम्भादयो ब्रह्मवादिनः सप्तर्षयोऽभवन् ।।२०।। वेदशिरसः ऋषेस्तुषिता संज्ञा पत्नी बभूव, देवैः प्रार्थितो भगवान् तस्यां "विभु" इति नाम्ना प्रसिद्धः सन् वेदशिरसो जज्ञे।।२१।।कौमारब्रह्मचारिणस्तस्य भगवतो व्रतं धृतव्रताः अष्टशिति-सहस्त्राणि ये मुनयस्तेऽन्वशिक्षन्।।२२।। प्रियव्रतस्य सुत उत्तमनामा तृतीयो मनुरासीत्,

पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ।।२३।। वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः। सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ।।२४।। धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः। सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ।।२५।। सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान्। भूतद्रुहो भूतगणानवधीत् सत्यजित्सखः ।।२६।। चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः। वृषः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ।।२७।। सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः। ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ।।२८।। देवा वैधृतयो नाम विधृतेस्तनया नृप। नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ।।२९।। तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः। हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ।।३०।। *राजोवाच* – बादरायण एतत् ते श्रोतुमिच्छामहे वयम्। हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ।।३१।। तत्कथासु महत् पुण्यं धन्यं स्वस्त्ययनं शुभम्। यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ।।३२।।

।। सङ्ग्रहोक्तिः ।।

हे नृप! तत्सुताः सवनः, सञ्जयः, यज्ञहोताश्चेत्याद्या अभवन् ।।२३।। प्रमदादयो वसिष्ठस्य पुत्राः सप्त ऋषय आसन्, सत्या वेदश्रुता भद्राश्च देवा आसन्, इन्द्रः सत्यजिदासीत् ।।२४।। धर्मस्य प्रजापतेः सूनृताख्यायां भार्यायां भगवान् सत्यसेननामा सत्यव्रतैर्देवैः सह जातः ।।२५।। सोऽनृतव्रतान् दुःशीलान् असतो भूतद्रोहिणो यक्षराक्षसान् सत्यजित्सखः सन्नवधीत् ।।२६।। चतुर्थो मनुरुत्तमस्य भ्राता तामस आसीत्, वृषः, ख्यातिः, नरः, केतुः इत्याद्या दश तामसस्य सुता आसन् ।।२७।। तामसे मन्वन्तरे सत्यकाः, हरयः, वीराः इत्याद्या देवगणा आसन्, त्रिशिखनामा इन्द्र आसीत्, ज्योतिर्धामादयः सप्त ऋषयः आसन् ।।२८।। हे नृप! विधृतेस्तनया वैधृतयो नामा देवा आसन्, कालेन नष्टा वेदा यैर्वैधृतिभिः स्वतेजसा विधृताः ।।२९।। तत्र चतुर्थे मन्वन्तरे हरिमेधसः प्रजापतेः पत्न्यां हरिण्यां "हरिः" नाम्ना भगवान् जज्ञे तेन हरिणा ग्राहाद् गजेन्द्रो मोचितः ।।३०।। *राजोवाच* – हे बादरायणे! वयं त्वत्तः श्रोतुमिच्छामहे यत् भगवान् हरिर्यथा गजेन्द्रममूमुचत् ।।३१।। गजेन्द्रमोक्षरूपं हरेश्चरित्रं कथासु मध्ये श्रेष्ठं पुण्यं धन्यं, मंगलापादनं शुभावहं चास्ति, यासु यासु कथासु भगवानुत्तमश्लोको हरिर्गीयते ।।३२।।

सूत उवाच – परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः। उवाच
विप्राः प्रतिनन्द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम्।।३३।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः।।२।।

श्रीशुक उवाच – आसीद् गिरिवरो राजंस्त्रिकूट इति विश्रुतः। क्षीरोदेनावृतः
श्रीमान्योजनायुतमुच्छ्रितः।।१।। तावता विस्तृतः पर्यक् त्रिभिः शृङ्गैः पयोनिधिम्।
दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः।।२।। अन्यैश्च ककुभः सर्वा रत्नधातु-
विचित्रितैः। नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसाम्।।३।। स चावनिज्यमानाङ्घ्रिः
समन्तात् पयऊर्मिभिः। करोति श्यामलां भूमिं हरिन्मरकताश्मभिः।।४।।सिद्धचारण-
गन्धर्वविद्याधरमहोरगैः। किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकन्दरः।।५।।

।। सङ्ग्रहोक्तिः ।।

सूत उवाच – हे विप्राः! प्रायोपविष्टेन परीक्षिता राज्ञा हरेः कथासु प्रेरितः स बादरायणिः शुकः तं नृपं मुदा प्रतिनन्द्य सभायां मुनीनां शृण्वतां सतां संपृष्टां कथामुवाच।।३३।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां प्रथमोऽध्यायः।।१।।

अथ द्वितीयोऽध्यायः ।।२।।

ग्राहग्रहीतेन गजेन कृता भगवत्स्तुतिः

श्रीशुक उवाच – क्षीरोदेन सागरेणाऽऽवृतो रत्नादिसमृद्धिमान् योजनायुतमुच्छ्रितः त्रिकूटोनाम गिरिवर आसीत्।।१।। परितोऽपि योजनायुतेन विस्तृतः स रौप्याऽऽयस हिरुण्मयैस्त्रिभिः शिखरैः पयोनिधिं दिशश्च रोचयन्नास्ते।।२।। रत्नधातुविचित्रितैरन्यैः शृङ्गैः नाना द्रुमलतागुल्मै-र्निर्झरजलानां निर्घोषैश्च सर्वा दिशो रोचन् वर्तते।।३।। क्षिरसागरतरङ्गैः समन्ताद् धौतचरणः स त्रिकुटो हरिन्मरकताश्मभिर्भूमिं श्यामलां करोति।।४।। क्रीडद्भिः सिद्ध-चारण-गन्धर्व-विद्याधर-महोरगैः, किन्नरैरप्सरोभिश्च जुष्टकन्दरः।।५।।

यत्र संगीतसन्नादैर्नदद्गुहममर्षया। अभिगर्जन्ति हरयः श्लाघिनः परशङ्कया ।।६।।
नानारण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतः। चित्रद्रुमसुरोद्यानकलकण्ठविहङ्गमः
।।७।। सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः। देवस्त्रीमज्जनामोदसौरभाम्ब्व-
निलैर्युतः।।८।। तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः। उद्यानमृतुमन्नाम आक्रीडं
सुरयोषिताम्। सर्वतोऽलङ्कृतं दिव्यैर्नित्यं पुष्पफलद्रुमैः।।९।। मन्दारैः पारिजातैश्च
पाटलाशोकचम्पकैः। चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि।।१०।। क्रमुकैर्नालिकेरैश्च
खर्जूरैर्बीजपूरकैः। मधुकैः सालतालैश्च तमालैरसनार्जुनैः।।११।। अरिष्टोदुम्बर-
प्लक्षैर्वटैः किंशुकचन्दनैः। पिचुमन्दैः कोविदारैः सरलैः सुरदारुभिः।।१२।। द्राक्षेक्षु-
रम्भाजम्बूभिर्बदर्यक्षाभयामलैः। बिल्वैः कपित्थैर्जम्बीरैर्वृतो भल्लातकादिभिः।।१३ ।।
तस्मिन्सरः सुविपुलं लसत्काञ्चनपङ्कजम्। कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितम्
।।१४।। निर्घुष्टं षट्पदैर्मत्तैः शकुन्तैश्च कलस्वनैः। हंसकारण्डवाकीर्णं चक्रवाकैश्च
सारसैः।।१५।।

।। सङ्ग्रहोक्तिः ।।

यत्र त्रिकूटे संगीतसन्नादैर्नदन्तं गुहाप्रदेशं श्रुत्वा सिंहान्तरागमनशंकयाऽमर्षेण गर्विष्ठाः सिंहाः अभिगर्जन्ति ।।६।। यो गिरिर्नानाविधैरारण्यकपशुव्रातैर्व्याप्ताभिर्गुहाभिरलंकृतोऽस्ति तथा चित्रद्रुमेषु देवोद्यानेषु कलकण्ठविहङ्गमसंभृतोऽस्ति ।।७।। योऽच्छोदैः सरित्सरोभिः मणिवालुकैः पुलिनैर्युतः, देवाङ्गनानां स्नानेन सुरभितजलवायुना सुगंधयुतो वर्तते ।।८।। यस्य त्रिकूटस्य द्रोण्यां वरुणस्य ऋतुमन्नाम सुरयोषितां क्रीडास्थानं दिव्यैर्नित्यफलपुष्पद्रुमैः परितोऽलंकृतमुद्यानं वर्तते ।।९।। स त्रिकूटाचलो मन्दार-पारिजात-पाटला-ऽशोक-चम्पक-शाल-ताल-तमाला-ऽसना-ऽर्जुनाख्यैस्तरुभिः शोभनो वर्तते ।।१०।। यश्च अरिष्ट-उदुम्बर-प्लक्ष-वट-किंशुक-चन्दन-पिचुमन्द-कोविदार-सरल-सुरदारु-द्राक्षा-इक्षु-रम्भा-जम्बू-अक्षा-ऽभया-बिल्व-कपित्थ-जम्बीर-भल्लातकादिभिर्वृक्षैः समलंकृतो विराजते ।।११-१३।। तस्मिन् त्रिकूटाचले सरोवरमास्ते - यत् विपुलसत्काञ्चनपङ्कजम्, कुमुद-उत्पल-कल्हार-शतपत्र श्रीसमृद्धम् ।।१४।। मत्तैर्भ्रमरैः कलस्वनैः शकुन्तैश्च निर्घुष्टं, हंस-कारण्डव-सारस-चक्रवाकैः-

जलकुक्कुटकोयष्टिदात्यूहकूलकूजितम्। मत्स्यकच्छपसंचारचलत्पद्मरजः पयः।
कदम्बवेतसनलनीपवञ्जुलकैर्वृतम्।।१६।। कुन्दैः कुरबकाशोकैः शिरीषैः
कुटजेङ्गुदैः। कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः।।१७।। मल्लिकाशतपत्रैश्च
माधवीजालकादिभिः। शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः।।१८।। तत्रैकदा
तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्। सकण्टकं कीचकवेणुवेत्रवद्
विशालगुल्मं प्ररुजन्वनस्पतीन्।।१९।। यद्गन्धमात्राद्धरयो गजेन्द्रा व्याघ्रादयो
व्यालमृगाः सखड्गाः। महोरगाश्चापि भयाद् द्रवन्ति सगौरकृष्णाः शरभाश्चमर्यः
।।२०।। वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च। अन्यत्र क्षुद्रा हरिणाः
शशादयश्चरन्त्यभीता यदनुग्रहेण।।२१।। स घर्मतप्तः करिभिः करेणुभिर्वृतो
मदच्युत्कलभैरनुद्रुतः। गिरिं गरिम्णा परितः प्रकम्पयन् निषेव्यमाणोऽलिकुलैर्मदाशनैः
।।२२।। सरोऽनिलं पङ्कजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः।

।। सङ्ग्रहोक्तिः ।।

आकीर्णमासीत्।।१५।। जलकुक्कुट-कोयष्टि-दात्यूह-समूहैः कूजितम्, मत्स्य-कच्छपानां सञ्चारेण पद्मरजश्छन्नं जलं सुशोभति, यत् सरः कदम्ब-वेतस-नल-नीप-वञ्जुलकैर्वृतमभूत् ।।१६।। कुरबका-ऽशोक-शिरीष-कुटज-इङ्गुद-कुब्जकैरुपशोभितम्, कुन्द-स्वर्णयूथी-नाग-पुन्नाग-जाति-मल्लिका-शतपत्र-माधवी-जालकादिभिस्तीरजैर्गुल्मैर्लताभिश्चाऽलं शोभित-मासीत्।।१७-१८।। तत्रैकदा तद्गिरिवननिवासी गजेन्द्रो गजीभिः सह संचरन्, सकण्टकं कीचक-वेणु-वेत्रवद् विशालगुल्मं प्रभञ्जन् वनस्पतीन् प्ररुजन् सन् द्रुतं सरोवराभ्या-शमगमत्।।१९।। यस्य गजेन्द्रस्य गन्धमात्रेणैव भीता अन्ये गजेन्द्राः, सिंहाः, व्याघ्रादयो, व्यालमृगाः, सखड्गा, महोरगाः, सगौरकृष्णमृगाः, शरभाश्चमर्यः, वृका, वराहा, महिषा, ऋक्षाः, शल्यः गोपुच्छाः सालावृका, मर्कटाश्चैत्येते सर्वे वन्याः प्राणिनः पलायनं चक्रुः, अन्ये क्षुद्रा हरिणः शसादयश्च यस्यानुग्रहेण तद्दृष्टिपथ इतरत्र च निर्भयाश्चरन्ति स्म।।२०-२१।। घर्मतप्तः, करिभिः, करेणुभिश्च वृतः, कलभैरनुद्रुतः, शरीरगौरवेण गिरिं प्रकम्पयन्, मदाशनैरलिभिः परिवृतः, कमलपरागव्याप्तं सरोवरवातं जिघ्रन्, मदविह्वलेक्षणः तृषार्दितेन -

वृतः स्वयूथेन तृषार्दितेन तत् सरोवराभ्याशमथागमद् द्रुतम् ।।२३।। विगाह्य तस्मिन्नमृताम्बु निर्मलं हेमारविन्दोत्पलरेणुवासितम् । पपौ निकामं निजपुष्करोद्धृत-मात्मानमद्भिः स्नपयन् गतक्लमः ।।२४।। स्वपुष्करेणोद्धृतशीकराम्बुभिर्निपाययन् संस्नपयन्यथा गृही । गृणन् करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ।।२५।। तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत् । यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ।।२६।। तथाऽऽतुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा । विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ।।२७।। नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः । समाः सहस्रं व्यगमन् महीपते सप्राणयोश्चित्रममंसतामराः ।।२८।। ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः । विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत् सकलं जलौकसः ।।२९।। इत्थं गजेन्द्रः स यदाऽऽप संकटं प्राणस्य देही विवशो यदृच्छया ।

।। सङ्ग्रहोक्तिः ।।

स्वयूथेन वृतः, स गजेन्द्रस्तत्सरोवरसमीपं शीघ्रं प्राप ।।२२-२३।। तस्मिन् सरोवरे विगाह्य हेमारविन्दरेणुवासितं निर्मलममृताम्बु निजपुष्करोद्धृतं कृत्वा निकामं पपौ, अद्भिरात्मानं स्नपयन् गतक्लम आसीत् ।।२४।। स्वपुष्करेणोद्धृतशीकराम्बुभिः कश्चिद् गृहस्थ इव कलभान् करेणूश्च निपाययन् संस्नपयन् बृंहितं कुर्वंश्च दुर्मदः कृपणोऽजमायया निकटागतं दुःखं नाऽऽचष्ट ।।२५।। हे नृप! तत्र सरोवरे दैवप्रेरितः कश्चिद् बलीयान् ग्राहः-मकरस्तं गजेन्द्रं पादे रुषाऽग्रहीत्, दैववशाद् एवं दुःखं संप्राप्तोऽतिबलो गजेन्द्रः यथाबलं विचक्रमे ।।२६।। तदा बलीयसा ग्राहेण बलेन विकृष्यमाणमतिदुःखं गजेन्द्रं प्रति दीनधियः करेणवो विचुक्रुशुः, अन्ये पार्ष्णिग्रहा गजास्तं दुःखान्मोचयितुं नैवाऽशकन् ।।२७।। हे महीपते! एवं बहिरन्तश्च मिथो विकर्षतोर्नियुध्यतोः समानबलयोः गजेन्द्रमकरयोः सहस्रं समा व्यतीयुः, तद्वीक्ष्यऽमराश्चित्रममंसत ।।२८।। ततो दीर्घेण कालेन जले विकृष्यमाणस्य खिद्यतो गजेन्द्रस्य मनोबलौजसां भूयान् क्षयोऽभूत्, जलाश्रयस्य मकरस्य तु तद् विपरीतमभूत् ।।२९।। स गजेन्द्रो भूचरः, तत इत्थं यदृच्छया

अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ।।३०।। *गजेन्द्र उवाच*
– न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम्। ग्राहेण पाशेन
विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ।।३१।। यः कश्चनेशो बलिनोऽ-
न्तकोरगात् प्रचण्डवेगादभिधावतो भृशम्। भीतं प्रपन्नं परिपाति यद्भयान् मृत्युः
प्रधावत्यरणं तमीमहि ।।३२।।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे द्वितीयोऽध्यायः ।।२ ।।

अथ तृतीयोऽध्यायः ।।३ ।।

श्रीशुक उवाच – एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि। जजाप परमं जाप्यं
प्राग्जन्मन्यनुशिक्षितम् ।।१।। *गजेन्द्र उवाच* – ॐनमोभगवते तस्मै यत एतच्चिदा-
त्मकम्। पुरुषायादिबीजाय परेशायाभिधीमहि ।।२।।

।। सङ्ग्रहोक्तिः ।।

प्राणसंकटं प्राप, तदा स विवश आत्मविमोक्षणेऽसमर्थः सन् चिरं दध्यौ, अथेमां बुद्धिमन्वपद्यत ।।३०।। *गजेन्द्र उवाच* – आतुरं मां ज्ञातयो गजा मोचयितुं न प्रभवन्ति, तर्हि करिण्यः कुत एव प्रभवेयुः, अतो विधातुः पाशेन ग्राहेणाऽऽवृतोऽहमपि परायणं तमेव परं परमेश्वरं शरणं यामि ।।३१।। बलिनः प्रचण्डवेगात् अभिधावतः कालोरगात् भृशं भीतं प्रपन्नं यः कश्चन ईशः परिपाति, यद्भयात् मृत्युरपि प्रधावति, तमीशं शरणं यामः ।।३२।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां द्वितीयोऽध्यायः ।।२।।

अथ तृतीयोऽध्यायः ।।३।।

गजेन्द्रस्तुतिः भगवता ग्राहाद् गजेन्द्रो विमोचितः

श्रीशुक उवाच – एवं कृतनिश्चयो गजेन्द्रो बुद्ध्या मनो हृदि समाधाय पूर्वस्मिन् जन्मन्यनुशिक्षितं परमं स्तोत्र जजाप ।।१।। *गजेन्द्र उवाच* – येन भगवतैतद्विश्वं चेतनावद् भवति, तस्मै भगवते नमः, अतः परमकारणाय ब्रह्मादीनामपीशाय परमपुरुषायाऽभिधीमहि ।।२।।

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम्। योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम्।।३।। यः स्वात्मनीदं निजमाययार्पितं क्वचिद् विभातं क्व च तत् तिरोहितम्। अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्मभूतोऽवतु मां परात्परः।।४।। कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु। तमस्तदाऽऽसीद् गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः।।५।। न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम्। यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु।।६।। दिदृक्षवो यस्य पदं सुमङ्गलं विमुक्तसङ्गा मुनयः सुसाधवः। चरन्त्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः।।७।। न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा। तथापि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति।।८।। तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये। अरूपायोरुरूपाय नम आश्चर्यकर्मणे।।९।।

।। सङ्ग्रहोक्तिः ।।

इदं चिदचिदात्मकं जगत् यस्मिन् प्रलीनं जायते, यत उपादानकारणभूताज्जातमस्ति, येन भगवता इदं सृष्टं रक्षितं च भवति, इदं सर्वं यदात्मकं, योऽस्मादचेतनात् चेतनाच्च परः, स्वरूपेण स्वभावेन च विलक्षणस्तं स्वयंभुवं शरणं प्रपद्ये।।३।। अपराहतज्ञानः सर्वज्ञोऽनन्यशरणः परात् परः, यो भगवान् स्वात्मनि कदाचिन्निजमाययाऽर्पितं सत् क्वचित् प्रकाशितं क्वच तिरोहितं, तदिदं चिदचिदात्मकं जगत् ईक्षते स मामवतु।।४।। कालेन सर्वेषु कारणेषु कृत्स्नशः लोकेषु तत्पालकेषु च पञ्चत्वं प्राप्तेषु सत्सु तदा गहनं गभीरं तम आसीत्, तस्य तमसः पारे योऽभिविराजते स विभुर्मामवतु।।५।। देवा ऋषयाश्च यस्य स्वरूपं न विदुः,तर्हि तदर्वाचीनः प्राणी तत्स्वरूपं बोद्धुं वक्तुं च कः पुनरर्हति, यथा नानाविधवेषैर्विचेष्टतो नटस्य स्वरूपं जना न विदुस्तद्वत्, स दुर्गमव्यापारो मामवतु।।६।। नित्यं सुखरूपं यस्य स्वरूपं दिदृक्षवो मुनयो विमुक्तसङ्गाः सुसाधवः समदर्शिनः सन्तो वनेऽखण्डं सब्रह्मचर्यमुपासनात्मकं व्रतं चरन्ति, स मे गतिर्भवतु।।७।। यस्य जन्म, कर्म, नामरूपे, गुणदोष एव वा न विद्यते, तथापि यो दुष्कृतीनां विनाशाय साधूनां रक्षणाय च स्वीयसंकल्पेन जन्मादीनि स्वेच्छयैवोपादत्ते, स मे गतिर्भवतु।।८।।परेशायाऽनन्तशक्तये, कर्मायत्तशरीररहिताय, स्वेच्छोपात्ताप्राकृतशरीराय,

नम आत्मप्रदीपाय साक्षिणे परमात्मने। नमो गिरां विदूराय मनसश्चेतसामपि ।।१०।। सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता। नमः कैवल्यनाथाय निर्वाणसुखसंविदे ।।११।। मनः शान्ताय घोराय गूढाय गुणधर्मिणे। निर्विशेषाय साम्याय नमो ज्ञानघनाय च ।।१२।। क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे पुरुषायात्ममूलाय मूलप्रकृतये नमः ।।१३।। सर्वेन्द्रियगुणद्रष्टे सर्वप्रत्ययहेतवे। असता छाययोक्ताय सदाभासाय ते नमः ।।१४।। नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय। सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ।।१५।। गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय। नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ।।१६।। मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय मनोलयाय। स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ।।१७।। आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसङ्गविवर्जिताय।

।। सङ्ग्रहोक्तिः ।।

आश्चर्यकर्मणे परब्रह्मणे च तस्मै नमो नमः ।।९।। आत्मप्रदीपाय सर्वसाक्षिणे परमात्मने वाङ्मनोऽगोचराय च तस्मै नमो नमः ।।१०।। ज्ञानिना विशुद्धेन निष्कामोपासनात्मक निवृत्तिधर्मेण प्राप्याय मोक्षाधिपतये, निर्दुःखानन्दज्ञानरूपाय च ते नमः ।।११।। शान्ताय विमुखानां भयंकरत्वेन प्रतीयमानाय, गूढाय, सत्त्वादिधर्मानुकारिणे निर्विशेषाय साम्याय ज्ञानघनाय च नमो नमः ।।१२।। क्षेत्रज्ञाय, सर्वाध्याक्षाय, सर्वद्रष्ट्रे, पुरुषाय, कारणान्तररहिताय, सर्वोपादानाय च नमोनमः ।।१३।। सर्वेन्द्रियगुणद्रष्ट्रे, सर्वप्रत्ययहेतवे, परिणामिन्याऽपृथक् सिद्धया मायया सूचिताय, स्वप्रकाशाय च तुभ्यं नमः ।।१४।। सर्वकारकशरीराय, स्वयंकारणान्तरासाध्याय, अद्भुतकारणाय, सर्वागमाम्नायमहार्णवाय, मोक्षहेतुभूताय, परमाश्रयाय तुभ्यं नमो नमः ।।१५।। प्रकृतिलीनचिदाश्रयाय, तत्क्षोभविस्फूर्जितसंकल्पाय, मोक्षप्रभवाय, तत्प्राप्तीच्छाविवर्जिताय, स्वयंप्रकाशाय च तुभ्यं नमस्करोमि ।।१६।। मादृक्प्रपन्नपशोः कर्मबन्धविमोक्षणाय, मुक्ताय, दयासमुद्राय, मनोलयाय, स्वांशभूतजीवान्तरात्मत्वेन प्रतीयमानाय, षाड्गुण्यपूर्णाय, अपरिच्छिन्नाय च तुभ्यं नमो नमः ।।१७।।

मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय।।१८।। यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति। किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम्।।१९।। एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः। अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ।।२०।। तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम्। अतीन्द्रियं सूक्ष्ममतीव दूरमनन्तमाद्यं परिपूर्णमीडे।।२१।। यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः। नामरूपविभेदेन फल्ग्व्या च कलया कृताः।।२२।। यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत् स्वरोचिषः। तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरवर्गः।।२३।। स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान् न जन्तुः। नायं गुणः कर्म न सन्न चासन् निषेधशेषो जयतादशेषः।।२४।।

।। सङ्ग्रहोक्तिः।।

देह-पुत्र-स्वजन-गृह-वित्त-परिवारादिष्वासक्तपुरुषैर्दुष्प्राप्याय, शब्दादिविषयसङ्गरहिताय, मुक्तात्मभिः स्वहृदये चिन्तिताय, ज्ञानात्मने सर्वनियन्त्रे च भगवते नमः।।१८।। धर्मार्थकाममोक्ष-कामा जना यं भजन्तः सन्तः स्वाभिप्रेतां गतिमाप्नुवन्ति, एतावदेव न किन्तु तैर्वाञ्छितानन्यान-प्यभिष्टान् ददाति, सोऽपारकरुणो भगवान् मां मुक्तिं ददातु।।१९।। एकान्तिका ये भगवत्प्रपन्ना भक्तास्ते तु कञ्चनाऽर्थं न वाञ्छन्ति, ते तु सुमङ्गलमत्यद्भुतं चरितं गायन्तः सन्त आनन्द-समुद्रमग्ना भवन्ति।।२०।। अक्षरं परं ब्रह्म परेशं चक्षुराद्यगम्यं भक्तियोगेन गम्यमतीन्द्रियं सूक्ष्ममिव अतिदूरं, देशतः कालतश्चान्तवर्जितमाद्यं परिपूर्णं तमवाप्तसमस्तकाममीडे।।२१।। ब्रह्मादयो देवाः, चराचरा लोका, वेदाश्च नामरूपविभागेन यस्याल्पेनांऽशेन कृताः, स जयतात् ।।२२।। यथाग्नेर्ज्वालाः, सूर्यस्य गभस्तयो मुहुर्मुहुरुद्भवन्ति, संयान्ति पुनस्तत्रैव लीयन्ते तथा बुद्धिर्मनः खानि, शरीरवर्गः इत्ययं गुणपरिणामरूपः प्रपञ्चः स्वयंप्रकाशमानात् यतो निर्याति यत्र च संयाति स भगवान् जयतु।।२३।। यो देवा-ऽसुर-मर्त्य-तिर्यक्, इत्येतेषां मध्ये कोऽपि न , यः स्त्री, षण्ढः, पुमान्, जन्तुः, गुणः, कर्म, सत् असत्, चेत्येतेषां मध्येऽपि कतमोऽपि न, एवं निषेधे क्रियमाणे योऽशेषात्मकः स जयतात्।।२४।।

जिजीविषे नाहमिहामुया किमन्तर्बहिश्चावृतयेभयोन्या। इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षणम् ।।२५।। सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदनम्। विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ।।२६।। योगरन्धितकर्माणो हृदि योगविभाविते। योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ।।२७।। नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय। प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रियाणामनवाप्यवर्त्मने ।।२८।। नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतम् तं दुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम् ।।२९।। *श्रीशुक उवाच* – एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः। नैते यदोपससृपुर्निखिलात्मकत्वात् तत्राखिलामरमयो हरिराविरासीत् ।।३०।। तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः। छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ।।३१।।

।। सङ्ग्रहोक्तिः ।।

अहं जीवितुं नेच्छामि, अहंकारममकारास्पदयाऽनया गजयोन्या को पुरुषार्थः सिद्धयेत्, आत्मन आवरणस्य कर्मणो नाशो कालेनाऽपि न, अतोऽहं आत्मावरककर्मादिभ्यो मोक्षमिच्छामि ।।२५।। सोऽहं विश्वसृजं, विश्वशरीरकं, विश्वविलक्षणं, विश्वविदं, विश्वस्य धनं, विश्वात्मानमजं परमप्राप्यं परं ब्रह्म प्रणतोऽस्मि ।।२६।। भक्तियोगदग्धकर्माणो योगिनो योगेन शोधिते हृदये यं पश्यन्ति, तं योगेशमीशमहं नतोऽस्मि ।।२७।। तीव्रवेगस्य सृष्ट्यादिशक्तित्रयस्य धारकायाऽखिलधीगुणाय, प्रपन्नपालकाय, दुरन्तशक्तये, अजितेन्द्रियाणां दुर्गम्यमार्गाय तस्मै भगवते नमो नमः ।।२८।। अयमहं यच्छक्त्याऽहंबुद्ध्या हतप्रायं स्वीयमात्मानमपि न वेद, दुरत्ययमहिमानं तं भगवन्तं प्रपन्नोऽस्मि ।।२९।। *श्रीशुक उवाच* – इत्थं उपवर्णितसामान्यपरतत्त्वं गजेन्द्रं यदा विविधस्वरूपभेदाभिमानिन एते ब्रह्मादयो देवा नोपससृपुः तदा सर्वान्तरात्मकत्वात् सर्वदेवतान्तरात्मभूतः हरिर्यत्र गजेन्द्रः स्तौति तत्राऽऽविरासीत् ।।३०।। जगन्निवासो हरिरुक्तप्रकारेणाऽऽर्त्तं गजेन्द्रं दृष्ट्वा तत्कृतस्तवं च श्रुत्वा छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधः संस्तुवद्भिर्देवैः सह यत्र गजेन्द्रस्तत्राऽऽशवभ्यगमत् ।।३१।।

सोऽन्तः सरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम्।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन् नमस्ते॥३२॥
तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार। ग्राहाद्
विपाटितमुखादरिणा गजेन्द्रं संपश्यतां हरिरमूमुचदुच्छ्रियाणाम्॥३३॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे तृतीयोऽध्यायः॥३॥

अथ चतुर्थोऽध्यायः॥४॥

श्रीशुक उवाच – तदा देवर्षिगन्धर्वा ब्रह्मेशानपुरोगमाः। मुमुचुः कुसुमासारं शंसन्तः
कर्म तद्धरेः॥१॥ नेदुर्दुन्दुभयो दिव्या गन्धर्वा ननृतुर्जगुः। ऋषयश्चारणाः सिद्धा-
स्तुष्टुवुः पुरुषोत्तमम्॥२॥ योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृत्। मुक्तो
देवलशापेन हूहूर्गन्धर्वसत्तमः॥३॥

॥ सङ्ग्रहोक्तिः॥

तदा सरोवरोदकमध्येऽधिकबलेन ग्राहेण ग्रहीत आर्तः स गजेन्द्रो गरुडे स्थितं पाणौ विधृतचक्रं तं हरिं साक्षाद्धरिकृष्णं खे दृष्ट्वा साम्बुजकरमुत्क्षिप्य हे नारायण! हे अखिलगुरो! हे भगवन्! तुभ्यं नमः, इति गिरमाह॥३२॥ हरिः पीडितं तं गजेन्द्रं वीक्ष्य कृपया सहसाऽवतीर्य सग्राहं गजेन्द्रं सरसः सकाशात् बहिरुज्जहार, ततश्चक्रेण विपाटितमुखाद् ग्राहात् गजेन्द्रं देवानां संपश्यतां सताममूमुचत्॥३३॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां तृतीयोऽध्यायः॥३॥

अथ चतुर्थोऽध्यायः॥४॥

ग्राहस्य गन्धर्वत्वं गजस्य च भगवत्पार्षदत्वप्राप्तिः

श्रीशुक उवाच – गजेन्द्रमोक्षणावसरे विधिशिवप्रभृतयो देवा ऋषयो गन्धर्वाश्च ते सर्वे हरेर्गजेन्द्रमोक्षरूपं कर्म प्रशंसन्तः सन्तः कुसुमवृष्टिं चक्रुः॥१॥ तदा दिव्या दुन्दुभयो नेदुः, गन्धर्वाः ननृतुर्जगुश्च, ऋषयश्चारणाः सिद्धाश्च पुरुषोत्तमं तुष्टुवुः॥२॥ योऽसौ ग्राहः स पूर्वजन्मनि

प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययम्। अगायत यशोधाम कीर्त्तन्यगुणसत्कथम्।।४।। सोऽनुकम्पित ईशेन परिक्रम्य प्रणम्य तम्। लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः।।५।। गजेन्द्रो भगवत्स्पर्शाद् विमुक्तोऽज्ञानबन्धनात्। प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः।।६।। स वै पूर्वमभूद् राजा पाण्ड्यो द्रविडसत्तमः। इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः।।७।। स एकदाऽऽराधनकाल अत्मवान् गृहीतमौनव्रत ईश्वरं हरिम्। जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः।।८।। यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः। तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह।।९।। तस्मा इमं शापमदादसाधुरयं दुरात्माकृतबुद्धिरद्य। विप्रावमन्ता विशतां तमोऽन्धं यथा गजः स्तब्धमतिः स एव।।१०।। *श्रीशुक उवाच* – एवं शप्त्वा गतोऽगस्त्यो भगवान् नृप सानुगः। इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन्।।११।।

।। सङ्ग्रहोक्तिः।।

हूहू नामा गन्धर्वश्रेष्ठ आसीत्, स इदानीं परमाश्चर्यरूपधृत् गन्धर्वः सन् देवलशापान्मुक्तो बभूव।।३।। स गन्धर्वोऽव्ययमधीशं कीर्त्तनीयगुणसत्कथं यशसां भवनरूपं श्रीहरिं शिरसा प्रणम्याऽगायत।।४।। श्रीहरिणाऽनुकम्पित स गन्धर्व शापाद् विमुक्तः सन् श्रीहरिं प्रणम्य परिक्रम्य च लोकस्य पश्यतः सतः स्वं गन्धर्वलोकमगात्।।५।। गजेन्द्रस्तु भगवत्स्पर्शेन कर्मबन्धाद् विमुक्तो भगवत्सारूप्यं प्राप्तः अत एव पीतवासाश्चतुर्भुजो जातः।।६।। स गजेन्द्रः पूर्वस्मिन् जन्मनि पाण्ड्यो द्रविडदेशाधिपपतिः "इन्द्रद्युम्न" नाम्ना ख्यातो विष्णुव्रतपरायणो राजाऽभूत्।।७।। जटाधरस्तापसः कुलाचलाश्रमः स इन्द्रद्युम्न आराधनसमये कृतस्नानः समाहितचित्तो गृहीतमौनव्रतः सन् परमात्मानं हरिं समर्चयामास।।८।। तदा शिष्यगणैः परिवृतो महायशा मुनिरगस्त्यस्तत्राऽऽश्रमे यदृच्छया समागमत्, तमिन्द्रद्युम्नं तूष्णीमवस्थिमकृतार्हणादिकं रहस्युपविष्टं वीक्ष्याऽगस्त्यश्चुकोप।।९।। असाधुर्दुरात्माऽशिक्षितमतिर्विप्रावमन्ताऽयमस्ति, अतोऽद्याऽन्धं तमः प्राप्नोतु, गज इव स्तब्धमतिः, अत एव "गजो भवतु" इति तस्मै शापमदात्।।१०।। हे राजन्! भगवान् अगस्त्य एवं शापं प्रदाय शिष्यैः सह गतः, ततो

आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम्। हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः
।।१२।। एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः।
गन्धर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात्।।१३।। एतन्
महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणम्। स्वर्ग्यं यशस्यं
कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वताम्।।१४।। यथानुकीर्त्तयन्त्येतच्छ्रेय-
स्कामा द्विजातयः। शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये।।१५।। इदमाह हरिः
प्रीतो गजेन्द्रं कुरुसत्तम। शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः।।१६।।
श्रीभगवानुवाच – ये मां त्वां च सरश्चेदं गिरिकन्दरकाननम्। वैत्रकीचकवेणूनां
गुल्मानि सुरपादपान्।।१७।। शृङ्गाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च।
क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम्।।१८।। श्रीवत्सं कौस्तुभं मालां गदां
कौमोदकीं मम। सुदर्शनं पाञ्चजन्यं सुपर्णं पतगेश्वरम्।।१९।।

।। सङ्ग्रहोक्तिः।।

राजर्षिरिन्द्रद्युम्नोऽपि तं शापं प्रारब्धमेवोपधारयन्नात्मस्मृतिविनाशिनीं गजयोनिं संप्राप्तः, गजजन्मन्यपि हरिपूजनप्रभावेण भगवत्स्मृतिर्जाताऽभूत्।।११-१२।। एवं गजेन्द्रं गजदेहाद् विमोक्ष्य पार्षदगतिं संप्रापितेन तेन गजेन्द्रेण पार्षदैश्च युतः गन्धर्वसिद्धविबुधैरुपगीयमानकर्मा गरुडासनो हरिरद्भुतं स्वभवनं गन्तुमुद्यतो बभूव।।१३।। हे महाराज! अयं गजेन्द्रमोक्षरूपः श्रीकृष्णमहिमा तुभ्यं मया कथितः, हे कुरुवर्य! इदं गजेन्द्रमोक्षणं शृण्वतां जनानां स्वर्ग्यं, यशस्यं कलिकल्मषापहं दुःस्वप्नघ्नं च भवति।।१४।। श्रेयस्कामा द्विजातयः प्रात उत्थाय शुचीभूताः सन्तः दुःस्वप्नादीनामुपशान्तये एतद् यथावदनुकीर्तयन्ति।।१५।। हे कुरुसत्तम! सर्वभूतानां शृण्वतां सतां सर्वभूतान्तरात्मा हरिर्जिगमिषुः प्रीतः सन् गजेन्द्रं प्रतीदमाह।।१६।। *श्रीभगवानुवाच* – हे गजेन्द्र! ये जनास्त्वां मामिदं सर एतद्गिरिकन्दरकाननं वेत्रकीचकवैणूनां गुल्मानि देवद्रूमानिमान् यः प्रात उत्थाय स्मरन्ति तेऽखिलात् पापात् मुच्यन्ते।।१७।। त्रिकूटाचलस्य शृङ्गाणि, ब्रह्मणः, मे विष्णोः शिवस्य च स्थानानि, मत्प्रियं धाम क्षीरोदं भास्वरं श्वतद्वीपं च।।१८।। तथा मम श्रीवत्सं, कौस्तुभं, वनमालां, कौमोदकीं गदां, सुदर्शनं,

शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम्। ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च।।२०।। मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे। कर्माण्यनन्तपुण्यानि सूर्यं सोमं हुताशनम्।।२१।। प्रणवं सत्यमव्यक्तं गोविप्रान् धर्ममव्ययम्। दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि।।२२।। गङ्गां सरस्वतीं नन्दां कालिन्दीं सितवारणम्। ध्रुवं ब्रह्मऋषीन् सप्त पुण्यश्लोकांश्च मानवान्।।२३।। उत्थायापररात्रान्ते प्रयताः सुसमाहिताः। स्मरन्ति मम रूपाणि मुच्यन्ते ह्येनसोऽखिलात्।।२४।। ये मां स्तुवन्त्यनेनाङ्गं प्रतिबुध्य निशात्यये। तेषां प्राणात्यये चाहं ददामि विमलां मतिम्।।२५।। *श्रीशुक उवाच* - इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम्। हर्षयन्विबुधानीकमारुरोह खगाधिपम्।।२६।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे चतुर्थोऽध्यायः।।४।।

।। सङ्ग्रहोक्तिः ।।

पाञ्चजन्यं, पक्षिराजं गरुडं च ये स्मरन्ति।।१९।। मम सूक्ष्मकलाभूतं शेषं मदाश्रयां देवीं लक्ष्मीं, ब्रह्माणं, नारदर्षिं, भवं, प्रह्लादं चापि ये स्मरन्ति।।२०।। मम मत्स्यकूर्मवराहाद्यैरवतारैः कृतान्यनन्तपुण्यानि चरित्राणि, सूर्यं सोमं हुताशनं च ये स्मरन्ति।।२१।। प्रणवं, सत्यं, प्रधानं, गाः, विप्रान्, अव्ययं धर्मं, दक्षदुहितॄः, धर्मपत्नीः, सोमकश्यपयोः पत्नीः।।२२।। गङ्गां सरस्वतीसंज्ञां नदीं, अलकनन्दां, यमुनां, ऐरावतं, ध्रुवं, सप्तब्रह्मर्षीन्, धार्मिकान् मानवांश्च ये स्मरन्ति।।२३।। ममाऽवतारान् ये जनाः प्रातरुत्थाय प्रयताः सुसमाहिताः सन्तः स्मरन्ति तेऽखिलात् पापात् मुच्यन्ते हि।।२४।। हे गजेन्द्र! ये जनाः प्रातरुत्थायाऽनेन स्तोत्रेण मां स्तुवन्ति, तेषामहं प्राणात्यये विमलां मतिं ददामि।।२५।। *श्रीशुक उवाच* - हृषीकेशो हरिरित्यादिश्य पाञ्चजन्यं शंखमाध्माय देववृन्दं हर्षयन् सन् गरुडमारुरोह।।२६।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां चतुर्थोऽध्यायः।।४।।

अथ पञ्चमोऽध्यायः ।।५।।

श्रीशुक उवाच - राजन्नुदितमेतत् ते हरेः कर्माघनाशनम्। गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ।।१।। पञ्चमो रैवतो नाम मनुस्तामससोदरः। बलिविन्ध्यादयस्तस्य सुता अर्जुनपूर्वकाः ।।२।। विभुरिन्द्रः सुरगणा राजन्भूतरयादयः। हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ।।३।। पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः। तयोस्तु कलया जज्ञे वैकुण्ठो भगवान्स्वयम् ।।४।। वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः। रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ।।५।। तस्यानुभावः कथितो गुणाश्च परमोदयाः। भौमान् रेणून्स विममे यो विष्णोर्वर्णयेद् गुणान् ।।६।। षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः। पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ।।७।। इन्द्रो मन्त्रद्रुमस्तत्र देवा आप्यादयो गणाः। मुनयस्तत्र वै राजन् हविष्मद्वीरकादयः ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ पञ्चमोऽध्यायः ।।५।।

पञ्चमस्य षष्ठस्य च मनोर्गाथा निःश्रीकैर्देवैः कृता भगवत्स्तुतिश्च

श्रीशुक उवाच -हे राजन्! एतत् पुण्यं गजेन्द्रमोक्षरूपं दुरितनिवर्तकं हरेश्चरित्रं तुभ्यं कथितम्, अथ पञ्चमं रैवताख्यं मन्वन्तरं शृणु ।।१।। पञ्चमस्तामसभ्राता रैवतोनाम मनुर्बभूव, अर्जुन-बलिं-विन्ध्यादयस्तस्य पुत्रा आसन् ।।२।। हे राजन्! तत्र विभुसंज्ञ इन्द्रः, भूतरयाद्या देवाः, हिरण्यरोमा, वेदशिराः, ऊर्ध्वबाहुश्चेत्यादयः सप्तर्षयः ।।३।। शुभ्रप्रजापतेःपत्नी, विकुण्ठा, तस्यां शुभ्रात् भगवान् वैकुण्ठो देवश्रेष्ठैर्वैकुण्ठैः सह स्वांशेन जज्ञे ।।४।। देव्या लक्ष्म्या संप्रार्थितेन येन वैकुण्ठेन लक्ष्म्याः प्रियं कर्तुमिच्छया सर्वलोकनमस्कृतो वैकुण्ठाख्यो लोकः कल्पितः ।।५।। तस्य वैकुण्ठस्य प्रभावः सनकादि-जय-विजय कथाप्रसंगेन कथितः, तस्य गुणाः परमोदयाश्च तृतीयस्कन्धादिषु कथिताः, यः पुमान् विष्णोर्गुणान् साकल्येन वर्णयेत्, स भौमान् रेणून् गणयेत् ।।६।। चक्षुषः प्रजापतेः पुत्रश्चाक्षुषः षष्ठो मनुरासीत्, पुरुः, पुरुषः, सुद्युम्नश्चेत्याद्यास्तस्य पुत्रा आसन् ।।७।। तत्र चाक्षुषे मन्वन्तरे मन्त्रद्रुमो नाम इन्द्र आसीत्, हे राजन्! तदाऽऽप्यादयो गणात्मका देवा आसन्, हविष्मान्, वीरकश्चेत्यादयो मुनयः सप्तर्षय आसन् ।।८।।

तत्रापि देवः सम्भूत्यां वैराजस्याभवत् सुतः। अजितो नाम भगवानंशेन जगतीपतिः ।।९।। पयोधिं येन निर्मथ्य सुराणां साधिता सुधा। भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मन्दरः।।१०।। *राजोवाच* - यथा भगवता ब्रह्मन्मथितः क्षीरसागरः। यदर्थं वा यतश्चाद्रिं दधाराम्बुचरात्मना।।११।। यथामृतं सुरैः प्राप्तं किञ्चान्यदभवत् ततः। एतद् भगवतः कर्म वदस्व परमाद्भुतम्।।१२।। त्वया सङ्कथ्यमानेन महिम्ना सात्वतां पतेः। नातितृप्यति मे चित्तं सुचिरं तापतापितम्।।१३।। *सूत उवाच* - सम्पृष्टो भगवानेवं द्वैपायनसुतो द्विजाः। अभिनन्द्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे।।१४।। *श्रीशुक उवाच* - यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः। गतासवो निपतिता नोत्तिष्ठेरन् स्म भूयशः।।१५।। यदा दुर्वासःशापेन सेन्द्रा लोकास्त्रयो नृप। निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः।।१६।। निशम्यैतत् सुरगणा महेन्द्र-वरुणादयः। नाध्यगच्छन् स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चियम्।।१७।।

।। सङ्ग्रहोक्तिः ।।

तत्र मन्वन्तरे जगतीपतिर्देवो भगवान् वैराजस्य प्रजापतेः संभूत्यां पत्न्यामंशेन प्रादुर्भूत अजितो विष्णोरवतारोऽभवत्।।९।। येनाऽजितेन भगवता क्षीरसागरं निर्मथ्य देवानाममृतं साधितम्, येन कूर्मरूपेणाऽम्भसि मथ्यमानो मन्दराद्रिः पृष्ठे धृत आसीत्।।१०।। *राजोवाच* - हे ब्रह्मन्! भगवताऽजितेन क्षीरसागरो यदर्थं मथितः, यतश्च जलचरेण कूर्मरूपेण सोऽद्रिं दधार।।११।। यथा सुरैरमृतं प्राप्तम्, मथनाद् व्यतिरिक्तं वस्तु किं किमभवत्, परमाद्भुतं भगवत एतत् कर्म - चरित्रं वदस्व।।१२।। त्वया सम्यक् कीर्त्यमानेन सात्वतां पतेर्भगवतो महिम्ना सुचिरं तापतापितं मे चित्तं नैव तृप्यते।।१३।। *सुत उवाच* - हे द्विजाः! एवं संपृष्टो भगवान् द्वैपायनसुतः श्रीशुकस्तमभिनन्द्य, हरेरजितस्य भगवतो माहात्म्यं कथयितुमारेभे।।१४।। *श्रीशुक उवाच* - यदाऽसुरैस्तीक्ष्णायुधैर्बाध्यमाना देवा गतप्राणाः सन्तो युद्धे निपतिताः, तत्र भूयशः पुनर्नोत्तिष्ठेरन्।।१५।। हे नृप! किंच यदा दुर्वाससो मुनेः शापेन सेन्द्रास्त्रयो लोका निःश्रीका अभवन्, तदा यागादयः क्रियाः नेशुः।।१६।। महेन्द्रवरुणादयः सुरगणा एतत् त्रिलोक्या निःश्रीकत्वं पतितानां देवानामनुद्धारं च दृष्ट्वा, सर्वे मिलित्वा मन्त्रयन्तः सन्तोऽपि

ततो ब्रह्मसभां जग्मुर्मेरोमूर्धनि सर्वशः। सर्वे विज्ञापयाञ्चक्रुः प्रणताः परमेष्ठिने ॥१८॥ स विलोक्येन्द्रवाय्वादीन् निःसत्त्वान्विगतप्रभान्। लोकानमङ्गलप्रायान-सुरांश्च विलक्षणान् ॥१९॥ समाहितेन मनसा संस्मरन् पुरुषं विभुः। हर्षेणोत्फुल्ल-वदनः सुरानाह पितामहः ॥२०॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्म-जातयः। यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥२१॥ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः। अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले ॥२२॥ अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम्। तस्माद् व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥२३॥ *श्रीशुक उवाच*– इत्याभाष्य सुरान्वेधाः सह देवैररिन्दम। अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥२४॥

॥ सङ्ग्रहोक्तिः ॥

योग्यं कमप्युपायं न प्रापुः ॥१७॥ ततो मेरोर्मूर्द्ध्नि स्थितां ब्रह्मसभां सर्वशः सुरा जग्मुः, तत्र गत्वा सर्वे प्रणताः सन्तः परमेष्ठिने विज्ञापयांचक्रुः ॥१८॥ तत स ब्रह्मा विगतप्रभान् बलहीनान् इन्द्रवाय्वादीन् देवान् विलोक्य मङ्गलरहितान् स्थितान् त्रिलोकीजनांश्च विलोक्य तथाऽसुरान् देवेभ्यो विपरीतान् दृष्ट्वा समर्थः पितामहो ब्रह्मा समाहितेन मनसा परमपुरुषं संस्मरन् "तं शरणं गताः सन्तः, यथापूर्वं सर्वं वयं प्राप्स्यामः" इति मनसि निश्चित्य, हर्षेणोत्फुल्लवदनः सन् सुरानाह ॥१९-२०॥ *ब्रह्मोवाच*– अहं ब्रह्मा, भवः, यूयं, असुरादयः, मनुष्याः, तिर्यञ्चः द्रुमाः, स्वेदजाश्च एते सर्वे यस्याऽवतारस्य ज्ञानशक्त्यंशेन सृष्टाः सन्ति, अतस्तमव्ययं भगवन्तं शरणं व्रजाम ॥२१॥ यस्य भगवतः कश्चिद् वध्यो न, तथा रक्षणीयोऽपि न, कश्चिद् उपेक्षणीयो वाऽऽदरणीयो नास्ति, तथापि योग्यसमय उत्पत्तिस्थितिप्रलयविधानार्थं सत्त्वरज-स्तमांसि धत्ते ॥२२॥ देहिनां स्थितये सत्त्वगुणं धारयतस्तस्य भगवतोऽयं स्थितिपालनक्षणो वर्तते, यतः सर्वे वयं जगद्गुरुं हरिं शरणं व्रजामः, सुरप्रियो भगवान् आत्मीयानामस्माकं सुखं करिष्यति ॥२३॥ *श्रीशुक उवाच*– हे अरिंदम! इत्थं वेधाः सुरान् उक्त्वा देवैः सह तमसः परमजितस्य भगवतः साक्षात् पदं जगाम ॥२४॥

तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो। स्तुतमब्रूत दैवीभिर्गीर्भिस्तवहितेन्द्रियः।।२५।।
ब्रह्मोवाच - अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम्। मनोऽग्रयानं
वचसा निरुक्तं नमामहे देववरं वरेण्यम्।।२६।। विपश्चितं प्राणमनोधियात्मनामर्थे-
न्द्रियाभासमनिद्रमव्रणम्। छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे
।।२७।। अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु। त्रिणाभि विद्युच्चल-
मष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये।।२८।। य एकवर्णं तमसः परं तदलोकमव्यक्त-
मनन्तपारम्। आसाञ्चकारोपसुपर्णमेनमुपासते योगपथेन धीराः।।२९।। न यस्य
कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थम्। तं निर्जितात्मात्मगुणं परेशं
नमाम भूतेषु समं चरन्तम्।।३०।। इमे वयं यत्प्रिययैव तन्वा सत्त्वेन सृष्टा
बहिरन्तराविः। गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः।।३१।।

।। सङ्ग्रहोक्तिः ।।

स ब्रह्मा तत्र पदेऽदृष्टस्वरूपाय, श्रुतपूर्वाय प्रणम्य स्तुत्यै समाहितेन्द्रियः सन् दैवीभिर्वाग्भि-
रजितस्य स्तुतिमकरोत्।।२५।। *ब्रह्मोवाच* - अविक्रयं सत्यमनन्तमाद्यं गुहाशयं निष्कल-
मप्रतर्क्यम्, वरणीयं मनसोऽप्यग्रे गच्छन्तं वागगोचरं देववरं वरेण्यं त्वां नमामि।।२६।।
प्राणमनोधियात्मनां साक्षात् कर्तारं, अर्थेन्द्रियाणां प्रकाशकमनिद्रमव्रणम्, यंत्र छायातपात्मका-
ऽज्ञानज्ञानरूपौ जीवपक्षौ न स्तः, सर्वव्यापकं त्रियुगं = षडैश्वर्यपूर्णं तं भगवन्तं शरणं व्रजामहे
।।२७।। भगवतो मायया प्रवर्त्यमानं दशेन्द्रियपञ्चप्राणारं शीघ्रगामि, त्रिगुणात्मकनाभि
विद्युच्चलमष्टविधप्रकृतिनेमि, मनोमयं चक्रं परमात्माश्रयमाहुः तं सत्यं भगवन्तं प्रपद्ये।।२८।।
यद् एकप्रकारं प्रकृतिमण्डलात् परमलोकमव्यक्तं सिद्धात्मकहंसैरधिष्ठितं निरवधिकं स्थानं
यो भगवानधिष्ठितवान् तं भगवन्तं धीराः योगमार्गेणोपसते तमहं प्रपद्ये।।२९।। भगवदनाश्रयः
कश्चिदपि जनो यस्य मायां नाऽतिक्रामति, यया मायया लोको मुह्यति, अत एव पुरुषार्थं न
वेद, तं चिदचिद्दोषास्पृष्टं भूतेषु समं चरन्तं तं परेशं भगवन्तं नमामः।।३०।। वयं देवाः
ऋषयश्च यस्य प्रियया तन्वा सत्वेन सृष्टा अपि अन्तर्बहिश्चाविर्भूतज्ञानाः सन्तोऽस्य भगवतो
दुर्विभाव्यां चेष्टां न विद्महे, तर्हि रजस्तमःप्रधाना असुराद्याः कुतो जानीयुः।।३१।।

पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः। स वै महापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः॥३२॥ अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः। लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः॥३३॥ सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्धमायुः। ईशो नगानां प्रजनः प्रजानां प्रीसदतां नः स महाविभूतिः॥३४॥ अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा। अन्तःसमुद्रेऽनुपचन् स्वधातून् प्रसीदतां नः स महाविभूतिः॥३५॥ यच्चक्षुरासीत् तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम्। द्वारं च मुक्तेरमुतं च मृत्युः प्रसीदतां नः स महाविभूतिः॥३६॥ प्राणादभूद् यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः। अन्वास्म सम्राजमिवानुगा वयं प्रीसदतां नः स महाविभूतिः॥३७॥ श्रोत्राद् दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः। प्राणेन्द्रियात्मासुशरीरकेतं प्रीसदतां नः स महाविभूतिः॥३८॥

॥ सङ्ग्रहोक्तिः॥

यस्यां मह्यां उद्भिज्जांडजस्वेदजजरायुजरूपः भूतसर्गो भवति, सा स्वेन कृता इयं मही यस्य पादौ स्तः, स महाविभूतिः स्वतन्त्र वैराजाख्यो महापुरुष नः प्रसीदताम्॥३२॥ सपालाः, लोका यस्मादुत्पद्यन्ते, येन जीवन्ति, यस्मिन् वर्द्धन्ते, उदारवीर्यं जलं यद्रेतः, तद्ब्रह्मशब्दवाच्यं महाविभूतिः स भगवान् नः प्रसीदताम्॥३३॥ यः सोमो दिवौकसामन्नं बलं च भवति, वृक्षाणां स्थावराणां चराणां प्रजानां चेशं यं सोमं यस्य भगवतो मनो वदन्ति, स महाविभूतिर्भगवान् नः प्रसीदताम्॥३४॥ जातवेदाः क्रियाकाण्डनिमित्तजन्मा समुद्रसमदेहमध्ये जठरे स्थित्वा सप्तधातून् परिणमयन्, अग्निर्यस्य मुखमासीत् महाविभूतिर्भगवान् नः प्रसीदताम्॥३५॥ यो देवयानरूपः त्रयीमयः, ब्रह्मण उपासनास्थानं, मुक्तेर्द्वारं, आयुःक्षयकर, अत एव मृत्युः, एवंभूतः सूर्यो यस्य चक्षुःस्थानीय आसीत्, स महाविभूतिर्नः प्रसीदताम्॥३६॥ चराचराणां भूतानां यो मनोदेहेन्द्रियाणां बलप्रदः, पञ्चवृत्तिमान् प्राणः, यस्य प्राणादभूत् यं प्राणवायुं वयं सम्राजं भृत्या इवानुसृत्य स्थिताः स्मः, स महाविभूतिर्भगवान् नः प्रसीदताम्॥३७॥ यस्य भगवतः श्रोत्राद् दिशः प्रजज्ञिरे, यस्य हृदो देहगतच्छिद्राणि प्रजज्ञिरे, प्राणेन्द्रियात्मासुशरीर-

बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद् विरिञ्चः। खेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः प्रीसदतां नः स महाविभूतिः।।३९।। श्रीर्वक्षसः पितरश्छाययाऽऽसन् धर्मः स्तनादितरः पृष्ठतोऽभूत्। द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रीसदतां नः स महाविभूतिः।।४०।। विप्रो मुखाद् ब्रह्म च यस्य गुह्यं राजन्य आसीद् भुजयोर्बलं च। ऊर्वोर्विडोजोऽङ्घ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः।।४१ ।। लोभोऽधरात् प्रीतिरुपर्यभूद् द्युतिर्नस्तः पशव्यः स्पर्शेन कामः। भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रीसदतां नः स महाविभूतिः।।४२।। द्रव्यं वयः कर्म गुणान्विशेषं यद्योगमायाविहितान्वदन्ति। यद् दुर्विभाव्यं प्रबुधावबोध्यं प्रीसदतां नः स महाविभूतिः।।४३।। नमोऽस्तु तस्मा उपशान्तशक्तये स्वाराज्यलाभप्रतिपूरितात्मने। गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नमस्वभूतये।।४४।।

।। सङ्ग्रहोक्तिः ।।

केतमन्तरिक्षं यस्य वैराजस्य नाभ्याः सकाशात् प्रजज्ञे, स महाविभूतिर्नः प्रसीदताम्।।३८।। यस्य बलात् महेन्द्रः जज्ञे, यस्य प्रसादात् देवाः जज्ञिरे, यस्य क्रोधाद् भवः, बुद्धेर्ब्रह्मा, खेभ्यश्छन्दांसि ऋषयश्च जज्ञिरे, मेढ्रात् प्रजापतिर्जज्ञे, स महाविभूतिर्नः प्रसीदताम्।।३९।। यस्य वक्षसः श्रीः, छायया पितरः, स्तनाद् धर्मः, पृष्ठतोऽधर्मः, शीर्ष्णो द्यौः, विहाराद् अप्सरसश्चाऽभूवन्, स महाविभूतिः नः प्रसीदताम्।।४०।। यस्य मुखाद् विप्रो गुह्यं ब्रह्म वेदोऽपि बभूव, यस्य भुजयोः सकाशाद् राजन्यः बलं चापि, ऊरुभ्यां वैश्यः, ओजः, वार्ता च, यस्यांऽघ्रेः सकाशात् शूद्रः जात आसीत्, स महाविभूतिर्नः प्रसीदताम्।।४१।। यस्याऽधरोष्ठात् लोभोऽभूत्, उपर्योष्ठात् प्रीतिः, नासिकायाः कान्तिः, स्पर्शात् पशव्यः कामः, भ्रूभ्यां यमः, यस्य पक्ष्मभ्यां कालो जातोऽभूत्, महाविभूतिः स नः प्रसीदताम्।।४२।। भूतपञ्चकं, कालः, कर्म, सत्त्वादयो गुणाः, ब्रह्माण्डं, सकलं कार्यवर्गं च यस्य ईक्षणात्मकसंकल्पेन विहितम् इति वदन्ति, अत एव यत्स्वरूपं दुर्विभाव्यं प्रबुधावबोध्यं च भवति, स महाविभूतिर्नः प्रसीदताम् ।।४३।। उपशान्तशक्तये, स्वाराज्यलाभेन प्रतिपूरितात्मने, मायारचितेषु गुणेषु दर्शनादिभिरसज्जमानाय, स्वाभाविकैश्वर्याय तस्मै नमो नमः।।४४।।

सत्वं नो दर्शयात्मानमस्मत्करणगोचरम्। प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम्
।।४५।। तैस्तैः स्वेच्छाधृतै रूपैः काले काले स्वयं विभो। कर्म दुर्विषहं यन्नो
भगवांस्तत् करोति हि।।४६।। क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च। देहिनां
विषयार्तानां न तथैवार्पितं त्वयि।।४७।। नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः।
कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः।।४८।। यथा हि स्कन्धशाखानां
तरोर्मूलावसेचनम्। एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि।।४९।। नमस्तुभ्य-
मनन्ताय दुर्वितर्क्यात्मकर्मणे। निर्गुणाय गुणेशाय सत्त्वस्थाय च साम्प्रतम्।।५०।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे पञ्चमोऽध्यायः।।५।।

।। सङ्ग्रहोक्तिः।।

उक्तविधः स त्त्वं प्रपन्नानां दिव्यमङ्गलविग्रहं सस्मितं ते मुखाम्बुजं दर्शय।।४५।। हे विभो! काले काले तैस्तैरवतारैः स्वयं परमेश्वरस्त्वं नः दुष्करं कर्म करोषि।।४६।। विषयार्तानां देहिनां क्लेशभूरीणि स्वल्पसुखानि च कृतानि कर्माणि यथा विफलानि भवन्ति, तथैव त्वयि समर्पितं कर्म विफलं नैव भवति।।४७।। कर्माभासोऽपि लौकिकव्यापारः परमेश्वरे त्वयि समर्पितश्चेत् विफलाय न कल्पते, यतः ईश्वरः आत्मा दयितो भवति, अतः स्वात्मनि दयिते चार्पितं कर्म निष्फलं न स्यात्।।४८।। यथा हि वृक्षस्य मूले जलसेचनं स्कन्धानां शाखानां च पोषकं भवति, एवमेव सर्वेषां परमात्मनो विष्णोराराधनं सर्वपुरुषार्थानां साधनं भवति।।४९।। दुर्वितर्क्यात्मकर्मणेऽनन्ताय निर्गुणाय, गुणेशाय सांप्रतं सत्वसंस्थाय तुभ्यं नमः।।५०।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां पञ्चमोऽध्यायः।।५।।

अथ षष्ठोऽध्यायः ।।६।।

श्रीशुक उवाच – एवं स्तुतः सुरगणैर्भगवान् हरिरीश्वरः। तेषामाविरभूद् राजन् सहस्रार्कोदयद्युतिः।।१।। तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः। नापश्यन्खं दिशः क्षोणिमात्मानं च कुतो विभुम्।।२।। विरिञ्चो भगवान् दृष्ट्वा सह शर्वेण तां तनुम्। स्वच्छां मरकतश्यामां कञ्जगर्भारुणेक्षणाम्।।३।। तप्तहेमावदातेन लसत्कौशेयवाससा। प्रसन्नचारुसर्वाङ्गीं सुमुखीं सुन्दरभ्रुवम्।।४।। महामणि-किरीटेन केयूराभ्यां च भूषिताम्। कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजाम्।।५।। काञ्चीकलापवलयहारनूपुरशोभिताम्। कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ।।६।। सुदर्शनादिभिः स्वास्त्रैर्मूर्त्तिमद्भिरुपासिताम्। तुष्टाव देवप्रवरः सशर्वः पुरुषं परम्। सर्वामरगणैः साकं सर्वाङ्गैरवनिं गतैः।।७।। *ब्रह्मोवाच* – अजातजन्म-स्थितिसंयमायाऽगुणाय निर्वाणसुखार्णवाय। अणोरणिम्ने परिगण्यधाम्ने महानुभावाय नमो नमस्ते।।८।। रूपं तवैतत् पुरुषर्षभेज्यं श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण।

।। सङ्ग्रहोक्तिः ।।

अथ षष्ठोऽध्यायः ।।६।।

देवासुराणाममृतार्थमुद्यमः

श्रीशुक उवाच – हे राजन्! एवं सुरगणैः स्तुतो हरिर्भगवान् परमेश्वरः सहस्रार्कोदयद्युतिः सन् ब्रह्मादीनां पुर आविरभूत्।।१।।तेन तेजसा प्रतिहतेक्षणाः सर्वे देवा आकाशं दिशः क्षोणीमात्मानं च नाऽपश्यन्।।२।। भगवान् ब्रह्मा शिवेन सह निर्मलां, मरकतश्यामां, कमलदलनयनीं, तप्तहेमवत्पीतकौशेयाम्बरधरां, प्रसन्नचारुसर्वाङ्गीं, सुमुखीं महार्घमणिजटितकिरीटेन केयूराभ्यां च समलंकृतां, मेखला-वलय-हार-नूपुरैः शोभितां, कौस्तुभाभरणां, वक्षसि लक्ष्मीं बिभ्रतीं, वनमालिनीं, मूर्तिमद्भिः सुदर्शनादिभिरायुधैरुपासितां, भगवतस्तां तनुं साष्टांगं प्रणतैः सर्वामरगणैः सह वीक्ष्य तं परं पुरुषं तुष्टाव।।३-७।। *ब्रह्मोवाच* – जन्मादिविकाररहिताय, प्राकृतगुणवर्जिताय, निर्वाणसुखार्णवाय, अणोरणिम्ने, महानुभावाय ते नमो नमः।।८।। हे पुरुषर्षभ! तवैतद्रूपं श्रेयोर्थिभिर्वैदिकतान्त्रिकयोगेनाऽऽराधनीयं वर्तते, हे धातः! अमुष्मिन्

योगेन धातः सह नस्त्रिलोकान् पश्याम्यमुष्मिन् नु ह विश्वमूर्तौ ।।९।। त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे। त्वमादिरन्तो भुवनस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ।।१०।। त्वं माययाऽऽत्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः। पश्यन्ति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ।।११।। यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमम्बूत्खननेन वृत्तिम्। योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बुद्ध्या कवयो विदन्ति ।।१२।। तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थम्। दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गाङ्गमम्भः ।।१३।। स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलम्। समागतास्ते बहिरन्तरात्मन् किं वान्यविज्ञाप्यमशेषसाक्षिणः ।।१४।। अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते। किं वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमन्त्रम् ।।१५।। *श्रीशुक उवाच* – एवं विरिञ्चादिभिरीडितस्तद् विज्ञाय तेषां हृदयं तथैव।

।। सङ्ग्रहोक्तिः ।।

तव स्वरूपे त्रिलोकैः सह नः पश्यामि ।।९।। इदं विश्वमग्रे मध्येऽन्ते च त्वय्येवाऽऽसीत्, अत आद्याद्यवस्थं विश्वं त्वद् अपृथक्त्वात् घटस्य मृत्स्ना इव त्वमेवाऽसि ।।१०।। स्वनियम्यया माययेदं विश्वं निर्माय त्वं तदनुप्रविष्टोऽसि, त्वत्स्वरूपविदो मनीषिणस्तदनुप्रविष्टमपि त्वां तद्गुणस्पर्शवर्जितं पश्यन्ति ।।११।। मनुष्या यथा काष्ठेऽग्निं, गोक्षीरादौ घृतं, भूमावन्नं, जलं चोपायैः प्राप्नुवन्ति तथा विपश्चितो बुद्धिलब्धैरुपायैर्गुणेषु त्वां प्राप्नुवन्ति ।।१२।। हे नाथ! हे पद्मनाभ! अतिचिरेण प्रार्थितमाविर्भवन्तं त्वां दृष्ट्वा वनवह्नितप्ता गजा गाङ्गं जलं प्राप्येव सर्वे वयमद्याऽऽनन्दं प्राप्ताः स्मः ।।१३।। हे अखिललोकपाल! वयं यदर्थं तव पादमूलं समागताः, तस्मात् प्रयोजनं विधत्स्व, हे बहिरन्तरात्मन्! अशेषसाक्षिणस्ते विज्ञाप्यं किमस्ति, न किमपि ।।१४।। अहं, गिरित्रः, सुरादयो, दक्षादयः प्रजापतयश्च, सर्वे वयं अग्नेर्विस्फुल्लिंगा इव पृथग् विभाताः सन्तः, हे ईश! शं किं विदाम, अतस्त्वमेव द्विजदेवानां सुखोपायं विधत्स्व ।।१५।। *श्रीशुक उवाच* – एवं ब्रह्मादिभिः स्तुतो भगवान् तेषामभिप्रायं विज्ञाय –

जगाद जीमूतगभीरया गिरा बद्धाञ्जलीन्संवृतसर्वकारकान् ।।१६।। एक एवेश्वर-
स्तस्मिन् सुरकार्ये सुरेश्वरः। विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ।।१७।।
श्रीभगवानुवाच - हन्त ब्रह्मन्नहो शम्भो हे देवा मम भाषितम्। शृणुतावहिताः सर्वे
श्रेयो वः स्याद् यथा सुराः ।।१८।। यात दानवदैतेयैस्तावत् सन्धिर्विधीयताम्।
कालेनानुगृहीतैस्तैर्यावद् वो भव आत्मनः ।।१९।। अरयोऽपि हि सन्धेयाः सति
कार्यार्थगौरवे। अहिमूषकवद् देवा ह्यर्थस्य पदवीं गतैः ।।२०।। अमृतोत्पादने यत्नः
क्रियतामविलम्बितम्। यस्य पीतस्य वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ।।२१।। क्षिप्त्वा
क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः। मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्
।।२२।। सहायेन मया देवा निर्मन्थध्वमतन्द्रिताः। क्लेशभाजो भविष्यन्ति दैत्या
यूयं फलग्रहाः ।।२३।। यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः। न संरम्भेण सिध्यन्ति
सर्वेऽर्थाः सान्त्वया यथा ।।२४।। न भेतव्यं कालकूटाद् विषाज्जलधिसम्भवात्।

।। सङ्ग्रहोक्तिः ।।

मेघगम्भीरया वाचा संयतेन्द्रियान् बद्धाञ्जलीन् तान् जगाद ।।१६।। सुरेश्वरो भगवान् तस्मिन् सुरकार्य एक एव समर्थः सन्नपि समुद्रमन्थनादिभिर्विहर्तुकामः सन् तानाह ।।१७।। *श्रीभगवानुवाच* - हन्त, हे ब्रह्मन्! हे शंभो! हे सुराः! सर्वे यूयं यथा वः श्रेयः स्यात् तथा मम भाषितं सावधानाः सन्तः शृणुत ।।१८।। यूयं सर्वे कालवशादनुकूलतां प्राप्तैर्दानवैर्दैत्यैश्च सह यावत् नोऽभिवृद्धिः स्यात् तावत् सन्धिर्विधीयताम् ।।१९।। कर्त्तव्यस्य भूयस्त्वे सति तदर्थं शत्रवोऽपि संधेयाः, हे देवाः! कर्त्तव्यसिद्धिं गतैः सद्भिस्तु "अहिमूषकवत्" वर्तिष्यध्वम् ।।२०।। यस्यामृतस्य पानेन मृत्युग्रस्तोऽपि जन्तुरमरो भवेत्, अतोऽमृतोत्पादनेऽविलम्बितं यत्नः क्रियताम् ।।२१।। विरुत्तृणलतौषधीः क्षीरोदधौ क्षिप्त्वा, मन्दरं पर्वतं मन्थनदण्डं, वासुकिं च वेत्रं कृत्वा, हे देवाः! सहायभूतेन मयाऽतन्द्रिताः सन्तो यूयं सागरं निर्मन्थध्वम्, दैत्यास्तु केवलं क्लेशभाजो भविष्यन्ति तथा यूयममृतपायिनो भविष्यथ ।।२२-२३।। हे सुराः! यदसुरा इच्छन्ति, यूयं तदनुमोदध्वम्, साममार्गेण यथा कार्याणि सिद्ध्यन्ति तथा विरोधेन न सिद्ध्यन्ति ।।२४।। युष्माभिर्जलधिसंभवात् कालकूटाद् विषान्न भेतव्यं, मन्थनादुत्पन्नेषु वस्तुषु लोभो न कर्त्तव्यः,

लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु ।।२५।। *श्रीशुक उवाच* – इति देवान् समादिश्य भगवान् पुरुषोत्तमः। तेषामन्तर्दधे राजन् स्वच्छन्दगतिरीश्वरः ।।२६।। अथ तस्मै भगवते नमस्कृत्य पितामहः। भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः ।।२७।। दृष्ट्वारीनप्यसंयत्ताञ्जातक्षोभान् स्वनायकान्। न्यषेधद् दैत्यराट् श्लोक्यः सन्धिविग्रहकालवित् ।।२८।। ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः। श्रिया परमया जुष्टं जिताशेषमुपागमन् ।।२९।। महेन्द्रः श्लक्ष्णया वाचा सान्त्वयित्वा महामतिः। अभ्यभाषत तत् सर्वं शिक्षितं पुरुषोत्तमात् ।।३०।। तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः। शम्बरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ।।३१।। ततो देवासुराः कृत्वा संविदं कृतसौहृदाः। उद्यमं परमं चक्रुरमृतार्थे परन्तप ।।३२।। ततस्ते मन्दरगिरिमोजसोत्पाट्य दुर्मदाः। नदन्त उदधिं निन्युः शक्ताः परिघबाहवः ।।३३।। दूरभारोद्वहश्रान्ताः शक्रवैरोचनादयः। अपारयन्तस्तं वोढुं विवशा विजहुः पथि ।।३४।। निपतन् स गिरिस्तत्र बहूनमरदानवान्।

।। सङ्ग्रहोक्तिः ।।

कदाचित् क्रोधः कामश्च न कार्यः ।।२५।। *श्रीशुक उवाच* – हे राजन्! स्वच्छन्दगतिर्भगवानीश्वरः पुरुषोत्तमोऽजितो देवानित्थं समादिश्य तेषां पश्यतां सतामन्तर्दधे ।।२६।। अथ तस्मै भगवते नमस्कृत्य ब्रह्मा भवश्च स्वकीयं स्थानं जग्मतुः, इन्द्रादयः सुरा बलिमुपेयुः ।।२७।। शत्रून् देवान् युद्धायानुद्यतान् दृष्ट्वा स्तुत्यो बलिर्जातक्षोभान् सुरान् हन्तुमुद्यतान् स्वनायकान् न्यषेधत् ।।२८।। ते देवा असूरयूथपैः रक्षितं परमया श्रिया जुष्टं विजिताशेषं बलिमुपागमन् ।।२९।। ततो महामतिर्महेन्द्रो मधुरया वाचा बलिं प्रसन्नं कृत्वा, पुरुषोत्तमाद् यच्छिक्षितं तत्सर्वमभ्यभाषत ।।३०।। तद् इन्द्रोक्तं बलेस्तथा त्रिपुरवासिनां शम्बरारिष्टादीनां चाऽरोचत ।।३१।। हे परन्तप! ततो देवासुरा उभयेऽपि संविदं कृत्वा कृतसौहृदाः सन्तोऽमृतार्थे परममुद्यमं चक्रुः ।।३२।। ततो दुर्मदाः परिघबाहवस्ते देवासुरा मन्दराचलं बलेनोत्पाट्य नदन्तः सन्तो धारणशक्त्या क्षीरसागरं प्रापयितुं प्रवृत्ता बभूवुः ।।३३।। दूरं यावत् भारोद्वहनेन श्रान्ता मन्दरगिरिं वोढुमपारयन्तो वैरोचनशक्रादयो विवशाः सन्तः पथि तं जहुः ।।३४।। तत्र पथि मेरुतुल्यो –

चूर्णयामास महता भारेण कनकाचलः ।।३५।। तांस्तथा भग्नमनसो भग्नबाहूरुकन्धरान्। विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ।।३६।। गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान्। ईक्षया जीवयामास निर्जरान् निर्व्रणान्यथा ।।३७।। गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया। आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ।।३८।। अवरोप्य गिरिं स्कन्धात् सुपर्णः पततां वरः। ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः ।।३९।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे षष्ठोऽध्यायः ।।६।।

अथ सप्तमोऽध्यायः ।।७।।

श्रीशुक उवाच – ते नागराजमामन्त्र्य फलभागेन वासुकिम्। परिवीय गिरौ तस्मिन् नेत्रमब्धिं मुदान्विताः। आरेभिरे सुसंयत्ता अमृतार्थं कुरूद्वह ।।१।।

।। सङ्ग्रहोक्तिः ।।

निपतन् स मन्दरगिरिर्महता भारेण बहूनमरदानवान् चूर्णयामास ।।३५।। भग्नोत्साहान् भग्नबाहूरुकन्धरान् विज्ञाय गरुडध्वजो भगवांस्तत्राऽऽविर्बभूव ।।३६।। गिरिपातेन निष्पिष्टानमरदानवान् विलोक्य देवान् यथा निर्व्रणान् तथा जीवयामास ।।३७।। तत एकेन हस्तेन लीलया गिरिमुद्धृत्य गरुड आरोप्य स्वयं च गरुडारोहणं कृत्वा सुरासुरगणैर्वृतः सन् क्षीराब्धिं ययौ ।।३८।। ततः पक्षिणां वरः स सुपर्णः स्कन्धाद् गिरिमवरुह्य जलसमीपे निधाय हरिणा विसर्जितः सन् ययौ ।।३९।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां षष्ठोऽध्यायः ।।६।।

अथ सप्तमोऽध्यायः ।।७।।

शिवस्य विषपानगाथा

श्रीशुक उवाच – हे कुरुद्वह! ते देवासुराः फलभागेन वासुकिं नागराजं सम्प्रार्थ्य नेत्रीभूतं तं नागं मन्दरे परिवेष्ट्य मुदाऽन्विताः सुसंयत्ताः सन्तोऽमृतार्थं मथितुमारेभिरे ।।१।।

हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन्। तन्नैच्छन् दैत्यपतयो महापुरुषचेष्टितम्
।।२।। न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम्। स्वाध्यायश्रुतसम्पन्नाः प्रख्याता
जन्मकर्मभिः।।३।। इति तूष्णीं स्थितान्दैत्यान् विलोक्य पुरुषोत्तमः। स्मयमानो
विसृज्याग्रं पुच्छं जग्राह सामरः।।४।। कृतस्थानविभागास्त एवं कश्यपनन्दनाः।
ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम्।।५।। मथ्यमानेऽर्णवे सोऽद्रिरनाधारो
ह्यपोऽविशत्। ध्रियमाणोऽपि बलिभिर्गौरवात् कुरुनन्दन।।६।। ते सुनिर्विण्णमनसः
परिम्लानमुखश्रियः। आसन् स्वपौरुषे नष्टे दैवेनातिबलीयसा ।।७।। विलोक्य
विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः। कृत्वा वपुः काच्छपमद्भुतं
महत् प्रविश्य तोयं गिरिमुज्जहार।।८।। तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता
निर्मथितुं सुरासुराः। दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान्।।९।।
सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन् मन्दरमङ्ग पृष्ठतः।

।। सङ्ग्रहोक्तिः ।।

वासुकेस्तीव्रं मुखं दैत्यान् ग्राहयितुं हरिः प्रथमं नागमुखं जगृहे, ततो यत्र हरिस्तत्र देवा अभवन्, तन्महापुरुषचेष्टितं दैत्यपतयो नैच्छत्।।२।। वेदशास्त्राध्ययनसंपन्ना जन्मकर्भिः प्रख्याता वयमहेः पुच्छममङ्गलमङ्गं न गृह्णीमः।।३।। इत्यभिप्रायेण तूष्णीं स्थितान् दैत्यान् विलोक्य पुरुषोत्तमः स्मयमानः सन् देवैः सह मुखं परित्यज्य पुच्छं जग्राह।।४।।एवं स्थानविभागं कृत्वा कश्यपनन्दना देवासुरा मन्थनार्थमुद्यताः सन्तोऽमृतार्थं पयोनिधिं ममन्थुः।।५।। हे कुरुनन्दन! अर्णवे मथ्यमाने सत्यधस्तादाधारवर्जितो मन्दराचलो बलिभिरसूरैर्ध्रियमाणः सन्नपि भारातिशयाद् अपोऽविशत्।।६।। ते देवासुरा अतिबलीयसा दैवेन स्वपौरुषे नष्टे सति सुतरां निर्विण्णमनसोऽत एव परिम्लानमुखश्रिय आसन्।।७।। तदाऽपारबलः सत्यसंकल्पोऽजितो भगवान् विघ्नेशरचितं विघ्नं विलोक्य महदद्भुतं काच्छपं वपुर्धृत्वा तोयं प्रविश्य मन्दरमुज्जहार।।८।। सुरासुरास्तं मन्दरमुत्थितं वीक्ष्य पुनर्निर्मथितुं समुत्थिताः, तदाऽपरो द्वीप इव विपुलदेहः स कूर्मरूपो भगवान् लक्षयोजनविस्तरेण पृष्ठेन मन्दरं दधार ।।९।। हे राजन्! सुरासुरेन्द्रैर्भुजबलेन कम्पितं परिभ्रमन्तं मन्दरं स्वपृष्ठे दधानोऽप्रमेय आदिकच्छपस्तदावर्तनमङ्ग-

बिभ्रत् तदावर्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः ।।१०।। तथासुरानाविशदा-
सुरेण रूपेण तेषां बलवीर्यमीरयन्। उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रम-
बोधरूपः ।।११।। उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः। तस्थौ
दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः ।।१२।। उपर्यधश्चात्मनि
नेत्रगोत्रयोः परेण ते प्राविशता समेधिताः। ममन्थुरब्धिं तरसा मदोत्कटा महाद्रिणा
क्षोभितनक्रचक्रम् ।।१३।। अहीन्द्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसो-
ऽसुराः। पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् ।।१४।। देवांश्च
तच्छ्वासशिखाहतप्रभान् धूम्राम्बरस्रग्वरकञ्चुकाननान्। समभ्यवर्षन् मघवद्वशा
घना ववुः समुद्रोर्म्युपगूढवायवः ।।१५।। मथ्यमानात् तथा सिन्धोर्देवासुरवरूथपैः।
यदा सुधा न जायेत निर्ममन्थाजितः स्वयम् ।।१६।। मेघश्यामः कनकपरिधिः
कर्णविद्योतविद्युन्मूर्द्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः।

।। सङ्ग्रहोक्तिः ।।

कण्डूयनं मेने ।।१०।। विष्णुरेवं जले कच्छपवपुषा पृष्ठे गिरिं बिभ्राण एव, अजितो भगवान् पुनरसुराणां बलं वीर्यं चैधमान आसुरेण रूपेणाऽसुरानाविशत् तथा दैवेन देवगणानुद्दीपयन्नाविशत् नागेन्द्रवासुकिमबोधरूपः सन्नाविशन् ।।११।। मन्दरमुपरिभागेऽपरो गिरिराडिव सहस्रबाहुर्विष्णुर्हस्तेन गिरिमाक्रम्याऽभितः स्तुवद्भिर्ब्रह्मभवेन्द्रमुख्यैः सुमनोभिर्वृष्टः सन् दिवि तस्थौ ।।१२।। एवं गिरेरुपर्यधःप्रदेशे च नेत्रगोत्रयोश्च देवानां दैत्यानामात्मनि च स्ववीर्यबलादि-प्रवेशं कारयता परमात्मना समेधिताः मदोत्कटास्ते देवासुरा मन्दरेण क्षोभितनक्रचक्रं समुद्रं बलेन ममन्थुः ।।१३।। नागेन्द्रवासुकेः साहस्रकठोरदृङ्मुखेभ्यो निर्गतेन निःश्वासाग्निधूमेनाऽऽहततेजसः पौलोमकालेयबलील्वलादयोऽसुरा दावाग्निदग्धा सरलद्रुमा इवाऽभवन् ।।१४।। वासुकेर्विषाक्तश्वासहतप्रभान् धूम्रायिताम्बरस्रग्वरकञ्चुकाननान् देवांस्तु शक्राधीना मेघाः समभ्यवर्षन् समुद्रोर्मिशीतवायवो ववुः ।।१५।। देवासुरयूथपैर्मथ्यमानात् सिन्धोः सुधा यदा न जाता तदा स्वयमजितो भगवान् निर्ममन्थ ।।१६।। घनश्यामो कपिशवासाः, कर्णयोर्विद्युदुज्ज्वल कुण्डले दधानः, मूर्द्ध्नि भ्राजद्विलुलितकचः, वनमालाधरः, अरुणनयनः, -

जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकं गृहीत्वा मथ्नन् मथ्ना प्रतिगिरिरिवाशोभताऽथो धृताद्रिः ।।१७।। निर्मथ्यमानादुदधेरभूद्विषं महोलब्णं हालहलाह्वमग्रतः। सम्भ्रान्त-मीनोन्मकराहिकच्छपात् तिमिद्विपग्राहतिमिङ्गिलाकुलात् ।।१८।। तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति। भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ।।१९।। विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनाम् आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ।।२०।। *प्रजापतय ऊचुः* – देवदेव महादेव भूतात्मन् भूतभावन। त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद् विषात् ।।२१।। त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः। तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ।।२२।। गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो। धत्से यदा स्वदृग् भूमन् ब्रह्मविष्णुशिवाभिधाम् ।।२३।। त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः। नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ।।२४।। त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः।

।। सङ्ग्रहोक्तिः ।।

जगदभयदैर्जैत्रैर्दोर्भिर्नागं गृहीत्वा मथ्ना गिरिणाऽब्धिं मथ्नन् अधोधृताद्रिर्भगवानजितो मन्दरस्य प्रतिनिधिरिवाऽशोभत ।।१७।। सम्भ्रान्तमीनमकराहिकच्छपात्, तिमिद्विपग्राहतिमिंगलाकुलात् मथ्यमानात् समुद्रात् प्रथमं दुःसहं हालाहलाख्यं विषमभूत् ।।१८।। हे राजन्! दिशि दिशि उपर्यधः संसर्पकमुग्रवेगं तद्विषं विलोक्य भीताः सेश्वराः प्रजाः, अरक्ष्यमाणाः सत्यः सदाशिवं शरणं दुद्रुवुः ।।१९।। त्रिलोक्याः सुखाय भवन्या सह कैलास आसीनमपवर्गहेतोस्तपोजुषाणं मुनीनामभिमतं देववरं सदाशिवं विलोक्य ते प्रणेमुस्तुष्टुवुश्च ।।२०।। *प्रजापतय ऊचुः* – हे देवदेव! हे भूतभावन! महादेव! हे भूतात्मन्! शरणापन्नान् नस्त्रैलोक्यदहनाद् विषात् त्राहि ।।२१।। सर्वजगतो बन्धमोक्षयोस्त्वमेक एवेश्वरः, प्रपन्नार्त्तिहरं गुरुं त्वां सुधिय आराधयन्ति ।।२२।। त्रिगुणात्मिकया मायया जगतः सर्गस्थित्यप्ययान् त्वं यदा करोषि तदा हे विभो! स्वप्रकाशस्त्वं ब्रह्मविष्णुशिवाभिधां धत्से, ।।२३।। गुह्यं परं चिदचिद्रूपपदार्थस्रष्टृ ब्रह्म त्वमेवाऽसि, त्वमेव नानाशक्तिभिराभातः, सन्नपि जगदीश्वरः, सृज्यं त्वद्व्यतिरिक्तं नास्ति ।।२४।।

कालः क्रतुः सत्यमृतं च धर्मस्त्वमक्षरं यत् त्रिवृदामनन्ति ।।२५।। अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम्। कालं गतिं तेऽखिल-देवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ।।२६।। नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं च रेतः। परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवञ्छिरस्ते ।।२७।। कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा रोमाणि सर्वौषधिवीरुधस्ते। छन्दांसि साक्षात् तव सप्त धातवस्त्रयीमयात्मन् हृदयं सर्वधर्मः ।।२८।। मुखानि पञ्चोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः। यत् तच्छिवाख्यं परमार्थतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते ।।२९।। छाया त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि। साक्ष्यात्मनः शास्त्रकृतस्तवेक्षा छन्दोमयो देव ऋषिः पुराणः ।।३०।। न ते गिरित्राखिललोकपाल विरिञ्चवैकुण्ठसुरेन्द्रगम्यम्। ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद् ब्रह्म निरस्तभेदम् ।।३१।।

।। सङ्ग्रहोक्तिः ।।

त्वं वेदस्य योनिः, सिद्धज्ञानः, महत्तत्त्वम् अहंकारः, प्राण-इन्द्रिय-द्रव्य-गुण-स्वभावश्चेत्येते सर्वे त्वत्त एव लब्धसत्ताकाः सन्ति, त्वं कालः, संकल्पः, सत्यं, ऋतं, धर्मश्चाऽसि, त्रिवृदक्षरं प्रणवमपि त्वामेवाऽऽमनन्ति ।।२५।। कवयो अखिलदेवतात्माऽग्निस्ते मुखमस्ति, हे लोकभव! क्षितिं ते पादपद्मं विदुः, कालं ते गतिं, दिशः कर्णौ, वरुणं, ते रसनं च विदुः ।।२६।। आकाशं ते नाभिः, वायुस्ते श्वासः, सूर्यस्ते चक्षूंषि, जलं ते रेतः, तवाऽऽत्मा जीवानामाश्रयः, चन्द्रस्तव मनः, द्यौस्ते शिरो विदुः ।।२७।। समुद्रास्ते कुक्षिः, गिरयोऽस्थिसंधाः, सर्वा औषधयो विरुधश्च ते रोमाणि, गायत्र्यादीनि छन्दांसि ते सप्तधातवः, हे त्रयीमयात्मन्! स प्रसिद्धो धर्मस्तव हृदयम् ।।२८।। हे ईश! पञ्चमोपनिषदः तत्पुरुष-अघोर-सद्योजात-वामदेव-ईशानरूपाः पञ्चानुवाकास्ते मुखानि, यैर्मुखैरष्टत्रिंशत् मन्त्रवर्ग उत्पन्नः, हे देव! स्वयं ज्योतिः शिवाख्यं परमार्थतत्त्वं तेऽवस्थानं भवति ।।२९।। अधर्मस्योर्मिभूतेषु दम्भलोभादिषु तेऽप्रकाशः, सत्त्वरजस्तमांसि ते नेत्रत्रयं, हे देव छन्दोमयः पुराणो वेदः साक्षिस्वरूपस्य शास्त्रकृतस्त ईक्षणम् ।।३०।। हे गिरित्र! हे अखिललोकपाल! ते यत्र जोतिषि रजस्तमस्सत्वं, इत्येते -

कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत् ते। यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं न वेद।।३२।। ये त्वात्मराम-गुरुभिर्हृदि चिन्तिताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसाभितप्तम्। कत्थन्त उग्रपुरुषं निरतं श्मशाने ते नूनमुतिमविदंस्तव हातलज्जाः।।३३।। तत् तस्य ते सदसतोः परतः परस्य नाञ्जःस्वरूपगमने प्रभवन्ति भूम्नः। ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम्।।३४।। एतत् परं प्रपश्यामो न परं ते महेश्वर। मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः।।३५।। *श्रीशुक उवाच* - तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः। सर्वभूतसुहृद् देव इदमाह सतीं प्रियाम् ।।३६।। *श्रीशिव उवाच* - अहो बत भवान्येतत् प्रजानां पश्य वैशसम्। क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम्।।३७।। आसां प्राणपरीप्सूनां विधेयमभयं हि मे। एतावान् हि प्रभोरर्थो यद् दीनपरिपालनम् ।।३८।।

।। सङ्ग्रहोक्तिः ।।

प्राकृत गुणा न सन्ति, तद् ब्रह्म निरस्तभेदं परं ज्योतिः विरिञ्चवैकुण्ठसुरेन्द्रगम्यं न भवति ।।३१।। कामः, दक्षयज्ञः, त्रिपुरः, कालः, गरश्चेत्येतान् नैकभूतद्रुहः क्षपयतस्ते स्तुतये तत् कामादिक्षपणात्मकं कर्म न भवति, यो भवान् स्वसृष्टमिदं जगत् अन्तकाले स्वनेत्रवह्नि शिखया भसितं न वेद।।३२।। आत्मारामगुरुभिर्हृच्चिन्तितपादपद्मं, तपश्चरन्तं त्वां ये जना भवान्या सह चरन्तं कामिनमिति प्रलपन्ति तथा श्मशाने निरतं क्रूरत्वेन हिंस्रमिति ये विकत्थन्ते ते निर्लज्जास्तव लीलां नैव जानन्ति।।३३।। तस्मात् परतः=प्रधानात् परस्य भूम्नस्तव तत्त्वतः स्वरूपगमने संस्तवने च ब्रह्मादयोऽपि न प्रभवन्ति, तर्हि वयं तु अत्यन्तार्वाचीनाः स्वरूपगमने संस्तवने च किमुत।।३४।। हे महेश्वर! वयं तु ते परमुत्कृष्टं रूपं प्रपश्यामः, अव्यक्तस्वरूपस्य तवेयं व्यक्तिर्लोकस्य सुखाय भवति।।३५।। *श्रीशुक उवाच* - सर्वभूतसुहृद् देवो रुद्रस्तासां प्रजानां कालकूटोपस्थितं दुःखं वीक्ष्य कृपया भृशं पीडितः सन् सतीं प्रियामिदमाह।।३६।। *श्रीमहादेव उवाच* - हे भवानि! क्षीरोदमथनाद् जातात् कालकूटात् प्रजानां समायातं दुःखं पश्य, अहो, बत महत् कष्टम्।।३७।। जिजीविषूणां प्रजानां -

प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः। बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया
।।३९।। पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः। प्रीते हरौ भगवति प्रीयेऽहं
सचराचरः। तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ।।४०।। *श्रीशुक उवाच* -
एवमामन्त्र्य भगवान् भवानीं विश्वभावनः। तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत।।४१।।
ततः करतलीकृत्य व्यापि हालाहलं विषम्। अभक्षयन्महादेवः कृपया भूतभावनः।।४२।।
तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः। यच्चकार गले नीलं तच्च साधोर्विभूषणम्
।।४३।। तप्यन्ते लोकतापेन साधवः प्रायशो जनाः। परमाराधनं तद्धि पुरुषस्या-
खिलात्मनः।।४४।। निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः। प्रजा दाक्षायणी ब्रह्मा
वैकुण्ठश्च शशंसिरे।।४५।। प्रस्कन्नं पिबतः पाणेर्यत् किञ्चिज्जगृहुः स्म तत्।
वृश्चिकाहिविषौषध्यो दन्दशूकाश्च येऽपरे।।४६।।

❀ *इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे सप्तमोऽध्यायः।।७।।* ❀

।। सङ्ग्रहोक्तिः ।।

मयाऽभयं विधेयं, यतः समर्थस्य दीनानां पालनं हि कर्त्तव्यंप्रयोजनं वर्तते, अतः परोऽर्थो
समर्थस्य न।।३८।। भगवन्मायया मोहितेषु बद्धवैरेषु भूतेषु साधवः क्षणभङ्गुरैः स्वैः प्राणैरपि
प्राणिनः पान्ति।।३९।। हे भद्रे! भूतेषु कृपां कुर्वतः पुंसः सर्वात्मा हरिः प्रीयते, भगवति हरौ
प्रीते सति चराचरोऽहं प्रिये, तस्मादिदं गरं भोक्ष्ये, मत्तः प्रजानां स्वस्ति अस्तु।।४०।। *श्रीशुक
उवाच* - विश्वभावनो भगवन् रुद्र इत्थं भवानीमनुज्ञाप्य तद्विषं जग्धुमारेभे, तत्प्रभावज्ञा
सत्यन्वमोदत।।४१।। ततः सर्वतो व्याप्तं हालाहलं विषं करतलीकृत्य भूतभावनो महादेवः
कृपयाऽभक्षत्।।४२।। जलदोषरूपं तद् विषं रुद्रस्याऽपि स्ववीर्यं दर्शयामास, यद् गले नीलं
चकार, तन्नैल्यं साधोस्तस्य विभूषणमभूत्।।४३।। प्रायशः साधवो लोकानां तापेन तप्यन्ते,
तद् व्यर्थं न, अपि तु सर्वान्तरात्मनः परमपुरुषस्य तत् परमाराधनं भवति।।४४।। देवदेवस्य
शम्भोस्तत् कर्म श्रुत्वा सती, प्रजा ब्रह्मा वैकुण्ठो भगवांश्च सर्वे तं प्रशशंसिरे।।४५।। विषं
पिबतः सतः शम्भोः पाणेर्यत् किंचित् प्रस्कन्नं तद्विषं वृश्चिका अहयो विषौषध्यः येऽपि
दन्दशूकादयश्च ते जगृहुः।।४६।। ❀ *इति श्रीमद्भागवतेऽष्टमस्कन्धे साग्रहोक्त्यां सप्तमोऽध्यायः।।७।।* ❀

अथाऽष्टमोऽध्यायः ।।८।।

श्रीशुक उवाच – पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः। ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ।।१।। तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः। यज्ञस्य देवयानस्य मेध्याय हविषे नृप ।।२।। तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः। तस्मिन् बलिः स्पहां चक्रे नेन्द्र ईश्वरशिक्षया ।।३।। तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः। दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिम् ।।४।। कौस्तुभाख्यमभूद् रत्नं पद्मरागो महोदधेः तस्मिन् मणौ स्पहां चक्रे वक्षोऽलङ्करणे हरिः ।।५।। ततोऽभवत् पारिजातः सुरलोकविभूषणम्। पूरयत्यर्थिनो योऽर्थैः शश्वद् भुवि यथा भवान् ।।६।। ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः। रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ।।७।। ततश्चाविरभूत् साक्षाच्छ्री रमा भगवत्परा। रञ्जयन्ती दिशः कान्त्या विद्युत् सौदामिनी यथा ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथाऽष्टमोऽध्यायः ।।८।।

क्षीरसागराल्लक्ष्म्यादीनामुत्पत्तिः असुरैरमृतेऽपहृते मोहनीप्रादुर्भावः

श्रीशुक उवाच – इत्थं रुद्रेण विषे पीते सति प्रीतास्ते देवासुरा बलेन सिन्धुं ममन्थुः, ततः सुरभिः कामधेनुरभवत् ।।१।। हे नृप! तां सुरभिमग्निहोत्रादिकर्मनिष्पादिनीं ज्ञात्वा देवयानस्य यज्ञस्य मेध्याय हविषे ब्रह्मवादिनः ऋषयो जगृहुः ।।२।। ततश्चन्द्रसमश्वेतवर्ण उच्चैःश्रवाः नाम हयोऽभूत्, तस्मिन् बलिः स्पृहां चक्रे, ईश्वरशिक्षयेन्द्रः स्पृहां न चक्रे ।।३।। ततश्चतुर्भिर्दन्तैरुपलक्षितो रुद्रस्य कैलासस्य माहात्म्यं हरन् ऐरावतो नाम वारणेन्द्रो विनिर्गतः ।।४।। ततो महोदधेः पद्मरागः कौस्तुभाख्यो मणिरभूत्, तस्मिन् मणौ हरिर्वक्षोऽलंकरणनिमित्ते स्पृहां चक्रे ।।५।। ततो भुवि भवान् इव योऽर्थिनोऽर्थान् शश्वत् पूरयति स सुरलोकविभूषणभूतः पारिजातः कल्पतरुरभवत् ।।६।। ततो निष्ककण्ठ्यः सुवाससो वल्गुगतिलीलावलोकनैः स्वर्गिणां रमण्योऽप्सरसो जाताः ।।७।। ततः सौदामिनी विद्युद् दिश इव कान्त्या दिशो रञ्जयन्ती भगवत्परा रमा लक्ष्मीः साक्षादाविरभूत् ।।८।।

तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः । रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ।।९।। तस्याश्चासनमानिन्ये महेन्द्रो महदद्भुतम् । मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुम्भैर्जलं शुचि ।।१०।। आभिषेचनिका भूमिराहरत् सकलौषधीः । गावः पञ्च पवित्राणि वसन्तो मधुमाधवौ ।।११।। ऋषयः कल्पयाञ्चक्रुरभिषेकं यथाविधि । जगुर्भद्राणि गन्धर्वा नट्यश्च ननृतुर्जगुः ।।१२।। मेघा मृदङ्गपणवमुरजानकगोमुखान् । व्यनादयन् शङ्खवेणुवीणास्तुमुलनिःस्वनान् ।।१३।। ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम् । दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ।।१४।। समुद्रः पीतकौशेयवाससी समुपाहरत् । वरुणः स्रजं वैजयन्तीं मधुना मत्तषट्पदाम् ।।१५।। भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः । हारं सरस्वती पद्ममजो नागाश्च कुण्डले ।।१६।। ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना । चचाल वक्त्रं सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम् ।।१७।। स्तनद्वयं चातिकृशोदरी समं निरन्तरं चन्दनकुङ्कुमोक्षितम् ।

।। सङ्ग्रहोक्तिः ।।

रूप-औदार्य-वयस्-वर्ण-महिमभिराक्षिप्त चेतसः सुराऽसुरमानवैः सह सर्वेऽपि तस्यां स्पृहां चक्रुः ।।९।। रमाया उपवेशनार्थं महत् सिंहासनमिन्द्र आनिन्ये, गङ्गाद्या नद्यो मूर्त्तिमत्यः सत्यो हेमकुम्भैः शुचि जलमानिन्यिरे ।।१०।। तथा भूमिर्मूर्तिमती सत्यभिषेकोचिताः सकलौषधीराहरत्, गावः पञ्चगव्यानि, वसन्तश्चैत्रवैशाखभवपुष्पाणि चाहरन् ।।११।। ततः ऋषयो यथाविध्यभिषेकं चक्रुः, गन्धर्वा मङ्गलानि जगुः, नट्यो ननृतुर्जगुश्च ।।१२।। मूर्तिमन्तो मेघास्तुमुलनिःस्वनान् मृदङ्-पणव-मुरज-आनक-गोमुखान् शंख-वेणु-वीणाश्च व्यनादयन् ।।१३।। ततः पद्मकरां सतीं लक्ष्मीं देवीं दिग्गजाः पूर्णकलशैर्द्विजेरितैः सूक्तैः सहाऽभिषिषिचुः ।।१४।। समुद्रः पीतकौशेयवाससी समुपाहरत्, वरुणो वैजयन्तीं मधुमत्तषट्पदां मालां समुपाहरत् ।।१५।। ततः प्रजापतिर्विश्वकर्मा विचित्राणि भूषणानि, सरस्वती हारं, ब्रह्मा पद्मं, नागाः कुण्डले समुपाहरन् ।।१६।। ततः कृतस्वस्तयना सा रमा भ्रमरैर्नादितां कमलमालां हस्ते गृहीत्वा सलज्जस्मितं सुकपोलकुण्डलसुशोभनं मुखं दधती चचाल ।।१७।।

इतस्ततो नूपुरवल्गुशिञ्जितैर्विसर्पती हेमलतेव सा बभौ ।।१८।। विलोकयन्ती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारि सद्गुणम्। गन्धर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविन्दत ।।१९।। नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित् तच्च न सङ्गवर्जितम्। कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ।।२०।। धर्मः क्वचित् तत्र न भीतसौहृदं त्यागः क्वचित् तत्र न मुक्तिकारणं। वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः।।२१।। क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित् तदप्यस्ति न वेद्यमायुषः। यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्च न काङ्क्षते हि माम्।।२२।। एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतोऽगुणाश्रयम्। वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम्।।२३।।

।। सङ्ग्रहोक्तिः।।

चन्दन-कुङ्कुमसिक्तं समं निरन्तरं स्तनद्वयं कृशोदरं च दधती नूपुरवल्गुशिञ्जितैरितस्ततो विसर्पती सती सा हेमलतेव बभौ ।।१८।। ततः स्वस्याः नित्यं स्वाभाविककल्याणगुणसंपन्नं निरस्तहेयगुणं आश्रयं विलोकयन्ती सत्यपि गन्धर्व-यक्ष-असुर-सिद्ध-चारण-देवादिषु मध्ये कमपि नान्वविन्दत, क्वचित् कस्यचिदपि दोषस्य सद्भावात्।।१९।। यस्य रुद्रादेः तपस्त्वस्ति किन्तु क्रोधनिग्रहो नास्ति, क्वचित् गुरुशुक्रादिषु ज्ञानमस्ति किन्त्वासक्तित्यागो नास्ति, क्वचिद् ब्रह्मसोमादिः महानस्ति किंतु तेषु कामविजयो नास्ति, इन्द्रादिस्तु परापेक्षैश्वर्याश्रयः, स त्वनीश्वर एव।।२०।। क्वचिद् धर्मोऽस्ति किन्तु भूतसौहृदं नास्ति, क्वचित्तदस्ति किन्तु तत् मुक्तिकारणं न हि, कार्तवीर्यादौ वीर्यमस्ति किंतु तत् कालग्रासरूपं भवति, सनकादयः समर्थाः किन्तु ते गुणत्रयरहिता न भवन्ति ।।२१।। मार्कण्डेयादिश्चिरायुः, अपि तत्र शीलमङ्गलं न, यत्र तद्द्वयं वर्तते तदायुषो वेद्यं न, यत्र शिवादौ चिरायुष्ट्वं शीलं चास्ति सोऽप्यमङ्गलः, यः कश्चित् सुमङ्गलो निरस्तनिखिलदोषः समस्तकल्याणगुणाकरः स तु मां न काङ्क्षते ।।२२।। इत्थं विमृश्य रमा अनितरसाधारणसद्गुणैः श्रेष्ठं, नित्यनिर्दोषं, प्राकृतगुणैर्वर्जितं मायिकापेक्षारहितं निजजनमुक्तिदं मुकुन्दं विष्णुं वव्रे ।।२३।।

तस्यांसदेश उशतीं नवकञ्जमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम्। तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता।।२४।। तस्याः श्रियास्त्रिजगतो जनको जनन्या वक्षोनिवासमकरोत् परमं विभूतेः। श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान्।।२५।। शङ्खतूर्यमृदङ्गानां वादित्राणां पृथुः स्वनः। देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत्।।२६।। ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुम्। ईडिरेऽवितथैर्मन्त्रैस्तल्लिङ्गैः पुष्पवर्षिणः।।२७।। श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः। शीलादिगुणसम्पन्ना लेभिरे निर्वृतिं पराम्।।२८।। निःसत्त्वा लोलुपा राजन् निरुद्योगा गतत्रपाः। यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः।।२९।। अथासीद् वारुणी देवी कन्या कमललोचना। असुरा जगृहुस्तां वै हरेरनुमतेन ते।।३०।। अथोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभिः। उदतिष्ठन् महाराज पुरुषः परमाद्भुतः।।३१।। दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः। श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः।।३२।।

।। सङ्ग्रहोक्तिः ।।

मुकुन्दस्य स्कन्धप्रदेशे कमनीयां भ्रमरव्रातध्वनितां नवकञ्जमालां निधाय सव्रीडहासविकसन्नयनेन स्वाश्रयं तदुरःस्थलं प्रतीक्षमाणा सती सन्निकटे तस्थौ।।२४।। त्रिजगतो जनन्याः श्रिया निवासं त्रिजगतो जनको हरिः स्ववक्षःस्थलमकरोत्, यत्र वक्षसि स्थिता श्रीः सकरुणेन निरीक्षणेन स्वाः प्रजाः साधिपांस्त्रिलोकांश्चावर्द्धयत।।२५।। तदा शंखतूर्यमृदङ्गानां वादित्राणां, गायतां स्त्रीणां देवानुगानां ध्वनिर्महान् अभूत्।।२६।। ब्रह्मरुद्रादयः सर्वे विश्वसृजश्च पुष्पाणि वर्षयन्तः सन्तो भगवन्तं तद्गुणप्रतिपादकैः सत्यैर्मन्त्रैरस्तुवन्।।२७।। स प्रजापतयो देवाः प्रजाश्च लक्ष्म्याऽवलोकिताः सन्तः शीलादिगुणसंपन्ना भूत्वा परमानन्दं लेभिरे।।२८।। हे राजन्! दैत्या दानवाश्च यदा लक्ष्म्या उपेक्षितास्तदा ते सर्वे बलहीना निरुद्योगा गतत्रपा लोलुपाश्च बभूवुः।।२९।। अथ कन्या कमललोचना वारुणी देवी उत्पन्नाऽऽसीत्, हरेः संमत्या तां वारुणीमसुरा जगृहुः।।३०।। हे महाराज! अथाऽमृतार्थिभिर्देवासुरैर्मथ्यमानादुदधेः सकाशात् परमाद्भुतः पुरुष उदतिष्ठत्।।३१।। दीर्घपीवरदोर्दण्डः, कम्बुग्रीवोऽरुणेक्षणः, श्यामवर्णः, -

पीतवासा महोरस्कः सुमृष्टमणिकुण्डलः। स्निग्धकुञ्चितकेशान्तः सुभगः सिंह-
विक्रमः। अमृतापूर्णकलशं बिभ्रद् वलयभूषितः॥३३॥ स वै भगवतः साक्षाद्विष्णो-
रंशांशसम्भवः। धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक्॥३४॥ तमालोक्यासुराः
सर्वे कलशं चामृताभृतम्। लिप्सन्तः सर्ववस्तूनि कलशं तरसाहरन्॥३५॥
नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने। विषण्णमनसो देवा हरिं शरणमाययुः
॥३६॥ इति तद्दैन्यमालोक्य भगवान् भृत्यकामकृत्। मा खिद्यत मिथोऽर्थं वः
साधयिष्ये स्वमायया॥३७॥ इत्युक्त्वा सान्त्वयन् देवांस्तत्रैवान्तर्दधे हरिः। मिथः
कलिरभूत्तेषां तदर्थे तर्षचेतसाम्॥३८॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो।
देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः। सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः
॥३९॥ इति स्वान् प्रत्यषेधन् वै दैतेया जातमत्सराः। दुर्बलाः प्रबलान् राजन्
गृहीतकलशान् मुहुः॥४०॥

॥ सङ्ग्रहोक्तिः॥

तरुणो, वनमाली, सर्वाभरणभूषितः, विशालवक्षाः, पीताम्बरः सुमृष्टमणिकुण्डलः स्निग्ध-
कुञ्चितकेशान्तः, सुभगः सिंहविक्रमो वलयभूषितोऽमृतापूर्णकलशः॥३२-३३॥ स वै साक्षाद्
भगवतो विष्णोरंशांशसंभव आयुर्वेदस्य दृष्टा यागभागभोक्ता धन्वन्तरिः इति नाम्ना प्रसिद्धः
॥३४॥ सर्वेऽसुरास्तं धन्वन्तरिं सुधापूर्णं कलशं चाऽऽलोक्य सर्ववस्तूनि लिप्सन्तः सन्तः
कलशं तरसाऽहरन्॥३५॥ तस्मिन् कलशेऽसुरैर्नीयमाने सति विषण्णमनसो देवाः श्रीहरिं
शरणमाययुः॥३६॥ इत्थं देवानां दीनतामालोक्य भक्तजनेष्टसंपादको भगवान्, हे देवाः!
"मा खिद्यत" तेषां मिथः कलहेन स्वयोगशक्त्या वोऽमृतपानरूपं कार्यं साधयिष्ये॥३७॥
हरिर्देवान् इत्युक्त्वा सान्त्वयन् सन् तत्रैवान्तर्दधे, अमृतार्थे तृष्णायुक्तमनसां तेषां दैत्यानां
मिथः कलहोऽभूत्॥३८॥ हे राजन्! "अहं पूर्वं पास्यामि, त्वं न" "अहं पूर्वं पास्यामि, त्वं न"
इत्येवं तेषां कलहोऽभूत्, देवा अपि स्वं भागमर्हन्ति, ये देवा परिश्रमेण तुल्यभागिनो भवन्ति,
सत्रयागे इव एतस्मिन्नमृते देवाः समभागिनः सन्ति, एष सनातनो धर्मोऽसि॥३९॥ हे
राजन्! इत्थं गृहीतकलशान् प्रबलान् स्वीयदैत्यान् दुर्बला जातमत्सरा दैत्या मुहुः-

एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः। योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ।।४१।। प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरम्। समानकर्णाभरणं सुकपोलोन्नसाननम् ।।४२।।नवयौवननिर्वृत्तस्तनभारकृशोदरम् ।मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचनम् ।।४३।। बिभ्रत् स्वकेशभारेण मालामुत्फुल्लमल्लिकाम्। सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितम् ।।४४।। विरजाम्बरसंवीतनितम्बद्वीपशोभया। काञ्च्या प्रविलसद्वल्गुचलच्चरणनूपुरम् ।।४५।। सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः। दैत्ययूथपचेतःसु काममुद्दीपयन् मुहुः ।।४६।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धेऽष्टमोऽध्यायः ।।८।।

।। सङ्ग्रहोक्तिः ।।

प्रत्यषेधन् ।।४०।।एतस्मिन्नन्तरे सर्वोपायविद् विष्णुरीश्वरोऽजितो भगवान् परमाद्भुतमनिर्देश्यं स्त्रीस्वरूपं दधार ।।४१।। तद्रूपं प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरं समानकर्णाभरणं सुकपोलोन्नसाननं रम्यमभवत् ।।४२।। नवयौवननिर्वृतेन स्तनभारेण कृशोदरं मुखामोदेनानुरक्तानां भ्रमराणां झंकारेण विह्वललोचनम् ।।४३।। उत्फुल्लमल्लिकां मालां स्केशभारेण बिभ्रत्, सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितं तद्रूपमद्भुतमासीत् ।।४४।। विरजाम्बरसंवीतनितम्बस्थया काञ्च्या प्रविलसत् वल्गुचलच्चरणनूपुरं ।।४५।। सव्रीडस्मितविक्षिप्तैर्भ्रूविलासैरवलोकनैश्च दैत्ययूथपचेतःसु मुहुः काममुद्दपयत् रम्यं रूपमासीत् ।।४६।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यामष्टमोऽध्यायः ।।८।।

अथ नवमोऽध्यायः ।।९।।

श्रीशुक उवाच – तेऽन्योन्यतोऽसुराः पात्रं हरन्तस्त्यक्तसौहृदाः। क्षिपन्तो दस्युधर्माण ह्यायान्तीं ददृशुः स्त्रियम् ।।१।। अहो रूपमहो धाम अहो अस्या नवं वयः। इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ।।२।। *दैत्या ऊचुः* – का त्वं कञ्जपलाशाक्षि कुतो वा किं चिकीर्षसि। कस्यासि वद वामोरु मथ्नन्तीव मनांसि नः ।।३।। न वयं त्वामरैर्दैत्यैः सिद्धगन्धर्वचारणैः। नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ।।४।। नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणाम्। सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किम् ।।५।। सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि। ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ।।६।। वयं कश्यपदायादा भ्रातरः कृतपौरुषाः। विभजस्व यथान्यायं नैव भेदो यथा भवेत् ।।७।। *श्रीशुक उवाच* – इत्युपामन्त्रितो दैत्यैर्माया-योषिद् वपुर्हरिः। प्रहस्य रुचिरापाङ्गैर्निरीक्ष्यन्निदमब्रवीत् ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथाऽनवमोऽध्यायः ।।९।।

मोहिनीरूपधारिणा भगवता देवेभ्योऽमृतप्रदानम्

श्रीशुक उवाच – दस्युधर्मेण परस्परं सुधापात्रं हरन्तस्त्यक्तसौहृदास्तेऽसुराः स्वेच्छातः समायान्तीं स्त्रियं ददृशुः ।।१।। अहो, अस्याः सौन्दर्यं, अहो अस्याः द्युतिः, अहो नवं यौवनं इति वदन्तस्ते कामातुरा दैत्यास्तस्या अन्तिके गत्वा तां पप्रच्छुः ।।२।। *दैत्या ऊचुः* – हे कमलनयने! त्वं काऽसि, कुतः समागता, त्वं किं वा चिकीर्षसि? त्वं कस्य भार्याऽसि, हे वामोरु! नो मनांसि मथ्नन्तीव वर्त्तसे ।।३।। वयं त्वां देवाऽसुरसिद्धगान्धर्वचारणैः लोकेशैश्चा-ऽस्पृष्टपूर्वां मन्यामहे ।।४।। हे सुभ्रु! शरीरिणां नः सर्वेन्द्रियमनःप्रीतिं कर्त्तुं सकरुणेन विधिना त्वं प्रेषिताऽसि किम्? ।।५।। हे सुमध्यमे! हे मानिनि! एकस्मिन् वस्तुनि स्पर्धमानानां बद्धवैराणां ज्ञातीनां नः शं कुरु ।।६।। वयं सर्वे कश्यपसुताः कृतपौरुषा भ्रातरः स्मः, अत एवं त्वं यथान्यायमेतदमृतं तथा विभजस्व, यथा पुनः कलहो न भवेत् ।।७।। *श्रीशुक उवाच* – एवं दैत्यैरामन्त्रितो मोहिनीरूपधारी भगवान् विहस्य तान् सुन्दरकटाक्षैरवलोकयन् जगाद ।।८।।

श्रीभगवानुवाच – कथं कश्यपदायादाः पुंश्चल्यां मयि सङ्गताः। विश्वासं पण्डितो जातु कामिनीषु न याति हि।।९।। शालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः। सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम्।।१०।। *श्रीशुक उवाच* – इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः। जहसुर्भावगम्भीरं ददुश्चामृतभाजनम्।।११।। ततो गृहीत्वामृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा। यद्यभ्युपेतं क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम्।।१२।। इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुङ्गवाः। अप्रमाणविदस्तस्यास्तत् तथेत्यन्वमंसत।।१३।। अथोपोष्य कृतस्नाना हुत्वा च हविषानलम्। दत्त्वा गोविप्रदेवेभ्यः कृतस्वस्त्ययना द्विजैः।।१४।। यथोपजोषं वासांसि परिधायाहतानि ते। कुशेषु प्राविशन्सर्वे प्रागग्रेष्वभिभूषिताः ।।१५।। प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च। धूपामोदितशालायां जुष्टायां माल्यदीपकैः।।१६।। तस्यां नरेन्द्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मद-विह्वलाक्षी।

।। सङ्ग्रहोक्तिः ।।

श्रीभगवानुवाच – हे कश्यपपुत्राः! यूयं पुंश्चल्यां मयि कथमासक्ता जाताः? विद्वांसः कामिनीषु कदापि विश्वासं न कुर्वन्ति।।९।। हे दैतेयाः! बुधाः पुंश्चलीनां स्त्रीणां शालावृकाणां च मैत्रीमनित्यां कथयन्ति, यतस्ता नित्यं नवं नवं जारमन्वेषयन्ति।।१०।। *श्रीशुक उवाच* – एवं तस्याः परिहासवचनैराश्वस्तमनसोऽसुरा भावगम्भीरं जहसुः, तदमृतपात्रं च तस्यै ददुः।।११।। अमृतभाजनं गृहीत्वा भगवान् ईषत्स्मितशोभया गिरा बभाषे, हे असुराः! मया साधु असाधु वा कृतं यदि, यूयमनुमोदध्वं, तदाऽहं वः सुधां विभजे।।१२।। इत्थं मोहिन्या वाक्यमाकर्ण्य तद्वाक्यनिश्चयमजानन्तोऽसुरा तद्वचनमन्वमंसत।।१३।। अथ तस्या अनुज्ञयोपोषणं विधाय, स्नानं कृत्वा, हविषाऽग्निं हुत्वा, गोविप्रदेवेभ्यो यथायोग्यं दत्वा, द्विजैः कृतस्वस्त्ययना आसन्।।१४।। यथारुचि नूतनानि वासांसि परिधाय, भूषणैर्भूषिताः सन्तः पूर्वाग्रेषु दर्भासनेषूपविविशुः।।१५।।माल्यदीपकैर्जुष्टायां धूपामोदितशालायां प्राङ्मुखेषु सुरेषु दितिजेषु चोपविष्टेषु सत्सु हे नरेन्द्र! तस्यां शालायां करभोरुलसद्दुकूलश्रोणीतटा, अलसगतिः, -

सा कूजती कनकनूपुरशिञ्जितेन कुम्भस्तनी कलशपाणिरथाविवेश।।१७।। तां श्रीसखीं कनककुण्डलचारुकर्णनासाकपोलवदनां परदेवताख्याम्। संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकान्ताम्।।१८।। असुराणां सुधादानं सर्पाणामिव दुर्नयम्। मत्वा जातिनृशंसानां न तां व्यभजदच्युतः।।१९।। कल्पयित्वा पृथक् पङ्क्तीरुभयेषां जगत्पतिः। तांश्चोपवेशयामास स्वासु स्वासु च पङ्क्तिषु।।२०।। दैत्यान् गृहीतकलशो वञ्चयन्नुपसञ्चरैः। दूरस्थान् पाययामास जरामृत्युहरां सुधाम्।।२१।। ते पालयन्तः समयमसुराः स्वकृतं नृप। तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया।।२२।। तस्यां कृतातिप्रणयाः प्रणयापायकातराः। बहुमानेन चाबद्धा नोचुः किञ्चन विप्रियम्।।२३।। देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि। प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः।।२४।। चक्रेण क्षुरधारेण जहार पिबतः शिरः। हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत्।।२५।। शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत्।

।। सङ्ग्रहोक्तिः।।

मदविह्वलाक्षी कनकनूपुरशिञ्जितेन कूजती कुम्भस्तनी मोहिनी अमृतकलशं गृहीत्वा समागता।।१६-१७।। कनककुण्डलचारुकर्णां विगलितस्तनपट्टिकान्ताम् परदेवताख्यां श्रीसखीमिव तां संवीक्ष्य तस्या उत्स्मितवीक्षणेन देवासुराः संमुमुहुः।।१८।।। तदा स्वभावत एव क्रूराणामसुराणां सुधापानं सर्पाणां क्षीरपानमिव दुर्नयं मत्वा हरिस्तेभ्यः सुधां न ददौ।।१९।। परिधृतमोहिनीवेषो भगवान् उभयेषां पृथक् पृथक् पङ्क्तीः कल्पयित्वा तान् देवानसुरांश्च स्वासु स्वासु पङ्क्तिषूपवेशयामास।।२०।। गृहीतकलशो भगवान् उपसञ्चरैर्दैत्यान् वञ्चयन् सन् जरामृत्युहरां सुधां देवान् पाययामास।।२१।। हे नृप! त असुराः स्वकृतं समयं पालयन्तस्तस्यां कृतस्नेहाः स्त्रीविवादजुगुप्सया च तूष्णीमासन्।।२२।। तस्यां कृतातिप्रणयाः प्रणयापायकातरा बहुमानेन चाऽऽबद्धा अतः किंचन विप्रियं नोचुः।।२३।। तदानीं देवताविशेषरूपेण प्रतिच्छन्नो राहुर्देवपङ्क्तौ प्रविष्टः सन् चन्द्रार्काभ्यां सूचितः सोऽमृतमपिबत्।।२४।। हरिरमृतपानं कुर्वतस्तस्य राहोः शिरः क्षुरधारेण चक्रेणाऽच्छिनत्, सुधया संस्पृष्टस्तस्य कबन्धोऽपतत्

यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ।।२६।। पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः। पश्यतामसुरेन्द्राणां स्वं रूपं जगृहे हरिः ।।२७।। एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः। तत्रामृतं सुरगणाः फलमञ्जसाऽपुर्यत्पादपङ्कजरजः श्रयणान्न दैत्याः ।।२८।। यद् युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत् पृथक्त्वात्। तैरेव सद् भवति यत्क्रियते पृथक्त्वात्सर्वस्य तद् भवति मूलनिषेचनं यत् ।।२९।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे नवमोऽध्यायः ।।९।।

।। सङ्ग्रहोक्तिः ।।

।।२५।। तन्मस्तकं त्वमरतां नीतमतएव ब्रह्मा तद् ग्रहमचीकरत्, यस्तु ग्रहत्वं प्रापितो राहोर्मूर्द्धा वैरधीः सन् चन्द्रार्कौ प्रतिपर्वण्यभिधावति ।।२६।। देवैरमृते पीतप्राये सति लोकभावनो हरिः सुरेन्द्राणां पश्यतां सतां स्वकीयं पौरुषं रूपं जगृहे ।।२७।। देवानामसुराणां च देश-काल-हेतु-अर्थ-कर्म-मतयः सर्वेषां तुल्या एवाऽऽसन् तथापि ते फलवैषम्यवन्तो जाताः, तत्र देवासुराणां मध्ये सुरगणा भगवच्चरणकमलाश्रयणादमृतं फलं सुखेन प्रापुः, तदाश्रयणाभावाद् दैत्या नापुः ।।२८।। असु-वसु-कर्म-मनो-वचोभिर्देहात्मजाद्यर्थं यत् कर्म नृभिः क्रियते तद् ममतारूपपृथगभिमानगर्भत्वाद् व्यर्थं भवति, तद् असु-वसु कर्मादिकं यदि भगवत्प्रीत्यर्थं क्रियते, तद् महाफलं भवति, यथा तरोर्मूले जलसेचनं सर्वस्य शाखादेरपि सेचनकृद् भवति, तद्वत् ।।२९।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां नवमोऽध्यायः ।।९।।

अथ दशमोऽध्यायः ।।१०।।

श्रीशुक उवाच – इति दानवदैतेया नाविन्दन्नमृतं नृप। युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ।।१।। साधयित्वामृतं राजन् पाययित्वा स्वकान् सुरान्। पश्यतां सर्वभूतानां ययौ गरुडवाहनः ।।२।। सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनन्दनाः। अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ।।३।। ततः सुरगणाः सर्वे सुधया पीतयैधिताः। प्रतिसंयुयुधुः शस्त्रैरस्त्रैर्नारायणाश्रयाः ।।४।। तत्र देवासुरो नाम रणः परमदारुणः। रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ।।५।। तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे। समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ।।६।। शङ्खतूर्यमृदङ्गानां भेरीडमरीणां महान्। हस्त्यश्वरथपत्तीनां नदतां निःस्वनोऽभवत् ।।७।। रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः। हया हयैरिभाश्चेभैः समसज्जन्त संयुगे ।।८।। उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः।

।। सङ्ग्रहोक्तिः ।।

अथ दशमोऽध्यायः ।।१०।।

देवासुरसंग्रामे विषण्णेषु देवेषु मध्ये हरेराविर्भावः

श्रीशुक उवाच – इत्थं दैत्या दानवाश्च मन्थनकर्मण्यनुकूलयत्नवन्तः सन्तोऽपि वासुदेव-पराङ्गमुखत्वात् तेऽमृतं नाऽविन्दन् ।।१।। हे राजन्! इत्थं भगवान् अमृतं साधयित्वा स्वभक्तान् सुरान् तत् पाययित्वा च सर्वभूतानां पश्यतां सतां गरुडारूढः सन् ययौ ।।२।। ततः शत्रूणां परां फलप्राप्तिं दृष्ट्वा ते दितिपुत्रा अमृष्यमाणाः उद्धृतायुधाः सन्तः देवान् प्रत्युत्पेतुः ।।३।। ततः पीतया सुधयाऽऽहितबला नारायणाश्रयाश्च सर्वे सुरगणास्तैरसुरैः सह शस्त्रैरस्त्रैश्च प्रतिसंयुयुधुः ।।४।। हे राजन्! क्षीराब्धेस्तटे तदानीं देवासुरसङ्ग्रामो नाम परमदारुणस्तुमुलो रोमहर्षणः संग्रामो बभूव ।।५।। तत्र रणेऽन्योन्यं समासाद्य संक्रुद्धमानसा ते शत्रवोऽसिभि-र्बाणैर्विविधायुधैश्च निजघ्नुः ।।६।। तदानीं शंखतूर्यमृदङ्गानां भेरीडमरीणां नदतां हस्त्यश्वरथ-पत्तीनां महान् निःस्वनोऽभवत् ।।७।। तत्र संयुगे रथिनो रथिभिः सह, पत्तयः पत्तिभिः सह, हया हयैः सह, इभा इभैः सह समसज्जन्त ।।८।। तत्र देवासुरेषु मध्ये केचिद् भटा उष्ट्रैः

केचिद् गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ।।९।। गृध्रैः कङ्कैर्बकैरन्ये श्येनभासैस्तिमिङ्गिलैः। शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ।।१०।। शिवाभिराखुभिः केचित् कृकलासैः शशैर्नरैः। बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ।।११।। अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः। सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ।।१२।। चित्रध्वजपटै राजन्नातपत्रैः सितामलैः। महाधनैर्वज्रदण्डैर्व्यजनैर्बार्हचामरैः ।।१३।। वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः। स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ।।१४।। देवदानववीराणां ध्वजिन्यौ पाण्डुनन्दन। रेजतुर्वीरमालाभिर्यादसामिव सागरौ ।।१५।। वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः। यानं वैहायसं नाम कामगं मयनिर्मितम् ।।१६।। सर्वसाङ्ग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो। अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ।।१७।। आस्थितस्तद् विमानाग्र्यसर्वानीकाधिपैर्वृतः। वालव्यजनछत्राग्र्यै रेजे चन्द्र इवोदये ।।१८।।

।। सङ्ग्रहोक्तिः ।।

केचिदिभैर्वाहनैः, केचित् खरैः, अपरे गौरमृगैः, अन्ये ऋक्षैः, केचिद् द्वीपिभिः, केचित् सिंहैर्वाहनैरभिययुः ।।९।। केचिद् गृध्रैर्वाहनैः, केचित् कङ्कैः, अन्ये वटैः, श्येनैः, भासैः, तिमिङ्गलैः, शरभैः, महिषैः, खड्गैः, गोवृषैः गवयारुणैः, वाहनैः ।।१०।। केचित् शिवाभिर्वाहनैः, केचित् आखुभिः, कृकलासैः, शशैः, नरैः, केचिद् बस्तैः, कृष्णसारैः, हंसैः, अन्ये च शूकरैर्वाहनैरभिययुः ।।११।।हे राजन्! अन्ये जलगैः, स्थलगैराकाशचारिभिश्च विक्रतविग्रहैः जन्तुभिर्वाहनरूपैस्ते देवा असुराश्च उभयोः सेनयोरग्रतो विविशुः ।।१२।। हे राजन्! चित्रध्वजपटैः, सितामलैश्छत्रैः, महाधनैर्वज्रदण्डैः, व्यजनैः, बार्हचामरैश्च ।।१३।। वायुनोद्धूतैरुत्तरीयैरुष्णीषैश्च ध्वनद्भिः वर्मभूषणैश्च, सूर्यरश्मिभिः शस्त्रैश्च ।।१४।। हे पाण्डुनन्दन! देवदानववीराणां ध्वजिन्यौ यासां मालाभिः सागराविव वीरमालाभिः रेजतुः ।।१५।। संग्रामेऽसुराणां चमूपतिर्वैरोचनो बलिरासीत्, हे राजन्! सर्वसंग्रामसाधनोपेतं मयनिर्मितं सर्वाश्चर्यमयमप्रतर्क्यमनिर्देश्यं क्वचिद् दृश्यमानं क्वचिददृश्यमानं कामगं वैहायसं विमानाग्र्यं बलेर्विमानमासीत्, सर्वसेनाधिपतिभिर्वृतश्छत्रचामरव्यजनाद्यैः शोभमानः सन् बलिरुदयाचले स्थितश्चन्द्र इव विरेजे ।।१६-१८।।

तस्यासन्सर्वतो यानैर्यूथानां पतयोऽसुराः। नमुचिः शम्बरो बाणो विप्रचित्ति-
रयोमुखः।।१९।। द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः। शकुनिर्भूतसंतापो
वज्रदंष्ट्रो विरोचनः।।२०।। हयग्रीवः शङ्कुशिराः कपिलो मेघदुन्दुभिः। तारकश्चक्र-
दृक् शुम्भो निशुम्भो जम्भ उत्कलः।।२१।। अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः।
अन्ये पौलोमकालेया निवातकवचादयः।।२२।। अलब्धभागाः सोमस्य केवलं
क्लेशभागिनः। सर्व एते रणमुखे बहुशो निर्जितामराः।।२३।। सिंहनादान्विमुञ्चन्तः
शङ्खान्दध्मुर्महारवान्। दृष्ट्वा सपत्नानुत्सिक्तान्बलभित् कुपितो भृशम्।।२४।।
ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट्। यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः।।२५।।
तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः। लोकपालाः सह गणैर्वाय्वग्निवरुणादयः
।।२६।। तेऽन्योन्यमभिसंसृत्य क्षिपन्तो मर्मभिर्मिथः। आह्वयन्तो विशन्तोऽग्रे
युयुधुर्द्वन्द्वयोधिनः।।२७।। युयोध बलिरिन्द्रेण तारकेण गुहोऽस्यत।

।। सङ्ग्रहोक्तिः।।

तस्य बलेः समन्तात् असुरयूथानां पतयः स्वस्ववाहनैः सहाऽऽसन्, ते च – नमुचिः, शम्बरः,
बाणः, विप्रचित्तिः, अयोमुखश्च।।१९।। अथ द्विमूर्द्धा, कालनाभः, प्रहेतिः, हेतिः, इल्वलः,
शकुनिः, भूरिसन्तापः, वज्रदंष्ट्रः, विरोचनश्च।।२०।।हयग्रीवः शङ्कुशिराः, कपिलः, मेघदुन्दुभिः
तारकः, चक्रदृक्, शुम्भः, निशुम्भः, जृम्भः, उत्कलश्च।।२१।।अरिष्टः, अरिष्टनेमिः, त्रिपुराधिपो
मयश्च, अन्ये पौलोमाः, कालेयाः, निवातकवचादयश्च।।२२।। पूर्वं बहुरणेषु देवानां विजेतारः,
अमृतस्य भागमप्राप्ताः केवलं क्लेशभागिन एते सर्वे जाताः।।२३।। अतः परं सिंहनादं
विमुञ्चन्तो नमुच्यादयो महारवान् शंखान् दध्मुः, तदानीमत्युद्धतान् शत्रून् दृष्ट्वा इन्द्रो भृशं
कुपित आसीत्।।२४।।स्वराडिन्द्र ऐरावतं दिग्गजमारूढः सन् स्रवन्निर्झरमुदयाचलमारूढोऽर्क
इव शुशुभे।।२५।। तस्येन्द्रस्य परितो नानावाहनध्वजायुधा देवाः स्वगणैः सह वर्त्तमाना
वाय्वग्निवरुणादयो लोकपालाश्चासन्।।२६।। ते सुरा दैत्याश्च परस्परं समीपमागत्य
मिथस्तिरस्कुर्वन्तः, नामभिराह्वयन्तोऽग्रे प्रविशन्तो द्वन्द्वयोधिनः सन्तो युयुधुः।।२७।।हे राजन्!
बलिरिन्द्रेण सह युयोध, कार्त्तिकेयस्तारकेणसहाऽयुध्यत, वरुणो हेतिना सह, मित्रो देवः

वरुणो हेतिनायुध्यन्मित्रो राजन् प्रहेतिना ।।२८।। यमस्तु कालनाभेन विश्वकर्मा मयेन वै। शम्बरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ।।२९।। अपराजितेन नमुचिरश्विनौ वृषपर्वणा। सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ।।३०।। राहुणा च तथा सोमः पुलोम्नां युयुधेऽनिलः। निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ।।३१।। वृषाकपिस्तु जम्भेन महिषेण विभावसुः। इल्वलः सह वातापिर्ब्रह्मपुत्रैररिन्दम ।।३२।। कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह। बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ।।३३।। मरुतो निवातकवचैः कालेयैर्वसवोऽमराः। विश्वे देवास्तु पौलोमै रुद्राः क्रोधवशैः सह ।।३४।। त एवमाजावसुराः सुरेन्द्रा द्वन्द्वेन संहत्य च युध्यमानाः। अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ।।३५।। भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि। निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिन्दिपालैश्च शिरांसि चिच्छिदुः ।।३६।। गजास्तुरङ्गाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः।

।। सङ्ग्रहोक्तिः ।।

प्रहेतिना सहाऽयुध्यत् ।।२८।। यमः कालनेमिना सह, विश्वकर्मा मयेन सह, त्वष्ट्रा शम्बरेण सह, विरोचनः सवित्रा सह, युयुधे ।।२९।। नमुचिरपराजितेन सह, अश्विनौ वृषपर्वणा सह, सूर्य एको बाणमुख्यैः शतसंख्यकैर्बलिसुतैः सह युयुधे ।।३०।। सोमो देवो राहुणा सह, अनिलः पुलोम्ना सह, तरस्विनी देवी भद्रकाली निशुम्भशुम्भाभ्यां सह युयुधे ।।३१।। हे अरिंदम! वृषाकपिर्जृम्भेण सह, विभावसुर्महिषासुरेण सह, वातापिनाऽसुरेण युत इल्वल मरीच्यादिभिर्देवैः सहाऽयुध्यत ।।३२।। कामदेवेन सह दुर्मषोऽसुरः, उत्कलोऽसुरो ब्राह्मीत्यादिभिः सप्तमातृकाभिः सह, बृहस्पतिः शुक्रेण सह, शनैश्चरो नरकासुरेण सहाऽयुध्यत ।।३३।। मरुतो देवा निवातकवचैः सह, वसवः कालेयैः सह, विश्वेदेवाः पौलोमैः सह, रुद्राः क्रोधवशैः सह युयुधुः ।।३४।। एवं संग्रामे द्वन्द्वेन संहत्य युद्ध्यमानास्ते सुराऽसुराश्च परस्परमासाद्य विजिगिषवः सन्तः तीक्ष्णशरासितोमरैरोजसा निजघ्नुः ।।३५ ।। भुशुण्डिभिः, चक्र-गदा-ऋष्टि,पट्टिशैः, शक्ति-उल्मुकैः, प्रास-परश्वधैः, निस्त्रिंश-भल्लैः समुद्गरैः, परिघैः, सभिन्द्रिपालैरन्यैरायुधैश्च शिरांसि चिच्छिदुः ।।३६ ।।

निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ।।३७।। तेषां पदाघात-रथाङ्गचूर्णितादायोधनादुल्बण उत्थितस्तदा। रेणुर्दिशः खं द्युमणिं च छादयन् न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ।।३८।। शिरोभिरुद्धूतकिरीटकुण्डलैः संरम्भदृग्भिः परिदष्टदच्छदैः। महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ।।३९।। कबन्धास्तत्र चोत्पेतुः पतितस्वशिरोऽक्षिभिः। उद्यतायुधदोर्दण्डैराधावन्तो भटान् मृधे ।।४०।। बलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः। चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ।।४१।। स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः। चिच्छेद निशितैर्भल्लैरसम्प्राप्तान् हसन्निव ।।४२।। तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे। तां ज्वलन्तीं महोल्काभां हस्तस्थामच्छिनद्धरिः ।।४३।। ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः। यद्यदायुधमादद्यात्सर्वं तदच्छिनद् विभुः ।।४४।। ससर्जाथासुरीं मायामन्तर्धानगतोऽसुरः।

।। सङ्ग्रहोक्तिः ।।

गजाः, सरथाः हयाः,आरोहैः सहिता अश्वाः, विविधाः पदातयः. क्षताङ्गा आसन्, छिन्न-बाहु-ऊरु-शिरोधरा-ऽङ्घ्रयः, छिन्नध्वज-इषुधि-वर्म-भूषणाश्चाऽऽसन् ।।३७।। तेषां देवदैत्यानां पदाघातैः रथाङ्गैश्च चूर्णितो रणभूमेरुत्थितो रेणुराकाशं दिशो द्युमणिं चाऽऽच्छादयन् रुधिरप्रस्रवणैः परिप्लुतः सन्न्यवर्तत ।।३८।। तेषां किरीटकुण्डलान्वितैः, क्रोधावेषितदृग्भिः, परिदष्टोष्ठैः शिरोभिः, साभरणैः सायुधैर्महाभुजैश्च करभोरुभिश्च प्रास्तृता युद्धभूमिर्बभौ ।।३९।। पतितस्वशिरोक्षिभिः पश्यन्तः कबन्धा उद्यतायुधैर्दोर्दण्डैः सह तत्र युद्धे भटान् प्रत्याधावन्तः सन्तः उत्पेतुः ।।४०।। बलिर्दशभिः शरैर्महेन्द्रं, त्रिभिःशरैरैरावतं, चतुर्भिः शरैश्चतुरो वाहान्, एकेन शरेण महामात्रं चार्दयत् ।।४१।। शीघ्रविक्रमः स शक्रोऽसम्प्राप्तानेव बलीरितशरान् तावद्भिरेव निशितैः शरैर्हसन्निव चिच्छेद ।।४२।। तस्येन्द्रस्य प्रशस्तं तत्कर्म वीक्ष्य दुर्मर्षो बलिः प्रयोजयितुं शक्तिमाददे, इन्द्रो महोल्काभां ज्वलन्तीं बलेर्हस्तस्थामेव शक्तिमच्छिनत् ।।४३।। ततो बलिः शूलं, ततः प्रासं ततस्तोमरं, तत ऋष्टीः, एवं यद् यद् आयुधमादधात् तत्सर्वमायुधजातं विभुरिन्द्रो व्यच्छिनत् ।।४४।। हे प्रभो! अथ बलिरन्तर्धानं गतः सन्नेवाऽऽसुरीं

ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ।।४५।। ततो निपेतुस्तरवो दह्यमाना दवाग्निना। शिलाः सटङ्कशिखराश्चूर्णयन्त्यो द्विषद्बलम् ।।४६।। महोरगाः समुत्पेतुर्दन्दशूकाः सवृश्चिकाः। सिंहव्याघ्रवराहाश्च मर्दयन्तो महागजान् ।।४७।। यातुधान्यश्च शतशः शूलहस्ता विवाससः। छिन्धि भिन्धीति वादिन्यस्तथा रक्षोगणाः प्रभो ।।४८।। ततो महाघना व्योम्नि गम्भीरपरुषस्वनाः। अङ्गारान्मुमुचुर्वातैराहताः स्तनयित्नवः ।।४९।। सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः। सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ।।५०।। ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत। प्रचण्डवातैरुद्धूततरङ्गावर्तभीषणः ।।५१।। एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः। सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ।।५२।। न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप। ध्यातः प्रादुरभूत् तत्र भगवान्विश्वभावनः ।।५३।। ततः सुपर्णांसकृताङ्घ्रिपल्लवः पिशङ्गवासा नवकञ्जलोचनः। अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुण्डलः ।।५४।।

।। सङ्ग्रहोक्तिः ।।

मायां ससर्ज, ततः सुरसैन्योपरि शैलः प्रादुरभूत् ।।४५।। तस्माच्छैलाद् दवाग्निना दह्यमानास्तरवो निपेतुः, सटङ्कशिखराः शिलाः शत्रुबलं चूर्णयन्त्यः सत्यो निपेतुः ।।४६।। सवृश्चिका दन्दशूका महाभुजंगाः समुत्पेतुः, सिंहाः, व्याघ्राः, वराहाः महागजाश्च बलं मर्दयन्तः समुत्पेतुः ।।४७।। हे प्रभो! शूलहस्ता, विवाससः, छिन्धि भिन्धीति वादिन्यः, शतशो यातुधान्यः तथा रक्षोगणाश्च समुत्पेतुः ।।४८।। ततो व्योम्नि गम्भीरपरुषस्वना महाघना वातैराहताः स्तनयित्नवः सन्तोऽङ्गारान् मुमुचुः ।।४९।। बलिना सृष्टः सुमहान् वायुसहायो वह्निः प्रलयानल इवाऽत्युग्रः सन् विबुधचमूमदहत् ।।५०।। ततः प्रचण्डवातैरुद्धूततरङ्गैरावर्तैश्च भीषण उद्वेलश्च समुद्रः सर्वतो देवैरदृश्यत ।।५१।। एवं बलिनाऽन्यैश्च महामायैरलक्ष्यगतिभिषणैर्दैत्यैर्मायासु सृज्यमानासु सतीषु सुरसैनिका विषेदुः ।।५२।। हे नृप! यदा इन्द्रादयो मायाप्रतिक्रियां न विदुः, तदा तैर्ध्यातो विश्वभावनो भगवानजितः प्रादुरभूत् ।।५३।। ततः सुपर्णस्कन्धार्पितपादपल्लवः पिशङ्गवासा नवकञ्जलोचनः, अष्टायुधबाहुः उल्लसच्छ्रीकौस्तुभोऽनर्घ्य-

तस्मिन् प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः। स्वप्नो यथा हि प्रतिबोध आगते *हरिस्मृतिः सर्वविपद्विमोक्षणम्॥५५॥* दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः। तल्लीलया गरुडमूर्द्ध्नि पतद् गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः॥५६॥ माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेणकृत्तशिरसावथ माल्यवांस्तम्। आहत्य तिग्मगदयाहनदण्डजेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽऽद्यः॥५७॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे दशमोऽध्यायः॥१०॥

अथ एकादशोऽध्यायः॥११॥

श्रीशुक उवाच – अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकम्पया। जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान् रणे यैरभिसंहताः पुरा॥१॥

॥ सङ्ग्रहोक्तिः॥

किरीटकुण्डलो भगवानदृश्यत॥५४॥ भगवत्याविर्भूते सत्यसुराणां कूटकर्मजा माया भगवतो महिम्ना विनेशुः, यथा प्रबोध आगते सति स्वप्नो नश्यति तद्वत्, यतो हरिस्मृतिः सर्वविपदामपहर्त्री भवति॥५५॥ संग्रामे गरुडवाहनं भगवन्तं दृष्ट्वा सिंहवाहनः कालनेमिरसुरः शूलं भ्रामयित्वा चिक्षेप, त्रिलोकेशो भगवान् गरुडमूर्द्धिन पतत् तच्छूलं लीलयैव गृहीत्वा, तेनैव शूलेन सवाहं कालनेमिमहनत्॥५६॥ ततोऽतिबलिनौ माली, सुमाली चाऽसुरौ भगवतश्चक्रेण कृत्तशिरसौ सन्तौ युधि पेततुः, अथ माल्यवान् भगवन्तं प्राप्य भगवदधिष्ठितं गरुडं तीक्ष्णगदया यावदहनत् तावत् आद्यः श्रीहरिश्चक्रेण नदतः शत्रोर्माल्यवतः शिरोऽच्छिनत्॥५७॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां दशमोऽध्यायः॥१०॥

अथैकादशोऽध्यायः॥११॥

नारदेन देवानां युद्धनिवारणं शक्रेण मृतानां दैत्यानां जीवनं च

श्रीशुक उवाच– अथ परमपुरुषस्य भगवतः परया दयया परिलब्धचेतसः शक्रसमीरणादयो

वैरोचनाय संरब्धो भगवान्पाकशासनः। उदयच्छद् यदा वज्रं प्रजा हा हेति चुक्रुशुः ।।२।। वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरःस्थितम्। मनस्विनं सुसम्पन्नं विचरन्तं महामृधे।।३।। *इन्द्र उवाच* - नटवन्मूढ मायाभिर्मायेशान् नो जिगीषसि। जित्वा बालान् निबद्धाक्षान् नटो हरति तद्धनम्।।४।। आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम्। तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः।।५।। सोऽहं दुर्मायिनस्तेद्य वज्रेण शतपर्वणा। शिरो हरिष्ये मन्दात्मन्घटस्व ज्ञातिभिः सह।।६।। *बलिरुवाच* - सङ्ग्रामे वर्तमानानां कालचोदितकर्मणाम्। कीर्त्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात्।।७।। तमिमं कालरशनं जनाः पश्यन्ति सूरयः। न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः।।८।। न वयं मन्यमानानामात्मानं तत्र साधनम्। गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः।।९।। *श्रीशुक उवाच* - इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः। आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः।।१०।।

।। सङ्ग्रहोक्तिः ।।

देवा युद्धे पूर्वं यैर्बलिप्रभृतिभिर्द्वन्द्वशः योद्धुं संगतास्तांस्तान् भृशं जघ्नुः।।१।। संप्राप्तैश्वर्यः पाकशासन इन्द्रः क्रुद्धः सन् बलिं हन्तुं यदा वज्रमुद्धृतवान् तदा प्रजा हाहाकारं कुर्वन्त्यः सत्यः चुक्रुशुः।।२।। वज्रपाणिरिन्द्रो महामृधे विचरन्तं सुसम्पन्नं मनस्विनं पुरःस्थितं तं बलिं तिरस्कृत्येदमाह।।३।। *इन्द्र उवाच* - हे मूढ! मायेशान् नो नटवन् मायाभिर्जिगीषसि? निबद्धाक्षान् बालान् जित्वा नटो यथा तेषां धनं हरति तद्वत्।।४।। हे मूढ! पूर्वलब्धाद् अधस्तनात् पदात् ये उत्तरोत्तरलोकमारोढुमिच्छन्ति, येऽसुरा मायाभिः स्वर्गमुत्सिसृप्सन्ति, तान् दस्यूप्रायान् अज्ञान् अधुनैव हन्मि।।५।। सोऽहं दुर्मायिनस्ते शिरः शतपर्वणा वज्रेणाऽद्य हरिष्ये, अतः हे मन्दात्मन्! ज्ञातिभिः सह यथाबलं विक्रमस्व।।६।। *बलिरुवाच* - हे शक्र! कालप्रवर्तितकर्मणां संग्रामे वर्तमानानां सर्वेषां कीर्तिः, जयः, पराजयः, मृत्युश्चेत्येते सर्वे क्रमशो भवेयुः।।७।। तं कीर्त्यादिमन्तं जनं बुधाः कालयन्त्रितं पश्यन्ति, अतस्ते बुधाः कीर्त्यादिषु न हृष्यन्ति न च शोचन्ति, तत्रैवंविधे विवेके यूयमपण्डिताः स्थ।।८।। तत्र कीर्त्यादौ देहं साधकं मन्यमानानां साधुशोच्यानां युष्माकं मर्मताडना गिरः साधु न मन्यामहे।।९।।

एवं निराकृतो देवो वैरिणा तथ्यवादिना। नामृष्यत् तदधिक्षेपं तोत्राहत इव द्विपः
।।११।। प्राहरत् कुलिशं तस्मा अमोघं परमर्दनः। सयानो न्यपतद् भूमौ छिन्नपक्ष
इवाचलः।।१२।। सखायं पतितं दृष्ट्वा जम्भो बलिसखः सुहृत् अभ्ययात् सौहृदं
सख्युर्हतस्यापि समाचरन्।।१३।। स सिंहवाह आसाद्य गदामुद्यम्य रंहसा।
जत्रावताडयच्छक्रं गजं च सुमहाबलः।।१४।। गदाप्रहारव्यथितो भृशं विह्वलितो
गजः। जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ।।१५।। ततो रथो मातलिना
हरिभिर्दशशतैर्वृतः। आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः।।१६।। तस्य तत्
पूजयन् कर्म यन्तुर्दानवसत्तमः। शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे।।१७।।
सेहे रुजं सुदुर्मर्षा सत्त्वमालम्ब्य मातलिः। इन्द्रो जम्भस्य संक्रुद्धो वज्रेणापाहरच्छिरः
।।१८।। जम्भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः। नमुचिश्च बलः पाकस्तत्रापेतु-
स्त्वरान्विताः।।१९।।

।। सङ्ग्रहोक्तिः ।।

श्रीशुक उवाच – इत्थमिन्द्रमाक्षिप्य वीरो वैरोचनिर्बलिराक्षेपवचनैराहतं तं पुनराकर्ण-
माकृष्टैर्नाराचैरहनत्।।१०।। तथ्यवादिना बलिनैवं निराकृत इन्द्रस्तदधिक्षेपमङ्कुशाहतो
द्विप इव नाऽमृषत।।११।। परमर्दन इन्द्रस्तं बलिं हन्तुममोघं कुलिशं प्राहरत्, तदा छिन्नपक्षः
पर्वत इव बलिः सविमानो भूमौ न्यपतत्।।१२।। बलिसखः सुहृज्जम्भः सखायं बलिं पतितं
दृष्ट्वा हतस्य बलेः सुहृद्भावं समाचरन्निन्द्रसम्मुखमाययौ।।१३।। सिंहवाहनः सुमहाबलो
जम्भः समीपमासाद्य जवेन गदामुद्यम्य शक्रमैरावतं च जत्रावताडयत्।।१४।। भृशं गदाप्रहार-
व्यथितः विह्वलितो गज ऐरावतो जानुभ्यां धरणीं स्पृष्ट्वा परमं दुःखं ययौ।।१५।। ततो
मातलिना दशशतैर्हरिदश्वैर्युक्तो रथ आनीतः, इन्द्र ऐरावतमुत्सृज्य रथमारुरुहे।।१६।। दानवो-
त्तमो जम्भः सारथेर्मातलेस्तत्कर्म प्रशंसन् ज्वलता शूलेन तं मातलिं मृधे स्मयमानः सन्नहनत्
।।१७।। मातलिर्धैर्यमालम्ब्य दुःसहामपि व्यथां सेहे, ततः संक्रुद्ध इन्द्रो वज्रेण जम्भस्य
शिरश्चिच्छेद।।१८।। जम्भस्य ज्ञातयः नमुचिः, बलः, पाकश्चैते त्रयो नारदाद् ऋषेः सकाशात्
जम्भं हतं श्रुत्वा त्वरान्विताः सन्तस्तत्रोपेयुः।।१९।। ते त्रयोऽपि परुषैर्वचोभिरिन्द्रं मर्मसु

वचोभिः परुषैरिन्द्रमर्दयन्तोऽस्य मर्मसु। शरैरवाकिरन् मेघा धाराभिरिव पर्वतम् ।।२०।। हरिं दशशतान्याजौ हर्यश्वस्य बलः शरैः। तावद्भिरर्दयामास युगपल्लघु-हस्तवान् ।।२१।। शताभ्यां मातलिं पाको रथं सावयवं पृथक्। सकृत्सन्धानमोक्षेण तदद्भुतमभूद् रणे ।।२२।। नमुचिः पञ्चदशभिः स्वर्णपुङ्खैर्महेषुभिः। आहत्य व्यनदत्संख्ये सतोय इव तोयदः ।।२३।। सर्वतः शरकूटेन शक्रं सरथसारथिम्। छादयामासुरसुराः प्रावृट् सूर्यमिवाम्बुदाः ।।२४।। अलक्षयन्तस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः। अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथार्णवे ।।२५।। ततस्तुराषाडिषुबद्धपञ्जराद् विनिर्गतः साश्वरथध्वजाग्रणीः। बभौ दिशः खं पृथिवीं विरोचयन् स्वतेजसा सूर्य इव क्षपात्यये ।।२६।। निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे। उदयच्छद् रिपुं हन्तुं वज्रं वज्रधरो रुषा ।।२७।। स तेनैवाष्टधारेण शिरसी बलपाकयोः। ज्ञातीनां पश्यतां राजञ्जहार जनयन्भयम् ।।२८।। नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः।

।। सङ्ग्रहोक्तिः ।।

ताडयन्तः सन्त इन्द्रस्य मर्मसु मेघा धाराभिः पर्वतमिव शरैरवाकिरन् ।।२०।। हस्तलाघवयुक्तो बल आजाविन्द्रस्याऽश्वान् दशशतानि इन्द्रं चैकाधिकदशशतैर्बाणैर्युगपद् अर्दयामास ।।२१।। पाकनामासुरः, शराणां शताभ्यां मातलिं सावयवं रथं च पृथक् पृथक् युगपदेव शरसंधानमोक्षेण रण अर्दयामास, तत्कर्माऽऽश्चर्यावहमभूत् ।।२२।। नमुचिस्तु स्वर्णपुंखैः पञ्चदशभिः शरैः संख्य इन्द्रमाहत्य सतोयस्तोयद इव व्यनदत् ।।२३।। ततः सर्वेऽप्यसुराः वर्षाकालीनं सूर्यं मेघा इव रथसारथिसहितं शक्रं सर्वतः शरवर्षेण छादयामासुः ।।२४।। तदा शत्रुबलेन निर्जितास्तमिन्द्रमपश्यन्तः सहानुगा देवगणा अतीव विह्वलाः अनायकाः सन्तोऽर्णवे भिन्ननावो वणिज इव विचुक्रुशुः ।।२५।। तत इन्द्र इषुबद्धपञ्जरात् साश्वरथध्वजाग्रणीर्विनिर्गतः सन् निशावसाने सूर्य इव स्वतेजसा दिशः खं पृथिवीं च विरोचयन् सन् बभौ ।।२६।। हे राजन्! वज्रधरो देव इन्द्रो रणे शत्रुभिरभ्यर्दितां स्वसेनां निरीक्ष्य क्रोधेन व्याप्तः सन् रिपुं हन्तुं वज्रमुदयच्छत् ।।२७।। राजन्! इन्द्रः पश्यतां ज्ञातीनां भयं जनयन्नष्टधारेण वज्रेणैव बलपाकयोः

जिघांसुरिन्द्रं नृपते चकार परमोद्यमम्।।२९।। अश्मसारमयं शूलं घण्टावद्धेम-भूषणम्।प्रगृह्याभ्यद्रवत् क्रुद्धो हतोऽसीति वितर्जयन्।प्राहिणोद् देवराजाय निनदन् मृगराडिव।।३०।। तदापतद् गगनतले महोल्कवद्विचिच्छिदे हरिरिषुभिः सहस्रधा। तमाहनन्नृप कुलिशेन कन्धरे रुषान्वितस्त्रिदशपतिः शिरो हरन्।।३१।। न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः। तदद्भुतं परमतिवीर्य-वृत्रभित् तिरस्कृतो नमुचिशिरोधरत्वचा।।३२।। तस्मादिन्द्रोऽबिभेच्छत्रोर्वज्रः प्रति-हतो यतः। किमिदं दैवयोगेन भूतं लोकविमोहनम्।।३३।। येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये। कृतो निविशतां भारैः पतत्त्रैः पततां भुवि।।३४।। तपः सारमयं त्वाष्ट्रं वृत्रो येन विपाटितः। अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः।।३५।। सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके। नाहं तदाददे दण्डं ब्रह्मतेजोऽप्य-कारणम्।।३६।। इति शक्रं विषीदन्तमाह वागशरीरिणी।

।। सङ्ग्रहोक्तिः ।।

शिरसी जहार।।२८।। हे नृपते! ततो नमुचिर्बलपाकयोर्वधं दृष्ट्वा शोकामर्षरुषाऽन्वितः सन्निन्द्रं हन्तुं परमोद्यमं चकार।।२९।। लोहमयं घण्टाभिर्युतं हेमभूषणं शूलं प्रगृह्य क्रुद्धः सन्निन्द्राभिमुखं ययौ, "हतोऽसि" इति तिरस्कुर्वन् सिंह इव विनदन् सन् देवराजं हन्तुं शूलं प्राहिणोत्।।३०।। गगनतले महोल्कावद् आपतन् महाजवं तच्छूलमिन्द्रः शरैः सहस्रधा विचिच्छिदे, हे नृप! ततो रुषान्वितस्त्रिदशपतिरिन्द्रस्तच्छिरो हर्तुं वज्रेण नमुचिं कन्धर आहनत्।।३१।। सुरपतिना बलेन प्रयुक्तो बलवान् वज्रो नमुचेस्त्वचमपि न बिभेद, अतिवीर्य-वृत्रभित् वज्रो नमुचिशिरोधरत्वचा तिरस्कृतः, तदेतत् परमाश्चर्यमभूत्।।३२।। यस्मात् वज्रः प्रतिहतस्तस्माच्छत्रोर्नमुचेरिन्द्रोऽतिभीतोऽभवत्, अस्मद्वज्रप्रतिहतिर्या जाता सा किं दैवयोगेन किं वा लोकविमोहनार्थम्?।।३३।। येन वज्रेण मया भारभूतैः पक्षैः भुवि पततां प्रजाविनाशे कारणभूतानां पर्वतानां पक्षच्छेदः पूर्वकृतः।।३४।। त्वष्टुस्तपःसारमयो वीर्याधिको वृत्रो येन वज्रेण मया विपाटितः, अतिबलाः सर्वास्त्रैरक्षतत्वचोऽन्येऽपि जम्भपाकबलादयो येन वज्रेण विपाटिताः।।३५।। सोऽयं वज्रो मया तुच्छेऽसुरे नमुचौ प्रयुक्तः सन् प्रतिहतो बभूव, अधुना दधीचः सामर्थ्यमपि निष्कारणं जातम्, अतो लगुडतुल्यं वज्रमहं नाददे।।३६।।

नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः।।३७।। मयास्मै यद् वरो दत्तो मृत्युर्वै नार्द्रशुष्कयोः। अतोऽन्यश्चिन्तनीयस्ते उपायो मघवन् रिपोः।।३८।। तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः। ध्यायन् फेनमथापश्यदुपायमुभयात्मकम्।।३९।। न शुष्केण न चार्द्रेण जहार नमुचेः शिरः। तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुम् ।।४०।। गन्धर्वमुख्यौ जगतुर्विश्वावसुपरावसू। देवदुन्दुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ।।४१।। अन्येऽप्येवं प्रतिद्वन्द्वान्वाय्वग्निरूणादयः। सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा।।४२।। ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप। वारयामास विबुधान्दृष्ट्वा दानवसंक्षयम्।।४३।। *नारद उवाच* – भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः। श्रिया समेधिताः सर्व उपारमत विग्रहात्।।४४।। *श्रीशुक उवाच* – संयम्य मन्युसंरम्भं मानयन्तो मुनेर्वचः। उपगीयमानानुचरैर्ययुः सर्वे त्रिविष्टपम्।।४५।। येऽवशिष्टा रणे तस्मिन् नारदानुमतेन ते। बलिं विपन्नमादाय अस्तं गिरिमुपागमन्।।४६।।

।। सङ्ग्रहोक्तिः ।।

इत्थं विषीदन्तं शक्रमशरीरिणी वागाह – हे इन्द्र! अयं दानवः शुष्कैर्वाऽऽर्द्रैर्वधं नार्हति ।।३७।। यतो मया नमुचये तव आर्द्रेण वा शुष्केण मृत्युर्न वै इति वर दत्तः, अतो हे मघवन्! रिपोर्वधार्थं त्वयाऽन्य उपायश्चिन्तनीयः।।३८।। तां दैवीं गिरमाकर्ण्य मघवा सुसमाहितो भूत्वा ध्यायन् सन् अथ कात्स्न्र्येन फेनमुभयात्मकमुपायमपश्यत्।।३९।। न शुष्केण, न चाऽऽर्द्रेण, किंतूभयात्मकेन फेनेनैवेन्द्रो नमुचेः शिरो जहार, ततो मुनिगणास्तमिन्द्रं तुष्टुवुर्माल्यैरवाकिरंश्च ।।४०।। गन्धर्वमुख्यौ विश्वावसुपरावसू जगतुः, देवदुन्दुभयोनेदुः, नर्तक्यश्च मुदा ननृतुः।।४१।। एवमन्येऽपि वाय्वग्निवरुणादयः प्रतिद्वन्द्वान् शत्रून् अस्त्रौघैः सिंहाः मृगानिव सूदयामासुः।।४२।। हे नृप! देवैर्दानवेषु हन्यमानेषु सत्सु दानवक्षयं दृष्ट्वा देवान् प्रति ब्रह्मणा प्रेषितो देवर्षिर्नारदो विबुधान् वारयामास।।४३।। *नारद उवाच* – हे देवाः! नारायणभुजाश्रयैर्भवद्भिरमृतं प्राप्तं, तथा सर्वे श्रिया समेधिताः स्थ, अतोऽधुना विग्रहादुपरमत।।४४।। श्रीशुक उवाच – मुनेर्नारदस्य वचो मानयन्तः सर्व इन्द्रादयो देवा कोपावेशं संयम्याऽनुचरैरुद्गीयमानाः सन्तस्त्रिविष्टपं ययुः।।४५।। ततस्तस्मिन् रणे ये दानवा हतावशिष्टास्ते सर्वे नारदानुमतेन विपन्नं भूमौ शयानं बलिमादायाऽस्ताचलमुपागमन्।।४६।।

तत्राविनष्टावयवान् विद्यमानशिरोधरान्। उशना जीवयामास संजीविन्या स्वविद्यया।।४७।। बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः। पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः।।४८।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे एकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः।।१२।।

श्रीबादरायणिरुवाच – वृषध्वजो निशम्येदं योषिद्रूपेण दानवान्। मोहयित्वा सुरगणान् हरिः सोममपाययत्।।१।। वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः। सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः।।२।। सभाजितो भगवता सादरं सोमया भवः। सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिम्।।३।। *श्रीमहादेव उवाच* – देवदेव जगद्व्यापि-ञ्जगदीश जगन्मय। सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः।।४।।

।। सङ्ग्रहोक्तिः ।।

तत्राऽस्ताद्रौ भार्गवः शुक्रोऽविनष्टावयवान् विद्यमानशिरोधरान् सर्वानसुरान् संजीविन्या स्वविद्यया जीवयामास।।४७।।बलिस्तूशनसा स्पृष्टः सन् प्रत्यापन्नेन्द्रियस्मृतिः पराजितोऽपि लोकतत्त्वविचक्षणो स नाऽखिद्यत्।।४८।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यामेकादशोऽध्यायः।।११।।

अथ द्वादशोऽध्यायः ।।१२।।

भगवतो मोहिनीरूपमवलोक्य महादेवस्य मोहः

श्रीशुक उवाच – हरिर्योषिद्रूपेण दानवान् मोहयित्वा सुरगणानमृतमपाययत्, तदिदं श्रुत्वा वृषभध्वजो रुद्रो वृषमारुह्य सर्वभूतगणैर्वृतो देव्या सह च यत्र मधुसूदन आस्ते तत्र तद्योषिद्रूपं द्रष्टुमाययौ।।१-२ ।। उमया सहं भगवता सभाजितो भवः सूपविष्टः सन् हरिं प्रतिपूज्य स्मयन्निदं वक्ष्यमाणमुवाच।।३ ।। *श्रीमहादेव उवाच* – हे देवदेव! हे जगद्व्यापिन्! हे जगन्मय! सर्वेषामपि भावानामन्तःप्रविश्य धारकस्त्वं कारणभूत ईश्वरश्चासि।।४ ।।

आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः। यतोऽव्ययस्य नैतानि तत् सत्यं ब्रह्म चिद् भवान् ।।५।। तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः। विसृज्योभयतः सङ्गं मुनयः समुपासते ।।६।। त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानन्दमात्रमविकारमनन्यदन्यत्। विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयानपेक्षः।।७।। एकस्त्वमेव सदसद् द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः। अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद् गुणव्यतिकरो निरुपाधिकस्य ।।८।। त्वां ब्रह्म केचिदवयन्त्युत धर्ममेके एके परं सदसतोः पुरुषं परेशम्। अन्येऽवयन्ति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतन्त्रम् ।।९।। नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः। यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः ।।१०।।

।। सङ्ग्रहोक्तिः ।।

अस्य जगत आद्यन्तौ मध्यं च यतो भगवतो भवन्ति, एतानि आद्यन्तमध्यानि यस्य न भवन्ति, यदिदं दृश्यं , अन्यद् भोक्तृबहिर्भोग्यं च यत् सत्यं चिच्च ब्रह्म सर्वशरीरित्वाद् धारकत्वाच्च त्वमेवाऽसि ।।५।। अतस्तवैव चरणाम्भोजं श्रेयस्कामा अनन्यप्रयोजना मुनय इहामुत्र च सङ्गं त्यक्त्वा समुपासते ।।६।। त्वं पूर्णममृतं प्राकृतगुणरहितं विशोकम् आनन्दमात्रमविकारमनन्यत् स्वरूपेण गुणैश्च बृहत्वाद् ब्रह्म, परमात्मतत्वं त्वमेवाऽसि, विश्वस्योदयस्थितिसंयमानां हेतुः, आत्मा ईश्वरश्चाऽसि ।।७।। चिदचिदुभयात्मकं जगत् भवान् एवैकः, नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरत्वं कारणत्वं, नामरूपविभागार्हस्थूलचिदचिच्छरीरत्वं कार्यत्वं, इति कार्यकारणयोः शरीरित्वेनाऽभेदात् त्वमेक एवासि कृताकृतत्वभेदेन कार्यावस्थकारणावस्थसुवर्णयोरेकत्वं तद्वत् त्वयि द्वयमद्वयमस्ति न हि वस्तुभेदः, कार्यकारणरूपे त्वयि जनैर्विकल्पस्त्वविज्ञानतः कृतः, गुणपरिणामात्मकं जगत् त्वच्छरीरत्वात् त्वदविनाभूतं वर्त्तते ।।८।। केचित्त्वां ब्रह्म मन्यन्ते, एके धर्मं मन्यन्ते, एके प्रकृतिपुरुषयोः परं विलक्षणं परेशं वदन्ति, केचित् त्वां नवशक्तियुतं कथयन्ति, केचित् आत्मतन्त्रं महापुरुषं मन्यन्ते ।।९।। त्वया सृष्टमेतद् विश्वं ब्रह्मा, अहं रुद्रः, मरीचिमुख्याः सत्त्वप्रधाना वयं न जानीमस्तदा कार्त्स्न्येन

स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबन्धमोक्षौ। वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयावगमोऽवरुन्त्से॥११॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः। सोऽहं तद् द्रष्टुमिच्छामि यत् ते योषिद्वपुर्धृतम् ॥१२॥ येन सम्मोहिता दैत्याः पायिताश्चामृतं सुराः। तद् दिदृक्षव आयाताः परं कौतुहलं हि नः॥१३॥ *श्रीशुक उवाच* - एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना। प्रहस्य भावगम्भीरं गिरिशं प्रत्यभाषत॥१४॥ *श्रीभगवानुवाच* - कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः। पश्यता सुरकार्याणि गते पीयुषभाजने॥१५॥ तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम। कामिनां बहु मन्तव्यं सङ्कल्पप्रभवोदयम्॥१६॥ *श्रीशुक उवाच* - इति ब्रुवाणो भगवांस्तत्रैवान्तरधीयत। सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया॥१७॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे। विक्रीडतीं कन्दुकलीलया लसद् दुकूलपर्यस्तनितम्बमेखलाम्॥१८॥

॥ सङ्ग्रहोक्तिः॥

राजसतामसवृत्तयो दैत्या मर्त्त्याश्च कथं जानीयुः॥१०॥ त्वं स्वेन कृतं जगत उत्पत्तिस्थितिलयं भूतेहितं, जगतो बन्धमोक्षौ च सर्वमपि ज्ञानस्वरूपः सन् जानासि, यथा वायुराकाशं च चराचरात्मकं वस्तु विशति तद्वत्॥११॥ तव वराहादयो बहवोऽवतारा मया दृष्टाः,किन्तु योषिद्रूपं तु न दृष्टपूर्वम्, अतोऽहं त्वया यद् योषिद्रूपं धृतं, तद् द्रष्टुमिच्छामि॥१२॥ येन योषिद्वपुषा दैत्याः संमोहिताः, सुराश्चामृतं पायिताः, तद् योषिद्वपुर्दिदृक्षवो वयमागताः, तद्दर्शने नः परमं कौतुहलं वर्तते॥१३॥ *श्रीशुक उवाच* - इत्थं शूलपाणिना भवेन प्रार्थितो भगवान् विष्णुर्भावगम्भीरं प्रहस्य गिरिशं प्रति प्रत्यभाषत॥१४॥ *श्रीभगवानुवाच* - अमृतकलशे दैत्यैरपहृते सति सुरकार्याणि विचारयता मया दैत्यानां संमोहनाय योषिद्वेषो धृतः, हे सुरोत्तम! कामुकैर्बहु माननीयं संकल्पप्रभवोदयं मोहिनीरूपं दिदृक्षोस्तुभ्यमहं दर्शयिष्यामि॥१५-१६॥ *श्रीशुक उवाच* -इत्थं ब्रुवाणो भगवान् तत्रैवाऽन्तरधीयत, भवस्तु सर्वतश्चक्षुश्चारयन् सन् भवान्या सह तत्रैवाऽऽस्ते॥१७॥ ततो विचित्रपूष्पैररुणपल्लवैश्च समृद्धद्रुम उपवने भवो कांचन श्रेष्ठामङ्गनां ददर्श, लसद्दुकूले नितम्बे पर्यस्तमेखलां, कन्दुकलीलया क्रीडन्तीं॥१८॥

आवर्तनोद्वर्तनकम्पितस्तनप्रकृष्टहारोरुभरैः पदे पदे। प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः।।१९।। दिक्षु भ्रमत्कन्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम्। स्वकर्णविभ्राजितकुण्डलोल्लसत्कपोलनीलालकमण्डिताननाम्।।२०।। श्लथद् दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना। विनिघ्नतीमन्यकरेण कन्दुकं विमोहयन्तीं जगदात्ममायया।।२१।। तां वीक्ष्य देव इति कन्दुकलीलयेषद् व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः। स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमन्तिक उमां स्वगणांश्च वेद।।२२।। तस्याः कराग्रात् स तु कन्दुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः। वासः ससूत्रं लघु मारुतोऽहरद् भवस्य देवस्य किलानुपश्यतः।।२३।। एवं तां रुचिरापाङ्गीं दर्शनीयां मनोरमाम्। दृष्ट्वा तस्यां मनश्चक्रे विषज्जन्त्यां भवः किल।।२४।। तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः। भवान्या अपि पश्यन्त्या गतह्रीस्तत्पदं ययौ।।२५।।

।। सङ्ग्रहोक्तिः ।।

उत्पतंत्कन्दुकलीलावशेन नमनोन्नमनाभ्यां कम्पितस्तनयोः प्रकृष्टहाराणां च उरुभारैः पदे पदे मध्यतः प्रभज्यमानामिव स्थितां, चलत्पदप्रवालमितस्ततः नयन्तीम्।।१९।। दिक्षु भ्रमत्कन्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां स्वकर्णविभ्राजितकुण्डलाभ्यामुल्लसतोः कपोलयोर्निलालकैर्मण्डिताननाम्।।२०।। श्लथद्दुकूलं कबरीं च वल्गुना वामकरेण बध्नतीं, दक्षिणपाणिना कन्दुकं विनिघ्नन्तीं, स्वमायया जगद् विमोहन्तीं च।।२१।। एवंविधां मोहिनीं दृष्ट्वा भवः कन्दुकलीलया ईषद्व्रीडाऽस्फुटस्मितेन सह विसृष्टेन कटाक्षेण वञ्चितः, स्त्रीप्रेक्षणतत्प्रतिसमीक्षणाभ्यां विह्वलमनाः सन्नात्मानं स्वान्तिकस्थामुमां स्वगणांश्च न वेद।।२२।। क्रीड्यमानः स कन्दुको यदा तस्याः कराग्राद् विदूरं गतः, तदा तं कन्दुकमनुव्रजन्त्याः स्त्रियाः सूक्ष्मं काञ्चीसहितं वस्त्रं वायुः कामजेतुरपि भवस्याऽनुपश्यतः सतो जहार।।२३।। रुचिरापाङ्गीं मनोरमां दर्शनीयां तां मारुतापहृतवाससं दृष्ट्वा कटाक्षैरात्मानं निरीक्ष्यमाणायां तस्यां भवो मनश्चक्रे।।२४।। तया स्त्रियाऽपहृतविवेकस्तत्कृतस्मरविह्वलो गतत्रपो रुद्रो भवान्याः पश्यन्त्याः सत्या अपि तत्समीपं ययौ।।२५।।

सा तमायान्तमालोक्य विवस्त्रा व्रीडिता भृशम्। निलीयमाना वृक्षेषु हसन्ती नान्वतिष्ठत।।२६।। तामन्वगच्छद् भगवान् भवः प्रमथितेन्द्रियः। कामस्य च वशं नीतः करेणुमिव यूथपः।।२७।। सोऽनुव्रज्यातिवेगेन गृहीत्वानिच्छतीं स्त्रियम्। केशबन्ध उपानीय बाहुभ्यां परिषस्वजे।।२८।। सोपगूढा भगवता करिणा करिणी यथा। इतस्ततः प्रसर्पन्ती विप्रकीर्णशिरोरुहा।।२९।। आत्मानं मोचयित्वाङ्ग सुरर्षभभुजान्तरात्। प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता।।३०।। तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः। प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः।।३१।। तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः। शुष्मिणो यूथपस्येव वासितामनु धावतः।।३२।। यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः। तानि रौप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते।।३३।। सरित्सरस्सु शैलेषु वनेषूपवनेषु च। यत्र क्व चासन्नृषयस्तत्र संनिहितो हरः।।३४।। स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया।

।। सङ्ग्रहोक्तिः ।।

तं भवमायान्तमालोक्य सा विवस्त्रा अत एव भृशं व्रीडिता वृक्षेषु निलीयमाना हसन्ती सती क्वचित् स्थिरं न तस्थौ।।२६।। भगवान् प्रमथितेन्द्रियः कामस्य वशंगतो भवो गज इभीमिव तामन्वगच्छत्।।२७।। स रुद्रस्तु वेगेन तत्समीपं प्राप्य, अनिच्छन्तीमपि तां केशबन्धे गृहीत्वा स्वसमीपं प्रापय्य बाहुभ्यामालिङ्गतवान्।।२८।। करिणा करिणी यथा तथा भगवता भवेन परिष्वक्ता सा स्त्री विप्रकीर्णशिरोरुहा, इतस्ततः प्रसर्पन्ती।।२९।। हे राजन्! सुरर्षभस्य रुद्रस्य भुजान्तराद् आत्मानं मोचयित्वा देवविनिर्मिता पृथुश्रोणी सा माया प्राद्रवत्।।३०।। वैरिणा कामेन विनिर्जितो भवोऽद्भुतकर्मणो मोहिनीरूपस्य विष्णोः पदवीमन्वगच्छत्।।३१।। मत्तस्य पुष्पवतीं गजीमनुधावतो गजस्येव तस्याः पश्चाद् धावतोऽमोघवीर्यस्य तस्य वीर्यं चस्कन्द।।३२।। हे नृप! यत्र यत्र स्थले तस्य रुद्रस्य वीर्यमपतत्, तानि स्थलानि रौप्यस्य सुवर्णस्य च क्षेत्राण्यासन्।।३३।। सरितः, समुद्राः, शैलाः, वनानि, उपवनानि च, इत्येषु सर्वेषु स्थलेषु यत्र कुत्राऽपि तद्रेतोऽपतत् तत्र हरोऽवश्यस्थितिमान् बभूव, अत एव तेषु तेषु स्थानेषु तदुपासका मुनयोऽवात्सुः।।३४।। एवं रेतसि क्षरिते सति रुद्र आत्मानं देवमायया

जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ।।३५।। अथावगतमाहात्म्य आत्मनो जगदात्मनः। अपरिज्ञेयवीर्यस्य स मेने तदुहाद्भुतम् ।।३६।। तमविक्लवमव्रीडमालक्ष्य मधुसूदनः। उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुम् ।।३७।। *श्रीभगवानुवाच* - दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः। यन्मे स्त्रीरूपया स्वैरं मोहितोऽस्यङ्ग मायया ।।३८।। को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान्। तांस्तान्विसृजतीं भावान् दुस्तरामकृतात्मभिः ।।३९।। सेयं गुणमयी माया न त्वामभिभविष्यति। मया समेता कालेन कालरूपेण भागशः ।।४०।। *श्रीशुक उवाच* - एवं भगवता राजन् श्रीवत्साङ्केन सत्कृतः। आमन्त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ।।४१।। आत्मांशभूतां तां मायां भवानीं भगवान् भवः। पश्यतामृषिमुख्यानां प्रीत्याऽऽचष्टाथ भारत ।।४२।। रुद्र उवाच - अयि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः। अहं कलानामृषभो विमुह्ये यया वशोऽन्ये किमुतास्वतन्त्राः ।।४३।।

।। सङ्ग्रहोक्तिः ।।

जडीकृतमपश्यत्, हे नृपश्रेष्ठ! ततः कामात् संन्यवर्त्तत ।।३५।। अथाऽपरिज्ञेयवीर्यस्य जगदात्मनः परमात्मनोऽवगतमाहात्म्यः स रुद्रस्तद् योषिद्रूपात्मकं तच्चेष्टितमद्भुतं मेने ।।३६।। ततो मधुसूदनो भगवान् स्वां पौरुषीं तनुं बिभ्रत् कामविकाररहितमव्रीडं च तं रुद्रमालक्ष्य परमप्रीतः सन्नुवाच ।।३७।। *श्रीभगवानुवाच* - हे विबुधश्रेष्ठ! त्वं स्वां निष्ठां निर्विकाररूपां संप्राप्तः, तद् दिष्ट्या, हे रुद्र! त्वं मम दुरत्ययया मायया नितरां मोहं प्राप्तोऽसि ।।३८।। त्वां विना विषयासक्तः को नु पुमानजितेन्द्रियैर्दुस्तरां तांस्तान् भावान् विसृजन्तीं मायामतितरेत् ।।३९।। सा त्रिगुणात्मिका कालशरीरेण मया कालेन रजआद्यंशेन व्याप्तेयं माया त्वां नाऽभिभविष्यति ।।४०।। *श्रीशुक उवाच* - हे राजन्! एवं श्रीवत्साङ्केन भगवता सत्कृतो रुद्रस्तमामन्त्र्य तेनाऽनुज्ञातस्तं परिक्रम्य सगणः स्वकैलासाद्रिं ययौ ।।४१।। हे भारत! ऋषिमुख्यानां पश्यतां सतां भव आत्मनः शरीरार्द्धभूतां भवानीं तां मायां प्रत्याचष्ट ।।४२।। *रुद्र उवाच* - हे शिवे! परदेवताया अजस्य परमपुरुषस्य मायां त्वं व्यपश्यः, विद्यानामृषभोऽवशोऽप्यहं यया मायया मुह्ये, तर्हि अन्येऽस्वतन्त्राः किमु? ।।४३।।

यं मामपृच्छस्त्वमुपेत्य योगात् समासहस्रान्त उपारतं वै। स एष साक्षात् पुरुषः पुराणो न यत्र कालो विशते न वेदः॥४४॥ *श्रीशुक उवाच* – इति तेऽभिहितस्तात विक्रमः शार्ङ्गधन्वनः। सिन्धोर्निर्मन्थने येन धृतः पृष्ठे महाचलः॥४५॥ एतन्मुहुः कीर्त्तयतोऽनुश्रृण्वतो न रिष्यते जातु समुद्यमः क्वचित्। यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम्॥४६॥ असदविषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत् सिन्धुमथ्यम्। कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोऽस्मि॥४७॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे द्वादशोऽध्यायः॥१२॥

॥ सङ्ग्रहोक्तिः॥

अनेक सहस्रवर्षपर्यंतं तपस्तप्त्वा, तदन्त उपारतं मामुपेत्य त्वं "त्वदुपास्यं वस्तु किम्" इति पृष्टवत्यसि, स एष साक्षात् पुराणपुरुषो यो भगवान् वर्तते, यत्र कालस्याऽपि प्रवेशो नास्ति॥४४॥ *श्रीशुक उवाच* – हे राजन्! इत्थं येनाऽजितेन कूर्मरूपिणा सता सिन्धोर्मथने मन्दराचलः पृष्ठे धृतः, तस्याऽजितस्य पराक्रमं तुभ्यं मया कथितम्॥४५॥ एतत् समुद्रनिर्मथनादिकं मुहुः कथयतः श्रृण्वतश्च समुद्यमः क्वचिदपि देशे काले च न नश्यति, यत उत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं वर्तते॥४६॥ कपटयुवतिवेषो दैत्यान् मोहयन्, अजितेन्द्रियाणामगम्यो यो सिन्धोर्मथनेन जातममृतं चरणं प्रपन्नान् देवश्रेष्ठानपाययत् भावगम्यं प्रपन्नकामपूरकं तं नतोऽस्मि॥४७॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां द्वादशोऽध्यायः॥१२॥

अथ त्रयोदशोऽध्यायः ।।१३।।

श्रीशुक उवाच – मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु ।।१।। इक्ष्वाकुश्च नृगश्चैव धृष्टः शर्यातिरेव च। नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ।।२।। करुषश्च पृषध्रश्च दशमो वसुमान्स्मृतः। मनोर्वैवस्वतस्यैते दश पुत्राः परन्तप ।।३।। आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः। अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः ।।४।। कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः। जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ।।५।। अत्रापि भगवज्जन्म कश्यपाददितेरभूत्। आदित्यानामवरजो विष्णुर्वामनरूपधृत् ।।६।। संक्षेपतो मयोक्तानि सप्त मन्वन्तराणि ते। भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ।।७।। विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे। संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ।।८।।

।। सङ्ग्रहोक्तिः ।।

अथ त्रयोदशोऽध्यायः ।।१३।।

सप्तमादीनि षड्विधानि मन्वन्तराणि

श्रीशुक उवाच – अधुना विद्यमानः सप्तमो मनुर्विवस्वतः पुत्रः श्राद्धदेव इति प्रसिद्धः, तस्य पुत्रान् कथयतो मत्तः शृणु ।।१।। इक्ष्वाकुः, नृगः, धृष्टः, शर्यातिः, नरिष्यन्तः, नाभागः, सप्तमो दिष्टः ।।२।। करुषः, पृषध्रः, वसुमान् दशमः स्मृतश्च, हे परंतप! एते सर्वे वैवस्वतस्य मनोः पुत्रा आसन् ।।३।। हे राजन्! आदित्याः, वसवः, रुद्राः, विश्वेदेवाः, मरुद्गणाः, अश्विनौ, एते देवा आसन्, तेषां देवानामधिपतिः पुरन्दरनामा इन्द्रः आसीत् ।।४।। कश्यपः, अत्रिः, वसिष्ठः, विश्वामित्रः, गौतमः, जमदग्निः, भतद्वाजश्चेत्येते सप्तर्षयः स्मृताः ।।५।। सप्तमे मन्वन्तरेऽपि कश्यपाद् अदितेः वामनरूपेण भगवज्जन्मोऽभूत्, असौ वामन आदीत्यानामवरजः स विष्णुः ।।६।। एवं मया तुभ्यं सप्त मन्वन्तराणि संक्षेपत उक्तानि सन्ति, अथ विष्णोरवतार युतानि भविष्याण्यष्टमादीनि मन्वन्तराणि वक्ष्यामि ।।७।। हे राजेन्द्र! विश्वकर्मणः प्रजापतेर्द्वे सुते पूर्वं तुभ्यं कथिते, ते च संज्ञा छाया च विवस्वतो द्वे भार्ये भवतः ।।८।।

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः। यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ।।९।। सावर्णिस्तपती कन्या भार्या संवरणस्य या। शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ।।१०।। अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः। निर्मोकाविरजस्काद्याः सावर्णितनया नृप।।११।। तत्र देवाः सुतपसो विरजा अमृतप्रभाः। तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति।।१२।। दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम्। राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति।।१३।। योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः। निवेशितोऽधिके स्वर्गादधुनाऽऽस्ते स्वराडिव।।१४।। गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा। ऋष्यशृङ्गः पितास्माकं भगवान् बादरायणः।।१५।। इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः। इदानीमासते राजन् स्वे स्व आश्रममण्डले ।।१६।। देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः।

।। सङ्ग्रहोक्तिः ।।

केचन वडवाख्यां तृतीयां विवस्वतो भार्यामाहुः, तासां तिसृणां मध्ये संज्ञायाः सुतास्त्रय आसन्, तत्रैका यमुना सुता, यमः श्राद्धदेवश्चेति द्वौ सुतौ, इत्येवं त्रयो जाताः, अथ छायायाः सुतान् शृणु ।।९।। या तपती सुता, सा संवरणस्य भार्याऽभूत्, सावर्णिः सुतः, तृतीयः शनैश्चरः सुतोऽभूत्, वडवायाः सुतौ त्वश्विनीकुमारावास्ताम्।।१०।। अष्टमे मन्वन्तर आयाते सति सवार्णिर्मनुर्भविता, हे नृप! निर्मोकः, विरजस्कश्चेत्याद्या सावर्णेर्मनोः पुत्रा भवितारः।।११।। तत्र मन्वन्तरे सुतपसः, विरजाः, अमृतप्रभाश्चेत्येते देवगणा भवितारः, तेषां देवगणानामधिपतिर्विरोसनसुतो बलिरिन्द्रो भविष्यति।।१२।। यो बलिः पदत्रयमितां भूमिं याचमानाय विष्णवे वामनाय दत्त्वा लब्धमिन्द्रपदं हित्वा, भुक्त्वा च ततो मुक्तिमवाप्स्यति।।१३।। यो बलिर्भगवता बद्धः, पुनःप्रीतेन तेन स्वर्गादधिके सुतले निवेशितः सन्नधुना स्वराडिवाऽऽस्ते।।१४।। अत्र मन्वन्तरे गालवः, दीप्तिमान्, परशुरामः, अश्वत्थामा, कृपाचार्यः, ऋष्यशृङ्गः, अस्माकं पिता भगवान् बादरायणश्च एते गालवादयः स्वयोगप्रभावात् सप्तर्षयो भविष्यन्ति, हे राजन्! इदानीमिमे स्वे स्व आश्रममण्डल आसते।।१५-१६।। ईश्वरो भगवान् सरस्वत्यामवतीर्णः सर्वाभौमः समर्थः, अत एव पुरन्दराख्येन्द्रात् इन्द्रपदं हृत्वा बलये -

स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः ।।१७।। नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः। भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप ।।१८।। पारामरीचिगर्भाद्या देवा इन्द्रोऽद्भुतः स्मृतः। द्युतिमत्पमुखास्तत्र भविष्यन्त्यृषयस्ततः ।।१९।। आयुष्मतोऽम्बुधारायामृषभो भगवत्कला। भविता येन संराद्धां त्रिलोकीं भोक्ष्यते श्रुतः ।।२०।। दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान्। तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ।।२१।। हविष्मान्सुकृतिः सत्यो जयो मूर्तिस्तदा द्विजाः। सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः ।।२२।। विष्वक्सेनो विषूच्यां तु शम्भोः सख्यं करिष्यति। जातः स्वांशेन भगवान् गृहे विश्वजितो विभुः ।।२३।। मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्। अनागतास्तत्सुताश्च सत्यधर्मादयो दश ।।२४।। विहङ्गमाः कामगमा निर्वाणरुचयः सुराः। इन्द्रश्च वैधृतस्तेषामृषयश्चारुणादयः ।।२५।। आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः। वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ।।२६।।

।। सङ्ग्रहोक्तिः ।।

दास्यति ।।१७।। वरुणस्य पुत्रो दक्षसावर्णिः इति प्रसिद्धो नवमो मनुर्भविष्यति, हे नृप! भूतकेतुः, दीप्तकेतुः, इत्याद्यास्तत्सुता भविष्यन्ति ।।१८।। तदा पारामरीचिगर्भाद्या देवगणाः, श्रुत इति नाम्ना प्रसिद्ध इन्द्रः, तथा द्युतिमान् इत्यादयः सप्तर्षयो भविष्यन्ति ।।१९।। अम्बुधारायां भार्यायाम् आयुष्मतः सकाशात् ऋषभाख्यो भगवदवतारो भविष्यति, येन ऋषभेण रक्षितां त्रिलोकीं श्रूताख्य इन्द्रो भोक्ष्यते ।।२०।। उपश्लोकस्य पुत्रः गुणैर्महान् ब्रह्मसावर्णिर्दशमो मनुर्भविता, भूरिषेणाद्यास्तत्सुताः, हविष्मान् इत्याद्याः सप्तर्षयो भवितारः ।।२१।। हविष्मान्, सुकृतिः, जयः, सत्यः, मूर्तिश्चेत्येते सप्तर्षयः सुवासनः विरुद्धश्चेत्येते देवा भवितारः, इन्द्रस्तु शम्भुनामा भविष्यति ।।२२।। विश्वक्सेनाख्यो भगवान् विश्वजितो गृहे विषूचीसंज्ञायां तद्भार्यायां स्वांशेनाऽवतीर्णः सन् शम्भोरिन्द्रस्य सख्यं करिष्यति ।।२३।। प्रशस्तमनस्को धर्मसावर्णिनाम्ना प्रसिद्ध एकादश मनुर्भविष्यति, तस्य पुत्राः सत्यधर्मादय भवितारः ।।२४।। विहंगमाः, कामगमाः, निर्वाणरुचयश्च देवगणाः, तेषामधिपतिरिन्द्रस्तु वैधृतिनामा अरुणादयः सप्तर्षयश्च भवितारः ।।२५।। आर्यकस्य भार्यायां वैधृतायां जातो हरेरंशावतारो धर्मसेतुनामा स्मृतः, स तत्र

भविता रुद्रसावर्णी देवश्रेष्ठादयः सुताः ।।२७।। ऋतधामा च तत्रेन्द्रो देवाश्च
हरितादयः। ऋषयश्च तपोमूर्त्तिस्तपस्व्याग्नीध्रकादयः ।।२८।। सुधामाख्यो हरेरंशः
साधयिष्यति तन्मनोः। अन्तरं सत्यसहसः सूनृतायाः सुतो विभुः ।।२९।। मनुस्त्रयो-
दशो भाव्यो देवसावर्णिरात्मवान्। चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ।।३०।।
देवाः सुकर्मसुत्रामसंज्ञा इन्द्रो दिवस्पतिः। निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा
।।३१।। देवहोत्रस्य तनय उपहर्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति
।।३२।। मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति। उरुगम्भीरबुद्ध्याद्या इन्द्रसावर्णि-
वीर्यजाः ।।३३।। पवित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति। अग्निबाहुः शुचिः
शुद्धो मागधाद्यास्तपस्विनः ।।३४।। सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः।
वितानायां महाराज क्रियातन्तून्वितायिता ।।३५।।

।। सङ्ग्रहोक्तिः ।।

मन्वन्तरे त्रिलोकीं धारयिष्यति ।।२६।। हे राजन्! द्वादश मनुः रुद्रसावर्णिनाम्ना प्रसिद्धो भविता, देववान्, उपदेवः देवश्रेष्ठादयस्तत्पुत्रा भवितारः ।।२७।। तत्र मन्वन्तरे ऋतधामाख्य इन्द्रो भविता, हरित आद्या देवगणा भवितारः, तपोमूर्त्तिः तपस्वी, आग्नीध्रकश्चेत्यादयो ऋषयो भवितारः ।।२८।। सत्यसहसः सूनृतायाश्च सुतो विभुः सुधर्माख्यो हरेरंशावतारस्तन्मन्वन्तरं पालयिष्यति ।।२९।। त्रयोदशो मनुर्देवसावर्णिनाम्ना प्रसिद्ध आत्मवान् भविता, चित्रसेनः, विचित्रश्चेत्यादयो देवसावर्णेः पुत्राः भवितारः ।।३०।। सुकर्मा, सुत्रामा, इत्यादयो देवा भवितारः, दिवस्पतिसंज्ञ इन्द्रो भविता, तदा निर्मोकः, तत्त्वदर्शश्चेत्यादयो सप्तर्षयो भविष्यन्ति ।।३१।। देवहोत्रस्य भार्यायां बृहत्यां हरेरंशावतारो योगेश्वराख्यो दिवस्पतेरिन्द्रस्येष्टसंपादकः संभविष्यति ।।३२।। चतुर्दश मनुरिन्द्रसावर्णिनाम्ना प्रसिद्ध भविष्यति, ऊर्जः, गम्भीरबुद्धिश्चेत्याद्या इन्द्रसावर्णेः सुता भविष्यन्ति ।।३३।। पवित्राः, चाक्षुषाश्चेत्येतत्संज्ञा देवगणाः शुचिनामा इन्द्रो भविष्यति, अग्निः, बाहुः, शुचिः, शुद्धः, मागधश्चेत्येते सप्तर्षयो भविष्यन्ति ।।३४।। तस्मिन् मन्वन्तरे वितानाख्यायां भार्यायां सत्रायणस्य तनयो हरेरंशावतारो बृहद्भानुनाम्ना प्रसिद्धो भविष्यति, हे महाराज! स बृहद्भानुर्भगवान् यज्ञकर्मसंतानान् विस्तारयिष्यति ।।३५।।

राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते। प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ।।३६।। *इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे त्रयोदशोऽध्यायः।।१३।।*

अथ चतुर्दशोऽध्यायः।।१४।।

राजोवाच - मन्वन्तरेषु भगवन् यथा मन्वादयस्त्विमे। यस्मिन् कर्मणि ये येन नियुक्तास्तद्वदस्व मे।।१।। *ऋषिरुवाच* – मनवो मनुपुत्राश्च मुनयश्च महीपते। इन्द्राः सुरगणाश्चैव सर्वे पुरुषशासनाः।।२।। यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप। मन्वादयो जगद्यात्रां नयन्त्याभिः प्रणोदिताः।।३।। चतुर्युगान्ते कालेन ग्रस्तान् श्रुतिगणान्यथा। तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः।।४।। ततो धर्मं चतुष्पादं मनवो हरिणोदिताः। युक्ताः सञ्चारयन्त्यद्धा स्वे स्वे काले महीं नृप।।५।।

।। सङ्ग्रहोक्तिः ।।

हे राजन्! त्रिकालानुगतान्येतानि चतुर्दशमन्वन्तराणि तुभ्यं प्रोक्तानि, एभिश्चतुर्दशमन्वन्तरैः कृतादीनां युगसाहस्रपर्ययः कल्पो दैनंदिनात्मकः प्रमाणीकृतो भवति।।३६।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां त्रयोदशोऽध्यायः।।१३।।

अथ चतुर्दशोऽध्यायः ।।१४।।

सर्वेषां मन्वादीनां पृथक् पृथक् कर्मवर्णनम्

राजोवाच - हे भगवन्! मन्वन्तरेष्वमी सम्प्रोक्ता एते मन्वादयः, पञ्चाऽपि यथा यस्मिन् कर्मणि येन ये नियुक्ताः, तत् तु मह्यं वदस्व।।१।। *श्रीशुक उवाच* – हे महीपते! मनवः, मनुपुत्राः, सप्तर्षयः, इन्द्रः, सुरगणाश्चैते सर्वेऽपि पुरुषेण यज्ञाद्यवतारेण प्रशास्यते।।२।। हे नृप! यज्ञादयो येऽवतारास्तैर्नियुक्ता मन्वादय जगत्पोषणात्मिकां क्रियां कुर्वन्ति।।३।। पूर्व पूर्वमन्वन्तरावसाने कालेन ग्रस्तान् वेदान् तपसा ऋषयो यथावदपश्यन्, येभ्यो वेदेभ्यो सनातनो धर्मोऽवबुद्ध्यते।।४।। हे नृप! ततो भगवता नियुक्ता मनवः संयताः सन्तः साक्षाद्

पालयन्ति प्रजापाला यावदन्तं विभागशः। यज्ञभागभुजो देवा ये च तत्रान्विताश्च तैः।।६।। इन्द्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम्। भुञ्जानः पाति लोकांस्त्रीन् कामं लोके प्रवर्षति।।७।। ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृत्। ऋषिरूपधरः कर्मयोगं योगेशरूपधृत्।।८।। सर्गं प्रजेशरूपेण दस्यून् हन्यात् स्वराड्वपुः। कालरूपेण सर्वेषामभावाय पृथग्गुणः।।९।। स्तूयमानो जनैरेभिर्मायया नामरूपया। विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते।।१०।। एतत् कल्पविकल्पस्य प्रमाणं परिकीर्त्तितम्। यत्र मन्वन्तराण्याहुश्चतुर्दश पुराविदः।।११।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे चतुर्दशोऽध्यायः।।१४।।

।। सङ्ग्रहोक्तिः।।

युगानुरूपं चतुष्पादं धर्मं मह्यां संचारयन्ति।।५।। प्रजापाला मनुपुत्रास्तं धर्मं मन्वन्तरावसानपर्यन्तं विभागशो वर्णाश्रमविभागेन च पालयन्ति, ये देवा यत्रेश्वरेण नियुक्ताः सन्तो यज्ञभागभुजस्ते धर्मं पालयन्ति।।६।। भगवता दत्तां प्रभुतां त्रैलोक्यश्रियं भुञ्जान इन्द्रस्त्रीन् लोकान् यथेष्टं वृष्ट्या पाति।।७।। यज्ञाद्यवताररूपो हरिः कपिलादिरूपधरः सन् प्रतियुगं ज्ञानमुपदिशति, ऋषिरूपधरः सन् कर्मयोगं ब्रूते, दत्तात्रेयादिरूपधरः सन् योगं च ब्रूते।।८।। प्रजापतिरूपेण सृष्टिवृद्धिं करोति, राजमूर्तिः सन् तदनुप्रवेशेन दस्यून् हन्ति, कालरूपेण सर्वेषां लयाय पृथग्गुणो भवति।।९।।नामरूपभाजा मायया मोहितमनोभिर्नानाबुद्धिं कुर्वद्भिर्जनैः केवलं स्तूयमान एवाऽवतारधारणं विना नाऽनुभूयते।।१०।। पुराविदो यत्र कल्पविकल्पे चतुर्दश मन्वन्तराण्याहुः, तथाभूतस्य दैनंदिनकल्पस्य एतत् प्रमाणं परिकीर्तितम्।।११।।

इति श्रीमद्भागवते महापुराणे सङ्ग्रहोक्त्यां चतुर्दशोऽध्यायः।।१४।।

अथ पञ्चदशोऽध्यायः ।।१५।।

राजोवाच – बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत। भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध तम् ।।१।। एतद् वेदितुमिच्छामो महत् कोतूकलं हि नः। यज्ञेश्वरस्य पूर्णस्य बन्धनं चाऽप्यनागसः ।।२।। *श्रीशुक उवाच* – पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन् भृगुभिः स जीवितः। सर्वात्मना तानभजद् भृगून्बलिः शिष्यो महात्मार्थ-निवेदनेन ।।३।। तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रिणाकम्। जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः ।।४।। ततो रथः काञ्चनपट्ट-नद्धो हयाश्च हर्यश्वतुरङ्गवर्णाः। ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भि-रिष्टात् ।।५।। धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम्। पितामहस्तस्य ददौ च मालामम्लानपद्मां जलजं च शुक्रः ।।६।। एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान्।

।। सङ्ग्रहोक्तिः ।।

अथ पञ्चदशोऽध्यायः ।।१५।।

बलेः स्वर्गजयो, देवानां पलायनं च

राजोवाच – हरिरीश्वरो भूत्वा दीनवत् कस्माद्धेतोर्बलेः सकाशात् भूमेः पदत्रयमयाचत, लब्धपदत्रयभूमिः सन्नपि कस्माद् बलिं बबन्ध ।।१।। पूर्णकामस्य यज्ञेश्वरस्य भगवतो निरपराधस्याऽपि बलेर्बन्धनं याचनं च, एतत् श्रीहरेः कर्म वेदितुं वयमिच्छामः, अस्माकं महत् कौतूहलं वर्त्तते ।।२।। *श्रीशुक उवाच* – हे राजन्! इन्द्रेण युद्धे गृहीतराज्यलक्ष्मीः, प्राणैश्च त्याजितः, पुनर्भृग्वादिभिर्जीवितो भृगूणां शिष्यो महात्मा बलिस्तान् भृगून् सर्वात्मना धनसमर्पणेन चाऽभजत् ।।३।।स्वर्गं जिगीषमाणं तं बलिं महानुभावा ब्राह्मणा भृगवः प्रीयमाणाः सन्त महाभिषेकेण विधिनाऽभिषिच्य विश्वजिता यागेनाऽयाजयन् ।।४।। तत्र विश्वजिद्यागे हविर्भिरिष्टाद्धुताशनात् काञ्चनपट्टनद्धो रथः, हरिद्वर्णा हयाः, सिंहेन विराजमानो ध्वजश्चेत्येते आविर्बभूवुः ।।५।। काञ्चनपरिकरबद्धं दिव्यं धनुः अक्षयाविषुधी दिव्यं कवचं चेति त्रीण्यपि तत्राऽऽसन्, पितामहः प्रह्लादो बलयेऽम्लानपद्मां मालां ददौ, शुक्रः शंखं ददौ ।।६।।

प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामन्त्र्य नमश्चकार।।७।। अथारुह्य रथं दिव्यं भृगुदत्तं महारथः। सुस्रग्धरोऽथ संनह्य धन्वी खड्गी धृतेषुधिः।।८।। हेमाङ्गद-लसद्बाहुः स्फुरन्मकरकुण्डलः। रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ।।९।। तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः। पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ।।१०।। वृतो विकर्षन् महतीमासुरीं ध्वजिनीं विभुः। ययाविन्द्रपुरीं स्वृद्धां कम्पयन्निव रोदसी।।११।। रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः। कूजद्विहङ्गमिथुनैर्गाय-न्मत्तमधुव्रतैः।।१२।। प्रवालफलपुष्पोरुभारशाखामरद्रुमैः। हंससारसचक्राह्व-कारण्डवकुलाकुलाः। नलिन्यो यत्र क्रीडन्ती प्रमदाः सुरसेविताः।।१३।। आकाश-गङ्गया देव्या वृतां परिखभूतया। प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च।।१४।। रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः। जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ।।१५।। सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम्। शृङ्गाटकैर्मणिमयैर्वज्रविद्रुम-वेदिभिः।।१६।।

।। सङ्ग्रहोक्तिः।।

एवं विप्रसम्पादितयुद्धपरिकरः, भार्गवैः कल्पितस्वस्त्ययनो बलिर्भार्गवविप्रान् प्रदक्षिणीकृत्य, तेभ्यः कृतप्रणामः सन् प्रह्लादमामन्त्र्य, तस्मै नमश्चकार।।७।। अथ भृगुभिरग्निद्वारा दत्तं दिव्यं रथमारुह्य महारथो बलिः कवचधारणं कृत्वा, सुस्रग्धरः, धन्वी, खड्गी, धृतेषुधिः, हेमाङ्गद-लसद्बाहुः, स्फुरन्मकरकुण्डलः रथमारूढोऽत एव कुण्डस्थो हव्यवाडिव रराज।।८-९।। तुल्यैश्वर्यबलश्रीभिः स्वयूथैः, दृग्भिराकाशं पिबद्भिरिव दिशो दहद्भिर्दैत्ययूथपैर्वृतः, महतीमासुरीं सेनां विकर्षन् द्यावापृथिव्यौ कम्पयन्निव विभुर्बलिः सर्वसंपत्समृद्धामिन्द्रपुरीं प्रति ययौ।।१०-११।। फलपुष्पादिसमृद्धिभिः प्रवालपुष्पोरुभारनम्रैरमरद्रुमैः कूजद्विहङ्गमिथुनैः गायन्मत्तमधुपैः नन्दनादिभिरुद्यानैः रम्याम्।।१२।। यत्रोपवनेषु हंस-सारस-चक्रवाक-कारण्डव-कुलैर्व्याप्तानि सरांसि सन्ति, यत्र सुरसेविताः प्रमदाः क्रीडन्ति।।१३।। परिखाभूतया देव्याऽऽकाशगङ्गया सुवर्णमयेन साट्टालोन्नतेन प्राकारेण च जुष्टाम्।।१४।। रुक्मपट्टकपाटैः द्वारैः स्फाटिकगोपुरैश्च जुष्टाम्, विभक्तराजमार्गां विश्वकर्मविनिर्मिताम्।।१५।। सभाचत्वररथ्याढ्यामनेकैर्विमानैर्युताम्,

यत्र नित्यवयोरूपाः श्यामा विरजवाससः। भ्राजन्ते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ।।१७।। सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजाम्। यत्रामोदमुपादाय मार्ग आवाति मारुतः।।१८।। हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना। पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरस्त्रियः।।१९।। मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम्। शिखण्डिपारावतभृङ्गनादितां वैमानिकस्त्रीकलगीतमङ्गलाम्।।२०।। मृदङ्गशङ्खानकदुन्दुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः। नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम्।।२१।। यां न व्रजन्त्यधर्मिष्ठाः खला भूतद्रुहः शठाः। मानिनः कामिनो लुब्धा एभिर्हीना व्रजन्ति यत्।।२२।। तां देवधानीं स वरूथिनीपतिर्बहिःसमन्ताद् रुरुधे पृतन्यया। आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुञ्जन्भयमिन्द्रयोषिताम्।।२३।। मघवांस्तमभिप्रेत्य बलेः परममुद्यमम्। सर्वदेवगणोपेतो गुरुमेतदुवाच ह।।२४।। *इन्द्र उवाच* - भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः। अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः।।२५।।

।। सङ्ग्रहोक्तिः ।।

वज्रविद्रुमवेदिभिः मणीमयैश्चतुष्पथैश्च जुष्टाम्।।१६।। यत्र पुर्यां नित्ययौवनरूपाढ्याः श्यामाः विरजवाससः स्वलंकृताः स्त्रियः शिखाभिर्वह्नय इव भ्राजन्ते।।१७।। यस्यां पुर्यां सुरस्त्रीकेशभ्रष्टानां नवसौगन्धिकस्रजामामोदमादाय मारुतो मार्ग आवाति।।१८।। हेमजालाक्षनिर्गच्छताऽगुरुसुगन्धिना पाण्डुरेण धूमेन प्रतिछन्ने मार्गे सुरस्त्रियो यान्ति।।१९।। मुक्तावितानैः मणिहेमकेतुभिर्नानापताकावलभीभिः समावृतां, शिखण्डिपारावतभृङ्गनादितां विमानचराणां स्त्रीणां कलगीतैर्मङ्गलाम्।।२०।। मृदङ्गशंखानकदुन्दुभिस्वनैः, सतालवीणामुरजवेणुभिः सवाद्यैरुपदेवगीतैर्नृत्यैश्च मनोरमां स्वप्रभया जितप्रभाम्।।२१।। अधर्मिष्ठाः खला भूतद्रुहः शठा मानिनः कामिनो लुब्धाश्च याममरपुरीं न व्रजन्ति, एभिर्दोषैर्हीना यां व्रजन्ति।।२२।। एवं भूताममरावतीं वरुथिनीसेनापतिर्बलिः स्वसैन्येन समन्ताद् रुरुधे, इन्द्रयोषितां भयं जनयन् सन् शुक्रदत्तं महास्वनं शंखं दध्मौ।।२३।। सर्वगुणोपेतो मघवा बलेः परममुद्योगं ज्ञात्वा गुरुं बृहस्पतिमेतत् स्फुटमुवाच।।२४।। *इन्द्र उवाच* - हे भगवन्! अस्माकं पूर्ववैरिणो बलेरयं भूयानुद्यमो -

नैनं कश्चित् कुतो वापि प्रतिव्योढुमधीश्वरः। पिबन्निव मुखेनेदं लिहन्निव दिशो दश। दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः।।२६।। ब्रूहि कारणमेतस्य दूर्धर्षत्वस्य मद्रिपोः। ओजः सहो बलं तेजो यत एतत्समुद्यमः।।२७।। *गुरुरुवाच* - जानामि मघवञ्छत्रोरुन्नतेरस्य कारणम्। शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः।।२८।। भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिम्। नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः।।२९।। तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम्। यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः।।३०।। एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः। तेषामेवापमानेन सानुबन्धो विनङ्क्ष्यति।।३१।। *श्रीशुक उवाच* - एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना। हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः।।३२।। देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम्। देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम् ।।३३।। तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः। शतेन हयमेधानामनुव्रतमयाजयन्।।३४।।

।। सङ्ग्रहोक्तिः।।

दृश्यते, इममुद्यममविषह्यं मन्ये, अयं केन हेतुना तेजसा प्रबलो जातः।।२५।। इदानीमेनं कश्चनाऽपि पुमान् केनाप्युपायेनाऽपाकर्तुं समर्थो न, अयं मुखेन जगत् पिबन्निव, दशो दिशो लिहन्निव, उत्थितः संवर्ताग्निरिव दृग्भिर्नभो दहन्निवाऽऽस्ते।।२६।। मम शत्रोर्बलेरेतद्दुर्धर्षत्वस्य कारणं ब्रूहि, यत ओजः, सहः, बलं, तेजः, एतत्सर्वं कुतो वृद्धिं गतम्, यत एष समुद्यम आसीत्।।२७।। *गुरुरुवाच* - हे मघवन्! त्वच्छत्रोर्बलेरुन्नतेः कारणमहं जानामि, ब्रह्मवादिभिः शुक्रादिभिः शिष्याय बलये तेजो निहितम्।।२८।। परमेश्वरं हरिं विना भवद्विधः कश्चिदन्यो भवान् वाऽपि मृत्योः पुरो जन इव बलेः पुरः क्षणमपि स्थातुं न शक्नुयात्।।२९।। तस्मात् सर्वे यूयं स्वर्गं त्यक्त्वा, येन कालेन शत्रोः पराजयो भविष्यति तं कालं प्रतीक्षमाणाः सन्तोऽदर्शनं यात।।३०।। एष बलिः संप्रति बलेनैधमान उर्जितबलविक्रमो वर्तते, स एषामेवापमानेन समृद्धिसहितो विनङ्क्ष्यति, तं कालं प्रतीक्षत।।३१।। *श्रीशुक उवाच* - एवं तत्कालोचितकर्तव्याभिज्ञेन गुरुणा बृहस्पतिना सुमन्त्रितार्थाः सुराः स्वर्गं हित्वा कामरूपिणः सन्तः जग्मुः।।३२।। ततः देवेषु विलीनेषु सत्सु वैरोचनो बलिर्देवधानीं पुरीमधिष्ठाय लोकत्रयं वशं निन्ये।।३३।। शिष्यवत्सला भृगवो विश्वजयिनं शिष्यमनुव्रतं बलिं हयमेधानां शतेनाऽयाजयन्।।३४।।

ततस्तदनुभावेन भुवनत्रयविश्रुताम्। कीर्त्तिं दिक्षु वितन्वानः स रेज उडुराडिव ।।३५।। बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम्। कृतकृत्यमिवात्मानं मन्यमानो महामनाः।।३६।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे पञ्चदशोऽध्यायः।।१५।।

अथ षोडशोऽध्यायः।।१६।।

श्रीशुक उवाच - एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा। हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत्।।१।। एकदा कश्यपस्तस्या आश्रमं भगवानगात्। निरुत्सवं निरानन्दं समाधेर्विरतश्चिरात्।।२।। स पत्नीं दीनवदनां कृतासनपरिग्रहः। सभाजितो यथान्यायमिदमाह कुरूद्वह।।३।। *कश्यप उवाच* - अप्यभद्रं न विप्राणां लोके भद्रे ऽधुना गवाम्। न धर्मस्य न लोकस्य मृत्योश्छन्दानुवर्तिनः।।४।।

।। सङ्ग्रहोक्तिः।।

ततस्तदनुभावेन भुवनत्रयविश्रुतां कीर्त्तिं दिक्षु वितन्वानः स बलिश्चन्द्रमा इव रेजे।।३५।। ब्राह्मणैरुपलम्भितां सुसमृद्धां श्रियं महामनाः स बलिरात्मानं कृतकृत्यं मन्यमानः सन् बुभुजे।।३६।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां पञ्चदशोऽध्यायः।।१५।।

अथ षोडशोऽध्यायः ।।१६।।

कश्यपोऽदितिं पयोव्रतं प्राह

श्रीशुक उवाच - इत्थं पुत्रेष्विन्द्रादिष्वदृश्येषु सत्सु दैत्यैः स्वर्गे हृते च सति अन्तरतिखिन्ना देवमाताऽदितिस्तदाऽनाथवत् पर्यतप्यत्।।१।। चिरात् समाधेर्विरतो भगवान् कश्यप एकदा निरुत्सवं निरानन्दं चाऽदितेराश्रममगात्।।२।। हे कुरूद्वह! कृतासनपरिग्रहो यथायोग्यं सभाजितः स कश्यपो दीनवदनां पत्नीमदितिमिदमाह।।३।। *कश्यप उवाच* - हे भद्रे! साम्प्रतं विप्राणां, गवां, धर्मस्य, छन्दानुवर्त्तिनो मर्त्यलोकस्य च किमप्यभद्रं नाऽभवत् किमु?।।४।।

अपि वाकुशलं किञ्चिद् गृहेषु गृहमेधिनि। धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम्।।५।। अपि वातिथयोऽभ्येत्य कुटुम्बासक्तया त्वया। गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित्।।६।। गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि। यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः।।७।। अप्यग्नयस्तु वेलायां न हुता हविषा सति। त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित्।।८।। यत्पूजया कामदुघान्याति लोकान् गृहान्वितः। ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ।।९।। अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि। लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम्।।१०।। *अदितिरुवाच* - भद्रं द्विजगवां ब्रह्मन् धर्मस्यास्य जनस्य च। त्रिवर्गस्य परं क्षेत्रं गृहमेधिन् गृहा इमे।।११।। अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः। सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति।।१२।। को नु मे भगवन् कामो न सम्पद्येत मानसः। यस्या भवान् प्रजाध्यक्ष एवं धर्मान् प्रभाषते।।१३।।

।। सङ्ग्रहोक्तिः।।

हे गृहमेधिनि! गृहेषु धर्मार्थकामानां मध्ये किमप्यकल्याणं जातम्? यत्र योगसाधनहीनानामपि गृहिणां स्वधर्मपालनेनैव योगफलं भवति।।५।।अथवा हे भद्रे! अतिथयोऽभ्येत्य कुटुम्बासक्तया त्वयाऽभ्युत्थानादिना क्वचिदपूजिताः सन्तो गृहात् प्रत्यावृताः किम्?।।६।। यतः येषु गृहेष्वतिथयोऽभ्येत्य सलिलैरप्यनर्चिताः सन्तो निर्गच्छन्ति चेत् तर्हि ते गृहिणां गृहा शृगालादिगृहतुल्या एव।।७।। हे सति! हे भद्रे! मयि प्रोषिते सति कर्हिचिदुद्विग्नधिया त्वया वह्नयो वेलायां हविषा न हुताः किम्?।।८।। गृहस्थः पुमान् येषामग्नीनां पूजनेन कामदुघान् लोकान् याति, ब्राह्मणोऽग्निश्च सर्वदेवताशरीरस्य विष्णोर्मुखमस्ति।।९।। हे मनस्विनि! तव सर्वे पुत्रा कुशलिनोऽपि? भवत्या मानसमस्वस्थं स्यादिति लक्षणैर्लक्षयेऽहम्।।१०।। *अदितिरुवाच* - हे ब्रह्मन्! द्विजानां, गवां, धर्मस्य, अस्य जनस्य च भद्रमेव भवति तथा हे गृहमेधिन्! इमे गृहा धर्मार्थकामस्य परं क्षेत्रं भवति।।११।। हे ब्रह्मन्! भगवतोऽनुध्यानात् अग्नयः, अतिथयः, भिक्षवः, ये च पूजाद्यभीप्सवः, इत्येतत् सर्वं न हीयते।।१२।। हे भगवन्! मम मनोगतः कामः को नु न सम्पद्येत, यतः भवान् प्रजापतिः सन् मह्यं पत्न्या एवंविधान्

तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः। समो भवांस्तास्व-
सुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः।।१४।। तस्मादीश भजन्त्या मे श्रेयश्चिन्तय
सुव्रत। हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो।।१५।। परैर्विवासिता साहं
मग्ना व्यसनसागरे। ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम।।१६।। यथा तानि
पुनः साधो प्रपद्येरन् ममात्मजाः। तथा विधेहि कल्याणं धिया कल्याणकृत्तम।।१७।।
एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव। अहो मायाबलं विष्णोः स्नेहबद्धमिदं
जगत्।।१८।। क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः। कस्य के पतिपुत्राद्या
मोह एव हि कारणम्।।१९।। उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम्। सर्वभूतगुहावासं
वासुदेवं जगद्गुरुम्।।२०।। स विधास्यति ते कामान् हरिर्दीनानुकम्पनः अमोघा
भगवद्भक्तिर्नेतरेति मतिर्मम।।२१।। *अदितिरुवाच* – केनाहं विधिना ब्रह्मन्नुपस्थास्ये
जगत्पतिम्।

।। सङ्ग्रहोक्तिः ।।

धर्मान् प्रभाषते।।१३।। हे मारीच! सत्त्वादिप्रधानाः इमाः सर्वाः प्रजास्तवैव शरीरजा मनोजाश्च वर्त्तन्ते, अतो भवान् तासु प्रजासु समदर्शनः, तथापि हे प्रभो! महेश्वर्ययुक्तो भवान् भक्तं भजते।।१४।। हे ईश! हे सुव्रत! त्वं सेवन्त्या मे श्रेयश्चिन्तय, सपत्नैर्हृतश्रियो हृतस्थानान् अस्मतपुत्रान् पाहि, यतः हे प्रभो! त्वं समर्थोऽसि।।१५।। साऽहं दैत्यैः स्वस्थानादुच्चाटिता दुःखसागरे मग्नाऽभवम्, अधुना प्रबलैर्दैत्यैर्ममैश्वर्यं, श्रीः यशः स्थानं चेति सर्वाणि हृतानि ।।१६।। हे साधो! हे कल्याणकृत्तम! तान्यैश्वर्यादीनि मत्पुत्राः पुनः पूर्ववदेव प्रपद्येरन् तथा धिया कल्याणं विधेहि।।१७।। एवमदित्या प्रार्थितः प्रजापतिः कश्यपः स्मयन्निव तामाह, अहो, विष्णोर्मायाबलम्, इदं जगत् स्नेहबद्धम्।।१८।। भौतिकोऽनात्मा देहः क्व, प्रकृतेः पर आत्मा क्व? इमे कस्य पतिपुत्राद्याः? अत्र देहात्मभ्रम एव स्नेहे कारणम्।।१९।। आराधकस्य जगतो गुरुं, सर्वभूतान्तरात्मानं भगवन्तं परमपुरुषं जनार्दनं वासुदेवमाराधय ।।२०।। स जनार्दनो भगवान् स्वशरणार्त्तिहरोऽस्ति, स हरिस्ते कामान् विधास्यति, यतो भगवद्भक्तिः सफला भवति, देवतान्तरसेवा तथा न भवति।।२१।। *अदितिरुवाच* – हे ब्रह्मन्! अहं केन

यथा मे सत्यसङ्कल्प विदध्यात् स मनोरथम्।।२२।। आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम्। आशु तुष्यति मे देवः सीदन्त्याः सह पुत्रकैः।।२३।। *कश्यप उवाच* – एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः। यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ।।२४।। फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः। अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः।।२५।। सिनीवाल्यां मृदाऽऽलिप्य स्नायात् क्रोडविदीर्णया। यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत्।।२६।। त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता। उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय।।२७।। निर्वर्तितात्मनियमो देवमर्चेत् समाहितः। अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि।।२८।। नमस्तुभ्यं भगवते पुरुषाय महीयसे। सर्वभूतनिवासाय वासुदेवाय साक्षिणे।।२९।। नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च। चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे।।३०।। नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे। सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः।।३१।।

।। सङ्ग्रहोक्तिः ।।

विधिना जगत्पतिं भगवन्तं भजेयं, येन भजमानाया मे मनोरथं सत्यसंकल्पो भगवान् सफलं विदध्यात्।।२२।। हे द्विजश्रेष्ठ! पुत्रैः सह सीदन्त्या मे भगवान् यथा आशु तुष्यति तथा त्वं तद्भजनात्मकं विधिमुपदिश।।२३।। *कश्यप उवाच* – प्रजाकामेन मया पृष्टो भगवान् ब्रह्मा यत् पयोव्रताख्यं व्रतं मामाह तत् केशवतोषणं तत्कर्म तुभ्यं वक्ष्यामि।।२४।। फाल्गुनमासस्य शुक्ले पक्षे द्वादशाहं पयोव्रताख्यं कर्म कर्त्तव्यम्, तत्र परमया भक्त्याऽन्वितोऽयं व्रती अरविन्दाक्षमर्चयेत्।।२५।। दृष्टेन्दुकलायाममावस्यायां यदि लभ्येत क्रोडविदीर्णया मृदा स्वदेहोपलेपनं कृत्वा नद्यां वक्ष्यमाणं मन्त्रं संजपन् स्नानं कुर्यात्।।२६।। मन्त्रमाह – "हे देवि! हे भूदेवते! तव स्थानमिच्छताऽऽदिवराहेण भगवता त्वं रसातलाद् उद्धृताऽसि, तुभ्यं नमः, मम पाप्मानं प्रणाशय" इमं मन्त्रमुदीर्य स्नायात्।।२७।। प्रतिमायां, स्थण्डिले, सूर्ये, कुम्भसंभृते शुद्धजले, वह्नौ, गुरौ, अपि।।२८।। अन्तर्यामितया सर्वभूतनिवासाय साक्षिणे महीयसे पुरुषाय भगवते वासुदेवाय तुभ्यं नमः।।२९।। अव्यक्ताय, सूक्ष्माय प्रधानपुरुषाय, चतुर्विंशद्गुणज्ञाय, गुणसंख्यानहेतवे नमः।।३०।। द्विशीर्ष्णे, त्रिपदे, चतुःशृङ्गाय, तन्तवे,

नमः शिवाय रुद्राय नमः शक्तिधराय च। सर्वविद्याधिपतये भूतानां पतये नमः।।३२।।
नमो हिरण्यगर्भाय प्राणाय जगदात्मने। योगैश्वर्यशरीराय नमस्ते योगहेतवे।।३३।।
नमस्त आदिदेवाय साक्षिभूताय ते नमः। नारायणाय ऋषये नराय हरये नमः।।३४।।
नमो मरकतश्यामवपुषेऽधिगतश्रिये। केशवाय नमस्तुभ्यं नमस्ते पीतवाससे।।३५।।
त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ। अतस्ते श्रेयसे धीराः पादरेणुमुपासते।।३६।।
अन्ववर्तन्तं यं देवाः श्रीश्च तत्पादपद्मयोः। स्पृहयन्त इवामोदं भगवान्मे प्रसीदताम्
।।३७।। एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम्। अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्श-
नादिभिः। अर्चित्वा गन्धमाल्याद्यैः पयसा स्नपयेद्विभुम्।।३८।। वस्त्रोपवीताभरण-
पाद्योपस्पर्शनैस्ततः। गन्धपुष्पादिभिश्चार्चेद् द्वादशाक्षरविद्यया।।३९।। शृतं पयसि
नैवेद्यं शाल्यन्नं विभवे सति। ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया।।४०।।
निवेदितं तद् भक्ताय दद्याद् भुञ्जीत वा स्वयम्। दत्त्वाऽऽचमनमर्चित्वा ताम्बुलं
च निवेदयेत्।।४१।।

।। सङ्ग्रहोक्तिः ।।

सप्तहस्ताय, यज्ञाय त्रयीविद्यात्मने नमः।।३१।। शिवाय, रुद्राय, शक्तिधराय, सर्वविद्याधिपतये
भूतानां पतये नमो नमः।।३२।। हिरुण्यगर्भाय, प्राणाय, जगदात्मने योगैश्वर्यशरीराय योगहेतवे
ते नमोनमः।।३३।। आदिदेवाय साक्षिभूताय, नारायणाय, ऋषये, नराय, हरये नमो नमः।।३४।।
मरकतश्यामवपुषे अधिगतश्रिये, केशवाय पीतवाससे तुभ्यं नमो नमः।।३५।। हे वरेण्य
वरदर्षभ! पुंसां सर्ववरदस्त्वमेव, अतो धीराः श्रेयसे ते पादरेणुमुपासते।।३६।। लक्ष्मीः,
ब्रह्मादयो देवाः यत्पादपद्मयोरामोदं स्पृहयन्त इव, यमन्ववर्त्तन्त, स भगवान् मे प्रसीदताम्।।३७।।
एतैर्मन्त्रैरावाहनपूर्वकमर्चादिषु संनिधापितं हृषीकेशं पाद्योपस्पर्शनादिभिः श्रद्धया युक्तः सन्नर्चयेत्,
आसनप्रदानादिभिरर्चयित्वा गन्धादिभिः सह पयसा विभुं स्नापयेत्।।३८।। द्वादशाक्षरमन्त्रेण
वस्त्र-उपवीता-ऽऽभरण-पाद्या-ऽऽचमन-गन्ध-पुष्पादिभिरुपचारैरर्चेत्।।३९।। तथा विभवे
सति द्वादशाक्षरमन्त्रेणैव पयसि पक्वं शाल्यन्नं घृतेन गुडेन च सहितं नैवेद्यं भगवते समर्प्य
वह्नौ तज्जुहुयात्।।४०।। ततो भगवते निवेदितं पायसान्नं भक्ताय दद्यात्, स्वयं वा भुञ्जीत,

जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम्। कृत्वा प्रदक्षिणं भूमौ प्रणमेद् दण्डवन्मुदा ।।४२।। कृत्वा शिरसि तच्छेषां देवमुद्वासयेत् ततः। द्व्यवरान् भोजयेद् विप्रान् पायसेन यथोचितम् ।।४३।। भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः। ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ।।४४।। स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः। पयसा स्नापयित्वार्चेद् यावद् व्रतसमापनम् ।।४५।। पयोभक्षो व्रतमिदं चरेद् विष्ण्वर्चनादृतः। पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ।।४६।। एवं त्वहरहः कुर्याद् द्वादशाहं पयोव्रतः। हरेराराधनं होममर्हणं द्विजतर्पणम् ।।४७।। प्रतिपद्दिन-मारभ्य यावच्छुक्लत्रयोदशी। ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत् ।।४८।। वर्जयेदसदालापं भोगानुच्चावचांस्तथा। अहिंस्रः सर्वभूतानां वासुदेवपरायणः ।।४९।। त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः। कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ।।५०।।

।। सङ्ग्रहोक्तिः ।।

तत आचमनं दत्त्वाऽर्चनं कृत्वा ताम्बुलवीटिकां निवेदयेत् ।।४१।। ततो द्वादशाक्षर-मन्त्रमष्टोत्तरशतं जपेत्, ततः स्तुतिभिः प्रभुं स्तुवीत, ततः प्रदक्षिणां कृत्वा भूमौ मुदा दण्डवत् प्रणमेत् ।।४२।। तन्निर्माल्यं पुष्पादि शिरसि धृत्वा ततो भगवन्तमुद्वासयेत्, ततो द्व्यवरान् विप्रान् यथोचितं पायसेन भोजयेत् ।।४३।। ततस्तैर्विप्रैरनुज्ञातो बन्धुभिः सह शिष्टमन्नादिकं समाहीतो भुञ्जीत, अथ रात्र्यां ब्रह्मचारी शयीत, अमाया द्वितीये दिवसे प्रभाते स्नातः शुचिः समाहितो भूत्वा यथोक्तेन विधिना, भगवन्तं पयसा स्नापयित्वा यावद् व्रतसमापनं देवमभ्यर्चयेत् ।।४४-४५।। क्षीराहारः स विष्णुपूजायामादरयुक्तः सन्निदं व्रतं चरेत्, अग्नौ जुहुयात् विप्रांश्चापि भोजयेत् ।।४६।। एवं पयोव्रतं कुर्वन् सन् द्वादशदिनपर्यन्तं हरेराराधनं, होमं, अर्हणं, द्विजतर्पणं च कुर्यात् ।।४७।। तथा ब्रह्मचर्यं, अधःशयनं, त्रिषणं स्नानं इत्येतत् सर्वं प्रतिपद्दिनमारभ्य शुक्लत्रयोदशीपर्यंतं चरेत् ।।४८।। असदालापानुच्चावचान् भोगांश्च वर्जयेत्, सर्वभूतानामहिंस्रः सन् वासुदेवपरायणः स्यात् ।।४९।। द्वादशदिनेषु व्यतीतेषु त्रयोदश्यां पञ्चामृतैः शास्त्रदृष्टेन विधिना विधिकोविदैर्विप्रैर्विष्णोः स्नपनं कारयेत् ।।५०।।

पूजां च महतीं कुर्याद् वित्तशाठ्यविवर्जितः। चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे।।५१।। शृतेन तेन पुरुषं यजेत सुसमाहितः। नैवेद्यं चातिगुणवद् दद्यात्पुरुषतुष्टिदम्।।५२।। आचार्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः। तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः।।५३।। भोजयेद् तान् गुणवता सदन्नेन शुचिस्मिते। अन्यांश्च ब्राह्मणाञ्छक्त्या ये च तत्र समागताः।।५४।। दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः। अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान्।।५५।। भुक्तवत्सु च सर्वेषु दीनान्धकृपणादिषु। विष्णोस्तत्प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः।।५६।। नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः। कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।।५७।।एतत् पयोव्रतं नाम पुरुषाराधनं परम्। पितामहेनाभिहितं मया ते समुदाहृतम् ।।५८।।त्वं चानेन महाभागे सम्यक् चीर्णेन केशवम्। आत्मना शुद्धभावेन नियतात्मा भजाव्ययम्।।५९।।

।। सङ्ग्रहोक्तिः।।

वित्तलोभमकुर्वाणः सन् विष्णोः सर्वोपचारयुक्तां पूजां कुर्यात्, क्षीरे चरुं निरूप्य शिपिविष्टाय विष्णवे कल्पयेत्।।५१।। शृतेन चरुणा सुसमाहितः पुरुषं यजेत्, ततः पुरुषतुष्टिदं नैवेद्यं भगवते समर्पयेत्।।५२।।ततो ज्ञानसंपन्नमाचार्यं यथावित्तं वस्त्राभरणधेनुभिः तोषयेत् ततश्च ऋत्विजो विप्रान् तोषयेत्, यस्मात् तद्धरेराराधनमेव भवति।।५३।।हे शुचिस्मिते! तान् आचार्यान् ऋत्विजः, तत्र ये समागताः तान् सर्वान् योग्यान् विप्रान् गुणवता सदन्नेन भोजयेत्।।५४।। तत आचार्याय ऋत्विग्भ्यश्च यथा योग्यं दक्षिणां दद्यात्, समागतान् आश्वपाकान् अन्नाद्येन प्रीणयेत्।।५५।।दीनान्धकृपणादिषु सर्वेषु भुक्तवत्सु सत्सु तत्तत्सत्कारं विष्णोः प्रीणनं जानन् स्वयं व्रतकर्ताऽपि बन्धुभिः सह भुञ्जीत।।५६।। एवं चतुर्दशस्वहःसु नृत्य-वादित्र-गीतैः स्तुतिभिः, स्वस्तिवाचकैः तत्कथाभिश्च सह भगवतः पूजां कारयेत्।।५७।। परमपुरुषस्याराधनरूपमिदं परं पयोव्रतं नाम कर्म मह्यं पितामहेन प्राक् उपदिष्टं, तच्च मयाऽधुना तेऽभिहितम्।।५८।। हे महाभागे! त्वमपि सम्यक् चीर्णेनाऽनेन पयोव्रतेन शुद्धभावेन मनसा नियतात्मा सत्यव्ययं केशवं भज।।५९।।

अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम्। तपः सारमिदं भद्रे दानं चेश्वरतर्पणम् ।।६०।। *त एव नियमाः साक्षात्त एव च यमोत्तमाः।* तपो दानं व्रतं यज्ञो येन *तुष्यत्यधोक्षजः।।६१।।* तस्मादेतद् व्रतं भद्रे प्रयता श्रद्धया चर। भगवान् परितुष्टस्ते वरानाशु विधास्यति।।६२।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे षोडशोऽध्यायः।।१६।।

अथ सप्तदशोऽध्यायः।।१७।।

_श्रीशुक उवाच_ - इत्युक्ता साऽदिती राजन् स्वभर्त्रा कश्यपेन वै। अन्वतिष्ठद् व्रतमिदं द्वादशाहमतन्द्रिता।।१।। चिन्तयन्त्येकया बुद्ध्या महापुरुषमीश्वरम्। प्रगृह्येन्द्रियदुष्टाश्वान्मनसा बुद्धिसारथिः।।२।। मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि। वासुदेवे समाधाय चचार ह पयोव्रतम्।।३।।

।। सङ्ग्रहोक्तिः।।

अयं व्रतरूपो यज्ञः सर्वयज्ञाख्यः स्मृतः, इदं व्रतं सर्वव्रतं स्मृतम्, किंच हे भद्रे! इदं तपःसारं सर्वदानतुल्यमीश्वरतृप्तिकरत्वेन सकलार्थदमस्ति।।६०।। येन साक्षात् भगवान् तुष्यति, त एव नियमाः त एव यमोत्तमाः तपो दानं व्रतं यज्ञश्चेत्यादीनि कर्माणि सफलानि, यैर्भगवान् प्रसन्नो भवति।।६१।। हे भद्रे! तस्मात् कारणात् नियमतत्परा सती त्वं श्रद्धयैनद् व्रतं चर, येन परितुष्टो भगवान् त आशु वरान् विधास्यति।।६२।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां षोडशोऽध्यायः।।१६।।

अथ सप्तदशोऽध्यायः ।।१७।।

पयोव्रतेन तुष्टस्य हरेर्वामनावतारः

श्रीशुक उवाच- हे राजन्! स्वभर्त्रा कश्यपेनेत्थमुपदिष्टा साऽदितिरतन्द्रिता सती द्वादशाहमिदं व्रतमन्वतिष्ठत्।।१।। बुद्धिसारथिः सा मनसेन्द्रियदुष्टाश्वान् प्रगृह्य एकाग्रया बुद्ध्या महापुरुषमीश्वरं चिन्तयन्ती सती सर्वान्तर्यामिणि भगवति वासुदेवे एकाग्रीकृतया बुद्ध्या

तस्याः प्रादुरभूत्तात भगवानादिपूरुषः। पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः।।४।।
तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम्। ननाम भुवि कायेन दण्डवत् प्रीतिविह्वला
।।५।। सोत्थाय बद्धाञ्जलिरीडितुं स्थिता नोत्सेह आनन्दजलाकुलेक्षणा। बभूव
तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः।।६।। प्रीत्या शनैर्गद्गदया गिरा
हरिं तुष्टाव सा देव्यदितिः कुरूद्वह। उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं
यज्ञपतिं जगत्पतिम्।।७।। *अदितिरुवाच* – यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः
श्रवणमङ्गलनामधेय। आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि
दीननाथः।।८।। विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने।
स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते।।९।। आयुः परं
वपुरभीष्टमतुल्यलक्ष्मीर्द्यौभूरसाः सकलयोगगुणास्त्रिवर्गः। ज्ञानं च केवलमनन्त
भवन्ति तुष्टात् त्वत्तो नृणां किमु सपत्नजयादिराशीः।।१०।।

।। सङ्ग्रहोक्तिः ।।

स्वमानसमपि समाधाय पयोव्रतं चचार।।२-३।। हे तात! तस्या अदित्याः पुरः पीताम्बरधरश्चतुर्बाहुः शंखचक्रगदापद्मधरो भगवान् आदिपुरुषः प्रादुरभूत्।।४।। अदितिस्तं वासुदेवं नेत्रगोचरं वीक्ष्य सादरं सहसोत्थाय प्रीतिविह्वला सती कायेन दण्डवन्ननाम।।५।। साऽदितिरुत्थाय बद्धाञ्जलिः सती स्तोतुं नोत्सेहे, रोमाञ्चितगात्रा, आनन्दाश्रुपूर्णेक्षणा तद्दर्शनोत्सवजातवेपथुः सती तूष्णीं बभूव।।६।। हे कुरूद्वह! देवी साऽदितिः प्रीत्या रमापतिं यज्ञपतिं जगत्पतिं चक्षुषोद्वीक्षती सती पिबतीव शनैर्गद्गदया गिरा तुष्टाव।।७।। *अदितिरुवाच* – हे यज्ञेश! हे यज्ञपुरुष! अच्युत! तीर्थपाद! तीर्थश्रव! हे श्रवणमङ्गलनामधेय! शरणागतपापप्रशमनाविर्भाव! हे आद्य! हे ईश! हे भगवन्! नः सुखं कुरु, यतस्त्वं दीननाथोऽसि।।८।। विश्वस्योत्पत्तिस्थितिलयहेतुभूताय, विश्वरूपाय स्वैरं गृहीतपुरुशक्तिगुणाय, भूम्ने, स्वस्वरूपस्थितये, निरस्तनिजजनाबोधाय हे शश्वत् पूर्णावबोध! हरये तुभ्यं नमः।।९।। हे अनन्त! तुष्टात् त्वत्तो नृणां ब्रह्मायुः, निरुपमं शरीरम्, अभीष्टलक्ष्मीः, द्युलोकभूलोकरसातलानि, सकला अणिमादयः सिद्धयः, त्रिवर्गाः, केवलं ज्ञानं, एत आयुरादयः सुलभा भवन्ति,

श्रीशुक उवाच – अदित्यैवं स्तुतो राजन् भगवान् पुष्करेक्षणः। क्षेत्रज्ञः सर्वभूताना-
मिति होवाच भारत।।११।। *श्रीभगवानुवाच* – देवमातर्भवत्या मे विज्ञातं चिरकाङ्क्षि-
तम्। यत् सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः।।१२।। तान्विनिर्जित्य समरे
दुर्मदानसुरर्षभान्। प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम्।।१३।। इन्द्रज्येष्ठैः
स्वतनयैर्हतानां युधि विद्विषाम्। स्त्रियो रुदन्तीरासाद्य द्रष्टुमिच्छसि दुःखिताः।।१४।।
आत्मजान् सुसमृद्धांस्त्वं प्रत्याहृतयशः श्रियः। नाकपृष्ठमधिष्ठाय क्रीडतो
द्रष्टुमिच्छसि।।१५।। प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः।
यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति।।१६।। अथाप्युपायो मम
देवि चिन्त्यः सन्तोषितस्य व्रतचर्यया ते। ममार्चनं नार्हति गन्तुमन्यथा श्रद्धानुरूपं
फलहेतुकत्वात्।।१७।। त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः।
स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधिष्ठितः।।१८।।

।। सङ्ग्रहोक्तिः।।

सपत्नजयादिराशीर्भवन्ति, तत्र किं वक्तव्यम्?।।१०।। *श्रीशुक उवाच* – हे राजन्! हे भारत!
इत्थमदित्या स्तुतः कमलनयनः सर्वभूतानां क्षेत्रज्ञो भगवान् इत्युवाच,।।११।। *श्रीभगवानुवाच*
– हे देवमातः! दैत्यैर्हृतश्रीणां स्वस्थानात् पातितानां स्वपुत्राणां यदैश्वर्यं तत्तव चिरकाङ्क्षितं
मया ज्ञातमेव।।१२।। दुर्मदानसुरर्षभान् सपत्नान् तान् समरे निर्जित्य लब्धश्रीभिः पुत्रैः
सहैकत्र-स्थातुमिच्छसि।।१३।। इन्द्रज्येष्ठैः स्वतनयैर्युधि हतानां शत्रूणां भर्तृसमीपमासाद्य
रुदन्तीः स्त्रियो द्रष्टुमिच्छसि।।१४।। प्रत्याहृतयशःश्रियः सुसमृद्धान् स्वर्गमधिष्ठाय क्रीडत
आत्मजान् त्वं द्रष्टुमिच्छसि।।१५।। हे देवि! अधुनाऽसुरयूथनाथा दैत्याः प्रायोऽजेयाः इति
मे मतिः. यतस्त अनुकूलेश्वरैर्विप्रैर्गुप्ताः सन्ति, अतस्तेषु दैत्येषु पराक्रमः सुखं न दास्यति।।१६।।
हे देवि! त्वया व्रतेन संतोषितस्य मम कश्चिदुपायः चिन्तनीयः, मदाराधनं श्रद्धानुरूपं फलं
ददाति, यत तन्निष्फलं भवितुं नाऽर्हति।।१७।। पुत्ररक्षणाय त्वया पयोव्रतेन यथार्हं पूजितः
सम्यक् स्तुतश्चाऽहं कश्यपतपः फलप्रदानेऽवस्थितः सन् स्वांशेन तव पुत्रत्वमुपेत्य तव
पुत्रान् गोप्तास्मि।।१८।।

उपधाव पतिं भद्रे प्रजापतिमकल्मषम्। मां च भावयती पत्यावेवंरूपमवस्थितम्
।।१९।। नैतत् परस्मा आख्येयं पृष्टयापि कथंचन। सर्वं सम्पद्यते देवि देवगुह्यं
सुसंवृतम्।।२०।। *श्रीशुक उवाच* – एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत। अदिति-
दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः। उपाधावत् पतिं भक्त्या परया कृतकृत्यवत्
।।२१।।स वै समाधियोगेन कश्यपस्तदबुध्यत। प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः
।।२२।। सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतम्। समाहितमना राजन् दारुण्यग्निं
यथानिलः।।२३।। अदितेर्धिष्ठितं गर्भं भगवन्तं सनातनम्। हिरण्यगर्भो विज्ञाय
समीडे गुह्यनामभिः।।२४।। *ब्रह्मोवाच* – जयोरुगाय भगवन्नुरुक्रम नमोस्तु ते।
नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः।।२५।। नमस्ते पृश्निगर्भाय वेदगर्भाय
वेधसे। त्रिणाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे।।२६।। त्वमादिरन्तो भुवनस्य
मध्यमनन्तशक्तिं पुरुषं यमाहुः। कालो भवानाक्षिपतीश विश्वं स्रोतो यथान्तः पतितं
गभीरम् ।।२७।।

।। सङ्ग्रहोक्तिः ।।

हे भद्रे! अत एवंरूपमवस्थितं मां च पत्यौ भावयती सती निर्दोषपतिं कश्यपमनुवर्त्तस्व।।१९।।
अन्येन पृष्टयाऽपि त्वया मदुक्तमेतत् कथंचिदपि परस्मै न कथनीयं, हे देवि! देवरहस्यं
सुसंवृतमेव फलितं भविष्यति।।२०।। *श्रीशुक उवाच* – भगवान् एतावदुक्त्वा तत्रैवाऽन्तर्दधे,
अथाऽदितिः स्वस्यां भगवतो जन्म दुर्लभं लब्ध्वा कृतकृत्यवत् परया भक्त्या पतिमन्ववर्त्तत
।।२१।। तदाऽवितथेक्षणः कश्यपः स्वस्मिन् प्रविष्टं हरेरंशं समाधियोगेनाऽबुद्ध्यत।।२२।।
हे राजन्! ततः समाहितमनाः स कश्यपस्तपसा चिरसंभृतं वीर्यं वायुः काष्ठेऽग्निमिवा-
ऽदित्यामाधत्त।।२३।। ततोऽदितेर्गर्भे स्थितं भगवन्तं विज्ञाय ब्रह्मा गुणनामभिः समीडे।।२४।।
ब्रह्मोवाच – हे षाड्गुण्यपूर्ण! हे उरुक्रम! उरुगाय! त्वं जय, तुभ्यं नमोऽस्तु, ब्रह्मण्यदेवाय
त्रिगुणाय ते नमो नमः।।२५।। प्रश्निगर्भाय, वेदगर्भाय, वेधसे, त्रिणाभाय, त्रिपृष्ठाय,
शिपिविष्टाय, विष्णवे नमः।।२६।। भुवनस्य त्वमेवाऽऽदिर्मध्यमन्तं च भवसि, अनन्तशक्तिं यं
भवन्तं परमपुरुषमाहुः, यथाऽन्तःपतितं तृणादिकं स्रोतःप्रवाह आक्षिपति तद्वत् हे ईश! –

त्वं वै प्रजानां स्थिरजङ्गमानां प्रजापतीनामसि सम्भविष्णुः। दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सुः॥२८॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे सप्तदशोऽध्यायः॥१७॥

अथाष्टदशोऽध्यायः॥१८॥

श्रीशुक उवाच – उत्थं विरिञ्चस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम्। चतुर्भुजः शङ्खगदाब्जचक्रः पिशङ्गवासा नलिनायतेक्षणः॥१॥ श्यामावदातो झषराज-कुण्डलत्विषोल्लसच्छ्रीवदनाम्बुजः पुमान्। श्रीवत्सवक्षा वलयाङ्गदोल्लसत्किरीट-काञ्चीगुणचारुनूपुरः॥२॥ मधूव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः। प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन् कण्ठनिविष्टकौस्तुभः॥३॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः।

॥ सङ्ग्रहोक्तिः ॥

कालशरीरकः भवन् विश्वमाक्षिपति॥२७॥प्रजापतीनां स्थिरजङ्गमानं प्रजानां त्वमेवोत्पादन-शीलोऽसि, तत्रापि साम्प्रतं हे देव! स्वर्गात् भ्रष्टतां प्राप्तानां देवानामप्सु मज्जतां नौरिव संरक्षकः त्वमेवाऽसि॥२८॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां सप्तदशोऽध्यायः॥१७॥

अथाऽष्टादशोऽध्यायः॥१८॥

वामनस्य बलेर्यज्ञे गमनम्

श्रीशुक उवाच – इत्थं ब्रह्मणा स्तुतकर्मवीर्योऽमृतभूर्भगवान् आदित्यां प्रादुर्बभूव, स च चतुर्भुजः शंखचक्रगदापद्मधरः पीताम्बरधरः, नलिनायतेक्षणः, श्यामवर्णोऽपि त्विषोज्ज्वलः मकराकृतिकुण्डलत्विषा राजच्छ्रीवदनाम्बुजः, श्रीवत्सवक्षाः, वलये, अङ्गदे, उल्लसत्किरीटं, काञ्चीगुणं चारुनूपुरे च बिभ्राणः॥१-२॥ भ्रमरगूञ्जितया वनमालया विराजितः, कण्ठनिविष्ट कौस्तुभः, स्वतेजसा प्रजापतेर्वेश्मतमो विनाशयन् हरिः प्रादुरासीत्॥३॥ तदा दिशः प्रसेदुः,

द्यौरन्तरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ।।४।। श्रोण्यां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः। सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ।।५।। द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप। विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः।।६।। शङ्खदुन्दुभयो नेदुर्मृदङ्गपणवानकाः। चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ।।७।। प्रीताश्चाप्सरसोऽनृत्यन्गन्धर्वप्रवरा जगुः। तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः।।८।। सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः। चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः।।९।। गायन्तोऽतिप्रशंसन्तो नृत्यन्तो विबुधानुगाः। अदित्या आश्रमपदं कुसुमैः समवाकिरन् ।।१०।। दृष्ट्वाऽदितिस्तं निजगर्भसम्भवं परं पुमांसं मुदमाप विस्मिता। गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः।।११।। यत् तद् वपुर्भाति विभूषणायुधैरव्यक्तचिद् व्यक्तमधारयद्धरिः। बभूव तेनैव स वामनो बटुः संपश्यतोर्दिव्यगतिर्यथा नटः।।१२।।

।। सङ्ग्रहोक्तिः ।।

जलाशयाः स्वच्छा बभूवुः, ऋतवो स्वगुणान्विताः, प्रजाः प्रहृष्टाश्च बभूवुः, द्यौः अन्तरिक्षं, क्षितिः, देवाः, गावः, द्विजाः, पर्वताश्चैते सर्वे संजहृषुः।।४।। भाद्रपदशुक्लद्वादश्यां तिथौ श्रवणनक्षत्रेऽभिजिन्मुहूर्ते भगवान् प्रादुर्बभूव, सर्वे नक्षत्रताराद्यास्तज्जन्मोदारं चक्रुः।।५।। तदा हरेर्जन्म समये सविता मध्यंदिनगत आसीत्, सा द्वादशी तिथिर्विजयेति नाम्ना प्रोक्ताऽस्ति ।।६।। तदा शंखदुन्दुभयो मृदङ्गपणवानकाश्च नेदुः, चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ।।७।। प्रीता अपस्रसोऽनृत्यन्, गन्धर्वप्रवरा जगुः, देवाः, मुनयः, मनवः, पितरः, अग्नयश्चेत्येते सर्वे प्रभुं तुष्टुवुः।।८ ।। सिद्ध-विद्याधरगणाः, किंपुरुष-किंनराः, चारणाः यक्ष-रक्षांसि, सुपर्ण-भुजगोत्तमाश्चेतरे विबुधानुगाश्च सर्वेऽति प्रशंसन्तो गायन्तो नृत्यन्त आसन् तथा अदित्या आश्रमपदं कुसुमैः समाकिरन् ।।९-१०।। तं परमपुरुषं निजगर्भसंभवं निरीक्ष्याऽदितिर्विस्मिता सती मुदमाप, प्रजापतिः कश्यपश्च निजयोगमायया गृहीतदिव्यविग्रहं तं दृष्ट्वा विस्मितः सन् "जय" इत्याह ।।११।। दिव्यविभूषणायुधाद्यैर्युतं यत्स्वरूपं व्यक्तं हरिरदर्शयत् तेनैव शरीरेण कश्यपादित्योः पश्यतोः सतो दिव्यगतिः स नटवत् वामनो बटुर्बभूव ।।१२ ।।

तं बटुं वामनं दृष्ट्वा मोदमाना महर्षयः। कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम्
।।१३।। तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत्। बृहस्पतिर्ब्रह्मसूत्रं मेखलां
कश्यपोऽददात्।।१४।।ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः। कौपीनाच्छादनं
माता द्यौश्छत्रं जगतः पतेः।।१५।। कमण्डलुं वेदगर्भः कुशान् सप्तर्षयो ददुः।
अक्षमालां महाराज सरस्वत्यव्ययात्मनः।।१६।। तस्मा इत्युपनीताय यक्षराट्
पात्रिकामदात्। भिक्षां भगवती साक्षादुमाऽदादम्बिका सती।।१७।। स ब्रह्मवर्चसेनैवं
सभां संभावितो बटुः। ब्रह्मर्षिगणसञ्जुष्टामत्यरोचत मारिषः।।१८।। समिद्धमाहितं
वह्निं कृत्वा परिसमूहनम्। परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद् द्विजः।।१९।।
श्रुत्वाश्वमेधैर्यजमानमूर्जितं मन्त्रैर्भृगूणामुपकल्पितैस्ततः। जगाम तत्राखिलसार-
संभृतो भारेण गां सन्नमयन्पदे पदे।।२०।। तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते
भृगुकच्छसंज्ञके। प्रवर्तयन्तो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम्।।२१।।

।। सङ्ग्रहोक्तिः ।।

तं भगवन्तं वामनं बटुसंनिवेशं दृष्ट्वा मोदमाना महर्षयः प्रजापतिं कश्यपं पुरस्कृत्य जातकर्मादीनि कारयामासुः।।१३।। तस्य वामनस्य यज्ञोपवीतसंस्कारे क्रियमाणे सति सूर्यः सावित्रीमुपदिष्टवान्, बृहस्पतिर्ब्रह्मसूत्रमदात्, कश्यपो मेखलामदात्।।१४।। भूमिः कृष्णाजिनं. सोमो दण्डं, अदितिः कौपीनाच्छादनं, द्यौः जगतत्पतेः छत्रं च ददौ।।१५।। हे महाराज! हरये ब्रह्मा कमण्डलुं, सप्तर्षयः कुशान्, सरस्वती अक्षमालां च ददौ।।१६।। उपनीताय वामनबटवे कुबेरो भिक्षापात्रं, भगवती सत्याम्बिका साक्षात् भिक्षां चाऽदात्।।१७।। एवं सर्वसत्कृतः श्रेष्ठः स बटुर्ब्रह्मवर्चसा युक्तः सन् ब्रह्मर्षिगणसंघुष्टां सभामत्यरोचयत्।।१८।। द्विजः कश्यपः कृताधानं समिद्धं वह्निं परिसमूहनं कृत्वा प्रसार्य समभ्यर्च समिद्भिरजुहोत्।।१९।। ततो वामनो भगवान् भृगूणां मन्त्रैरुपकल्पितैरश्वमेधैर्यजमानं बलिमूर्जितं श्रुत्वाऽखिलसार-संभृतोऽत एव भारेण भूमिं प्रतिपदं संनमयन् सन् तत्राऽश्वमेधस्थाने जगाम।।२०।। नर्मदाया उत्तरे तटे भृगुकच्छसंज्ञके श्रेष्ठमश्वमेधं यज्ञं प्रवर्त्तयन्तो बलेः ऋत्विजो भृगवो दूरादेव तं वामनमुदितं सूर्यमिव व्यचक्षत।।२१।।

त ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप। सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः।।२२।। इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान् स वामनः। छत्रं सदण्डं सजलं कमण्डलुं विवेश बिभ्रद्धयमेध-वाटम्।।२३।। मौञ्ज्या मेखलया वीतमुपवीताजिनोत्तरम्। जटिलं वामनं विप्रं मायामाणवकं हरिम्।।२४।। प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः। प्रत्यगृह्णन् समुत्थाय संक्षिप्तास्तस्य तेजसा।।२५।। यजमानः प्रमुदितो दर्शनीयं मनोरमम्। रूपानुरूपावयवं तस्मा आसनमाहरत्।।२६।। स्वागतेनाभिनन्द्याथ पादौ भगवतो बलिः। अवनिज्यार्चयामास मुक्तसङ्गमनोरमम्।।२७।। तत्पादशौचं जनकल्मषापहं स्वधर्मविन्मूर्ध्न्यदधात् सुमङ्गलम्। यद् देवदेवो गिरिशश्चन्द्रमौलिर्दधार मूर्ध्ना परया च भक्त्या।।२८।। *बलिरुवाच* – स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाणि ते। ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वाऽऽर्य वपुर्धरम्।।२९।।

।। सङ्ग्रहोक्तिः।।

हे नृप! वामनतेजसा हतत्विषस्ते सदस्याः ऋत्विजः स्वयं यजमानो बलिश्च एते सर्वे क्रतोर्दर्शनार्थमेष सूर्यो आयाति, उत स्वयमग्निः अथवा सनत्कुमार आयाति किम्? इति व्यतर्कयन् ।।२२।।इत्थं सयजमानेषु भृगुष्वनेकधा वितर्क्यमाणेषु सत्सु स वामनो भगवान् सदण्डच्छत्रं सजलं कमण्डलुं च बिभ्रत् सन्नश्वमेधमण्डपं विवेश।।२३।। मौञ्ज्या मेखलया बद्धं उपवीतवद्धृताजिनोत्तरं जटिलं मायामाणवकं हरिं वामनं विप्रं प्रविष्टं वीक्ष्य सयजमाना भृगवस्तत्तेजसा संकुचितप्रकाशाः सन्तोऽग्निभिः सह समुत्थायाऽऽदरेण सभायां प्रवेशं कारयामासुः।।२४-२५।। रूपानुरूपावयवं मनोरमं दर्शनीयं वामनं दृष्ट्वा यजमानो बलिः प्रमुदितः सन् तस्मा आसनं समर्पितवान्।।२६।। अथ बलिस्तं स्वागतेनाऽभिनन्द्य, भगवतः पादौ प्रक्षाल्य, मुक्तसंगानां योगिनां मनोरमं तमर्चयामास।।२७।। ततः स्वधर्मविद् बलिः कलिकल्मषापहं सुमङ्गलं तत्पादशौचं मूर्ध्नि दधार यत् पादशौचं देवदेवो ब्रह्मा चन्द्रमौलिर्गिरिशश्च परया भक्त्या मूर्ध्ना दधार, एवं च तं प्रत्युवाच।।२८।। हे ब्रह्मन्! तव स्वागतं, तुभ्यं नमः, तव किं कार्यं करवाणि, श्रेष्ठदेहधरं त्वां साक्षात् ब्रह्मर्षीणां तपो मन्ये।।२९।।

अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम्। अद्य स्विष्टः क्रतुरयं यद् भवानागतो गृहान्।।३०।। अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः। हतांहसो वार्भिरयं च भूरहो तथा पुनीता तनुभिः पदैस्तव।।३१।। यद्यद् बटो वाञ्छसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये। गां काञ्चनं गुणवद् धाम मृष्टं तथान्नपेयमुत वा विप्रकन्याम्। ग्रामान् समृद्धांस्तुरगान् गजान् वा रथांस्तथार्हत्तम सम्प्रतीच्छ।।३२।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धेऽष्टादशोऽध्यायः।।१८।।

अथैकोनविंशोऽध्यायः।।१९।।

श्रीशुक उवाच – इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतम्। निशम्य भगवान्प्रीतः प्रतिनन्द्येदमब्रवीत्।।१।।

।। सङ्ग्रहोक्तिः ।।

यस्माद् भवान् अस्माकं गृहान् आगतः, ततो नः पितरोऽद्य तृप्ता बभूवुः, अद्य नः कुलं पावितं त्वया, अयं यज्ञश्चाप्यद्य यथावदनुष्ठितो बभूव।।३०।। हे द्विजात्मज! अद्य मेऽग्नयो यथाविधि सुहुता बभूवुः, त्वच्चरणप्रक्षालनजलैर्हतपापस्य मे भूमिः, अस्मच्छरीरैः सह स्वल्पैस्तव पदैः पुनीता जाता।।३१।। हे विप्रसुत! त्वामर्थिनं तर्कये, अतः हे बटो! हे वामन! त्वं यद् यद् वाञ्छसि तत् तत् मत्तः प्रतिगृहाण, धेनुं, भूमिं, सुवर्णं, गुणवद् गृहं, स्वाद्वन्नेन सहितं पेयं, उत वा हे विप्र! कन्यां समृद्धान् ग्रामान्, तुरगान्, गजान्, रथांश्च यत् किंचित् कामयसे तन्मत्तः प्रतिगृहाण।।३२।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यामष्टादशोऽध्यायः।।१८।।

अथ एकोनविंशोऽध्यायः।।१९।।

वामनस्य पदत्रयमात्रभूमियाच्ञा, बलेः स्वीकृतिः, शुक्रस्य च तन्निवारणम्

वामनस्य पदत्रयमात्रभूमियाच्ञा, बलेः स्वीकृतिः, शुक्रस्य च तन्निवारणम्
श्रीशुक उवाच – उक्तविधं धर्मयुक्तं सत्यं मधुरं च वैरोचनेर्बलेर्वचः श्रुत्वा प्रीतो भगवान् –

श्रीवामन उवाच - वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम्। यस्य प्रमाणं भवतः सांपराये पितामहः कुलवृद्धः प्रशान्तः।।२।। न ह्येतस्मिन् कुले कश्चिन्निःसत्त्व कृपणः पुमान्। प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये।।३।। न सन्ति तीर्थे युधि चार्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः। युष्मत्कुले यद्यशसामलेन प्रह्लाद उद्भाति यथोडुपः खे।।४।। यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम्। प्रतिवारं दिग्विजये नाविन्दत गदायुधः।।५।। यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम्। नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मर।।६।। निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा। हन्तुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः।।७।। तमायान्तं समालोक्य शूलपाणिं कृतान्तवत्। चिन्तयामास कालज्ञो विष्णुर्मायाविनां वरः।।८।। यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव। अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः।।९।।

।। सङ्ग्रहोक्तिः ।।

वामनो बलिं प्रतिनन्द्येदमब्रवीत् ।।१।। *वामन उवाच* - हेजनदेव! एतत्तव वचः सूनृतं कुलोचितं धर्मयुतं यशस्करं च भवति, यस्य भवतः परलोकधर्मनिर्णये कुलवृद्धः प्रशान्तः पितामहः प्रह्लादः प्रमाणमभूत् ।।२।। त्वदीये कुले कश्चिदपि पुमान् निःसत्वः कृपणश्च न हि, यो याचकाय द्विजातये न ददामि इति वक्ता स निःसत्वः, प्रतिश्रुत्याऽदाता स कृपणः।।३।। हे नृप! तीर्थे याचकेन याचिताः तथा समरे युद्धार्थिनाऽर्थिताः, ततो मुखं परावृत्य प्रयात्ता येऽमनस्विनस्ते युष्मत्कुले न सन्ति, भवत्कुले खे पूर्णचन्द्र इवाऽमलेन यशासा युतः प्रह्लादो नितरां चकास्ति।।४।। यस्मिन् कुले जातो हिरण्याक्ष एकोऽपि दिग्विजयनिमित्ते गदायुधः सन् कृत्स्नां महीं चरन् प्रतिपक्षं वीरं न लेभे।।५।। भूम्युद्धारे वराहरूपधरो हरिः समायातं हिरण्याक्षं कृच्छ्रेण निर्जित्याऽत्मानं जयिनं न मेने, अतस्तद्वीर्यं भूरि जानीहि।।६।। तथा पुरा हिरण्याक्षस्य ज्येष्ठो भ्राता हिरण्यकशिपुः स्वभ्रातृवधं निशम्य क्रुद्धः सन् भ्रातृहणं निहन्तुं हरेर्निलयं जगाम।।७।। शूलपाणिं मृत्युवद् आयान्तं तं हिरण्यकशिपुं समालोक्य मायिनां वरः कालज्ञः स विष्णुश्चिन्तयामास।।८।। यत्र यत्राऽहं गमिष्यामि तत्र सर्वत्राऽसौ हिरण्यकशिपुः प्राणिनां मृत्युरिवाऽवतिष्ठते, अत इदानीं बहिर्दृष्टेरस्य दैत्यस्य हृदयं प्रवेक्ष्यामि।।९।।

एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेन्द्र। श्वासानिलान्तर्हितसूक्ष्मदेहस्तत् घ्राणरन्ध्रेण विविग्नचेताः।।१०।। स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद। क्ष्मां द्यां दिशः खं विवरान्समुद्रान् विष्णुं विचिन्वन् न ददर्श वीरः ।।११।। अपश्यन्निति होवाच मयान्विष्टमिदं जगत्। भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान्।।१२।। वैरानुबन्ध एतावानामृत्योरिह देहिनाम्। अज्ञानप्रभवो मन्युरहंमानोपबृंहितः।।१३।। पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः। स्वमायुर्द्विजलिङ्गेभ्यो देवेभ्योऽदात् स याचितः।।१४।। भवानाचरितान्धर्मानास्थितो गृहमेधिभिः। ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः।।१५।। तस्मात् त्वत्तो महीमीषद् वृणेऽहं वरदर्षभात्। पदानि त्रीणि दैत्येन्द्र संमितानि पदा मम।।१६।। नान्यत् ते कामये राजन् वदान्याज्जगदीश्वरात्। नैनः प्राप्नोति वै विद्वान्यावदर्थप्रतिग्रहः।।१७।।
बलिरुवाच – अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः।

।। सङ्ग्रहोक्तिः।।

हे असुरेन्द्र! इत्थं विनिश्चित्य स विष्णुराधावतो रिपोर्हिरण्यकशिपोः शरीरस्याऽन्तर्निर्विविशे, तत्रापि श्वासानिले स्वसूक्ष्मदेहमन्तर्हितं कृत्वा तद्घ्राणरन्ध्रेण तदन्तर्हृदयं निर्विविशे।।१०।। ततः स हिरण्यकशिपुस्तन्निकेतं शून्यं परिमृश्याऽपश्यमानः कुपितो स ननाद, ततः पुनः पृथिवीं, दिवं, दिशः, आकाशं, विवरानतलादीन्, समुद्रान् विचिन्वन् सन्नपि वीरस्तत्र विष्णुं न ददर्श।।११।। सर्वत्र विष्णुमसमीक्षमाणः स इत्थमुवाच मया कृत्स्नं विश्वमन्विष्टं, मम भ्रातृहन्ता तु क्वापि न दृश्यते, अतः स यं प्राप्य पुनर्नावर्त्तते नूनं तत्र गतो भवति।।१२।। लोके वैरानुबन्धो मरणपर्यन्त एव भवति, यतो देहिनां देहे निगूढाभिमानवतां देहाभिमानाभिवृद्धो मन्युरज्ञानजन्यो वर्त्तते।।१३।। प्रह्लादपुत्रस्तव पिता विरोचनो द्विजवत्सल आसीत्, येन द्विजवेषेभ्यो देवेभ्यो निजमायुरपि दत्तमासीत्।।१४।। गृहमेधिभिर्ब्राह्मणैः विपुलकीर्त्तिभिः स्वपूर्वजैरन्यैश्च शूरैराचरितान् धर्मान् भवानप्यास्थितो वर्त्तते।।१५।। हे दैत्येन्द्र! वरद! त्वत्तोऽहं मम "त्रिपदपरिमिता" ईषत् महीं याचे।।१६।। हे राजन्! जगदीश्वराद्वदान्यात् त्वत्तोऽन्यत् न कामये, यावदर्थप्रतिग्रहवान् विद्वान् पापं न प्राप्नोति।।१७।। *बलिरुवाच* – हे ब्राह्मणसुत! अहो, तव वाचो वृद्धसम्मताः, तथापि त्वं

त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ।।१८।। मां वचोभिः समाराध्य लोकाना-
मेकमीश्वरम्। पदत्रयं वृणीते योऽबुद्धिमान् द्वीपदाशुषम् ।।१९।। न पुमान् मामुपव्रज्य
भूयो याचितुमर्हति। तस्माद् वृत्तिकरीं भूमिं बटो कामं प्रतीच्छ मे ।।२०।।
श्रीभगवानुवाच – यावन्तो विषयाः श्रेष्ठास्त्रिलोक्यामजितेन्द्रियम्। न शक्नुवन्ति
ते सर्वे प्रतिपूरयितुं नृप ।।२१।। त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते। नववर्ष-
समेतेन सप्तद्वीपवरेच्छया ।।२२।। सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः। अर्थैः
कामैर्गतां नान्तं तृष्णाया इति नः श्रुतम् ।।२३।। यदृच्छयोपपन्नेन संतुष्टो वर्तते
सुखम्। नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ।।२४।। पुंसोऽयं संसृतेर्हेतुर-
संतोषोऽर्थकामयोः। यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः ।।२५।। यदृच्छालाभ-
तुष्टस्य तेजो विप्रस्य वर्धते। तत् प्रशाम्यत्यसंतोषादम्भसेवाशुशुक्षणिः ।।२६।।
तस्मात् त्रीणि पदान्येव वृणे त्वद् वरदर्षभात्।

।। सङ्ग्रहोक्तिः ।।

बालो बालिशमतिरत एव स्वार्थं प्रति यथार्थतयाऽबुधोऽसि ।।१८।। लोकानामद्वितीयं समृद्धं जम्ब्वादेर्द्वीपस्य दातारं मां वचोभिः समाराध्य यो भवान् पदत्रयं भूभागं वृणीते, ततोऽबुद्धिमान् बालिशमतिर्भवान् ।।१९।। हे बटो! मां याचित्वा कश्चिदपि पुमान् भूयोऽन्यं याचितुं नार्हति, तस्माद् यथेच्छं वृत्तिकरीं विपुलां भूमिं मत्तः प्रतिगृहाण ।।२०।। *श्रीभगवानुवाच* – हे नृप! त्रिलोक्यां यावन्तो देशाः श्रेष्ठा ते सर्वेऽप्यजितेन्द्रियं पुरुषमलं बुद्धिं कर्तुं न शक्नुवन्ति ।।२१।। त्रिभिः पादैरसन्तुष्टः पुमान् सप्तद्वीपानां वराणामिच्छया नववर्षसमेतेन जम्बूद्वीपेनाऽपि न पूर्यते ।।२२।। पृथुगयादयो नृपाः सप्तद्वीपाधिपतयोऽपि अर्थैः कामैश्च तृष्णाया अन्तं न गताः, इत्यस्माभिः श्रुतम् ।।२३।। दैवलब्धेन वस्तुना सन्तुष्टः पुमान् सुखं वर्तते, अजितेन्द्रियः पुमान् संप्राप्तैस्त्रिभिर्लोकैरप्यसंतुष्टः सन् सुखं न वर्तते ।।२४।। अर्थकामयोरसंतोषः, स एवायं पुंसः संसृतेर्हेतुः, यदृच्छयोपपन्नेन संतुष्टः, स मुक्तये स्मृतः ।।२५।। यदृच्छालाभेन संतुष्टस्य विप्रस्य तेजो वर्द्धते, असन्तोषात् तत्तेजोऽम्भसा वह्निरिव प्रशाम्यति ।।२६।। तस्माद् वरदर्षभात् तत्त्वतस्त्रीणि पदान्येव वव्रे, एतावतैवाहं कृतार्थः, वित्तं तु यावत् प्रयोजनमेव –

एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम्।।२७।। *श्रीशुक उवाच* - इत्युक्तः स हसन्नाह वाञ्छातः प्रतिगृह्यताम्। वामनाय महीं दातुं जग्राह जलभाजनम्।।२८।। विष्णवे क्ष्मां प्रदास्यन्तमुशना असुरेश्वरम्। जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः।।२९।। *शुक्र उवाच* - एष वैरोचने साक्षाद् भगवान्विष्णुरव्ययः। कश्यपाद-दितेर्जातो देवानां कार्यसाधकः।।३०।। प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता। न साधु मन्ये दैत्यानां महानुपगतोऽनयः।।३१।। एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम्। दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः।।३२।। त्रिभिः क्रमैरिमाँल्लोका-न्विश्वकायः क्रमिष्यति। सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम्।।३३।। क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः। खं च कायेन महता तार्तीयस्य कुतो गतिः।।३४।। निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम्। प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान्।।३५।। न तद्दानं प्रशंसन्ति येन वृत्तिर्विपद्यते। दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः।।३६।। धर्माय यशसेऽर्थाय कामाय स्वजनाय च। पञ्चधा विभज-

---

।। सङ्ग्रहोक्तिः।।

सुखदम्।।२७।। *श्रीशुक उवाच* - इत्थमुक्तः स बलिर्हसन्नाह, हे बटो! तर्हि यद् वाञ्छितं तद् प्रतिगृह्यताम्, एवमुक्त्वा वामनाय महीं दातुं जलभाजनं जग्राह।।२८।। विष्णवे महीं प्रदास्यन्तमसुरेश्वरं शिष्यं बलिं ज्ञानिनां वरः शुक्रो विष्णोश्चिकीर्षितं जानन् सन् प्राह।।२९।। *शुक्र उवाच* - हे वैराचने! एष वामनोऽविनाशी विष्णुः साक्षाद् भगवान् एव, कश्यपाद् अदित्यां जातो देवानां कार्यसाधकोऽस्ति।।३०।। स्वार्थमजानता त्वया विष्णवे यत् प्रतिश्रुतं, तदहं साधु न मन्ये, यतो दैत्यानां महानन्यायो दुःखावसर उपगतः।।३१।। मायामाणवक एष हरिः ते स्थानमैश्वर्यं श्रियं तेजः श्रुतं यशश्च त्वत्त आच्छिद्य शक्राय दास्यति।।३२।। एष विश्वरूपो भूत्वा त्रिभिः पादविन्यासैरिमान् त्रीन् लोकान् क्रमिष्यति, अतः सर्वस्वं विष्णवे दत्त्वा, हे मूढ! भवान् कथं वर्त्तिष्यते।।३३।। हे प्रभो! एकेन पदा भूमिं, द्वितीयेन पदा दिवं, महता देहेनाऽन्तरिक्षं च क्रमतो भगवतस्तृतीतपदविन्यासस्य का गतिः?।।३४।। प्रतिश्रुतमदातुस्ते नरकेऽवस्थितिं मन्ये, हि यतः यो भवान् प्रतिश्रुतस्य प्रतिपूरयितुमसमर्थः।।३५।। येन दानेन जीविका विपद्यते तद्दानं बुधा न प्रशंसन्ति, यतो लोके जीविकावतः पुंसः दानं, यज्ञः, तपः,

न्वित्तमिहामुत्र च मोदते ।।३७।। अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम । सत्यमोमिति यत् प्रोक्तं यन्नेत्याहानृतं हि तत् ।।३८।। सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते। वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ।।३९।। तद् यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात्। एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ।।४०।। पराग् रिक्तमपूर्णं वा अक्षरं यत् तदोमिति। यत् किञ्चिदोमिति ब्रूयात् तेन रिच्येत वै पुमान् ।।४१।। भिक्षवे सर्वमों कुर्वन्नालं कामेन चात्मने। अथैतत् पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः। सर्वं नेत्यनृतं ब्रूयात् स दुष्कीर्तिः श्वसन्मृतः ।।४२।। *स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे। गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ।।४३।।*

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे एकोनविंशोऽध्यायः ।।१९।।

।। सङ्ग्रहोक्तिः ।।

कर्म च भवति ।।३६।। यः पुमान् स्ववित्तं धर्माय, यशसे, अर्थाय, कामाय, स्वजनाय च पञ्चधा विभजेत् स जन इहामुत्र च मोदते ।।३७।। हे असुरसत्तम्! अत्रापि बह्वृचैर्यद् कथितं, तत् कथयतो मत्तः शृणु - ओमित्यङ्गीकारेण यत् प्रोक्तं तत् सत्यं, न इति यद् आह तद् अनृतं हि ।।३८।। देहरूपस्य वृक्षस्य सत्यं फलपुष्पं विद्यात् इति श्रूत्या गीयते, देहवृक्षेऽजीवति तत् पुष्पफलं न स्यात् सत्यं नश्यति, अस्य देहरूपिणो वृक्षस्य मूलमसत्यम् ।।३९।। यथा वृक्ष उत्खातमूलः शुष्यति, अचिरादेव पतति च एवं नष्टानृतो देहः सद्यः शुष्यत् सर्वस्वदाने देहः शुष्येत्, न संशयः ।।४०।। "ओम्" इत्यक्षरस्य अर्थः यत् किंचित् इति ज्ञेयः, यत् किंचित् दास्यामि इति अर्थकरणे दाता किंचिदर्थेन सहाऽवशिष्येत, दत्तावशिष्टेनाऽऽत्मनोवृत्तिं कल्पयन् दाता जीवेत् ।।४१।। भिक्षवे "ओम्" "सर्वं दास्यामि" इति वदतः पुंसो देहनिर्वाहेऽपि संशयः स्यात्, अपि च यस्तु नित्यं मम किंचिदपिनास्ति इति योऽनृतं ब्रूयात् स दुष्कीर्त्तिः जीवन् मृत उच्यते ।।४२।। अतो वृत्तिसंकटादिष्वनृतं न दोषाय इत्याह- स्त्रीषु, नर्मसु, विवाहेषु, वृत्यर्थेषु, प्राण संकटे, गवां ब्राह्मणानां च हितार्थे, कस्यचिद् हिंसायां प्राप्तायां सत्यां च, एष्वर्थेषु असत्यं निन्दितं न भवति ।।४३।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यामेकोनविंशोऽध्यायः ।।१९।।

अथ विंशोऽध्यायः ।।२०।।

श्रीशुक उवाच - बलिरेवं गृहपतिः कुलाचार्येण भाषितः। तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम् ।।१।। *बलिरुवाच* - सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम्। अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ।।२।। स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम्। प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ।।३।। *न ह्यसत्यात् परोऽधर्म इति होवाच भूरियम्। सर्वं वोढुमलं मन्य ऋतेऽलीकपरं नरम् ।।४।।* नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात्। न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात् ।।५।। यद् यद्धास्यति लोकेऽस्मिन् संपरेतं धनादिकम्। तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ।।६।। श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः। दध्यङ्-शिबिप्रभृतयः को विकल्पो धरादिषु ।।७।। यैरियं बुभुजे ब्रह्मन्दैत्येन्द्रैरनिवर्तिभिः

।। सङ्ग्रहोक्तिः ।।

अथ विंशोऽध्यायः ।।२०।।

बलेर्दानमवाप्य वामनस्य शरीरवृद्धिः

श्रीशुक उवाच - हे नृप! कुलाचार्येण शुक्रेणत्थं भाषितो यजमानो बलिः क्षणं तूष्णीमवस्थायाऽवहितः सन् गुरुमुशनसमुवाच ।।१।। *बलिरुवाच* - भवता प्रोक्तं यत्, तत् सत्यं, अयं भवता कथितो गृहस्थानां धर्मः, यो गृहस्थानां कर्हिचिद् अर्थं, कामं, यशः, वृत्तिं च न बाधते ।।२।। स चाहं गृहस्थः प्रह्लादपौत्रः धूर्तवत् "ददामि" इति प्रतिश्रुत्य वित्तलोभेन द्विजं कथं निरोकरोमि? ।।३।। असत्यात् परोऽधर्मो न हि, इयं भूः स्फुटमुवाच - अनृतवादिनं नरं विना सर्वं मेरुमन्दरादिकं वोढुमलं मन्ये ।।४।। अहं यथा विप्रविषयेऽनृतवदनाद् बिभेमि तथा निरयान्नबिभेमि, दारिद्र्यात् दुःखसमुद्रमज्जनात् इन्द्रादिपदपतनात् तथा मृत्योरपि न बिभेमि ।।५।। यद् यद् धनादिकं तत् सर्वं मृतं पुरुषमस्मिन्नेव लोके त्यक्ष्यति, तेनार्थेन दत्तेन चेद् विप्रो न तुष्येत् तर्हि तस्याऽर्थस्य त्यागे-दाने किं निमित्तम्? ।।६।। दध्यङ्शिबिप्रभृतयः साधवो दुस्त्यजैः प्राणैरपि भूतानां श्रेयोऽकुर्वन्, तर्हि धरादिषु को विकल्पः? ।।७।। हे ब्रह्मन्! युद्धात् कदाचिदपि निवृत्तिमप्राप्तैरस्मत् पितामहादिभिरियं भूः सम्यगुपभुक्ता, तेषां लोकानपि

तेषां कालोऽग्रसील्लोकान् न यशोऽधिगतं भुवि ।।८।। सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः। न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः।।९।। मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः। कुतः पुनर्ब्रह्मविदां भवादृशां ततो बटोरस्य ददामि वाञ्छितम् ।।१०।। यजन्ति यज्ञक्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः। स एष विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने।।११।। यदप्यसावधर्मेण मां बध्नीयादनागसम्। तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ।।१२।। एष वा उत्तमश्लोको न जिहासति यद् यशः। हत्वा मैनां हरेद् युद्धे शयीत निहतो मया।।१३।। *श्रीशुक उवाच* – एवमश्रद्धितं शिष्यमनादेशकरं गुरुः। शशाप दैवप्रहितः सत्यसन्धं मनस्विनम् ।।१४।। दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया। मच्छासनातिगो यस्त्वमचिराद् भ्रश्यसे श्रियः।।१५।। एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान्। वामनाय ददावेनामर्चित्वोदकपूर्वकम् ।।१६।।

।। सङ्ग्रहोक्तिः ।।

कालोऽग्रसीत्, तैर्भुवि लब्धं यशो नाऽग्रसीत् ।।८।। हे विप्रर्षे! यथा युद्धादनिवृत्तास्तनुत्यजः सुलभाः, तथा सत्पात्रे संप्राप्ते श्रद्धया ये धनत्यजः दातारस्ते सुलभा न ।।९।। अर्थिनामाकांक्षापूरणेन प्राप्तं दैन्यं तु विवेकिनो दयालोः पुंसः शोभनमेव, कुतः पुनर्भवादृशां कामपूरणेन? ततोऽस्य बटोर्वाञ्छितं ददामि ।।१०।। हे मुन! वेदोक्तयज्ञाद्यनुष्ठानकुशला भवन्त आदृताः सन्तो यज्ञक्रतुभिर्यं विष्णुं यजन्ति, स एष धृतबटुवेषो विष्णुरधुना वरदोऽस्तु वा शत्रुरस्तु सर्वथाऽमुष्मै क्षितिं दास्यामि ।।११।। निरपराधं मामसौ यद्यधर्मेण बध्नीयात् तथापि भीतं धृतविप्ररूपमेनं रिपुं सन्तमपि न हनिष्यामि ।।१२।। यदि निश्चयेनैष विष्णुस्तर्हि स स्वकीर्त्तिं त्यक्तुं नेच्छेत्, किंतु युद्धे मां हत्वा क्षितिं हरेत्, मां हन्तुमसमर्थश्चेत् तद्रहो मया निहतो युद्धे शयीत ।।१३।। *श्रीशुक उवाच* – इत्थमश्रद्धितमनादेशकरं शिष्यं बलिं गुरुः शुक्रः सत्यप्रतिज्ञं मनस्विनं जानन्नपि दैवप्रेरितः सन् शशाप ।।१४।। पण्डितमानी त्वमज्ञ एवं स्तब्धोऽसि, मच्छासनातिगस्त्वमस्मदुपेक्षयाऽचिरादेव त्रैलोक्याधिपत्यलक्ष्म्या भृश्यसे ।।१५।। एवं गुरुणा शप्तोऽपि सत्यान्न चलितो महान् दृढसंकल्पो बलिरादौ वामनमर्चित्वा जलगृहणपूर्वकं वामनाय

विन्ध्यावलिस्तदाऽऽगत्य पत्नी जालकमालिनी। आनिन्ये कलशं हैममवनेजन्यपां भृतम् ।।१७।। यजमानः स्वयं तस्य श्रीमत् पादयुगं मुदा। अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ।।१८।। तदाऽसुरेन्द्रं दिवि देवतागणा गन्धर्वविद्याधरसिद्ध-चारणाः। तत्कर्म सर्वेऽपि गृणन्त आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः ।।१९।। नेदुर्मुहु-र्दुन्दुभयः सहस्रशो गन्धर्वकिंपूरुषकिन्नरा जगुः। मनस्विनानेन कृतं सुदुष्करं विद्वानदाद् यद् रिपवे जगत्त्रयम् ।।२०।। तद् वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम्। भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ।।२१।। काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत्। ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ।।२२।। रसामचष्टाङ्घ्रितलेऽथ पादयोर्महीं महीध्रान्पुरुषस्य जङ्घयोः। पतत्त्रिणो जानुनि विश्वमूर्त्तेरुर्वोर्गणं मारुतमिन्द्रसेनः ।।२३।।

।। सङ्ग्रहोक्तिः ।।

भूमिं ददौ ।।१६।। तदा बलेः पत्नी विन्ध्यावली जालकमालिनी सती तत्राऽऽगत्य पादप्रक्षालनाय जलभृतं हैमं कलशमानिन्ये ।।१७।। ततो यजमानो बलिर्वामनभगवतः श्रीमत्पादयुगं मुदा प्रक्षाल्य विश्वपावकं तज्जलं स्वयं मूर्द्ध्न्यावहत् ।।१८।। तदा दिवि स्थिता देवगणा गन्धर्वविद्याधरसिद्धचारणाः सर्वेऽपि निर्भयाः सन्तस्तत् बलेर्दानरूपं कर्म आर्जवं च प्रशंसन्तः मुदान्विताः सन्तोऽसुरेन्द्रं प्रसूनवर्षैर्ववृषुः ।।१९।। मुहुः सहस्रशो दुन्दुभयो नेदुः, गन्धर्वकिंपूरुष-किन्नरा मनस्विनाऽनेन बलिनेतरदुष्करं कृतम्, स्वयं जानन्नपि त्रिविक्रमाय जगत्त्रयमदात् इति तद्यशो जगुः ।।२०।। एवं सर्वेषु कथयत्सु सत्सु अनन्तस्य हरेस्तत् गुणत्रयात्मकं वामनं रूपमद्भुततयाऽवर्द्धत, भूः, आकाशं, दिशः, द्यौः, अतलादीनि सप्त भूविवराणि, पयोधयः, तिर्यञ्चः, नराः, देवाः, ऋषयश्चेत्येते यस्मिन् स्थितवन्तस्तथाविधं तदवर्द्धत ।।२१।। तदा ऋत्विजः आचार्याः सदस्याश्चैतैः सह बलिः महाविभूतेः तस्य भगवतो गुणत्रयात्मके देहे पञ्चभूत-इन्द्रिय-विषय-आशया-जीवाश्चैतैः युक्तं त्रिगुणात्मकमेतद् विश्वं ददर्श ।।२२।। इन्द्रसेनो बलिः विश्वमूर्तेर्भगवतो पादतले रसातलमपश्यत्, पादयोर्महीं, जङ्घयोः पर्वतान्, जानुनि

सन्ध्यां विभोर्वाससि गुह्य ऐक्षत् प्रजापतीञ्जघने आत्ममुख्यान्। नाभ्यां नभः कुक्षिषु सप्तसिन्धूनुरुक्रमस्योरसि चर्क्षमालाम् ।।२४।। हृद्यङ्ग धर्मं स्तनयोर्मुरारेऋतं च सत्यं च मनस्यथेन्दुम्। श्रियं च वक्ष्यस्यरविन्दहस्तां कण्ठे स सामानि समस्त-रेफान् ।।२५।। इन्द्रप्रधानानमरान् भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्द्ध्नि। केशेषु मेघाञ्छ्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ।।२६।। वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु। अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ।।२७।। स्पर्शे च कामं नृप रेतसोऽम्भः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम्। छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च ।।२८।। नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च। प्राणेषु गात्रे स्थिरजङ्गमानि सर्वाणि भूतानि ददर्श वीरः ।।२९।। सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मल-मापुरङ्ग। सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ।।३०।।

।। सङ्ग्रहोक्तिः ।।

पक्षिणः, ऊर्वोः मरुद्गणमपश्यत् ।।२३।। उरुक्रमस्य विभोर्वाससि संध्याम्, गुह्ये प्रजापतीन्, जघने बलिमुख्यान् असुरान्, नाभ्यां नभः, कुक्षिषु सप्तसमुद्रान्, उरसि नक्षत्रमालां च ददर्श ।।२४।। हे राजन्! मुरारेः हृदि धर्मं, स्तनयोः ऋतं सत्यं च,मनसि चन्द्रं, वक्षसि कमलहस्तां लक्ष्मीं, कण्ठे सामानि समस्तशाद्बांश्चैक्षत् ।।२५।। भुजेषु शक्रमुख्यान् सुरान्, तत्कर्णयोः ककुभः, मूर्द्ध्नि द्यौः, केशेषु मेघान्, नासिकायां वायुं, अक्ष्णोः सूर्यं, मुखे वह्निं चैक्षत् ।।२६।। किं च परमपुरुषस्य वाण्यां छंदांसि, रसनेन्द्रिये वरुणं, भ्रुवोर्निषेधात्मकं विध्यात्मकं च शास्त्रं, पक्ष्मसु रात्रिंदिवं, ललाटे मन्युं, अधोरोष्ठे लोभमैक्षत् ।।२७।। हे नृप! स्पर्शेन्द्रिये कामं, रेतसि जलं, पृष्ठेऽधर्मं, पादन्यासेषु यज्ञं, छायासु मुत्युं, हसितेषु मायां, तनूरुहेष्वौषधिजातीश्च ऐक्षत् ।।२८।। नाडीषु नदीः, नखेषु शिलाः, बुद्धौ ब्रह्माणं, प्राणेष्विन्द्रियेषु च देवगणान् ऋषींश्च, गात्रे चराचराणि सर्वाणि भूतानि, वीरो बलिर्ददर्श ।।२९ ।। हे राजन्! इत्थं सर्वात्मनि भगवतीदं भुवनं निरीक्ष्य सर्वेऽसुराः दुःखं किमेतदित्याश्चर्यं प्रापुः, असह्यतेजः सुदर्शनं चक्रं शार्ङ्गं धनुश्चोपतस्थतुः ।।३०।।

पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी। विद्याधरोऽसिः शतचन्द्रयुक्तस्तूणोत्तमावक्षयसायकौ च।।३१।। सुनन्दमुख्या उपतस्थुरीशं पार्षत्प्रधानाः सहलोकपालाः। स्फुरत्किरीटाङ्गदमीनकुण्डलश्रीवत्सरत्नोत्तम-मेखलाम्बरः।।३२।। मधुव्रतस्रग्वनमालया वृतो रराज राजन् भगवानुरुक्रमः। क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः।।३३।। पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि। त्रिविक्रमस्याङ्घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः।।३४।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे विंशोऽध्यायः।।२०।।

।। सङ्ग्रहोक्तिः।।

पर्जन्यघोषः पाञ्चजन्यो जलजः, तरस्विनी कौमोदकी विष्णुगदा, शतचन्द्रयुक्तः खेटः, विद्याधराभिधः (नन्दकः) असिः, अक्षयसायकौ तुणिरौ चोपतस्थतुः।।३१।। सुनन्दमुख्या सहलोकपालाः पार्षदा ईशमुपतस्थुः, तदा हे राजन्! स्फुरत्किरीटाङ्गदमीनकुण्डलः श्रीवत्सवक्षाः उत्तम मेखलाम्बरः, भ्रमरगुञ्जितवनमालया वृतः भगवानुरुक्रमो रराज, स भगवान् बलेः क्षितिमेकेन पदा विचक्रमे, शरीरेण नभो, बाहुभिर्दिशश्चाऽऽक्रान्तवान्।।३२-३३।। एवमाक्रम्य द्वितीयं पदं क्रमतो वामनस्य तदीयं त्रिविष्टपमण्वपि जातम्, तृतीयाय पदाय तु बलेर्वसुमती किंचिदपि नासीत्, उरुक्रमस्य चरण उपर्युपरि गच्छन् सन् महर्जनाभ्यामथ तपसश्च परं गतः अर्थात् सत्यलोकं प्राप्त आसीत्।।३४।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां विंशोऽध्यायः।।२०।।

अथैकविंशोऽध्यायः ।।२१।।

श्रीशुक उवाच - सत्यं समीक्ष्याब्जभवो नखेन्दुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात्। मरीचिमुख्या ऋषयो बृहद्व्रताः सनन्दनाद्या नरदेव योगिनः ।।१।। वेदोपवेदा नियमान्विता यमास्तर्केतिहासाङ्गपुराणसंहिताः। ये चापरे योगसमीरदीपित-ज्ञानाग्निना रन्धितकर्मकल्मषाः। ववन्दिरे यत्स्मरणानुभावतः स्वायम्भुवं धाम गता अकर्मकम् ।।२।। अथाङ्घ्रये प्रोन्नमिताय विष्णोरुपाहरत् पद्मभवोऽर्हणोदकम्। समर्च्य भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपङ्केरुहसंभवः स्वयम् ।।३।। धातुः कमण्डलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र। स्वर्धुन्यभून्नभसि या पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्त्तिः ।।४।। ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः। सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ।।५।।

।। सङ्ग्रहोक्तिः ।।

अथ एकविंशोऽध्यायः ।।२१।।

बलेर्बन्धनम्

श्रीशुक उवाच - हे नरदेव! सत्यलोकं प्राप्तं तं वामनाङ्घ्रिं समीक्ष्य नखचन्द्रैर्हत-स्वधिष्ण्यद्युतिर्ब्रह्मा स्वपरिवारैर्वृतः सन्नभ्यगात्, तथा बृहद्वृताः सनन्दनाद्या योगिनो मरीचिमुख्या ऋषयश्चाभ्यगुः ।।१।। वेदाः, उपवेदाः, यमान्विता नियमाः, तर्क-इतिहास-अङ्ग-पुराण-संहिताः, अपरे च योगसमीरदीपितज्ञानाग्निना दग्धकर्मकलुषाः ये च भगवत्स्मरण-महिम्नाऽकर्मकं स्वायंभुवं धाम प्राप्ताः, ते सर्वेऽपि भगवदङ्घ्रिं ववन्दिरे ।।२।। विपुलकीर्त्तिर्ब्रह्मा स्वयं यन्नाभिकमलादुत्पनोऽभूत् तस्य विष्णोरूर्ध्वं प्रसृतं चरणं पूजयितुमर्घ्यादिकमुपाहरत्, एवं च सम्यगभ्यर्च्य भक्त्या तमस्तौषीत् ।।३।। हे नरेन्द्र! ब्रह्मणस्तत् कमण्डलुजलं भगवतः पादप्रक्षालनेन जातया पवित्रतया स्वर्धुन्याख्या नदी बभूव, या स्वर्धुनी भगवतो विशदा कीर्त्तिरिव नभसि प्रसरन्ती सती लोकत्रयं पवित्री करोति ।।४।। यथा पूर्वं वामनरूपेण संस्थिताय स्वनाथाय भगवते लोकनाथाः ब्रह्मादयः सानुगाः समादृताः सन्तः पूजोपहारानाजह्रुः ।।५।।

तोयैः समर्हणैः स्रग्भिर्दिव्यगन्धानुलेपनैः। धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलाङ्कुरैः
।।६।। स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः। नृत्यवादित्रगीतैश्च शङ्खदुन्दुभि-
निःस्वनैः।।७।। जाम्बवानृक्षराजस्तु भेरीशब्दैर्मनोजवः। विजयं दिक्षु सर्वासु
महोत्सवमघोषयत्।।८।। महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया। ऊचुः
स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः।।९।। न वा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः।
द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति।।१०।। अनेन याचमानेन शत्रुणा
बटुरूपिणा। सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्डस्य बर्हिषि।।११।। सत्यव्रतस्य सततं
दीक्षितस्य विशेषतः। नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः।।१२।। तस्मादस्य
वधो धर्मो भर्तुः शुश्रूषणं च नः। इत्यायुधानि जगृहुर्बलेरनुचराऽसुराः।।१३।। ते
सर्वे वामनं हन्तुं शूलपट्टिशपाणयः। अनिच्छतो बले राजन् प्राद्रवञ्जातमन्यवः
।।१४।। तानभिद्रवतो दृष्ट्वा दितिजानीकपान् नृप। प्रहस्यानुचरा विष्णोः
प्रत्यषेधन्नुदायधाः।।१५।।

।। सङ्ग्रहोक्तिः।।

ते सर्व अर्घ्यजलैर्दिव्यगन्धानुलेपन-धूप-दीप-स्रग्भिः, सुरभिलाजाक्षतफलाङ्कुरैः समर्हणैः पूजयामासुः।।६।।एवं च तद्वीर्यमिहमाङ्कितैः स्तवनैर्जयशब्दैः गीतवादित्रनृत्यैः शंखदुन्दुभिनिःस्वनैश्चोत्सवं चक्रुः।।७।। तदा मनोजवः ऋक्षराजो जाम्बवान् भेरीशब्दैः सर्वासु दिक्षु विजयं महोत्सवघोषं च कारयामास।।८।।त्रिपदकपटया याच्ञया दीक्षितस्य स्वभर्तुः सर्वां महीं हृतां दृष्ट्वाऽत्यमर्षिता असुरा ऊचुः।।९।।अयं वामनो द्विजो न भवति, मायाविनां वरो विष्णुरेव, द्विजरूपेण प्रतिच्छन्नोऽयं देवकार्यं चिकीर्षति।।१०।।याचनां कुर्वता बटुरूपिणा शत्रुणाऽनेन विष्णुना यज्ञे त्यक्तदुरात्मदण्डस्य नो भर्तुः सर्वस्वमपहृतम्।।११।। सततं सत्यव्रतस्य यज्ञदीक्षायां स्थितस्य ब्रह्मण्यस्य दयावतोऽनृतं भाषितुं न शक्यम्।।१२।। तस्माद् अस्य वामनस्य वध एव धर्मः तथा तदेव नो भर्तुः शुश्रूषणम्, इत्येवं वदन्तो बलेरनुचरा असुरा आयुधानि जगृहुः।।१३।। हे राजन्! सर्वे तेऽसुरा शूलपट्टिशपाणयो जातमन्यवः सन्तो बलेरनिच्छतः सतः वामनं हन्तुं प्राद्रवन्।।१४।।हे नृप! सन्मुखमागच्छतस्तान् दैत्ययूथपान्

नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः। कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट् ।।१६।। जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः। सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् ।।१७।। हन्यमानान् स्वकान् दृष्ट्वा पुरुषानुचरैर्बलिः। वारयामास संरब्धान् काव्यशापमनुस्मरन् ।।१८।। हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः। मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ।।१९।। यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये। तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ।।२०।। यो नो भवाय प्रागासीदभवाय दिवौकसाम्। स एव भगवानद्य वर्तते तद्विपर्ययम् ।।२१।। बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभि। सामादिभिरुपायैश्च कालं नात्येति वै जनः ।।२२।। भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः। दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः ।।२३।। एतान् वयं विजेष्यामो यदि दैवं प्रसीदति। तस्मात् कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ।।२४।।

।। सङ्ग्रहोक्तिः ।।

दृष्ट्वा प्रहस्य विष्णोरनुचरा उदायुधाः सन्तः प्रत्यषेधन् ।।१५।। नन्दः, सुनन्दः, जयः, विजयः, प्रबलः, बलः कुमुदः, कुमुदाक्षः, विश्वक्सेनः, गरुडश्च ।।१६।। जयन्तः, श्रुतदेवः, पुष्पदन्तः, सात्त्वतः, एते सर्वेऽतिशयितबला आसुरीं चमूं निजघ्नुः ।।१७।। तदा बलिः परमपुरुष पार्षदैर्हन्यमानानतिक्रुद्धानपि स्वकान् दृष्ट्वा शुक्रशापमनुस्मरन् सन् वारयामास ।।१८।। *बलिरुवाच* – हे विप्रचित्ते! हे राहो! हे नेमे! युष्माभिर्मे वचः श्रूयताम्, मा युध्यत, निवर्त्तध्वम्, यतोऽयं कालो नोऽनुकूलो न भवति ।।१९।। हे दैत्याः! यः कालात्मा भगवान् सर्वभूतानां सुखानुकूल्याय दुःखनिमित्ताय च प्रभुरस्ति, तं कालं पराक्रमैर्निराकर्त्तुं कश्चिदपि पुरुषः समर्थो न भवति ।।२०।। यः कालरूपो भगवान् पूर्वमस्माकमभ्युदयाय देवानामभवाय चाऽऽसीत्, सोऽद्य विपरीतो वर्त्तते ।।२१।। कश्चिदपि पुमान् सामर्थ्येन, सचिवैः, बुद्ध्या, दुर्गैः मन्त्रौषधादिभिः सामदिभिरुपायैश्च कालं नातिक्रमति ।।२२।। कालात्मना दैवेन वृद्धिंगतैर्भवद्भिरेते हरेरनुचरा बहुशो निर्जिता आसन्, त एवाद्या नो युधि जित्वा सिंहनादान् कुर्वन्ति ।।२३।। यदा दैवमस्माकमनुकूलं भविष्यति तदा वयमेतान् विजेष्यामः, तस्मात् योऽस्माकमानुकूल्याय –

श्रीशुक उवाच – पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः। रसां निविविशू राजन् विष्णुपार्षदताडिताः।।२५।। अथ तार्क्ष्यसुतो ज्ञात्वा विराट् प्रभुचिकीर्षितम्। बबन्ध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रती।।२६।। हाहाकारो महानासीद् रोदस्योः सर्वतो-दिशम्। गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना।।२७।। तं बद्धं वारुणैः पाशै-र्भगवानाह वामनः। नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप।।२८।। *श्रीभगवानुवाच* – पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर। द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय।।२९।। यावत् तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः। यावद् वर्षति पर्जन्यस्तावती भूरियं तव।।३०।। पदैकेन मया क्रान्तो भूर्लोकः खं दिशस्तनोः। स्वर्लोकस्तु द्वितीयेन पश्यतस्ते मयात्मना।।३१।। प्रतिश्रुतमदातुस्ते निरये वास इष्यते। विश त्वं निरयं तस्माद् गुरुणा चानुमोदितः।।३२।। वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः। यो विप्राय प्रतिश्रुत्य न तदर्पयतेऽर्थितम्।।३३।।

।। सङ्ग्रहोक्तिः ।।

कल्पते तं कालं प्रतीक्षध्वं।।२४।। *श्रीशुक उवाच* – हे राजन्! एवं भर्तुर्बलेर्निगदितं वचः श्रुत्वा दैत्यदानवयूथपा विष्णुपार्षदताडिताः सन्तो रसातलं निर्विविशुः।।२५।। अथ पक्षिराट् गरुडः प्रभुचिकीर्षितं ज्ञात्वा क्रतोः सोमाभिषवदिने बलिं वारुणैः पाशैर्बबन्ध।।२६।।सर्वशक्तिमता विष्णुनाऽसुरपतौ बलौ बद्ध्यमाने सति द्यावापृथिव्योः सर्वतो दिशं महान् हाहाकार आसीत् ।।२७।। हे नृप! नष्टश्रियं स्थिरप्रज्ञमुदारयशसं वारुणैः पाशैर्बद्धं तं बलिं वामनो भगवानाह।।२८।। *श्रीभगवानुवाच* – हे असुर! त्वया भूमेस्त्रीणि पदानि मह्यं दत्तानि, तत्र द्वाभ्यां पद्भ्यां सर्वा भूमिः क्रान्ता, अधुना तृतीयं पदमुपकल्पय।।२९।। असौ सूर्यः स्वकिरणै-र्यावत् भूमण्डलं तपति, तथा चन्द्रो यावदुडुभिः सह भूमण्डलं प्रकाशते तथा मेघो याचद् वर्षति तावत्येव तवेयं भूरस्ति।।३०।। सोऽयं कृत्स्नो भूर्लोको मया स्वेनैवैकपदाऽऽक्रान्तः, खं दिशश्च तन्वाऽऽक्रान्ताः, तव पश्यतः सत एव स्वकीयः स्वर्गलोको द्वितीयेन पदाऽऽक्रान्तः ।।३१।। प्रतिश्रुतं तृतीयं पदमदातुस्ते नरक एव वास इष्यते, प्रतिश्रुतस्याऽदानात् गुरुणा-ऽनुमोदितस्त्वं निरयं विश।।३२।। यः पुमान् विप्राय प्रतिश्रूत्य तत् प्रतिश्रुतं नाऽर्पयते, तस्य

विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना। तद् व्यलीकफलं भुङ्क्ष्व निरयं कतिचित् समाः।।३४।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे एकविंशोऽध्यायः।।२१।।

अथ द्वाविंशोऽध्यायः।।२२।।

श्रीशुक उवाच – एवं विप्रकृतो राजन् बलिर्भगवतासुरः। भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः।।१।। *बलिरुवाच* – यद्युत्तमश्लोक भवान् ममेरितं वचो व्यलीकं सुरवर्य मन्यते। करोम्यृतं तन्न भवेत् प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम्।।२।। बिभेमि नाहं निरयात् पदच्युतो न पाशबन्धाद् व्यसनाद् दुरत्ययात्। नैवार्थकृच्छ्राद् भवतो विनिग्रहादसाधुवादाद् भृशमुद्विजे यथा।।३।। पुंसां श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम्। यं न माता पिता भ्राता सुहृदश्चादिशन्ति हि।।४।।

।। सङ्ग्रहोक्तिः।।

मनोरथः प्रायशो वृथैव, तस्य स्वर्गो दूर एव, स्वयं नरके पतति।।३३।। आढ्यमानिना त्वयाऽहं विप्रलब्धः तस्माद् व्यलीकफलरूपं निरयं कतिचित् संवत्सरान् भुङ्क्ष्व।।३४।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यामेकविंशोऽध्यायः।।२१।।

अथ द्वाविंशोऽध्यायः ।।२२।।

बलेः सुतललोकप्रस्थानं तत्र च हरेस्तस्य द्वारपालत्वस्वीकृतिः

श्रीशुक उवाच – हे राजन्! एवं भगवता पूर्वं विप्रलब्धः सत्याच्चाल्यमानोऽपि बलिरचलितमनाः सन् गम्भीरं वचः प्रत्याह।।१।। *बलिरुवाच* – हे उत्तमश्लोक! मदुक्तं वचो भवान् यदि व्यलीकं मन्यते, तथापि हे सुरर्षभ! तदहं सत्यं करोमि, येन तत् प्रलम्भनं न भवेत्, निजं तृतीयं पदं मे शीर्ष्णि निधेहि।।२।। अहं यथाऽपकीर्तेरनृतभाषणाच्च भृशमुद्विजे तथा निरयात्, स्थानभ्रंशात् पाशबन्धात्, दुरत्ययाद् दुःखात्, धनव्ययात्, भवत्कृताद्विनिग्रहात् वा कस्मादपि न बिभेमि।।३।। हे हरे! योग्यतमेन कृतं दण्डमहं पुंसां श्लाघ्यतमं मन्ये, यतो –

त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः। यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत्।।५।। यस्मिन् वैरानुबन्धेन रूढेन विबुधेतराः। बहवो लेभिरे सिद्धिं यामु हैकान्तयोगिनः।।६।। तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा। बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे।।७।। पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसाधुवादः। भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा।।८।। किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः। किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः।।९।। इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम्। ध्रुवं प्रपेदे ह्यकुतोभयं जनाद् भीतः स्वपक्षक्षपणस्य सत्तमः।।१०।। अथाहमप्यात्मरिपोस्तवान्तिकं देवेन नीतः प्रसभं त्याजितश्रीः। इदं कृतान्तान्तिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते।।११।। *श्रीशुक उवाच* - तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः।

।। सङ्ग्रहोक्तिः।।

माता, पिता, भ्राता, सुहृदश्च यं दण्डं सर्वथा नैवार्पयन्ति।।४।। हे हरे! त्वं नूनमसुराणां परोक्षतया हितकारकः सर्वोत्कृष्टो गुरुः, यो भवान् अनेकमदैरन्धतां प्राप्तानां नस्तन्मदापनोदकं चक्षुरादिशत्।।५।। यस्मिन् त्वयि रूढवैरानुबन्धेन बहवो दैत्याः सिद्धिं लेभिरें, यां सिद्धिं तव ऐकान्तिका भक्ता लभन्ते।।६।। एवंभूतेन भूरिकर्मणा भवता निगृहीतः, वारुणैः पाशैर्बद्धश्चास्मि, अतो नातिव्रीडे, न च व्यथे।।७।। मम पितामहः प्रह्लादः भागवतानां संमतः विश्वविख्यातिं प्राप्तः, भवतः शत्रुणा स्वपित्रा हिरण्यकशिपुना नानाविधं दुःखं सम्प्रापितोऽपि त्वत्परमोऽभवत् ।।८।। योऽन्ते देहिनं जीवं जहाति, तेन देहेन मर्त्यस्य किम्? द्रव्यहारैः स्वजनाख्यदस्युभिरपि किम्? संसारहेतुभूतया जाययाऽपि किम्? इह संसारे मर्त्यस्य गेहे केवलमायुषो व्यय एव, न किंचित् सुखं भवति।।९।। इत्थं निश्चित्य भागवतश्रेष्ठ महान् अगाधबोधः स मम पितामहः संसारिजनप्रसंगाद् भीतः सन्नेव स्वपक्षविनाशकस्य भवतोऽकुतोभयं पादपद्मं ध्रुवं प्रपेदे।।१०।। अथाऽहमपि दैवेन बलात् त्याजितश्रीः, निजस्य रिपोस्तवाऽन्तिकं नीतः सन् साम्प्रतं त्वत्पादपद्मं प्रपद्ये, यया लक्ष्म्या ध्वस्तमतिः, पुमान् मृत्योः संनिहितवर्त्यपि जीवितमध्रुवमिति न बुद्ध्यते।।११।।

आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ।।१२।। तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम्। प्रांशुं पिशङ्गाम्बरमञ्जनत्विषं प्रलम्बबाहुं सुभगं समैक्षत ।।१३।। तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार पूर्ववत्। ननाम मूर्द्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ।।१४।। स तत्र हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम्। उपेत्य भूमौ शिरसा महामना ननाम मूर्द्ध्ना पुलकाश्रुविह्वलः ।।१५।। *प्रह्लाद उवाच* – त्वयैवं दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम्। मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ।।१६।। यया हि विद्वानपि मुह्यते यतस्तत् को विचष्टे गतिमात्मनो यथा। तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ।।१७।। *श्रीशुक उवाच* – तस्यानुशृण्वतो राजन् प्रह्लादस्य कृताञ्जलेः। हिरण्यगर्भो भगवानुवाच मधुसूदनम् ।।१८।।

।। सङ्ग्रहोक्तिः ।।

श्रीशुक उवाच – तस्य बलेरित्थं भाषमाणस्य सतः हे कुरुश्रेष्ठ! उदितश्चन्द्र इव प्रकाशमानो भगवत्प्रियः प्रह्लादस्तत्राऽऽजगाम ।।१२।।श्रिया विराजमानं, नलिनायतेक्षणं प्रांशु, पीताम्बरधरं, श्यामलं प्रलम्बबाहुं स्वभावसुन्दरमागतं स्वपितामहमिन्द्रसेनो बलिः समैक्षत ।।१३।। यतो बलिर्वरुणपाशबद्धोऽस्ति, अतस्तस्मै प्रह्लादाय पूर्ववत् समर्हणं न चक्रे, किंतु केवलं मूर्द्ध्ना ननाम, ततोऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ।।१४।। ततो महामनाः प्रह्लादो भागवतानां पतिं सुनन्दादिभिः पार्षदैः संसेव्यमानं तत्राऽऽसीनं वामनं निरीक्ष्य बलेः कृतमनुग्रहं चालोच्य पुलकाश्रुविह्वलः सन् शिरसा नमन्नेव तमुपेत्य भूमौ निपत्य मूर्द्ध्ना ननाम उवाच च ।।१५।। *प्रह्लाद उवाच* – त्वयैवाऽस्मै बलये महदैन्द्रं पदं दत्तम्, तदेवेदानीं हृतम्, यस्मात् श्रीरूपादात्ममोहनादयं विभ्रंशितः, सोऽयमस्य महान् अनुग्रह एव त्वया कृत इति मन्ये ।।१६।। स्वनियमतत्परो विद्वान् सन्नपि यया लक्ष्म्या मुह्यते तस्यां लक्ष्म्यां सत्यां कः पुमान् स्वस्वरूपं यथावत् पश्यति? न कोऽपि, अतः महोपकारकर्त्रे जगदीश्वरायाऽखिललोकसाक्षिणे नारायणाय तुभ्यं केवलं नमस्कर्तुं शक्नुमः ।।१७।। *श्रीशुक उवाच* – हे राजन्! बद्धाञ्जलेस्तस्य –

बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला। प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप॥१९॥ *विन्ध्यावलिरुवाच* – क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः। कर्तुः प्रभोस्तव किमस्यत आवहन्ति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः॥२०॥ *ब्रह्मोवाच* – भूतभावन भूतेश देवदेव जगन्मय। मुञ्चैनं हृतसर्वस्वं नायमर्हति निग्रहम्॥२१॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये। निवेदितं च सर्वस्वमात्मविक्लवया धिया॥२२॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम्। अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत्॥२३॥ *श्रीभगवानुवाच – ब्रह्मन् यमनुगृह्णामि तद्विशो विधुनोम्यहम्। यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते॥२४॥* यदा कदाचिज्जीवात्मा संसरन् निजकर्मभिः। नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥२५॥

॥ सङ्ग्रहोक्तिः॥

प्रह्लादस्याऽनुशृण्वतः सतः भगवान् ब्रह्मा मधुसूदनमुवाच॥१८॥ तदैव विन्ध्यावलिरपि वामनं किञ्चिद् विज्ञापयितुं प्रवृत्ता, तदाह – पतिं बलिं बद्धं वीक्ष्य साध्वी बलेरङ्गना भयविह्वला प्राञ्जलिरवाङ्गमुखी प्रणता च सती, हे नृप! वामनं बभाषे॥१९॥ *विन्ध्यावलिरुवाच* – हे परमेश्वर! त्वया स्वक्रीडार्थमिदं त्रिजगत् सृष्टं, तत्र त्वत्सृष्टे जगत्यपरे केचिद् दुर्धियः स्वत्वबुद्धिं कुर्युः, ते परित्यक्तलज्जा वादमात्रेणाऽपि स्वस्वामित्वरहिताः पुमांसः जगज्जन्मस्थितिविलयकर्त्रे तुभ्यं किं समर्पयन्ति? न किमपि॥२०॥ *ब्रह्मोवाच* – हे भूतस्रष्टः! हे भूतेश! हे देवदेव! हे जगच्छरीरक! हृतसर्वस्वमेनं विमुञ्च, अयं निग्रहं नार्हति॥२१॥ अनेन बलिना कृत्स्ना भूर्दत्ता, यज्ञादिकर्मणा संपदिताः स्वर्गादिलोकास्ते दत्ताः, एवं सर्वस्वं तुभ्यं निवेदितं तथाऽदीनया धिया देहश्च तुभ्यं दत्तः॥२२॥ सुधीः पुमान् यत्पादयोरर्घ्यजलं समर्प्य दुर्वाङ्कुरैरपि सतीं सपर्यां विधायोत्तमां गतिमपि प्राप्नोति, तदाऽसौ बलिः स्थिरचित्तः सन् त्रिलोकीं दत्तवान्, अतः कथं पीडां प्राप्नुयात्, तस्मादेनं मुञ्च॥२३॥ *श्रीभगवानुवाच* – हे ब्रह्मन्! अहं यमनुग्रहीतुमिच्छामि, तस्य वित्तमपहरामि, यस्य मदेन स्तब्धः पुमान् मदन्तरात्मकं लोकं मां च तिरस्करोति॥२४॥ एवं निजकर्मभिरिहलोके नानायोनिषु संचरन् निजकर्माधीनोऽयं

जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः। यद्यस्य न भवेत् स्तम्भस्तत्रायं मदनुग्रहः ।।२६।। मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः। सर्वश्रेयः प्रतीपानां हन्त मुह्येन्न मत्परः।।२७।। एष दानवदैत्यानामग्रणीः कीर्त्तिवर्धनः। अजैषीदजयां मायां सीदन्नपि न मुह्यति।।२८।। क्षीणरिक्थश्च्युतः स्थानात् क्षिप्तो बद्धश्च शत्रुभिः। ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः।।२९।। गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः। छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक्।।३०।। एष मे प्रापितः स्थानं दुष्प्रापममरैरपि। सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः।।३१।। तावत् सुतलमध्यास्तां विश्वकर्मविनिर्मितम्। यन्नाधयो व्याधयश्च क्लमस्तन्द्रा पराभवः। नोपसर्गा निवसतां संभवन्ति ममेक्षया।।३२।। इन्द्रसेन महाराज याहि भो भद्रमस्तु ते। सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः।।३३।। न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे। त्वच्छासनातिगान् दैत्यांश्चक्रं मे सूदयिष्यति।।३४।।

।। सङ्ग्रहोक्तिः ।।

जीवो यदा कदाचिद् मानुष्यं जन्म प्राप्नुयात्।।२५।। मनुष्यजन्मन्यपि जन्म-कर्म-वयो-रूप-विद्या-बुद्धि-धनादिभिर्यस्य पुरुषस्य मदो न भवेत्, सोऽयं मदस्याऽभाव एव मदनुग्रहो ज्ञेयः।।२६।। गर्वाविवेकादीनां कारणभूता इमे जन्मादयः सप्त श्रेयोमार्गे विघ्नरूपाः सन्ति, किन्तु मत्परायणो मद्भक्तः एभिर्जन्मादिभिर्न मुह्यति।।२७।। हे ब्रह्मन्! दैत्यदानावानामधिपतिरेष बलिः कीर्त्तिवर्द्धनः सन्नपि अजेयां मायामजैषीत्, एवं च मया बहु खेदं गमितोऽपि न मुह्यति।।२८।। असौ क्षीणधनः, स्थानच्युतः, शत्रुभिस्तिरस्कृतो बद्धः, ज्ञातिभिः परित्यक्तः सन्नपि, एवं विधां यातनां सम्प्रापितश्चापि - गुरुणा च शप्तः सन्नपि सत्यं न जहौ, मया छलैर्धर्म उक्तस्तथापि सुव्रतः सत्यवागयं तं धर्मं न त्यजति।।२९-३०।। अतो देवैरपि दुष्प्रापं देहावसाने मल्लोकमेष प्रापयिष्यते, जीवद्दशायां मदाश्रय एव सावर्णिमन्वन्तर इन्द्रो भविता।।३१।। सांप्रतमेष विश्वकर्मणा निर्मितं सुतलमधिवसतु, यत्र सुतले निवसतामाधयो व्याधयश्च मत्कृपाकटाक्षेण न संभवन्ति, एवं च ग्लानिः, तन्द्रा, पराभवोऽन्येप्युपद्रवाश्च न संभवन्ति।।३२।। भो इन्द्रसेन! महाराज! ज्ञातिभिः संपरिवृतस्त्वं स्वर्गिभिरपि प्रार्थ्यं सुतलं याहि, तत्र ते मङ्गलमेवाऽस्तु।।३३।। तत्र वसन्तं त्वामिन्द्रादयो लोकेशा नाऽभिभविष्यन्ति,

रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम्। सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान्॥३५॥ तत्र दानवदैत्यानां सङ्गात् ते भाव आसुरः। दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनङ्क्ष्यति॥३६॥

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे द्वाविंशोऽध्यायः॥२२॥

अथ त्रयोविंशोऽध्यायः॥२३॥

श्रीशुक उवाच - इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः। बद्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत्॥१॥ *बलिरुवाच* - अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः। यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः॥२॥ *श्रीशुक उवाच* - इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः। विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः॥३॥

॥ सङ्ग्रहोक्तिः॥

तत्र ये च त्वच्छासनातिगास्तान् दैत्यान् मे चक्रं सूदयिष्यति॥३४॥ सानुगं सपरिच्छदं त्वां सर्वेभ्योऽप्युपद्रवेभ्योऽहं रक्षिष्ये, किं च हे वीर! तत्र सुतले सदा त्वद् द्वारि वसन्तं मां भवान् दृक्ष्यते॥३५॥ किंच दानवदैत्यानां प्रसङ्गात् तव कथंचिज्जातोऽप्यासुरो भावो मत्प्रभावं दृष्ट्वा प्रतिहतः सन् विनङ्क्ष्यति॥३६॥

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां द्वाविंशोऽध्यायः॥२२॥

अथ त्रयोविंशोऽध्यायः॥२३॥

सपितामहस्य बलेः सुतललोकमनम्

श्रीशुक उवाच - इत्थमुक्तवन्तं पुराणपुरुषं वामनभवगन्तं भक्त्योत्कण्ठो हर्षाश्रुविह्वलेक्षणोऽखिलसाधुसंमतो महानुभावो बलिर्बद्धाञ्जलिः सन् गद्गदया गिराऽब्रवीत्॥१॥ *बलिरुवाच* - अहो, मया खलु प्रणमाय केवलमुद्यम एव कृतः, सोऽपि त्वया प्रपन्नभक्ताभिमतो गणितः, लोकपालैर्दैवैः पूर्वमप्राप्तस्त्वदनुग्रहो नीचे राजसेऽसुरे मय्यर्पितः॥२॥ *श्रीशुक उवाच* - एवं

एवमिन्द्राय भगवान् प्रत्यानीय त्रिविष्टपम्। पूरयित्वादितेः कामानशासत् सकलं जगत्।।४।। लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम्। निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत्।।५।। *प्रह्लाद उवाच* - नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते। यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरपि वन्दिताङ्घ्रिः।।६।। यत्पादपद्ममकरन्दनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः। कस्माद् वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः।।७।। चित्रं तवेहितमहोऽमितयोग-मायालीलाविसृष्टभुवनस्य विशारदस्य। सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः।।८।। *श्रीभगवानुवाच* - वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम्। मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह।।९।। नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम्। मद्दर्शनमहाह्लादध्वस्तकर्मनिबन्धनः।।१०।। *श्रीशुक उवाच* - आज्ञां भगवतो राजन् प्रह्लादो बलिना सह।

।। सङ्ग्रहोक्तिः ।।

हरिमुक्त्वा पाशेभ्यो मुक्तः आदौ भगवन्तं प्रणम्य ततः ब्रह्माणं शिवं चानम्य बलिः प्रीतः सन् सानुगैरसुरैः सह सुतलं प्रवेष्टुमुद्यक्तो बभूव।।३।। तत इत्थं बलेः सकाशाद् गृहीतं त्रिविष्टपमिन्द्राय प्रददौ, एवमदितेः कामान् पूरयित्वा सकलं जगदुपेन्द्रः सन् पालयामास।।४।। ततः प्रह्लादो लब्धप्रसादं वंशधरं पौत्रं बलिं निर्मुक्तं दृष्ट्वा भक्तिप्रवणः सन्निदमब्रवीत्।।५।। *प्रह्लाद उवाच* - इमं तवाऽनुग्रहं विरिञ्चो न लेभे, न लक्ष्मीर्न च शर्वोऽपि लेभे, अपरे किमुत, यस्मात् विश्वाभिवन्द्यैर्ब्रह्मादिभिरप्यभिवन्दिताङ्घ्रिस्त्वमसुराणां नो द्वारपालो भवसि।।६।। हे शरणद! हे हरे! ब्रह्मादयो यस्य तव चरणारविंदसेवयैश्वर्याणि प्राप्नुवन्ति, एवंभूतस्य तव कृपादृष्टिगोचरतां कुमतयः खलजातयो वयं कस्माद्धेतोः प्रापिताः।।७।। हे हरे! स्वेच्छाविसृष्टा-नन्तभुवनस्य विशारदस्य सर्वात्मनः समदृशस्तव चरित्रमत्या-श्चर्यकरमस्ति, यतस्त्वं भक्तप्रियोऽसि, कल्पतरुवत् समाश्रितसंकल्पपूरकोऽसि।।८।। *श्रीभगवानुवाच* - हे वत्स! प्रह्लाद! तव भद्रमस्तु, सुतललोकं याहि, स्वपौत्रेण बलिना सह मोदमानः सन् ज्ञातीनां सुखमावह।।९।। तत्र सुतले नित्यं संनिहितं गदापाणिं मां त्वं द्रष्टाऽसि, तथा च

बाढमित्यमलप्रज्ञो मूर्द्ध्नाऽऽधाय कृताञ्जलिः।।११।। परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः। प्रणतस्तदनुज्ञातः प्रविवेश महाबलिम्।।१२।। अथाहोशनसं राजन् हरिर्नारायणोऽन्तिके। आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम्।।१३।। *श्रीवामन उवाच* – ब्रह्मन्! संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः। यत् तत् कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत्।।१४।। *शुक्र उवाच* – कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान्। यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः।।१५।। *मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः। सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव।।१६।।* तथापि वदतो भूमन् करिष्याम्यनुशासनम्। एतच्छ्रेयः परं पुंसां यत् तवाज्ञानुपालनम्।।१७।। *श्रीशुक उवाच* – अभिनन्द्य हरेराज्ञामुशना भगवानिति। यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह।।१८।। एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः। ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत् परैर्हृतम्।।१९।।

।। सङ्ग्रहोक्तिः ।।

मद्दर्शनाधिकाह्लादेन तव समस्तकर्मबन्धनानि ध्वस्तानि भविष्यन्ति।।१०।। *श्रीशुक उवाच* – हे राजन्! निर्मलधीः कृताञ्जलिः प्रह्लादो भगवत आज्ञां बाढमिति मूर्द्धना गृहीत्वा बलिना सहाऽऽदिपुरुषं वामनं परिक्रम्य, पुनः प्रणिपत्य, सर्वासुरचमूपतिर्भूत्वा तदनुज्ञातः सन् महाबिलं सुतलं प्रविवेश।।११-१२।। हे राजन्! अथ हरिर्नारायणो भगवान् समीपे सभायां ऋत्विजां मध्य आसीनं शुक्रमुवाच।।१३।। *श्रीवामन उवाच* – हे ब्रह्मन्! कर्म वितन्वतः शिष्यस्य बलेरन्तरं जातं छिद्रं न्यूनं तत् त्वं संधत्स्व, कमसु यद् वैषम्यं, तद् ब्राह्मणैर्दृष्टं सदेव समं भवेत्, किं पुनरनुष्ठितम्।।१४।। *शुक्र उवाच* – बलेः कर्मणो वैषम्यं कुतः? येन बलिना सर्वभावेन सर्वकर्मणामीश्वरो यज्ञेश्वरो भवान् पूजितः, अतः कर्मसु न वैषम्यम्।।१५।। मन्त्रतः तन्त्रतः, देशतः, कालतः, अर्हतः, पात्रतः, वस्तुतश्च यन्न्यूनं भवेत् तत्सर्वं तव नामसंकीर्त्तनं पूर्णं करोति।।१६।। यद्यप्येवं वैषम्यं नास्ति तथापि, हे भूमन्! वदतस्तवाऽनुशासनं करिष्यामि, यतस्तवाऽऽज्ञाया यत् पालनं तत् पुंसां परं श्रेयः।।१७।। *श्रीशुक उवाच* – इत्थं हरेराज्ञामभिनन्द्य भगवान् शुक्रो बलेर्यज्ञस्य न्यूनतां विप्रर्षिभिः सह समादधे।।१८।। हे राजन्! एवं यद्

त्रिदिवमसुरैरपहृतं, तत् वामनो हरिर्बलेः सकाशात् महीं भिक्षित्वा भ्रात्रे महेन्द्राय ददौ ।।१९।।
तदा प्रजापतिर्ब्रह्मा देवर्षिपितृभूमिपैः। दक्षभृग्वङ्गिरोमुख्यैः कुमारेण भवेन च ।।२०।।
कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च। लोकानां लोकपालानामकरोद् वामनं
पतिम् ।।२१।। वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः। मङ्गलानां व्रतानां च
कल्पं स्वर्गापवर्गयोः ।।२२।। उपेन्द्रं कल्पयाञ्चक्रे पतिं सर्वविभूतये। तदा सर्वाणि
भूतानि भृशं मुमुदिरे नृप ।।२३।। ततस्त्विन्द्रः पुरस्कृत्य देवयानेन वामनम्।
लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ।।२४।। प्राप्य त्रिभुवनं चेन्द्र
उपेन्द्रभुजपालितः। श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ।।२५।। ब्रह्मा शर्वः
कुमारश्च भृग्वाद्या मुनयो नृप। पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ।।२६।।
सुमहत् कर्म तद् विष्णोर्गायन्तः परमाद्भुतम्। धिष्ण्यानि स्वानि ते जग्मुरदितिं च
शशंसिरे ।।२७।। सर्वमेतन्मयाऽऽख्यातं भवतः कुलनन्दन। उरुक्रमस्य चरितं
श्रोतृणामघमोचनम् ।।२८।। पारं महिम्न उरु विक्रमतो गृणानो यः पार्थिवानि
विममे स रजांसि मर्त्यः। किं जायमान उत जात उपैति मर्त्य इत्याह मन्त्रदृगृषिः
पुरुषस्य यस्य ।।२९।।

।। सङ्ग्रहोक्तिः ।।

तदा प्रजापतिर्ब्रह्मा देव-ऋषि-पितृ-भूमिपैः, दक्ष-भृगु-अङ्गिरोमुख्यैः कुमारेण भवेन च सह कश्यपस्याऽदितेश्च प्रीत्यै सर्वभूतानां योगक्षेमार्थं वामनं लोकानां लोकपालानां च पतिमकरोत् ।।२०-२१।। वेदानां, सर्वदेवानां, धर्मस्य, यशसः, श्रियः, मङ्गलानां व्रतानां स्वर्गापवर्गयोश्च पालने समर्थमुपेन्द्रं सर्वेषां सुखसमृद्धये पतिमकरोत्, हे नृप! तदा सर्वाणि भूतानि नितरां मुमुदे ।।२२-२३।। ततो ब्रह्मणाऽनुमोदित इन्द्रस्तु लोकपालैः सह वामनं भगवन्तं देवयान उपावेश्य पुरस्कृत्य च दिवं निन्ये ।।२४।। तत इन्द्रस्त्रिभुवनं प्राप्य, उपेन्द्रभुज-पालितः परमया श्रिया जुष्टो गतसाध्वसः सन् मुमुदे ।।२५।। हे राजन्! ब्रह्मा, शर्वः, कुमारः, भृग्वाद्यामुनयः, पितरः, सर्वभूतानि, सिद्धाः, ये वैमानिकाश्च ते सर्वे विष्णोः परमाद्भुतं चरित्रं गायन्तः सन्तः स्वस्वस्थानानि जग्मुः, ते च सर्व अदितिं च शशंसिरे ।।२६-२७।। हे कुरुनन्दन!

य इदं देवदेवस्य हरेरद्भुतकर्मणः। अवतारानुचरितं शृण्वन् याति परां गतिम् ।।३०।। क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे। यत्र यत्रानुकीर्त्येत तत् तेषां सुकृतं विदुः।।३१।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे त्रयोविंशोऽध्यायः।।२३।।

अथ चतुर्विंशोऽध्यायः।।२४।।

राजोवाच **- भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः। अवतारकथामाद्यां मायामत्स्यविडम्बनम्।।१।। यदर्थमदधाद् रूपं मात्स्यं लोकजुगुप्सितम्। तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः।।२।। एतन्नो भगवन् सर्वं यथावद् वक्तुमर्हसि। उत्तमश्लोकचरितं सर्वलोकसुखावहम्।।३।।**

।। सङ्ग्रहोक्तिः ।।

श्रोतृणां दुरितहरं सर्वमेतद् वामनस्य भगवतश्चरित्रं भवते मयाऽऽख्यातम्।।२८।। उरुक्रमस्य विष्णोर्महिम्नः पारं गृणानः यः कविर्भवति स पृथिव्या इमानि रजांस्यपि गणयेत्, तथाहि यस्योरुक्रमस्य महिम्नः पारं जात उत जायमानो जुष्यमाणः, यो मर्त्यः उपैति उत किं नोपैति, तत् मन्त्रद्रष्टा वसिष्ठ आह।।२९।। यो यो देवदेवस्याद्भुतकर्मणो हरेरिदमवतारानुचरित्रं शृणुयात् स परां गतिं = मुक्तिं प्राप्नोति।।३०।। यत्र यत्र दैवे पित्र्ये मानुषे च क्रियमाणे कर्मणीदमवतारानुचरितमनुकीर्त्तयेत यदि, तर्हि तत् कर्म सुकृतमतिगुणं च भवेदिति तज्ज्ञा विदुः।।३१।। ***इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां त्रयोविंशोऽध्यायः।।२३।।***

अथ चतुर्विंशोऽध्यायः।।२४।।

भगवतो मत्स्यावतारः सत्यव्रतस्य रक्षा च

राजोवाच - हे भगवन्! मुने! अद्भुतकर्मणो हरेराद्यां मत्स्यावतारकथां श्रोतुमिच्छामि।।१।। परमेश्वरः सन्नपि कर्मवश्यजीववत् तमःस्वभावं दुःसहं लोकैर्निन्दितं च मात्स्यं रूपं यदर्थमधात् ।।२।। हे भगवन्! हे शुक! सर्वलोकसुखावहमेतदुत्तमश्लोकचरितं सर्वं मत्स्यावतारचरित्रं

सूत उवाच - इत्युक्तो विष्णुरातेन भगवान् बादरायणिः। उवाच चरितं विष्णोर्मत्स्यरूपेण यत् कृतम्।।४।। *श्रीशुक उवाच* - गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः। रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि।।५।। उच्चावचेषु भूतेषु चरन् वायुरिवेश्वरः। नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः।।६।। आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः। समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप।।७।। कालेनागतनिद्रस्य धातुः शिशयिषोर्बली। मुखतो निःसृतान् वेदान् हयग्रवोऽन्तिकेऽहरत्।।८।। ज्ञात्वा तद् दानवेद्रस्य हयग्रीवस्य चेष्टितम्। दधार शफरीरूपं भगवान् हरिरीश्वरः।।९।। तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान्। नारायणपरोऽतप्यत् तपः स सलिलाशनः ।।१०।। योऽसावस्मिन् महाकल्पे तनयः स विवस्वतः। श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः।।११।।एकदा कृतमालायां कुर्वतो जलतर्पणम्। तस्याञ्जल्युदके काचिच्छफर्येकाभ्यपद्यत।।१२।।सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत। उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः।।१३।।

।। सङ्ग्रहोक्तिः ।।

यथावन् नो वक्तुमर्हसि।।३।। *सूत उवाच* - विष्णुरातेन परीक्षितेत्थं पृष्टो भगवान् बादरायणिः शुको मत्स्यरूपेण यत् कृतं तद् विष्णोश्चरितमुवाच।।४।। *श्रीशुक उवाच* - गो-विप्र-सुर-साधूनां वेदानां च रक्षामिच्छन् धर्मादिपुरुषार्थचतुष्टयप्रदानार्थमपि परमेश्वरो मत्स्यादिमूर्तीर्धत्ते।।५।। उच्चावचेषु भूतेषु वायुरिव संचरन् परमेश्वरो मायाया गुणैरुच्चावचत्वं न भजते, कुतः परमेश्वरस्य जीववत् सत्वादिगुणपारवश्यत्वाभावात्।।६।। हे नृप! अतीतकल्पान्ते ब्रह्मणो निद्रानिमित्तेन जातो ब्राह्मो नैमित्तिकः लय आसीत्, तत्र लये भूरादयस्त्रयो लोका समुद्रोदके निमग्ना आसन्।।७।। कालेन निमित्तेनाऽऽगतनिद्रस्य शिशयिषोर्धातुर्मुखतो गलितान् वेदान् निकटे वर्तमानो बली हयग्रीवनामा दानवेन्द्रोऽहरत्।।८।। दानवेन्द्रस्य हयग्रीवस्य तच्चेष्टितं ज्ञात्वा हरिरीश्वरः शफरीरूपं दधार।।९।। चाक्षुषमन्वन्तरसमाप्त्यासन्ने काले कश्चित् सत्यव्रतो नाम महान् राजर्षिर्नारायणपरो केवलेन जलाशनेनैव वर्तमानः सन् तपोऽतप्यत्।।१०।। सत्यव्रतराजर्षेरञ्जल्युदके काचित् एकाऽल्पा शफरी अदृश्यत्।।१२।। हे भारत! तत द्रविडेश्वरः सत्यव्रतोऽञ्जलिगतां शफरीं तोयेन सह नदीतोये तत्याज।।१३।।

तमाह चातिकरुणं महाकारुणिकं नृपम्। यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल। कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले।।१४।। तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम्। अजानन् रक्षणार्थाय शफर्याः स मनो दधे।।१५।। तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः। कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम्।।१६।। सा तु तत्रैकरात्रेण वर्धमाना कमण्डलौ। अलब्ध्वाऽऽत्मावकाशं वा इदमाह महीपतिम्।।१७।। नाहं कमण्डलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे। कल्पयौकः सुविपुलं यत्राहं निवसे सुखम्।।१८।। स एनां तत आदाय न्यधादौदञ्चनोदके। तत्र क्षिप्ता मुहूर्त्तेन हस्तत्रयमवर्धत।।१९।। न म एतदलं राजन् सुखं वस्तुमुदञ्चनम्। पृथु देहि पदं मह्यं यत् त्वाहं शरणं गता।।२०।। तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे। तदावृत्यात्मना सोऽयं महामीनोऽन्ववर्धत।।२१।।

।। सङ्ग्रहोक्तिः।।

हे दीनवत्सल! इति संबोध्य तं महाकारुणिकं नृपं ज्ञातिघातिभ्यो जलचरेभ्यो भीतां दीनां मामस्मिन् सरिज्जले कथं विसृजसे! इत्यतिकरुणमाह।।१४।। शफर्यैवमुक्तो राजा स्वस्याऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं साक्षाद्भगवन्तमजानन् शफरीरक्षणाय मनोऽकरोत्।।१५।। ततस्तस्या दीनतरं वाक्यमाश्रुत्य महीपतिः सत्यव्रतो दयालुत्वाद् शफरीं कमण्डलुजले निधाय स्वाश्रमं प्रापयामास।।१६।। ततः स शफरी तु कमण्डलावेकरात्रेण वृद्धमाना सती तत्राऽवकाशमलब्ध्वा महीपतिमिदमाह।।१७।। हे राजन्! अस्मिन् कमण्डलौ सकृच्छ्रं वस्तुं नोत्सहे,अतः हे जितेन्द्रिय! मदर्थं विपुलं स्थानं कल्पय, यत्राऽहं यथासुखं निवसामि।।१८।। एवं शफर्युक्तः स राजा ततः कमण्डलोरेनामादाय विपुलकटाहोदके न्यधात्, तत्र क्षिप्ता शफरी मुहूर्त्तेन कालेन हस्तत्रयमवर्द्धत।।१९।। तथा वर्द्धमाना सा पुनराह – हे राजन्! मम यथा सुखं स्यात् तथा वस्तुमेतदुदञ्चनं न पर्याप्तम्, ततो मह्यं विपुलं स्थानं देहि, यतोऽहं त्वां शरणं गताऽस्मि।।२०।। हे राजन्! राज्ञा सत्यव्रतेन तत आदाय सा शफरी सरोवरे क्षिप्ता सती तत्सरोवरतोयमभिव्याप्य महामीनरूपा सत्यन्ववर्द्धत।।२१।।

नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः। निधेहि रक्षायोगेन ह्रदे मामविदासिनि ।।२२।। इत्युक्तः सोऽनयन्मत्स्यं तत्र तत्राविदासिनि। जलाशये सम्मितं तं समुद्रे प्राक्षिपज्झषम् ।।२३।। क्षिप्यमाणस्तमाहेदमिह मां मकरादयः। अदन्त्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ।।२४।। एवं विमोहितस्तेन वदता वल्गुभारतीम्। तमाह को भवानस्मान् मत्स्यरूपेण मोहयन् ।।२५।। नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि वा। यो भवान् योजनशतमह्नाऽभिव्यानशे सरः ।।२६।। नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः। अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ।।२७।। नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर। भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मा गतिर्विभो ।।२८।। सर्वे लीलावतारास्ते भूतानां भूतिहेतवः। ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ।।२९।। न तेऽरविन्दाक्ष पदोपसर्पणं मृषा भवेत् सर्वसुहृत्प्रियात्मनः।

।। सङ्ग्रहोक्तिः ।।

तथा वर्द्धमानो महामीन उवाच – हे राजन्! सलिलौकसो मे सुखाय वस्तुमेतत् सारसं जलं पर्याप्तं न, अत उपायेन मामनुपक्षये जले महाह्रदे क्षिप्त्वा मम रक्षां विधेहि ।।२२।। एवमुक्तः स सत्यव्रत उत्तरोत्तरविपुले जलाशये मत्स्यमनयत्, तत्राप्यसंमितं तं मत्स्यं समुद्रे प्राक्षिपत् ।।२३।। नृपेण क्षिप्यमाणो महामत्स्यस्तं सत्यव्रतमाह, हे वीर! इह समुद्रेऽतिबलाः मकरादयः सर्वे जलचरा मामत्स्यन्ति, अतो मां समुद्रे त्यक्तुं त्वं नाऽर्हसि ।।२४।। इत्थं सुन्दरं वचनं वदता तेन महामत्स्यरूपिणा भगवता विमोहितः सत्यव्रतो मत्स्यरूपेणाऽस्मान् मोहयन् भवान् कः? इति तमाह ।।२५।। त्वामिव एवं प्रभाववान् कश्चिदपि जलचरोऽस्माभिर्न दृष्टः, श्रुतोऽपि न वा, यो भवान् एकेनैव दिनेन शतयोजनपरिणाहवत् सर अभिव्यानशे।।२६ ।। अतस्त्वं केवलं मत्स्यो न किन्त्वमरः, तत्राऽपि निर्विकारः साक्षाद् भगवान् हरिर्नारायणोऽसि, भूतानामनुग्रहाय वारिचराणां रूपं धत्से ।।२७।। हे परमश्रेष्ठ! हे उत्पत्तिस्थितिलयकारणभूत! हे विभो! प्रपन्नानां भक्तानां नोऽन्तरात्मा गतिश्च त्वं भवसि ।।२८।। तव सर्वे लीलावतारा देवादीनां विभवहेतुभूता इति जानामि, किंतु यदर्थमेतद् मात्स्यं रूपं भवता धृतं तत्प्रयोजनमहं ज्ञातुमिच्छामि ।।२९।। हे अरविन्दाक्ष! देहाद्यभिमानिनां त्वदितरदेवानां च पदाश्रयणं यथा

यथेतरेषां पृथगात्मनां सतामदीदृशो यद् वपुरद्भुतं हि नः।।३०।। *श्रीशुक उवाच* – इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये। विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकान्तजनप्रियः प्रियम्।।३१।। *श्रीभगवानुवाच* – सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिन्दम। निमङ्क्ष्यत्यप्ययाम्भोधौ त्रैलोक्यं भूर्भुवादिकम् ।।३२।। त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा। उपस्थास्यति नौः काचिद् विशाला त्वां मयेरिता।।३३।। त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च। सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः।।३४।। आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः। एकार्णवे निरालोके ऋषीणामेव वर्चसा।।३५।। दोधूयमानां तां नावं समीरेण बलीयसा। उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना।।३६।। अहं त्वामृषिभिः साकं सहनावमुदन्वति। विकर्षन् विचरिष्यामि यावद् ब्राह्मी निशा प्रभो।।३७।। मदीयं महिमानं च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि।।३८।।

।। सङ्ग्रहोक्तिः ।।

व्यर्थं भवेत् तथा सर्वेषां प्रियस्य, सुहृदः,अन्तरात्मनश्च ते त्वत् साधूनां च श्रीपादारविन्दभजनं व्यर्थं न भवेत्, अत एतदद्भुतं मात्स्यं वपुर्नो दर्शितवान्।।३०।। *श्रीशुक उवाच* – उति ब्रुवाणं नृपतिं सत्यव्रतं प्रति प्रलयार्णवे विहर्तुकाम एकान्तजनप्रियः स्वभक्तानां प्रियं चिकीर्षुर्मत्स्यवपुर्जगदीश्वरो भगवानब्रवीत्।।३१।। *श्रीभगवानुवाच* – हे अरिंदम! अद्यतनादारभ्य सप्तमेऽहनि भूर्भुवादिकं त्रैलोक्यं प्रलयोदधौ मग्नं भविष्यति।।३२।।तदा प्रलयोदके त्रिलोक्यां लीयमानायां सत्यां कयाचिन्मया संप्रेरिता विशाला नौका त्वामुपस्थास्यति।।३३।। तदा त्वं सर्वा औषधीः नानाविधानि बीजानि च नाव्यारोप्य सप्तर्षिभिः सहितः सर्वसारेण युक्तः सन्।।३४।।प्रकाशरहित एकार्णवे ऋषीणां तेजसोपलक्षितां विपुलां नावमारुह्य दैन्यरहितः सन् विचरिष्यसि।।३५।। प्रचण्डेन प्रलयवायुना दोधूयमानां तां नावं तदोपस्थितस्य मम शृङ्गेऽकस्मादुपस्थितेन वासुकिना सर्पेण निबध्नीहि।।३६।। तदाऽहं प्रलयार्णवे ऋषिसहितां नावं विकर्षन्, हे प्रभो! यावद् ब्राह्मी निशा तावद् विचरिष्यामि।।३७।। परब्रह्मशब्दाभिहितं मयोपदिष्टं त्वत्कृतैः संप्रश्नैर्हृदि विवृतं मदीयं महिमानं चैव वेत्स्यसि।।३८।।

इत्थमादिश्य राजानं हरिरन्तरधीयत। सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत्
।।३९।। आस्तीर्य दर्भान् प्राक्कूलान् राजर्षिः प्रागुदङ्मुखः। निषसाद हरेः पादौ
चिन्तयन् मत्स्यरूपिणः।।४०।। ततः समुद्र उद्वेलः सर्वतः प्लावयन् महीम्।
वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत।।४१।। ध्यायन् भगवदादेशं ददृशे नावमागताम्।
तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः।।४२।। तमूचुर्मुनयः प्रीता राजन् ध्यायस्व
केशवम्। स वै नः संकटादस्मादविता शं विधास्यति।।४३।। सोऽनुध्यातस्ततो
राज्ञा प्रादुरासीन्महार्णवे। एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः।।४४।। निबध्य
नावं तच्छृङ्गे यथोक्तो हरिणा पुरा। वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम्।।४५।।
सत्यव्रत उवाच - अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः।
यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्महान्।।४६।।

।। सङ्ग्रहोक्तिः ।।

इत्थं राजानं सत्यव्रतमादिश्य मत्स्यरूपो भगवान् तत्रैवाऽन्तर्दधे, ततः स सत्यव्रतो यं कालं हृषीकेशो मत्स्यमूर्त्तिरादिशत् तं कालमन्वैक्षत।।३९।। राजर्षिः सत्यव्रतो दर्भान् प्रागग्रानास्तीर्य तेष्वीशान्या दिशोऽभिमुखो मत्स्यरूपिणो हरेः पादौ चिन्तयन् निषसाद।।४०।। ततस्तत्रैवं सत्यव्रते चिन्तयति सति तेन वर्षद्भिर्महामैघैर्वर्द्धमान उद्वेलः समुद्रः सर्वतो महीं प्लावयन् समदृश्यत।।४१।। तदा मत्स्यरूपिणो भगवत आदेशं ध्यायन् सत्यव्रतः संनिहितां नावं ददृशे, तत औषधिवीरुधो बीजानि चादाय सप्तर्षिभिः सह तां नावमारुरोह।।४२।। ततः प्रसन्नतायुक्ता मुनयः सत्यव्रतमूचुः - हे राजन्! केशवं मत्स्यभगवन्तं ध्यायस्व, सोऽस्मान् अस्मात् संकटात् रक्षिष्यति, सुखं च विधास्यति।।४३।। ततो राज्ञा सत्यव्रतेनाऽनुध्यातः स भगवान् एकशृङ्गधरो नियुतयोजनो हैमो मत्स्यः सन् महार्णवे प्रादुरासीत्।।४४।। ततो हरिणा पूर्वं यथोक्तः तथैव वरत्रेण वासुकिना महासर्पेण नावं मत्स्यशृङ्गे निबध्य, शृंखलितां कृत्वा संतुष्टचित्तः सन् मत्स्यमूर्त्तिं श्रीहरिं तुष्टाव।।४५।। *सत्यव्रत उवाच* - अनादिनाऽज्ञानेन येषां स्वात्मपरमात्म-याथात्म्यज्ञानं तिरोहितमासीत्, ये चाऽज्ञानमूलकेन परिश्रमेण दुःखिन आसन् ते जना यदृच्छया त्वत्कृपया सदाचार्यद्वारा त्वत्पादपद्मं संश्रिताः यं प्राप्नुयुः स मुक्तिदो भगवान् अस्माकं -

जनोऽबुधोऽयं निजकर्मबन्धनः सुखेच्छया कर्म समीहतेऽसुखम्। यत्सेवया तां विधुनोत्यसन्मतिं ग्रन्थिं स भिन्द्याद्धृदयं स नो गुरुः।।४७।। यत्सेवयाग्नेरिव रुद्ररोदनं पुमान् विजह्यान्मलमात्मनस्तमः। भजेत वर्णं निजमेव सोऽव्ययो भुयात् स ईशः परमो गुरोर्गुरुः।।४८।। न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम्। कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये।।४९।। सचक्षुरन्धस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः। त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः सुगतिं बुभुत्सताम्।।५०।। जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः। त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम्।।५१।। त्वं सर्वलोकस्य सुहृत् प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः। तथापि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि लुब्धकामः।।५२।।

।। सङ्ग्रहोक्तिः।।

परमगुरुरभवत्।।४६।। अबुधो निजकर्मवश्यो जनः सुखेच्छया दुःखपूर्णं कर्म करोति, किन्तु यस्य तव चरणसेवयाऽसद्बुद्धिं निरस्यति, स गुरुर्नो हृदयस्थां ग्रन्थिरूपामसन्मतिं भिन्द्यात्।।४७।। पुमान् यस्य सेवया आत्मनस्तमोवृत्तितिरोधायकं पुण्यपापात्मकं कर्म जह्यात्, यथा अग्निसेवनेन रजतं स्वर्णं वा निजमलं जहाति, तथा निजं स्वाभाविकं वर्णं प्राप्नोति, तद्वत् आत्माऽपि निजं स्वाभाविकं स्वरूपं प्राप्नोति, सोऽव्यय ईशोऽस्माकं गुरुः स्यात्।।४८।। हे भगवन्! त्वदितरे देवा गुरवश्च त्वत्प्रसादस्याऽयुतांशतमभागलेशमपि कर्तुं समर्था नैव भवन्ति, अतोऽन्यतोऽतिदुर्लभं मुक्तिप्रदं त्वां शरणं प्रपद्ये।।४९।। यथाऽन्धस्य पुंसः चक्षुष्मान् पुरतो नेता कृतः तथा अज्ञस्य जनस्य बुधो ज्ञानी गुरुः कृतः, शास्त्रेण योग्यतयाऽऽदिष्टः, अर्कप्रकाशवत् स्वत एव दृक् सर्वदृशां समीक्षमाण एवंभूतस्त्वं स्वकीयां मुक्तिमिच्छतां नो गुरुर्वृतः।।५०।। संसारी जीवो गुरुः संसारिणं जीवमसतीं गतिमादिशते, यया गत्या दुरत्यं संसृतिरूपं ध्वान्तं प्राप्नुयात्, त्वं तु सफलं ज्ञानमादिशसे, येन जनोऽञ्जसा वैष्णवं स्थानं प्रपद्यते।।५१।। हे भगवन्! त्वं सर्वलोकस्य हितैषी, प्रियः नियन्ता, धारक-आत्मा, गुरुरभीष्टसिद्धिश्च भवसि, तथापि हृदि सन्तं भवन्तं विषयलब्धुकामो अन्यधीर्जनो -

तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय। छिन्ध्यर्थदीपैर्भगवान् वचोभिर्ग्रन्थीन् हृदय्यान् विवृणु स्वमोकः।।५३।। *श्रीशुक उवाच* – इत्युक्तवन्तं नृपतिं भगवानादिपूरुषः। मत्स्यरूपी महाम्भोधौ विहरंस्तत्त्वमब्रवीत्।।५४।। पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम्। सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः।।५५।। अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम्। नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम्।।५६।। अतीतप्रलयापाय उत्थिताय स वेधसे। हत्वासुरं हयग्रीवं वेदान् प्रत्याहरद्धरिः।।५७।। स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः। विष्णोः प्रसादात् कल्पेऽस्मिन्नासीद् वैवस्वतो मनुः।।५८।। सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः। संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात्।।५९।। अवतारो हरेर्योऽयं कीर्त्तयेदन्वहं नरः। सङ्कल्पास्तस्य सिध्यन्ति स याति परमां गतिम्।।६०।। प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा।

।। सङ्ग्रहोक्तिः ।।

न जानातिं।।५२।। तं देववरं वरेण्यमीशं त्वामहं स्वात्मपरमात्मयाथात्म्यज्ञानाय प्रपद्ये, अतः हे भगवन्! परमात्मस्वरूपप्रकाशकैर्वचोभिर्हृदय्यान् ग्रन्थीन् छिन्धि, स्वकीयं स्वरूपं च प्रकाशय।।५३।। *श्रीशुक उवाच* – एवं प्रार्थयन्तं सत्यव्रतं नृपतिमादिपुरुषो मत्स्यरूपी भगवान् प्रलयार्णवे विहरन् सन् तत्त्वमब्रवीत्।।५४।।दिव्यां सांख्ययोगक्रियावतीं तां मत्स्यपुराणसंहितां तथाऽऽत्मनो रहस्यमशेषतः सत्यव्रतस्य राजर्षेरब्रवीत्।।५५।।भगवता प्रोक्तं आत्मनो याथात्म्यं सनातनं ब्रह्म ऋषिभिः साकं नाव्यासीनः सन्नेव नृपोऽसंशयमश्रौषीत्।।५६।। स हरिरतीतप्रलयावसाने शयनादुत्थाय हयग्रीवं हत्वा वेदानादाय ब्रह्मणे ददौ।।५७।। स एव सत्यव्रतो राजा प्रलयावसाने विष्णोः प्रसादाद् ज्ञानविज्ञानसंयुतः सन्नस्मिन् कल्पे वैवस्वतो मनुरासीत्।।५८।।मायामत्स्यस्य शार्ङ्गिणो हरेः, राजर्षेः सत्यव्रतस्य च संवादयुक्तं महदाख्यानं श्रुत्वा पुमान् किल्बिषात् मुच्येत।।५९।।।यो नरो हरेरमुमवतारं तच्चरित्रं च प्रत्यहं कीर्त्तयेत् तस्य मनोरथाः सिद्ध्यन्ति देहान्ते च स परमां गतिं याति।।६०।। यो मत्स्यमूर्त्तिर्भगवान् प्रलयार्णवे विहरन् सुप्तशक्तेर्ब्रह्मणो मुखेभ्यो निःसृतं श्रुतिगणं हयग्रीवं हत्वा प्रत्याहृत्य धात्रे

दितिजमकथयद् यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्मीनं नतोऽस्मि ।।६१।।

इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे चतुर्विंशोऽध्यायः ।।२४।।


❁ इति अष्टमस्कन्धः समाप्तः ❁

।। सङ्ग्रहोक्तिः ।।


ददौ तथा सत्यव्रताय ऋषिभ्यश्च मत्स्यपुराणमकथयत्, तं सर्वकारणं जिह्ममीनं तं हरिमहं नतोऽस्मि ।।६१।।

इति श्रीमद्भागवतेऽष्टमस्कन्धे सङ्ग्रहोक्त्यां चतर्विंशोऽध्यायः ।।२४।।

❁ इति श्रीमद्भागवते सङ्ग्रहोक्तिटीकायां अष्टमस्कन्धः समाप्तः ❁



श्रीमद्भागवतस्यैषु स्कन्धौ दशमपञ्चमौ ।
सर्वाधिकतया ज्ञेयौ कृष्णमहात्म्यबुद्धये ॥ श्लोक ९८ ॥ शि.
भगवान स्वामिनारायण



प्रकाशकः
श्रीस्वामिनारायण साहित्य प्रकाशन मन्दिरम्
श्रीस्वामिनारायण गुरुकुल, से-२३ गांधीनगर - (गुजरात)